
सरस्वती महती महीयताम्

वाक्यप्रदीपिका
(VAKYAPRADIPIKA)



लेखकः
डा. केशवराजशर्मा आचार्यः

वि.सं. २०७५

ॐ श्रीगणेशाय नमः, ॐ श्रीसरस्वत्यै नमः, ॐ वेदपुरुषाय नमः

मुनित्रायाय भट्टोजिदीक्षिताय च नमः ।

वाक्यप्रदीपिका

डा. केशवराजशर्मा आचार्यः

वि.सं. २०७५

प्रकाशकः- लेखकः
चन्द्रागिरि नगरपालिका
वार्ड नं.१३, पुरानो नैकापः
(विभाजितखण्डसंख्या त्रयोदश, पुराणो नैकापः)
सद्भावनगरम्.
दूरभाषा - ०१-५१३००३४
९८६१७२८४५६

प्रथमसंस्करणम् - ५०० प्रति

मूल्यम् रू.- **३७५ ।-**

प्रकाशितः-म् - वर्षः-म् - वि.सं. २०७५, स्वस्थानी पूर्णिमा
(वर्षमस्त्रियामित्यमरः)

मुद्रण - आर.एस. पेपर प्रोडक्ट
वार्ड नं. १३, पुरानो नैकाप
सद्भावनगर, काठमाडौं.

ISBN: 978-9937-0-5395-2



शुभाशंसा

प्रा. माधवराजगौतमः
उपकुलपतिचरः
नेपालसंस्कृतविश्वविद्यालयः

विश्वस्य प्राचीनासु भाषासु संस्कृतभाषा प्राचीनतमा विश्वभाषाधारभूता निर्दोषा वैज्ञानिकी चास्ति । संसारस्य प्रथमं साहित्यं वैदिकसाहित्यमस्ति । अस्यामेव भाषायामुपलब्धोऽस्ति ऋग्वेदः । ज्ञानविज्ञानयोः सकलशाखासु संस्कृतसाहित्यं प्राचुर्येण विद्यमानत्वाद् विशिष्टमास्पदमैतिह्यञ्च विभर्ति । संश्लेषणविश्लेषणरूपवैशिष्ट्यात् अत्युन्नतकम्प्यूटरसदृशवैज्ञानिकयन्त्राणां कृतेऽद्यापि संस्कृतभाषैव उपयुक्ततमेति विज्ञातारः प्रत्यपादयन् ।

कस्यापि भाषायाः ज्ञानाय व्याकरणस्य सम्यक् ज्ञानं भवत्यावश्यकम् । यतो व्याकरणं भाषाप्रवाहें उत्पत्स्यमानान् दोषाञ्च निवार्य भाषायाः शुद्धस्वरूपं रक्षति । संस्कृतसदृशविशिष्टभाषाया ज्ञानाय तु व्याकरणज्ञानं नितान्तमपेक्षितम्, न च व्याकरणज्ञानमन्तरा संस्कृतभाषायाः पाण्डित्यं केनाऽपि लब्धुं शक्यते । संस्कृतभाषाया उत्पत्तिकालादेव संस्कृतव्याकरणशास्त्रस्य निर्माणं प्रारब्धमित्यवगम्यते । अनादिकालादद्यतनकालपर्यन्तप्रवर्तमानस्य सृष्टिप्रलयचक्रस्य ज्ञानविज्ञाननिधिभूता वेदा जगदधिष्ठातुः ब्रह्मणः निश्वासान्निःसृताः स्वीक्रियन्ते । तेषामेव वेदानां संरक्षणाय व्यवहारे संप्रयोगार्थञ्च शिक्षा, कल्पः, ज्योतिषम्, छन्दः, निरुक्तम्, व्याकरणमिति षड् वेदाङ्गानि प्रणीतानि । तेषु चाङ्गेषु वेदानां मुखस्थानीयं प्रधानाङ्गरूपं व्याकरणशास्त्रं समादृतं प्राक्तनैर्महर्षिभिर्मनीषिभिश्च । सर्वशास्त्रेषु प्रथितमाहात्म्यस्य व्याकरणशास्त्रस्य सर्वविद्यानामादिमः स्रोतभूतो ब्रह्मैवास्य शास्त्रस्यापि प्रथमप्रवर्तकः स्वीक्रियते । यद्यपि सम्प्रति ब्रह्मोपदिष्टं व्याकरणस्वरूपं ग्रन्थरूपेण नोपलब्धम् । तथाप्यत्र "इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा, बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विदमक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः 'इति ऋक्तन्त्रवचनं प्रमाणभूतम्[1] । अक्षरसमाम्नायस्य प्रथमवक्तृत्वेन स्मृताद् ब्रह्मणः आरभ्य पाणिनिं यावत् अनेकैर्मनिषिभिर्व्याकरणं व्यरचि । आचार्ययुधिष्ठिरमीमांसकाः "पञ्चाशीतिव्याकरणप्रवक्तारः सन्ति पाणिनेः पूर्ववर्तिनः' इति सप्रमाणं व्याकरणशास्त्रस्येतिहासे प्रतिपादयाञ्चक्रुः ।

ब्राह्ममैशानमैन्द्रञ्च प्राजापत्यं बृहस्पतिम् ।
त्वाष्ट्रमापिशलञ्चेति पाणिनीयमथाष्टकम् ॥

इति हैमबृहद्वृत्त्यवचूर्णिग्रन्थे प्रमुखाणां तत्काले प्रसिद्धानां वैयाकरणानामुल्लेखोऽस्ति । वोपदेवस्य कविकल्पद्रुमारम्भे-

इन्द्रश्चान्द्रः काशकृत्स्नापिशली शकटायनः ।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः ॥

---

[1] ऋक्तन्त्रम्, १.४ ।

इति अष्टानां प्रसिद्धानां शब्दशास्त्रज्ञानामुल्लेखो विद्यते । आचार्यः पाणिनिः स्वयमपि अष्टाध्याय्यां दशाचार्यान् स्मरति । एतैः प्रमाणैः सिद्ध्यति- नवनवानि सरलानि व्याकरणानि रचयितुं काले काले प्रयासो व्यधायि । तेष्वधुना पाणिनेः, अष्टाध्यायी एव न केवलं सम्पूर्णतः उपलब्धा अपि तु अध्ययनाध्यापनक्रमे प्रवर्तमाना विभिन्नाभिः व्याख्याभिः सम्वर्धिता समलङ्कृता च संस्कृतभाषाविद्यते । तादृश्याः संस्कृतभाषायाः कात्स्न्र्येन ज्ञानाय तासां व्याख्यानां ज्ञानमपि परमसहायकमपि बोभवीति ।

पाणिनिना महेश्वराद् "अइउण् ' इत्यादीनि चतुर्दशसूत्राणि समवाप्य तदुवजीव्यानि चतुःसहस्रकल्पानि सूत्राणि अष्टास्वाध्यायेषु विभज्य प्रणीतानि । तत्र पाणिनिना संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्चेति षोढा, तदनुगुणितानि प्रतिषेधः, अपवादः, विभाषा निपातञ्चेति चतुर्धा च सूत्राणि प्रणीय शब्दानुशासनस्य सरलो लघुश्च पन्थाः प्रादुष्कृतः । तदनु पाणिनिसूत्रेषु उक्तानुक्तदुरुक्तदोषदूरीकरणार्थं महावैयाकरणेन कात्यायनेन वार्तिकानि विरचय्य पाणिन्युपज्ञं व्याकरणं सम्पोषितं सम्वर्धितञ्च । तदनन्तरं शेषावतारेण भगवता पतञ्जलिना सूत्रवार्तिकानि समालोच्य महाभाष्यं विरचय्य पाणिनिव्याकरणगतं न्यूनातिरिक्तत्वं सर्वथा निर्मलीकृत्य परिपूर्णत्वं समपादि ।

अष्टाध्याय्या आरम्भकालात् विक्रमस्य द्वादशशताब्दीं यावत् व्याकरणस्याध्यापनमष्टाध्यायीक्रमेणाभूत् । अष्टाध्यायीसूत्राणां बहवः वृत्तिग्रन्था आसन् । तन्मध्ये काशिकावृत्तिः (वि.सं.६५०-७००) भागवृत्तिः (वि.सं.७०२-७०५) इन्दुमतिवृत्तिः (वि.सं.११५० पूर्व) इत्यादयो वृत्तिग्रन्थाः श्रेष्ठाः प्रमाणायोपकल्पन्ते । अष्टाध्यायीक्रमे सूत्रपाठधातुपाठोणादिपाठगणपाठान् लिङ्गानुशासनञ्चाधीत्य छात्राः एकैकशः सूत्राणामुदाहरणानि पठन्ति स्म । अधिकसमयापेक्षत्वात् शनैः शनैः अष्टाध्यायीक्रमेण प्रयोगसाधनप्रक्रिया शिथिलतामभजत् । तत्स्थाने अष्टाध्याय्या अध्यापनाय प्रक्रियानुसारिक्रमस्यारम्भोऽभूत् । अष्टाध्याय्या प्रक्रियाग्रन्थेषु सर्वप्रथमं बौद्धभिक्षुणा धर्मकीर्तिना (वि.सं.११४०) रूपावतारनामाख्यो ग्रन्थो निरमायि । तदनु काशिकावृत्तेरधिकविस्तृतेन छात्राणां दुरवधेयत्वमवलोक्य छात्राणामुपकाराय रामचन्द्राचार्येण (वि.सं.१४५०) रूपावताराद् विस्तृतव्याख्यायुता प्रक्रियाकौमुदी प्रणीता । तदानीं प्रक्रियाकौमुदी विदुषां समाजे प्रशस्ता लोकप्रिया चासीद् । ततश्च काशिकावृत्तौ धातुपाठस्य उणादिपाठस्य फिट्स्वरपाठस्य लिङ्गानुशासनस्य च विरहेण व्याकरणसाहित्यस्यैकेनैव ग्रन्थेन छात्राणां ज्ञानसम्पत्तये लक्ष्मीधरसूनुना भट्टोजिदीक्षितेन (वि.सं.१५७०-१६५०) सकलाया अष्टाध्याय्या अष्टाध्यायीक्रमेण व्याख्या शब्दकौस्तुभनामा तत्सारभूता वैयाकरणसिद्धान्तकौमुदी तद्व्याख्यानभूता प्रौढमनोरमा च निरमायिष[१] । एवंरीत्या पाणिनिव्याकरणस्य प्रक्रियाधारायां ग्रन्थटीकारचनाप्रणाली अग्रे सारं सारं भट्टोजिदीक्षितप्रणीता सिद्धान्तकौमुदीं सम्प्राप्य पूर्णतामवाप । रूपावतारे स्वरवैदिकप्रक्रियाया अभावः, प्रक्रियाकौमुद्यां २४७० सूत्राण्येव व्याख्यातानि सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन सम्पूर्णाष्टाध्यायीस्थितानि सूत्राणि प्रयोगदृष्टया प्रक्रियाक्रमेण सम्यक् व्यवस्थाप्योपन्यस्तानि । ततश्च वैयाकरणसिद्धान्तकौमुद्या दुरवधेयतामवगत्य भट्टोजिदीक्षितान्तेवासिना दुर्गातनयेन वरदराजेन (वि.सं.१५८५) सारकौमुदी, लघुकौमुदी, मध्यकौमुदी गीर्वाणपदमञ्जरी नामानो ग्रन्था निर्मिताः । एतैः प्रमाणैः सिध्यति नवनवानि सरलानि व्याकरणानि रचयितुं काले काले प्रयासो व्यधायि । अद्यत्वेऽपि सरलतया संस्कृतभाषाशिक्षणाय नूतना विधयो नूतनाः पद्धतयश्च आविष्क्रियमाणा अवलोक्यन्ते ।

---

[१] इत्थं वैदिकशब्दानां दिङ्मात्रमिहदर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥इति सिद्धान्तकौमुदी कृदन्तसमाप्तौ ।
फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥ इति भूषणकारिकायाम् । 'अतो लोपः' इति सूत्र प्रौढमनोरमायां विस्तरः शब्दकौस्तुभे बोध्यः । इत्यस्य व्याख्याने 'कौस्तुभे पाष्ठे' इति शब्दरत्ने उक्तं सङ्गच्छते ।

सन्दर्भेऽस्मिन् विद्यावारिधिना प्राध्यापककेशवराजशर्माचार्यवर्येण सप्तमाध्यायसमन्वितं वाक्यप्रदीपिकाख्यग्रन्थरत्नं पाणिनीयमहाशास्त्रार्णवं तितीर्षूणां सुकुमारमतीनां छात्राणां सौविध्याय विरचितोऽयं लघीयान् पोतः । जना व्यवहारे सुबन्तानि तिङन्तानि च पदानि उच्चारयन्ति । संभाषणलेखनपठनपाठनादिव्यहारेषु वाक्यं विना कोऽपि जनोऽन्यं जनं स्वाभिप्रायं बोधयितुं न प्रभवति । पदपदार्थज्ञानं विना वाक्यार्थस्य ज्ञानं न भवति । अत एव भण्यते "वाक्यर्थज्ञाने पदार्थज्ञानं कारणम्" । कर्तृकर्मकरणादिकारकैरन्विता योग्यताकाङ्क्षासत्तिभिः संयुता क्रिया वाक्यं भवति । साङ्गतिकैः पदैस्तेषामर्थैश्च युक्तं वाक्यमेव प्रामाणिकं मन्यन्ते आचार्याः । कस्यापि पदस्य वाक्यस्यार्थस्य परिच्छेदस्य लिखितविषयस्य च सङ्गतिरवश्यमेवापेक्ष्यते । संस्कृतभाषायां कर्तृकर्मभाववाच्येषु निष्पन्नानि त्रिविधानि वाच्यानि भवन्ति । एवमेव प्रकारेण अग्रे सारं सारं कर्तृकर्मभाववाच्यानां क्रियापदचिन्तनम्, वाच्यपरिवर्तननियमाः, विशेष्यविशेषणयोर्ज्ञानादिशीर्षकाणि ग्रन्थेऽस्मिन् प्रथमेऽध्याये वर्णितानि सन्ति । द्वितीयेऽध्याये तिङन्तक्रियाचिन्तनम्, तृतीयेऽध्याये अतिङन्तक्रियाचिन्तनयम्, चतुर्थेऽध्याये कारकविचारः, पञ्चमेऽध्यायेऽजहदजहल्लिङ्गविचारम्, षष्ठेऽध्याये समासविचारम्, सप्तमेऽध्याये तद्धितविचारमुपस्थाप्य ग्रन्थोऽयं पूर्णतां गतः ।

अद्यतनपरिस्थितौ उपेक्षितां संस्कृतभाषापठनपाठनपरम्परामुद्दिधीर्षुणा पण्डितकुलावतंसेन डा.केशवराजशर्माचार्येण विदुषा विरचितमिदंपाणिनीयसूत्रसम्वलितपादटिप्पण्याद्यलङ्कृतं वाक्यप्रदीपिकाख्यं पुस्तकरत्नं छात्राणामुपकाराय विदुषांञ्च प्रमोदाय कल्पिष्यत इति विश्वसिमि ।

संस्कृतभाषाया व्याकरणं परमरमणीयं विस्तृतं वैज्ञानिकञ्च विलसति । परमधुना प्रचलितायाः पाठनपद्धतेर्दोषात् संस्कृत सरसमपि नीरसं मृदुलमपि कर्कशं रुचिसम्वर्धकमपि अरुचिविधायकं प्रतिभाति । स्वल्पेनैव कालेन स्तोकेनैवायासेन संस्कृतभाषामधिगन्तुकामानां छात्राणां कृते एवं विधानां ग्रन्थानां न्यूनत्वमपि वर्तते । देववाण्युत्कर्षमेव निजोत्कर्षं मन्यमानेन नवीनपद्धत्युत्पादनकुशलान्तःकरणेन प्राध्यापकेन केशवराजशर्माचार्यमहोदयेन ग्रन्थरत्नमिदं प्रणीय समुपस्थापितम् ॥ ग्रन्थेऽस्मिन् पाणिनीयव्याकरणस्य शिक्षणानुकूलान् विषयान् निभाल्य साम्प्रतं परमानन्दसन्दोहं बिभर्ति मदीयं चेतः । एतादृशैरेव कार्यजातैः छात्राणां सुशिक्षणाय तेषु संस्कृतभाषाज्ञानोत्कर्षाधानाय च विशिष्टसहयोगः सम्पत्स्यते । अनेनैव रीत्या संस्कृतभाषासम्बद्धानामन्येषामपि ग्रन्थानां प्रणयने विदुषां केशवराजशर्मणां प्रवर्तना सदैव स्यादिति निवेदयितुञ्च मदन्तःकरणं मुखरयति माम् । पुस्तकमिदमनुसृत्य युगानुकूलशिक्षणविधिमङ्गीकृत्य मनोविज्ञानञ्चात्मसात्कृत्य शिक्षकाः पाठयेयुः, प्रशिक्षार्थिनश्च धैर्यं रुचिं जिज्ञासां श्रद्धाञ्च पुरस्कृत्य पठेयुरेतेन शिक्षका व्याकरणशिक्षणे छात्राश्च व्याकरणज्ञानार्जने सफला भविष्यन्तीति मदीया आत्मीया शुभाशंसा चास्ति ।

पर्यन्ते चास्य विविधग्रन्थेष्वाकीर्णान् व्याकरणसम्वद्धविषयान् महताध्यवसायेन सङ्कलय्य नूतनपद्धत्या व्यवस्थाप्य संस्कृतव्याकरणशिक्षणोन्मुखं वाक्यप्रदीपिकाख्यं ग्रन्थरत्नं निर्माय संस्कृतभाषाया जिज्ञासूनां छात्राणामुपकारविधौ दत्तचेतसे प्राध्यापकाय डा.केशवराजशर्ममहोदयाय सहर्षं साधुवादं प्रयच्छन्निहैव विरमामि शब्दैरेभिरहम् । ॐशिवमस्तु ।

गङ्गादशहरा, अधिकजेष्ठ, २०७५ ।

माध्व प्र. लामिछाने

मोबाइल नं. ९७४१०३७००९
फोन नं. ४४६८३२५

ॐ

विद्ययाऽमृतमश्नुते





आचार्य पूर्णचन्द्र ढुंगेल उपाध्यायः
नव्यव्याकरण-नव्यन्याय-वेदान्त-ज्योतिष-सांख्ययोग-पुराणेतिहाससाहित्याचार्यः
लब्धानेक स्वर्ण पदक व्याख्यान, वाचस्पति एवं प्रखर विचारकः
पुरस्कृत एवं सम्मानित राज्य सरकार, उत्तरप्रदेशः
विद्यावाचस्पति, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
अध्यक्षः संस्कृत रक्षा समिति, उत्तरप्रदेश (१९८१ से २००१ तक)
अध्यक्षः प्रादेशिक संस्कृत प्राध्यापक संघ (१९९० से १९९५ तक)
राष्ट्रीय एवम् अन्तर्राष्ट्रीय अध्यक्ष, सार्वभौम ब्राह्मण महासभा
विद्वच्चक्र चूडामणि, विश्व हिन्दू परिषद् ।

पूर्वप्राचार्यः
वेदवेदाङ्ग संस्कृत महाविद्यालय , वाराणसी ।
जनता महाविद्यालय, बिजौरीदाङ्ग , नेपालः ।
भगवानदास संस्कृत महाविद्यालय, हरिद्वारम् ।
गोरक्षनाथ संस्कृत विद्यापीठ, गोरखपुरम् ।
(चारों प्रथम श्रेणी के स्नातकोत्तर महाविद्यालय)(१९५६ से १९९५)
पूर्व उपकुलपति, नेपाल संस्कृत विश्वविद्यालय, नेपालः ।
दुरभाषः ९८४१६८५८८०

पत्राङ्कः ३७।२०७५ — दिनाङ्कः १८।०१।२०७५

हार्दिकशुभकामना

यस्मिन्सृष्टिस्थितिध्वंसनिग्रहानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वत् साम्वं शिवमहं भजे ॥

इदं सत्याप्य ते यच्छ्रीशुक्लयजुर्वेदाचार्यविद्यावारिधिना केशवराजशर्माऽऽचार्येण महोदयेनच्छात्राणामध्यापकानां च कृते सश्रमं बहूनां ग्रन्थानां पर्यालोचनपूर्वकं निर्मितेयं कृतिर्मयाऽऽदितोऽन्तं यावत्सादरमवलोकिता ।

कृतिरियं सर्वथा उपयुक्ता सर्वेषां संस्कृताऽमृतभाषाया जिज्ञासूनां कृते परमोपयोगिनी जाताऽस्ति । प्रखरवैयाकरणोऽपि विद्वानेतादृशीं कृतिं निर्मातुं महाप्रयासेनैव सक्षमः स्यादित्यहं मन्ये । सर्वविद्याकलापरमतीर्थो भगवान्शङ्करोऽस्य प्रचार-प्रसारसम्बन्धे दृष्टिं दद्यादिति शिवम् ।

आचार्यपूर्णचन्द्र ढुंगेल:

निवेदनम्

शब्दशास्त्रं महासागरोऽस्ति । शब्दसागरं तितीर्षूणां व्याकरणं सहायकं भवति । यतः शब्दसागरं ज्ञातुं व्याकरणस्य ज्ञानमावश्यकं भवति । व्याकरणस्य ज्ञानं विना कोऽपि संस्कृतक्षेत्रे पदमेकमपि चालयितुं न प्रभवेत् । अयं विचारः सर्वेषामाचार्याणां विदुषां च लभ्यते ।

यो व्याकरणस्यानभिज्ञः पाठकः संस्कृतस्य वाक्यं ज्ञातुं लिखितुं च वाञ्छति । तस्याग्रे काः काः समस्याः समुपतिष्ठन्ते स एव जानाति । कस्यापि लेखे वाक्यं शुद्धं भवेदिति सर्वेऽपेक्षन्ते । परं वाक्यं शुद्धं कथं भवति । व्याकरणस्य कुत्राध्ययनेन पाठकस्य संस्कृते प्रवेशो भवति । ततः संस्कृतं पठितुं लिखितुं च कथं सरलमनुभवति पाठक इत्यादयः सन्ति चिन्ताया विषयाः ।

अहं व्याकरणस्य विज्ञो नास्मि । मनसश्चापल्येन व्याकरणस्य विषये यत्किञ्चिल्लिख्यते । तदौचित्यं न स्यात् । तथापि स्वस्य ज्ञानाय परोपकाराय च लेखो भवेदित्याशया लेखने प्रवर्ते ।

संस्कृतपरम्परायां व्याकरणस्य पठनपाठनक्रमे प्रक्रियाप्रणाली किमर्थमपेक्ष्यते इति जिज्ञासायां वस्तुतः प्रक्रियाप्रणाल्या भाषायास्तस्या अर्थस्य च संरक्षणं भवति । शब्दस्य निष्पन्नार्थं तस्यार्थस्य च बोधनार्थं सामान्या प्रक्रियाप्रणाली पाठकस्य सहयोगं करोति । यया प्रणाल्या शब्दविषये पाठकः सबलो भवेत् । पाठकः केवलं भाषान्तरस्य सहयोगेन संस्कृतशब्दास्यार्थं ज्ञातुं प्रभवेत् । परं स संस्कृतशब्दस्य व्युत्पत्तिं सम्बोद्धुं कथमपि समर्थो न भवेत् । तदा पाठकः शब्दस्यार्थस्य निर्णयार्थं संशये किं न निपतेत् । यतो व्याकरणस्य सामान्या प्रक्रियाप्रणाली पाठकस्यावश्यं सहयोगं करोति । साऽद्यत्वे प्रायोऽभावोऽनुभूयते । सा यत्र भवेत् । तच्छोभनमेव ।

यस्या भाषायाः प्रौढं व्याकरणं न भवति । सा भाषा विचलिता भवति । ततो भाषाविषये बहवो विवादा आयातुं शक्नुवन्ति । पश्चाच्छनैः शनैः सा भाषा लोपोन्मुखाऽपि भवेत् ।

अद्यत्वे शब्दसिद्धेः प्रक्रियाप्रणालीं विना पाठकेन संस्कृतं ज्ञातुमभिलषितं दृश्यते । तयाऽभिलाषया पाठकस्य मनसि स्थितस्य भावस्य पूर्तिः स्यान्न वा । तां पाठक एव जानीयात् । केवलं पाठकाय काऽपि समस्या नायात्विति मे विचारः ।

शब्दज्ञानाय ज्ञातव्यानि क्षेत्राणि बहूनि सन्ति । तेषु क्षेत्रेष्वादौ नाम्नो धातोश्च रूपाणां ज्ञानमावश्यकं भवति । तयो रूपसिद्धिप्रक्रियाया ज्ञानं गुरुमुखं विना कथमपि न संभवति । तथापि पाठकः कस्मादपि गुरोर्नाम्नो धातोश्च रूपाणां तयोरर्थस्य च ज्ञानं करोति चेत्तच्छोभनं स्यात् । संस्कृतपठने नामरूपावलेर्धातुरूपावलेश्च ज्ञानं सदा सर्वथाऽऽवश्कं भवति । कोशग्रन्थस्याध्ययनं कस्यापि पाठकस्य कृते शोभनमेव । नामधातुरूपयोर्ज्ञानानन्तरं वाक्यप्रदीपिकां पठितुं प्रारम्भते चेत्तदतीव सुन्दरं भवेत् ।

मया मुख्यरूपेण कारकं समासं च समाश्रित्य कर्तृभावकर्मणामतीवाल्पानां तिङन्तक्रियायां कारकस्य प्रयोगे समागतस्य कृदन्तस्य किञ्चिदंशमजहलिङ्गादीनां तद्धितस्य च सामान्यमंशं समाविश्य वाक्यप्रदीपिका विरचिताऽस्ति ।

अस्यां प्रदीपिकायां सप्ताध्याया विहिता सन्ति । अत्रादौ प्रथमेऽध्याये संस्कृतभाषाचिन्तनादिविषया द्वितीयेऽध्याये कर्तृभावकर्मणां तिङन्तक्रियायां सामान्यदिग्दर्शनं तृतीयेऽध्याये कृत्यक्तक्तवतुखल्प्रत्ययान्तक्रियाणां सामान्यदिग्दर्शनं चतुर्थेऽध्याये मुख्यक्रियायां गौणक्रियायामुपपदानां योगे च कारकाणां प्रयोगविधिः पञ्चमेऽध्यायेऽजहल्लिङ्गविशेष्यविशेषणयोः प्रयोगस्य दिग्दर्शनं यत्तदादिशब्दानां सर्वादिशब्दैर्नामवाचकशब्दैश्च सह प्रयोगोऽव्ययानां प्रयोगः कालबोधकेषु लकारेषु निष्पन्नायाः क्रियायाः प्रयोगविधिर्विशेषकालस्यार्थानामुद्देश्यविधेययोश्च प्रयोगस्य विषया उपसर्गाणां प्रयोगस्य दिग्दर्शनं शब्दानां सन्धिनियमश्च षष्ठेऽध्यायेऽव्ययादिसमासानां प्रसङ्गः सप्तमेऽध्याये तद्धितस्य प्रयोगस्य सामान्यदिग्दर्शनार्थं कानिचन सूत्राणि क्वचित्क्वचित्स्थले परिशिष्टान्यापि प्रस्तुतानि सन्ति ।

आदौ मातृपितृवात्सल्यस्य स्नेहस्य प्रदातृभ्यामुपनयनादिकर्मणां कारयितृभ्यामध्ययनेऽवसरस्यार्थस्य च दातृभ्यां स्वर्गीयाभ्यां गुरवे मात्रे नन्दकुमारिदेव्यै गुरवे पित्रे शिवकुमारशर्मणे साष्टाङ्गपातमर्पये ततो मातामहीवात्सल्स्य स्नेहस्य प्रदात्र्यै वाल्यावस्थायामध्ययनस्य सर्वाया व्यवस्थाया मेलयित्र्यै मातामह्न्यै वाग्ले इत्यपनामधेयायै गौरीदेव्यै च नमनम् । त्रितुङ्गे क्रियापानीग्रामे निवासिनो गुरोस्तीर्थराजशर्म्मणो नवपानीयाद्गुणादिग्रामे निवासिनो गुरोर्हरिभक्तखनालाच्चामरकोशं लघुकौमुदीं चाधीतवान् । स्वर्गीयाय तस्मै वेदगुरवे प्रा. सोमनाथशर्म्मणे पौडेलाय वर्तमाने विराजमानाय विद्यावारिधिकारयित्रे प्रा.डा.ऋषिरामपोखरेलाय च हार्दिकं नमनं करोमि । ममाध्ययनस्य मार्गदर्शकान्तान्सर्वान्प्रति हार्दिकमाभारं हार्दिकीं कृतज्ञतां च प्रकटयामि ।

श्रद्धेयौ आदरणीयौ च विद्वांसौ पूर्वोपकुलपतिः प्रा. माधवराजगौतममहोदयो । गोरक्षनाथ-संस्कृत-विद्यापीठस्य गोरखपुरस्य पूर्वप्राचार्यः पूर्वोपकुलपतिश्च आचार्यः पूर्णचन्द्रढुङ्गेलमहोदयश्च स्वस्य स्वस्यामूल्यं समयं प्रदाय मया ग्रथितां वाक्यप्रदीपिकामवलोक्यास्याः वाक्यप्रदीपिकाया विषये गौतममहोदयः हार्दिकशुभाशंसां ढुङ्गेलमहोदयश्च हार्दिकशुभकामनां विलिख्य ग्रन्थस्य मन्तव्यं दत्तवन्तौ स्तः । तौ द्वौ विद्वांसौ प्रति हार्दिकमाभारं हार्दिकीं कृतज्ञतां च प्रकटयामि ।

स्वर्गीयो गुरुः प्रा. हरिप्रसादाचार्यमहोदयो वर्तमाने विराजमानाः प्रा. डा. विष्णुप्रसाददेवकोटामहोदयः, प्रा. ध्रुवप्रसादज्ञवालीमहोदयः प्रा. डा. माधवशरणमहोदयः प्रा.डा.शालिग्रामसुवेदीमहोदयः सह.प्रा.-भीमप्रसादकण्डेलमहोदय उपप्राध्यापको विदुरप्रसादपौडेलमहोदयश्च व्याकरणस्य सम्बन्धितविषये महत्वपूर्णं सहयोगं दत्तवन्तः सन्ति । यतः एतान्विदुषः प्रति हार्दिकीं कृतज्ञतां प्रकटयामि ।

अस्य ग्रन्थस्य मुद्रणादिकार्यं व्यवस्थाप्य ग्रन्थाकारानयनपर्यन्तस्यार्थिकव्ययभारं गृहित्वा सहयोगस्य प्रदातारं महालेखापरीक्षकस्य कार्यालयस्य सचिवं जामातरं बाबुरामगौतमं प्रति कृतज्ञतामाभारं च प्रकटयामि । मुद्रणकर्मणि (टङ्कणकर्मणि) सहयोगदात्रे टङ्कणकर्त्रे विष्णुगोपालडङ्गोलाय धन्यवादं ददामि । कार्गलपत्रे मुद्रितायां पङ्क्तौ त्रुटितान्यक्षराणि मेलयितुमन्यकार्यं च सम्पादयितुं सहयोगदात्रे शुभोदयाय पुत्राय उपप्राध्यापकाय देवराजाचार्याय साधुवदमाशीर्वादं च ददामि । सहधर्मिण्या जयन्तीदेव्या वध्वा नानीमैयादेव्या च लेखनादिकार्ये समयं दत्वा यः सहयोगः प्रदत्तः । ताभ्यां साधुवादं प्रददामि ।

अस्य ग्रन्थस्य प्रणयनक्रमे यथासंभवं वाक्यमर्थं च सरलेन बोधयितुं भाषा सरलाऽवलम्बिता , स्थले स्थले सन्धिरपि कृतो नास्ति ।

तेषां कृते मया नैषा कृतिश्च ग्रथिता बुधाः ।
येषां व्याकरणं भाति हस्तामलकवत्स्फुटम् ॥
त्रुटिर्यत्र तु लभ्येत तस्याः संशोधनाय च ।
मार्गं दर्शयते यश्च महान्तं तं नमाम्यहम् ॥
गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनाः सर्वे समादधति सज्जनाः ॥

डा. केशवराजशर्मा आचार्यः
वि. सं. २०७५
चन्द्रागिरि नगरपालिका, पुरानोनैकापः , वा. नं.-१३
सद्भावनगरम्,काष्ठमण्डपः, नेपालः ।
दूरभाषा-०१-५१३००३४ । ९८६१७२८४५६

विषय-सूची

विषय	पृष्ठम्

विषय	पृष्ठम्

अध्यायः ५ - अजहल्लिङ्गविशेषणादयः **१९९-२४६**

अध्यायः ६ - समासप्रकरणम् **२४७-३२२**

ॐ श्रीगणेशाय नमः

प्रथमोऽध्यायः ॥ १ ॥

मङ्गलाचरणम्

सरस्वतीं प्रणम्यादौ देवीं वाङ्मयमातरम् ।
वाक्यस्वरूपज्ञानाय कुर्वे वाक्यप्रदीपिकाम् ॥

१-१. संस्कृतभाषाचिन्तनम्

संस्कृते शब्दस्यार्थज्ञानार्थमर्थनिर्देशनार्थं वा व्युत्पत्तिः क्रियते । व्युत्पत्तौ विग्रहः प्रकृतिप्रत्ययौ च प्रदर्श्यन्ते । प्रकृतौ प्रत्ययस्य योगेनार्थवोधकशब्दो निष्पद्यते । यथा करोतीति विग्रहे कर्तरि ण्वुलि कृ+ण्वुल्+अक वृद्धौ कारकः, कृ+तृच् गुणे कर्ता । कुम्भं करोतीति विग्रहे कर्तरि कुम्भं कृ+अण् सुपो लुक्यादेर्वृद्धौ कारः । कुम्भ[1] अस् (ङस्) कार सु उपपदसमासेन कुम्भकारः । पचनमिति भावे पच्+घञ् उपाधावृद्धौ पाकः । पच्यतेऽनेन पचनं वेति भावे क्तिनि पक्तिः । पुत्रस्यापत्यमिति पुत्र+अस् अण्प्रत्यये सुपो लुकि आदिवृद्धावकारलोपे पौत्रः । दन्ते भवमिति दन्त+इति यत्प्रत्यये सुपो लुकि अकारलोपे दन्त्यम् । कस्मादिति किम्+तस् कुत इत्यादि । सस्कृते व्युत्पत्तिमात्रेणैव शब्दः सिद्धो न मन्यते । अव्युत्पत्यापि शब्दः सिद्धो मन्यते । यथा रामः, मृगः, मणिः, भू, लट्, अन्यतरः, अन्यतम इत्यादि (सामान्ये नपुंसकमिति नपुंसकम्) । एवं प्रकृतिप्रत्यययोर्योगेन निष्पन्ना व्युत्पन्नाः प्रकृतिपत्यययोरयोगेन निष्पन्नाश्च शब्दा अव्युत्पन्ना प्रोच्यन्ते । यतो हि संस्कृते व्युत्पन्नाव्युत्पन्नाभ्यां रूढो योगरूढो यौगिकश्च शब्दास्त्रिविधाः सन्ति-

क) यः प्रकृतिप्रत्ययावनपेक्ष्याक्षरसमुदायशक्त्या स्वार्थमभिधत्ते स रूढः । यथा रामः, मृगः, मणिः, अन्यतरः, अन्यतमः, लट्, लिट् इत्यादि ।

ख) यः प्रकृतिप्रत्ययावपेक्ष्याक्षरसमुदायशक्त्या स्वार्थमभिधत्ते स योगरूढः । यथा पङ्कजः, अण्डजः, स्वेदजः, कमलज इत्यादि ।

ग) यः प्रकृतिप्रत्यययोर्योगमात्रेण स्वार्थमभिधत्ते स यौगिकः । यथा रामः, हरिः, कर्ता, धर्ता, श्रीः, रमा, राजा, धीमान् इत्यादि ।

एवमाचार्यैः संस्कृतस्य व्युत्पत्याऽव्युत्पत्या च नामवाचका विशेषणवाचका अव्ययवाचकाश्च शब्दाः सिद्धा मन्यन्ते । तेषु मध्ये नामवाचकशब्दानां प्रातिपदिकसंज्ञा भ्वादिशब्दानां धातुसंज्ञा च विधीयते । येषां प्रातिपदिकसंज्ञा विधीयते ततः सुपः[2], येषां भ्वादिशब्दानां धातुसंज्ञा विधीयते ततो लडादयस्तेषां स्थाने तिङ[3]श्च विधीयन्ते । एवं प्रत्ययैः शब्दानां धातूनां च यानि रूपाणि सिद्धचन्ति । ततस्तेषां मुनिना पाणिना सूत्रेण पदसंज्ञा विहिताऽस्ति । तेषां सा संज्ञा किमर्थ प्रयोगश्च कथं क्रियत इति चिन्तनीयो विषयः ।

---

[1] कृता योगे षष्ठी ।

[2] सु औ जश् प्रथमा । अम् औट् शस् द्वितीया । टा भ्याम् भिस् तृतीया । ङे भ्याम् भ्यस् चतुर्थी । ङसि भ्यास् भ्यस् पञ्चमी । ङस् ओस् आम् षष्ठी । ङि ओस् सुप् सम्तमी । एतानि सप्तविभक्तीनामेकविंशति (२१) वचनानि सुपः प्रोच्यन्ते ।

[3] तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, । त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ् । एतेऽष्टादश (१८) लादेशप्रत्ययास्तिङः प्रोच्यन्ते ।

१-२ पदनिर्देशनम् -

संस्कृते सुपस्तिङश्च विभक्तयः[१] प्रत्ययाश्च[२] प्रोच्यन्ते । एभिर्विना शब्दनां स्वरूपाणि न सिद्ध्यन्ति । सदा स्मर्तव्यं यद्धातुभ्यो विहितैः कृ(कृत्य-कृत्-उणादि)त्प्रत्ययैर्नामवाचकशब्देभ्यो विहितैस्तद्धितप्रत्ययैः समासैश्च नामवाचका विशेषणवाचका अव्ययवाचकाश्चेत्यादिशब्दा निष्पद्यन्ते । नामादिवाचकेभ्यः सुपा सुबन्ता धातुभ्यस्तिङा तिङन्ताश्च शब्दा निष्यद्यन्ते । संस्कृते “अपदं न प्रयुञ्जीत” इति नियमोऽस्ति । यतः प्रयोगयोग्यार्थमुभयविधानां शब्दानां व्यकरणनियमेनादौ पदं विधीयते ।

सुप्तिङन्तं पदम् १।४।१४॥

सुबन्तं तिङन्तं च पदसंज्ञं स्यात् । अनेन सूत्रेण सर्वेषां सुबन्तानां तिङन्तानां च शब्दानां पदसंज्ञा भवति । तत उभयविधानां शब्दानां रूपाणि पदानि प्रोच्यन्ते । ततस्तानि प्रयोगार्हाणि मन्यन्ते । यथा - रामः । रमा । ज्ञानम् । अव्ययः - उच्चैः । नीचैः । सह इत्यादि । भवति । याति इत्यादि ।

जनो व्यवहारे सुबन्तानि तिङन्तानि च पदानि प्रोच्चारयति भाषते वा पुस्तके पठति लेखे लिखति प्रयुनक्ति वा । यतो वाक्ये प्रयुज्यानि सुबन्तानि तिङन्तानि च पदानि तेषामर्थं च सावधानतया कष्ठस्थीकुर्यात् धारयेच्च । किञ्चादौ पदार्थस्य ज्ञानं विना वाक्यार्थस्य ज्ञानं न भवति । वाक्यार्थस्य ज्ञानं विना भावार्थं लक्षार्थं च ज्ञातुं सम्भव एव नास्ति । यतो वाक्यार्थज्ञानाय जिज्ञासोरादौ पदार्थस्य ज्ञानमावश्यकं भवति । उक्तञ्च वाक्यार्थज्ञाने पदार्थज्ञानं कारणमिति । रामायणेऽपि ‘आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानत इति (अ.रा. ७५।२५) ॥

१-३ किं नाम वाक्यम् (वाक्यस्य परिभाषा, केन विधिना वाक्यं निष्पद्यते)

वयं मुखेन यानर्थबोधकान्वर्णान्समुच्चारयामः सा भाषा । सा वाक्ये नियमेनाऽऽबद्धा भवति । यतो संभाषण-लेखन-पठनव्यवहारेषु वाक्यं विना कोऽपि जनोऽन्यं जनं स्वाभिप्रायं बोधयितुं न प्रभवति । जनो संभाषणादिव्यवहारेषु प्रकृत्या वाक्यं समुच्चारयति प्रयुङ्क्ते पठति वा लिखति च । वाक्ये नाम (विशेष्यम्) विशेषणमव्ययं क्रियापदं च प्रयुज्यन्ते । नामसु व्यक्तिवाचका जातिवाचकाः समुदायवाचकाः परिणामवाचका भाववाचकाश्च शब्दा अन्तर्निहिता भवन्ति ।

व्याकरणाचार्यैर्वाक्यस्य परिभाषा स्वस्वप्रकारेण कृता प्राप्यते । वार्तिककारः कात्यायन **एकतिङ्वाक्यम्**-वार्तिकम्-भवतीति वदति[३] । कोषकारोऽमरवाणस्तिङ्सुबन्तसमूहो वाक्यमथवा कारकैरन्विता क्रिया वाक्यं भवतीति प्राह -

तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता[४] ।

साहित्यदर्पणकारो विश्वनाथो योग्यतयाऽऽकाङ्क्षयाऽऽसत्या च तिसृभिर्युक्तः सुबन्तानां तिङन्तानां च पदानां समूहो वाक्यं भवतीति ब्रूते -

---

१ पाणिनीयसूत्रम् - विभक्तिश्च १।४।१०४॥ सुप्तिङौ विभक्तिसंज्ञौ स्तः ।

२ पाणिनीयसूत्रम् - प्रत्ययः ३।३।१॥
स्वौजसमौट्० ४।१।२ ॥ ङ्याबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः ।
तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथाम्ध्वमिड्वहिमहिङ् ३।४।७८ ॥ एते लादेशा स्युः ।
भर्तृहरिः - यदा यदा विभज्यन्ते प्रकृतिप्रत्ययादयः ।
आपोद्धरस्तथा वाक्ये पदानामनुवर्तते ॥ वाक्यपदीये २।१० ।

३ वरदराजाचार्यः, लघुकौमुदी, प्रकाशक - गोविन्द-भवन-कार्यालय - गीताप्रेस, गोरखपुर, सं. २०५०वाइसवाँ संस्करण, पृ. ८७ ।

४ अमरवाणः - अमरकोशः - १।६।२

वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः[1] ॥ आसत्तिः समीपता[2] (सन्निधिः) इति ज्ञेया । यतः कर्तृकर्मकरणादिभिरन्विता योग्यताकाङ्क्षासत्तिभिस्तिसृभिर्युक्ता क्रिया [3] वाक्यं भवतीति सर्वसम्मतः पक्षः । किञ्च क्रियाकारकसम्बन्धेन प्रतीयमानो वाक्यार्थो विशिष्टो मिष्टश्च भवति । यथा रामो ग्रामं गच्छति । कृष्णः पुस्तकं पठति । भक्तः शिवं नमति इत्यादि । कर्मकरणादिभिरन्वितानां योग्यतादितिसृभी रहितानां सुबन्तानां तिङन्तानां च पदानां समूहो वाक्यं न भवति । यथा - स वायुना पत्रं लिखति । कृषकोऽग्निना क्षेत्रं सिञ्चति । अग्निः शीतो भवति हिमञ्चोष्णम् । सूर्यः शीतश्चन्द्रश्चोष्णः इत्यादि । यत आचार्या वाक्ये प्रयुक्तानां पदानां साङ्गतिकमर्थमङ्गीकुर्वन्ति न तु विसाङ्गतिकमर्थम् । ते (आचार्याः) साङ्गतिकैः पदैस्तेषामर्थैश्च युक्तं वाक्यं प्रामाणिकं मन्यन्ते ।

यत आदौ पाठको वक्ता लेखकश्च सुबन्तानि तिङन्तानि च पदानि सावधानतयाऽवश्यमभ्यसेयुः (कण्ठस्थीकुर्युः) धारणायां स्थिराणि च विदध्युः । ततोऽभ्यस्तानि (कण्ठस्थीकृतानि) मनसि धृतानि च पदानि कारकविधिना वाक्यं पठितुं लिखितुं चाभ्यसेयुस्तदनुसारं वक्तुं च । इत्थं संस्कृतस्य पदानां प्रयोगस्याभ्यासेन पठन-भाषण-लेखनेषु संस्कृतस्य ज्ञानं वर्धते । कारकविधिं विहाय पठितं (अभ्यस्तं) भाषितं लिखितं च वाक्यमशुद्धं भवति । यो वाक्यमशुद्धमभ्यस्यति पठति च स आजीवनं दुःखं प्राप्नोति । यतः केनापि वाक्यस्याऽभ्यासे पठने भाषणे लेखने च कारकनियमः सर्वथा स्मरणीयः । यदा यः कारकनियमं जानाति तदा स स्वयमन्येन चानियमेनाभ्यस्तस्य पठितस्य भाषितस्य लिखितस्य च पदस्य वाक्यस्य च शुद्धमशुद्धं च जानाति । वाक्यस्य शुद्धाशुद्धयोर्ज्ञानेन पठने लेखने भाषणे च सरलोऽनुभूयते । अत्रापि सदा केनापि पदस्य वाक्यस्यार्थस्य परिच्छेदस्य लिखितस्य विषयस्य विषयानुसारस्य च सङ्गतिरप्यवश्यमपेक्ष्यते ।

१-४ त्रिविधं वाच्यम्

संस्कृते वाच्यानि त्रिविधानि सन्ति कर्तृवाच्यं कर्मवाच्यं भाववाच्यं च । एषु त्रिषु वाच्येषु निष्पन्नानि त्रिविधानि वाक्यानि भवन्ति । तानि वाक्यानि सदास्मरणीयानि ।

१-४-१ कर्तृवाच्ये चिन्त्यं क्रियापदम्

कर्त्रर्थे विहितं वाच्यं कर्तृवाच्यं प्रोच्यते । कर्तृवाच्ये भ्वादिदशगणेषु ण्यन्त-सन्नन्त- यङन्त-यङ्लुङन्त-नामधातु-कण्वादिप्रकरणेषु निर्दिष्टेभ्यो धातुभ्यो लकारस्थाने तिङा तिङन्तानि तेषु तेषु प्रकरणेषु पठितेभ्यः सकर्मकाकर्मकधातुभ्यो भूतकर्तरि विहितेन क्तवतुप्रत्येयन आदिकर्मणि भूतांशकर्तरि विहितेभ्यो धातुभ्यो गत्यर्थाकर्मकश्लिषस्थास. इति सूत्रे गृहीतेभ्यो धातुभ्यो भूतकर्तरि "ञि" इत्संज्ञकेभ्यो धातुभ्यो मतिबुद्धिपूजार्थेभ्यश्चेति सूत्रेण गृहीतेभ्यो धातुभ्यो वर्तमानकर्तरि च विहितेन क्तप्रत्ययेनातिङन्तानि क्रियापदानि निष्पद्यन्ते । इत्थं तिङ्प्रत्येयन क्तक्तवतुप्रत्ययाभ्यां च निष्पन्नैस्तिङन्तातिङन्तैः क्रियापदैः कर्तृवाच्यस्य वाक्यं निष्पद्यते । अत्रापि तिङन्तक्रियापदेन पूर्णं वाक्यं निष्पद्यते । अतिङन्तक्रियापदेनापि वाक्यं तु सिद्ध्यति । परमेतादृशस्य वाक्येऽपेक्षानुसारं प्रधानक्रियापदं प्रयुज्यते । किञ्चातिङन्तक्रियापदमप्रधानक्रियापदं भवति ।

१-४-२ कर्मवाच्ये चिन्त्यं क्रियापदम्

कर्मार्थे विहितं वाच्यं कर्मवाच्यं प्रोच्यते । सर्वेभ्यो दशगणीयेभ्यो ण्यन्तादिषड्प्रकरणेभ्यश्च सकर्मकधातुभ्यः कर्मणि विहितैस्तिङ्यक्-कृत्य-खल्प्रत्ययैर्भूतकर्मणि (भूतकर्मवाच्ये) विहितेन क्तप्रत्ययेन च कर्मवाच्यक्रियापदानि निष्पद्यन्ते । कृत्येन तव्यत्तव्यानीयर्-यत्-क्यप्-ण्यत्प्रत्यया ज्ञेयाः ।

---

१ साहित्यदर्पणः २।१॥

२ सान्निध्यम्, सामीप्यम् समीपता इति पर्यायाः ।

३ क्रियाशब्देन तिङन्तोऽतिङन्तश्चोभौ शब्दौ गृह्येते ।

तिङन्तक्रियापदानि प्रधानक्रियापदानि अतिङन्तानि कृत्यक्तखल्प्रत्ययान्तपदानि अप्रधानक्रियापदानि भवन्ति । तिङन्तक्रियापदैः पूर्णं वाक्यं निष्पद्यते । अतिङन्तक्रियापदेनापि वाक्यं तु सिध्यति । परं वाक्ये सङ्गत्यनुसारं कर्तृवाच्यस्य कर्मवाच्यस्य च मध्ये एकं तिङन्त(प्रधान)क्रियापदं प्रयुज्यते । कर्तरि निष्पन्ना स्थगदान्तशब्दा प्रयोगे कृत्यादिवज्ज्ञेयाः । यथा गृहस्थः पारगः फलदः इत्यादि ।

१-४-३ भाववाच्ये चिन्त्यं क्रियापदम्

भावार्थे विहितं वाच्यं भाववाच्यं प्रोच्यते । सर्वेभ्यो दशगणीयेभ्यः सन्नन्तादिपञ्चप्रकरणेभ्याश्चाकर्मकधातुभ्यो भावे विहितैस्तिङ्यक्-कृत्य-खल्प्रत्ययैस्तेभ्य एव धातुभ्यो भूतभावे सर्वेभ्यः सकर्मकाकर्मकेभ्यो धातुभ्यो भावे नपुंसके सामान्ये भूतकाले च विहितेन क्तप्रत्ययेन च भाववाच्यक्रियापदानि निष्पद्यन्ते । सकर्मकधातुभ्यः कर्मणोऽविवक्षायामपि भावे कृत्यक्तखल्प्रत्यया विधीयन्ते । भाववाच्ये तिङन्तेन प्रधानक्रियापदमतिङन्तेनाप्रधानक्रियापदं च भवतः । परमनयोः प्रयोगे प्रधानाप्रधानक्रिययोर्भेदो न प्रतीयते । किञ्च प्रधानाप्रधानक्रिययोर्मध्ये एकेनापि पदेन वाक्यं प्रयूर्यते । यतोऽप्रधानक्रियापदस्यान्ते प्रधानक्रियापदं न प्रयुज्यते ।

१-५ कारकाणि

कारकाणि षट् सन्ति कर्ता, कर्म, करणम्, सप्रदानमपादानमधिकरणञ्च । वाक्ये एतानि विवक्षानुसारं प्रयुज्यन्ते-

कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥

क्रियायां यत्पदमन्वीयते तत्पदं कारकं प्रोच्यते । यतः कर्तृकर्मकरणादीनि षट् कारकाणि प्रधानक्रियायां गौणक्रियायां चान्वीयन्ते । प्रधानक्रियापदेन पूर्णं वाक्यं निपद्यते गौणक्रियया तु न । गौणक्रियापदेनापूर्णं वाक्यं भवति । स्मरणीयं यत् कारकाणि स्वस्वावान्तरक्रिया(शतृशानच्क्त्वाल्यप्तुमुन्णमुल्प्रत्ययान्तक्रियाद्वारा प्रधानक्रियां निष्पादयन्ति । प्रधानक्रिया तिङन्तक्रिया ज्ञेया ।

वाक्ये क्रियाया निष्पादको व्यापाराश्रयः कर्ता, साध्यफलाश्रयं कर्म यद्वारा कार्यं (क्रिया, कर्म) सिद्धयति (येन कर्मणा लक्ष्यं सिद्धयति) तत्करणम् (साधनम्), दानादेरुद्देश्यं सम्प्रदानम्, विभागादेरवधिरपादानम्, यत्र देशे काले वस्तुनि वा या क्रिया भवति स क्रियाधार एवाधिकरणञ्च प्रोच्यते ।

व्याकरणे बहूनि क्रियापदानि पठितानि सन्ति । तासु सर्वासु क्रियासु सर्वाणि कारकाणि भवन्तीति न नियमः । कर्ता सर्वासु क्रियासु, कर्म सकर्मिकासु क्रियासु करणं प्रायः सर्वासु क्रियासु सम्प्रदानं दानादिक्रियासु अपादानं पृथग्(विश्लेष)करणादिक्रियासु अधिकरणं च सर्वासु क्रियासु भवति । क्रियापदेन तिङन्तातिङन्तक्रिये उभे स्मर्तव्ये ।

कारकेषु उक्ते कर्तरि प्रथमा - वाच्यपरिवर्तनेऽनुक्ते(अनभिहिते)कर्तरि तृतीया (कर्तृवाच्यात्कर्मवाच्ये परिवर्तनेन कर्ता तृतीयान्तः), अनुक्ते कर्मणि द्वितीया - (कर्मवाच्ये उक्ते कर्मणि प्रथमा - कर्मणि परिवर्तनेन कर्म प्रथमान्तम्) करणे तृतीया सम्प्रदाने चतुर्थी, अपादाने पञ्चमी, अधिकरणे सप्तमी च भवति । सम्बन्धमात्रे सर्वत्र षष्ठी । उपपदेन कृतादियोगेन च षष्ठी । षष्ठी क्रियायां नान्वीयते । यतो हि षष्ठी कारकेषु न गण्यते ।

१-६ कर्तृवाच्यस्य वाक्यस्य पठन-लेखन-संभाषणानां नियमः

कर्ता प्रथमाविभक्तेरेकवचने द्विवचने बहुवचने च निष्पन्नो भवति । स कर्तृवाच्यस्य वाक्ये प्रधानं(मुख्यं)भवति । अस्याधीने एव क्रियापदं प्रयुज्यते । आदौ पठनेऽभ्यासे च तस्य विचारो विधेयस्ततो लेखने भाषणेऽपि -

कर्तृवाच्ये सदा कर्ता प्रथमान्तो हि जायते ।
तस्याधीने प्रयुज्येत सर्वत्रैव क्रियापदम् ।
सकर्मके भवेत्कर्म न भवेत्तत्त्वकर्मके ॥
अस्मिन्वाच्ये तु जिज्ञासो ! करणादिपदं ततः ।
उपपदेन सम्बद्धं पदं नित्यं विचिन्त्य च ।
प्रयुज्यते यथायोग्यं प्रयोगे चिन्तनं कुरु ॥

सकर्मकधातोः कर्त्रर्थे निष्पादनीययोस्तिङन्तातिङन्तक्रिययोश्चर्चा १-४-१ कर्तृवाच्ये चिन्तनीयं क्रियापदमिति शीर्षके कृता । तत्रैव द्रष्टव्या ।

१-७ कर्मवाच्यस्य वाक्यस्य पठन-लेखन-संभाषणानां नियमः

सकर्मकधातोः कर्तृवाच्ये स्थितं कर्म कर्मवाच्ये परिवर्त्य प्रथमान्तं विधीयते । तत् प्रथमविभक्तेरेकवचने द्विवचने वहुवचने च निष्पन्नं भवति । कर्मवाच्ये तदेव पदं प्रधानं (मुख्यं) भवति । सदा तस्याधीने क्रियापदं प्रयुज्यते । कर्ता परिवर्त्य तृतीयान्तो भवति -

कर्मवाच्ये सदा कर्ता तृतीयान्तो हि जायते ।
प्रथमान्तं भवेत्कर्म तस्याधीने क्रियापदम् ॥चलति॥
सर्वेष्वेव लकारेषु सर्वेषु पुरुषेषु च ।
वचनेषु च सर्वेषु तिङन्तानि पदानि तु ।
जायन्ते कर्मणि तानि ज्ञेयानि पाठकैः सदा ।
अस्मिन्वाच्ये तु जिज्ञासो ! करणादिपदं ततः ।
चोपपदेन सम्बद्धं पदं न परिवर्तते ॥

१-८ भाववाच्यस्य वाक्यस्य पठन-लेखन-संभाषणानां नियमः

भाववाच्ये कर्ता परिवर्तनेन तृतीयान्तो भवति । अस्य वाच्यस्य वाक्ये तृतीयान्त एव कर्ता बोध्यः स एव मुख्यश्च -

भाववाच्ये सदा कर्ता तृतीयान्तो हि जायते ।
सर्वेष्वेव लकारेषु प्रथमे पुरुषे तिङः ।
नित्यैकवचनान्तं हि भावे ज्ञेयं क्रियापदम् ॥
कृत्यक्तान्तं कृतं भावे खलन्तं यत्पदं भवेत् ।
क्लीबैकत्वं[१] सदा ज्ञेयं पाठकेन च तत्पदम् ॥
अस्मिन्वाच्ये तु जिज्ञासो ! करणादिपदं ततः ।
चोपपदेन सम्बद्धं पदं न परिवर्तते ॥

---

१ नपुंसकस्य प्रथमाया एकवचनमात्रस्य रूपं ज्ञेयम् ।

१-९ कर्तृवाच्यस्य परिवर्तनीयानि पदानि

आख्यातं कर्म कर्ता च तदीयं च विशेषणम् ।
इयन्ति परिवर्तन्ते वाच्यस्य परिवर्तने[१] ॥

सकर्मकधातोः कर्ता कर्म एतयोर्विशेषणं क्रियापदं च कर्मवाच्ये (वाच्यपरिवर्तने) परिवर्तन्ते । अकर्मकधातोः कर्तृवाच्यस्य तु कर्ताऽस्य विशेषणं क्रियापदं च भावे (भाववाच्ये) परिवर्तन्ते । उभयोर्वाच्ययोः करणादीनि पदानि उपपदेन सम्बद्धं पदं च न परिवर्तन्ते ।

१-१० विशेष्यविशेषणयोर्ज्ञानम्

भेद्यं विशेष्यमित्याहुर्भेदकं तु विशेषणम् ।
प्रधानं तु विशेष्यं स्यादप्रधानं विशेषणम् ॥
पदार्थे स्वार्थनिक्षेपादप्रधानं विशेषणम् ।
विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव समर्पणात्[२] ॥

यः स्वार्थं विशेष्ये निक्षेपति तद्विशेषणं यः स्वार्थं न समर्पयति (न त्यजति) तद्विशेष्यं च प्रोच्यते । विशेषणमप्रधानं विशेष्यं च प्रधानं भवति । विशेष्यं नामेति पर्यायौ बोध्यौ । सदा भेद्येन विशेष्यं भेदकेन विशेषणं च ज्ञेयम् ।

ये गुणवाचकशब्दाः स्वगुणार्थे तिष्ठन्ति परगुणान्न प्रकाशयन्ति तेऽपि विशेष्यवाचकशब्दा ज्ञेयाः । यथा स्वगुणार्थे स्थिताः शीघ्रम्, क्षिप्रम्, अरमित्यादयः[३] शीतमिति च शब्दा नपुंसके[४], शुक्लः शुभ्रः श्वेत इत्यादयश्च[५] शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते । एवमेते शब्दा विशेष्याणि भवन्ति । परमेते शब्दा यदा परगुणप्रकाशका भवन्ति तदा ते शब्दा विशेषणानि प्रोच्यन्ते । सर्वनामशब्दो यथास्थलं विशेषणं विशेष्यं च भवति । उपरिप्रोक्तं विशेष्यं प्रधानं विशेषणमप्रधानं च भवति । यतः प्रयोगे प्रधानानुरूपं क्रियापदं प्रयुज्यते न त्वप्रधानानुरूपम् ।

१-११ विशेषणस्य कथं प्रयोगः

विशेषणं सदा वाक्ये विशेष्यमनुगच्छति ।
तेन चिन्त्यं विशेष्यस्यानुसारि च विशेषणम् ॥१॥
(लेखकः) ।

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ॥२॥
तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि ।
(प्रसिद्धः)

यतो वाक्ये पुंस्त्रीनपुंसकलिङ्गिषु विशेष्येषु मध्ये कस्य लिङ्गस्य कस्या विभक्तेर्वचनस्य च विशेष्यमस्ति । तत् सम्यग्विचार्याभ्यसेत् (पठेत्) लिखेत् (प्रयुञ्जीत) भाषेत च जिज्ञासुः ।

---

१ सोमनाथ सिग्देलः - अनुवादचन्द्रिका - पूर्व-उत्तर भागः - २, द्वितीय प्रकाशः ।

२ वरदराजः ल.सि.कौ., गो.भ.का. गीता प्रेस, गोरखपुर - विशेषणपूर्वपदतत्पुरुषसमासः । तेइसवाँ संस्करण - सं. २०५२, पृ. १७९ ।

३ क्लीबे शीघ्राद्यसत्वे स्यात् - अमरः - १।१।८१॥

४ शीतं गुणे - अमरः - १।३।२१

५ गुणे शुक्लादयः पुंसि - अमरः - १।५।१८॥ भेद्यगामि यत् - अमरः - १।१।८१॥
सप्तान्यलिङ्गकाः - अमरः - १।३।२१॥ गुणिलिङ्गस्तु तद्वति- अमरः - १।५।१८॥

१-१२ उद्देश्यविधेययोर्विशेषणयोः प्रयोगविधिः

उद्देश्यं च विधेयं च द्वयं ज्ञेयं विशेषणम् ।
उद्देश्यं तु विशेष्यात्प्रागपश्चाद्विधेयमुच्यते ॥

विशेषणं विशेष्यात्प्राग्सन्निधाने प्रयुज्यते ।
विशेषतोबोधनीयं पश्चादपि प्रयुज्यते[1] ॥

विशेष्यपदेन नाम(संज्ञा)पदं गृह्यते । वाक्ये विशेष्यस्य विशेषमर्थं(गुणं) द्योतयितुं(प्रकाशयितुं) विशेष्यात्पूर्वं सन्निधौ यद्विशेषणं प्रयुज्यते तदुद्देश्यविशेषणं विशेष्यात्परे क्रियापदात्पूर्वं सन्निधौ यद्विशेषणं प्रयुज्यते तद्विधेयविशेषणं च । विधेयपदेन क्रियापदमेव निर्दिश्यते । तत्पदं प्रायेण वाक्यान्ते प्रयुज्यते । स्थलानुसारं विशेषणं प्रथमान्तविशेष्यात्पूर्वापरयोः प्रयुज्यते । क्वचिदन्ते प्रथमान्तविधेयविशेषणेनैव वाक्यं विश्राम्यते (प्रयूर्पते) । तत्र प्रायेण विशेष्यानुरूपं क्रियापदं चिन्त्यते ।

लेखनक्रमे वाक्यस्यादौ कर्ता क्रियापदं च भवतः । तत्रार्थस्यापेक्षानुसारं कर्मकरणादिषु निष्पन्नानि विशेष्याणि प्रयुज्यन्ते । ततः करणाद्यन्तानां विशेष्याणामपि उद्देश्यविशेषणं विधेयविशेषणं च प्रयुज्यते । वाक्ये प्रयुक्तानां विशेष्याणामपेक्षानुसारमेकं द्वे बहूनि वा विशेषणानि विवक्ष्य प्रयुज्यन्ते । तानि सावधानतया ज्ञेयानि ।

शब्दाः पुँल्लिङ्गिनः स्त्रीलिङ्गिनो नपुंसकलिङ्गिनश्च सन्ति । तेषां सप्तसु विभक्तिषु वचनानुसारं रूपाणि भवन्ति भ्वादीनां धातूनां त्रिषु पुरुषेषु तिङन्तरूपाणि च । तेषां मिलितानां सुबन्ततिङन्तानां पदानां समूहः कारकेनान्विता क्रिया वा वाक्यं भवतीति पूर्वमेव चर्चितम् । यतो वाक्यं ज्ञातुमादौ कोऽपि सावधानतया कारकमभ्यसेत् । कारकज्ञानेन शब्दानां स्थितिः शुद्धिरशुद्धिश्च ज्ञायते । ततो जिज्ञासुः प्रथमं लघुलघु वाक्यं पठितुमभ्यसितुं विधातुं (विरचयितुं लिखितुं वा) वक्तुं च यत्नं कुर्यात् । पश्चाच्छनैःशनैर्महद्वाक्यमपि विचिन्तयेत् । कस्यापि कारकज्ञानेन पश्चाच्छनैः शनैर्गद्यस्य पद्यस्य च लघुलघु वाक्यं पठितुं स्मर्तुं लिखितुं च ततः पश्चाच्छनैःशनैर्लेखं निबन्धं (प्रबन्धं) कवितामपि लिखितुं संस्कृते भाषणं कर्तुं च सरलं भवेत् । यदा वाक्यं बोद्धुं सरलमनुभूयते । तत एव संस्कृतस्य पठने लेखने भाषणे च प्रवृतिर्भवति । प्रवृत्या कस्यापि उत्साहो वर्धते । नैरन्तर्यस्योत्साहेन परिश्रमी अवश्यं फलं लभते । फलप्राप्तिरेव परिश्रमिणः पुरुषार्थः । फलं प्राप्तुं कारके ध्यानं देयम् । उक्तञ्च - **कारकं चेद्विजानीयात् यां यां मन्येत सा भवेत्**[2] ।

विशेषः - (क) पद्यस्य वाक्ये कर्तृकर्मकरणादिषु निष्पन्नमेकैकं विशेष्यं विशेष्यस्यैकैकं स्वकीयं स्वकीयं विशेषणं विशेषणे विशेषणानि चच्छन्दो मेलयितुं यत्र तत्रापि प्रयुज्यन्ते । अर्थकाले यस्य यस्य विशेष्यस्य यद्यद्विशेषणं-णे-णानि वा भवन्ति । प्रसङ्गानुसारं तत् ते तानि वा विशेष्यात्पूर्वे परेऽपि प्रयुज्यार्थो विधीयते । विशेष्यात्पूर्वे प्रयुक्तं विशेषणमुद्देश्यं परे प्रयुक्तं च विधेयं प्रोच्यते । तदनुसारं गद्यस्य वाक्यमभ्यसेत् धारयेच्च । विशेष्यस्य विशेषणं विशेषणे विशेषणानि च विशेष्यमनुसृत्य क्रमशः संमेल्य प्रयोक्तुं (लिखितुं) प्रभवति चेदतीव सुन्दरम् ।

(ख) गद्यस्य वाक्ये तु कर्तृकर्मकरणादिषु निष्पन्नानि विशेष्याणि एषां विशेषणानि च पद्यस्य वाक्ये इव यत्र तत्र न प्रयुज्यन्ते । प्रायेण गद्यस्य वाक्ये विशेषणं विशेष्यमनुसरद् दण्डक्रमेण प्रयुज्यते । विशेषणस्य प्रयोगविधिः पूर्वं चर्चितः ।

---

[1] सोमनाथ सिग्देल अनुवाद चन्द्रिका, भाग २ श्लोक २० ।

[2] सिद्धान्तकौमुदी - द्विरूक्तप्रक्रिया - प्रकरणम् - ४०, तत्वबोधिनीटीकायां समुद्‌तम् ।

(ग) क्रिया तिङन्ता अस्तिङन्ताश्च भवन्ति । अतिङन्तायाः कृत्यक्तक्तवतुखल्प्रत्ययान्ताः क्रिया प्रोच्यन्ते । लेखनक्रमे वाक्ये ता यत्र कुत्रापि प्रयुक्ता भवेयुः । ताः सदा वाक्यान्ते स्थिता एव स्मरणीयाः ।

(घ) यद्विशेषणं विशेषणेन सहान्वीय विशेष्यान्वयि भवति । तदपि पार्श्विकान्वयितया विशेषणस्य विशेषणमेव प्रोच्यते ।

इति संस्कृतभाषाचिन्तनादौ प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ॥ २ ॥

२-१ तिङन्तक्रियापदस्य चिन्तनम्

लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एते दश लकाराः सन्ति । एते प्रत्यया ज्ञेयाः । एते धातुभ्यो विधीयन्ते । पञ्चमो लेट्लकारस्तु छन्दस्येव प्रयुज्यते न तु लोके ।

वर्तमानकाले लट्[1], परोक्षभूतकाले लिट्[2] दूरबोधिनि भविष्यत्काले लुट्[3], सामीप्यबोधिनि भविष्यत्काले लृट्[4], आशिषि विध्याद्यर्थेषु च लोट्[5], पूर्ववर्तिनि भूतकाले लङ्[6], विधिनिमन्त्रणाद्यर्थेषु सार्वधातुके लिङ्[7], आशीर्वादार्थे अर्धधातुके लिङ्[8], सामान्यभूतकाले लुङ्[9], अनिश्चितभूतकाले लृङ् च विधीयन्ते । स्वस्वकालिकेषु लकारेषु निष्पन्नानि धातो रूपाणि सावधानतयाऽभ्यसनीयानि । लिङ्लोटो श्चर्चा ५-७-६, ७, ८ संख्यायां द्रष्टव्या ।

२-२ कर्तृकर्मभावेषु लकारा एषां स्थाने तिङादयः

कर्तरि कृदिति सूत्रतः कर्तरि इत्यर्थानुवृत्तिरधः सूत्रे प्रवर्तते -

लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६९

लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च । धातुः सकर्मकोऽकर्मकश्च द्विविधोऽस्ति । अस्माद्धातोर्लकारा एषां स्थाने तिप् तस् झि, सिप् थस् थ, मिप् वस् मस्, त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् चैते प्रत्यया विवक्ष्य त्रिषु प्रथममध्यमोत्तमपुरुषेषु क्रमशस्त्रिषु त्रिषु वचनेषु विधीयन्ते । एते प्रत्यया विभक्तयोऽपि निगद्यन्ते । एतेषु प्रत्ययेषु पूर्वस्य नव (९) परस्मैपदप्रत्ययाः परस्य नव (९) आत्मनेपदप्रत्ययाश्च प्रोच्यन्ते । सर्वे भ्वादयो धातुशब्देन व्यवह्रियन्ते । धार्तोनिष्पन्ना क्रियाऽपि शब्द एव भवति । पश्चात्पदसंज्ञया पदं प्रोच्यते ।

२-३ धातोः सकर्मकाकर्मकयोर्ज्ञानम्

क्रियायाः फलं व्यापरश्च भवति । तस्याः क्रियायाः फलाश्रयः कर्म व्यापाराश्रयः कर्ता च भवतः । अनयोर्मध्ये कर्तुः क्रियया अत्यन्तमिप्सितं (उद्देश्यं) वस्तु फलं धातोर्भवनानुकूलो गमनानुकूलो भक्षणानुकूलश्च व्यापारोऽ(कर्मा)र्थश्च भवति । इत्थं प्रत्येकं धातोः क्रियायाः फलं व्यापारश्चार्थौ भवतः । आभ्यां फलव्यापाररूपाभ्यामर्थाभ्यां धातुः सकर्मकोऽकर्मकश्च प्रोच्येते । तौ सकर्मकाकर्मकौः लक्षणेन ज्ञेयौ स्तः । यथा लक्षणम् -

यत्रैकस्मिन्धर्मणि (कर्तरि) फलव्यापारयोर्निष्ठता तिष्ठति स धातुरकर्मकः, यत्र फलस्य व्यापारस्य च निष्ठता भिन्नभिन्नधर्मणि (फलस्य निष्ठता कर्तुर्भिन्नाश्रये कर्तरि व्यापारः=अर्थात्

---

[1] प्रारब्धोऽपरिसमाप्तश्च कालो वर्तमानकालः । अयमविच्छिन्नकालो मतः ।
[2] परोक्षोऽनद्यतनभूतः । अनेन पूर्वगतश्चक्षुषोऽगोचरसमय एव गृह्यते ।
[3] अनद्यतनभविष्यत्कालः ।
[4] सामान्यानद्यतनभविष्यत्कालः ।
[5] लिङ्लोटोरपि भविष्यत्काले एव प्रयोगः ।
[6] अनद्यतनभूतकालः ।
[7] लिङ्लोटोरपि भविष्यत्काले एव ।
[8] लिङ्लोटोरपि भविष्यत्काले एव ।
[9] सामान्यभूतकालेन चतुर्विंशतिघण्टाकालाभ्यान्तरगतकालो गृह्यते । अतीताया रात्रेःपश्चार्धेनागामिन्याः रात्रेः पूर्वार्धेन च सहितः कालोऽद्यतनस्तद्भिन्नोऽनद्यतनः प्रोच्यते ।

विक्लित्यादिरूपं फलं तण्डुले फूत्कारादिव्यापारश्च कर्तरि) तिष्ठति (कर्तारमाश्रयति) स धातुः सकर्मकश्च प्रोच्यते ।

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मभेदे सकर्मक उदाहृतः ॥[१]

यथा ओदनं पचतीत्यत्र फलरूपमोदनं कर्म कर्तुर्भिन्नं तिष्ठति । यतः पच्धातुः सकर्मकः । तथैव खादति पठति गच्छति पश्यतीत्यादयो धातवः सकर्मकाः । पण्डितो भवतीत्यत्र फलरूपं पण्डितं कर्तुर्भिन्नं न तिष्ठति । तत्फलरूपं पण्डितं भवनानुकूलव्यापर(क्रिया)श्च कर्तरि तिष्ठतः । यतो भूधातुरकर्मकः । तथैव क्षयति एधते शेते नश्यति नृत्यति लज्जते इत्यादयो धातवोऽकर्मकाः[२] प्रोच्यन्ते ।

२-४ कर्तृवाच्यस्य तिङन्तक्रियापदम्

१- भ्वादिदशगणेषु धातोरादौ पठितानामोकारस्य ञिटुडुनामन्ते पठितानाम् अ-अष्-आ-इ-इर्-ई-उ-ऊ-ऊष्-ॠ-लृ-ए-ओकारान्तानामन्त्यस्य हलश्च लोपं कृत्वा धातोः स्वरूपं स्थिरीक्रियते । यथा-क्रमेण ओहाक्-ञिमिदा-टुनादि-डुकृञ्धातूनामादेर्लोपः क्रियते । गद-डुपचष्-श्विता-चिति-दृशिर्-नृती-कमु-गुपू-त्रपूष्-काशृ-गम्लृ-कटे-भञ्जोधातूनामन्त्यस्य लोपो भवति । ओहाक्-वृञ्-वृङित्याद्यन्तानामन्त्यस्य हलो लोपः क्रियते । ततः क्रमशो हा-मिद्-नन्द्[३]-कृ-गद्-पच्-श्वित्-चिन्त्-दृश्-नृत्-कम्-गुप्-त्रप्-काश्-गम्-कट्-भञ्ज्-हा-वृ-वृ स्वरूपा धातवो भवन्ति । भूपागैस्मृकृसदृशानां धातूनामन्त्यस्य लोपो न भवति । ततो धातोस्तत्स्वरूपादेव लडादिकार्यैः प्राकरणिकं क्रियापदं सिद्धचति । यथा-क्रमशः ३-जहाति, १-मेदते, १-नन्दति, ८-करोति कुरुते, १-गदति, १-पचति-ते, १-श्वेतते, १०-चिन्तयति[४] । १-दृश्-पश्य=पश्यति,४-नृत्यति,१-कामयते, १-गोपायति, १-त्रपते, १-काशते, १-गम्-गच्छ=गच्छति, १-कटति, ७-भनक्ति, ३-जहाति, ५-वृणोति, ९-वृणाति, १-भवति, १-पिबति, २-पाति, १-गायति, १-स्मरति, ६-किरति । इत्यादि । संख्यया धातोर्गणो ज्ञेयः ।

२-भ्वादिदशगणेषु ण्यन्तादिषु षट्सु प्रकरणेषु च पठितानां परस्मैपदाऽऽत्मनेपदोभयपदानामजन्तानां हलन्तानां च सकर्मकाकर्मकधातूनां कर्तृवाच्ये सर्वेषु लकारेषु प्रथममध्यमोत्तमपुरुषेषु क्रमशस्त्रिषु त्रिषु वचनेषु क्रियापदानि भवन्ति । अत्रापि प्रत्येकपुरुषाणां त्रीणि त्रीणि क्रियापदानि क्रमश एकवचन-द्विवचन-बहुवचनेषु परिगण्यन्ते । यतो वचनानुसारं सदा क्रियापदानि स्मरणीयानि । अथवा त्रीणि त्रीणि क्रियापदानि क्रमश एकवचने द्विवचने बहुवचने स्थितानि ज्ञेयानि । सकर्मकाकर्मकं च क्रियापदं लक्षणानुसारं ज्ञेयम् । लकारा यस्मिन्यस्मिन्कालार्थे प्रयुज्यन्ते । तेषामुल्लेखोऽग्रे कृतोऽस्ति । कालस्य ज्ञानविधिरपि अग्रे टिप्पण्यां कृतो विद्यते । कालानुसारस्य क्रिया सदा स्मरणीया । वाक्ये क्रियापदं यस्य कालस्यार्थमभिलक्ष्य प्रयोक्तुमपेक्ष्यते । तस्यैव कालस्यार्थबोधकं क्रियापदं प्रयोक्तव्यम् । स्मरणीयं यत् अ इ उ ऋ एते ह्रस्वा अमिश्रिता आ ई ऊ ॠ लृ ए ओ ऐ औ एते दीर्घा मिश्रिताश्च स्वराः प्रोच्यन्ते । अत्रापि अ ए ओ एते गुणसंज्ञका आ ऐ औ वृद्धिसंज्ञकाश्चाभिधीयन्ते । सवर्णदीर्घविधौ आ ई ऊ ॠ एते स्वरा गृहचन्ते । सर्वत्र

---

१ भर्तृहरिः- वाक्यपदीयम् ।

२ एवं प्रकारेणापि - यत्र कर्तृवाचकपदेन सह क्रियापदं किमिति प्रश्नमपेक्षते तत्र स धातुः सकर्मकः । यथा देवदत्तः खादति अधीते पश्यतीत्याद्येषु किमिति प्रश्नस्यापेक्षा जायतेऽत एते धातवः सकर्मकाः । यत्र तु क्रियापदं किमिति प्रश्नस्यापेक्षां न करोति ते धातवोऽकर्मकाः । यथा भवति एधते नृत्यति तिष्ठति जीवतीत्यादयो धातवः । लक्षणम् = क्रियापदं कर्तृपदेन युक्तं व्यपेक्षते यत्र किमित्यपेक्षाम् । सकर्मकं तं सुधियो वदन्ति शेषस्ततो धातुरकर्मकः स्यात् ॥

३ अदर्शनम् । अदर्शनात्प्रयोगे लुप्तप्स्य वर्णस्य चिन्ता न क्रियते । धातोरन्तस्थस्य इकारस्य लोपस्य कारणात् इदितो नुम् धातोरिति सूत्रेण धातोः पूर्ववर्णात्परे नुम् भवति ।

४ धातोरन्तस्थस्य इकारस्य लोपस्य कारणात् इदितो नुम् धातोरिति सूत्रेण धातोः पूर्ववर्णात्परे नुम् भवति ।

क्रियापदस्यान्ते तिङादिप्रत्ययाः स्थिता भवन्ति । तदनुसारं क्रियापदं विचिन्त्य पठनीयम् । स्मरणीयं यत् दशगणानुसारेण धातोः शप्, शपो लुक्, शपः श्लुः श्यन्, श्नुः शः श्नम्, उः श्ना शप् च प्रत्ययो भवति लट्लोट्लङ्विधिलिङां स्थाने विहितेषु सार्वधातुकसंज्ञकप्रत्ययेषु परेषु न त्वन्यलकारस्थाने विहितेषु प्रत्ययेषु परेषु । तदनुसारं प्राकरणिकानि धातो रूपाणि ज्ञेयानि । अत्र स्थले स्थले धातोरग्रे दत्ता संख्या गणीयसंख्या ज्ञेया । परस्मै पदस्य प., आत्मनेपदस्य आ., उभयपदस्य उ. चाक्षरेण धातुसङ्केतः क्रियते ।

१-भू सत्तायाम् । आत्मधारणानुकूलो व्यापार सत्ता । परस्मैपदी । सेट् । अकर्मकः । सार्वधातुके शप् आर्धधातुके न । आ.लिङि यासुटः कित्त्वादिगन्ताङ्गस्य धातोर्नगुणः ।

१-लट्			६-लङ्		
ए.व.	द्वि.व.	ब.व.	ए.व.	द्वि.व.	ब.व.
भवति	भवतः	भवन्ति-प्र.पु.	अभवत्	अभवताम्	अभवन्-प्र.प
भवसि	भवथः	भवथ-म.पु.	अभवः	अभवतम्	अभवत-म.पु.
भवामि	भवावः	भवामः-उ.पु.	अभवम्	अभवाव	अभवाम-उ.पु.
२-लिट्			७-विधिलिङ		
बभूव	बभूवतुः	बभूवुः- प्र.पु.	भवेत्	भवेताम्	भवेयुः-प्र.पु.
बभूविथ	बभूवथुः	बभूव-म.पु.	भवेः	भवेतम्	भवेत-म.पु
बभूव	बभूविव	बभूविम-उ.पु	भवेयम्	भवेव	भवेम-उ.पु.
३-लुट			८-आशीर्लिङ्		
भविता	भवितारौ	भवितारः-प्र.पु	भूयात्	भूयास्ताम्	भूयासुः-प्र.पु
भवितासि	भवितास्थः	भवितास्थ-म.पु.	भूयाः	भूयास्तम्	भूयास्त-म.पु.
भवितास्मि	भवितास्वः	भवितास्मः-उ.पु.	भूयासम्	भूयास्व	भूयास्म-उ.पु.
४-लृट्			९-लुङ्		
भविष्यति	भविष्यतः	भविष्यन्ति-प्र.पु	अभूत्	अभूताम्	अभुवन्-प्र.पु.
भविष्यसि	भविष्यथः	भविष्यथ-म.पु.	अभूः	अभूतम्	अभूत-म.पु.
भविष्यामि	भविष्यावः	भविष्यामः-उ.पु.	अभूवम्	अभूव	अभूम-उ.पु.
५-लोट्			१०-लृङ्		
भवतु-तात्	भवताम्	भवन्तु-प्र.पु.	अभविष्यत्	अभविष्यताम्	अभविष्यन्-प्र.पु.
भव-तात्	भवतम्	भवत-म.पु.	अभविष्यः	अभविष्यतम्	अभविष्यत-म.पु.
भवानि	भवाव	भवाम-उ.पु.	अभविष्यम्	अभविष्याव	अभविष्याम-उ.पु.

१- परस्मैपदाऽऽत्मनेपदोभयपदधातूनां क्रियापदरूपपठने विचारणीयो विषयः-१-इणः स्थाने गा=गास्थादाधा-पिबादेशे पा-भूधातुभ्यः परस्य सिचो लुक् भवति । यतोऽत्र नेट् । अन्यसेड्धातूनां परस्मैपदे लिटि थल्वमानामात्मनेपदे लिटि सेध्वेवहिमहीनामाशीर्लिङि सीयुट उभयोः पदयोर्लुटि तासेर्लृट्लृङोः स्यस्य लुङि सिचश्च ह्रस्व इट् भवति । लुङि तिप्सिपोर्दीर्घ ईण्नान्येषाम् । यतः सेड्धातोर्लकारेष्वेषु प्रोक्तेषु प्रत्ययेषु परस्थितेषु इट्सहितानि क्रियापदानि भवन्ति नान्येषु ।

२-अनिड्धातुषु ऋकारान्तात्केवलमृकारात् हनश्च धातोर्लृट्लृङोः स्यस्य ह्रस्व इट् भवति । ऋकारान्तो ह्वृ=ह्वरिष्यति । अह्वरिष्यत् । ऋकारः-ऋ=अरिष्यति । अरिष्यत् । हन्=हनिष्यति । अहनिष्यत् । तासिसिचोर्नेट्-ह्वृ=ह्वर्ता । अह्वार्षीत् । ऋ=अर्ता । आर्षीत् । हनस्तासौ नेट्-हन्ता । लुङि हनः स्थाने वधः । अस्य सिच इट्-अवधीत् । गम्धातोस्तासौ नेट्-गन्ता । स्यस्य परस्मैपदे इट्-गमिष्यति । लुङि श्लेरङ् न त्विट्-अगमत् । ततोऽन्येषामनिड्धातूनां तासेः स्यस्य सीयुटः सिचश्च नेट्

भवति । लुङि तिप्सिपोर्दीर्घ ईण्नान्येषाम् । यतोऽनिड्धातोरेतेषु प्रत्ययेषु परस्थितेषु इट्रहितानि क्रियापदानि ज्ञेयानि । इटोऽनिटश्च धातोश्चर्चा विषेशरूपेण २-५-२-अजन्तानामेकसकर्मक धातूनाम्. इति उपशीर्षके (क)अन्तर्गते स्थितायाम् अजन्तोऽकारवान्वेति कारिकायामस्यामेव टिप्पण्याम् २-६)दशगणीयान्तानामजन्तानां हलन्तानां च. इति उपशीर्षके च कृता । तत एव ज्ञेया ।

३)ईइकारान्तयोर्धात्वोः सार्वधातुकार्धधातुकयोरिति सूत्रेण गुणे एकारो अचो ञ्णितीति सूत्रेण वृद्धौ ऐकारश्च तथैव उऊकारान्तयोर्गुणसूत्रेण गुणे ओकारो वृद्धौ औकारश्च भवति । अचि परे एकारस्थाने अय् ऐकारस्थाने आय् ओकारस्थाने अव् औकारस्थाने आव् च भवति । यथा-इकारान्तः-१-क्षि=क्षि अति इति स्थिते क्षयतेरिकारस्य गुणे कृते क्षे जाते एकारस्थाने अय्=क्षयति । ईकारान्त-१-णी-नी अति इति स्थिते नयतेरीकारस्थाने गुणे कृते ने जाते एकारस्थाने अय्=नयति-ते । एकारान्तः-दे-दे अते इति स्थिते एकारस्थाने अय्=दयते । ऐकारान्तः-त्रैङ-त्रै अते इति स्थिते ऐकारस्थाने आय्=त्रायते । इकारः-अक्षिषीत् इकारस्य वृद्धौ=अक्षैषीत् । उकारान्तः-षु-सु अति इति स्थिते उकारस्य गुणे सो जाते ओकारस्थाने अव्= सवति । असु इष्ईत् इतिस्थिते उकारस्य वृद्धौ सिच्लोपे सवर्णदीर्घे औकारस्थाने आव्=असावीत् । ऊकारान्तः-भू-भू अति इति स्थिते उकारस्य गुणे भोकारे ओकारस्थाने अव्=भवति । ५-पू-अपू इस् ईत् इति स्थिते पुनातेरूकारस्य वृद्धौ पौ जाते सिच्लोपे ईइकारयोः सवर्णदीर्घे औकारस्थाने आव्=अपावीत् ।

४) ऋॠकारयोर्धात्वोर्गुणेन अर् वृद्धौ आर् च भवति । ऋकारः-१-ऋ-ऋ इथ इति स्थिते ऋकारस्य अर्गुणेन अर्=अरिथ । ऋ अ (णल्)इति स्थिते वृद्धौ आर्=आर । आ+ऋ षीदिति स्थिते वृद्धौ आ+आर्षीत् वृद्धौ च=आर्षीत् । ॠकार-९-ॠ-ॠ इता इति स्थितेऽर्गुणेन अर्=अरिता । आ+ॠ इस् ईत् इति स्थिते वृद्धौ आर् आ+आर् इस् ईत् इति जाते सिच्लोपे ईइकारयोर्दीर्घे आ+आर् ईत इति जाते आआकारयोर्वृद्धौ=आरीत् । ऋकारान्तः-१-ह्वृ-ह्वृ अति इति स्थिते ऋकारस्य गुणे अर्=ह्वरति । अह्वृ ष् ईत् इति स्थिते वृद्धौ आर्=अह्वार्षीत् । ॠकारान्तः-तॄ-तॄ अति इति स्थिते ॠकाररुय गुणे अर् = तरति । अतॄ इस् ईत् इति स्थिते ॠकारस्य वृद्धौ आर् सिच्लोपे ईइकारयोर्दीर्घे-अतारीत् । आकारान्तः- १.ग्लै=ग्ला-लुङि अग्लास् ईत्=अग्लासीत् । २-या=लुङि अयास् ईत्=अयासीत् इत्यादि ।

५-क) गद्=लिटि तिपि णलि द्वित्वे गगद् अ इति जाते आदेश्चुत्वेन जत्वे जगद् अ इति स्थितौ उपधावृद्धौ-जगाद । लुङि अगद् इस् ईत् इति जाते हलादेर्लघोरकारस्य वैकल्पिकवृद्धौ सिच्लोपे ईइकारयोदीर्घे-अगादीत् । वृद्धचाऽकारस्याऽऽकारो भवति । वृद्धचभावे-अगदीत् । ख) वदव्रजहलन्तस्याचः केवलमादिवृद्धिः-अव्राजीत् । ह्म्यन्तस्य क्षण्-श्वस्-जागृण्यन्ताश्विधातूनामेकारान्तलोपस्य धातोश्च सिचि परस्मैपदे वृद्धिर्न-अकटीत् । ग) धातोरिटः परस्य सस्य आदेशप्रत्यययोरिति सूत्रेण षत्वम्-सिध्=असेधिष्टाम् । तथैवाग्रे ज्ञेयम् । रेफ-ऐ औभ्यः परस्य सस्य षत्वम्-ह्वृ-अह्वार्षीत् । क्षि=अक्षैषीत् । नी=अनैषीत् । श्रु=अश्रौषीत् । घ) इटः परात्षकारात्परस्य तकारस्य ष्टुत्वेन टकारस्थकारस्य ठकारश्च भवति । यथा-एध्-लुङि=ऐधिष्ट । ऐधिष्ठाः । ईणा ईउऋकारा अपि गृह्चन्ते । यत ईकारात्परस्य सस्य षत्वं क्रियते । आ.लिङि- एधिषीष्ट । एधिषीष्ठाः । षकारान्तधातुः कृष्=लुटि-क्रष्टा कर्ष्टा । लुङि-अकृष्ठाः । इत्यादि । यत्र शब्दस्य क्रियापदस्य चावसाने (अन्तिमे) यो हल्सकारस्तस्य रेफो रेफस्य विसर्गश्च भवति । यथा-रामः, भवतः । एवं सर्वत्र ज्ञेयम् ।

६) **ह्रस्वं लघु १।४।१०॥** ह्रस्वमक्षरं लघुसंज्ञं स्यात् । यथा क कि कु कृ लृ इत्यादि । **संयोगे गुरु १।४।११॥** संयोगे परे पूर्वस्थितं ह्रस्वमक्षरं गुरुसंज्ञं भवति । कृष्णः । मित्रः । **दीर्घं च १।४।१२॥** संयोगे परे पूर्वस्थितं दीर्घमक्षरं गुरुसंज्ञं भवति । ईहाञ्चक्रे । सूर्यः । **सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत । वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ॥ छन्दोमञ्जरी श्लोकः ।११ ।** अक्षरं वर्णश्चैतौ समानार्थबोधकौ स्तः । लघोश्चिह्नमूर्ध्वरेखा (।) गुरोश्चिह्नं खण्डाकार(ऽ)श्च भवति ।

१-कपि चलने । आत्मनेपदी । सेट् । अकर्मकः । अन्त्यस्य इकारस्य लोपत्वान्नुम् । शप्-

१-लट्			६-लङ्		
ए.व.	द्वि.व.	ब.व.	ए.व.	द्वि.व.	ब.व.
कम्पते	कम्पेते	कम्पन्ते-प्र.पु	अकम्पत	अकम्पेताम्	अकम्पन्त-प्र.पु.
कम्पसे	कम्पथे	कम्पध्वे-म.पु.	अकम्पथाः	अकम्पेथाम्	अकम्पध्वम्-म.पु
कम्पे	कम्पावहे	कम्पामहे-उ.पु	अकम्पे	अकम्पावहि	अकम्पामहि-उ.पु.
२-लिट्			७-विधिलिङ		
चकम्पे	चकम्पाते	चकम्पिरे-प्र.पु.	कम्पेत	कम्पेयाताम्	कम्पेरन्-प्र.पु.
चकम्पिषे	चकम्पाथे	चकम्पिध्वे-म.पु.	कम्पेथाः	कम्पेयाथाम्	कम्पेध्वम्-म.पु.
चकम्पे	चकम्पिवहे	चकम्पिमहे-उ.पु.	कम्पेय	कम्पेवहि	कम्पेमहि-उ.पु.
३-लुट			८-आशीर्लिङ्		
कम्पिता	कम्पितारौ	कम्पितारः-प्र.पु.	कम्पिषीष्ट	कम्पिषीयास्ताम्	कम्पिषीरन्-प्र.पु.
कम्पितासे	कम्पितासाथे	कम्पिताध्वे-म.पु.	कम्पिषीष्ठाः	कम्पिषीयास्थाम्	कम्पिषीध्वम्-म.पु.
कम्पिताहे	कम्पितास्वहे	कम्पितास्महे-उ.पु	कम्पिषीय	कम्पिषीवहि	कम्पिषीमहि-उ.पु.
४-लृट्			९-लुङ्		
कम्पिष्यते	कम्पिष्येते	कम्पिष्यन्ते-प्र.पु.	अकम्पिष्ट	अकम्पिषाताम्	अकम्पिषत-प्र.पु.
कम्पिष्यसे	कम्पिष्येथे	कम्पिष्यध्वे-म.पु.	अकम्पिष्ठाः	अकम्पिषाथाम्	अकम्पिध्वम्-म.पु.
कम्पिष्ये	कम्पिष्यावहे	कम्पिष्यामहे-उ.पु	अकम्पिषि	अकम्पिष्वहि	अकम्पिष्महि-उ.पु.
५-लोट्			१०-लृङ्		
कम्पताम्	कम्पेताम्	कम्पन्ताम्-प्र.पु.	अकम्पिष्यत	अकम्पिष्येताम्	अकम्पिष्यन्त-प्र.पु.
कम्पस्व	कम्पेथाम्	कम्पध्वम्-म.पु.	अकम्पिष्यथाः	अकम्पिष्येथाम्	अकम्पिष्यध्वम्-म.पु.
कम्पै	कम्पावहै	कम्पामहै -उ.पु	अकम्पिष्ये	अकम्पिष्यावहि	अकम्पिष्यामहि-उ.पु.

१-एध वृद्धौ । आत्मने.। सेट् । अकर्मकः । एध्-एधते । एधाञ्चक्रे । एधिता । एधिष्यते । एधताम् । ऐधत । एधेत । एधिषीष्ट । ऐधिष्ट । ऐधिष्यत ।

क) सर्वत्र धातोरादौ भ क ख छ ग घ ह ढ ध फवर्णा यदा भवन्ति । तदा धातोर्लिटि परस्मैपदे तिपि तिपः स्थाने णलि आत्मनेपदे ते तकारस्थाने एशि द्वित्वे हलादिशेषे तत आदौ स्थितस्य भस्य बः कस्य खस्य छस्य च चो गस्य घस्य हस्य च जो ढस्य डो धस्य दः फस्य पश्च भवति । यथा-१-भू-भभूवेत्यत्रादेर्भस्य जस्त्वेन बः=बभूव । १-कम्प्-ककम्पे इत्यात्रादेः कस्य चुत्वेन चः=चकम्पे । १-खाद्-खखादेत्यत्रादेः खस्य चुत्वेन छोऽस्य चर्त्वेन चः=चखाद । ६-छिद्-छिछेदेत्यत्रादेश्छस्य चर्त्वेन चः=चिच्छेद । १-गद्-गगादेत्यत्रादेर्गस्य चुत्वेन जः=जगाद । १-२-घस्-घघासेत्यत्रादेर्घस्य झत्वेऽस्य जश्त्वेन जः=जघास । २-हन्-हहानेत्यत्रादेर्हस्य झोऽस्य जश्त्वेन जकारः । द्वितीयस्य हस्य कुत्वेन घः-जघान । १-ढौक्-ढुढौके इत्यत्रादेर्ढस्य जश्त्वेन डः=डुढौके । ३-धा-धधौ इत्यत्रादेर्धस्य जश्त्वेन दः-दधौ-दधे । १-फल्-फफालेत्यत्रादेः फस्य जश्त्वेन पः-पफाल । इत्यादि । संख्यया धातोर्गणपाठो बोध्यः ।

ख) चकारात्सकारे परे चोः कुरित्यनेन चस्य कुत्वेन क् । ककारात्परस्य सस्य षः । क्ष्संयोगे क्ष्-लृट्-पच्+स्यति=पक्ष्यति । २.लट्-वच्+सि=वक्षि । लृट्-वच्+स्यति=वक्ष्यति । ४.दिवादिः-शुच्+स्यति=शोक्ष्यति । इत्यादि ।

ग) जकारात्सकारे परे चोः कुरित्यनेन जस्य कुत्वेन गः । खरि चेति सूत्रेण गस्य चर्त्वेन कः । ककारात्परस्य सस्य षः । क्ष्संयोगे क्ष् । लृट्-त्यज्+स्यति=त्यक्षति । लृट्- यज्+यक्ष्यति । भज्+स्यति=भक्ष्यति । इत्यादि ।

घ) षकारढकाराभ्यां सकारे परे षढोः कः सीत्यनेन षस्य ढस्य च कः । ककारात्परस्य सस्य षः । कष्संयोगे क्ष् । लृट्-पुष्=पुष्+स्यति=पोक्ष्यति । लृट्-शुष्=शुष्+स्यति=शोक्ष्यति । इत्यादि ।

ङ) हकारात्सकारे परे हो ढ इति सूत्रेण हस्य ढः । षढोः कः सीति सूत्रेण ढस्य कः । ककारात्परस्य सस्य षः । क्ष्संयोगे क्ष् । १-लृट्-वह्+स्यति=वक्ष्यति । २-अदादिः-लृट्-दुह्=दुह्+स्यतीत्यत्र दादेर्धातोर्घ इति सूत्रेण हस्य घ । आदेर्दस्य एकाचो वशो भष् झषन्तस्य स्ध्वोरिति सूत्रेण भष्भावेन धः । घस्य झलां जश् झशीत्यनेन जश्त्वेन गः । खरि चेति सूत्रेण गस्य चर्त्वेन कः । ककारात्परस्य सस्य षः । क्ष्संयोगे क्ष्-धोक्ष्यति । इत्यादि । एवं च् ज् ष् ह्-वर्णान्तेभ्योऽनिड्धातुभ्यो लृट्लुङ्लृङ्लकारेषु परस्मैपदस्य क्रियासिद्धिक्रमे तेष्वेव लकारेषु आत्मनेपदस्य च क्रियासिद्धिक्रमेऽव्यवधानसकारे परे सति क्षो भवति । यत्र क्रियासिद्धिक्रमे सस्य लोपो भवति । तत्र क्षो न भवति । यथा-परस्मैपदे लुङ्-पच्-अपाक्ताम् । अपाक्तम् । भज्-अभाक्ताम् । अभाक्तम् । आत्मनेपदे लुङ्-पच्-अपक्त । अपक्थाः । भज्-अभक्त,अभक्थाः । यज्=अयष्ट,अयष्ठाः-व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां ष इति जस्य षः । अस्मात्परे स्थितस्य तस्य ष्टुत्वेन टो थस्य ठश्च भवति । दुह्धातोर्लटि तिपि शपि तस्य लुकि हस्य घः । झभघढधेभ्यः परयोस्तथयोर्धो भवति । घस्य जश्त्वेन गस्ततो गुणश्च-दुह् ति=दोग्धि । दुह् थस्=दुग्धः । लुट्-दुह्ता=दोग्धा । लुङ्-अदुह् त=अदुग्ध । वह्धातोर्हस्य ढः । तकारस्य थस्य च धः । ढात्परस्य धस्य स्तोः ष्टुना ष्टुरिति सूत्रेण ष्टुत्वेन ढः । ततः पूर्वस्थितस्य ढस्य ढो ढे लोप इति सूत्रेण लोपः । धातोरवर्णस्य ओकारः-उवह् थ=उवोढ । लुट्-वह् ता=वोढा । लुङ्-अवह् त=अवोढ । अवह् थास्=अवोढाः । इत्यादि ।

च)४- ननश् थेत्यत्र नुमि अपदान्तस्यानुस्वारागमे व्रश्चभ्रस्ज. इति सूत्रेण शस्य षत्वे थस्य ष्टुत्वेन ठत्वे-ननंष्ठ । नश् ता इति जति नुमि अपदान्तस्यानुस्वारागमे शस्य षत्वे तकारस्य ष्टुत्वेन टत्वे-नंष्टा । नश् स्यतीति जाते नुमि अनुस्वरागमे शस्य षत्वे षढोः कः सीत्यनेन षस्य कत्वे ककारात्परस्य सस्य षत्वे क्ष्संयोगेन क्षत्वे-नङ्क्ष्यति । ६.पप्रच्छ् थ इत्यत्र व्रश्चभ्रस्ज. इत्यनेन च्छस्य षत्वे थस्य ष्टुत्वेन ठत्वे-पप्रष्ठ । प्रच्छ् ता इति जाते च्छस्य षत्वे तकारस्य ष्टुत्वेन टत्वे-प्रष्टा । प्रच्छ् स्यतीति जाते च्छस्य षत्वे षस्य कत्वे क्ष्संयोगेन क्षत्वे-प्रक्ष्यति । इत्यादि । **इति भ्वादयः ॥१॥**

२-अदादयः-अद भक्षणे । प.। अनिट् । सकर्मकः । अदो लटि शपि तस्य लुक् च भवति । १-लट्-अत्ति अत्तः अदन्ति-प्र. । अत्सि अत्थः अत्थ-म. । अद्मि अद्वः अद्मः-उ. । २-लिट्-अदः स्थाने वैकल्पिको घस्लादेशः-जघास जक्षतुः जक्षुः-प्र. । जघसिथ जक्षतुः जक्ष-म. । जघास जघस जक्षिव जक्षिम-उ. । घस्लभावे-आद आदतुः आदुः-प्र. । आदिथ आदथुः आद-म. । आद आदिव आदिम-उ. । ३-लुट्-अत्ता अत्तारौ अत्तारः-प्र. । अत्तासि अत्तास्थः अत्तास्थ-म. । अत्तास्मि अत्तास्वः अत्तास्मः-उ. । ४-लृट्-अत्स्यति अत्स्यतः अत्स्यन्ति-प्र. । अत्स्यसि अत्स्यथः अत्स्यथ-म. । अत्स्यामि अत्स्यावः अत्स्यामः-उ. । ५-लोट्-अत्तु-त्तात् अत्ताम् अदन्तु-प्र. । अद्धि अत्तात् अत्तम् अत्त-म. । अदानि अदाव अदाम-उ. । ६-लङ्-आदत् आत्ताम् आदन्-प्र. । आदः आत्तम् आत्त-म. । आदम् आद्व आद्म-उ. । ७-विधिलिङ्-अद्यात् अद्याताम् अद्युः-प्र. । अद्याः अद्यातम् अद्यात-म. । अद्याम् अद्याव अद्याम-उ. । ८-आशीर्लिङ्-अद्यात् अद्यास्ताम् अद्यासुः-प्र. । अद्याः अद्यास्तम् अद्यास्त-म. । अद्यासम् अद्यास्व अद्यास्म-उ. । ९-लुङ्-अदः स्थाने घस्लृ=घस् च्लेरङ्-अघसत् अघसताम् अघसन्-प्र. । अघसः अघसतम् अघसत-म. । अघसम् अघसाव अघसाम-उ. । १०-लृङ्-आत्स्यत् आत्स्यताम् आत्स्यन्-प्र. । आत्स्यः आत्स्यतम् आत्स्यत-म. । आत्स्यम् आत्स्याव आत्स्याम-उ. । या प्रापण । प्रापणं गतिर्न तु नयनम् । प. । अनिट् । सकर्मकः । या-१-लट्-याति यातः यान्ति-प्र. । यासि याथः याथ-म. । यामि यावः यामः-उ. । २-लिट्-ययौ ययतुः ययुः-प्र. । ययिथ ययाथ ययथुः यय-म. । ययौ ययिव ययिम-उ. । ३-याता-प्र. । ४-लृट्-यास्यति । ५-यातु-तात् याताम् यान्तु-प्र. । याहि-तात् यातम् यात-म. । यानि याव याम-उ. । ६-लङ्-अयात् अयातम् अयुः-प्र. । अयाः अयातम् अयात-म. । अयाम् अयाव अयाम-उ. । ७-विधिलिङ्-यायात् यायाताम् यायुः-प्र. । यायाः यायातम् यायात-म. । यायाम् यायाव यायाम-उ. ।

८-आ.लिङ्-यायात् यायास्ताम् यायासुः-प्र. । यायाः यायास्तम् यायास्त-म. । यायासम् यायास्व यायास्म-उ. । ९-लुङ्-अयासीत् अयास्ताम् अयासुः-प्र. । अयासीः अयास्तम् अयास्त-म. । अयासम् अयास्व अयास्म-उ. । १०-लृङ्-अयास्यत् अयास्यताम् अयास्यन्-प्र. । अयास्यः-म. । अयास्यम्-उ. । शीङ् स्वप्ने । स्वप्नः शयनम् । आत्मने.। सेट् । अक. । १-लट्-शेते शयाते शेरते-प्र. । शेषे शयाथे शेध्वे-म. । शये शेवहे शेमहे-उ. । २-लिट्-शिश्ये शिश्याते शिशियरे-प्र. । शिशियषे शिश्याथे शिशियध्वे-ढ्वे-म. । शिश्ये शिशियवहे शिशियमहे-उ. । ३-लुट्-शयिता । ४-लृट्-शयिष्यते । ५-शेताम् शयाताम् शेरतम्-प्र. । शेष्व शयाथाम् शेध्वम्-म. । शयै शयावहै शयामहै-उ. । ६-लङ्-अशेत अशेयाताम् अशेरत-प्र. । अशेथाः -याथाम्-ध्वम्-म. । अशेयि अशेवहि अशेमहि-उ. । ७-वि.लिङ्-शयीत शयीयाताम् शयीरन्-प्र. । शयीथाः शयीयाथाम् शयिध्वम्-म. । शयीय शयिवहि शयीमहि-उ. । ८-आ.लिङ्-शयिषीष्ट । ९-लुङ्-अशयिष्ट अशयिषाताम् अशयिषत-प्र. । अशयिष्ठाः अशयिषाथाम् अशयिढ्वम्-ध्वम्-म. । अशयिषि अशयिष्वहि अशयिष्महि-उ. । १०-लृङ्-अशयिष्यत । दुह प्रपुरणे । पूरणं दोहनम् । उभयपदी । अनिट् । द्वि.कर्मकः । दुह्-परस्मैपदे लट्-दोधि दुग्धः दुहन्ति-प्र. । धोक्षि दुग्धः दुग्ध-म. । दोह्मि दुह्वः दुह्मः उ. । २.लिट्-दुदोह-प्र. । आत्मनेपदे-१-लट्-दुग्धे दुहाते दुहते-प्र. । २-लिट्-दुदुहे । ब्रूञ् व्यक्तायां वाचि । उ.प. । द्वि. कर्म.. । ब्रू-१-ब्रवीति-ब्रूते-प्र. । २-उवाच-प्र. । १०-अवोचत-प्र. । इति अदादयः ॥२॥

३-जुहोत्यादयः-हु दानादनयोः । इह दानं होमकरणमदनम्-भक्षणम् । पर.। अनिट् । सक. । संख्यया लकारो ज्ञेयः । १-जुहोति जुहुतः जुह्वति-प्र.। जुहोषि जुहुथः जुहुथ-म. । जुहोमि जुहुवः जुहुमः उ.। २-कृभावे जुहावाञ्चकार । कृभावपक्षे (कृ अभावपक्षे) जुहाव जुहुवतुः जुहुवुः-प्र. । जुहुविथ-जुहोथ जुहवथुः जुहुव-म. । जुहाव जुहव जुहुविव जुहुविम-उ. । ३-होता-प्र. । ४-होष्यति । ५-जुहोतु-जुहुतात् जुहुताम् जुह्वतु-प्र. । जुहुधि-जुहुतात् जुहुतम् जुहुत-म. । जुहवानि जुहवाव जुहवाम-उ. । ६-अजुहोत् अजुहुताम् अजुहवुः-प्र. । अजुहोः अजुहुतम् अजुहुत-म. । अजुहवम् अजुहुव अजुहुम-उ. । ७-जुहुयात् जुहुयाताम् जुहुयुः-प्र. । जुहुयाः जुहुयातम् जुहुयात-म. । जुहुयाम् जुहुयाव जुहुयाम-उ. । ८-हूयात् हूयास्ताम् हूयासुः-प्र. । हूयाः हूयास्तम् हूयास्त-म. । हूयासम् हूयास्व हूयास्म-उ.-यासुटः कित्वान्न गुणः । ९-अहौषीत् अहौष्टम् अहौषुः-प्र. । अहौषीः अहौष्टम् अहौष्ट-म. । अहौषम् अहौष्व अहौष्म-उ. । १०-अहोष्यत् अहोष्यताम् अहोष्यन्-प्र. । अहोष्यः अहोष्यतम् अहोष्यत-म. । अहोष्यम् अहोष्याव अहोष्याम-उ. । डुदाञ् दाने । दानार्थकः । उ.भ. । अनिट् । सक. । दा-परस्मैपदे-१-ददाति दत्तः ददति-प्र. । ददासि दत्थः दत्थ-म. । ददामि दद्वः दद्मः-उ. । २-ददौ ददतुः ददुः-प्र. । ददिथ-ददाथ ददथुः दद-म. । ददौ ददिव ददिम-उ. । ३-दाता-प्र. । दातासि-म. । दातास्मि-उ. । ४-दास्यति-प्र. । ५-ददातु-दत्तात् दत्ताम् ददतु-प्र. । देहि-दत्तात् दत्तम् दत्त-म. । ददानि ददाव ददाम-उ. । ६-अददात् अदत्ताम् अददुः-प्र. । अददाः अदत्तम् अदत्त-म. । अददाम् अदद्व अदद्म-उ. । ७-दद्यात् दद्याताम् दद्युः-प्र. । दद्याः दद्यातम् दद्यात-म. । दद्याम् दद्याव दद्याम-उ. । ८-देयात् देयास्ताम् देयासुः-प्र. । देयाः देयास्तम् देयास्त-म. । देयासम् देयास्व देयास्म-उ. । ९-अदात् अदाताम् अदुः-प्र. । अदाः अदातम् अदात-म. । अदाम् अदाव अदाम-उ. । १०-अदास्यत्-प्र. । आत्मनेपदे-दत्ते ददाते ददते-प्र. । दत्से ददाथे दद्ध्वे-म. । ददे दद्वहे दद्महे-उ. । ३-दाता-प्र. । दातासे-म. । दाताहे-उ. । ४-दास्यते-प्र. । ५-दत्ताम् ददाताम् ददताम्-प्र. । दत्स्व ददाथाम् दद्ध्वम्-म. । ददै ददावहै ददामहै-उ. । ६-अदत्त अददाताम् अददत-प्र. । अदत्थाः अददाथाम् अदद्ध्वम्-म. । अददि अदद्वहि अदद्महि-उ. । ७-ददीत ददीयाताम् ददीरन्-प्र. । ददीथाः ददीयाथाम् ददीध्वम्-म. । ददीय ददीवहि ददीमहि-उ. । ८-दासीष्ट दासीयास्ताम् दासीरन्-प्र. । दासीष्ठाः दासीयास्थाम् दासीध्वम्-म. । दासीय दासीवहि दासीमहि-उ. । ९-अदित अदिषाताम् अदिषत-प्र. । अदिथाः अदिषाथाम् अदिध्वम्-म. । अदिषि अदिष्वहि अदिष्महि-उ. । १०-अदास्यत-प्र. । डुधाञ् धारणपोषणयोः । उ.प. । अनिट् । सक. । १-दधाति धत्ते-प्र. । २-दधौ-दधे-प्र. । ३-धाता-प्र. । धातासि-से-म. । धातास्मि-हे-उ. । ४-धास्यति-ते-प्र. । ५-दधातु धत्तात् धत्ताम् दधतु-प्र. । धेहि-धत्तात्-म. । आत्मने.५-दधताम् । ६-अदधात्-अधत्त-प्र. । ७-दध्यात्-दधीत-प्र. । ८-

धेयात्-धासीष्ट-प्र. । ९-अधात्-अधित-प्र. । १०-अधास्यत्-अधास्यत-प्र. । दाधातुवत् रूपाणि चिन्त्यानि । **इति जुहोत्यादयः ॥३॥**

४-दिवादयः-दिवु क्रीडाविजिगीषाव्यवहारादिषु । प. । सेट् । सक.,अक. । दिव्-शपं प्रबाध्य श्यन् क्रियते । १-दीव्यति दीव्यतः दीव्यन्ति-प्र. । दीव्यसि दीव्यथः दीव्यथ-म. । दीव्यामि दीव्यावः दीव्यामः-उ. । २-दिदेव दिदिवतुः दिदिवुः-प्र. । दिदेविथ दिदिवथुः दिदिव-म. । दिदिव दिदिविव दिदिविम-उ. । ३-देविता-रौ-रः-प्र. । देवितासि-स्थः-स्थ-म. । देवितास्मि-स्वः-स्मः-उ. । ४-देविष्यति-तः-न्ति-प्र. । देविष्यसि-थः-थ-म. । देविष्यामि-वः-मः-उ. । ५-दीव्यतु-तात् दीव्यताम् दीव्यन्तु-प्र. । दीव्य दीव्यतात्-तम्-त-म. । दीव्यानि-व-म-उ. । ६-अदीव्यत्-ताम्-न्-प्र. । अदीव्यः-तम्-त-म. । अदीव्यम्-व्याव-म-उ. । ७-दीव्येत्-ताम्-युः-प्र. । दीव्येः-तम्-त-म. । दीव्येयम्-व-म-उ. । ८.दीव्यात्-स्ताम्-सुः-प्र. । दीव्याः-स्तम्-स्त-म. । दीव्यासम्-स्व-स्म-उ. । ९.अदेवीत् अदेविष्टाम् अदेविषुः-प्र. । अदेवीः अदेविष्टम् अदेविष्ट-म. । अदेविषम् अदेविष्व अदेविष्म-उ. । १०.अदेविष्यत्-ताम्-न्-प्र. । अदेविष्यः-तम्-त-म. । अदेविष्यम्-ष्याव-म-उ. । शमु उपशमे । शम्-शाम्यति-प्र. । तमु काङ्क्षायाम् । दमु उपशमे । भ्रमु अनवस्थाने । एतेषां शमुवद्रूपाणि ज्ञेयानि । क्रम् धातुभ्वादौ विद्यत एव । श्रीमता चक्रधरनौटियालहंसेन बृहदनुवादचन्द्रिकायां क्रमुधातो रूपाणि संगृहीतानि-पृ २९२ धातुसंख्या ९९ । नृती गात्रविक्षेपे । गात्रविक्षेपो नर्तनम् । पर. । सेट् । अक. । नृत्-१-नृत्यति-प्र. । २.ननर्त ननृततुः ननृतुः-प्र. । ३.नर्तिता-प्र. । ९.अनर्तीत्-प्र.। णश अदर्शने । पर. । अनिट् । अक. । नश्-१-नश्यति-प्र. । २.ननाश नेशतुः नेशुः-प्र. । नेशिथ ननंष्ठ नेशथुः नेश-म. । ननाश ननश नेशिव नेश्व नेशिम नेश्म-उ. । ३.नशिता नंष्टा-प्र. । ४.नशिष्यति नङ्क्ष्यति-प्र.रधादिभ्यश्चेति वेट् । ९.अनशत्-प्र. ।

पद गतौ । प्राप्त्यर्थकः । आत्मने. । अनिट् । सक. । पद-१-पद्यते पद्येते पद्यन्ते-प्र. । पद्यसे पद्येथे पद्यध्वे-म. । पद्ये पद्यावहे पद्यामहे-उ. । २.पेदे पेदाते पेदिरे-प्र. । पेदिषे पेदाथे पेदिध्वे-म. । पेदे पेदिवहे-महे-उ. । ३. पत्ता-प्र. । ४. पत्स्यते-प्र. । ५. पद्यताम् पद्येताम् पद्यन्ताम्-प्र. । पद्यस्व पद्येथाम् पद्यध्वम्-म. । पद्यै पद्यावहै-महै-उ. । ६. अपद्यत अपद्येताम् अपद्यन्त-प्र. । अपद्यथाः अपद्येथाम् अपद्यध्वम्-म. । अपद्ये अपद्यावहि-महि-उ. । ७. पद्येत पद्येताम् पद्येरन्-प्र. । पद्येथाः पद्येयाथाम् पद्येध्वम्-म. । पद्येय पद्येवहि-महि-उ. । ८. पत्सीष्ट-यास्ताम्-रन्-प्र. । पत्सीष्ठाः-यास्थाम्-ध्वम्-म. । पत्सीय-वहि-महि-उ. । ९. अपादि अपत्साताम् अपत्सत-प्र. । अपत्थाः अपत्साथाम् अपद्ध्वम्-म. । अपत्सि-त्स्वहि-त्स्महि-उ. । १०. अपत्स्यत-त्स्येताम्-न्त-प्र. । अपत्स्यथाः-त्स्येथाम्-त्स्यध्वम्-म. । अपत्स्ये-त्स्यावहि-महि-उ. । **इति दिवादयः ॥४॥**

५-स्वादयः-षुञ् अभिषवे । अभिषवः स्नपनं पीडनं सुरासन्धानं च । उ.भ. । अनिट् । सक. । सु-परस्मैपदे-शपं प्रबाध्यः श्नुः । सार्वधातुर्कार्धधातुकयोरिति गुणः । १.सुनोति सुनुत सुन्वन्ति-प्र. । सुनोषि सुनुथः सुनुथ-म. । सुनोमि सुनुवः-न्वः सुनुमः-न्मः-उ. । २. सुषाव सुषुवथुः सुषुवुः-प्र. । सुषुविथ सुषोथ सुषुवथुः सुषुव-म. । सुषाव सुषव सुषुविव-म-उ. । ३. सोता-प्र. । सोतासि-म. । ४.सोष्यति-प्र. । ५. सुनोति सुनुतात् सुनुताम् सन्वन्तु-प्र. । सुनु सुनुतात् सुनुतम्-त-म. । सुनवानि-व-म-उ. । मध्यमपुरुषस्यैकवचनस्य सुनुहीत्यत्र"हि" अस्य उतश्च प्रत्ययादसंयोगपूर्वादिति सूत्रेण लुक् । ६.असुनोत् असुनुताम् असुन्वन्-प्र. । असुनोः असुनुतम्-त-म. । असुनवम् असुनुव-न्व असुनुम-न्म-उ. । ७. सुनुयात्-ताम्-युः-प्र. । सुनुयाः तम्-त-म. । सुनुयाम्-व-म-उ. । ८. सूयात्-स्ताम्-सुः-प्र. । सुयाः स्तम्-स्त-म. । सूयासम्-स्व-स्म-उ. । ९. असावीत् विष्टाम्-विषुः-प्र. । असावीः-विष्टम्-ष्ट-म. । असाविषम्-ष्व-स्म-उ. । १०. असोष्यत्-प्र. । आत्मनेपदे-१-सुनुते सुन्वाते-न्वते-प्र. । सुनुषे-न्वाथे-नुध्वे-म. । सुन्वे सुनुवहे-न्वहे सुनुमहे-न्महे-उ. । २.सुषुवे सुषुवाते सुषुविरे-प्र. । सुषुविषे सुषुवाथे सुषुविध्वे-म. । सुषुवे-विवहे-विमहे-उ. । ३. सोता-प्र. । सोतासे-म. । सोताहे-उ. । ४.सोष्यते-प्र. । ५. सुनुताम्-न्वाताम्-न्वताम्-प्र. । सुनुस्व-न्वाथाम् सुनुध्वम्-म. । सुनवै-वावहै-महै-

उ. । ६.असुनुत-न्वाताम्-न्वत-प्र. । असुनुथाः-न्वाथाम् असुनुध्वम्-म. । असुन्वि असुनुवहि-न्वहि असुनुमहि-न्महि-उ. । ७. सुन्वीत-याताम्-रन्-प्र. । सुन्वीथाः याथाम्-ध्वम्-म. । सुन्वीय-वहि-महि-उ. । ८.सोषीष्ट-यास्ताम्-रन्-प्र. । सोषीष्ठः-याथाम्-ध्वम्-म. । सोषीय-वहि-महि-उ. । ९. असोष्ट-षाताम्-षत-प्र. । असोष्ठाः-षाथाम्-ध्वम्-म. । १०.असोषि असोष्वहि असोष्महि-उ. । चिञ् चयने । चयनं राशिकरणम् । उभय. । अनिट् । सक. । चि-परस्मैपदे-१.चिनोति चिनुतः चिन्वन्ति-प्र. । चिनोषि चिनुथः चिनुथ-म. । चिनोमि चिनुवः चिन्वः चिनुमः-चिन्मः-उ. । २.अभ्यासात्यरस्य चस्य कुत्वपक्षे क्-चिकाय चिक्यतुः चिक्युः-प्र. । चिकयिथ चिकेथ चिक्यथुः चिक्य-म. । चिकाय चिकय चिक्यिव चिक्यिम-उ. । कुत्वाभावपक्षे-१.चिचाय चिच्यतुः चिच्युः-प्र. । चिचयिथ चिचेथ चिच्यथुः चिच्य-म. । चिचाय चिचय चिच्यिव चिच्यिम-उ. । ३.चेता-प्र. । ४.चेष्यति-प्र. । ५.चिनोतु चिनुतात्-नुताम्-न्वन्तु-प्र. । चिनु चिनुतात् चिनुतम्-त-म. । चिनवानि चिनवाव-म-उ. । ६.अचिनोत्-नुताम्-न्वन् प्र. । अचिनोः-नुतम्-त-म. । अचिनुवम् अचिनुव-न्व अचिनुम-न्म-उ. । ७. चिनुयात्-प्र. । ८.चीयात्-प्र. । ९.अचैषीत्-ष्टाम्-षुः-प्र. । अचैषीः ष्टम्-ष्ट-म. । अचैषम्-ष्व-ष्म-उ. । १०. अचेष्यत्-प्र. । आप्लृ व्याप्तौ । व्याप्तिर्व्यापनम् । प्र-अवपूर्वको धातुः प्राप्त्यर्थकः । परस्मै. । अनिट् । सक. । १.आप्नोति-प्र. । २.आप आपतुः आपुः-प्र. । आपिथ आपथुः आप-म. । आप आपिव-म-उ. । ३.आप्ता-प्र. । ४.आप्स्यति-प्र. । ५. आप्नोतु आप्नुतात्-ताम्-वन्-प्र. । आप्नुहि-तात् तम्-त-म. । संयोगपूर्वात् हेर्न लुक् । आप्नवानि-व-म-उ. । ६.आप्नोत् आप्नुताम्-वन्-प्र. । आप्नोः आप्नुतम्-त-म. । आप्नुवम्-व-म-उ. । ७.आप्नुयात्-प्र. । ८.आप्यात्-स्ताम्-सुः-प्र. । आप्याः-स्तम्-स्त-म. । आप्यासम्-स्व-स्म-उ. । ९.आपत्-ताम्-न्-प्र. । आपः-तम्-त-म. । आपम् आपाव-म-उ. । १०.आप्स्यत्-प्र. । **इति स्वादयः ॥५॥**

६- तुदादयः-तुद् व्यथने । व्यथनं दुःखदानम् । उभय. । अनिट् । सक. । तुद्-परस्मैपदे आत्मनेपदे च शपं प्रबाध्य शः । शस्य ङित्वात् पुगन्तलघूपस्य चेति गुणो न । १. तुदति-तः-न्ति-प्र. । तुदसि-थः-थ-म. । तुदामि-वः-मः-उ. । २. तुतोद तुतुदतुः तुतुदुः-प्र. । तुतोदिथ तुतुदथुः-द-म-म. । तुतोद तुतुदिव-म-उ. । ३.तोत्ता-प्र. । तोत्तासि-म. । तोत्तास्मि-उ. । ४.तोत्स्यति-तः-न्ति-प्र. । तोत्स्यसि-थः-थ-म. । तोत्स्यामि-व-म-उ. । ५.तुदतु-तुदतात्-ताम्-न्तु-प्र. । तुद तुदतात्-तम्-त-म. । तुदानि-व-म-उ. । ६.अतुदत्-ताम्-दन्-प्र. । अतुदः-तम्-त-म. । अतुदम्-दाव-म-उ. । ७.तुदेत-ताम्-युः-प्र. । तुदेः-तम्-त-म. । तुदेयम्-याव-म-उ. । ८.तुद्यात्-स्ताम्-सु-प्र. । तुद्याः-स्तम्-स्त-म. । तुद्यासम्-स्व-स्म-उ. । ९.अतौत्सीत् अतौत्ताम् अतौत्सुः-प्र. । अतौत्सीः अतौत्तम्-त्त-म. । अतौत्सम् अतौत्स्व अतौत्स्म-उ. । १०.अतोत्स्यत्-प्र. । आत्मनेपदे-१.तुदते-देते-दन्ते-प्र. । तुदसे तुदेथे तुदध्वे-म. । तुदे तुदावहे तुदामहे-उ. । २.तुतुदे तुतुदाथे तुतुदिरे-प्र. । तुतुदिषे तुतुदाथे तुतुदिध्वे-म. । तुतुदे-दिवहे-महे-उ. । ३.तोत्ता-रौ-रः-प्र. । तोत्तासे-साथे-ध्वे-म. । तोत्ताहे-स्वहे-महे-उ. । ४.तोत्स्यते-स्येते-स्यन्ते-प्र. । तोत्स्यसे-स्येथे-स्यध्वे-म. । तोत्स्ये-स्यावहे-महे-उ. । ५.तुदताम्-देताम्-दन्ताम्-प्र. । तुदस्व-देथाम्-दध्वम्-म. । तुदै-दावहै-महै-उ. । ६.अतुदत-देताम्-दन्त-प्र. । अतुदथाः देथाम्-दध्वम्-म. । अतुदे-दावहि-महि-उ. । ७.तुदेत-याताम्-रन्-प्र. । तुदेथाः-याथाम्-ध्वम्-म. । तुदेय-वहि-महि-उ. । ८.तुत्सीष्ट-यास्ताम्-रन्-प्र. । तुत्सीष्ठाः-याथाम्-ध्वम्-म. । तुत्सीय-वहि-महि-उ. । ९.अतुत्त-त्साताम्-त्सत-प्र. । अतुत्थाः-त्साथाम्-द्ध्वम्-म. । अतुत्सि-त्स्वहि-त्स्महि-उ. । १०.अतोत्स्यत-त्स्येताम्-स्यन्त-प्र. । अतोत्स्यथाः । त्स्येथाम्-त्स्यध्वम्-म. । अतोत्स्ये-त्स्यावहि-त्स्यामहि-उ. । मुच्लृ मोक्षणे । मोक्षणं मुक्तिः । उभय. । अनिट् । सक. । नुम् । मुञ्च-१.मुञ्चति-तः-न्ति-प्र. । मुञ्चसि-थः-थ-म. । मुञ्चामि-वः-मः-उ. । २.मुमोच मुमुचतुः-चुः-प्र. । मुमोचिथ मुमुचथुः-च-म. । मुमोच मुमुचिव-म-उ. । ३.मोक्ता-प्र. । मोक्तासि-म. । मोक्तास्मि-उ. । ४.मोक्ष्यति-तः-न्ति-प्र. । मोक्ष्यसि-थः-थ-म. । मोक्ष्यामि-वः-मः-उ. । ५.मुञ्चतु-तात्-ताम्-न्तु-प्र. । मुञ्च-तात्-तम्-त-म. । मुञ्चानि-व-म-उ. । ६.अमुञ्चत्-ताम्-न्-प्र. । अमुञ्चः-तम्-त-म. । अमुञ्चम्-ञ्चाव-म-उ. । ७.मुञ्चेत्-ताम्-युः-प्र. । मुञ्चेः-तम्-त-म. । मुञ्चेयम्-व-म-उ. । ८.मुच्यात्-स्ताम्-सुः-प्र. । मुच्याः-स्तम्-स्त-म. ।

मुच्यासम्-स्व-स्म-उ. । ९.अमुचत्-ताम्-न्-प्र. । अमुचः-तम्-त-म. । अमुचम्-चाव-म-उ. । १०. अमोक्ष्यत्-ताम्-न्-प्र. । अमोक्ष्यः-तम्-त-म. । अमोक्ष्यम्-क्ष्याव-म-उ. । आत्मनेपदपक्षे-१. मुञ्चते । २.मुमुचे । ३.मोक्ता । ४. मोक्ष्यते । ५.मुञ्चताम् । ६.अमुञ्चत । ७.मुञ्चेत । ८.मुक्षीष्ट । ९.अमुक्त अमुक्षाताम् अमुक्षत-प्र. । अमुक्थाः-क्षाथाम्-ग्ध्वम्-म. । अमुक्षि-क्ष्वहि-क्ष्महि-उ. । १०.अमोक्ष्यत् । प्रच्छ ज्ञीप्सायाम् । ज्ञीप्सा प्रश्नकरणम् । परस्मै. । अनिट् । सक. । प्रच्छ=पृच्छ-१.पृच्छति । २.पप्रच्छ पप्रच्छतु पप्रच्छुः-प्र. । पप्रच्छिथ पप्रष्ठ पप्रच्छथुः पप्रच्छ-म. । पप्रच्छ-च्छिव-म-उ. । ३.प्रष्टा ।४. प्रक्ष्यति । ५.पृच्छतु-तात्-ताम्-न्तु-प्र. । पृच्छ-तात्-तम्-त-म. । पृच्छानि-व-म-उ. । ६.अपृच्छत् । ७.पृच्छेत् । ८.पृच्छयात्-स्ताम्-सुः-प्र. । पृच्छयाः-स्ताम्-स्त-म. । पृच्छयासम्-स्व-स्म-उ. । ९.अप्राक्षीत् अप्राष्टाम् अप्राक्षुः-प्र. । अप्राक्षीः अप्राष्टम् अप्राष्ट-म. । अप्राक्षम्-क्ष्व-क्ष्म-उ. । १०.अप्रक्ष्यत् । **इति तुदादयः ॥६॥**

७-रुधादयः-रुधिर् आवञरणे । आवरणमाच्छादनम् । उभय. । अनिट् । सक. । रुध्-परस्मैपदे-शपं प्रबाध्य श्नम् । १.रुणद्धि-रुन्धःन्धन्ति-प्र. । रुणत्सि-रुन्धः-रुन्ध-म. । रुणध्मि रुन्ध्वः रुन्ध्मः-उ. । २.रुरोध रुरुधतु रुरुधुः-प्र. । रुरोधिथ रुरुधथुः रुरुध-म. । रुरोध रुरुधिव-म-उ. । ३.रोद्धा । रोद्धासि । ४.रोत्स्यति-तः-न्ति-प्र. । रोत्स्यसि-थः-थ-म. । रोत्स्यामि-वः-मः-उ. । ५.रुणद्धु रुन्धात् रुन्धाम् रुन्धन्तु-प्र. । रुन्धि-न्धात्-रुन्धम्-न्ध-म. । रुणधानि-व-म-उ. । ६.अरुणत्-द् अरुन्धाम् रुन्धन्-प्र. । अरुणः-अरुणत् रुन्धम् न्ध-म. । अरुणधम्-धाव-म-उ. । ७.रुन्ध्यात्-ताम्-न्ध्युः-प्र. । रुन्ध्याः-तम्-त-म. । रुन्ध्याम्-व-म-उ. । ८.रुध्यात्-स्ताम्-सुः-प्र. । रुद्धयाः-स्तम्-स्त-म. । रुध्यासम्-स्व-स्म-उ. । ९.अरौत्सीत्-द्धाम्-त्सुः-प्र. । अरौत्सीः-द्धम्-द्ध-म. । अरौत्सम्-त्स्व-त्स्म-उ. । अथवा-अरुधत्-ताम्-न्-प्र. । अरुधः-तम्-त-म. । अरुधम्-धाव-म-उ. । १०.अरोत्स्यत्-ताम्-न्-प्र. । अरोत्स्यः-तम्-त-म. । अरोत्स्यम्-त्स्याव-म-उ. । आत्मनेपदे-१.रुन्धे-रुन्धाते-रुन्धते-प्र. । रुन्त्से-न्धाथे-न्ध्वे-म. । रुन्धे-न्ध्वहे-न्ध्महे-उ. । २.रुरुधे-धाते-धिरे-प्र. । रुरुधिषे-धाथे-धिध्वे-म. । रुरुधे-धिवहे-महे-उ. । ३.रोद्धा-रौ-रः-प्र. । रोद्धासे-साथे-ध्वे-म. । रोद्धाहे-स्वहे-स्महे-उ. । ४.रोत्स्यते-त्स्येते-त्स्यन्ते-प्र. । रोत्स्यसे-त्स्येथे-त्स्यध्वे-म. । रोत्स्ये-त्स्यावहे-महे-उ. । ५.रुन्धाम्-न्धाताम्-न्धताम्-प्र. । रुन्त्स्व-न्धाथाम्-न्ध्वम्-म. । रुणधै-रुणधावहै-महै-उ. । ६.अरुन्ध-न्धाताम्-न्धत-प्र. । अरुन्द्धाः-न्धाथाम्-न्ध्वम्-म. । अरुन्धि-न्ध्वहि-न्ध्महि-उ. । ७. रुन्धीत-याताम्-न्धीरन्-प्र. । रुन्धीथाः-याथाम्-न्धीध्वम्-म. । रुन्धीय-वहि-महि-उ. । ८.रुत्सीष्ट-यास्ताम्-रन्-प्र. । रुत्सीष्ठाः-यास्थाम्-ध्वम्-म. । रुत्सीय-वहि-महि-उ. । ९.अरुद्ध-त्साताम्-त्सत-प्र. । अरुद्धाः-त्साथाम्-द्ध्वम्-म. । अरुत्सि-त्स्वहि-त्स्महि-उ. । १०.अरोत्स्यत-त्स्येताम्-त्स्यन्त-प्र. । अरोत्स्यथाः-त्स्येथाम्-त्स्यध्वम्-म. । अरोत्स्ये-त्स्यावहि-त्स्यामहि-उ. । एवं भिदि विदारणे । विदारणं भेदनम् । उभय. । अनिट् । सक. । भिद्-परस्मैपदे-भिनत्ति-न्त-न्दन्ति-प्र. । ९.पक्षे-अभिदत् । विपक्षे-अभैत्सीत् । आत्मनेपदे-भिन्ते-न्दाते-न्दते । छिदिर् द्वैधीकरणे । कस्य वस्तुनश्छेदनेन खण्डद्वयकरणम् । उभय. । अनिट् । सक. । छिद्-परस्मैपदे-१.छिनत्ति-छिन्तः-न्दन्ति-प्र. । लिट्लङ्लुङ्लृङ्क्षु लकारेषु छकारात्पूर्वं चकारो भवेत्-२.चिच्छेद । ६.अच्छिनत् । ९.पक्षे-अच्छिदत् । विपक्षे-अछैत्सीत् । १०.अच्छेत्स्यत् । आत्मनेपदे-१.छिन्ते । २.चिच्छिदे । ६.अच्छिनत् । ९.अच्छित्त १०.अच्छित्स्यत । भिद्छिदो रूपाणि रुधवज्ज्ञेयानि । भुज पालनाभ्यवहारयोः । अव्यवहारो भक्षणम् । उभय. । अनिट् । सक. । भुज-अभक्षणार्थे परस्मैपदी-१.भुनक्ति भुङ्क्तः भुञ्जन्ति-प्र. । भुनक्षि भुङ्क्थः भुङ्क्थ-म. । भुनज्मि भुञ्ज्वः भुञ्ज्मः-उ. । २.बुभोज । ३.भोक्ता । भोक्तासि । ४.भोक्ष्यति । ५.भुनक्तु भुङ्क्तात्-ङ्क्ताम्-ञ्जन्तु-प्र. । भुङ्ग्धि-ङ्क्तात्-ङ्क्तम्-ङ्क्त-म. । भुनजानि भुनजाव-म-उ. । ६.अभुनक्-ङ्क्ताम्-ञ्जन्-प्र. । अभुनक्-ङ्क्तम्-ङ्क्त-म. । अभुनजम् अभुञ्ज्व अभुञ्ज्म-उ. । ७.भुञ्ज्यात् । ८.भुज्यात्-स्ताम्-सुः-प्र. । ९.अभौक्षीत्-क्ताम्-क्षुः-प्र. । अभौक्षीः-क्तम्-क्त-म. । अभौक्षम्-क्ष्व-क्ष्म-उ. । १०.अभोक्ष्यत् । आत्मनेपदे-१.भुङ्क्ते । २.बुभुजे । ३.भोक्ता । ४.भोक्ष्यते । ५.भुङ्क्ताम् । ६.अभुङ्क्त । ७.भुञ्जीत । ८.भुक्षीष्ट । ९.अभुक्त-क्षाताम्-क्षत-प्र. । अभुक्थाः-क्षाथाम्-ग्ध्वम्-म. । अभुक्षि-क्ष्वहि-

क्ष्महि-उ. । १०.अभोक्ष्यत । अस्य धातोः ककारे परे ङ् जकारे परे ञ् च पठचते सार्वधातुके परे न त्वार्धधातुके । **इति रुधादयः ॥७॥**

८-तनादयः-तनु विस्तारे । उभय. । सेट् । सक. । शपं प्रवाध्य उः क्रियते । तन्-परस्मैपदे-१.तनोति-नुतः-न्वन्ति-प्र. । तनोषि-नुथः-थ-म. । तनोमि तनुवः तन्वः तनुमः तन्मः-उ. । २.ततान तेनतुः तेनुः-प्र. । तेनिथ तेनथुः तेन-म. । ततान ततन तेनिव-निम-उ. । ३.तनिता । ४.तनिष्यति । ५.तनोतु तनुतात्-ताम्-न्वन्तु-प्र. । तनु-तात् तनुतम्-त-म. । तनवानि-व-म-उ. । ६.अतनोत्-नुताम्-न्वन्-प्र. । अतनोः-नुतम्-त-म. । अतनवम् अतनुव अतन्वः अतनुमः अतन्मः-उ. । ७.तनुयात्-ताम्-युः-प्र. । तनुयाः-तम्-त-म. । तनुयाम्-व-म-उ. । ८.तन्यात्-स्ताम्-सुः-प्र. । तन्याः-स्तम्-त-म. । तन्यासम्-स्व-स्म-उ. । ९.विकल्पवृद्धौ-अतानीत्-निष्टाम्-षुः-प्र. । अतानीः-निष्टम्-ष्ट-म. । अतानिषम्-ष्व-ष्म-उ. । वृद्धचभावे-अतनीत्-निष्टाम्-षुः-प्र. । अतनीः अतनीष्टम्-निष्ट-म. । अतनिषम्-ष्व-ष्म-उ. । १०.अतनिष्यत्-ताम्-न-प्र. । अतनिष्यः-तम्-त-म. । अतनिष्यम्-ष्याव-म-उ. । आत्मनेपदे-१.तनुते-न्वाते-न्वते-प्र. । तनुषे-न्वाथे-नुध्वे-म. । तन्वे तनुवहे तन्वहे तनुमहे तन्महे-उ. । २.तेने-नाते-निरे-प्र. । तेनिषे-नाथे-ध्वे-म. । तेने-निवहे-महे-उ. । ३.तनिता । ४.तनिष्यते । ५.तनुताम्-न्वाताम्-न्वताम्-प्र. । तनुष्व तन्वाथाम् तनुध्वम्-म. । तनवै तनवावहै-महै-उ. । ६.अतनुत-न्वाताम्-न्वत-प्र. । अतनुथाः न्वाथाम् अतनुध्वम्-म. । अतन्वि-नुवहि-न्वहि-नुमहि-न्महि-उ. । ७.तन्वीत-न्वीयाताम्-रन्-प्र. । तन्वीथाः-याथाम्-ध्वम्-म. । तन्वीय-वहि-महि-उ. । ८.तनिषीष्ट-यास्ताम्-रन्-प्र. । तनिषीष्ठाः-यास्थाम्-ध्वम्-म. । तनिषीय-वहि-महि-उ. । ९. अतनिष्ट-षाताम्-षत-प्र. । अतनिष्ठाः-षाथाम्-ध्वम्-म. । अतनिषि-ष्वहि-ष्महि-उ. । १०.अतनिष्यत-ष्येताम्-ष्यन्त-प्र. । डुकृञ करणे । उभय. । अनिट् । सक. । कृ-परस्मैपदे-१. करोति कुरुतः कुर्वन्ति-प्र. । करोषि कुरुथः-थ-म. । करोमि कुर्वः कुर्मः-उ. । २.चकार चक्रतुः-क्रुः-प्र. । चकर्थ चक्रथुः-क्र-म. । चकार चकर चकृव-म-उ. । ३.कर्ता । ४.करिष्यति-तः-न्ति-प्र. । करिष्यसि-थः-थ-म. । करिष्यामि-वः-मः-उ. । ५.करोतु कुरुतात्-ताम्-र्वन्तु-प्र. । कुरु-तात्-तम्-त-म. । करवाणि-व-म-उ. । ६.अकरोत् अकुरुताम्-र्वन्-प्र. । अकरोः अकुरुतम्-त-म. । अकरवम् अकुर्व-र्म-उ. । ७.कुर्यात्-ताम्-र्युः-प्र. । कुर्याः-तम्-त-म. । कुर्याम्-व-म-उ. । ८.क्रियात्-स्ताम्-सुः-प्र. । क्रियाः-स्तम्-स्त-म. । क्रियासम्-स्व-स्म-उ. । ९.अकार्षीत्-र्ष्टाम्-र्षुः-प्र. । अकार्षीः-र्ष्टम्-र्ष्ट-म. । अकार्षम्-र्ष्व-र्ष्म-उ. । १०.अकरिष्यत्-ताम्-न्-प्र. । अकरिष्यः-तम्-त-म. । अकरिष्यम्-ष्याव-म-उ. । आत्मनेपदे-१.कुरुते कुर्वाते कुर्वते-प्र. । कुरुषे कुर्वाथे कुरुध्वे-म. । कुर्वे कुर्वहे-र्महे-उ. । २. चक्रे चक्राते चक्रिरे-प्र. । चकृषे चक्राथे चकृढ्वे-म. । चक्रे चकृवहे चकृमहे-उ. । ३. कर्ता । ४.करिष्यते । ५.कुरुताम् कुर्वाताम् कुर्वताम्-प्र. । कुरुष्व कुर्वाथाम् कुरुध्वम्-म. । करवै करवावहै करवामहै-उ. । ६.अकुरुत । ७.कुर्वीत । ८.कृषीष्ट । ९. अकृत अकृषाताम् अकृषत-प्र. । अकृथाः अकृषाथाम् अकृढ्वम्-म. । अकृषि अकृष्वहि अकृष्महि-उ. । १०.अकरिष्यत । **इति तनादयः ॥८॥**

९-क्र्यादयः-डुक्रीञ् द्रव्यविनिमये । द्रव्यविनिमयो वस्त्वन्तरदानपूर्वकं वस्त्वन्तरग्रहणम् । उभय. । अनिट्-सक. । क्री-शपं प्रबाध्य श्ना । परस्मैपदे-१.क्रीणाति-णीतः-णन्ति-प्र. । क्रीणासि-णीथः-थ-म. । क्रीणामि-णीवः-मः-उ. । २.चिक्राय-क्रियतुः-क्रियुः-प्र. । चिक्रयिथ चिक्रेथ-क्रियथुः-क्रिय-म. । चिक्राय चिक्रय-क्रियिव-म-उ. । ३.क्रेता-रौ-रः-प्र. । क्रेतासि-स्थः-स्थ-म. । क्रेतास्मि-स्वः-स्मः-उ. । ४.क्रेष्यति । ५.क्रीणातु-णीतात्-ताम्-णन्तु-प्र. । क्रीणीहि-तात्-तम्-त-म. । क्रीणानि-णीव-णीम-उ. । ६.अक्रीणात्-णीताम्-णन्-प्र. । अक्रीणाः-णीतम्-त-म-म. । अक्रीणाम्-णीव-म-उ. । ७.क्रीणीयात्-याताम्-णीयुः-प्र. । क्रीणीयाः-यातम्-त-म. । क्रीणीयाम्-व-म-उ. । ८.क्रीयात्-स्ताम्-सुः-प्र. । क्रीयाः-स्तम्-स्त-म. । क्रीयासम्-स्व-स्म-उ. । ९.अक्रैषीत्-ष्टाम्-षुः-प्र. । अक्रैषीः-ष्टम्-ष्ट-म. । अक्रैषम्-ष्व-ष्म-उ. । १०.अक्रेष्यत्-ताम्-न्-प्र. । अक्रेष्यः-तम्-त-म. । अक्रेष्यम्-ष्याव-म-उ. । आत्मनेपदे-१.क्रीणीते-णाते-णते-प्र. । क्रीणीषे-णाथे-णीध्वे-म. । क्रीणे-णीवहे-महे-उ. । २.चिक्रिये-

याते-यिरे-प्र. । चिक्रियि-षे-याथे-यिध्वे-म. । चिक्रिये-यिवहे-महे-उ. । ३.क्रेता । ४.क्रेष्यते । ५.क्रीणीताम्-णाताम्-णताम्-प्र. । क्रीणीष्व-णाथाम्-णीध्वम्-म. । क्रीणै-णावहै-महै-उ. । ६.अक्रीणीत-णाताम्-णताम्-प्र. । अक्रीणाः-णाथाम्-णीध्वम्-म. । अक्रीणि-णीवहि-महि-उ. । ७.क्रीणीत-याताम्-रन्-प्र. । क्रीणीथाः-याथाम्-णीध्वम्-म. । क्रीणीय-वहि-महि-उ. । ८.क्रेषीष्ट-यास्ताम्-रन्-प्र. । क्रेषीष्ठाः-यास्थाम्-ढ्वम्-म. । क्रेषीय-वहि-महि-उ. । ९.अक्रेष्ट-षाताम्-षत-प्र. । अक्रेष्ठाः-षाथाम्-ढ्वम्-म. । अक्रेषि-ष्वहि-ष्महि-उ. । १०.अक्रेष्यत । ग्रह उपादाने । उपादानं ग्रहणम् । उभय. । सेट् । सक. । ग्रह्-परस्मैपदे-१.गृह्णाति-ह्णीतः-ह्णन्ति-प्र. । गृह्णासि-ह्णीथः-थ-म. । गृह्णामि-ह्णीवः मः-उ. । २.जग्राह-ग्रहतुः-ग्रहुः-प्र. । जग्रहिथ-ग्रहथुः-ग्रह-म. । जग्राह जग्रह-ग्रहिव-ग्रहिम-उ. । ३.ग्रहीता । ४.ग्रहीष्यति । ५.गृह्णातु-ह्णीतात्-ताम्-ह्णन्तु-प्र. । गृहाण-ह्णीतात्-तम्-त-म. । गृह्णानि-ह्णीव-म-उ. । ६.अगृह्णात् अगृह्णीताम्-ह्णन्-प्र. । अगृह्णाः अगृह्णीतम्-त-म. । अगृह्णाम् अगृह्णीव-म-उ. । ७.गृह्णीयात् । ८.गृह्यात् । ९.अग्रहीत्-ष्टाम्-षुः-प्र. । अग्रहीः-हीष्टम्-ष्ट-म. । अग्रहीषम्-ष्व-ष्म-उ. । १०.अग्रहीष्यत् । आत्मनेपदे-१.गृह्णीते-ह्णाते-ह्णते-प्र. । गृह्णीषे-ह्णाथे-ह्णीध्वे-म. । गृह्णे-ह्णीवहे-महे-उ. । २.जगृहे-हाते-हिरे-प्र. । जगृहिषे-हाथे-हिध्वे-म. । जगृहे-हिवहे-महे-उ. । ३.ग्रहिता । ग्रहीतासे-म. । ४.ग्रहीष्यते । ५.गृह्णीताम् । ६.अगृह्णीत । ७.गृह्णीत । ८.ग्रहीषीष्ट-यास्ताम्-रन्-प्र. । ९.अग्रहीष्ट-षाताम्-षत-प्र. । अग्रहीष्ठाः-षाथाम्-ध्वम्-म. । अग्रहीषि-ष्वहि-ष्महि-उ. । १०.अग्रहीष्यत । ज्ञा अवबोधने । अवबोधो ज्ञानम् । उभय. । अनिट् । सक. । सार्वधातुके जा आर्धधातुके ज्ञा । ज्ञा=जा-परस्मैपदे-१.जानाति-नीतः-नन्ति-प्र. । जानासि-नीथः-थ-म. । जानामि-नीवः-मः-उ. । २.जज्ञौ-ज्ञतु-जज्ञुः-प्र. । जज्ञिथ जज्ञाथ-ज्ञथुः-ज्ञ-म. । जज्ञौ-ज्ञिव-ज्ञिम-उ. । ३.ज्ञाता । ४.ज्ञास्यति । ५.जानातु-नीतात्-नीताम्-नन्तु-प्र. । जानिहि-तात्-नीतम्-म. । जानानि जानाव-मत-उ. । ६.अजानात्-नीताम्-नन्-प्र. । अजानाः-नीतम्-त-म. । अजानाम्-नीव-म-उ. । ७.जानीयात्-ताम्-युः-प्र. । जानीयाः-तम्-यात त-म. । जानीयाम्-व-म-उ. । ८.ज्ञेयात्-स्ताम्-सुः-प्र. । ज्ञेयाः-स्तम्-स्त-म. । ज्ञेयासम्-स्व-स्म-उ. । ९.अज्ञासीत्-ष्टाम्-षुः-प्र. । अज्ञासीः-ष्टम्-ष्ट-म. । अज्ञासीषम्-ष्व-ष्म-उ. । १०.अज्ञास्यत् । आत्मनेपदे-१.जानीते-नाते-नते-प्र. । जानीषे-नाथे-नीध्वे-म. । जाने-नीवहे-नीमहे-उ. । २.जज्ञे-ज्ञाते-ज्ञिरे-प्र. । जज्ञिषे-ज्ञाथे-ज्ञिध्वे-म. । जज्ञे-ज्ञिवहे-महे-उ. । ३.ज्ञाता । ज्ञातासे । ४.ज्ञात्स्यते । ५.जानीताम्-नाताम्-नताम्-प्र. । जानीष्व-नाथाम्-नीध्वम्-म. । जानै-नावहै-महै-उ. । ६.अजानीत-नाताम्-नत-प्र. । अजानीथा-नाथाम्-नीध्वम्-म. । अजानि-नीवहि-महि-उ. । ७.जानीत-नीयाताम्-रन्-प्र. । ८.ज्ञासीष्ट-यास्ताम्-रन्-प्र. । ९.अज्ञास्त-साताम्-सत-प्र. । अज्ञास्थाः-साथाम्-ध्वम्-म. । अज्ञासि-स्वहि-स्महि-उ. । १०.अज्ञास्यत । स्मरणीयं यत् तिप्सिप्मिप एते पितः प्रोच्यन्ते एभ्योऽन्ये पिद्भिन्ना ङितो भवन्ति यासुटो किच्च । क्र्यादौ सार्वधातुके क्ङिति परे ई हल्यघोरिति सूत्रेण श्नाप्रत्ययस्याऽऽकारस्य स्थाने ईकारो भवति । ततो नी इत्यक्षरं पठ्यते । ग्रह्धातोर्लिट्भिन्नेषु लुट्लृट्आशिर्लिङ्लुङ्लृङ्क्षु लकारेषु ग्रहोऽलिटि दीर्घ इति सूत्रेण इट इकारस्य दीर्घो विधीयते । यत एषां लुडादिलकाराणां क्रियायां "ही" दीर्घः पठ्यते । **इति क्र्यादयः ॥९॥**

१०.चुरादयः- चुर स्तेये । स्तेयं चौर्यम् । उभय. । सेट् । सक. । चुरो णिचि परे पुगन्तलघुपधस्य चेति गुणः-चोरि-चुरादौ शप्प्रत्ययो विधीयते । १.चोरयति-तः-न्ति-प्र. । चोरयसि-थः-थ-म. । चोरयामि-वः-मः-उ. । २.चोरयाञ्चकार-क्रतुः-क्रुः-प्र. । चोरयाञ्चकर्थ-क्रथुः-क्र-म. । चोरयाञ्चकार-कर-कृव-कृम-उ. । ३.चोरयिता । चोरयितासि-म. । ४.चोरयिष्यति । ५.चोरयतु-तात्-ताम्-न्तु-प्र. । चोरय-तात्-तम्-त-म. । चोरयाणि-व-म-उ. । ६.अचोरयत्-ताम्-न्-प्र. । अचोरयः-तम्-त-म. । अचोरयम्-याव-म-उ. । ७.चोरयेत्-ताम्-युः-प्र. । चोरयेः-तम्-त-म. । चोरयेयम्-रयेव-म-उ. । ८.चोर्यात्-स्ताम्-युः-प्र. । चोर्याः-स्तम्-स्त-म. । चोर्यासम्-स्व-स्म-उ. । ९.अचूचुरत्-रताम्-रन्-प्र. । अचूचुरः-चुरतम्-रत-म. । अचूचुरम्-चुराव-म-उ. । १०.अचोरयिष्यत् । आत्मनेपदे-१.चोरयते-येते-यन्ते-प्र. । चोरयसे-येथे-यध्वे-म. । चोरये-यावहे-महे-उ. । २.चोरयाञ्चक्रे-क्राते-क्रिरे-प्र. । चोरयाञ्चकृषे-क्राथे-कृढ्वे-म. । चोरयाञ्चक्रे-कृवहे-महे-उ. । ३.चोरयिता-रौ-रः-प्र. ।

चोरयितासे-साथे-ध्वे-म. । चोरयिताहे-स्वहे-स्महे-उ. । ४.चोरयिष्यते-ष्येते-ष्यन्ते-प्र. । चोरयिष्यसे-स्येथे-स्यध्वे-म. । चोरयिष्ये-ष्यावहे-महे-उ. । ५.चोरयताम्-येताम्-यन्ताम्-प्र. । चोरयस्व-येथाम्-यध्वम्-म. । चोरयै-यावहै-महै-उ. । ६.अचोरयत-येताम्-यन्त-प्र. । अचोरयथाः-येथाम्-यध्वम्-म. । अचोरये-यावहि-यामहि-उ. । ७.चोरयेत चोरयेथाताम्-येरन्-प्र. । चोरयेथाः-येयाथाम्-येध्वम्-म. । चोरयेय-येवहि-येमहि-उ. । ८.चोरयिषीष्ट-यास्ताम्-रन्-प्र. । चोरयिषीष्ठाः-यास्थाम्-ध्वम्-म. । चोरयिषीय-वहि-महि-उ. । ९.अचूचुरत-चुरेताम्-चुरन्त-प्र. । अचूचुरथाः-चुरेथाम्-चुरध्वम्-म. । अचूचुरे-चुरावहि-चुरामहि-उ. । १०.अचोरयिष्यत । चिति स्मृत्याम् । उभय. । सेट् । सक. । चितेरन्तस्य ह्रस्वेकारस्य लोपत्वान्नुम्-चिन्त्-चिन्ति-परस्मैपदे-चिन्तयति । चिन्तयाञ्चकार । चिन्तयिता । चिन्तयिष्यति । चिन्तयतु-तात् । अचिन्तयत् । चिन्तयेत् । चिन्त्यात् । अचिचिन्तत् । अचिन्तयिष्यत् । आत्मनेपदे-चिन्तयते । चिन्तयाञ्चक्रे । चिन्तयिता । चिन्तयिष्यते । चिन्तयताम् । अचिन्तयत । चिन्तयेत । चिन्तयिषीष्ट । अचिचिन्तत । अचिन्तयिष्यत । कथ वाक्य प्रबन्धे । सेट् । सक. । कथि-कथयति । कथयाञ्चकार । कथयिता । कथयिष्यति । कथयतु-तात् । अकथयत् । कथयेत् । कथ्यात् । अचकथत् । अकथयिष्यत् । **इति चुरादयः ॥१०॥**

३. षट् प्रकरणानि-१ ण्यन्ते णिच्-भू-भावि=भावयति-ते । २. सन्नन्ते सन्-भू-बुभूष=बुभूषति । कृ-चिकीर्ष=चिकीर्षति । दा-दित्स=दित्सति-ते । ३. यङन्ते यङ्-भू-बोभूय=बोभूयते । ४. यङ्लुगन्ते यङ्लुक्-भू=बोभू=बोभवीति बोभोति । ५. नामधातौ क्यच्क्यङादयः - आत्मनः पुत्रमिच्छति क्यच् पुत्रीय=पुत्रीयति । कृष्ण इव आचरति क्विप्-कृष्ण=कृष्णति । शब्दं करोति क्यङ्=शब्दाय=शब्दायते । मुण्डनं करोति णिच्-मुण्डि=मुण्डयति । ६. कण्ड्वादौ यक्-कण्डूय=कण्डूयति । धातवः परस्मैपदमात्मनेपदमुभयपदं च सन्ति ।

२-५ भावकर्मवाच्ययोस्तिङन्तक्रियापदचिन्तनम्

भावकर्मणोः १।३।१३॥

भावे कर्मणि च यो लकारस्तस्यात्मने पदं स्यात् । अनेन सूत्रेण भाववाच्ये कर्मवाच्ये च धातुरात्मनेपदं भवति । अकर्मकधातोर्भावे (भाववाच्ये) सकर्मकधातोः कर्मणि (कर्मवाच्ये) च निष्पद्यमानानि तिङन्तक्रियापदानि ज्ञातुं सामान्यदिग्दर्शनं क्रियते ।

२-५-१ अजन्तानामकर्मकधातूनां भावे क्रियापदचिन्तनम्

अकर्मकधातोर्भावे सार्वधातुके लट्लोट्लङ्विधिलिङ्क्षु लकोरषु सार्वधातुके यक् इति सूत्रेण यकि कृते प्रथमपुरुषस्यैकवचने यक्सहितानि तिङन्तक्रियापदस्य रूपाणि भवन्ति । अकर्मकधातोः प्रथमपुरुषस्य द्विबहुवचनयोर्मध्यमोत्तमपुरुषयोस्त्रिषु स्त्रिषु वचनेषु च तु रूपाणि न भवन्ति । यथा-भू-लट्-भूयते । लोट्-भूयताम् । लङ् अभूयत । विधिलिङ्-भूयेत । क्षि-लट्-क्षीयते । लोट्-क्षीयताम् । लङ्-अक्षीयत । वि.लिङ्-क्षीयेत । डीङ्-लट्-डीयते । लोट्-डीयताम् । लङ्-अडीयत । वि.लिङ्-डीयेत । मृङ्-म्रियते । म्रियताम् । अम्रियत । म्रियेत । द्रू-द्रूयते । द्रूयताम् । अद्रूयत । द्रूयेत । शीङ्- शय्यते । शय्यताम् । अशय्यत । शय्येत । एतादृशां धातूनामार्धधातुकेषु लिट्-लुट्-लृट्-आशीर्लिङ्-लुङ्लृङ्क्षु लकारेषु यक्न । लिट्-बभूवे । क्षि-चिक्षिये । शीङ्-शीश्ये । डी-डिडचे । मृङ्-मम्रे । ग्लै-ग्ला=जग्ले । ष्ठा-स्था=तस्थे । ष्णा-स्ना=सस्ने । एवमन्येषामकर्मकधातूनां रूपाणि ज्ञेयानि ।

२-५-२ अजन्तानामेकसकर्मकधातूनां कर्मणि क्रियापदचिन्तनम्

(क) एकसकर्मकधातोः कर्मवाच्ये सार्वधातुकेषु लट्-लोट्-लङ्-विधिलिङ्क्षु लकारेषु यक्सहितानि प्रथममध्यमोत्तमपुरुषेषु त्रिषु त्रिषु वचनेषु तिङन्तक्रियापदरूपाणि भवन्ति । आर्धधातुकेषु लिट्-लुट्-लृट्-आ.लिङ्-लुङ्-लृङ्क्षु यक्न । श्रि=उ.प.स. सेट्-लट्-श्रीयते श्रीयेते श्रीयन्ते- प्र.पु. ।

श्रीयसे श्रीयेथे श्रीयध्वे - म.पु. । श्रीये श्रीयावहे श्रीयामहे-उ.पु. । लोट्-श्रीयताम् । लङ्-अश्रीयत । वि.लिङ्-श्रीयेत । लिटि कर्तरि कर्मणि च लिटि समानरूपाणि - शिश्रिये शिश्रियाते श्रिश्रियिरे - प्र.पु. । शिश्रियिषे शिश्रियाथे शिश्रियिध्वे -ढ्वे-म.पु. । शिशिये शिश्रियिवहे शिश्रियिमहे - उ.पु. । अधि+इङ्=आ.स. अनिट्-लट्-अधीयते अधीयाते अधीयन्ते - प्र.पु. । अधीयसे अधीयाथे अधीयध्वे - म.पु. । अधीये अधीयावहे अधीयामहे - उ.पु. । लोट्-अधीयताम् । लङ्-अध्यैयत अध्यैयाताम् अध्यैयन्त - प्र.पु. । अध्यैयथाः अध्यैयाथाम् अध्यैयध्वम् - म.पु. । अध्यैये अध्यैयावहि अध्यैयामहि - उ.पु. । वि.लिङ्-अधीयेत । अस्य धातोर्लिटि रूपाणि २-४-२-१(ग) क्रमे द्रष्टव्यानि । लुट्-अध्यायिता अध्येता । लृट्-अध्यायिष्यते अध्येष्यते । आ.लिङ्-अध्यायिषीष्ट अध्येषीष्ट । लुङ्-चिण्वद्भावपक्षे - अध्यायि अध्यायिषाताम्-षत । चिण्वदभावे गाङ्पक्षे - अध्यगीषाताम्-षत । गाङभावे - अध्यैषाताम्-षत । लृङि-अध्यायिष्यत अध्यगीष्यत अध्येष्यत । एषु स्यसिसीयुडिति सूत्रं चिन्त्यम् । स्टु-स्तु प.स. अनिट्-लट्=स्तूयते । लोट्-स्तूयताम् । लङ्-अस्तूयत । वि.लिङ्-स्तूयेत ।

कृसृभृवृ-स्तुद्रुस्रुश्रुवो लिटि ७।२।१३॥

क्र्यादिभ्य एव लिट इण्न स्यादन्यस्मादनिटोऽपि स्यात् । सूत्रे पठितेन वृधातुना वृङ्वृञावुभौ गृहचेते । सूत्रे पठितेभ्यः क्र्यादिधातुभ्यो भिन्नस्यानिटोधातोर्लिटि अनेनैव सूत्रेण इट् भवति । सूत्रे पठितेषु धातुषु मध्ये कृञ् भृञ् वृञ् स्तु(स्टुञ्)एषामुभयपदिनां कर्तरि उभयपक्षे (परस्मैपदपक्षे आत्मनेपदपक्षे च) सृ श्रु द्रु स्रु एषां परस्मैपदिनामात्मनेपदिनो वृङ्धातोः कर्तरि चैषां सर्वेषां कर्मणि (कर्मवाच्ये) च इण्न भवति । यथा-ष्टुञ्-स्तु=परस्मैपदे कर्तरि लिटि- तुष्टाव तुष्टुवतुः तुष्टुवुः - प्र.पु. । तुष्टोथ तुष्टुवथुः तुष्टुव - म.पु. । तुष्टाव तुष्टव तुष्टुव तुष्टुम - उ.पु. । आत्मनेपदे कर्तरि कर्मणि च लिटि समानरूपाणि-तुष्टुवे तुष्टुवाते तुष्टुविरे - प्र.पु. । तुष्टुषे तुष्टुवाथे तुष्टुध्वे - म.पु. । तुष्टुवे तुष्टुवहे तुष्टुमहे - उ.पु. । एवं सूत्रे पठितानां धातूनां रूपाणि समाधेयानि । अधः कारिकयाऽनिढ्धातवो निर्दिश्यन्ते -

अजन्तोऽकारन्वा यस्तास्यनिट् थलि वेडयम् ।
ऋदन्त इदृङ्नित्यानिट् क्र्याद्यन्यो लिटि सेड् भवेत् ॥[1]

य ऋदन्तभिन्नोऽजन्तोऽकारवन्वा धातुः स तासौ = तासिप्रत्ययपरेऽनिट् भवति । अयमिट् थलि वा= विकल्पो भवति । य इदृक् = तासो नित्यानिट् ह्रस्व ऋकारान्तधातुरस्ति । स धातुस्तासौ परे नित्यानिट्, थल्यपि नित्यानिट् च भवति । वमादिषु परेषु इट् भवत्येव । कादिधातुभ्यो लिटि कुत्रापि इट् न भवति तास्यादावपि । कृसृ इति सूत्रे पठितधातोर्भिन्नोऽन्योऽजन्तोऽकारवान्वा न स्यात् । स धातुस्तासौ नित्यानिडपि लिटि सर्वत्र सेट् कादिनियमात् । वमादिषु तु इट् भवत्येव । अनिट्धातोर्लृट्-आ. लिङ्लुङ्लृङ्क्षु सर्वत्र नेट् ।

---

[1] (क) य ऋदन्तभिन्नोऽजन्तो धातुः क्षि जि चि पा स्था दा इत्यादिरस्ति । तस्य तासौ=तासिप्रत्ययपरे नित्यानिट् भवति । तस्य धातोर्थलि वा=विकल्प इट् । अस्य वमादिषु परेषु त्विट् । वमौ परस्मैपदिनौ प्रत्ययौ अन्ये आत्मनेपदिनः । वमादभिर्व-म-थास्=से-ध्वम्=ध्वे-वहे-महे एते ज्ञेयाः । ख) यस्य धातोरादेर्वर्णोऽकारोऽस्ति । स धातुरकारवान्प्रोच्यते । तदनुसारमकारवान्धातुः प्रच्छ् भ्रस्ज गम् घस् शक् त्यज् दह् इत्यादिरस्ति । तस्य तासि परे नित्यानिट् । तस्य थलि वेट् । वमादिषु परेषु त्विट् । ग) यो ह्रस्व ऋकारान्तो धातुर्ह्वृ हृ धृ स्मृ इत्यादिरस्ति । तस्य थलि नेट्, तासौ परे नित्यानिट् । अस्य वमादिषु परेषु त्विट् । घ) कृसृ इति सूत्रे पठितेभ्यो धातुभ्यो लिटि कुत्रापि इट् न । तास्यादावपि इण्न । ङ) कृसृ इति सूत्रे पठितधातुभिन्नो योऽजन्तोऽकारवान्वा धातुर्न स्यात् । तस्य परस्मैपदिनश्च धातोस्तासौ परे नित्यानिडपि लिटि सर्वत्र सेट् कादिनियमात् । यथा युज् बुध् (बुध्य) सिच् क्षिप् लिह् रुध् भिद छिदित्यादयः । लिटि-रुरोधिथ/रुरुधिव-म । च) वृञ्धातोः परस्मैपदे थलि वेदे निपातनात् नेट्-ववर्थ । लोके केवलं थलि इट् - ववरिथ ।व-म-थास्=से-ध्वम्=ध्वे-वहि-महिषु नेट् । वृञ्धातोः परस्मैपदे लुटि लृटि-लुङि लृङि चेट् । वृङ्वृञोरात्मनेपदेऽपि लुटि लृटि लृङि चेट् । लुङि तु लिङ्सिचोरात्मनेपदेष्विति सूत्रेण वेट् । अवरि(री)ष्ट । वेडभावे अवृत । सर्वेषामनिटां धातूनां स्ये सीयुटि सिचि तव्यत्तव्ययोस्तुमुन्क्त्वाप्रत्ययोश्च परेषु नेट् । स्मरणीयं यत् कारिकयाऽनिर्दिष्टा अजन्ता अनेकाजश्च धातवः सेटो भवन्ति ।

(ख) दादीनामेकपदिनामुभयपदिनां च धातूनां क्रियापदरूपचिन्तनम् - दा दे दो धा धे मा पा हा गै (गा) सो (सा) एषु धातुषु मध्ये सकर्मकाणां धातूनां कर्मवाच्ये चतुर्षु लट्-लोट्-लङ्-वि.लिङ्क्षु लकारेषु सार्वधातुकेषु अकर्मकस्य स्थाधातोर्भाववाच्ये धातोराकारस्थाने घुमास्थापाजहातिसां हलीति सूत्रेण ईत्वं भवति । स्थाधातुं विनाऽन्येषां दादिधातूनां लडादिषु चतुर्षु लकारेषु सार्वधातुकेषु त्रिषु पुरुषेषु क्रमशस्त्रीणि त्रीणि रूपाणि निष्पद्यन्ते । स्थाधातोस्तु लट्-लोट्-लङ्-वि.लिङ्क्षु चतुर्षु लकारेषु प्रथमपुरुषस्यैकवचने एकैकं रूपं निष्पद्यते । अस्य धातोरन्येषु लिट्-लुट्-लृट्-आ.लिङ् लृङ्लकारेषु यक्रहितानि रूपाणि भवन्ति । अत्र दादीनां धातूनामेकैकं रूपं प्रस्तूयते । दादेदो-दा=लट्=दीयते । धा-धीयते । लोट् धीयताम् । लङ् अधीयत । वि.लिङ्-धीयते । एवं मा-मीयते । मीयताम् । अमीयत । मीयेत । पा-पीयते । पीयताम् । अपीयत । पीयेत । हा-हीयते । हीयताम् । अहीयत । हीयेत । गै-गा=गीयते । गीयताम् । अगीयत । गीयेत । सो=सा=सीयते । सीयताम् । असीयत । सीयेत । ष्ठा-स्था=अस्य केवलं-प्रथमपुरुषस्यैकवचने रूपम्-स्थीयते । स्थीयताम् । अस्थीयत । स्थीयेत । कैश्चन विद्वद्भिरस्य धातोः कर्मण इव रूपाणि दर्शितानि प्राप्यन्ते[1] । यथा स्थीयते स्थीयेते स्थीयन्ते । स्थीयसे स्थीयेथे स्थीयध्वे । स्थीये स्थीयावहे स्थीयामहे । अस्य धातोरन्येषु सर्वेषु लकारेषु सर्वेषु पुरुषेषु च रूपाणि ज्ञेयानि । पा गै=गा धेट्=धा हा दो=दा मा[2] एते परस्मैपदिनः सकर्मका धातवो ज्ञेयाः । ऐषु पानार्थकः पाधातुर्गृहचते न तु रक्षणार्थकः । ष्ठा-स्था परस्मैपदी अकर्मकः । देङ्=दा माङ्=मा एतावात्मनेपदिनौ सकर्मकौ । दा धा उभयपदिनौ सकर्मकौ । "घुमास्थागापाजहातिसां हलि" इति सूत्रे पठितानां धातूनामाकारस्य स्थाने ईत्वं भवति । अस्मिन्सूत्रेऽपठितानां धातूनामाकरस्य स्थाने ईत्वं न । यथा-ग्लै-ग्ला लट्=ग्लायते । ज्ञा=ज्ञायते । ध्यै-ध्या=ध्यायते । ष्णा-स्ना=स्नायते इत्यादि ।

(ग) अजन्तानां केवलमात्मनेपदिनामुभयपदिनामात्मनेपदपक्षाणामनिटां सकर्मकधातूनां कर्तृवाच्ये कर्मवाच्ये च लिटि इट् भवति । यत उभयोर्वाच्ययोर्लिटि समानरूपाणि भवन्ति । अन्येषु लुट्-लृट्-आ.लिङ्-लृङ्क्षु लकारेषु कर्तृकर्मवाच्ययोः सर्वेषामनिटामजन्तधातूनामिट् न भवति । कर्मवाच्येऽजन्तानामनिटां धातूनां चिण्वद्भावेन इट् भवति । इट्विषये इयमुक्तिः सदा स्मरणीया । आत्मनेपदिनः सकर्मकधातोः कर्तृवाच्ये कर्मवाच्ये च लिटि समानरूपाणि । यथा - अधि+इङ्-गाङ्=गा=अधिजगे अधिजगाते अधिजगिरे । अधिजगिषे अधिजगाथे अधिजगिध्वे । अधिजगे अधिजगिवहे अधिजगिमहे । उभयपदिन आकारान्तस्य सकर्मकधातोरात्मनेपदपक्षे कर्तृवाच्ये कर्मवाच्ये च लिटि समानरूपाणि-दा-ददे ददाते ददिरे । ददिषे ददाथे ददिध्वे । ददे ददिवहे ददिमहे । एवं धा-दधे दधाते दधिरे । दधिषे दधाथे दधिध्वे । दधे दधिवहे दधिमहे ।

(घ) परस्मैपदिनामाकारान्तानां सकर्मकधातूनां कर्तृवाच्ये कर्मवाच्ये च लिटि भिन्नभिन्नरूपाणि भवन्ति । इट्विषये २-७-१-क) अजन्तानामेकसकर्मकधातूनाम्. उपशीर्षकप्रसङ्गे कृसृवृ. सूत्रस्य वृत्तेः पश्चात्पङ्क्तौ समुल्लिखितः । तत्रैव द्रष्टव्यः । पा-कर्तरि लिटि-पपौ पपतुः पपुः । पपिथ-पपाथ पपथुः पप । पपौ पपिव पपिम । कर्मणि लिट्-पपे पपाते पपिरे । पपिषे पपाथे पपिध्वे । पपे पपिवहे पपिमहे । हा[3]-कर्तरि लिटि-जहौ जहतुः जहुः । जहिथ-जहाथ जहथुः जह । जहौ जहिव जहिम । कर्मणि लिटि-जहे जहाते जहिरे । जहिषे जहाथे जहिध्वे । जहे जहिवहे जहिमहे । गै-गा कर्तरि लिटि-जगौ जगतुः जगुः । जगिथ-जगाथ जगथुः जग । जगौ जगिव जगिम । कर्मणि लिटि-जगे जगाते जगिरे । जगिषे जगाथे जगिध्वे । जगे जगिवहे जगिमहे । एवं मा धातो रूपाणि ज्ञेयानि ।

---

१ भर्तृहरिः - वैराग्यशतकम्-कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासः - ३७। चक्रधर नौटियाल हंसी बृहद्-अनुवाद चन्द्रिका - मोतीलाल बनारसीदास, चौक वाराणसी, सन् १९९२, पृ. ३४७ । उमाकान्त त्रिपाठी - अनुवादरत्नाकरः - प्र. चौखम्वा विद्या भवन, वाराणसी - सं. सन् २००१ पृ. ३०५

२ धातुरयं भ्वादौ जुहोत्यादौ चास्ति ।

३ अयं त्यागार्थे प्रोक्तो ग्रहीतव्यो नान्यः ।

२-५-३ उभयपदद्विकर्मधातवः

उभयपदी द्विकर्मकधातुः कर्मणि-णीञ् नी=लट्=नीयते । लोट्-नीयताम् । लङ्-अनीयत । वि.लिङ्-नीयेत । कर्तरि कर्मणि च लिटि समानरूपाणि-निन्ये निन्याते निन्यिरे । निन्यिषे निन्याथे निन्यिध्वे । निन्ये निन्यिवहे निन्यिमहे । चिञ्=चि-चीयते । चीयताम् । अचीयत । चीयेत । कर्तरि कर्मणि च लिटि समानरूपाणि-कुत्वपक्षे-चिक्ये चिक्याते चिक्यिरे । चिक्यिषे चिक्याथे चिक्यिध्वे । चिक्ये चिक्यिवहे चिक्यिमहे । कुत्वाभावपक्षे-चिच्ये चिच्याते चिच्यिरे । चिच्यिषे चिच्याथे चिच्यिध्वे । चिच्ये चिच्यिवहे चिच्यिमहे । ब्रूञ्-वच्=उच्यते । उच्यताम् । औच्यत । उच्येत । लिटि कर्तरि आत्मनेपदे कर्मणि समानरूपाणि- ऊचे ऊचाते ऊचिरे । ऊचिषे ऊचाथे ऊचिध्वे । ऊचे ऊचिवहे ऊचिमहे । लुटि-वक्ता । लृट्- वक्ष्यते । आ.लिङि-वक्षीष्ट । लुङ्-अवोचि अवोचेताम् अवोचन्त । अवोचथाः अवोचेथाम् अवोचध्वम् । अवोचे अवोचावहि अवोचामहि -अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङि वच उमिति उमि गुणे च । लृङि-अवक्ष्यत ।

२-५-४ अजन्तहलादिधातवः

अजन्तानां हलन्तानां चाकर्मकधातूनां भावे (भाववाच्ये) सकर्मकधातूनां कर्मणि (कर्मवाच्ये) हलन्तेषु धातुषु मध्ये हन्ग्रहदृशां च धातूनामधः सूत्रेण इटो विधानम्-

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६।४।६२॥

उपदेशे योऽच् तदन्तादीनां हनादिनां[1] च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च । सूत्रेऽच्कथनेन आ इ ई उ ऊ ऋ ॠ ए ओ ऐ औ एतेऽन्ता धातवो गृह्यन्ते । स्यादिना स्यसिच्सीयुट्तास एते प्रत्यया गृह्यन्ते । चिणीवाङ्गकार्यमित्यस्यार्थश्चिण्वद्भावो बोध्यः । चिण्वद्भावेन णिच्सदृशप्रत्ययो बोध्यते । यथा णिचि परे धातोरङ्गस्य वृद्ध्यादिकार्यं भवति । तथैव स्य सिच् सीयुट् तास् एतेषु परेषु चिण्वद्भावेन धातोरङ्गस्य वृद्ध्यादिकार्यं भवति । यस्य धातोर्लुटि तास्, लृटि स्यः, आ.लिङि सीयुट्, लुङि च सिच् प्रत्ययश्च भवति । तस्याजन्त धातोरेतेषु स्यादिषु परेषु उपरिसूत्रेण धातोश्चिण्वद्भावो भवति धातोः परे स्थितस्य प्रत्ययस्येडागमस्ततो धार्तोवृद्धिश्च । यतोऽजन्तधातोर्वैकल्पिके चिण्वद्भावपक्षे स्यादिनामिडागमेन धातोश्चिण्वद्भावपक्षेऽनिडागमेन च लुट्-लृट्-आ.लिङ्-लुङ्क्षु लकारेषु द्वे द्वे रूपे भवतः । विशेषविधिं विना यो धातुः कर्तृवाच्ये सेट् अस्ति । स धातुर्भावे कर्मणि च सेट् ज्ञेयः । यो धातुः कर्तृवाच्येऽनिट् अस्ति स धातुर्भावे कर्मणि चानिडेव बोध्यः । यतः सेड्धातोश्चिण्वदभावपक्षे स्यसिच्सीयुट्तासिसु परेषु "आर्धधातुकस्येड्वलादे" इति सूत्रेण इट् भवति अनिडधातोस्तु न । येऽजन्ता धातवस्तेषामात्मनेपदपक्षाणामनिटां धातूनां कर्तृवाच्ये लिट्-लुट-लृट्-आ.लिङ्-लृङ्क्षु लकारेषु अनिडागमेन यानि रूपाणि भवन्ति । भावे कर्मणि च स्यसिच्सीयुट् इति सूत्रेणानिडागमपक्षे तान्येव रूपाणि भवन्ति । भावे तु सर्वेषु लकारेषु केवलं प्रथमपुरुस्यैकवचने एकैकं रूपं भवति । कर्मणि तु सर्वेषु लकारेषु सर्वेषु पुरुषेषु रूपाणि भवन्ति ।

क) अजन्तधातवः-भू.प.अ.से.लुट्-चिण्वद्भावपक्षे वृद्धावावादेशे-भाविता, चिण्वदभावपक्षे गुणेऽवादेशे च-भविता । एवं सेड्धातोरुभयपक्षे रूपं ज्ञेयम् । लृट्-भाविष्यते भविष्यते । आ.लिङि-भाविषीष्ट भविषीष्ट । लुङि-अभावि । लृङि अभाविष्यत अभविष्यत । क्षि=प.अ. अनिट्=लुट्, क्षायिता क्षेता । क्षायिष्यते क्षेष्यते । क्षायिषीष्ट क्षेषीष्ट । अक्षायि । अक्षायिष्यत अक्षेष्यत । मृङ्-मृ=आ.अ. अनिट् मारिता मर्ता । लृट्= मारिष्यते मरिष्यते ऋद्धनोः स्ये इति सूत्रेण इट् । आ.लिङ्=मारिषीष्ट

[1] हलन्तधातुषु हन्ग्रहदृशो विनाऽन्येषु हलन्तधातुषु सूत्रमिदं न लगति ।

मृषीष्ट । लुङ्-अमारि । लृङ्-अमारिष्यत अमरिष्यत ऋद्धनोः स्ये इति इट् । ष्ठा-स्था-प.अ. अनिट् लुट्=स्थायिता स्थाता । लृट्=स्थायिष्यते स्थास्यते । आ.लिङ् स्थायिसीष्ट स्थाषीष्ट । लुङ्-अस्थायि । लृङ्= अस्थायिष्यत अस्थास्यत । एवं ग्लै-ग्ला धातुरन्येऽकर्मकाश्च धातवोऽपि ज्ञेयाः ।

ख) दा=उ.स. अनिट्, लुट्-दायिता दाता । लृट्-दायिष्यते दास्यते । आ.लिङि-दायिषीष्ट दासीष्ट । लुङ्-अदायि अदायिषाताम् अदायिषत । अदायिष्ठाः अदायिषाथाम् अदायिढ्वम्- ध्वम् । अदायिषि अदायिष्वहि अदायिष्महि-एतानि रूपाणि चिण्वद्भावपक्षे । कर्तरि लुङि-अदित । प्रथमपुरुषस्य द्विवचनतोऽवशिष्टानि रूपाणि कर्तरि कर्मणि चिण्वदभावपक्षे च समानानि-अदायि अदिषाताम् अदिषत । अदिथाः अदिषाथाम् अदिध्वम् । अदिषि अदिष्वहि अदिष्महि । लृङ्- अदायिष्यत अदास्यत । एवं धा=लुट्-धायिता धाता । लृट्-धायिष्यते धास्यते । आ.लिङ्-धायिषीष्ट धासीष्ट । लुङ्-अधायि अधायिषाताम् अधायिषत । अधायिष्ठाः अधायिषाथाम् अधायिढ्वम-ध्वम् । अधायिषि अधायिष्वहि आधायिष्महि । कर्तरि लुङि-अधित, कर्मणि-अधायि । अवशिष्टानि कर्तरि कर्मणि च चिण्वदभावपक्षे समान रूपाणि - अधिषाताम् अधिषत । अधिथाः अधिषाथाम् अधिध्वम् । अधिषि अधिष्वहि अधिष्महि । लृङ्-अधायिष्यत अधाष्यत । एवं दै=दा दे=दा, धे=धा, ग्लै=ग्ला, पा, हा, गै=गा, षो = सो-सा धातूनां रूपाणि ज्ञेयानि । ग्लैधातोस्तु सर्वेषु लकारेषु केवलं प्रथमपुरुस्यैकवचने एकैकं रूपं स्थावज्ज्ञेयम् ।

ग) श्रु=प.स. अनिट्, लट्=श्रूयते । लोट्-श्रूयताम् । लङ्-अश्रूयत । वि.लिङ्-श्रूयेत । लिटि-शुश्रुवे । शुश्रुवाते शुश्रुविरे । शुश्रुषे शुश्रुवाथे शुश्रुध्वे । शुश्रुवे शुश्रुवहे सुश्रुमहे । लुट्-श्राविता श्रोता । लृट्-श्राविष्यते श्रोष्यते । आ.लिङि-श्राविषीष्ट श्रोषीष्ट । लुङ्-चिण्वद्भावपक्षे-अश्रावि अश्राविषाताम् अश्राविषत । अश्राविष्ठाः अश्राविषाथाम् अश्राविध्वम् । अश्राविषि अश्राविष्वहि अश्राविष्महि । चिण्वदभावपक्षे-अश्रावि अश्रोषाताम् अश्रोषत । अश्रोष्ठाः अश्रोषाथाम् अश्रोध्वम् । अश्रोषि अश्रोष्वहि अश्रोष्महि । लृङ्-अश्राविष्यत अश्रोष्यत ।

घ) श्रि=उ.स. सेट् लुट्=श्रायिता श्रयिता । लृट्-श्रायिष्यते श्रयिष्यते । आ.लिङ्-श्रायिषीष्ट श्रयिषीष्ट । लुङ्-चिण्वद्भावपक्षे-अश्रायि अश्रायिषाताम् अश्रायिषत । अश्रायिष्ठाः अश्रायिषाथाम् अश्रायिढ्वम-ध्वम् । अश्रायिषि अश्रायिष्वहि अश्रायिष्महि । चिण्वदभावे- अश्रायि अश्रयिषाताम् अश्रयिषत । अश्रयिष्ठाः अश्रयिषाथाम् अश्रयिध्वम् । अश्रयिषि अश्रयिष्वहि अश्रयिष्महि लृङ्-अश्रायिष्य अश्रयिष्यत ।

ङ) ष्टुञ्-स्तु=प.स. अनिट्, अस्य धातोर्लडादीनां चतुर्णां लकाराणां रूपाणि पूर्वं लिखितानि । लुट्-स्ताविता स्तोता । लृट्-स्ताविष्यते स्तोष्यते । आ.लिङ्-स्ताविषीष्ट स्तोषीष्ट । लुङि-चिण्वद्भावे-अस्तावि अस्ताविषाताम् अस्ताविषत । अस्ताविष्ठाः अस्ताविषाथाम् अस्ताविध्वम् । अस्ताविषि अस्ताविष्वहि अस्ताविष्महि । चिण्वदभावे-अस्तावि अस्तोषाताम् अस्तोषत । अस्तोष्ठाः अस्तोषाथाम् अस्तोध्वम् । अस्तोषि अस्तोष्वहि अस्तोष्महि । लृङ्-अस्ताविष्यत अस्तोष्यत ।

च) णीञ्-नी-उ. द्विकर्मकः, अनिट् अन्यलकाराणां रूपाणि पूर्वमेव लिखितानि । लुट्-नायिता नेता । लृट्-नायिष्यते नेष्यते । आ. लिङि-नायिषीष्ट नेषीष्ट । लुङि चिण्वद्भावे-अनायि अनायिषाताम् अनायिषत । अनायिष्ठाः अनायिषाथाम् अनायिध्वम् । अनायिषि अनायिष्वहि अनायिष्महि । चिण्वदभावे-अनायि अनेषाताम् अनेषत । अनेष्ठाः अनेषाथाम् अनेध्वम् । अनेषि अनेष्वहि अनेष्महि । लृङ्-अनायिष्यत अनेष्यत ।

छ) चिञ्-चि-उ. द्विकर्मकः, अनेट् चिण्वद्भावपक्षेऽभावपक्षे च लुट्-चायिता चेता । लृट्-चायिष्यते चेष्यते । आ. लिङि-चायिषीष्ट चेषीष्ट । लुङ्-अचायि अचायिषाताम् अचायिषत । अचायिष्ठाः अचायिषाथाम् अचायिध्वम् । अचायिषि अचायिष्वहि अचायिष्महि -चिण्वदभावपक्षे त्वनिट्-अचायि

अचेषाताम् अचेषत । अचेष्ठाः अचेषाथाम् अचेध्वम् । अचेषि अचेष्वहि अचेष्महि । लृङ्-अचायिष्यत अचेष्यत । लट्-लोट्-लङ्-वि.लिङां लिटश्च रूपाणि पूर्वमेव लिखितानि २-७-२ संख्यायां द्रष्टव्यानि ।

ज) जि-द्विकर्मकः, अनिट्, लट्-जीयते । लोट्-जीयताम् । लङ्-अजीयत । वि. लिङ्-जीयेत । लिट्-जिग्ये जिग्याते जिग्यिरे । जिग्यिषे जिग्याथे जिग्यिध्वे । जिग्ये जिग्यिवहे जिग्यिमहे-क्र्यादि-नियमेन इट् । लुट्-जायिता जेता । लृट्-जायिष्यते जेष्यते । आ.लिङ्- जायिषीष्ट जेषीष्ट । लुङ्- चिण्वद्भावपक्षे अजायि अजायिषाताम् अजायिषत । अजायिष्ठाः अजायिषाथाम् अजायिध्वम् । अजायिषि अजायिष्वहि अजायिष्महि । चिण्वदभावपक्षे त्वनिट्-अजायि अजेषाताम् अजेषत । अजेष्ठाः अजेषाथाम् अजेध्वम् । अजेषि अजेष्वहि अजेष्महि । लृङ्- अजायिष्यते अजिष्यते ।

झ) हृ-उ. द्विकर्मकः, अनिट्, लट्-ह्रियते । लोट्-ह्रियताम् । लङ्-अह्रियत । वि.लिङ्-ह्रियेत । आत्मनेपदे कर्तरि कर्मणि च लिटि समानरूपाणि । जह्रे जह्राते जह्रिरे । जह्रिषे जह्राथे । जह्रिध्वे । जह्रे जह्रिवहे जह्रिमहे । लुट्-हारिता हर्ता । लृट्-हारिष्यते हरिष्यते- ऋद्धनो स्ये इति इट् । आ.लिङ्- हारिषीष्ट हृषीष्ट । लुङ्-अहारि अहारिषाताम् अहारिषत । अहारिष्ठाः अहारिषाथम् अहारिध्वम् । अहारिषि अहारिष्वहि अहारिष्महि-चिण्वद्भावपक्षे । चिण्वदभावपक्षे त्वनिट्- अहारि अहृषाताम् अहृषत । अहृथाः अहृषाथाम् अहृढ्वम् । अहृषि अहृष्वहि अहृष्महि । लृङ्-अहारिष्यत अहरिष्यत ।

ञ) धृ-उ.स. अनिट्, लट्-ध्रियते । लोट्-ध्रियताम् । लङ्-अध्रियत । वि.लिङ्-ध्रियेत । लिट्-दध्रे दध्राते दध्रिरे । दध्रिषे दध्राथे दध्रिध्वे । दध्रे दध्रिवहे दध्रिमहे । लुट्-धारिता धर्ता । लृट् धारिष्यते धरिष्यते । आ.लिङ्-धारिषीष्ट धृषीष्ट । लुङ्-अधारि अधारिषाताम् अधारिषत । अधारिष्ठाः अधारिषाथाम् अधारिध्वम् । अधारिषि अधारिष्वहि अधारिष्महि - चिण्वद्भावपक्षे । चिण्वदभावपक्षे त्वनिट् - अधारि अधृषाताम् अधृषत । अधृथाः अधृषाथाम् अधृढ्वम् । अधृषि अधृष्वहि अधृष्महि । लृङ्-अधारिष्यत अधरिष्यत ।

ट) स्मृ=प.स. अनिट्, लट्-स्मियते । लोट्-स्म्रियताम् । लङ्-अस्म्रियत । वि. लिङ्-स्म्रियेत । लिट्-सस्म्रे सस्म्राते सस्म्रिरे । सस्म्रिषे सस्म्राथे सस्म्रिढ्वे । सस्म्रे सस्म्रिवहे सस्म्रिमहे । लुट्-स्मारिता स्मर्ता । लृट्-स्मारिष्यते स्मरिष्यते-ऋद्धनोः स्ये इति सूत्रेण इट् । आ.लिङ्-स्मारिषीष्ट स्मृषीष्ट । लुङ्-अस्मारि अस्मारिषाताम् अस्मारिषत । अस्मारिष्ठाः अस्मारिषाथाम् अस्मारिध्वम् । अस्मारिषि अस्मारिष्वहि अस्मारिष्महि । चिण्वदभावपक्षे- अस्मारि अस्मृषाताम् अस्मृषत । अस्मृथाः अस्मृषाथाम् अस्मृढ्वम् । अस्मृषि अस्मृष्वहि अस्मृष्महि । लृङ्-अस्मारिष्यत अस्मरिष्यत ।

ठ) कृ-उ. स. अनिट्, लट्-क्रियते । लोट्-क्रियाताम् । लङ्-अक्रियत । वि.लिङ्-क्रियेत । कर्तरि कर्मणि च लिटि समानरूपाणि-चक्रे चक्राते चक्रिरे । चकृषे चक्राथे चकृढ्वे । चक्रे चकृवहे चकृमहे । लुट्-कारिता कर्ता । लृट्-कारिष्यते करिष्यते । आ.लिङ्-कारिषीष्ट कृषीष्ट । लुङ्-चिण्वद्भावपक्षे-अकारि अकारिषाताम् अकारिषत । अकारिष्ठाः अकारिषाथाम् अकारिध्वम् । अकारिषि अकारिष्वहि अकारिष्महि । चिण्वदभावपक्षे त्वनिट्-अकारि अकृषाताम् अकृषत । अकृथाः अकृषाथाम् अकृढ्वम् । अकृषि अकृष्वहि अकृष्महि । लृङ्-अकारिष्यत अकरिष्यत ।

ड) भृ-उ. स. अनिट्, लट्-भ्रियते । लोट्-भ्रियताम् । लङ्-अभ्रियत । वि.लिङ्- भ्रियेत । कर्तरि कर्मणि च लिटि-बभ्रे बभ्राते बभ्रिरे । बभृषे बभ्राथे बभृढ्वे । बभ्रे बभृवहे बभृमहे । लुट्-भारिता भर्ता । लृट्-भारिष्यते भरिष्यते । आ.लिङ्-भारिषीष्ट भृषीष्ट । लुङ्-चिण्वद्भापक्षे अभारि अभारिषाताम् अभारिषत । अभारिष्ठाः अभारिषाथाम् अभारिध्वम् । अभारिषि अभारिष्वहि अभारिष्महि । चिण्वदभावपक्षे - अभारि अभृषाताम् अभृषत । अभृथाः अभृषाथाम् अभृढ्वम् । अभृषि अभृष्वहि अभृष्महि । लृङ्-अभारिष्यत । अभरिष्यत । एवमेव सृधातो रूपाणि ज्ञेयानि ।

ढ) वृञ् उ.स.अनिट् = लट्-व्रियते । लोट्-व्रियताम् । लङ्-अव्रियत । वि.लिङ्-व्रियेत । आत्मनेपदे कर्तरि कर्मणि च लिटिसमानरूपाणि-वव्रे वव्राते वव्रिरे । ववृषे वव्राथे ववृढ्वे । वव्रे ववृवहे ववृमहे । लुट्-वारि(री)ता वरि(री)ता । लृट्-वारि(री)ष्यते वरि(री)ष्यते- वृतो वेति वा दीर्घः । आ.लिङ्-चिण्वद्भावे वृतो वेति वा दीर्घे-वारि(री)षीष्ट, वारि(री)षीयाताम् । चिण्वदभावपक्षे लिङ्सिचोरात्मनेपदेषु इति सूत्रेण वा इटि वृतो वेति वा दीर्घे - वारि(री)षीष्ट । इडभावे - वृषीष्ट । लुङ्-चिण्वद्भावे - अवारि अवारि(री)षाताम्, अवारि(री)षत । अवारि(री)ष्ठाः अवारि(री)षाथाम् आवारि(री)ध्वम् । अवारि(री)षि अवारि(री)ष्वहि-ष्महि । चिण्वदभावे - अवारि अवरि(री)षाताम् । अवरि(री)षत् । अवरि(री)ष्ठाः । अवरि(री)षाथाम् । अवरि(री)ध्वम् । अवरि(री)षि । अवरि(री) ष्वहि-ष्महि - लिङ्सिचोरिति वा इटि वृतो वेति वा दीर्घः । इडभावे - अवारि अवृषाताम् अवृषत । शेषं कृवत् । लृङ्-अवारि(री)ष्यत अवरि (री)ष्यत ।

ण) ज्ञा=स. अनिट्, लट्-ज्ञायते ज्ञायेते ज्ञायन्ते । ज्ञायसे ज्ञायेथे ज्ञायध्वे । ज्ञाये ज्ञायावहे - महे । लिट्-जज्ञे जज्ञाते जज्ञिरे । जज्ञिषे ज्ञज्ञाथे जज्ञिध्वे । जज्ञे जज्ञिवहे जज्ञिमहे । ज्ञानार्थस्य ज्ञाधातोर्लिटो रूपमिव जनी प्रादुर्भावे धातोरपि कर्तरि लिटि रूपाणि भवन्ति । लुट्- ज्ञायिता ज्ञाता । लृट्-ज्ञायिष्यते ज्ञास्यते । लोट्-ज्ञायताम् । लङ्-अज्ञायत । वि.लिङ्-ज्ञायेत । आ.लिङ्-ज्ञायिषीष्ट ज्ञासीष्ट । लुङ्-अज्ञायि अज्ञायिषाताम् अज्ञायिषत । अज्ञायिष्ठाः अज्ञायिषाथाम् अज्ञायिढ्म-ध्वम् । अज्ञायिषि अज्ञायिष्वहि-ष्महि-चिण्वद्भावपक्षे । चिण्वदभावपक्षे-अज्ञायि अज्ञासाताम् अज्ञासत । अज्ञाथाः अज्ञासाथाम् अज्ञाध्वम् । अज्ञासि अज्ञास्वहि अज्ञास्महि । लृङ्-अज्ञायिष्यत अज्ञास्यत ।

त) पॄ - प.स.सेट् = लट् = पूर्यते । लोट्-पूर्यताम् । लङ्-अपूर्यत । वि.लिङ्-पूर्येत । लिट्-पपरे पपराते पपरिरे । पपरिषे पपराथे पपरिध्वे । पपरे पपरिवहे पपरिमहे । लुट् - पारि(री)ता परि(री)ता । लृट्-पारि(री)ष्यते परि(री)ष्यते । आ.लिङ्-पारिषीष्ट परिषीष्ट पूर्षीष्ट । लुङ्-चिण्वद्भावे ते चिणि वृद्धौ तलोपे - अपारि । आतामादौ सिचि चिण्वदिटि वृद्धौ-अपारिषाताम्-षत । अपारिष्ठाः अपारिषाथम्-रिध्वम् । अपारिषि अपारिष्वहि-ष्महि । चिण्वदभावे द्विवचनतो लिङ्सिचोरात्मनेपदेष्विति वेट्पक्षे गुणे वृतो वेति वा दीर्घे - (अपारि) अपरी(रि)षाथाम्-षत । अपरी(रि)ष्ठाः अपरी(रि)षाथाम् - री(रि)ध्वम् । अपरी(रि)षि अपरी(रि)ष्वहि -ष्महि । इडभाव उदोष्ठ्यपूर्वस्येति उर्त्वे हलि चेति दीर्घे - अपारि अपूर्षाताम्[1] अपूर्षत । अपूर्ष्ठाः अपूर्षाथम् अपूढ्र्वम् । अपूर्षि अपूर्ष्वहि अपूर्ष्महि । लृङ् - अपारि(री)ष्यत अपरि(री)ष्यत । एवं वृधातोरपि रूपाणि समाधेयानि ।

थ) गॄ. प. सेट्, लट्-गीर्यते । लोट्-गीर्यताम् । लङ्-अगीर्यत । वि.लिङ्-गीर्येत । लिट्- जग्रे जग्राते जग्रिरे । जग्रिषे जग्राथे जग्रिध्वे । जग्रे जग्रिवहे जग्रिमहे । लुट्-गारि(री)ता, गरि(री)ता । लृट्-गारि(री)ष्यते, गरि(री)ष्यते । आ.लिङ्-गारिषीष्ट। गरिषीष्ट । इडभावे-गीर्षीष्ट गीर्षीयास्ताम् गीर्षीरन् । गीर्षीष्ठाः गीर्षीयास्थाम् गीर्षीध्वम् । गीर्षीय गीर्षीवहि-महि । लुङ्-चिण्वद्भावपक्षे-इटि वृद्धौ तलोपे - अगारि अगारि(री)षाताम् अगारि(री)षत । अगारि(री)ष्ठाः अगारि(री)षाथाम् अगारि(री)ध्वम् । अगारि(री)षि अगारि(री)ष्वहि अगारि(री)ष्महि । चिण्वदभावपक्षे- अगारि, वैकल्पिके इडागमपक्षे अगरि(री)षाताम्[2] अगरि(री)षत । अगरि(री)ष्ठाः अगरि(री)षाथाम् अगरि(री)ध्वम् । अगरि(री)षि अगरि(री)ष्वहि अगरि(री)ष्महि । इडागमाभावे तु-अगारि ॠत इद्धातोरिति इर्त्वे हलि चेति दीर्घे च - अगीर्षाथाम् अगीर्षत । अगीर्ष्ठाः अगीर्षाथाम् अगीढ्र्वम् । अगीर्षि अगीर्ष्वहि अगीर्ष्महि । लृङ्-अगारि(री)ष्यत अगरि(री)ष्यत । एवं स्तॄ कॄ शॄ जॄ दॄ धातूनां रूपाणि चिन्त्यानि ।

---

[1] सोमनाथ सिग्देलः - प्र.सं..सि.कौं, अथ भावकर्मतिङ्प्रकरणम्, उत्तरार्धः, पृ., २२४ ।
[2] सोमनाथ सिग्देलः - प्र.सं..सि.कौं, अथ भावकर्मतिङ्प्रकरणम्, उ., पृ., २२४ ।

द)- हलन्तधातुषु मध्ये त्रयो हनादिधातवः-हन् = प.स. अनिट् = लट्-हन्यते । लोट्-हन्यताम् । लङ्-अहन्यत । वि.लिङ्-हन्येत । लिट्-जघ्ने जघ्नाते जघ्निरे । जघ्निषे जघ्नाथे जघ्निध्वे । जघ्ने जघ्निवहे जघ्निमहे । लुट्-घानिता हन्ता । लृट्-घानिष्यते हनिष्यते - ऋद्धनो स्ये इति सूत्रेण इट् । आ.लिङ्-चिण्वदिटि वृद्धौ घत्वे-घानिषीष्ट घानिषीयास्ताम् घानिषीरन् । घानिषीष्ठाः । चिण्वत्वाभावे वधादेशे - वधिषीष्ट । लुङ्-ते णिचि वृद्धौ हस्य कुत्वे तलोपे - अघानि अघानिषाताम् - षत । अघानिष्ठाः अघानिषाथाम्-निध्वम् । अघानिषि अघानिष्वहि-ष्महि । चिण्वत्वाभावे सिचि कित्वेऽनुनासिकलोपे - (अघानि) अहसाताम्-सत । अहथाः अहसाथाम्-हध्वम् । अहसि अहन्वहि-न्महि । आत्मनेपदेष्वन्यतरस्यामिति लुङि वधादेशे स्थानिवद्भावेन नोपधावृद्धौ-अवधि अवधिषाताम्-षत । लृङ्-अघानिष्यत अहनिष्यत ।

ध) ग्रह-उ.स. सेट्-लट्-गृह्यते । लोट्-गृह्यताम् । लङ्-अगृह्यत । वि.लिङ्-गृह्येत । आत्मनेपदे कर्तरि कर्मणि च लिटि समानरूपाणि-जगृहे जगृहाते जगृहिरे । जगृहिषे जगृहाथे जगृहिध्वे । जगृहे जगृहिवहे जगृहिमहे । लुट्-चिण्वद्भावे ग्राहीता । आत्मनेपदपक्षे कर्तरि कर्मणि चिण्वदभावपक्षे च समानरूपाणि ग्रहीता । लृट्-चिण्वद्भावपक्षे-ग्राहीष्यते । कर्तरि कर्मणि चिण्वद्भावपक्षे समानरूपाणि-ग्रहीष्यते । आ.लिङ्-चिण्वद्भावे-ग्राहिषीष्ट । आत्मनेपदपक्षे कर्तरि कर्मणि चिण्वदभावपक्षे च समानरूपाणि-ग्रहीषीष्ट । लुङ्-चिण्वद्भावपक्षे-अग्राहि अग्राहीषाताम् अग्राहीषत । अग्राहीष्ठाः अग्राहीषाताम् अग्राहीध्वम् । अग्राहीषि अग्राहीष्वहि अग्राहीष्महि । कर्तर्येकवचने अग्रहीष्ट । कर्मणि-अग्राहि अग्रहीषाताम् अग्रहीषत । आत्मनेपदपक्षे कर्तरि कर्मणि चिण्वदभावपक्षे च समानरूपाणि - अग्रहीष्ठाः अग्रहीषाथाम् ग्रहीध्वम् । अग्रहीषि अग्रहीष्वहि अग्रहीष्महि । लृङ्-चिण्वद्भावपक्षे-अग्राहीष्यत । कर्मणि चिण्वदभावपक्षे आत्मनेपदपक्षे कर्तरि कर्मणि च समानरूपाणि-अग्रहीष्यत ।

न) दृश्=प.स. अनिट्-लट्-दृश्यते । लोट्-दृश्यताम् । लङ्-अदृश्यत । वि.लिङ्-दृश्येत । लिट्-ददृशे ददृशाते ददृशिरे । ददृशिषे ददृशाथे ददृशिध्वे । ददृशे ददृशिवहे ददृशिमहे । लुट्-दर्शिता द्रष्टा । लृट्-दर्शिष्यते द्रक्ष्यते । आ.लिङ्-दर्शिषीष्ट द्रक्षीष्ट । लुङि चिण्वद्भावपक्षे-अदर्शि अदर्शिषाताम् अदर्शिषत । अदर्शिष्ठाः अदर्शिषाथाम् अदर्शिध्वम् । अदर्शिषि अदर्शिष्वहि अदर्शिष्महि । चिण्वदभावे - अदर्शि अदृक्षाताम् अदृक्षत । अदृग्थाः अदृक्षाथाम् अदृग्ध्वम् । अदृक्षि अदृक्ष्वहि अदृक्ष्महि । लृङ्-अदर्शिष्यत अद्रक्षत ।

२-५-५ प.आ.उ. पदिनो हलन्तधातवः

परस्मैपदिषु आत्मनेपदिषु उभयपदिषु च हलन्तेषु धातुषु मध्ये यो धातुरकर्मकस्तस्य धातोर्भाववाच्ये लडादिषु सार्वधातुकेषु चतुर्षु लकारेषु प्रथमपुरुषस्यैकैकवचने यक्सहितमेकैकं रूपमन्येषु लिट्-लुट् लृट्-आशिर्लिङ्लुङ्लृङ्क्षु आर्धधातुकेषु लकारेषु च केवलं प्रथमपुरुषस्यैकवचने यक्रहितमेकैकं रूपं च भवति । प्रथमपुरुषस्य द्विवहुवचनयोर्मध्यमोत्तमपुरुषयोस्त्रिषु त्रिषु वचनेषु च रूपाणि न भवन्ति । यथा-क) वस्=प.अ. अनिट्, लट्-उष्यते । लोट्-उष्यताम् । लङ्-औष्यत । वि.लिङ्=उष्येत । लिटि-ऊषे ऊषाते ऊषिरे । ऊषिषे ऊषाथे ऊषिध्वे । ऊषे उषिवहे ऊषिमहे । लुट्-वस्ता । लृट्-वत्स्यते । आ.लिङ् वत्सीष्ट । लुङ्=अवात्सि । लृङ्=औष्यत । हस्=प.अ.सेट्, लट्=हस्यते । लोट्-हस्यताम् । लङ्=अहस्यत । वि.लिङ्-हस्येत । लिट्-जहसे । लुट्=हसिता । लृट्-हसिष्यते । आ.लिङ्-हसिषीष्ट । लुङ्-अहासि । लृङ्-अहसिस्यत । चकास्=प.अ. सेट्=लट्=च कास्यते । लोट्=च कास्यताम् । लङ्-अचकास्यत । आ.लिङ्-चकास्येत । लिट्=चचकासे । लुट्-चकासिता । लृट्=चकासिष्यते । आ.लिङ्=अचकासिपीष्ट । लुङ्=अचकासि । लृङ्-अचकासिस्यत ।

ख) कम्प्=आ.अ. सेट्, लट्=कम्प्यते । लोट्-कम्प्यताम् । लङ्=अकम्प्यत । आ.लिङ्=कम्प्येत । लिट्=चकम्पे । लुट्=कम्पिता । लृट्=कम्पिष्यते । आ.लिङ्=कम्पिषीष्ट । लुङ्=अकम्पिष्ट । लृङ्=अकम्पिष्यत ।

ग) काशृ दिप्तौ-भ्वादि-आ.अ.सेट्, कर्तरि-काशते । दिवादौ त्वकर्मकधातोरात्मनेपदे कर्तरि लुङो रूपं विना भावे चावशिष्टलकारेषु प्रथमपुरुषस्यैकवचने समानरूपाणि । लट्-काश्यते । लोट्-काश्यताम् । लङ्-अकाश्यत । वि.लिङ्-काश्येत । लिट्-चकाशे । आ.लिङ्=काशिषीष्ट । लुङ्=अकाशि । लृङ्-अकाश्यत । युध्=युध्यते । युयुधे । योद्धा । योत्स्यते । युध्यताम् । अयुध्यत । युध्येत । युत्सीष्ट । अयोधि । अयोत्स्यत ।

घ) तप्=प.अ. अनिट्, लट्=तप्यते । लोट्=तप्यताम् । लिङ्=अतप्यत । वि.लिङ्=तप्येत । लिट्=तेपे । लुट्=तप्ता । लृट्=तप्स्यते । आ.लिङ्=तप्सीष्ट । लुङ्=अन्वतप्त पापेन-पापार्थे चिण्न । अनुतापाद्भिन्ने तु चिण्-अतापि । लृङ्-अतप्स्यत ।

ङ) नश्=प.अ. अनिट्, लट्-नश्यते । लोट्=नश्यताम् । लङ्-अनश्यत । वि.लिङ्=नश्येत । लिट्=नेशे । लुट्=नशिता नष्टा । लृट्=नशिष्यते नङ्क्ष्यते । आ.लिङ्=नशिषीष्ट नङ्क्षीष्ट । लुङ्=अनाशि । लृङ्=अनशिष्यत अनङ्क्ष्यत । रधादिभ्यचेति वेट् ।

च) धातवः परस्मैपदिन आत्मनेपदिन उभयपदिनश्चैककर्मका द्विकर्मकाश्च सन्ति । तेषु अधिकांशा एककर्मकाः स्वल्पा द्विकर्मकाश्च विद्यन्ते । सर्वेषामेककर्मकाणां द्विकर्मकाणां च धातूनां लट्लोट्लङ्विधिलिङक्षु लकारेषु यक्सहितानि अन्यलकारेषु यक्रहितानि च रूपाणि भवन्ति । पठ्-प. एककर्मकः सेट्, लट्=पठ्यते पठ्येते पठ्यन्ते । पठ्यसे पठ्येथे पठ्यध्वे । पठ्ये पठ्यावहे पठ्यामहे । लोट्- पठ्यताम् पठ्येताम् पठ्यन्ताम् । पठ्यस्व पठ्येथाम् पठ्यध्वम् । पठ्यै पठ्यावहै-महै । लङ्-अपठ्यत । अपठ्येताम् अठ्यन्त । अपठ्यथाः अपठ्येथाम् अपठ्यध्वम् । अपठ्ये अपठ्यावहि अपठ्यामहि । वि.लिङ्-पठ्येत । लिट्-पेठे पेठाते पेठिरे । पेठिषे पेठाथे पेठिध्वे । पेठे पेठिवहे पेठिमहे । लुट्-पठिता । लृट्-पठिष्यते । आ.लिङ्-पठिषीष्ट । लुङ्-चिणि परे उपधावृद्धि-अपाठि अपाठिषाताम् अपाठिषत । अपाठिष्ठाः अपाठिषाथाम् अपाठिध्वम् । अपाठिषि अपाठिष्वहि अपाठिष्महि । लृङ्-अपठिष्यत ।

छ) गम्-प. एककर्मकः अनिट्, लट्=गम्यते गम्येते गम्यन्ते । गम्यसे गम्येथे गम्यध्वे । गम्ये गम्यावहे गम्यामहे । लोट्-गम्यताम् । लङ्-अगम्यत । वि.लिङ्=गम्येत । लिट्-जग्मे जग्माते जग्मिरे । जग्मिषे जग्माथे जग्मिध्वे । जग्मे जग्मिवहे जग्मिमहे । लुट्-गन्ता । गन्तासे । गन्ताहे । लृट्-आत्मनेपदेऽनिट्-गंस्यते । आ.लिङ्-गंसीष्ट । लुङ्=ते चिणि उपधावृद्धौ तलोपे=अगामि अगंसाताम् अगंसत । अगंस्थाः अगंसाथाम् अगन्ध्वम् । अगंसि अगंस्वहि अगंस्महि । लृङ्=अगंस्यत । अपवादे-शम् लुङ्=ते णिचि नोपधावृद्धौ तलोपे अशमि । तम्=अतमि । दम्=अदमि ।

ज) वदि=आ. एककर्मकः सेट्, लट्-वन्द्यते । लोट्-वन्द्यताम् । लङ्-अवन्द्यत । वि.लिङ्-वन्द्येत । लिटि कर्तरि कर्मणि च समानरूपाणि-ववन्दे ववन्दाते ववन्दिरे । ववन्दिषे ववन्दाथे ववन्दिध्वे । ववन्दे ववन्दिवहे ववन्दिमहे । लृट्-वन्दिता । लृट्-वन्दिष्यते । आ.लिङ्-वन्दिषीष्ट । लुङ्-अवन्दि अवन्दिषाताम् अवन्दिषत । अवन्दिष्ठाः अवन्दिषाथाम् अवन्दिध्वम् । अवन्दिषि अवन्दिष्वहि अवन्दिष्महि । लृट्-अवन्दिष्यत ।

झ) दिवादावात्मनेपदे हलन्तस्य सकर्मकस्य सेटोऽनिटश्च धातोः सर्वेषु लकारेषु प्रायेण कर्तरि कर्मणि च समानरूपाणि-पद्=आ.स. अनिट्, लट्=पद्यते पद्येते पद्यन्ते । पद्यसे पद्येथे पद्यध्वे । पद्ये पद्यावहे पद्यामहे । लुट्-पत्ता । लृट्-पत्स्यते । लोट्-पद्यताम् । लङ्-अपद्यत । वि.लिङ्-पद्येत । आ.लिङ्-

पत्सीष्ट । लुङ्-अपादि अपत्साताम् अपत्सत । अपत्थाः अपत्साथाम् अपद्ध्वम् । अपत्सि अपत्स्वहि अपत्स्महि । लृङ्-अपत्स्यत ।

बुध्=आ.स. अनिट्, लट्-बुध्यते । लिट्-बुबुधे । लुट्-बोद्धा । लृट्-भोत्स्यते । लोट्-बुध्यताम् । लङ्-अबुध्यत । आ.लिङ्-भुत्सीष्ट लुङि कर्तरि-अबुद्ध अबोधि । कर्तरि कर्मणि च-अबोधि अभुत्साताम् अभुत्सत । अबुद्धाः अभुत्साथाम् अबुद्ध्वम् । अभुत्सि अभुत्स्वहि अभुत्स्महि । लृङ्-अभोत्स्यत ।

अनुरुध्=आ.स. अनिट्, लट्=अनुरुध्यते । लिट्-अनुरुरुधे । लुट्-अनुरोद्धा । लृट्-अनुरोत्स्यते । लोट्-अनुरुध्यताम् । लङ्-अन्वरुध्यत । वि.लिङ्-अनुरुध्येत । आ.लिङ्-अनुरुत्सीष्ट । लुङ्-कर्तरि-अन्वरुद्ध । कर्मणि-अन्वरोधि । अवशिष्टानि कर्तरि कर्मणि च समानरूपाणि-अन्वरुत्साताम् अन्वरुत्सत । अन्वरुद्धाः । अन्वरुत्साथाम् । अन्वरुध्वम् । अन्वरुत्सि अन्वरुत्स्वहि अन्वरुत्स्महि । लृङ्-अन्वरोत्स्यत ।

मन्=आ.स. अनिट्, लट्-मन्यते । लिट्-मेने मेनाते मेनिरे । मेनिषे मेनाथे मेनिध्वे । मेने मेनिवहे मेनिमहे । लुट्-मन्ता । लृट्-मंस्यते । लोट्-मन्यताम् । लङ्-अमन्यत । वि.लिङ्-मन्येत । आ.लिङ्-मंसीष्ट । लुङ्-कर्तरि-अमंस्त । कर्मणि-ते चिणि उपधावृद्धौ तलोपे=अमानि । कर्तरि कर्मणि चान्यरूपाणि समानानि-अमंसाताम् अमंसत । अमंस्थाः अमंसाथाम् अमंध्वम् । अमंसि अमंस्वहि अमंस्महि । लृङ्-अमंस्यत ।

मृष्=स्वरितेतः,आत्मनेपदपक्षे,स.सेट्-मृष्यते । ममृषे । मर्षिता ।मर्षिष्यते । मृष्यताम् ।अमृष्यत । मर्षिषीष्ट । अमर्षि,अमर्षिषाताम् । लृङ्-अमर्षिष्यत । एते दिवादिधातवः ।

ञ) बाध्-आ.स. सेट्, लट्=बाध्यते । लोट्-बाध्यताम् । लङ्-अबाध्यत । वि.लिङ्-बाध्येत । लिट्-बबाधे । लुट्-बधिता । लृट्-बाधिते । आ.लिङ्-बाधिषीष्ट । लुङ-अबाधि अबाधिषाताम् अबाधिषत । लृङ्-अबाधिष्यत ।

ट) खाद्=प.स. सेट्, लट्-खाद्यते । लोट्-खाद्यताम् । लङ्-अखाद्यत । वि.लिङ्-खाद्येत । लिट्-चखादे । खादिता । लृट्-खादिष्यति । आ.लिङ्-खादिषीष्ट । लुङ्-अखादि । अखादिषाताम् । अखादिषत । लृङ्-अखादिष्यत ।

ठ) त्यज्=प.स. अनिट्, लट्-त्यज्यते । लोट्=त्यज्यताम् । लङ्-अत्यजत । वि.लिङ्-त्यजेत । लिट्=तत्यजे तत्यजाते तत्यजिरे । तत्यजिषे तत्यजाथे तत्यजिध्वे । तत्यजे तत्यजिवहे तत्यजिमहे । परस्मैपदे स्थितानां हलन्तानां अनिड्ढातूनां कर्मवाच्ये लिटि थास्=से ध्वम्=ध्वे वहि महि एषु परेषु इट् भवति । तासादौ त्वनिडेव भवति-लुट्=त्यक्ता । लृट्=त्यक्ष्यते । त्यक्षीष्ट । लुङ्-अत्याजि अत्यक्षाताम् अत्यक्षत । अत्यक्थाः अत्यक्षाथाम् अत्यग्ध्वम् । अत्यक्षि अत्यक्ष्वहि अत्यक्ष्महि । लृङ्-अत्यक्ष्यत ।

ड) पच्=उ. द्विकर्मकः अनिट् लट्-पच्यते । लोट्=पच्यताम् । लङ्-अपच्यत । वि.लिङ्-पच्येत । लिट्-कर्तरि कर्मणि च रूपाणि समानानि-पेचे पेचाते पेचिरे । पेचिषे पेचाथे पचिध्वे । पेचे पेचिवहे पेचिमहे । लुट-पक्ता । लृट्-पक्ष्यते । आ.लिङ्-पक्षीष्ट । लुङ्-अपाचि अपक्षाताम् अपक्षत । अपक्थाः अपक्षाथाम् अपग्ध्वम् । अपक्षि अपक्ष्वहि अपक्ष्महि । लृङ्-अपक्ष्यत । दुह्=उभयपदी द्विकर्मकः, अनिट् लट्-दुह्यते । लिट्-दुदुहे । लुङ्-अदोहि । प्रच्छ्=प., द्विक. अनिट्-लट्-पृच्छ्यते । लुङ्-अपृच्छि । रुधिर्=रुध्=द्विक. अनिट्-लट्-रुध्यते । लुङ्-अरोधि । वह्=उभ., द्विक. अनिट् लट्-उह्यते । लुङ्-अवाहि । शास्-प.द्वि. सेट्-लट्=शास्यते । लुङ्-अशासि । मन्थ=प., द्वि.क. सेट्-लट्=मथ्यते । लुङ्-अमन्थि । मुष्=प.द्वि.सेट्, लट्-मुष्यते । लुङ्-अमोषि ।

ढ) मुच्-उ. एककर्मकः अनिट् लट्-मुच्यते । लोट्=मुच्यताम् । लङ्-अमुच्यत । वि.लिङ्-मुच्येत । लिट्-मुमुचे मुमुचाते मुमुचिरे । मुमुचिषे मुमुचाथे मुमुचिध्वे । मुमुचे मुमुचिवहे मुमुचिमहे ।

लुट्-मोक्ता । लृट्-मोक्ष्यते । आ.लिङ्-मोक्षीष्ट । लुङ्-अमोक्षि अमुक्षाताम् अमुक्षत । अमुक्थाः अनुक्षाथाम् अमुग्ध्वम् । अमुक्षि अमुक्ष्वहि अमुक्ष्महि । लृङ्-अमोक्ष्यत ।

ण) सिच्=उ. एककर्मकः अनिट् लट्=सिच्यते । लोट्=सिच्यताम् । लङ्-असिच्यत । वि.लिङ्=सिच्येत । लिट्-सिषिचे । लुट्-सेक्ता । लृट्-सेक्ष्यते । आ.लिङ्-सिक्षीष्ट । लुङ्-असेचि असिक्षाथाम् असिक्षत । असिक्थाः असिक्षाथाम् असिग्ध्वम् । असिक्षि असिक्ष्वहि असिक्ष्महि । लृट्-असेक्ष्यत । एवं विधिनाऽन्येऽपि चिन्त्या ।

२-६ दशगणीयानामजन्तानां हलन्तानां च धातूनां कर्तरि सेडनिड्रूपाणां चिन्तनम् -

क) ऊ ॠ अन्तैर्यौति-यु-रु-क्ष्णु-शीङ्स्तु-नु-क्षु-डीङ्-श्रि-वृङ्-वृञ् एभिर्विनाऽजन्तेषु ये एकाचोऽनुदात्ता हलन्तेषु मध्ये शक्लादिषु पठिता अनुदात्ताश्च धातवस्तेऽनिटः प्रोक्ताः सन्ति । यतोऽनिटां धातूनां लिट्-लुट्-लृट्-आ.लिङ्-लुङ्-लृङक्षु इण्न भवति अनिट्भिन्नानां त्विट् । अत्रैव अजन्तोऽकारवान्वेति कारिका विचिन्त्या । इट्विहितानाम् ऊ ॠ आदीनां धातूनां मध्ये आत्मनेपदिनो धातोरुपर्युल्लिखितेषु लकारेषु परस्मैपदिनो धातोश्च आ.लिङं विनाऽन्येषु लकारेषु चेट् भवति । परस्मैपदिन आत्मनेपदिनश्च धातोर्वि.लिङि सर्वत्र इट्रहितानि रूपाणि भवन्ति । परस्मैपदिनो भूधातोर्लिटि थलि वसि मसि, लुटस्तासि, लृट्लृङोः स्ये च परे इट् लुङि सिचो लोपान्नेट् च भवति - लिटि थलि=बभूविथ । बभूविव-म । लुट्-भविता-सि । लृट्-भविष्यति । लुङि-अभूत् । लृङ्-अभविष्यत् । परस्मैपदिनो हलन्तसेट्धातोस्तु लुङि सिचि इट्-अनादीत् । अत्मनेपदिनः कम्प्धातोर्लिटि-चकम्पिषे-ध्वे-वहे-महे । लुट्-कम्पिता-से । लृट्-कम्पिष्यते । आ.लिङ्-कम्पिषीष्ट । लुङ्-अकम्पिष्ट । लृङ्-अकम्पिष्यत । एवमेवान्येषामात्मनेपदिनां सेट्धातूनां रूपाणि ज्ञेयानि । इणो गा लुङिति सूत्रेण इण्धातोः स्थाने कृतात् गाधातोः पानार्थकात् पाधातोः स्था-दा-धा एभ्यश्च परे लुङि सिचो नेट् लोपश्च भवति । इण्=गा लुङ्=अगात् अगाताम् अगुः । यत एषां लुङि इण्न । घ्रा-धेट्=धा-शो=शा छो=छा षो=षा एषां सिचो लुग्पक्षे इण्न , सिचोऽलुग्पक्षे सेट्-धा अधात् अधासीत् । गुप्धातोर्लुट्लृट्लुङ्लकारेषु तिङः प्रत्येकवचने त्रीणि त्रीणि रूपाणि भवन्ति । अस्य धातोर्लिटि आ.लिङि च तिङः प्रत्येकवचने द्वे द्वे रूपे भवतः ।

ख) अजन्तस्य केवलं परस्मैपदिन उभयपदिनश्च धातोः परस्मैपदपक्षे कर्तरि लिटि थलि वैकल्पिक इट् वमयोः परयोर्नित्यमिट् च भवति । केवलमात्मनेपदस्योभयपदिनश्च धातोरात्मनेपदपक्षे च कर्तरि कर्मणि च लिटि थास्=से ध्वम्=ध्वे वहे महे चैषु परेषु इट् भवति । यथा कर्तरि क्रमेण-लिट्=चिक्षयिथ चिक्षेथ । चिक्षयिव-म । पा-लिट्-पेपिथ पपाथ । पपिव-म । दा=लिट्=ददिथ ददाथ । ददिव-म । धा=लिटि दधिथ दधाथ । दधिव-म । लुटि तासि नेट्=क्षेता । पाता । दाता । धाता । लृटि स्यपरे नेट्=क्षेष्यति । पास्यति । दास्यति-ते । धास्यति-ते । क्षिवत् नी जि चि हु इत्यादयो ग्लै=ग्ला या भा ध्यै=ध्या इत्यादयश्च धातवो ज्ञेयाः ।

ग) ह्रस्व ऋकारान्तानां धातूनां परस्मैपदे कर्तरि लिटि थलि नेट् । वमयोरिट् । आत्मनेपदे लिटि थास्=से ध्वम्-ध्वे वहे महे एषु परेषु इट् । परस्मैपदे आत्मनेपदे च=तासि नेट् । आत्मनेपदे सीयुटि नेट् सिचि च परे नेट् । यथा हृ प.=थलि जहर्थ । वमयोः=जहरिव-म । तासि- हर्ता । स्ये-हरिष्यति- ऋद्धनोः स्ये इति सूत्रेण इट् । लुङि सिचि नेट्-अहार्षीत् अहार्ष्टाम् अहार्षुः । लृङ्-अहरियत् ॥ हृ=उभयपदी धातुः=प.-थलि जहर्थ । वमयोः=जह्रिव-म । उभयपक्षे लुट्-हर्ता हर्तासि-से । लृट्=हरिष्यति-ते-ऋद्धनोः स्ये इति इट् । सीयुटि-हृषीष्ट । लुङ्-अहार्षीत् अहृत=ह्रस्वादङ्गादिति सलोपः । लृङ्=अहरिष्यत्-त ॥ एवं धृञ्धातो रूपाणि हृवज्ज्ञेयानि । भृ=उ.प.=लिटि=बभर्थ । वमादिषु-बभृव-म । बभृषे-ध्वे-वहे-महे । लुट्=भर्तासि-से । लृट्-भरिष्यति-ते । सीयुटि भृषीष्ट । लुङि-अभार्षीत् अभृत । लृङ्-अभरिष्यत्-त । इटोऽनिटश्च विषये अजन्त इति कारिका द्रष्टव्या ।

घ) हलन्तेषु मध्ये शक्लादिषु पठितानामकारवान्धातूनां कर्तरि लिटि थलि वैकल्पिक इट्, व म से-ध्वे-वहे-महे एषु परेषु नित्यमिट् च भवति । परस्मैपदी यथा गम् -जगमिथ जगन्थ । जग्मिव जग्मिम । अन्यत्र नेट् । लुट्-गन्ता ।लृट्-गमिष्यति गमेरिट् परस्मैपदेषु इति इट् । लुङ्-अगमत् । लृङ्-अगमिष्यत् । उभयपदी यथा-पच्=लिट्=पेचिथ पपक्थ । नित्यमिट्-पेचिव-म । एवं भजेर्लिट्-भेजिथ बभक्थ । नित्यमिट्-भेजिव भेजिम । यज्=इयजिष्ठ इयष्ठ । ईजिव ईजिम । इति परस्मैपदे । आत्मनेपदे त्वनिटोऽपि सेट्-पच्-पेचिषे । पेचिध्वे । पेचिवहे-महे । भज्-भेजिषे । भेजिध्वे । भेजिवहे-महे । यज्-ईजिषे । ईजिध्वे । ईजिवहे-महे । अन्यत्र नेट्-लुट्-पक्तासि-से । लृट्-पक्ष्यति-ते । आ.पक्षे-आ.लिङ्-नेट्-पक्षीष्ट । परस्मैपदे लुङि नेट-अपाक्षीत् अपाक्ताम् अपाक्षुः । अपाक्षीः अपाक्तम् अपाक्त । अपाक्षम् अपाक्ष्व-अपाक्ष्म । आत्मनेपदे-लुङि नेट्- अपक्त अपक्षाताम् अपक्षत । अपक्थाः अपक्षाथाम् अपग्ध्वम् । अपक्षि अपक्ष्वहि अपक्ष्महि । लृङ्-अपक्ष्यत् अपक्ष्यत । एवं भज्धातोः रूपाणि ज्ञेयानि । यजो नेट् लुट्-यष्टा, यष्टासि-से । लृट्-नेट् यक्ष्यति ते । आ.लिङ्-इज्यात् यक्षीष्ट । लुङि नेट्-अयाक्षीत् अयाष्टाम् अयाक्षुः । अयाक्षी अयाष्टम् अयाष्ट । अयाक्षम् अयाक्ष्व अयाक्ष्म । आ. अयष्ट अयक्षाताम् अयक्षत । अयष्ठाः अयक्षाथाम् अयक्षध्वम् । अयक्षि अयक्ष्वहि-क्ष्महि । लृङ्-अयक्ष्यत् । वह् लिट्-उवाह ऊहतुः ऊहुः । उवहिथ उवोढ ऊहथुः ऊह । उवाह उवह ऊहिव ऊहिम । लुट्-वोढा, वोढासि-से । लृट्-वक्ष्यति ते । आ.लिङ् आ.पक्षे - वक्षीष्ट वक्षीयास्ताम् वक्षीरन् । वक्षीष्ठाः वक्षीयास्थाम् वक्षीध्वम् । वक्षीय वक्षीवहि-महि । लुङ् परस्मैपदे-अवाक्षीत् अवोढाम् अवाक्षुः । अवाक्षीः अवोढम् अवोढ । अवाक्षम् अवाक्ष्व-क्ष्म । आत्मनेपदे-अवोढ अवक्षाताम् अवक्षत । अवोढाः अवक्षाथाम् । अवोढ्वम् । अवक्षि अवक्ष्वहि अवक्ष्महि । लृङ्-अवक्ष्यत्-अवक्ष्यत । इत्यादि ।

ङ) अजन्ताऽऽकारावद्धचां भिन्नस्य परस्मैपदिन आत्मनेपदिनश्च धातोर्लिटि क्रादिनियमादिट् । अन्यलकारेषु नेट् । दृशिर्-दृश्=प. लिटि कादिनियमान्नित्यमिटि प्राप्ते विभाषा सृजिदृशोरिति वेट्-ददर्शिथ दद्रष्ठ लुट्=द्रष्टा । लृट्=द्रक्ष्यति । लुङि वैकल्पिकेऽङ्भावे-अदर्शत् । अङभावे-अद्राक्षीत् अद्राष्टाम् अद्राक्षुः । लृङ्=अद्रक्ष्यत् । दृश्रुधादय इरित्संज्ञका धातवः सन्ति । यतो दृश्रुधादिधातूनां लुङि परस्मैपदे तिङः प्रत्येकवचने द्वे द्वे रूपे भवतः । रुधिर्-रुध्=उ.प.=लिटि थलि कादिनियमादिट् । वमादिष्वपि इट्- रुरोधिथ रुरुधिव-म । रुरुधिषे-ध्वे-वहे-महे । लुट्-रोद्धा रोद्धासि-से । लृट्-रोत्स्यति-ते । आ.लिङ्-रुध्यात् सीयुटि-रुत्सीष्ट । लुङ्-अरुधत् अरौत्सीत्, अरुद्ध । लृङ्-अरोत्स्यत्-त ॥ एवं भिदिरादयो रुध्धातुवद्रूपाणि ज्ञेयानि । ये शक्लादयः सकर्मका अकर्मकाश्च धातवः सन्ति । ते कर्तरि कर्मणि भावे चानिड एव भवन्ति ।

विशेषः-कृदन्ते शीङ्धातुं विना ऊत्रॄअन्तेभ्यो युरुक्ष्णुस्नुनुक्षुश्विडीङ्श्रि- वृङ्वेञादिभ्योऽजन्तेभ्यः सेड्ढातुभ्य एभ्यो भिन्नेभ्योऽजन्तेभ्योऽनिड्भ्यो हलन्तेषु धातुषु मध्येऽनुदात्तेषु हलन्तेषु पठितेभ्यो शक्लादिधातुभ्यो विहितानां क्तक्तवतुक्त्वाप्रत्ययानामिण्न भवति विशेषसूत्रेण विहितमिटं विना । यथा उकारान्तधातूनां रूपसिद्धौ क्तक्तवतुक्त्वाप्रत्ययाः क्रमेण विचारणीयाः -क) भू-भूतः, भूतवान्, भूत्वा[१] । नु-नुतः, नुतवान्, नुत्वा । यु-युतः, युतवान्, युत्वा इत्यादि । ऋकारान्तधातुषु यथा-कृ-कृतः कृतवान्, कृत्वा । स्मृ-स्मृतः स्मृतवान्, स्मृत्वा । मृ-मृतः, मृतवान्, मृत्वा । दीर्घॠकान्तः -तॄ=तीर्णः, तीर्णवान्, तीर्त्वा । गॄ= गीर्णः, गीर्णवान्, गीर्त्वा । शॄ-शीर्णः शीर्णवान् शीर्त्वा जॄ-जीर्णः, जीर्णवान्, जीर्त्वा । पॄ=पूर्णः पूरितः, पूर्णवान्, पूरितवान् पूर्त्वा ।इऊकारान्ताः जि=जितः जितवान् जित्वा । चि-चितः चितवान् चित्वा । पू=पवितः पूतः, पवितवान् पूतवान्, पवित्वा पूत्वा[२] । आकारान्ताः-पा=पीतः

---

[१] श्र्युकः कितीति सूत्रेण इटो निषेधः ।
[२] पूङश्चेति वेट् । पूङ्क्त्वा चेति कित्वनिषेधः ।

पीतवान्, पीत्वा । स्था=स्थितः स्थितवान् स्थित्वा । हलन्ता अनिटः-पच्=पक्वः पक्ववान् पक्त्वा । यज्=इष्ट इष्टवान्, इष्ट्वा । मन्-मतः मतवान् मत्वा । नम्-नतः, नतवान्, नत्वा इत्यादि । शम्-शान्तः शान्तवान् शमित्वा शान्त्वा । कम्-कान्तः कान्तवान् कमित्वा कान्त्वा । शीङ्-शयितः[1] शयितवान्, शयित्वा इत्यादि ।

ख) ऊ ॠ अन्तेभ्यो यु रु आदिभ्य भिन्नेभ्योऽजन्तेभ्योऽनुदात्तेषु हलन्तेषु पठितेभ्यः शक्लादिधातुभ्यो विहितस्य तुमुन्प्रत्ययान्तस्येण्न भवति विशेषसूत्रेण विहितमिटं विना । यथा सेड्ढातवः-भू-भवितुम् । पू-पवितुम् । तॄ-तरि(री)तुम् । जॄ-जरि(री)तुम् । वृ-वॄ-वरि(री)तुम् । अनिट्-पा-पातुम् । स्था-स्थातुम् । क्षि-क्षेतुम् । जि-जेतुम् नी-नेतुम् । पच्-पक्तुम् । यज्-यष्टुम् । वह्=वोढुम् । त्यज्-त्यक्तुम् । सह्-सोढुम् । अद्=अत्तुम् । कृ-कर्तुम् । स्मृ-स्मर्तुम् । मृ-मर्तुम् । हृ-हर्तुम् । भृ-भर्तुम् । इत्यादि ।

२-७ ण्यन्तः

१) सर्वेभ्योऽजन्तेभ्यो हलन्तेभ्यश्च सकर्मकाकर्मकेभ्यो धातुभ्यः कर्तृवाच्ये प्रेरणार्थे हेतुमति चेति सूत्रेण णिच् विधीयते । ततो ण्यन्तधातुः प्रोच्यते । णिचा सर्वेऽकर्मका धातवः सकर्मका भवन्ति । एकसकर्मकधातुषु मध्ये केचन धातवो णिचा द्विकर्मका भवन्ति । अन्ये सर्वे धातव एक कर्मका एव तिष्ठन्ति । प्रेरणार्थे णिचा जातानामेकर्मकाणां द्विकर्मकाणां च प्रयोगः कर्मकारके समुल्लेखिष्यते । णिचा धातव उभयपदिन एकपदिनश्च भवन्ति । ते सेटो भवन्ति । १- अजन्तधातुषु भूधातोर्भवन्तं प्रेरयतीति णिचा भावि इति शब्दो जायते । ततः कर्तरि (कर्तृवाच्ये) धातुसंज्ञत्वाल्लटि तिङि शपि गुणेऽयादेशे च कृते रूपं सम्पद्यते । लट्–भावयति-ते । भावेर्लिटि आमि कृकृते-भावयाञ्चकार-चक्रे । भावयाञ्चकर्थ-कृषे । भूकृते-भावयम्बभूव-बभूविथ । आस्कृते-भावयामास-सिथ । लुट्-भावयिता-सि-से । लृट्-भावयिव्यति-ते । लोट्-भावयतु-तात् भावयताम् । लङ्-अभावयत्-त । वि.लिङ्-भावयेत् भावयेत । आ.लिङ्- भाव्यात् णेरनिटीति णिलोपः । भावयिषीष्ट । लुङ् -अबीभवत्-ताम्-वन् । अबीभवत-वेताम्-वन्त । लृङ् -अभावयिष्यत्-त । हलन्तधातुभ्यो णिच् विहिता गमिशमिबोधिपाठिपाचीत्यादयो धातवो भवन्ति । तेषु गम्=गमि-गमयति । गमयाञ्चकार-यामास-याम्बभूव । गमयिता । गमयिष्यति । गमयतु । अगमयत् । गम्यात् । अजीगमत् । अगमिष्यत् ।

२) अदादिः-अद्-आदि=आदयति-ते । ३-जुहोत्यादिः-हु-हावि=हावयति-ते । ४-दिवादिः-दिव्-देवि=देवयति-ते । ५-स्वादिः-षु-सु-सावि=सावयति-ते । ६-तुदादिः-तुद्-तोदि=तोदयति-ते । ७-रुधादिः-रुध्-रोधि=रोधयति-ते । ८-तनादिः-तन्-तानि=तानयति-ते । ९-क्र्यादिः-की-पुक्-कापि=कापयति-ते । १०-चुरादिः-चुर्-चोरि=चोरयति-ते । लुङ्-अचूचुरत् । अस्य धातो रूपाणि ण्यन्ते चुरादौ च समानानि भवन्ति । अर्थे भेदः ।

ए ऐ ओ एषां स्थाने आकाराः कृताः केवलमाकारान्ताश्च धातवतो भवन्ति । ते ण्यन्ते-१.भ्वादिः-ष्ठा-स्था+पुक्-स्थापि=स्थापयति । लुङ्-अतिष्ठिपत् । पा+युक्-पायि=पाययति । जि+पुक्-जापि=जापयति । घ्रा+पुक्-घ्रापि=घ्रापयति । लुङ्-अजिघ्रिपत् । रुह्+प्-रोपि=रोपयति । पुगभावे-रोहि=रोहयति । आ+रभ्-नुम्+आरम्भि=आरम्भयति । लुङ्-अररम्भत् अललम्भत् । ग्लै-ग्ला+पुक्-ग्लापि=ग्लापयति ग्लपयति । अस्य मित्वविकल्पात् द्वयं रूपम् । गै-गा+पुक्-गापि=गापयति । मिद्भिन्नानामकारान्तानां पुका युक्तानां धातूनामेकं रूपंम् । २-अदादिः-ष्णा-स्ना+पुक्-

---

[1] क्तस्य आर्धधातुकस्येड्वलादेरिति इट्, निष्ठा शीङ् इति कित्वनिषेधः ।

स्नापि=स्नापयति । अधि+इङ्+पुक्-अध्यापि=अध्यापयति । हन्-घाति=घातयति । जागृ-जागरि=जागरयति । ३-जुहोत्यादिः-दा+पुक्-दापि=दापयति । हा-हापि=हापयति । भी-भी+षुक्=भीषि=भीषयते-आत्मनेपदमात्रम् ।४-दिवादिः-दुष्-दोषि दूषि वा=दूषयति दोषयति वा चित्त कामः । शो-शा+युक्-शायि=शाययति । छो=छा षो=सा ह्वेञ्=ह्वा व्येञ्=व्या पा एषां युक् । एभ्यो भिन्नानामाकारान्तानां पुक् । ५-स्वादिः-चि-चायि=चाययति । १०-चुरादिः-ज्ञप्-ज्ञापि=ज्ञपयति-घटादित्वादुपधाया ह्रस्वः । घट्-घाटि=घटयति उपधाया ह्रस्वः । ष्मिङ्-वि+स्मिङ्=विस्मयि=विस्माययति,विस्माययते, विस्मापयते ।

स्मरणीयं यत् वर्णसमुदायस्यान्ते स्थितेनाल्वर्णेन युक्तः पूर्वो वर्ण उपधा प्रोच्यते । यथा-पच् रम् गद् यजित्यादयः । अत्र धातूनामन्त्यस्याल्वर्णेन सहितः पूर्वस्थितो वर्ण उपधा कथ्यते । तदनुसारं यो धातुर्मकारान्तः पठचते । स धातुर्मित्प्रोच्यते कमु अम चमु एतान्धातून्विना । घटादौ पठिता धातवोऽपि मितः प्रोच्यन्ते । यतो गम् रम् शम् दमित्यादिधातूभ्यो णिचि परे उपर्धा वृद्धौ सत्यां मितां ह्रस्व इति सूत्रेण ह्रस्वविधानादुपधाया वृद्धिर्न तिष्ठति । यथा-गामि-गमि=गमयति । घाटि-घटयतीत्यादि । भ्रमधातोर्मित्वविकल्पो दृश्यते-भ्रमयति । भ्रामयामास । भ्रामयन् । मिदि्भन्नेभ्यो धातुभ्यो णिचि परे अत उपधाया इति सूत्रेणैव उपधाया अकारस्य वृद्धिर्भवति । वृद्धचाऽकारस्याऽऽकारो भवति । यथा-पच्-पाचि=पाचयति । वह्-वाहि=वाहयति । यज्-याजि=याजयतीत्यादि ।

३) प्रेरणार्थे निष्पन्नस्य ण्यन्तधातोः कर्मवाच्ये सर्वेषु लकारेषु सर्वेषु पुरुषेषु त्रिषु त्रिषु वचनेषु णिच्यक्लोपादिभी रूपं निष्पद्यते । भू-भावि-लट्-भाव्यते णेरनिटिति णिलोपः । लिट्-भावयाञ्चक्रे भावयाम्बभूवे भावयामासे । लुटि चिण्वदिट आभीयत्वेनासिद्धत्वाण्णिलोपः-भाविता णिलोपाभावे-भावयिता । लृट्-भाविष्यते भावयिष्यते । लोट्-भाव्यताम् । वि.लिङ्-भाव्येत ।आ.लिङ्-भाविषीष्ट भावयिषीष्ट । लुङ्-अभावि अभाविषाताम् अभावयिषाताम् अभाविषत अभावयिषत । लृङ्-अभाविष्यत अभावयिषत । अजन्तधातोरार्लुटि प्रयुक्तो नियमो लृट्-आशिर्लिङ्लुङ्लृङ्क्षु लकारेषु प्रवर्तते । यतस्तेन नियमेन लुटीव लृट्- आशिर्लिङ्लुङ्लृङ्क्षु लकारेषु धातोर्द्वे द्वे रूपे भवतः । श्रु-श्रावि=श्राव्यते । कृ-कारि=कार्यते । एवमन्येऽजन्तधातवोऽपि चिन्त्याः । ण्यन्तधातोर्गमेर्लटि तप्रत्यये यकि णेरनिटीति सूत्रेण णेर्लोपे टेरेत्वे- गम्यते । पठ्-पाठि=पाठचते । मिल्-मेलि=मेल्यते । बुध्-बोधि=बोध्यते ।

। एवमन्ये ण्यन्तहलन्तधातवोऽपि ज्ञेयाः ।

२-८ सन्नन्तः

१) धातोः सन् इच्छर्थे विधीयते । यस्माद्धातोः सनं कर्तुमभिलष्यते । तस्माद्धातोस्तुमुन्प्रत्ययेन निष्पन्नाया गौणक्रियायाः परे इच्छार्थं द्योतयितुमिष् (इषः षस्य स्थाने छः =इच्छ) धातोर्निष्पन्ना क्रिया प्रयुज्यते यथा भवितुमिच्छत्यर्थे । भूधातोः सन्द्वित्वाभ्याससंज्ञाजश्त्वादिकार्यैः सिद्धस्य बुभूष इत्यस्य धातुसंज्ञा ततः कर्तरि लटि तिपि शपि पररूपे च कृते रूपं निष्पद्यते । सार्वधातुके शपं पररूपं च भवति आर्धधातुके तु न-बुभूषति । बुभूषाञ्चकार बुभूषाम्बभूव बुभूषामास । बुभूषिता । बुभूषिष्यति । बुभूषतु-तात् । अबुभूषत् । बुभूषेत् । बुभूष्यात् । अबुभूषीत् अबुभूषिष्टाम् अबुभूषिषुः । अबुभूषिष्यत् । तथैव पठितुमिच्छतीति इच्छाया अर्थे-पिपठिषति । पिपठिषाञ्चकार । पिपठिषिता । पिपठिषिष्यति । पिपठिषतु -तात् । अपिपठिषत् । पिपठिषेत् । पिपठिष्यात् । अपिपठिष्यीत् अपिपठिष्यत् ।

पूर्ववत्सनः १।३।६२॥

सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात् । दृङ् आदरे । दिदरिषते । यो धातुः पूर्वं दशगणे यस्मिन्पदे पठ्यते । सना युक्तोऽपि स धातुस्तस्मिन्पदे पठ्यते ।

२) भावे यक्-बुभूष्यते । बुभूषाञ्चक्रे । बुभुषिता । बुभूषिष्यते । बुभूष्यताम् । अबुभूष्यत । बुभूष्येत । बुभूषिषीष्ट । अबुभूषिष्ट । अबुभुषिष्यत् । कर्मणि-पिपठिष्यते । पिपठिषाञ्चक्रे । पिपठिषिता । पिपठिषिष्यते । पिपठिष्यताम् । अपिपठिष्यत । पिपठिष्येत । पिपठिषिषीष्ट । अपिपठिषिष्ट । अपिपठिष्यत । कर्मणि धातोः प्रत्येकलकारस्य त्रिषु पुरुषेषु त्रीणि त्रीणि वचनानि भवन्ति । भावे तु धातोः प्रत्येकलकारस्य प्रथमपुरुषस्यैकवचने रूपं भवति ।

२-९ यङन्तः

१) पौनः पुन्येऽतिशये चार्थे द्योत्ये धातोर्यङ् विधीयते । विग्रहे पुनः पुनरतिशयेन इत्यनयोर्मध्ये एकेन सह । यस्य धातोः क्रिया प्रयुज्यते । तस्माद्धातोर्यङ् विधीयते । यथा पुनः पुनरतिशयेन वा भवतीत्यर्थे भूधातोयङ्द्वित्वाभ्यासजत्वगुणादिकार्यैः बोभूय इति जातेऽस्य धातुसंज्ञायां ङित्वादात्मनेपदे ततः कर्तरि लटि तङि टेरेत्वे शपि पररूपे च कृते रूपं निष्पद्यते -बोभूयते । बोभूयाञ्चक्रे । बोभूयिता । बोभूयिष्यते । बोभूयताम् । अबोभूयत । बोभूयेत । बोभूयिषीष्ट । अबोभूयिष्ट । अबोभूयिष्यत । गत्यर्थधातोः अतिशयेन पुनः पुनर्वा व्रजतीत्यर्थे यङ् न भवति । अस्माद्धातोः कौटिल्यार्थे यङ् विधियते । यतः कौटिल्यं व्रजतीत्यर्थे यङ् द्वित्वदीर्घादिकार्यैः, वाव्रज्य इति सिद्धौ धातुसंज्ञायां ङित्वादात्मनेपदे ततः कर्तरि लटि तङि शपि टेरत्वे पररूपे च कृते रूपं सम्पद्यते-वाव्रज्यते । भावगर्हेऽर्थे -गर्हितं लुम्पति-लोलुप्यते ।

२) भावे-बोभूय्यते । बोभूयाञ्चक्रे । बोभूयिता । बोभूयिष्यते । बोभूय्यताम् । अबोभूय्यत । बोभूय्येत । बोभूयिषीष्ट । अबोभूयि । अबोभूयिष्यत् ।

२-१० यङ्लुगन्तः

१) पूर्वोक्तेऽर्थे यङ् । अत्र यङो लुक् भवति । पुनः पुनरतिशयेन वा भवतीत्यर्थे भूधातोर्यङि अस्य लुकि द्वित्वाभ्यासगुणादिकार्यैबोभूय इति जाते धातुसंज्ञायां कर्तरि लटि परस्मैपदे तिपि शपि शपो लुकि गुणेऽवादेशे च कृते रूपं निष्पद्यते -बोभवीति बोभोति बोभूतः बोभुवति । बोभवाञ्चकार । बोभवाम्भूव । बोभवामास । बोभविता । बोभविष्यति । बोभवीतु बोभोतु बोभूतात् बोभूताम् बोभवतु । बोभोहि । बोभूतात्-तम्-त । बोभवानि-वाव-म । अबोभवीत् अबोभोत् अबोभूताम् अबोभवुः । बोभूयात् बोभूयाताम् बोभूयुः । आ.लिङ्-बोभूयात् बोभूयास्ताम् बोभूयासुः । लुङ्- अबोभुवीत् । अबोभोत् अबोभूताम् अबोभुवुः । अबोभुवीः अबोभूतम्-त । अबोभूवम्-व-म । अबोभविष्यत् ।

पुनः पुनरतिशयेन वा करोतीत्यर्थे ऋकारान्तस्य कृधातोयङि अस्य लुकि द्वित्वाभ्यासचर्त्वादिकार्ये चर्कृ इति जाते धातुसंज्ञायां कर्तरि लटि परस्मैपदसंज्ञके तिबादिकार्ये रूपं सिद्धम् । लट्-चर्करीति चरिकरीति चरीकरीति । चर्कर्ति चरिकर्ति चरीकर्ति । चर्कृतः ३ । लिट्-चर्कराञ्चकार३ । लुट्-चर्करिता३ । लृट्-चर्करिष्यति३ । लङ्-अचर्करीत्३ । ईटोऽभावे-अचर्कः३ । वि.लिङ्-चर्कृयात् । आशिषि लिङि रिङ्-चर्क्रियात्३ । लुङ्-अचर्कारीत्३ । अचर्कारिष्टाम्३ । ऋकारान्त धातोराशिषिर्लिङं विनाऽन्येषु लकारेषु रुक् रिक् रीक् एते भवन्ति । हलादौ पिति सार्वधातुके परे वैकल्पिक ईट् । एवं भृ हृ धृ धातूनां रूपाणि कृधातो रूपमिव भवन्ति ।

२) भावे-बोभूयते । बोभवाञ्चक्रे । बोभाविता बोभविता । बोभाविष्यते बोभविष्यते । बोभूयताम् अबोभूयत । बोभूयेत । अबोभाविषीष्ट अबोभविषीष्ट । अबोभाविष्यत अबोभविष्यत ।

दशगणीया धातवो येनार्थेन सकर्मका अकर्मकाश्च प्रोक्ताः सन्ति । ते सन्यङ्यङ्लुग्भिर्युक्ता अपि तेनैवार्थेन सकर्मका अकर्मकाश्च प्रोच्यन्तेऽर्थान्तरे विहितमर्थं विना ।

ण्यान्तात् क्तक्तवतू । भू=भावि-भावितः [१] भावितवान् । सनन्तात् क्तक्तवतू-बुभूष=बुभूषितः, बुभूषितवान् । यङन्तात्-बोभूयितः । बोभूयितवान् । इत्यादि ।

विशेष- लेखने प्रधानक्रियापदं वाक्यस्यादौ मध्येऽन्ते यत्र कुत्रापि प्रयुज्यते । तत्पदं सदा वाक्यस्यान्ते स्थितमेव स्मरणीयम् । वाक्यस्यान्ते प्रयुक्तस्य क्रियापदस्य तु चिन्तैव न भवति ।

इति तिङन्तरूपचिन्तनादौ द्वितीयोऽध्यायः ॥ २ ॥

---

[१] निष्ठायां सेटीति णिलोपः ।

अथ तृतीयोऽध्यायः ॥ ३ ॥

३. अतिङन्तक्रियापदम्

कृदन्तक्रिया अतिङन्तक्रियाः प्रोच्यन्ते तिङ्रहितत्वात् । सा द्विधा भवति मुख्यक्रिया गौणक्रिया च । कृत्यक्तक्तवतुखल्प्रत्ययान्ताः क्रिया मुख्य(प्रधान)क्रियाः शतृशानज्क्त्वाल्यबादिप्रत्ययान्ताश्च क्रिया गौणक्रिया भवन्ति । ता उभया अन्तिङन्तक्रियाःप्रोच्यन्ते । गौणक्रियाया उल्लेख पश्चात्करिष्यते ।

३-१ कृत्याः

सकर्मकधातुभ्यः कर्मणि (कर्मवाच्ये) अकर्मकधातुभ्यश्च भावे कृत्यप्रत्ययप्रक्रियायां सूत्रेषु वार्तिकेषु च पठितेभ्यो धातुभ्यः कर्तरि कर्मणि भावे (भाववाच्ये) च कृत्यप्रत्ययैः क्रिया निष्पद्यन्ते । तासु क्रियासु प्रथमायां निष्पन्नाः क्रिया यदा वाक्यान्ते प्रयुज्यन्ते तदा ताः क्रिया विधेयविशेषणानि क्रियाबोधकाश्च भवन्ति । विशेष्यात्पूर्वे प्रयुक्ते सति ताः क्रिया उद्देश्यविशेषणानि भवन्ति क्रियाबोधकास्तु न । द्वितीयादिषु प्रयुक्तास्ताः क्रिया क्रियाबोधका न भवन्ति उद्देश्यविधेयविशेषणानि तु । कृत्यप्रत्ययान्ताः क्रियाः सदा विशेष्यानुसारं प्रयुज्यन्ते । कृत्या विध्याद्यर्थेष्वपि प्रयुज्यन्ते ।

कृदतिङ् ३।१।९३॥

अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् । अनेन सूत्रेण तिङ्भिन्नप्रत्ययस्य कृत्संज्ञा क्रियते । ततस्तिङ्भिन्नप्रत्ययः कृत् प्रोच्यते । कृत्प्रत्ययस्यापि त्रयो भेदाः सन्ति कृत्यः कृत् उणादिश्च[1] । धातोस्तिङा निष्पन्ना क्रिया लिङ्गसंख्या(वचना)ऽन्वययोग्या न भवति । किञ्च तिङन्तक्रिया नाम विशेषणमव्यञ्च न भवति । धातोः कृत्प्रत्ययेन नाम विशेषणमव्ययाश्च भवन्ति । यतः कृत्यप्रत्ययेन निष्पन्ना शब्दा लिङ्गसंख्यान्वययोग्या भवन्ति । एवं वाक्यविधाने लिङ्गसंख्यान्वययोग्या अयोग्याश्च शब्दाः सदा चिन्त्यास्ततः प्रयोज्याश्च ।

कर्तरि कृत् ३।४।६७॥

कृत्प्रत्ययः कर्तरि स्यात् । इति प्राप्ते-

तयोरेव कृत्यक्तखलर्थाः ३।४।७०॥

एते प्रत्यया भावकर्मणोरेव स्युः । तव्यत्तव्यानीयर्केलिमर्यत्क्यप्ण्यतः कृत्यप्रत्ययाः प्रोच्यन्ते । एते प्रत्यया अकर्मकाद्भावे सकर्मकात्कर्मणि च विधीयन्ते ।

तव्यत्तव्यानीयरः ३।१।९६॥

धातोरेते प्रत्ययाः स्युः । अस्मिन्प्रकरणे सूत्रेण कृतस्य प्रत्ययस्य आर्धधातुकं शेष इति सूत्रेणाऽऽर्धधातुकसंज्ञा भवति । ततो धातोरिट् अनिट् च विधीयते । यतो धातोः सेट् इट् अनिट् च नेट् ज्ञेयौ । एध्=आत्मनेपदी अकर्मकः सेट् धातुः=भावे=एधितव्यम्[2] एधनीयं त्वया-भावे औत्सर्गिकं(स्वाभाविकम्) क्लीबत्वं प्रथमैकवचनं च बोध्यम् । क्लीबत्वं नपुंसकलिङ्गम् । चि=उभयपदी सकर्मक अनिट् ढातुः कर्मणि-चेतव्यश्चयनीयो[3] वा धर्मस्त्वया । नी=उ.स.अनिट् कर्मणि-नेतव्यः नयनीयः । हृ-

---

[1] उणादितोऽपि संज्ञा विशेषणमव्ययश्च निष्पन्नाः शव्दा भवन्ति ।

[2] त्वमेधस्व एधेथाः वेति त्वया एध्यताम् एध्येत वेति त्वया एधितव्यम् - लिङ्लोट्कृत्यप्रत्ययाः समानार्थाः - ल.कौ. गीताप्रेस सं. २०५२, पृ.१४९ ।

[3] त्वं चिनु, त्वया चीयताम् इति विग्रहे त्वया चेयम् । एवं चेतुमर्हम्, चेतुं शक्यम् इत्यनयोरपि विग्रहयोरिदं रूपम् - त्वया चेयमेवेति ।

उ.स.अ.कः - हर्तव्यः हरणीयः । धृ=उ.स., अनिट्-धर्तव्यः, धरणीयः । स्मृ=परस्मैपदी, स. अनिट्=स्मर्तव्यः स्मरणीयः । श्रु=प.स. अनिट् धातुः=श्रोतव्यः श्रवणीयः । धातुः सेट् अनिट् च सदा विचारणीयः । दा-दातव्यः । ज्ञा-ज्ञातव्यः । अधि+इङ्=अध्येतव्यः अध्ययनीयः । स्था-स्थातव्यम् स्थानीयमित्यादि । यज्=यष्टव्यः, यजनीयः । वह्-वोढव्यः वहनीयः । त्यज्-त्यक्तव्यः त्यजनीयः । मन्-मन्तव्यः मननीयः । एवं सर्वेऽजन्ता हलन्ताश्चानिटःसेटश्च धातव इत्थं समाधेयाः । भावकर्मणोरिति अध सूत्रेष्वपि चिन्त्यम् ।

केलिमर उपसंख्यानम्-वा.- भावकर्मणोः केलिमर्प्रत्ययो वक्तव्यः । पच्=उ.स. अनिट् धातुः कर्मणि=पचेलिमा माषा, पक्तव्या पचनीया इत्यर्थः । **वसेस्तव्यत्कर्तरि णिच्च-वा.**-वसतीति वास्तव्यो जनोऽस्मिन्ग्रामे देशे नगरे वा, अयं जनो ग्रामे वास्तव्यः-उभयप्रकारेण प्रयोगाश्चिन्त्याः ।

अचो यत् - ३।१।९७॥

अजन्ताद्धातोर्यत् स्यात् भावकर्मणोः । क्षि=अकर्मकः क्षेयम् । चि स.अनिट्-चेयः- या-म् । जि-जेयः-या-म् । नी-नेयः-या-म् । श्रि-श्रेयः-या-म् । श्रु=श्रव्यः=व्या-म् ।

ईद्यति ६।४।६५॥

यति परे आत ईत् स्यात् । अनेन कृतस्य ईकारस्याऽऽर्धधातुकसंज्ञा सार्वधातुकार्धधातुकयोरिति सूत्रेण गुणश्च । दा-देयः-या-म् । गै-गा=गेय-या-म् । ध्यै-ध्या=ध्येयः-या-म् । ग्लै-ग्ला=ग्लेयम् । धा-धेयः-या-म् । पा-पेयः-या=म् । ज्ञा-ज्ञेयः-या-म् । हा-हेयः-या-म् । स्था=स्थेयम् । आघ्रा-आघ्रेयः-या-म् । सर्वे आकारन्ता धातवः एवं प्रकारेण ज्ञेयाः ।

पोरदुपधात् ३।१।९८॥

पवर्गान्तादुपधात् यत् स्यात् । ण्यतोऽपवादः । शप्=शप्यम् । गुप्=गोप्यः-प्या-म् । जप्=जप्यः-प्या-प्यम् । गुम्फ्=गुम्फ्यः-म्फ्या-म्फ्यम् । आरभ्=आरभ्यः-भ्या-भ्यम् । लभ्=लभ्यः-भ्या-भ्यम् । गम्=गम्यः-ग्या-म्यम् । नम्=नम्यः-म्या-म्यम् । रम्=रम्यम् ।

वदसुपि क्यप् च ३।१।१०६॥

वदेर्भावे क्यप् स्यात् चाद्यत् अनुपसर्गे सुप्युपदे । ब्रह्मोद्यम् । ब्रह्मवद्यम् ।

एतिस्तुशास्वृदृजुषः क्यप् ३।१।१०९॥

इण् स्तु शास् वृ दृ जुष् एभ्यः क्यप् स्यात् ।

ह्रस्वस्य पिति कृति तुक् ६।१।७१॥

ह्रस्वान्ताद् इ-उ-ऋकरान्ताद्धातोस्तुक् स्यात् पिति कृति परे । अनेन तुक्=इण्=इत्यः-त्या-म् । ष्टु-स्तु=स्तुत्यः-त्या-म् ।

शास इदङ्हलोः ६।४।३४॥

शास उपधाया इत्स्यादङि हलादौ क्ङिति । शास=शिष्यः-शासिवसिघसीनां चेति सस्य षत्वम् । वृ=वृत्यः । आदृ-आदृत्यः । कृ=कृत्यः-त्या-त्यम् । सृ=सृत्यः-त्या-त्यम् । जुष्=जुष्यः । जुष्या । जुष्यम् ।

ऋहलोर्ण्यत् ३।१।१२४॥

ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत् स्यात् । कृ=कार्यः-र्या-र्यम्=णित्वपरे अचो ञ्णितीति वृद्धिः । हृ=हार्यः-र्या-म् । धृ=धार्यः-र्या-म् । तृ-तार्यः-र्या-म् । उत्-सृ=उत्सार्यः-र्या-र्यम् । स्मृ=स्मार्यः-र्या-र्यम् । इत्यृवर्णान्ताः । वृष=वृष्यम् । भज्-भाज्यः-ज्या-ज्यम्=अत उपधाया इति वृद्धिः । पच्=पाच्यः-च्या=च्यम् । त्यज्=त्याज्यः-ज्या-ज्यम् । वच्=वाच्यः-च्या-च्यम् । यज्=याज्यः-ज्या-ज्यम् । पठ्-पाठ्यः-ठ्या-ठ्यम् । वह्=वाह्यः- ह्या- ह्यम् । वद्=वाद्यः-द्या-द्यम् । ग्रह्=ग्राह्यः-ह्या-ह्यम् । दृश्-दृश्यः-श्या-श्यम् । हस्=हास्यम् । षेवृ=सेव=सेव्यः-व्या-व्यम् । शुच्=शोच्यः-च्या-च्यम् । शुष्=शोष्यम् । छिद्=छेद्यः-द्या-द्यम् । पूज्=पूज्यः-ज्या-ज्यमित्यादिर्हलन्ता ।

भव्य-गेय-प्रवचनीयो-पस्थानीय-जन्याप्लावा-पात्या वा ३।४।६८॥

एते कृत्यप्रत्ययाः कर्तर्यर्थे वा निपात्यन्ते । पक्षे तयोरेवेति सकर्मकात्कर्मणि अकर्मकाद्भावे प्रत्यया ज्ञेयाः । भवतीति भव्यः, भूयेत इति भव्यमनेन वा । गायतीति गेयः । साम्नायम् । कर्मणि-गीयते इति गेयं सामानेन वा । प्रवक्तीति प्रवचनीयो गुरुः स्वाध्यायस्य । प्रवचनीयो गुरुणा स्वाध्यायः । कर्तरि-उपस्थानीयः शिष्यो गुरोः । उपस्थानीयो गुरुः शिष्येण । कर्तरि यत्-जायते=जन्यः । भावे यत्-जन्यमनेन वा । कर्तरि "ओरावश्यके" इति ण्यत्-आप्लवतेऽसौ=आप्लाव्यः । ण्यत्-आप्लाव्यमनेन वा । कर्तरि "ऋहलोर्ण्यदिति" ण्यत्-आपतति असाविति-आपात्यः । सकर्मकधातोः कर्मणोऽविवक्षायां भावे कृत्यप्रत्यया विधीयन्ते-तेन कर्तव्यम्, करणीयम्, कार्यम्, वक्तव्यम्, वाच्यं वा । एवं सर्वेभ्यः सकर्मकधातुभ्यो भावे कृत्यप्रत्यया भवन्ति ।

३-२ कृति क्तक्तवत्वादिप्रत्ययौः

धातोर्भूतभावे भूतकर्मणि वर्तमानकर्तरि च क्तप्रत्ययः केवलं भूतकर्तरि क्तवतुप्रत्ययश्च भवति । भूतकर्मणि भूतकर्तरि चोभाभ्यां प्रत्ययाभ्यां निष्पन्नौ शव्दौ प्रथमायां संसिध्य वाक्यान्ते प्रयुज्येते चेत्तौ विशेषणे क्रियावोधकौ चोभौ भवतः । उभौ शब्दौ द्वितीयादिविभक्तिष्वपि यथावसरमुद्देश्ये विधेये च विशेषणेऽपि प्रयुज्येते ।

भूते ३।२।८४॥

अधिकारोऽयं वर्तमाने लडिति यावत् । अस्मादेव सूत्राद्भूत इत्यधः सूत्रेषु भूतार्थानुवृत्तिर्भवति ।

क्तक्तवतू निष्ठा १।१।२६॥

एतौ निष्ठासंज्ञौ स्तः ।

निष्ठा ३।२।१०२॥

भूतार्थवृत्ते(भूतकालिकार्थवृत्ते)र्धातोनिष्ठा स्यात् । निष्ठया क्तक्तवतू ज्ञेयौ । निष्ठाया अर्थः समाप्तिः । क्तक्तवतुपरयोर्धातोः सेटोऽनिटश्च दिग्दर्शनं द्वितीयेऽध्याये विशेष इत्युपशीर्षको "क" क्रमे च कृतम् । तत्रैव द्रष्टव्यम् । तयोरेव कृत्यक्तखलर्था इति सूत्रेण भावकर्मणोः क्तो विहितः । कर्तरि कृदिति सूत्रेण कर्तरि क्तः । क्तक्तवतुपरयोर्धातोः सेटोऽनिटश्च प्रसङ्गो द्वितीयेऽध्याये विशेष इत्युपशीर्षके "क" क्रमे च द्रष्टव्यः । अकर्मकधातोर्भावे क्तः । भू-भूतं[1] तेन । ष्णा-स्ना=स्नात[2] जनेन । ष्ठा-

---

[1] सोऽभवत् तेन अभावि वा इति विग्रहं कृत्वा प्रत्ययो विधीयते । प्रत्ययानन्तरं क्तक्तवतुप्रत्यययोः आर्धधातुकं शेषइति सूत्रेणाऽऽर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेरिति सूत्रेण इटि प्राप्ते श्र्युकः कितीति इटो निषेधः, कित्वान्न गुणः ।

[2] वरदराजाचार्यः - लघुसिद्धान्तकौमुदी - प्रकाशक - गोविन्दभवन कार्यालय गीताप्रेस, सम्वत् २०५२, तेइसवाँ संस्करण पृष्ठ १५५ । अहम् अस्नासिषम्, मया अस्नायि इति विग्रहे स्नातम् ।

स्था=स्थितं रामेण इत्यादि । सकर्मकधातोर्भूतकर्मणि क्तः-ष्टु-स्तु=स्तुतो विष्णुस्त्वया । दुह्-पयो गौर्दुग्धा[1] । षेवृ-सेव्=देवः सेवितो भक्तेन इत्यादि । सर्वेभ्यः सकर्मकेभ्योऽकर्मकेभ्यश्च धातुभ्यो भूतकर्तरि क्तवतुप्रत्ययः क्रियते - रामो भूतवान्, स्थितवान् । वस्=बाल उषितवान् इति अकर्मकेभ्यः । पा-बालः पयः पीतवान् । नम्-भक्तो देवं नतवान् । कृ-विष्णुर्विश्वं कृतवान् । अर्च्-भक्तो हरिमर्चितवान् नीतवान् । सीता रामं वृतवती इति सकर्मकेभ्यः । एवं सर्वत्र । क्तक्तवतुप्रत्ययविधाने कृते धातुः सेट् अनिट् च सदा विचारणीयः । क्तवतोः स्त्रियां ती, क्तस्य च ता भवति । स्मरणीयं यत् भूतकालिकेऽर्थे निष्पन्ना निष्ठा(क्तक्तवतुप्रत्यया)न्ता क्रिया समापिका क्रिया प्रोच्यते । यतो निष्ठा भूतसामान्ये विधीयते । सर्वा भूतकालिका क्रिया व्याख्यायां पर्यायवाचकत्वेन गृह्यते । भूतकर्तर्यर्थे गत्यर्थाकर्मक. इति क्तः । भू=भूतः । स्था =स्थितः[2]। द्यतिस्यति. इति इत्वम् । इत्यादि ।

आदिकर्मणि निष्ठा वक्तव्या-वा.-क्रियाया आरम्भस्य यः कालः स विशिष्टांशः[3] कालः प्रोच्यते । क्रियाया आरम्भकालविशिष्टेंऽशे(आदिकर्मणि) विद्यमानाद्धातोर्निष्ठा वक्तव्या इत्यर्थः ।

आदिकर्मणि क्तः कर्तरि च ३।४।७१॥

आदिकर्मणि क्रियाया भूतांशविवक्षायां यः क्तः स कर्तरि स्यात् चकाराद्भावकर्मणोरपि ।

विभाषा भावादिकर्मणोः ७।२।१७॥

आकारस्येत्संज्ञकाद्धातोर्भावे आदिकर्मणि च विहिताया निष्ठाया इट् वा स्यात् । ञिष्विदा इत्याकारञिकाराणां लोपे षस्य सत्वे च कृते स्विद् जायते । प्रस्विद्धातोराद्येषु क्रियाक्षीणेषु भूतेष्वपि क्रियाया भूतत्त्वाभावाद्भूतकर्मणि "आदिकर्मणि निष्ठा" इति वार्तिकेन निष्ठायां कृतायाम् (क्ते कृते) "आदिकर्मणि क्तः कर्तरि च" इति सूत्रेणादिकर्मणि भूतांशे काले विवक्षिते क्ते कर्तरि कृते प्रस्विद् त इति जाते "विभाषा भावादिकर्मणोः" इत्यनेन क्तस्य इटि अस्य "निष्ठा शीङ्" इति सूत्रेण कित्वनिषेधे गुणे प्रातिपदिकत्वात्सुबुत्पत्तिः - प्रस्वेदितश्चैतः प्रशब्द आदिकर्मद्योतनार्थः । भावे-प्रस्वेदितं तेन । अत्र भ्वादिधातुर्गृह्यते । प्रमेदितः-प्रमेदितवान् । प्रक्ष्वेदितः-प्रक्ष्वेदितवान् । भावे-प्रमेदितम् प्रक्ष्वेदितं तेन । ञिधृषा-प्रधर्षितः प्रधर्षितवान् । भावे-प्रधर्षितं तेन । भूतकर्तरि क्तः-प्रकृतः=प्रारब्धवान् कटं देवदत्तः । कर्मणि-कृतःकटस्तेन । आदिकर्मणि क्तः कर्तरि चेति सूत्रतः "क्तःकर्तरि" इत्यनयोरधः सूत्रेऽनुवृत्तिर्भवति । तेनाधः सूत्रतो भूतकर्तरि क्तो विधीयते ।

गत्यर्थाकर्मक-श्लिष-शीङ्-स्थासवसजनरुहजीर्यतिभ्यश्च[4] ३।४।७२॥

एभ्यः कर्तरि क्तःस्यात् भाकर्मणोश्च । कर्तरि-गम्-गतो गङ्गाम्-अनुदात्तोपदेशेति मलोपः । प्राप्=गृहं प्राप्तः । तृ=भवार्णवं तीर्ण[5] इति गत्यर्थकाः । भू-भूतः । म्लै=ग्ला-म्लानः । मृ=मृतः । प्रकाश्=प्रकाशितः इत्यकर्मकाः । आ-श्लिष=लक्ष्मीमाश्लिष्टो हरिः । उपसर्गेण धातुः सकर्मकः । अधि-शीङ्=अधिशयितः शेषं विष्णुः ।

---

१ गौणे कर्मणि दुह्यादेरिति नियमो लगति ।

२ रघुवंशमहाकाव्ये १।२७,स्थिता= आस्यात् । रघुवंशः- १।३३, नीनाय=नीतवान्,सञ्जीवनी - सुधेन्दुटीकात्रयोपेतम् ।

३ वरदराजाचार्यः - मध्यकौमुदीटीकायाम् - क्रियाया आरम्भकालविशिष्टोंऽश आदिकर्मेति - विश्वनाथशास्त्री । वामनजयादित्यौ - काशिकावृत्तिः - भागः ३, हरदत्तमिश्रः - पदमञ्जरीकायाम् - आदिक्रियायाः कर्म=आदिकर्म । तस्मिन्नादिकर्मणि भूततत्त्वेन विवक्षिते इत्यर्थे । आद्ये हि क्रियाक्षणे भूते समूहरूपादेकदेशे समूहे चेति न्यायाद्वा धात्वर्थ एव इति । आचार्यजिनेन्द्रः - न्यायटीकायाम् - आद्यो यः क्रियायाः क्षणः स परिनिष्पन्नत्वाद्भूतो भवतीति युक्ता तस्य विवक्षेति ।

४ सर्वेभ्यो गत्यर्थधातुभ्योऽकर्मकधातुभ्य उपसर्गेण युक्तेभ्यःश्लिष्-शीङ्-स्था-आस-वस-जनरुह्-जॄधातुभ्यश्च भूतकर्तरि क्तो भवति ।

५ ऋत इद्धातोरिति इर्, हलि चेति दीर्घः ।

द्यति-स्यति-मा-स्थामित्ति किति ७।४।४०॥

एषामिस्यात्तादौ किति । अधि+आ+स्था=अधिष्ठित आस्थितो वा वैकुण्ठं विष्णुः । उप+आस=शिवमुपासितो रामः । उप+वस्=हरिदिनमुपासितः सः-उपवासे (एकादशीदिनेऽभोजनेऽर्थे) । अनु+जन्=भरतो राममनुजातः । आ+रुह्=विष्णुर्गरुडमारूढः । अनु+जॄ=हरिः (ईश्वरः) विश्वमनुजीर्णः - हलि चेति दीर्घः । कर्मणि प्राप्ता गता वा गङ्गा तेन । आश्लिष्टा लक्ष्मीर्हरिणा । अधिशयित आस्थितो वा शेषो विष्णुना । उपासितः शिवो रामेण । उपोषितं हरिदिनं भक्तेन । अनुजातो रामो भरतेन । आरूढो गरुडो विष्णुना । अनुजीर्णं विश्वं हरिणा । भावे प्राप्तम् आश्लिष्टम् अधिशयितम् अधिष्ठितम्, उपासितम् उपोषितम् अनुजातम् आरूढम् अनुजीर्णम् उपस्थितं वा तेन । गत्यर्था. इत्यनेन कर्तरि कृतः क्तो भूतकालिको बोध्यः । भूतकर्तरि-वृध=वृद्धः[१], वृद्धवान् । निष्ठेति क्तः=क्रम्=क्रान्तः[२] क्रान्तवान् । शम्=शमितः शान्तः, शमितवान् शान्तवान् इत्यादि । वर्तमाने लडित्यधिकृत्य -

मतिबुद्धिपूजार्थेभ्यश्च ३।२।१८८॥

एभ्यो वर्तमाने क्तः स्यात् । राज्ञां मतः, बुद्धः, पूजितः, इष्टः, विदितः अर्चितो वा जनः । चकारेणानुक्तेभ्यो धातुभ्योऽपि वर्तमाने क्तो विधीयते-शीलितः, रक्षितः, जुष्टः, आक्रुष्टः, इत्यादि । कर्मणि तु-पूजितो यः सुरासुरैः । तेन स मत इत्यादि ।

निष्ठायां सेटि ६।४।५२॥

णे(णिचः)र्लोपः स्यात् सेण्निष्ठायां परस्यां सत्याम् । चैत्रो मैत्रमबीभवत्-कर्तरि । चैत्रेण मैत्रोऽभावि-इत्यर्थः कर्मणि । भावयतेः निष्ठा इति सूत्रेण क्तप्रत्यये इडागमेऽनेन सूत्रेण णेर्लोपे भावित इति सिद्धम् । एवं गमित इत्यादयः सर्वे ण्यन्तधातवः समाधेयाः ।

कृत्यल्युटो बहुलम् ३।३।११३॥

कृत्यप्रत्यया ल्युट् च बहुलमर्थेषु भवन्ति । बहून् अर्थान् लातीति बहुलम् । बहुलार्थः- क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव । विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

भावकर्मणोर्विहिताःप्रत्ययाःकारकान्तरेऽपि भवन्ति । स्नात्यनेनेति स्नानीयं चूर्णम् । अत्र करणेऽनीयर् । दीयतेऽस्मै इति दानीयो विप्रः-सम्प्रदानेऽनीयर् । बाहुलकात्कर्तरि ल्युट्-वक्तीति वचनः (वक्ता) । कर्मणि तु-उच्यते यदिति वचनम् । उच्यते=उच्चार्यतेऽसौ इति कर्मण्येव ल्युट्=वचनः । बाहुलकात्कर्तरि ल्युट्-प्रदधातीति प्रधानो धर्मः । प्रधीयतेऽनेनेति प्रधानम् । पीयतेऽनेनेति यत्-पेयो भाण्डः । पीयतेऽयमिति-पेयः सूपो रसो वा । इदं पेयं जलं दुग्धं वा । कर्मणि ण्वुल्-पादाभ्यां ह्रियते=पादहारकः । अधीयत इति कर्मणि ल्युटि=अध्ययनम् ।

नपुंसके भावे क्तः ३।३।११४॥

क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात् । अनेन सूत्रेण सर्वेभ्यो धातुभ्यःक्तो विधीयते । हस्=हसितम् । शी=शयितम् । जल्प-जल्पितम् । वच्=उक्तम् । अभिधा=अभिहितम् । भूते इत्यधिकृत्य

---

१ आर्धधातुकस्येड्वलादेरिति सूत्रेण प्राप्तस्य क्तस्येटो यस्य विभाषा इति सूत्रेण निषेधः, कित्वाद्गुणनिषेधश्च ।

२ आर्धधातुक इतिसूत्रेण प्राप्तस्येटो यस्य विभाषेति निषेधः, अनुनासिकस्य क्विझलोः क्ङितीति दीर्घः, अनुस्वारः परसवर्णश्च भवति ।

टिप्पणी -भूतकर्तरि विहितयोः क्तक्तवतुप्रत्ययोर्नाम निष्ठा । निष्ठाया अर्थःसमापिकाऽस्ति । यतः क्तक्तवतुप्रत्ययान्तशब्दाभ्यां कार्यस्य समाप्तिनिर्दिश्यते । यतो निष्ठान्ता क्रिया समापिका क्रिया प्रोच्यते । कर्मणि निष्पन्नाः कृत्यक्तखल्प्रत्ययान्ताः क्तवतुप्रत्ययान्तश्च शब्दा विशेषणत्वात्त्रैलिङ्गिका ज्ञेयाः-कृत्यः-गम्-गन्तव्यः-व्या-म् । कृति-क्तः=कृ=कृतः-ता-म् । क्तवतु-कृतवान्-कृतवती-वत् । खल्- सुगमः-मा-म् । इत्यादि ।

निष्ठा इति सूत्रेण विहितः क्तः "तयोरेव कृत्यक्तखलर्थाः" इति सूत्रानुवृत्या भूतभावे भूतकर्मणि च विहितो ज्ञेयः । नपुंसके भावे क्त इति सूत्रेण तु नपुंसके कालसामान्ये भावे क्तो विधीयते । अत्र विहितः क्तोऽपि नपुंसके प्रथमाया एकवचने एव प्रयुज्यते । यतः प्रयोगे तेन ताभ्याम् तैर्वा हसितम् शयितं वा इत्यादि । त्वया मया वा युवाभ्यामावाभ्यां वा युष्माभिरस्माभिर्वा उक्तम्, अभिहितं वा । राजपुत्रैरुक्तमित्यादि ।

ल्युट् च ३।३।११५॥

नपुंसकलिङ्गे भावे धातोर्ल्युट् स्यात् । हसनम् । शयनम् । वचनम् । नयनम् । करणम् । पचनमित्यादि ।

करणाधिकरणयोश्च ३।३।११७॥

करणेऽधिकरणे च धातोर्ल्युट् स्यात् । करणे=इध्मानि वृश्च्यन्ते येनेति इध्मव्रश्चनः कुठारः । प्रमीयते प्रमिमीयते वाऽनेन प्रमाणम् । उच्यतेऽनेति वचनम् । अधिकरणे-गौर्दुह्यते यस्यामिति गादोहनी स्थाली ।

३-३ खल्युचौ

ईषद्-दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ३।३।१२६॥

एषु दुःखसुखार्थेषु खल् स्यात् भावकर्मणोः । तयोरेवेति सूत्रतो भावकर्मणोः खल् प्रवर्तते । कृच्छ्रे(दुःखे)ऽर्थे-दुःखेन क्रियत इति दुष्करः-रा-रम् । दुःखेन तीर्यत इति दुस्तरः-रा-रम् । दुःखेन लभ्यत इति दुर्लभः-भा=भम् । दुःखेन पठचत इति दुष्पठः-ठा-ठम् । दुःखेन आप्यत इति दुरापः-पा-पम् । दुःखेन गम्यते इति दुर्गमः-मा-मम् । दुःखेन उच्यत इति दुर्वचः-चा-चमित्यादयश्चिन्त्याः । अकृच्छ्रे(सुखे)ऽर्थे- सुखेन क्रियत इति सुकरः-रा-रम्, ईषत्करः-रा-रम् । सुखेन तीर्यत इति इति ईषत्तरः-रा-रम्, सुतरः-रा-रम् । सुखेन लभ्यते इति सुलभः-भा-भम् । सुखेन पठचते इति ईषत्पठः-ठा-ठम्=सुपठः-ठा-ठम् । सुखेन आप्यते इति स्वापः-पा-पम् । सुखेन गम्यते इति सुगमः-मा-मम् । सुखेन उच्यत इति सुवचः-चा-चमित्यादयश्चिन्त्याः । सकर्मकधातोः कर्मणोऽविवक्षायां भावे खलि कृते क्लीबैकत्वम्-सुवचम् । अकोऽकि दीर्घ इत्येव सुवचम् ।

आतो युच् ३।३।१२८॥

ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु युच् स्यात् भावकर्मणोः । खलोऽपवादः । दुःखेन पीयत इति दुष्पानः-ना-नम् । सुखेन पीयत इति सुपानः-ना-म् । एवं दुःसुपूर्वकेभ्यो धातुभ्यः खल्युच्प्रत्ययाभ्यां निष्पन्नाः शब्दाः स्वेन प्रयोगकाले सावधानया विचिन्त्या अन्यैः प्रयुक्ताश्च ।

इति अतिङन्तरूपचिन्तनादौ तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ॥ ४ ॥

४. कारकचिन्तनक्रमः

कारकाणां नामानि पूर्वं समुल्लिखितानि । कारकाणि क्रियापदमाश्रित्य प्रयुज्यन्ते । ततो वाक्यं जायते । वाक्यस्य चर्चा पूर्वमेव कृता । कारकं वाक्यस्य शुद्धिमशुद्धिञ्च बोधयति । यतः कारकं विज्ञातुं यत्नो विधेयः । किञ्च कारकं कस्यापि कृते कामधेनुरस्ति ।

४-१ कर्तृकारकम्

इदं कारकं कारकेषु प्रथमम् । अस्मिन्कारके शब्दानां प्रथमान्तपदं विधीयते । कर्तृवाच्ये प्रथमान्तपदं कर्तृपदेन प्रोच्यते कर्मवाच्ये प्रथमान्तमात्रम् ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २।३।४६॥

आदौ शब्दस्याव्युत्पत्तिपक्षे [1] अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रेण व्युत्पत्तिपक्षे कृदन्तास्तद्धितान्ताः समासकृताश्च शब्दा भवन्ति, तेषां "कृत्तद्धितसमासाश्च" इति सूत्रेण च प्रातिपदिकसंज्ञा क्रियते । यस्मिन्प्रातिपदिके(शब्दे)उच्चारिते नियमेन यस्यार्थस्योपस्थितिः स प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमाविभक्तिः स्यात् । अनेन सूत्रेण पुंस्त्रीनपुंसकलिङ्गानामव्ययानां च शब्दानां प्रथमाविभक्तौ रूपाणि निष्पद्यन्ते ।

१- प्रातिपदिकार्थमात्रे नियत(निश्चित)लिङ्गा अव्ययाश्च शब्दा गृह्यन्ते । क) नियतलिङ्गाः- रामः, कृष्णः, हरिः, श्रीः, रमा, गौरी ज्ञानम्, वारि, मित्रम्, धनम्, फलम्, पर्वतः, सागरः, हिमालय इत्यादि ।

ख) अव्ययाः- उच्चैः, स्वः, पृथक्, शम्, स्वाहा, स्वधा, नमः इत्यादि । स्मर्तव्यं यत्- अव्ययशब्दात्सप्तानां विभक्तीनां वचनानि विधीयन्ते । तानि सर्वाणि "अव्ययादाप्सुपः" इति सूत्रेण लुप्यन्ते । यतोऽव्ययशब्देषु विभक्तेर्वचनानि न प्रतीयन्ते । उक्तञ्च-सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ यतोऽव्ययशब्दस्य त्रिषु लिङ्गेषु त्रिषु वचनेषु चैकमेव रूपं भवति ।

२- लिङ्गमात्राधिक्येऽनियत(अनिश्चित)लिङ्गशब्दा गृह्यन्ते । अनियतलिङ्गशब्दा विशेषणवाचका ज्ञेयाः । तटः, तटी, तटम् । श्यामः, श्यामा, श्यामम् । नेता, नेत्री, नेतृ । दण्डी, दण्डिनी, दण्डि । साधुः, साध्वी-साधुः, साधु इत्यादि ।

३- परिमाणमात्रेण(मानमात्रेण) यानि द्रव्याणि ज्ञायन्ते ते परिमाणवचकाः । यथा-द्रोणो ब्रीहिः- द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो ब्रीहिः । सेटकस्तण्डुलाः । रूप्यकस्य चत्वारः,षट्टङ्का घृत्म । सेरस्तण्डुलः-समूहार्थे तण्डुलो बोध्यः । सेरास्तण्डुलाः । चत्वारो माषकाः सुवर्णं रजतं वा । त्रीणि औंसानि टिंचर-आयोडीनम् । चतुर्मणपरिमिता ब्रीहयः । भाषायां मणस्य मनःप्रोच्यते । चत्वारस्तोलकाः सुवर्णम् । सुवर्णस्य चत्वारस्तोलका अलं भूषणाय । एकमाइलपरिमितो द्विमाइलपरिमितः शतमाइलपरिमितो वा पन्थाः । शतगजपरिमितं वस्त्रम् । एकगजपरिमितमर्धगजपरिमितमङ्गुलीपरिमितं द्व्यङ्गुलपरिमितं वा वस्त्रम् । एकमणपरिमितास्तण्डुलाः । अर्धकीलोपरिमितः किलोपरिमितो वा तण्डुलः । अर्धलीटरमेकलीटरं वा तैलं घृतं वा । इत्यादि ।

---

[1] यःशब्दः प्रत्ययस्यायोगेन सिद्धोऽव्युत्पन्नो योगेन व्युत्पन्नश्च ज्ञेयौ ।

४- संख्यामात्रे गणनावाचकशब्दा गृह्यन्ते । एक एका एकम्[1] । द्वौ द्वे द्वे । त्रयः तिस्रः, त्रीणि । चत्वारः चतस्रः चत्वारि । बहुः बह्वी-बहुः बहु इत्यादि । एते विशेष्यस्य वचनानुसारं प्रयुज्यन्ते । यत एते विशेषणानि ज्ञेयानि । पञ्चन्शब्दतो नवदश (१९) पर्यन्ता विंशतितो नवनवतिपर्यन्ताश्च शब्दास्त्रिषु लिङ्गेषु समाना भवन्ति । यथा-पञ्च षट् सप्त इत्यादि । एकोनविंशतिः, ऊनविंशतिः, विंशतिः, एकविंशतिः, त्रिंशत्, एकत्रिंशत्, एकचत्वारिंशत्, षष्टी इत्यादि । स्मरणीयं यत् एकविंशतितो नवतिपर्यन्तानां शब्दानां रूपाणि स्त्रीलिङ्गे सर्वासु विभक्तिषु केवलमेकैकवचने पञ्चन्शब्दतो नवदशपर्यन्तानां शब्दानां रूपाणि प्रत्येकविभक्तेः केवलं बहुवचने च भवन्ति ।

४-१-१ कर्तृपदज्ञानम्

यावतां पुंस्त्रीनपुंसकलिङ्गानामजन्तानां हलन्तानां च शब्दानां प्रथमाविभक्तेस्त्रिषु वचनेषु यानि रूपाणि निष्पद्यन्ते । तानि सर्वाणि कर्तृवाच्ये कर्तृपदेन बोध्यानि । हलन्तशब्देषु तद्युष्मदस्मच्छब्दानां प्रथमाविभक्ते रूपाणि कर्तृवाच्ये निर्दिष्टक्रियापदेषु क्रमेण मुख्यकर्तृपदरूपेण कर्मवाच्ये प्रथमान्तपदमात्रेण च प्रयुज्यन्ते । क्रियाया अर्थस्य बोधकः कर्ता भवति । यतो यः करोति स कर्ता प्रोच्यते ।

शब्दा	एकवचनम्	द्विवचनम्	बहुवचनम्	प्रथमादिपुरुषकर्तारः
तद्=	स	तौ	ते	प्रथमपुरुषकर्तारः,
युष्मद्=	त्वम्	युवाम्	यूयम्	मध्यपुरुषकर्तारः,
अस्मद्=	अहम्	आवाम्	वयम्	उत्तमपुरुषकर्तारश्च प्रोच्यन्ते ।

एषु तच्छब्दस्य त्रिषु लिङ्गेषु भिन्नभिन्नरूपाणि भवन्ति । तेन शब्दोऽयं विशेषणमपि भवति । युष्पदस्मदो रूपाणि त्रिषु लिङ्गेषु समानानि[2](एकरूपाणि) भवन्ति । यत एतयोः शब्दयोर्विशेषणे पृथग्रूपं न भवति । स्मरणीयं यत् सर्वेषामजन्तानां हलन्तानां च शब्दानां प्रथमाया विभक्ते रूपाणि कर्तृवाच्ये कर्तृपदरूपेण कर्मवाच्ये प्रथमान्तपदरूपेण च प्रोच्यन्ते । कर्तृवाच्ये क्रियाया अर्थबोधकः कर्ता कर्मवाच्ये प्रथमान्तपदं च भवतीति बोध्यम् ।

४-१-२ धातोर्दशलकाराणां नवतिः (९०) तिङन्त क्रियापदानि -

भ्वादिदशगणेषु ण्यन्त-सन्नन्त-यङन्त-यङ्लुङन्त-नामधातु-कण्ड्वादिषु च षट्सु प्रकरणेषु निर्दिष्टात्प्रत्येकं धातोर्विहितानां नवलकाराणां स्थाने तिङ्प्रत्ययेन प्रथमपुरुषे त्रीणि मध्यमपुरुषे त्रीणि उत्तमपुरुषे त्रीणि च रूपाणि निष्पाद्य नवसु लकारेषु नवतिः क्रियापदानि भवन्ति । तेषां नवलकाराणां त्रिषु पुरुषेषु निष्पन्नानां नवतेः क्रियापदानां रूपाणि क्रमेण एकवचनं द्विवचनं बहुवचनं च पदानि भवन्ति । सर्वेषां धातूनां नवसु लकारेषु मध्ये लिङ्लकार आशीर्वादे एकवारं विध्यादिष्वर्थेषु चान्यवारं कृत्वा द्विवारं पठचते । यतोऽर्थभेदेन लिङ्लकारस्य द्विवारपठनाद् रूपसिद्धिप्रक्रियायां लकारा दशैव भवन्ति । यत एकस्य धातोर्नवतिरूपाणि भवन्ति । एवं प्रत्येकं धातोर्नवतिः क्रियापदरूपाणि भवन्ति । लडादिलकारेषु निष्पन्नानां धातूनां रूपाणि वेदे लोके च प्रयुज्यन्ते । लेट्लकारस्य रूपं तु केवलं वेदेष्वेव प्रयुज्यते न तु लोके । यतो धातो रूपाणि सावधानतया स्मरणीयानि ।

---

[1] एकोऽल्पार्थे प्रधाने च प्रधाने केवले तथा । साधारणे समानेऽपि संख्यायां च प्रयुज्यते । एकशब्दः संख्यायां नित्यैकवचनान्तः । अन्येष्वर्थेषु वचनान्तरमपि स्यादेव । एके एकेषामिति ।

[2] युष्मदस्मत्षट्संज्ञकास्त्रिषु(त्रिलिङ्गेषु) सरूपाः = एकरूपा ज्ञेयाः ।

४-१-३ उद्देश्यविधेययोर्ज्ञानम्

वाक्यविधाने द्वयोः पदयोः प्रधानं भवति उद्देश्यं विधेयं च । उद्देश्यपदेन प्रथमान्तकर्ता, विधेयपदेन क्रियापदं च बोध्यते । उद्देश्यविधेययोर्मध्ये उद्देश्यं प्रधानं भवति । यतो वाक्ये कर्ता प्रधानं ज्ञेयम् । प्रधानभूतो कर्ता एकवचनान्तो द्विवचनान्तो वहुवचनान्तो वा भवति । तदनुरूपं क्रियापदं प्रयुज्यते ।

उद्देश्यं च विधेयं च द्वयं वाक्येष्वपेक्ष्यते ।
उद्देश्यं प्रथमान्तं हि विधेयं तु क्रियापदम्[1] ॥

क्रियापदेन तिङन्तमतिङन्त(कृत्यक्तक्तवतुखल्प्रत्ययान्त)ञ्च पदं ज्ञेयम् । अतिङन्तक्रियायाः सुपोऽपि विधीयन्ते विशेषणत्वात् ।

४-१-४ वाक्यनिर्माणविधिः

कारकैरन्विता(सम्वद्धा)क्रिया वाक्यं भवतीति चर्चा पूर्वं कृता । तत्र वाक्ये सकर्मिकाया अकर्मिकायाश्च क्रियाया विचारः सदा कर्तव्यः । वाक्ये सदा कर्ता उद्देश्यं विधेयं च क्रियापदं भवतः । यतो वाक्ये कर्तृक्रियापदयोः पुरुषं वचनं च मेलयित्वा आदौ कर्ता ततः क्रियापदं च प्रयुज्येते । अर्थात् प्रथममध्यमोत्तमपुरुषरूपाः कर्तारः सर्वेषां सकर्मकाकर्मकधातूनां प्रथममध्यमोत्तमपुरुषेषु क्रियापदेषु वचनक्रमेण प्रयुज्यन्ते । एषां प्रयोगक्रम एवं प्रकारेण प्रथमपुरुषकर्ता प्रथमपुरुषक्रियापदं मध्यपुरुषकर्ता मध्यमपुरुषक्रियापदमुत्तमपुरुषकर्ता उत्तमपुरुषक्रियापदं च वचनक्रमेण प्रयुज्येते । अत्रापि प्र.म.उ.पुरुषेषु कर्तृपदमेकवचनमस्ति चेत्क्रियापदमपि एकवचनं कर्तृपदं द्विवचनमस्ति चेत्क्रियापदमपि द्विवचनं कर्तृपदं बहुवचनमस्ति चेत्क्रियापदमपि बहुवचनं च प्रयुज्यते । ततः कर्तृक्रियापदाभ्यां वाक्यं सिद्धमिति पाठकः स्मरेत् । सदा वाक्ये कर्ता प्रथमान्तः स्वतन्त्रः प्रकृत्या प्रधानं च भवति । यतः सदा तस्यैव कर्तुरधीने क्रियापदं प्रयुज्यते । अत्रादौ वाक्येऽकर्मकधातोः कर्तुः क्रियायाश्च प्रयोगः प्रस्तूयते । सदा प्रयोगे कर्तृक्रियापदयोः पुरुषवचनयोर्मेलने ध्यानं देयम् ।

४-१-४-१ कर्तृवाच्यस्याकर्मकक्रियया कर्त्रा च वाक्यनिर्माणम्

क-१) भू (१) परस्मैपदम्, अ., सेट्, लट्

एक वचनम्	द्विवचनम्	बहुवचनम्
स भवति	तौ भवतः	ते भवन्ति - प्र.पु. कर्ता प्र.पु. क्रियापदम् ।
त्वम् भवसि,	युवाम् भवथः	यूयम् भवथ - म.पु. कर्ता म.पु.क्रियापदम् ।
अहम् भवामि	आवाम् भवावः	वयम् भवामः - उ.पु. कर्ता उ.पु.क्रियापदम् ।

संवादे मध्यमपुरुषः स्वयंवक्तरि उत्तमपुरुषोऽवशिष्टे निर्देशस्थाने प्रथमपुरुषश्च प्रयुज्यते । एवं धतोरन्येषु लिडादिलकारेषु निष्पन्नेषु क्रियापदेषूपरिवत् कर्तारः क्रमेण प्रयुज्यन्ते । तानि सर्वाणि वाक्यानि जायन्ते । नात्र सन्देहो विधेयः । निःशङ्को भव । वाक्ये क्रियापदं यत्र कुत्रापि प्रयुक्तं भवेत् । तत्पदं सदा वाक्यान्ते स्थितं स्मरणीयम् ।

क-२) अकर्मकेभ्यो धातुभ्यो भूतकर्तरि क्तक्तवतुप्रत्ययाभ्यां निष्पन्नानि अतिङन्तक्रियापदानि प्रथमाविभक्तौ निष्पन्नानामजन्तानां हलन्तानां च कर्तृपदानां वचनानुसारं प्रयुज्यन्ते । तदनन्तरं वाक्यं भवति । नात्र सन्देहः कार्यः । अत्र तद्युष्मदस्मच्छब्दानां प्रथमाविभक्ते रूपाणि वचनक्रमेण प्रयुक्तानि समुल्लिख्यन्ते-सः भूतः, भूतवान् । तौ भूतौ भूतवन्तौ । ते भूताः, भूतवन्तः । त्वं भूतः, भूतवान् ।

[1] सोमनाथ सिग्देलः - अनुवादचन्द्रिका - भाग-३, हिन्दी सं. श्लोक-१६९, पृ. १८७।

युवाम् भूतौ भूतवन्तौ । यूयम् भूताः, भूतवन्तः । अहम् भूतः, भूतवान् । आवाम् भूतौ भूतवन्तौ । वयम् भूताः, भूतवन्तः । अन्यकर्तृपदानां प्रयोगे तु - रामो भूतः, भूतवान् । रामौ भूतौ भूतवन्तौ । रामाः भूताः, भुतवन्तः । सीता भूता भूतवती । सीते भूते भूतवत्यौ । सीताः भूताः, भूतवत्यः । फलं भूतम्, भूतवत् । फले भूते भूतवती । फलानि भूतानि भूतवन्ति । राजा भूतः, भूतवान् । राजानौ भूतौ भूतवन्तौ । राजानः भूताः, भूतवन्तः । वाक्-ग् भूता भूतवती । वाचौ भूते भूतवत्यौ । वाचः भूताः, भूतवत्यः । राज्ञी भूता भूतवती । राज्ञ्यौ भूते भूतवत्यौ । राज्ञ्यः भूताः, भूतवत्यः । एवं सर्वत्र प्रयोगं विधेहि वाक्यं भवति । सन्देहो न विधेयः । यस्य वाक्यस्य द्वयोः क्रिययोर्बहूनां क्रियाणां वाऽन्ते शब्दः प्रयुक्तो नास्ति । तत्र द्वयोःक्रिययोर्बहुषु क्रियासु वा मध्ये प्रसङ्गानुसारमेका क्रिया गृह्यते ।

विशेषः भूतार्थकानां धातूनां लिट्-लङ्-लुङादिलकाराणां स्थाने तिङ्प्रत्ययैर्भूतकर्तरि क्तक्तवतुप्रत्ययाभ्यां च निष्पन्नानां क्रियापदानां चार्थः समानो मन्यते । यतो व्याख्यायामुभे क्रियापदे परस्परं पर्यायरूपेण प्रयुज्येते ।

क-३) कम्प् (१) आत्मनेपदधातुः, अकर्मकः, सेट्

उ. वि.	उ. वि.	उ. वि.	एवं सर्वत्र
ए.व	द्वि.व.	ब.व.	
स कम्पते	तौ कम्पेते	ते कम्पन्ते -	प्र.पु. कर्ता क्रियापदम्
त्वम् कम्पसे	युवाम् कम्पेथे	यूयम् कम्पध्वे -	म.पु. कर्ता क्रियापदम्
अहम् कम्पे	आवाम् कम्पावहे	वयम् कम्पामहे -	उ.पु. कर्ता क्रियापदम्

क-४) भूतकर्तरि क्तक्तवतुप्रत्ययाभ्यां निष्पन्नपदेन वाक्यम्-स कम्पितः, कम्पितवान् । तौ कम्पितौ कम्पितवन्तौ । ते कम्पिताः कम्पितवन्तः । त्वम् कम्पितः, कम्पितवान् । युवाम् कम्पितौ कम्पितवन्तौ । यूयम् कम्पिताः, कम्पितवन्त । अहम् कम्पितः, कम्पितवान् । आवाम् कम्पितौ कम्पितवन्तौ । वयम् कम्पितः, कम्पितवन्तः । अन्यकर्तृपदानां प्रयोगे तु-वृक्षः कम्पितः कम्पितवान् । वृक्षौ कम्पितौ, कम्पितवन्तौ । वृक्षा कम्पिताः कम्पितवन्तः । लता कम्पिता कम्पितवती । लते कम्पिते, कम्पितवत्यौ । लताः कम्पिताः, कम्पितवत्यः । एवंप्रकारेण सर्वत्र वाक्यानि सिद्धचन्ति । नात्र सन्देहः ।

अस्य धातोरवशिष्टेषु लकारेषु निष्पन्नानां क्रियापदानां रूपेषु उपरिवत् कर्तृपदानि क्रमशः प्रयुज्यन्ताम् । वाक्यं जायते । केवलं कर्तृक्रियापदयोर्मेलने धातोःसकर्मकाऽकर्मकयोर्भेदो न भवति । सदा स्मरणीयं यत् युष्मदस्मच्छब्दयोः प्रथमान्तकर्तारो धातोर्मध्यमोत्तमपुरुषयोः क्रियासु ततोऽन्येषां शब्दानां प्रथमान्तकर्तारः प्रथमपुरुषस्य च क्रियासु वचनक्रमेण प्रयुज्यन्ते । केषांचनान्येषां धातूनामुदाहरणानि । अधो धातौ दत्ता संख्या धातोर्गणीयसंख्या ज्ञेया । धातवो दशगणीयाः प्रोक्ताः सन्ति ।

क-५) वृध(१) सेट् भूत कर्तरि क्तक्तवतू

उ.	वि.	वि.	वि.
धर्मो	वर्धते	वृद्धः[1]	वृद्धावान्
धर्मौ	वर्धेते	वृद्धौ	वृद्धवन्तौ
धर्मौ	वर्धन्त	वृद्धाः	वृद्धवन्तः

क-६)वस्(१) अनिट् भूत कर्तरि क्तक्तवतू

उ.	वि.	वि.	वि.
रामः	वसति	उषितः	उषितवान्
रामौ	वसतः,	उषितौ	उषितवन्तौ
रामाः	वसन्ति	उषिताः	उषितवन्तः

क-७) शीङ् (२) सेट्
बालः शेते शयितः, शयितवान् ।
बालौ शयाते शयितौ शयितवन्तौ ।

क-८) मन्द् (१) सेट्
रमा मन्दते मन्दिता, मन्दितवती ।
रमे मन्देते मन्दिते मन्दितवत्यौ ।

[1] आर्धधातुकस्येड्वलादेरिति सूत्रेण प्राप्तस्येटो यस्य विभाषेति सूत्रेण निषेधः ।

बालाः शेरते शयिताः, शयितवन्तः ।

क-९) लस्ज्-(६) सेट्
बधूः लज्जते लज्जिता लज्जितवती ।
बध्वौ लज्जेते लज्जिते लज्जितवत्यौ ।
बध्वः लज्जन्ते लज्जिताः लज्जितवत्यः ।

रमाः मन्दन्ते मन्दिताः, मन्दितवत्यः ।

क-१०) नृत् (४) सेट्
सीता नृत्यति नर्तिता नर्तितवती ।
सीते नृत्यतः नर्तिते नर्तितवत्यौ ।
सीताः नृत्यन्ति नर्तिताः नर्तितवत्यः ।

क-११) णश-नश् (४) अनिट्
बुद्धि नश्यति नष्टा नष्टवती ।
बुद्धी नश्यतः नष्टे नष्टवत्यौ ।
बुद्धयो नश्यन्ति नष्टाः नष्टवत्यः ।

क-१२) मृङ् (६) अनिट्
नरः म्रियते मृतः मृतवान् ।
नरौ म्रियेते मृतौ मृतवन्तौ ।
नराः म्रियन्ते मृताः मृतवन्तः ।

एवमन्येषु लिडादिलकारेषु धातोःसेटमनिटं च विचार्य कर्तृक्रियापदयोः प्रयोगं कुर्यात् । एवं सर्वत्र वाक्यस्य मूलस्तम्भः सम्पद्यते ।

क-१३) उपरि कर्तृक्रियापदाभ्यां मिलितस्य वाक्यस्योदाहरणानि प्रस्तुतानि । अधो विधेयविशेषणेन सहितस्य क्रियापदस्य वाक्यस्योदाहरणं प्रस्तूयते । कर्तृपदात्परं क्रियापदात्पूर्वं च सन्निधौ प्रयुक्तं विशेषणं विधेयविशेषणं जानीयात्-स पण्डितो भवति भूतः, भूतवान्वा । तौ पण्डितौ भवतः, भूतौ भूतवन्तौ । ते पण्डिताः भवन्ति, भूताः, भूतवन्तः । त्वम् पण्डितो भवसि भूतः, भूतवान् । युवाम् पण्डितौ भवथः भूतौ भूतवन्तौ । यूयम् पण्डिताः भवथ, भूताः, भूतवन्तः । अहम् पण्डितो भवामि, भूतः, भूतवान् । आवाम् पण्डितौ भवावः, भूतौ भूतवन्तौ । वयम् पण्डिताः, भवामः, भूताः भूतवन्तः इत्यादि । एवं जन्धातोरपि प्रयोगो विधेयः - जातः जातवान् । जातौ जातवन्तौ । जाताः जातवन्तः ।

एवंप्रकारेणापि-सः त्वमहम् वा भूतः, भूतवान् । तौः युवाम् आवाम् वा भूतौ, भूतवन्तौ । ते यूयम् वयम् वा भूताः, भूतवन्तः । इत्यादि ।

क-१४) ष्ठा=स्था (१) परस्मैपदम्, अकर्मकः अनिट्-स विद्वान् तिष्ठति स्थितः स्थितवान् । तौ विद्वांसौ तिष्ठतः स्थितौ स्थितवन्तौ । ते विद्वांसः तिष्ठन्ति, स्थिताः, स्थितवन्तः । त्वं तिष्ठसि स्थितः, स्थितवान् । युवां विद्वांसौ तिष्ठथः, स्थितौ स्थितवन्तौ । यूयं विद्वांसः तिष्ठथ स्थिताः स्थितवन्तः । अहम् विद्वान् तिष्ठामि, स्थितः स्थितवान् । आवाम् विद्वांसौ तिष्ठावः स्थितौ स्थितवन्तौ । वयं विद्वांसः तिष्ठामः, स्थिताः स्थितवन्तः इत्यादि ।

एवंप्रकारेणापि-स त्वमहं वा स्थितः स्थितवान् । तौ युवाम् आवां वा स्थितौ स्थितवन्तौ । ते यूयम् वयम् वा स्थिताः स्थितवन्तः ।

क-१५) उप+विश् (६) परस्मैपदम्, अकर्मकः, अनिट्=उपरिवत् अधः समुल्लिखितायां क्रियायां कर्तृपदं विचार्य प्रयुज्यताम् गृहे मञ्चे, आसने वा उपविशति, उपविष्टः, उपविष्टवान् । गृहे मञ्चे आसने चैषु मध्ये एकमादौ प्रयुज्य-उपविशतः, उपविष्टौ उपविष्टवन्तौ । उपविशन्ति, उपविष्टाः, उपविष्टवन्तः । उपविशसि, उपविष्टः, उपविष्टवान् । उपविशथः, उपविष्टौ, उपविष्टवन्तौ । उपविशथ, उपविष्टाः, उपविष्टवन्तः । उपविशामि उपविष्ट,उपविष्टवान् । उपविशावः, उपविष्टौ, उपविष्टवन्तौ । उपविशामः, उपविष्टाः, उपविष्टवन्तः आसु क्रियासु कर्ता प्रयोज्यः । स्त्रियामेवम् उपविष्टा उपविष्टे उपविष्टाः । उपविष्टवती उपविष्टवत्यौ उपविष्टवत्यः । इत्यादि ।

क-१६) विशरेषणकर्ता-उपरि विशेष्यं विशेषणं च सहैव प्रयुज्य वाक्यं समुल्लिखितम् । अत्र विशेषणकर्ता विलिख्यते - **"विशेषणमात्रप्रयोगे विशेष्यप्रतिपत्तिः"** यस्यां क्रियायां विशेष्येण रहितं कर्तृरूपं विशेषणं प्रयुज्यते तत्र क्रियायां विशेषणमेव विशेष्यं भवति स एव कर्ता च । यथा- शुभ्=आत्मनेपदम्-अ. सेट्-विद्वान् शोभते, शोभितः, शोभितवान् । विद्वांसौ शोभेते, शोभितौ,

शोभितवन्तौ । विद्वांसः शोभन्ते, शोभिताः, शोभितवन्तः । एवं सर्वत्र वाक्यं सिद्ध्यति । सन्देहो न विधेयः ।

४-१-४-२ अकर्मकधातोर्भाववाच्यस्य वाक्यविधिः

अकर्मकधातोर्भावे(भाववाच्ये) उक्तेऽर्थे तिङ्क्तखल्प्रत्यया विधीयन्ते । तैर्निष्पन्नं क्रियापदमुक्तं भवति । भावे निष्पन्नेनोक्तेन क्रियापदेनापेक्षितः कर्ताऽनुक्तो भवति । ततोऽनुक्तकर्ता "कर्तृकरणयोस्तृतीया" इति सूत्रेण तृतीया भवति । इत्थमनुक्तकर्ता- तृतीयान्तो ज्ञेयः । भावे कृत्यक्तखल्प्रत्ययैर्निष्पन्नं पदं प्रकृत्या क्लीबस्य प्रथमाया एकवचनं प्रयुज्यते । वाक्ये कर्तुर्विशेषणमस्तिचेत्तस्य लिङ्गविभक्तिवचनानुसारं विशेषणं प्रयुज्यते । भाववाच्येऽनुक्तकर्ता उद्देश्यं क्रियापदं च विधेयं ज्ञेयम् । सर्वेऽजन्ता हलन्ताश्च धातव एवमेवप्रकारेण विचिन्त्य प्रयोज्याः । भाववाच्ये विहितस्तृतीयान्त एव कर्ता ज्ञेयः ।

भावे कर्तृपदानां परिवर्तनस्वरूपम्

कर्तृपदम्- स तौ ते । त्वम् युवाम् यूयम् । अहम् आवाम् वयम्- प्रथमा ।
परिवर्तितपदम्-तेन ताभ्याम् तैः। त्वया युवाभ्याम्युष्माभिः। मया आवाभ्याम् अस्माभिः- तृतीया ।

भावे कर्मणि च विशेषणानां परिवर्तनस्वरूम्

पण्डितः पण्डितौ पण्डिताः - कर्तरि
पण्डितेन पण्डिताभ्याम् पण्डितैः - तृतीया, एवं सर्वत्र चिन्त्यम् ।

केवलमकर्मकधातोर्भावे - तेन ताभ्याम् तैः, त्वया युवाभ्याम् युष्मामिः, मया आवाभ्याम् अस्मामिर्वा- भू-(१) सेट्-भूयते बभूवे भाविता-भविता भाविष्यते-भविष्यते भूयताम् भाविषीष्ट-भविषीष्ट, अभावि, अभाविष्यत, अभविष्यत । कृति-भवितव्यम्, भवनीयम्, भूतम्, सुभवम्, दुर्भवम् ।

सविशेषणं कर्तृपदस्य परिवर्तनस्वरूपम्

२- तेन बुधेन, ताभ्याम् बुधाभ्याम्, तैः बुधैर्वा
त्वया बुधेन, युवाभ्याम् बुधाभ्याम्, युष्माभिः बुधैर्वा
मया बुधेन, आवाभ्याम् बुधाभ्याम्, अस्माभिः बुधैर्वा

ष्ठा-स्था-प.अ.अनिट्-स्थीयते, तस्थे, स्थायिता-स्थाता स्थायिष्यते-स्थास्यते, स्थीयताम्, अस्थीयत, स्थायिषीष्ट-स्थासीष्ट, अस्थायि, अस्थायिष्यत-अस्थास्यत । कृति-स्थातव्यम्, स्थितम् ।

३- रामेण रामाभ्याम् रामैर्वा सीतया, सीताभ्याम् सीताभिर्वा, कृष्णेन कृष्णाभ्याम् कृष्णैर्वा रमया रमाभ्याम् रमाभिर्वा, देव्या देवीभ्याम् देवीभिर्वा-वस्-उष्यते, उवसे, वस्ता, वत्स्यते, उष्यताम्, औष्यत, वत्सीष्ट, अवात्सि, औत्स्यत । कृति-वस्तव्यम्, वसनीयम्, उषितम्, सुवसम् दुर्वसम् ।

मृङ्-आ.अ. अनिट्-म्रियते, मम्रे, मारिता-मर्ता मारिष्यते-मरिष्यते, म्रियताम्, अम्रियत, म्रियेत, अमारि, अमारिष्यत-अमरिष्यत । कृति-मर्तव्यम्, मृतम् ।

वृत (१) आ.अ.सेट्-वृत्यते, ववृते, वर्तिता, वर्तिष्यते, वृत्यताम्, अवृत्यत, वर्तिषीष्ट, अवर्ति, अवर्तिष्यत । कृति-वर्तितव्यम्, वर्तनीयम्, वृत्तम् । एवं वृध्धातोरपि ।

शीङ् (२) आ.अ. सेट-शीयते शिश्ये शायिता-शयिता, शायिष्यते शयिष्यते, शीयताम्, अशायिषीष्ट, अशयिषीष्ट, अशायि, अशायिष्यत-अशयिष्यत । कृति-शयितव्यम्, शयनीयम्, शयितम् ।

जीव्- (१) प.अ. सेट्-जीव्यते, जिजीवे, जीविता, जीविष्यते, जीव्यताम्, अजीव्यत, जीव्येत, जीविषीष्ट, अजीवि, अजीविष्यत । कृति-जीवितव्यम्, जीवितम् । एवं क्रीड् रुच् दीप् लज्ज् इत्यादयो धातवो ज्ञेयाः । धातुः सेट् अनिट् च सदा विचारणीयः ।

४- वयं सर्वे सावधाना भवामः - अस्माभिः सर्वैः सावधानैर्भवितव्यम्, भवनीयम्, भूतम्, सुभवम्, दुर्भवम् । प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम् (वर्तितव्यम्) ।

ताः सुशीलाः सुन्दर्यो बालिका निर्भया भूत्वा गृहे तिष्ठन्ति मन्दन्ते=शेरते स्वपन्ति वर्तन्ते वा- ताभिः सुशीलाभिः सुन्दरीभिर्बालिकाभिर्निर्भयाभिर्भूत्वा गृहे स्थीयते, स्थातव्यम्, स्थितम्, मन्द्यते, मन्दितव्यम्, मन्दितम्, शीयते, शयितव्यम्, शयनीयम्, सुप्यते, स्वप्तव्यम्, सुप्तम्, वृत्यते, वर्तितव्यम्, वृत्तम् । क्षि=क्षीयते क्षेतव्यम्, क्षीतम् । भी=भीयते, भेत्तव्यम्, भीतमित्यादि ।

अकर्मकधातोस्तिङन्तातिङन्तानि भूतकालिकानि
समानार्थकानि क्रियापदानि

कर्ता	लिट्	लङ्	लुङ्	भूतकर्तारि-	क्तः	क्तवतुः
स	बभूव	अभवत्	अभूत्-	सः	भूतः	भूतवान्
स	जिजीव	अजीवत्	अजीवीत्-	सः	जीवितः	जीवितवान्
सा	ननर्त	अनृत्यत्	अनर्तीत्-	सा	नर्तिता	नर्तितवती
अहं	शिष्ये	अशेय	अशयिषि-	अहं	शयितः	शयितवान्
पुष्पं	मम्ले	अम्लायत्	अम्लासीत्-	पुष्पं	म्लानम्	म्लानवत्

अकर्मकार्था धातवः -

लज्जा-सत्ता-स्थिति-जागरणं वृद्धि-क्षय-भय-जीवित-मरणम् ।
नर्तन-निद्रा-रोदन-वासाः स्पर्धा-कम्पन-मोदन-हासाः ।
शयन-क्रीडा-रुचि-दीप्त्यर्था धातव एते कर्मणि नोक्ताः ॥

इति अकर्मकधातोः प्रयोगो दर्शितः ।

४-१-४-३ कर्तृवाच्यस्य सकर्मकक्रियया कर्त्रा च वाक्यनिर्माणम्

सकर्मकं वाक्यं विधातुं प्रथमं दशगणीयानां सकर्मकधातूनां ण्यन्त-सन्नन्त-यङन्त-यङ्लुङन्त-नामधातु-कण्ड्वादिधातूनां कर्तरि कर्मणि चैषु प्रकरणेषु पठितेभ्यः सकर्मकधातुभ्यो भूतकर्तरि क्तवतुप्रत्येयन गत्यर्थधातुभ्यो नमस्कारार्थाकाच्च भूतकर्तरि क्तप्रत्ययेन सकर्मकधातुभ्यो भूतकर्मणि कृत्यक्तखल्प्रत्ययैश्च निष्पन्नानि पदानि ज्ञेयानि स्मरणीयानि च । च अपि तथा एषु शब्देषु मध्ये एकेन शब्देन कर्तृपदे कर्तृपदानि च समुच्चीयासमुच्चीय च कथं क्रियापदं प्रयुज्यते । क्वचिद् कर्तुःप्रयोगं विना क्रियापदेन कुत्रचिद् क्रियापदस्य प्रयोगं विना कर्तृपदेन च कथं वाक्यं प्रयुज्यत इत्यादिविषयाः प्रस्तूयन्ते । सदा कर्ता उद्देश्यं क्रियापदं विधेयं च ज्ञेयम् । कर्तृकर्मणोश्च विशेषचर्चा कर्मकारके करिष्यते । अत्रापि सकर्मकधातोः कर्तुः क्रियापदयोर्मेलनेन जातं वाक्यं प्रस्तूयते -

३-१-क) गम् (१) प.स. अनिट्

अत्रादौ स्थितः कर्ता उद्देश्यम् पश्चात्थिता क्रिया विधेयं च ज्ञेयम्

एकवचन्	द्विवचनम्	बहुवचनम्
स गच्छति	तौ गच्छतः	ते गच्छन्ति - प्र.पु. कर्ता क्रियापदम्
त्वम् गच्छसि	युवाम् गच्छथः	यूयम् गच्छथ - म.पु. कर्ता क्रियापदम्
अहम् गच्छामि	आवाम् गच्छावः	वयं गच्छामः - उ.पु. कर्ता क्रियापदम्

सर्वत्रैवं युष्मच्छब्दस्य प्रथमान्तस्य रूपाणि धातोर्लिडादिलकारेषु निष्पन्नस्य मध्यमपुरुषस्य क्रियासु अस्मच्छब्दस्य रूपाणि उत्तमपुरुषस्य क्रियास्वन्येषामजन्तानां हलन्तानां च शब्दानां प्रथमाविभक्ते रूपाणि प्रथमपुरुषस्य क्रियासु च वचनक्रमेण प्रयुज्यन्ते । ततस्तानि सर्वाणि वाक्यानि भवन्ति । निःशङ्को भव ।

ख) भूतकर्तरि क्तक्तवतू - स त्वमहं वा गतः गतवान् । तौ युवाम् आवां वा गतौ गतवन्तौ । ते यूयं वयं वा गताः, गतवन्तः । सर्वेषां गत्यर्थकधातूनामेवंप्रकारेण प्रयोगः समाधेयः । सर्वेषामजन्तानां हलन्तानां च शब्दानां प्रथमाविभक्ते रूपानुसारं गत्यर्थधातूनां क्तक्तवतुप्रत्ययाभ्यां निष्पन्नं पदं प्रयुज्यते । सुबन्तशब्दानां प्रथमाया एकद्विबहुवचनानुसारमित्यर्थः । यथा - रामो गतः, गतवान् । रामौ गतौ, गतवन्तौ । रामा गताः, गतवन्तः । सीता गता, गतवती । सीते गते गतवत्यौ । सीता गताः, गतवत्यः । राजा यातः, यातवान् । राजानौ यातौ यातवन्तौ । राजनः, याताः, यातवन्तः । फलं प्राप्तम्, प्राप्तवत् । फले प्राप्ते प्राप्तवती । फलानि प्राप्तानि, प्राप्तवन्ति । एवं सर्वत्र । एषु प्रयोगेष्वन्ते वचनक्रमेण अस्ति स्तः सन्तीति क्रियापदानि प्रयुज्यन्ते । एतत्सर्वं वाक्यमेव ज्ञेयम् ।

ग) ब्रू (२ द्विकर्मकः, अनिट् - वेदो ब्रवीति, उक्तवान् । वेदो ब्रूतः उक्तवन्तौ । वेदा ब्रुवन्ति, उक्तवन्तः ।

घ) दृश्-पश्य (४) प. सकर्मकः अनिट् - स रामः पश्यति । तौ रामौ पश्यतः । ते रामाः पश्यन्ति । त्वं रामः पश्यसि । युवाम् रामौ पश्यथः । यूयं रामाः पश्यथ । अहं (रामः) पश्यामि । आवां (रामौ) पश्यावः । वयं (रामाः) पश्यामः ।

ङ) भूतकर्तरि क्तवतुः - स त्वमहं वा दृष्टवान् । तौ युवां यूयं वा दृष्टवन्तौ । ते यूयं वयं वा दृष्टवन्तः । एवंप्रकारेणान्येषामजन्तानां हलन्तानां च शब्दानां प्रथमविभक्तेर्वचनानुसारं क्तवतुप्रत्ययान्तपदं प्रयोज्यम्-यथा-शिवः उक्तवान् । शिवौ उक्तवन्तौ । शिवा उक्तवन्तः । देवी उक्तवती । देव्यौ उक्तवत्यौ । देव्यः उक्तवत्यः । रामः दृष्टवान् । रामौ दृष्टवन्तौ । रामाः दृष्टवन्तः । सीता नतवती । सीता नतवत्यौ । सीता नतवत्यः पुंस्त्रियोः । फलं पतितवत् । फले पतितवती । फलानि पतितवन्ति-नपुंसके । इत्यादि ।

च) विशेषणेन युक्तं वाक्यम् - उपरि कर्तृक्रियापदाभ्यां मिलितस्य वाक्यस्योदाहरणानि प्रस्तुतानि । अधोविधेयविशेषणेन युक्तानि वाक्यानि प्रस्तूयन्ते । कर्तृपदात्परं क्रियापदाच्च पूर्वं सन्निधौ प्रयुक्तं विशेषणं विधेयविशेषणं प्रोच्यते - स पण्डितः पठति, पठितवान् । तौ पण्डितौ पठतः पठितवन्तौ । ते पण्डिताः, पठन्ति पठितवन्तः । त्वं पण्डितः पठसि, पठितवान् । युवां पण्डितौ, पठथः पठितवन्तौ । यूयं पण्डिताः पठथ पठितवन्तः । (अहम् पण्डितः) पठामि पठितवान् । आवां (पण्डितौ) पठावः पठितवन्तौ । वयं (पण्डिताः) पठामः पठितवन्तः । प्रायेणोत्तमपुरुषक्रियायां स्वनाम स्वपरकं विशेषणं च प्रयुज्यते । परमभिवादनादिकर्मसु बोधेषु त्वम् आवाम् वयमिति कर्तृभिः सह स्वनाम अभिमानप्रदर्शनार्थं स्वपरकं विशेषणं च प्रयुज्यते । द्रष्टव्यम् - ४-१-९ ।

छ) विशेषणकर्ता यत्र स तौ ते, त्वम् युवाम् यूयम्, अहम् आवाम् वयम् व्यक्तिवाचकनामशब्दश्चैतेषु कमप्येकं शब्दमप्रयुज्य केवलं विशेषणेन वाक्यं यदा निष्पद्यते तत्र विशेषणमेव विशेष्यं भवति स एव कर्ता च । उक्तञ्च - विशेषणमात्रप्रयोगे विशेष्यप्रतिपत्तिः । यतो विशेषणं विशेष्यं भवति । अस्याधीने क्रियापदं प्रयुज्यते । यथा-पुण्यवान् लभते, लब्धवान् । पुण्यवन्तौ लभेते लब्धवन्तौ । पुण्यवन्तः लभन्ते, लब्धवन्तः-पुंसि । पुण्यवती लभते लब्धवती । पुण्यवत्यौ लभेते लब्धवत्यौ । पुण्यवत्यो लभन्ते, लब्धवत्यः-स्त्रियाम् । एवं धातुभ्यो विहितानां लकाराणां स्थाने कृते तिङि प्रथमपुरुषे निष्पन्नानि क्रियापदानि क्तक्तवतुप्रत्ययान्तपदानि च कर्तृवचनानुसारं प्रयोक्तुमादौ भवान् निःशङ्को भवतु । कर्तृक्रियापदाभ्यां वाक्यं विधातुं सकर्मकाकर्मकयोर्धात्वोर्भेदो न भवति ।

४-१-४-४ च अपि तथा इति पदेष्वेकेन पदेन कर्तारौ कर्तृन्वा समुच्चीय क्रियायाः प्रयोगस्य व्यवस्था

क) यत्र वाक्ये तद्युष्मदोः प्रथममध्यमपुरुषयोरेकैकौ कर्तारौ मध्यमपुरुषकर्त्रा सहोत्तमपुरुषकर्तृन्विनाऽन्यशब्दकर्ता कर्तारौ कर्तारो वा प्रयुज्यन्ते तत्र उत्तरोत्तरपुरुषस्य बलवत्ता भवतीति नियमेन मध्यमपुरुषो बलवान्भवति । यतो वाक्ये प्रथममध्यमपुरुषयोः प्रयुक्तौ कर्तारौ कर्तृन्वा चकारेण समुच्चीय यद्वचनं भवति । तद्ववचनानुसारं नियमेन मध्यमपुरुषस्य क्रियापदं प्रयुज्यते । यथा- (क) स त्वं च भवथः । स युवां च भवथ । ते यूयं च भवथ । स यूयं च भवथ । तौ युवां च भवथ । तौ यूयं च भवथ । (ख) त्वं चैव सोमदत्तिश्च कर्णश्चैव हि तिष्ठत ।

ख) यत्र वाक्ये प्रथमोत्तमौ मध्यमोत्तमौ वा पुरुषौ कर्तारौ प्रथममध्यमोत्तमाः पुरुषाः कर्तारः, उत्तमपुरुषकर्तृभिः सहान्यप्रथमान्तकर्ता कर्तारौ कर्तारो वा प्रयुज्यन्ते तत्र उत्तरोरत्तरपुरुषस्य बलवत्ता भवतीति नियमेन उत्तमपुरुषो बलवान्भवति । तत्र वाक्ये प्रयुक्तौ कर्तारौ कर्तृन्वा चकारेण समुच्चीय यद्वचनं भवति । तद्वचनानुसारं नियमेनोत्तमपुरुषस्य क्रियापदं प्रयुज्यते । यथा - १) प्रथमोत्तमपुरुषयोः कर्तारौ - सोऽहं च गच्छावः । तौ अहं च पश्यामः । ते अहं च गच्छामः । स आवां च भवामः । ते आवां च खादामः । ते आवां च कुर्मः । स वयं च यामः । तौ वयं च पठामः । ते वयं च चिन्तयामः । २) मध्यमोत्तमपुरुषयोः कर्तारौ - त्वमहं च वदावः । युवामहं च लिखामः । यूयमहं च यामः । त्वमावां च पश्यामः । युवामावां च शृणुमः । यूयमावां च नृत्यामः । त्वं वयं च पिबामः । युवां वयं च तरामः । यूयं वयं च वसामः । तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे । ३) प्रथममध्यमोत्तमपुरुषाणां कर्तारः - स त्वमहं च गच्छामः । तौ युवामावां च जानीमहे । ते यूयं वयं च पश्यामः । ४) रमा स त्वमहं च व्रजामः । अहं च रामकृष्णौ च गच्छामो गोकुलं मुदा । प्रथमादिपुरुषाणां व्यत्ययेन प्रयोगेऽपि उत्तरोत्तरपुरुषस्यैव बलवत्ता निर्धार्यते । यथा-त्वं स च भवथः । अहं त्वं स च भवामः ।

ग) अपिनापि चकारवत्-माता पिता भ्राता भगिनी अपि संस्कृतं जानन्ति (अवगच्छन्ति) ।

घ) तथापदेनाऽपि चकारवत्-रामः लक्ष्मणस्तथा सीता वनं गच्छन्ति । रामस्तथा कृष्णो गच्छतः । माता तथा पुत्री यातः । देवी सिंहस्तथा काली सरोषैः परिवारिताः ।

४-१-४-५ युष्मदरस्मच्छब्दौ विना कर्तरौ कर्तारो वा -

यस्मिन्वाक्ये युष्मदस्मच्छब्दयोः कर्तृपदानि विनाऽन्यशब्दानां कर्तारौ कर्तारो वा प्रयुज्यन्ते तत्र तौ तान्वा कर्तृञ्च चकारेण समुच्चीय[1] यद्वचनं भवति । तद्ववचनानुसारं प्रथमपुरुषस्य क्रियापदं प्रयुज्यते । क्वचिद् कर्तारौ कर्तृन्वा चकारेणाऽसमुच्चीय क्रियापदस्य सन्निधौ स्थितस्य कर्तृपदस्य वचनानुसारं प्रथमपुरुषस्य क्रियापदं प्रयुज्यते । स्मरणीयं यत् कर्तारस्तु वाक्ये समानलिङ्गिनोऽसमानलिङ्गिनश्च समानवचनेऽसमानवचनेऽपि प्रयुज्यन्त इति न विस्मरणीयम् ।

क) यत्र वाक्ये एकैकवचनान्तौ द्वौ कर्तारौ प्रयुज्येते । तौ चकारेण समुच्चीय यावती संख्या भवति । तत्संख्यानुसारं क्रियापदं प्रयुज्यते - रामः कृष्णश्च गच्छत, राधा कृष्णश्च वंशीं वादयतः । तीर्थोदकं च वह्निं च नान्यतः शुद्धिमर्हतः । तथा नृपः सा च सुतेन मागधी ननन्दतुः । यथा काष्ठं च काष्ठं च समेयातां महोदधौ । एतादृशे वाक्ये विवक्षानुसारमेकवचनं क्रियापदमपि प्रयुज्यते । द्रष्टव्यमधः (ख) क्रमस्योदाहरणम् -

ख) क्वचिद्द्वौ कर्तारौ कर्तृन्वाऽसमुच्चीय क्रियापदमेकवचनं प्रयुज्यते- मस्करशब्दोऽव्युत्पन्नस्तस्य सुडिनिश्च निपात्यते । परिचर्यादीनां शो यक् च निपात्यते । प्रश्नः प्रच्छादनं च गम्यते । अधिकरणे ण्यत् अय् धात्वादेः कुत्वं च निपात्यते । वयोवाचकस्यैव हायनस्य ङीप् णत्वं च निपात्यते । अत्र क्यप्

[1] -यः परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः ।

कुत्वं च निपात्यते । तत्र समुच्चीयमानं प्रत्येकं पदं चकारेण सह सम्बध्यते । वाक्ये समुच्चितयोःपदयोःसमुच्चितानां पदानां चान्ते चकारः प्रयुज्यते ।

ग) क्वचिद् चकारं विनाऽपि क्रियापदमेकवचनं प्रयुज्यते - पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते । अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ।

घ) यत्र एकवचनान्ता बहवः कर्तारः प्रयुज्यन्ते । ताञ्चकारेण समुच्चीय यावती संख्या भवति तत्संख्यानुसारं क्रियापदं प्रयुज्यते । अर्थात् बह्व्यां कर्तृसंख्यायां क्रियापदं बहुवचनं प्रयुज्यते - राम सीता लक्ष्मणश्च गच्छन्ति । सीता रमा लक्ष्मीश्च पश्यन्ति । कुलं रूपं वयो विद्या धनञ्च मदयन्त्यमुम् । श्रुतिःप्रत्यक्षमैतिह्यमनुमानं च जाग्रति । विवक्षानुसारमेकवचनं क्रियापदमपि प्रयुज्यते उपरि (ख) उपशीर्षके दर्शनीयम् ।

ङ) १- यस्मिन्वाक्ये एकवचनकर्त्रा सह द्विवचनकर्ता बहुवचनकर्ता वा प्रयुज्येत - क्वचिद्द्वौ द्विवचनकर्तारौ सहैव प्रयुज्येते । तत्र तेषां चकारेण समुच्चीय यावती संख्या भवति । तत्संख्यानुसार क्रियापदं बहुवचनं प्रयुज्यते । क) स तौ च यान्ति । गौः महिषौ च चरन्ति । गुरुः शिष्यौ च गच्छन्ति पुत्रौ पिता चाऽऽयान्ति । बालिका बालकौ च लिखन्ति पठन्ति च । नरौ नारी च पश्यन्ति । छत्रमुपानहौ च क्रेष्यन्ते । ख) वस्त्रं रूप्यकाणि च दीयन्ते । पुस्तकानि लेखनी च प्राप्यन्ते । कुक्कुरो मार्जाराश्च न मिलन्ति । नरो नार्यश्च कुर्वन्ति । ता अयं च व्यसीदन् । कृष्णो गोपाश्च क्रीडन्ति । विष्णुः सुराश्च पूज्यन्ते । गावोऽजाश्च चरन्ति । राजा सैनिकाश्चाऽऽगच्छन् । लोटस्तामादयः सलोपश्च भवन्ति । स वालाश्च वदन्ति रूदन्ति च । ग) लेखन्यौ पुस्तके च सन्ति । पुत्र्यौ पुत्रौ च गच्छन्ति । गजौ अश्वश्च चरन्ति ।

ङ)-२- यत्र द्विवचनान्ता बहवः कर्तारः सन्ति तत्र प्रकृत्या बहुवचनक्रियापदम्- गजौ अश्वौ च चरन्ति । लेखन्यौ पुस्तेके चानयन्ते । गावौ अजौ मेषौ च चरन्ति । अश्वौ कुक्कुरौ मार्जारौ च सन्ति । मृगौ पक्षिणौ मत्स्यौ सिंहौ च लभ्यन्ते दृश्यन्ते वा । इत्यादि । (समान्ये नपुंसकम्)

ङ)-३- यत्र बहुवचनान्तौ द्वौ कर्तारौ बहुवचनान्ताः बहवः कर्तारो वा सहैव प्रयुज्यन्ते ताञ्चकारेण समुच्चीय प्रकृत्या बहुवचनं क्रियापदं प्रयुज्यते - गावो मृगाश्च धावन्ति । पुत्राः पुत्र्यश्च पठन्ति । नरा नार्यश्च क्रीडन्ति । कौरवाः पाण्डवाश्च कलहं कुर्वन्ति (विदधते) । वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राः समूर्तयः । सप्तदशपुराणानि षट्शास्त्राणि तथाऽऽययुः ।

ङ)४- क्वचिच्चकारेण कर्तृनसमुच्चीय क्रियायाः सन्निधौ यः कर्ता भवति तदनुसारं क्रियापद प्रयुज्यते - आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् । वृत्तम्=चरित्रम् ।

४-१-४-६-क) वा[1]

१- वाशब्देन संवद्ध एकवचनकर्ता द्विवचनकर्तारौ बहुवचनकर्तारो वा यस्मिन्वाक्ये प्रयुज्यन्ते तत्र वाशब्दात्पूर्वं सन्निधौ यद्वचनस्य कर्ता भवति । तस्य वचनानुसारं क्रियापदं प्रयुज्यते । क) राम श्यामो वा वसति । रमा गौरी वा करोति । राधा कृष्णो वा गायति । स त्वं वा गच्छ । त्वमहं वा गच्छामि । अहं स वा वदति । त्वं स वा पठति । रामः कृष्णो वा गच्छतु-तात् । स त्वमहं वा यामि तौ आवां वा पश्यावः । तौ युवां वा वसथः । ते बालिका त्वं वा पठसि । ते यूयं वाऽत्रैव वसथ सीता दुर्गा रमा वा यातु । शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतः । इयं गौः अश्वौ वा चरत स त्वं वा पश्यसि । अहं त्वं तौ वा गच्छतः । अहं त्वं ते वा गच्छन्ति । ख) अयं वा स आगच्छतु

---

[1] वाशब्दार्थो विकल्पोऽस्ति । विकल्पेन पूर्वपक्षो बोध्यते पूर्वपक्षाभावेऽन्यपक्षोऽपि ।

माता वा पिता वदति । एको देवः केशवो वा शिवो वा एका नारी सुन्दरी वा दरी वा । एकं मित्रं भूपतिर्वा यतिर्वा एको वासः पत्तने वा वने वा । सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् । मोहनो वा राधा वसति ।

२- तस्य इट् वा स्यात् । धातोरियङ् वा स्यात् । तिबादिनां पञ्चानां णलादयः पञ्च वा स्युः । एते जसि उक्तसंज्ञा वा स्युः । यरो द्वे वा स्तः ।

४-१-४-६-ख) अथवा

१-अथवा-अस्यार्थोऽपि विकल्प एवास्ति । अयं द्वयोःकर्त्रोर्मध्ये द्वयोर्विषय(पक्ष) योर्द्वयोर्वाक्ययोर्वा मध्ये प्रयुज्यते । अस्य शब्दस्य परे सन्निधौ यद्ववचनस्य कर्ता भवति । तदनुसारं क्रियापदं प्रयुज्यते - पुत्रः अथवा पुत्री गृहे वसति । रामः अथवा कृष्णः याति । यूयमथवा ते गच्छन्ति ।

४-१-४-७ प्रकृतिकर्तुर्विकृतिकर्तुश्च द्वयोर्मध्ये क्रियापदस्य व्यवस्था

क) यत्र वाक्ये प्रकृतिकर्ता विकृतिकर्ता चोभौ स्तः । तत्र प्रकृतिकर्त्रनुसारेण क्रियापदं प्रयुज्यते न तु विकृतिकर्त्रनुसारेण - महानयं वृक्षः पञ्च नौका भवति । किशोरः पुरुषः सुन्दरी स्त्री जातः । इमे तन्तवः कृष्णा शाटी भवन्ति । प्राणापानव्यानोदानसमाना भवत्यसौ प्राणः । प्रकृतिकथनेन मूलं विकृतिकथनेन विकारश्च स्मरणीयौ ।

ख) एकतरयोरुपादाने कृते तु विकृतिकर्त्रनुसारेण क्रियापदं प्रयुज्यते - एतानि काष्ठानि भस्म क्रियते । ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।

४-१-४-८ विशेषणप्रसङ्गः

तद्युष्मदस्मच्छब्देषु त्रिषु उत्तरोत्तरं विशेष्यं पूर्वं पूर्वं च विशेषणम् । विशेष्यानुसारं क्रियापदम् -

क) मध्यपुरुषकर्तुः प्रथमपुरुषकर्ता विशेषणम्-पुंसि - स त्वमसि । तौ युवां स्थः । ते यूयं स्थ । स्त्रियाम्-सा त्वमसि । ते युवां स्थः । ताः यूयं स्थ । नपुंसके-तत्त्वमसि । ते युवां स्थः । तानि यूयं स्थ ।

ख) उत्तमपुरुषकर्तुः प्रथमपुरुषकर्ता विशेषणम्-पुंसि - सोऽहमस्मि । तौ आवां स्वः । ते वयं स्मः । नपुंसके-तत्त्वमसि । ते आवां स्वः । तानि वयं स्मः ।

ग) उत्तमपुरुषकर्तुर्मध्यमपुरुषकर्ता विशेषणम्-त्वमहमस्मि । युवामावां स्वः । यूयं वयं रमः । त्वमेवाहम् । देहदृष्टया तु दासोऽहं जीवदृष्टया त्वदंशकः । वस्तुतस्तु त्वमेवाहमिति मे निश्चला मतिः ॥ त्वं तु भागवतेष्वहम् (श्रीमद्भागवतम्-११।१६।२९)॥ वैपरीत्येऽपि - अहमेव त्वम् ।

घ) तद्युष्मदादीनां सर्वशब्दो विशेषणम्-पुंसि-स सर्वः । ते सर्वे । त्वं सर्वः । यूयं सर्वे । अहं सर्वः ।वयं सर्वे । स्त्रियाम्-अहं सर्वा । वयं सर्वाः । नपुंसके-तत्सर्वम् । तानि सर्वाणि । त्वं सर्वम् । यूयं सर्वाणि । अहं सर्वम् । वयं सर्वाणि । तथैव भवच्छब्दस्यापि-भवान् सर्वः । भवन्तः सर्वे । एषां क्रमःप्रायेणऽयमेव ।

४-१-४-८-१ समुच्चयेन द्विवचनान्तं पुंवाचकविशेषणम्

यस्मिन्वाक्ये प्रयुक्तौ पुंलिङ्गिनौ स्त्रीलिङ्गिनौ वा द्वौ कर्तारौ चकारेण समुच्चीय यावती संख्या भवति । तत्संख्यानुसारं पुंवाचकविशेष्यस्य पुंवाचकविशेषणं स्त्रीवाचकविशेष्यस्य स्त्रीवाचकविशेषणं च प्रयुज्यते । क्रियापदं विशेषणस्य वचनानुसारं प्रयुज्यते - क) पुंलिङ्गिनौ कर्तारौ - सन्न्यासःकर्मयोगश्च निःश्रेयसकरावुभौ । द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च । धर्मबुद्धिः पापबुद्धिश्च द्वौवेतौ विदितौ मम । अङ्गदःश्रुतसेनश्च पुत्रौ स्तो लक्ष्मणस्य हि । सोऽहं च निपुणौ स्वः । हरिनाथः केशवश्च विद्वांसौ ।

धवश्च खदिरश्च छेद्यौ । शकुनिः शकटारश्च दृष्टान्तावेव भूपते । पूजनीयौ महात्मानौ रामः कृष्णश्च सर्वदा । मूषको वायसश्चैव गतौ कृत्रिममित्रताम् ।

ख) स्त्रीलिङ्गिनौ कर्तारौ - जया विजयाऽपि पार्वत्याः सख्यौ स्तः सा दूती गोपी च ग्रामाद्बहिर्निःसारिते स्तः ।

विशेषः - एवं नपुंसकलिङ्गिनौ कर्तारौ स्तश्चेत्तयोः समुच्चये नपुंसकं द्विवचनान्तं विशेषण प्रयुज्यते । तथैव पुंलिङ्गिनो पुंलिङ्गि बहुवचनान्तविशेषणं स्त्रीलिङ्गिनःस्त्रीलिङ्गि बहुवचनान्तं च विशेषण प्रयुज्यते इतिबोध्यम् ।

४-१-४-८-२. समुच्चयेन बहुवचनान्तं पुंवाचकविशेषणम्

क) एकस्मिन्वाक्ये प्रयुक्तान् एकलिङ्गिन एकैकवचनान्तान् कर्तृन् वा समविषमवचनान्तान् कर्तृन्वा चकारेण समुच्चीय यावती संख्या भवति । तत्संख्यानुसारं पुंवाचकं विशेषणं बहुवचन तदनुसारं क्रियापदमपि प्रयुज्यते - दशरथो भीष्मो हरिश्चन्द्रश्च दृढप्रतिज्ञा आसन् । ईर्षी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः । परभाग्योपजीवी च षडेते दुःखभागिनः ॥ भृगुर्वशिष्ठः क्रतुरङ्गिराः मनुः पुलस्त्यः पुलहश्च गौतमः । रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुःशशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ विप्रो राजन्यवैश्यौ च हरेः प्राप्ताः पदान्तिकम् । तेऽहं च कुशलाः । त्वमहं स च ज्ञाताः कुशला वा । तङ्प्रत्याहरः शानच्कानचौ चात्मनेपदसंज्ञाःस्युः । इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफाः पुत्र्यौ वधूश्च मनोहारिण्यः सन्ति । ते यूयं च दक्षाः । ते वयं च कर्मठाः । यूयं वयं च कर्मशीलाः युवामावां च निपुणाः । ते यूयं वयं च कर्मठाः । इतिहासधनुर्वेदौ गान्धर्वायुर्वेदावपि चोपवेदाः कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः । तौ युवां च चतुराः । तौ वयं च दूरदर्शिनः स्मः रामः सीता लक्ष्मणश्च सर्वे जग्मुर्नृपालयम् ।

ख) क्वचिद्वाक्ये-पुंनपुंसकलिङ्गिनां कर्तृन् चकारेण समुच्चीय यावती संख्या भवति । तदनुसारं पुंवाचकं विशेषणं बहुवचनं तदनुसारं क्रियापदमपि बहुवचनमपि प्रयुज्यते - सनत्कुमारः सनक सनन्दनः सनातनाऽप्यासुरिपिङ्गिलौ च । सप्त स्वराह्यः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्विपवनानि सप्त । भूरादि कृत्वा भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥

ग) क्वचिद्वाक्ये त्रिलिङ्गिनः कर्तृन् चकारेण समुच्चीय यावती संख्या भवति । तदनुसारं पुंवाचकं विशेषणं बहुवचनं तदनुसारं क्रियापदमपि प्रयुज्यते - पृथिवी सगन्धा सरसास्तथाऽऽपः स्पर्शी च वायुर्ज्वलितं च तेजः । नभः सशब्दं सहसा सदैव कुर्वन्तु सर्वे ॥ सत्यं शौर्यं दया त्यागो नृपस्यैते महागुणाः । वनानि नद्यो गिरयो वर्षणि द्वीपसिन्धवः । सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ॥ वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम् । गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः ॥ षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता । निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता । अश्वः शस्त्रं वीणा वाणी नरश्च नारी च । पुरुषविशेषं प्राप्य भवन्ति योग्या अयोग्याश्च ॥ (लिङ्गेषु नपुंसकं प्रधानं मत्वा "कुर्वन्तु सर्वे मम सुप्रातमित्यन्स्मिन्पदे कुर्वन्तु सर्वाणि च सुप्रभातमित्यपि प्रयोगो भवितुं शक्नोति । परं तथा क्व नास्ति") ।

घ) क्वचिद् कर्तारौ चकारेण समुच्चीय कर्त्रनुरूपं क्रियापदं प्रयुज्यते न तु विशेषणानुरूपम् ततोऽम्बिका परं रूपं बिभ्राणां सुमनोहरम् । ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ।

ङ) यत्र पुंस्त्रीलिङ्गिनौ द्वौ कर्तारौ स्तः । एतयोर्मध्ये पुंवाचकविशेष्यस्य प्रधानम् तयोःसमुच्चये विशेषणं च द्विवचनं भवति । कर्तारो वहवःसन्ति चेद् तेषां समुच्चये विशेषणं बहुवचनं च प्रयुज्यते । १) रामः सीता च प्रजानां पितरौ बभूवतुः । शिवः पार्वती च लोकानां पितरौ स्तः । २) वृद्धौ च मातापितौ साध्वी भार्या सुतः शिशुः । अपि कार्यशतं त्यक्त्वा भर्तव्या मनुरब्रवीत् ॥

४-१-४-८-३. समुच्चयेन द्विवचनान्तं बहुवचनान्तं च नपुंसकवाचकविशेषणम्

क) यस्मिन्वाक्ये नपुंसकलिङ्गिनौ कर्तारौ नपुंसकलिङ्गिनः कर्तृन् वा चकारेण समुच्चीय यावती संख्या भवति । तयोर्मध्ये द्वौ कर्तारौ स्तश्चेद्विशेषणं द्विवचनं वहवः कर्तारः सन्ति चेद् विशेषणं बहुवचनं च प्रयुज्यते । १) हृदयं मुखं च मलिने स्तः । सममेव समाक्रान्ते राज्यं च हृदयं रिपोः । २) सुवर्णं रजतं ताम्रकं च व्यवहारे उपयोगीनि सन्ति ।

ख) क्वचिद् त्रिलिङ्गिनः कर्तारः सहैव सन्ति चेन्नपुंसकलिङ्गस्य प्राधान्यं तान्समुच्चीय यावती संख्या च भवति । तदनुसारं विशेषणं नपुंसकलिङ्गि बहुवचनं च भवति । असेवके चानुरक्तिर्दानं च प्रियभाषणम् । अनुरक्तस्य चिह्नानि दोषोऽपि गुणसंग्रहः ॥

ग) यत्र पुंनपुंसकलिङ्गिनौ एकैकवचनान्तौ कर्तारौ समविषमवचनान्ताः कर्तारो वा सन्ति । तत्र तयोस्तेषां वा समुच्चयेन यावती संख्या भवति । तदनुसारं विशेषणं क्रमशो द्विवचनं बहुवचनं च प्रयुज्यते । १) धर्मः सुखं च इमे पोष्यपोषकभावेन स्तः । २) परिमार्गणीयानि पितरौ गृहं च । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् । धर्मः कामश्च दर्पश्च हर्षः क्रोधः सुखं वयः । अर्थादेतानि सर्वाणि प्रवर्तन्ते न संशयः ॥ १- अत्र प्रयुक्तः "इमे" शब्दो नपुंसकस्य द्विवचनं ज्ञेयम् ।

घ) यत्र स्त्रीनपुंसकलिङ्गिनौ कर्तारौ कर्तारो वा सन्ति । तयोस्तेषां वा समुच्चयेन यावती संख्या भवति । तदनुसारं नपुंसकविशेषणं क्रमशो द्विवचनं बहुवचनं च प्रयुज्यते । १) वनं वाटिका च इमे अतिशोभने स्तः । तपो विद्या च विप्राणां निःश्रेयसकरे उभे । त एव दुर्विनीतस्य कल्पेथे कर्तुमन्यथा ॥ २) आयुः कर्म च वित्तं च विद्या निधनमेव च । पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ आदित्यस्योदयं तात ताम्बूलं भारती कथा । इष्टा भार्या सुमित्रं च अपूर्वाणि दिने दिने ॥ क्वचिदेकवचनविशेषणमपि प्रयुज्यते - तपो विद्या च विप्रस्य निःश्रेयसकरं परम् । इत्यादि ।

ङ) क्वचिद् पुंनपुंसकयोर्मध्येऽपि पुंसःप्राधान्यं लभ्यते - एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् । क्वचिद् द्वितीयायामपि विभक्तौ विशेषणं द्विवचनं प्रयुज्यते - प्रकृतिं पुरुषं चैव विद्धचनादी उभावपि ।

च) क्वचित्पुंस्त्रीलिङ्गिनां कर्तृणां समुच्चये बहुवचनान्तं नपुंसकं विशेषणं प्रयुज्यते - अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च । वश्यश्च पुत्रोऽथर्करी च विद्या षट् जीवलोकस्य सुखानि राजन् ॥ अनुचितकार्यारम्भः स्वजनविरोधो बलीयसी स्पर्धा । प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि ॥

छ) समविषमलिङ्गिनां कर्तृणां समुच्चये स्त्रीलिङ्गि बहुवचनान्तं विधेयविशेषणम् - दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य । पल्लवग्राहि पाण्डित्यं क्रयक्रीतं च मैथुनम् । भोजनं च पराधीनं तिस्रः पुंसां विडम्बनाः ॥

ज) स्त्रीनपुंसकलिङ्गिनां कर्तृणां समुच्चये पुंलिङ्गि विधेयविशेषणं बहुवचनं प्रयुज्यते - अनृतं साहसं माया मूर्खत्वमतिलुब्धता । अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥

झ) क्वचित्कर्तृषु अन्तिमे स्थितस्य विशेष्यस्य वचनानुरूपं विशेषणं तदनुसारं च क्रियापदं प्रयुज्यते - उद्वेगः कलहः कण्डूः सेव्यमाना च वर्तते ।

ञ) यत्र वाक्ये नियतलिङ्गी कर्ता एकवचनमस्ति । तत्र कर्तुर्विधेयविशेषणं नियतलि बहुवचनमस्ति चेद्बहुवचनमेव प्रयुज्यते नियतलिङ्गि एकवचनमस्ति चेदेकवचनमेव च । त कर्तुर्वचनानुसारं क्रियापदं प्रयुज्यते न तु विधेयविशेषणानुसारम् । यथा - उर्वशी अप्सरसोऽस्ति मेनका नाम अप्सरसो विद्यते । मैथिली रामस्य दाराः अस्ति । रुक्मिणी कृष्णस्य दाराःज्ञेया । वसिष्ठस्य अरुन्धती कलत्रं विद्यते । राधिका कृष्णस्य दाराः बोध्या । लक्ष्मीर्विष्णोः कलत्रमस्ति । रामस्य सीता कलत्रं प्रोच्यते शिवस्य पार्वती च । रम्भा नामाप्सरसः । इत्यादि ।

४-१-५ प्रयोक्तुर्विवक्षानुसारं कर्तुर्वचनस्य प्रयोगः

अस्मदो द्वयोश्च १।२।५९॥

(कर्त्रा) अस्मद एकत्वे द्वित्वे वा विवक्षिते बहुवचनं स्यात् । यदि कर्ताऽऽत्मानं बहुवच विवक्षति । तदा स आत्मानं बहुवचनं प्रयुङ्क्ते । वैकल्पिकपक्षे स आत्मानं द्विवचनमथव एकवचनमपि प्रयुङ्क्ते । यथा बहुत्वविवक्षायाम् - वयं ब्रूमः, वदामः, भवामः, पठामो वा । व गच्छामः, कुर्मः, कुर्महे, अधीमहे वा । वयं वन्दामहे कामयामहे वेत्यादि । एकत्वविवक्षायाम् - अ भवामि अस्मि गच्छामि अपठम् प्रब्रवीमि करोमि वा । अहमधीये वन्दे कामये वेत्यादि द्वित्वविवक्षायाम् - आवां भवावः, गच्छावः, स्वः, पठावः, ब्रूव वेत्यादि । **सविशेषणस्य प्रतिषेधः**=वा.=विशेषणेन युक्तोऽस्मच्छब्दः कर्ता एकवचनं स्यान्न तु द्विवचनं बहुवचनं च । पटुर ब्रवीमि । निपुणोऽहं करोमि । अहं क्रतुररहं यज्ञःस्वधाहमहमौषधम् । मन्त्राहमेवाज्यमहमग्निर हुतमित्यादयो निश्चये । अनिश्चये तु बहुवचनं प्रयुज्यते - कति भवतः पुत्राः, कति भवतो भार्या इति भाष्योक्तेः ।

युष्मदि गुरावेकवचनम्=वा.=गुरौ वक्तव्ये युष्मदि एकवचनेऽपि बहुवचनं वा स्यात् । यूयं गुरवः, त्वं मे गुरुः । गुरुशब्देनादरणीयः पूज्यः (पूजनीयः) मान्यः (माननीयः) चार्थो गृह्यते । य पूजनीयार्थे प्रयुक्तोऽस्मच्छब्दः - त्वमेकः शुद्धोऽसि । त्वमाद्यःपुरुषः प्रोक्तः । त्वमेव माता च पित त्वमेव । त्वं रामो मम गतिरसि । त्वं देवी । त्वं माया । त्वं विद्या । त्वं स्वाहा स्वधा च त्वमीश्वरीत्यादि । एकवचनं न युञ्जीत गुरावात्मनि चेश्वरे इत्यपि वचनं विद्यते । युष्मच्छब्दो भगवति पूज्य-जेष्ठ-कनिष्ट-पुत्र-पौत्रसेवकादिष्वपि प्रयुज्यते ।

लोकव्यवहारे गुरोरर्थे अत्र भवान्, तत्र भवान्, तातपादः, गुरुचरणः, पितृचरणः, श्रीमान् भगवत्पादः, उपकुलपतिः, सभाया अध्यक्षः, आचार्यः,गुरुरित्यादयो गृह्यन्ते । यथा - अत्र भवन्तः, त भवन्तः, तातपादाः, गुरुचरणाः, श्रीमन्तः, भगवत्पादाः, उपकुलपतयः, सभाया अध्यक्षाः, आचार्या गुरवो वा सभाया अग्रे सन्ति । आदरे बहुवचनम् । सम्बोधने - आचार्याः, उपकुलयतय इत्यादि कृत्यान्ताः पूज्यः, पूजनीयः, मान्यः, माननीयः, संमाननीयः, आदरणीयः, वन्दनीयः, वन्द्य इत्यादिक्रि उद्देश्यविधेययोर्विशेषणे प्रयुज्यन्ते । यथा आरणीया गुरवः । गुरवः सदा मान्या इत्यादि । अत्यादरा भगवच्छब्द एव प्रयुज्यते - भगवान् कृष्णः । भगवान् रामः । भगवान् शिवः । भगवान् विष्णुः सूर्यो वा भगवान् व्यासः शुको वा । भगवान् वसिष्ठः । भगवान् गणेशः । पौरोहिताय भगवान् वृतः काव किलाऽसुरैः । भगवती लक्ष्मीः । भगवती पार्वती (दुर्गा गौरी) । भगवती सरस्वती काली वा । भगवत अरुन्धती । भगवती अनुसूया । भगवत् ब्रह्म । भगवान् आद्यशङ्कराचार्यः । इत्यादि ।

४-१-६ नामनिर्देशकास्तदादिशब्दाः

क) इदम् एतद् अदस् तद् एते सर्वनामशब्दा निश्चयार्थवाचका नाम्नो निर्देशकाश्च शब्द सन्ति । एतेषु समीपवर्तिनो नाम्नो निर्देशने इदंशब्दः अधिकसमीपवर्तिनो नाम्नो निर्देशने एतच्छब्द दूरवर्तिनो नाम्नो निर्देशने तच्छशब्दश्च प्रयुज्यते । शब्दा विशेषणान्यपि ज्ञेयानि ।

इदमस्तु सन्निकृष्टं समीपवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं(दूरम्) तदिति परोक्षे विजानीयात् ॥

१- समीपे इदं गृहं तव मम वास्ति, २- अतिसामीप्ये - एष बालः कृष्णस्यास्ति, ३- अतिदूरे- असौ श्यामः सुन्दरः । असौ श्यामा सुन्दरी । समाधिर्नाम वैश्योऽसौ, ४- परोक्षे-स मे मुकुन्दो भगवान् प्रसीदताम् ।

ख) इदमादीनां चतुर्णां प्रथमाविभक्ते रूपाणि सकर्मकाकर्मकधातूनां कर्तृवाच्यस्य सकर्मकधातोः कर्मवाच्यस्य च प्रथमपुरुषस्य तिङन्तक्रियापदेषु भूतकर्तरि क्तक्तवतुप्रत्यययाभ्यां निष्पन्नेषु अतिङन्तक्रियापदेषु च वचनक्रमेण प्रयुक्तान्युदाहरणानि -

	पुंसि			स्त्रियाम्			क्लीबे			
तद्	सः	तौ	ते	सा	ते	ताः	तत्	ते	तानि	एते समानार्थकाः
एतद्	एषः	एतौ	एते	एषा	एते	एताः	एतत्-द्	एते	एतानि	
अदस्	असौ	अमू	अमी	असौ	अमू	अमूः	अदः	अमू	अमूनि	
इदम्	अयम्	इमौ	इमे	इयम्	इमे	इमाः	इदम्	इमे	इमानि	
	वा	वा	वा	वा	वा	वा	वा	वा	वा	
अस्-अस्ति स्तः सन्ति				अस्ति स्तः सन्ति			अस्ति स्तः सन्ति			
भूतवान्-वन्तौ-वन्तः				भूतवती-वत्यौ-वत्यः			भूतवत्-वती-वन्ति			
भूतः भूतौ भूताः				भूता भूते भूताः			भूतम् भूते भूतानि			
गम्(गच्छ)-गच्छति-तः-न्ति				गच्छति-तः-न्ति			गच्छति-तः-न्ति			
गतवान्-वन्तौ-वन्तः				गतवती-त्यौ-त्यः			गतवत्-वती-वन्ति			
गतः गतौ गताः				गता गते गताः			गतम् गते गतानि			
नम्-नमति-तः-न्ति				नमति-तः-न्ति			नमति-तः-न्ति			
नतवान्-वन्तौ-वन्तः				नतवती-वत्यौ-वत्यः			नतवत्-वती-वन्ति			
नतः-तौ-ताः				नता नते नताः			नतम् नते नतानि			

कर्तृवाच्ये			कर्मवाच्ये		
सः	तौ	ते	तेन	ताभ्याम्	तैः
एषः	एते	एताः	एतेन	एताभ्याम्	एतैः
असौ	अमू	अमी	अमुना	अमूभ्याम्	अमीभिः
अयम्	इमौ	इमे	अनेन	आभ्याम्	एभिः
वा	वा	वा	वा	वा	वा
नरः	नरौ	नराः	नरेण	नराभ्याम्	नरैः
त्वाम्	भवन्तौ	माम्	त्वम्	भवन्तौ	अहम्
पूजयति	तः	यन्ति	पूज्यसे	पूज्येते	पूज्ये

वाच्यपरिवर्तननियमः

१. कर्तृवाच्ये स्थितः कर्ता कर्मवाच्ये तृतीया विधीयते ।
२. कर्तृवाच्ये स्थितं कर्म कर्मवाच्ये प्रथमा विधीयते ।

युष्मदस्मच्छब्दौ विनाऽन्येऽवशिष्टाः प्रथमान्तशब्दाः प्रथमपुरुषकर्तृत्वात्सर्वेषां धातूनां कर्तृवाच्यस्य प्रथमपुरुषस्य तिङ्क्रियापदेषु वचनक्रमेण प्रयुज्यन्ते - अयं तत्र गच्छति । अतः पारं

यायात्तव गुणगणानां कथमयम् । अयं कथं त्वां परिचिनोति । अयं गुणान्कथं जानाति । अत्रायं शब्दः आत्मनो निर्देशनार्थमपि प्रयुक्तो दर्शितः । स्वस्माद्भिन्ननिर्देशनार्थमपि शब्दोऽयं प्रयुज्यते । यथा अयं रामो वदति । अयं भक्तस्तव गुणान्कथं जानाति । अयं जनः कथं त्वां परिचिनोति । जनशब्दोऽयमभिप्रयानुसारं स्वमन्यञ्च निर्देष्टुं प्रयुज्यते इत्यादि । तथैवान्ये सर्वादिशब्दाः - एषः कृष्णः, असौ बालः, सः हरिर्वा याति । इत्यादि । सामान्ये सर्वनामशब्दः पूर्वगतस्य नाम्नो निर्देशनार्थं प्रयुज्यते । विशेषस्थले तु नाम सर्वनाम च शब्दावुभौ सहैव प्रयुज्येते ।

४-१-७ भवत्

१-क) अयं शब्द आदरार्थे युष्मच्छब्दस्य स्थाने च प्रयुज्यते । स शब्दो यथावसरं प्रथममध्यमपुरुषयोः क्रिययोः प्रयुज्यते । प्रथममयं शब्दः प्रथमपुरुषस्य क्रियापदेषु वचनक्रमेण प्रयुज्यते ।

ए.व. -	भवान्	भवती	वा	भवति	पठति	शिक्षते	श्रावयति	वा
द्वि.व. -	भवन्तौ	भवत्यौ	वा	भवतः	पठतः	शिक्षेते	श्रावयतो	वा
ब.व. -	भवन्तः	भवत्यः	वा	भवन्ति	पठन्ति	शिक्षन्ते	श्रावयन्ति	वा

इहासीत भवान् भवती वा । इह भुञ्जीत भवान् भवती वा । परं ब्रह्म परं धाम पवित्रं परमं भवान् । भो ! भवान् अभ्यागतोऽतिथिः । तद् मया दत्तानि एतानि जम्बूफलानि भक्षयतु । भवान् पुण्यवान्वर्तते । भवन्तौ पुण्यवन्तौ वर्तेते । भवन्तो पुण्यवन्तो वर्तन्ते । इत्यादि । भवच्छब्दोऽयं भगवति पूज्य-जेष्ठ-कनिष्ठ-पुत्र-पौत्रादि-निर्देशनेऽपि प्रयुज्यते । शब्दोऽयं भागवते मध्यमपुरुषेऽपि प्रयुक्तो लभ्यते - विदितोऽसि भवान् (त्वम्) साक्षात्पुरुषःप्रकृतेः परः । ततो भवान्दर्शय तद्विचेष्टितम् ।

१-ख) अतिसम्मान्ये जने द्योत्ये "अत्र, तत्र" च शब्दपूर्वको भवच्छब्दः प्रयुज्यते । यत्र संमान्यः पुरुषः प्रत्यक्षे वर्तते तत्र "अत्र भवान्" इति यत्र संमान्यः पुरुषोऽप्रत्यक्षेऽस्ति, तत्र भवान् इति शब्दौ प्रयुज्येते ।

१- सम्मान्ये जने प्रत्यक्षे सति - अत्र भवन्तो गुरव आसनमलङ्कुर्वन्तु । अत्र भवान् वसिष्ठो मामाज्ञापयति । अत्र भवान् आसने विराजमानोऽस्ति ।

२- सम्मान्ये जनेऽप्रत्यक्षे सति - अस्ति तत्र भवन्तो भवभूतिः काश्यपः । तत्र भवान् कण्वः मां किं स्मरति । कथं नाम तत्र भवान् धर्ममत्यक्षत् अत्याक्षीद्वा । तत्र भवान् गर्गाय मां पृच्छति इत्यादि ।

१-ग) स एष वा पूर्वको भवच्छब्दोऽनेन प्रकारेण प्रयुज्यते - स वै भवान् वेद समस्तगुह्यम् । स भवान् मामेतदुक्तवान् । एष भवान् अत्र वर्तते । तौ एतौ वा भवन्तौ तं वित्तः । ते एते वा भवन्तस्तत्र गच्छन्ति - पुंसि । सा भवती तं जानाति । एषा भवती त्वां पूजयति । ते एते वा भवत्यौ शिवं नमतः । ता एता वा भवत्यः कृष्णं स्मरन्ति । स्त्रियाम् । इत्यादि ।

४-१-८ महत्

शब्दोऽयं असमासपूर्वकः समासपूर्वकश्च पूज्यार्थे प्रयुज्यते । यथा-असमासे - भवान् महान् पण्डितः । भवान् महान् ज्ञानी तत्त्ववेत्ता च । भवती महती विदुषी । भवती महती ज्ञानिनी तत्त्ववेत्री च । समासे तु - महादेवः । महापुराणम् । महाकाली । महालक्ष्मीः । महासरस्वती । महाकाशः । महाकाव्यम् । महाकुलम् । महाद्वीपः । महादेशः । महासागरः । महाशक्तिः । महापण्डितः । महामहोपाध्यायः । महामनाः । महाधनः । महाजनः । महादेवी । एवं-प्रकारेणानन्ता शब्दा जायन्ते । विशाले (विस्तीर्णे)ऽर्थे तु - महान् वृक्षः । महत् फलम् इत्यादि । परं शङ्खादिशब्दात्पूर्वं तु शब्दोऽयं न प्रयुज्यते -

शङ्खे तैले तथा मांसे वैद्ये ज्योतिषके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥

अस्य श्लोकस्याशयः - शवयात्रायां यः शङ्खो वाद्यते स महाशङ्खः, मेदसोऽग्नौ सन्तप्तेन द्रवीभूतो यःपदार्थस्तन्महातैलम्, मृतस्य मनुष्यस्य शरीरस्य यन्मांसं भवति तन्महामांसम् चिकित्साशास्त्रमधीत्य यो रोगपरीक्षणादिकं कर्तुमौषधं च प्रयोक्तुं न जानाति स महावैद्यः, ज्यौतिषशास्त्रमधीत्य फलादेशादिकं कर्तुं न जानाति स महाज्यौतिषः, य एकादशाहे मृतकश्राद्धे भुङ्क्ते । तद्दिने प्रदत्तशय्यादानादिकं गृह्णाति स महाब्राह्मणः[1] (पात्रब्राह्मणः), यः परलोकमार्गे याते सति न प्रत्यावर्तते सा महायात्रा, यो यस्मिन्पथि गच्छन् न प्रत्यावर्तते स महापन्थाः, यो गृहं पत्नीधनादिकं च परित्यज्य मरणाय यस्मिन्पथि गच्छति स महाप्रस्थानं प्रोच्यते । यः सुप्त्वा पुनर्न जागर्ति सा महानिद्रा च निगद्यते । यो विविधानि शास्त्राण्यधीत्य प्रयोक्तुं न जानाति सोऽपि महावैद्यो निगद्यते । यतो महावैद्यस्य महाज्योतिषस्य च शब्दस्यार्थो व्यवहारे मूर्ख इत्यपि प्रोच्यते । इत्थं महच्छब्दपूर्वकैः शङ्खादिशब्दैः सुन्दरोऽर्थो ध्वनितो न भवति । यतः शङ्खादिशब्देभ्यः पूर्वं महच्छब्दो न प्रयुज्यते । समासे शङ्खादिभिर्भिन्नेभ्यः शब्देभ्यः पूर्वन्तु महच्छब्दः प्रयुज्यत एव ।

४-१-९ अभिवादनादिषु उत्तमपुरुषक्रियापदप्रयोग

अभिवादने प्रतिज्ञासङ्कल्पे स्वपरिचयप्रदाने सामर्थ्यप्रदर्शने अभिमानप्रदर्शने चेत्याद्यर्थेषु नामपदसहितमुत्तमपुरुषक्रियापदं प्रयुज्यते । यथा - अभिवादने - भो गुरो ! अहं यज्ञप्रसादशर्माऽभिवादये (वन्दे, अभिवन्दे नमामि प्रणमामि वा) । सङ्कल्पे - हरि ॐ तत्सत् ३ ॐ विष्णुः ३........... वत्स्यगोत्रोत्पन्नो माध्यन्दिनशाखान्तर्गतशुक्लयजुर्वेदाध्यायी शिवशर्माऽहमिष्टसिद्धये (प्राप्तये) दीपकलशगणेशपूजनपूर्वकं रुद्रपूजनं रुद्राभिषेकं च कर्म करिष्ये । स्वपरिचयप्रदाने - भवान् कः ? अहं श्रीकृष्णशर्माऽस्मि । भवती का ? अहं लक्ष्मीरस्मि । भवान् कः ? अहं रामोऽस्मि । भवती का ? अहं सीता अस्मि । सामर्थ्यप्रदर्शने - अहमीश्वरोऽस्मि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी । आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ॥ अभिमानप्रदर्शने - अहं कविरस्मि । अहं धनी अस्मि । अहं सर्वज्ञोऽस्मि । अहं शब्दस्य ज्ञातास्मि । स्वजात्यादिपरिचयप्रदाने तु - अहं ब्राह्मणः । अहं क्षत्रियः । अहं वैश्यः । अहं शूद्रः । अहं नैपालीयः । अहं भारतीयः । अहमाङ्गलः । अहममेरीकनः । अहं रसीयनः । जम्बुकोऽहम् । भूषकोऽहम् । इत्यादि ।

४-१-१० सम्बोधनम्

सम्बोधने च ३।२।१२५॥

सम्बोधनेपि प्रथमा विभक्तिः स्यात् । जनमभिमुखीकृत्याऽऽह्वानं सम्बोधनम् । सम्बोधनविवक्षायां सर्वेभ्योऽजन्तहलन्तशब्देभ्योऽनेन सूत्रेण प्रथमा भवति त्यदादिशब्दं विना[2] । हे है अयि अये रे धिक् इति सम्बोधनपदं गद्यपद्ययोर्वाक्ययो प्राय आदौ प्रयुज्यते । हे आदिना सहितं रहितं वा सम्बोधनं छन्दसि(श्लोके)वाक्यस्यादौ मध्येऽन्ते यत्र कुत्रापि थले च प्रयुज्यते । अर्थकाले तत्पदं प्रायेण वाक्यस्यादौ पठ्यते । तत्पदं गद्ये (अच्छन्दसि) प्रायो वाक्यस्यादौ प्रयुज्यतेऽर्थकालेऽपि तथैव पठ्यते । क) वाक्यस्यादौ सम्बोधनम्- अग्ने ! व्रतवते व्रतं चरिष्यामि । हे प्राण ! तुभ्यमिमाः प्रजा बलिमाहरन्ति । हे राम ! मामुद्धर । हे कृष्ण ! मां पालय । हे शिव ! अहं त्वां शरणं प्राप्तोऽस्मि । भो देवाः ! यूयमस्मान्पालयत । हे भगवन् ! मां पाहि । भगवति ! त्वं विश्वं रक्षसि । पार्थ ! नैवेह नामुत्र ।

---

१. अयं ब्राह्मणो धार्मिककृत्येषु अपवित्रो मन्यते । २. यः पञ्चत्वं प्राप्तः पुनर्न जागर्ति । सोऽपि महानिद्रां गतः प्रोच्यते ।
२. त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः ।

वाक्यमध्ये सम्बोधनम्- कामरूपेण कौन्तेय । वाक्यान्ते सम्बोधनम्- रथं स्थापय मेऽच्युत । मां पाहि सर्वेश्वरि । इत्यादि । ख) क्वचित्सम्बोधनस्यान्ते है हे शब्दौ प्रयुज्येते- है हे शब्दौ विनापि स्यात्क्वचिदन्ते तयोः स्थितिः[1] । यथा राम प्रसीद त्वं राम हे त्वां भजाम्यहम् ॥ ग) क्वचित्त्वरायां रे हे शब्दयोः सम्बोधने द्विर्वचनम् - रे रे रावण दीयतां जनकजा । हे हे यशोदे तव बालकोऽसौ । घ) रे धिक्शब्दौ सम्बोधने कुत्सयां क्रोधे च वाक्यस्यादावुच्चार्येते रे मूर्ख, धिङ्मूर्ख यदि त्वं नाधीषे ।

४-१-११ स्त्रीपुरुषबोधका द्विवचनान्तशब्दाः

दम्पती जम्पती जायापती चैते त्रयः शब्दाः प्रायेण द्विवचनान्ता एव प्रयुज्यन्ते क्रियापदमपि द्विवचनान्तम् - वायसदम्पती ततः परं सुखेन वसतः । ब्राह्मणदम्पती, द्विजदम्पती, जायापती, क्षत्रियजम्पती, वैश्यदम्पतीत्यादि ।

४-१-१२ वाक्ये कर्तृक्रियापदयोरध्याहारस्य नियमः

यत्र कर्तारमप्रयुज्य वाक्यं निष्पद्यते तत्र क्रियापदानुसारं कर्ता, यत्र क्रियापदमप्रयुज्य वाक्यं निष्पद्यते तत्र कर्तृपदानुसारेण च साङ्गतिकं क्रियापदं चाध्याहर्तव्यम् । क्रियापदेन कर्तृवाच्यस्य तिङन्तं भूतकर्तरि निष्पन्नं क्तक्तवतुप्रत्ययान्तमतिङन्तं चोभयं क्रियापदं स्मरणीयम् ।

क) क्रियापदानुसारं कर्तुरध्याहारः - निरस्तकुहकं सत्यं परं धीमहि । देवान्भावयतानेन । नान्यं जाने नैव जाने न जाने ।

ख) कर्तृपदानुसारेण क्रियापदस्य चिन्तनम् - सर्वे प्रथमान्ताःशब्दाः कर्तारो भवन्ति । तेषु कर्तृषु तद्युष्मदस्मच्छब्दानां रूपाणि प्रायेण वाक्यादौ प्रयुज्यन्ते । यथा - स तौ ते[2], त्वं युवाम् यूयम्[3], अहम् आवाम् वयम्[4] चेति । एभ्यः प्रथमान्तेभ्यः परे नाम-जाति-समुदाय-परिमाण-भाव-विशेषणवाचकाश्च शब्दाःप्रयुज्यन्ते । तेषां नामादिभ्यः परप्रयोगेण नाशुद्धिर्भवति । युष्मदस्मच्छब्दौ [5] विना तच्छब्दसहितानामन्येषां सर्वादिशब्दानां रूपाणि त्रिषु लिङ्गेषु भवन्ति । यतो नाम-जाति-समुदाय-परिमाण-भाव-विशेषणवाचकशब्दानां रूपाणां लिङ्गविभक्तिवचन-मनुसृत्यादौ सर्वादिशब्दाः प्रयुज्यन्ते विशेषणत्वात् । युष्मदस्मच्छब्दौ विनाऽन्येषां शब्दानां प्रथमान्तानां रूपाणां वचनानुसारं कर्तृकर्मवाच्ययोस्तिङन्तक्रियायाः प्रथमपुरुषक्रियापदं युष्मच्छब्दस्य प्रथमान्तस्य रूपानुसारं कर्तृकर्मवाच्योर्मध्यमपुरुषस्य क्रियापदमस्मच्छब्दस्य प्रथमान्तस्य रूपानुसारं कर्तृकर्मवाच्ययोरुत्तमपुरुषस्य क्रियापदं च प्रयुज्यते । अतिङन्तक्रियाऽपि प्रथमान्तानुरूपमेव सदा चिन्त्या ।

१- नामवाचकशब्दात्पूर्वं सर्वादिशब्दाविशेषणरूपेण - स रामः । तौ रामौ । ते रामाः । एवमपि तौ रामकृष्णौ । ते रामकृष्णपरशुरामा इत्यादि । सा सीता । ते सीते । ताः सीताः । ते रमागौर्यौ । ताः कालीलक्ष्मीसरस्वत्य इत्यादि । तत् फलम् । ते फले । तानि फलानि । ते पुस्तके । तानि जलपुस्तकवस्त्राणि इत्यादि । त्वं रामः । युवां रामौ । यूयं कृष्णाः । अहं कृष्णः । आवां कृष्णौ । वयं कृष्णाः । त्वं रमा । युवां लक्ष्मीपार्वत्यौ । यूयं रमादुर्गादिव्यः । अहं पुरुषः स्त्री वा । आवां पुरुषौ स्त्रियौ वा । वयं पुरुषाः स्त्रियो वा । तत्कर्म । ते कर्मणी । तानि कर्माणि । त्वं स्वाहा । युवां बालौ । यूयं बालाः । त्वं स्वधा । अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् । त्वमेव माता च पिता त्वमेव । अहं छात्रः ।

---

[1] वरदराजः - लघुकौमुदी - प्रकाशकः - गोविन्दभवन कार्यालय गीताप्रेस, गोरखापुर, सं. २०५२ तेइसवाँ संस्करण, पृ. ३४ ।

[2] शेषे प्रथमः १।४।१०८॥

[3] युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १।४।१०५॥

[4] अस्मद्युत्तमः १।४।१०७॥

[5] युष्मदस्मदो रूपाणि त्रिषु लिङ्गेषु एकरूपाणि भवन्ति ।

आवां छात्रौ । वयं छात्राः । स जनः । तौ जनौ । ते जनाः । स त्वमहं वा राजा । तौ युवामावां वा राजानौ । ते यूयं वयं वा राजानः । सर्वं जगत् । सर्वे जनाः । असौ बालः । तत्फलम् । ते फले । तानि फलानि । इदं पुष्पम् । इमे पुष्पे । इमानि पुष्पाणि । एष मार्गः इत्यादि ।

२- जातिवाचकशब्दात्पूर्वं सर्वादिशब्दाविशेषणरूपेण - स ब्राह्मणः । तौ ब्राह्मणौ । ते ब्राह्मणाः । त्वं क्षत्रियः । युवां क्षत्रियौ । यूयं क्षत्रियाः । अहं वैश्यः । आवां शूद्रौ । वयं शूद्राः । सा त्वमहं वा ब्राह्मणी । ते युवामावां वा ब्राह्मण्यौ । ताः यूयं वथं वा ब्राह्मण्यः । एवं क्षत्रियाः वैश्याः शूद्राश्च प्रयोज्याः । त्वं भृत्यःसेविका वा । युवां सेवकौ सेविके वा । यूयं सेवकाः सेविका वा । सर्वे ब्राह्मणाः । सर्वा जातयः । स मूषकः । तौ सिंहौ । ते वायसाः । असौ नरः नारी वा । अयमवतारः । स शृगालः । तौ शृगालौ । ते शृगालाः । स सा वा गौः । तौ ते वा गावौ । ते ता वा गावः । इत्यादि ।

३- समुदायवाचकशब्दात्पूर्वं सर्वादिशब्दाः - सर्वः जनः । सर्वे जनाः । ते ब्रीहयः । ते तण्डुलाः । सर्वाणि धनानि फलानि वा । सर्वं जगत् । सर्वाणि जगन्ति । सर्वाणि वस्तूनि । एतज्जगत् । सर्वं वस्तु ।

४- परिणामवाचकशब्दात्पूर्वं सर्वादिशब्दाः - स एकक्रोशो मार्गः । तत् एकगजपरिमितं वस्त्रम् । एकमणकं धान्यम् । अयमेककीलको द्विकीलको वा तण्डुलः । इदमेकलिटरं द्विलिटरं दुग्धं तैलं घृतं जलं वाऽस्ति । इदमेककीलकं द्विकीलकं वा धान्यम् । अयमेकसहस्राणां ग्रामाणामेककीलकः । अयं सहस्राणां सेन्टिमिटराणामेकसेन्टिमिटरः ।

५- भाववाचकशब्दात्पूर्वं सर्वादिशव्दाः - तत् चिन्तनम् । अयं मम विचारः । सा बुद्धिः । सा चिन्ता । स विद्वान् । तौ विद्वांसौ । ते विद्वासः । सर्वे विद्वांसः ।

६- विशेषत्णापूर्वं सर्वादिशव्दाः - सः कुशलः । तौ कुशलौ । ते कुशलाः । त्वं दक्षः । युवां दक्षौ । यूयं दक्षाः । अहं सुन्दरः । आवां मनोरमौ । वयं सुन्दराः । त्वं सरला । युवां सरलौ । वयं सरलाः । सा सरला । ते सरले । ताः सरलाः । स निपुणः । तौ निपुणौ । ते निपुणाः । सर्वे कर्मठाः ।

७- विविधानि - एष भगवान् आकाशमण्डलस्य मणिः । भवन्तः सर्वे चतुराः । भवान् दक्षः । भवन्तौ दक्षौ । भवन्तो दक्षाः । भवान् त्वं वा कुशली । भवान् विद्वान् (पण्डितः) । भवन्तो धीमन्तः । स त्वमहं वा वन्दनीयः । तौ युवामावां वा वन्दनीयौ । ते यूयं वयं भवन्तो वा वन्दनीयाः । अयं छेद्यः । अयं दाह्यः । अयमव्यक्तः । अयमचिन्त्यः । अयमविकार्यः । अयं स्थाणुः । अयं बालः । इमे एते ते यूयं सर्वे अमी वा बालाः । अयं लोकः । सर्वे पूज्याः । इत्यादि । एवं सर्वत्र सर्वनामशब्दपूर्वका नामजात्यादिशब्दाः क्रियां विना प्रयुज्यन्ते ।

८- एवं सर्वादिशब्दरहितं कर्त्रनुरूपं क्रियापदं चिन्त्यम् - असारः खलु संसारः । गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महान् खलः । जगत्सत्ता व्यावहारिकी ।

९- उद्देश्यविशेषणम् - कुशलो विप्रः । कुशलौ विप्रौ । कुशला विप्राः । सुन्दरः पुरुषः । सुन्दरौ पुरुषौ । सुन्दराः पुरुषा । सुन्दरी नारी । सुन्दर्यौ नार्यौ । सुन्दर्यः नार्यः । सुन्दरं फलम् । सुन्दरे फले । सुन्दराणि फलानि । इत्यादि ।

१०- विधेयविशेषणम् - नारी सुशीला वर्तते । योद्धा वीरोऽस्ति । नारी दर्शनीयाऽस्ति । पुरुषो रम्यो दृश्यते । फलं भक्षणीयं मन्यते । भवान् माननीयोऽस्ति ।

११- अस्मच्छब्दप्रधानम् - एषोऽहम् सोऽहं वा तव पृष्टमारुढः । एतौ आवाम् तौ आवां वा तव द्विचक्रिकामारूढौ । एते वयम्, ते वयम् वा मृत्तरणमारूढाः (यानमारूढाः) । मृत्तरणम्=मोटर ।

१२- वाशब्देन विकल्पितः - स त्वमहं भवान्वा कुशलः कुशली वा एते ते वा सर्वे वनवासिनः किं वदन्ति । ते यूयं वयं वा सर्वे सुखिनः । ताः यूयं वयं वा सर्वाः कुशलिन्यः । तौ युवामावां भवन्तौ वा कुशलौ कुशलिनौ वा । इत्यादि ।

विशेषः - सर्वनामशब्दः सर्वेषां नाम्नां (विशेष्याणां) प्रतिनिधयः सन्ति । यतः प्रयोगे नाम्नः स्थाने सर्वनामशब्दः प्रयुज्यते । शब्दोऽयं कर्तृरूपेऽपि प्रयुज्यते । स विशेषणत्वाद्विशेष्यस्य लिङ्गं विभक्तिं वचनञ्चानुसृत्य विशेष्यात्पूर्वेऽपि प्रयुज्यते । यत्र वाक्ये क्रिया न प्रयुज्यते । तत्र प्रथान्तानुसारं साङ्गतिकं क्रियापदमध्याह्रियते ।

इति कर्तृकारकम् ॥४-१॥

४-२ कर्मकारकम्

अस्मिन्कारके सकर्मकधातोस्तिङन्तक्रियायाः कर्मप्रवचनीयानां गौणक्रियापदानां च प्रयोगे कर्म कथं विधीयत इति चिन्तनीयो विषयः ।

सकर्मकधातुद्विविधोऽस्ति एककर्मको द्विकर्मकश्च । यस्मिन्धातौ एकं कर्म विधीयते स धातुरेककर्मकः यस्मिन्धातौ द्वे कर्माणी विधीयेते स धातुर्द्विकर्मकश्च ज्ञेयः । प्रायेणैककर्मका धातवो बहवःसन्ति द्विकर्मकाः स्वल्पाश्च । अनयोर्मध्ये प्रथममेककर्मकधातोः कर्तृवाच्यस्य कर्मवाच्यस्य च वाक्यं प्रस्तूयते ।

४-२-१ एककर्मकक्रियापदचिन्तनम्

भ्वादिदशगणीयानामेककर्मकधातूनां ण्यन्त-सन्नन्त-यङन्त-यङ्लुङन्त-नामाधातु-कण्वादिधातूनां च तिङन्तक्रियापदानि तेभ्य एव धातुभ्यो भूतकर्तरि क्तवतुप्रत्ययेन भूत कर्तर्येव गत्यर्थेभ्य आङुप-अधिपूर्वकेभ्यःशिलषस्थासवसजनजीर्यतिभ्यो नमादिधातुभ्य आदिकर्मणि भूतांशकर्तरि प्रस्वादि-प्रमोदि-प्रकृभ्यश्च धातुभ्यःक्तप्रत्ययेन च निष्पन्नानि अतिङन्तक्रियापदानि च चिन्तयेत् । ण्यन्तप्रत्ययात्पूर्वं ये एककर्मका धातवः पठचन्ते । विशेषधातुं विना ते सर्वे ण्यन्ते कृतेऽपि एककर्मका एव ज्ञेयाः । सर्वे ण्यन्तधातवः सेटो भवन्ति ।

विशेषः - सर्वेषां धातूनां लिट्-लङ्-लुङ्क्षु लकारेषु निष्पन्नानां तिङन्तक्रियापदानां भूतकर्तरि क्तक्तवतुप्रत्ययाभ्यां च निष्पन्नानामतिङन्तक्रियापदानां चार्थः समानकालिकार्थः प्रोच्यते । यत एतानि समानकालिकार्थकानि तिङन्तातिङन्तक्रियापदानि ग्रन्थव्याख्यायां परस्परं पर्यायवाचकरूपेण प्रयुज्यन्ते। तदनुसारमर्थश्च क्रियते ।

४-२-२ कर्मवाच्यस्य क्रियापदचिन्तनम्

सकर्मकधातोः कर्मवाच्ये लट्-लोट्-लङ्-विधिलिङ्क्षु लकारेषु यक्युक्तानि आर्धधातुकलकारेषु यक्रहितानि च तिङन्तक्रियापदानि भूतकर्मणि क्तेन कर्मणि विध्यर्थेऽर्हा(योग्य)र्थे शक्यार्थे च कृत्येन च निष्पन्नानि अतिङन्तक्रियापदानि भवन्ति । तानि सावधानतया चिन्त्यानि प्रयोक्तव्यानि च ।

कर्मवाच्ये लिट्-लङ्=लुङ्क्षु लकारेषु निष्पन्नानां क्रियापदानां भूतकर्मणि क्तप्रत्ययेन निष्पन्नानामतिङन्तक्रियापदानां चार्थः समानकालिकोऽर्थो ज्ञेयः । समानकालिकार्थकानि तिङ्न्तातिङन्तक्रियापदानि ग्रन्थव्याख्यायां परस्परं पर्यायवाचकरूपेण प्रयुज्यन्ते । तदनुसारं तयोः पदयोरर्थश्च समानरूपेण क्रियते ।

४-२-३ उक्तानुक्तयोर्विचारः

यस्माद्यस्मिन्नर्थे तिप् तस् झि इत्यादयस्तव्यादि(कृत्यक्तक्तवतुखल्) प्रत्ययास्तद्धितप्रत्ययाश्च विधीयन्ते यत्र समास श्च भवति स उक्तो भवति । तस्मादुक्तात्प्रथमा विभक्तिर्विधीयते ।

यस्मिन्नर्थे विधीयन्ते त्यादितव्यादितद्धिताः ।
समासो वा भवेद्यत्र स उक्त प्रथमा ततः[1] ॥

यतः स्मरणीयं यत् सर्वे त्यादिप्रत्ययाः उक्ता ज्ञेयाः ।

उक्तः (अभिहितः) कर्ता, अनुक्तं (अनभिहितं) कर्म च प्रोच्यते [२] । स्मरणीयं यत् एककर्मकद्विकर्मकधात्वोःकर्तृवाच्यस्य क्रियायामुक्तः कर्ता अनुक्तं च कर्म विधीयेते । अकर्मकधातोस्तु कर्तृवाच्यस्य क्रियायां केवलमुक्तः कर्ता भवति अनुक्तं कर्म न अकर्मकधातोः कर्मणोऽभावात् । १-क) उक्तकर्तृविधिः - येभ्यः सकर्मकधातुभ्यः कर्तरि (कर्तृवाच्ये) लकारस्य स्थाने तिङ्, तेभ्य एव धातुभ्यो भूतकर्तरि (व्यतीतसमयबोधके कर्तृवाच्ये) क्तवतुः "आदिकर्मणि क्तः कर्तरि च" इति सूत्रेण आदिकर्मणि भूतांशकाले विहिते कर्तरि "गत्यर्थाकर्मकः" इति सूत्रेण भूतकर्तरि च क्तः प्रत्ययो विधीयते । स उक्तः प्रोच्यते । तैः पूर्वोक्तैः प्रत्ययैर्निष्पन्नं क्रियापदमप्युक्तं भवति । तेनोक्तेन क्रियापदेन कर्ताऽपेक्ष्यते । उक्तं क्रियापदमपेक्षितं कर्तारमुक्तं विदधाति । ततः कर्ता उक्तः प्रोच्यते । तत उक्तकर्तुः "प्रातिपदिकार्थ." इति सूत्रेण प्रथमा विभक्तिर्भवति । इममेव विधिं प्रयुज्य उक्ते कर्तरि प्रथमा विधीयते । यतः प्रथमाविभक्तौ निष्पन्नाः सर्वेऽजन्ता हलन्ताश्च शब्दाः कर्तृवाच्ये कर्तारःप्रोच्यन्ते । कर्तृपदानां चर्चा पूर्वमेव कृता । तत्रैव द्रष्टव्या-४-१-१ ।

१-ख) अनुक्तकर्मज्ञानम् - सकर्मकधातोरनुक्ते(कर्मवाच्याद्भिन्ने) कर्मणि लडादीनां स्थाने तिङ्, भूतकर्तरि क्तवतुः, गत्यर्थकेभ्य आङुपानु-उपसर्गादिपूर्वकेभ्यः स्थासवसजनजृभ्यश्च धातुभ्यो भूतकर्तरि क्तश्च प्रत्ययो विधीयते । स प्रत्ययोऽनुक्तो भवति । एभिर्निष्पन्नं क्रियापदमप्यनुक्तं भवति । वाक्येऽनुक्तेन क्रियापदेन सदा कर्मापेक्ष्यते । ततोऽनुक्तं क्रियापदमपेक्षितं कर्माणमनुक्तं विदधाति । ततः कर्मानुक्तमुच्यते । ततोऽनुक्तस्य कर्मणः कर्तुरीप्सिततमं कर्मेति सूत्रेण कर्मज्ञा, तस्मिन्कर्मणि "कर्मणि द्वितीये" ति सूत्रेण द्वितीया भवति । इत्थं कर्म द्वितीयान्तं भवति । अकर्मकधातोः प्रयोगे कर्म न भवति तस्य कर्मणोऽभावात् । यतोऽकर्मकधातोः क्रियायां कुत्रापि कर्म न प्रयुज्यते । अत्र स्मरणीयं यत् सकर्मकधातोः कर्तृवाच्यस्य विवक्षायां क्रियापदमुक्तं कर्मणो विवक्षायां कर्मानुक्तं च भवति । एवं सकर्मकधातोः कर्तृवाच्यस्य क्रियायामुक्तः कर्ता प्रथमाऽनुक्तञ्च कर्म भवति ।

२-क) भावे कर्मणि च कर्तुःस्थाने तृतीयाविधानम् - भावः कर्म वा उक्तं (अभिहितं) कर्ता चानुक्तः (अनभिहितः) प्रोच्यते । अकर्मकधातोर्भावे(भाववाच्ये) सकर्मकधातोः कर्मणि-(कर्मवाच्ये) च तिङ्कृत्यक्तखल्प्रत्ययैर्निष्पन्नं क्रियापदमुक्तं भवति । भावे कर्मणि च निष्पन्नेनोक्तेन क्रियापदेन कर्ता अनुक्तो विधीयते । एवमुक्ते स्थितः कर्ताऽनुक्तकर्तरि परिवर्तितो ज्ञेयः । ततोऽनुक्तकर्तरि "कर्तृकरणयोस्तृतीया" इति सूत्रेण तृतीया भवति । ततः कर्ता तृतीयान्तो जातो बोध्यः । एवं कर्ता भावे(भाववाच्ये) कर्मणि(कर्मवाच्ये) च तृतीयान्तः प्रयुज्यते ।

२-ख) कर्मणि (कर्मवाच्ये) कर्मणःस्थाने प्रथमाविधानम् - सकर्मकधातोःकर्मणि (कर्मवाच्ये) तिङ्कृत्यक्तखल्प्रत्ययैर्निष्पन्नं क्रियापदमुक्तं भवति । उक्तं क्रियापदं कर्तृवाच्ये स्थितं कर्माणमुक्तं विदधाति । ततः कर्म उक्तं प्रोच्यते । तत उक्ते कर्मणि प्रातिपदिकार्थमात्रे

---

[1] वरदराजाचार्यः - लघुकौमुदी - टीकायाम् - गोविन्दभवन, गीताप्रेस, गोरखपुर सं. २०५० वाइसवाँ सं.(पृ.२२१)
[२] वरदराजः - मध्यसद्धान्तकौमुदी - टीकायामुक्तानुक्तयोश्चर्चा, टीकाकारो विश्वनाथ शास्त्री - मोतीलाल वनारसीदास, पुनर्मुद्रण, सन् २००१, पृ. १०७ ।

"प्रातिपदिकार्थलिङ्ग" इति सूत्रेण प्रथमा विधीयते । एवं कर्मवाच्ये कर्म परिवर्तनेन प्रथमान्तं भवति तदेव कर्मवाच्ये प्रधानं च । ततः कर्मवाच्ये कर्मप्रथमान्तानुसारं क्रियापदं प्रयुज्यते । स्मरणीयं यत् १-क) सकर्मकधातोःकर्तृवाच्ये उक्ते (अभिहिते) कर्तरि प्रथमा अनुक्ते (अनभिहिते) कर्मणि द्वितीया च भवति । अकर्मकधातोस्तु कर्तृवाच्ये उक्ते कर्तरि प्रथमामात्रं भवति न तु कर्म, धातोःकर्मणोऽभावात् । ख) सकर्मकधातोः कर्तृवाच्यस्य क्रिया कर्मवाच्ये यदा परिवर्तते तदा कर्ताऽनुक्तेन तृतीया कर्म उक्तेन च प्रथमा भवति । ततः कर्तृवाच्ये उक्ते(अभिहिते) कर्तरि प्रथमा अनुक्ते(अनभिहिते) कर्मणि द्वितीया कर्मवाच्येऽनुक्ते कर्तरि तृतीया उक्ते कर्मणि च प्रथमा इति नियमो भवति । संक्षेपे उक्ते कर्तरि प्रथमा अनुक्ते कर्मणि द्वितीया, अनुक्ते कर्तरि तृतीया उक्ते कर्मणि प्रथमा चेति नियमः प्रोच्येते । अनेन नियमेन कर्तृवाच्ये कर्ता प्रथमान्तः कर्म द्वितीयान्तं कर्मवाच्ये कर्ता तृतीयान्तः कर्म प्रथमान्तं च भवति । २- कर्मवाच्यादपि कर्तृवाच्ये परिवर्तनेन कर्मवाच्ये स्थितं प्रथमान्तं द्वितीयान्तं तृतीयान्तस्तु प्रथमान्तो जायते । एवं कर्तृवाच्यात्कर्मवाच्ये कर्मवाच्यात्कर्तृवाच्ये च वाक्यस्य परिवर्तनं क्रियते । वाच्यपरिवर्तनस्य नियमोऽयमेव ।

४-२-४ अत्यन्तमिष्टतमस्य कर्मणः विधानम्

अत्र स्मरणीयंयत् धातोःक्रियायां फलं व्यापारश्चार्थौ भवतः । तयोराश्रयस्तिङर्थः । फलं जन्यं व्यापारश्च जनको बोध्यः । फलाश्रयः कर्म व्यापाराश्रयश्च कर्ता भवति । यतः फलाश्रये कर्म व्यापाराश्रये कर्ता च विधीयेते । सदा कारकं विवक्षाधीनं भवतीति न विस्मरणीयम्-

कर्तुरीप्सिततमं कर्म १।४।४९॥

कर्तुःक्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् । इष्टः = काङ्क्षित इत्यर्थः ।

कर्मणि द्वितीया २।३।२॥

अनुक्ते कर्मणि द्वितीया स्यात् । एककर्मकस्य द्विकर्मकस्य च धातोः कर्तृवाच्ये कर्तुःक्रियया प्राप्तुमत्यन्तमिष्टतमं कारकं (शब्दम्) "कर्तुरीप्सिततमं कर्म" इति सूत्रेण कर्मसंज्ञं तस्मादेव शब्दात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । एवमेककर्मकधातोःकर्म द्विकर्मकधातो श्चमुख्यं कर्म च निष्पद्यते । अयमेवैकद्विकर्मणोर्धात्वोः कर्मविधाने नियमः । यथा भक्तो हरिं भजतीत्यत्र उक्ते कर्तरि एककर्मकस्य भज्धातोर्विहितस्य लटःस्थाने तिङ् भवति । तिङा निष्पन्नं क्रियापदमपि उक्तमेव भवति । तेनोक्तेन क्रियापदेन वाक्यस्थो भक्तशब्दः कर्ता उक्तो विधीयते । ततः स उक्तः कर्ता प्रोच्यते । तस्मादुक्ताद्भक्तशब्दात् "प्रातिपदिकार्थलिङ्गपरिमाण." इति सूत्रेण प्रथमा विधीयते । इत्थं प्रथमान्तकर्ता भक्तः सिद्धचति । एवमन्येऽपि निष्पद्यन्ते ।

धातोः सकर्मकत्वाद् उक्तकर्तरि विहिता वाक्यस्था "भजति" क्रियाऽनुक्तकर्मणि निष्पन्नाऽस्ति । यतोऽनुक्ते कर्मणि निष्पन्नया "भजति" क्रियया हरिशब्दोऽनुक्तं कर्म विधीयते । इत्थं कर्मणोऽनुक्तत्वाद "अनुक्ते कर्मणि द्वितीया" इति नियमानुसारेण "कर्तुरीप्सिततमं कर्म" इति सूत्रेण कर्तुःक्रियया प्राप्तुमत्यन्तमिष्टतमस्य हरिशब्दस्य कर्मसंज्ञा भवति । ततो हरिशब्दात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । अनया प्रक्रियया "भक्तो हरिं भजति" इति वाक्यं सिद्धचति । इत्थमेकसकर्मकधातोरेकं कर्म कर्तृवाच्यस्य सर्वस्याःक्रियाया वाक्ये निष्पद्यते - यथा-रामो ग्रामं गच्छति । पुत्रौ पितरौ नमतः । छात्रा वेदं पठन्ति । लक्ष्मीर्हरिं सेवते । विप्रा गायत्रीं जपन्ति । अहं पुस्तकमपठम् । स कार्यं करोति । एवमेकसकर्मकधातोरेककर्मणा सहितं वाक्यं सर्वत्र सिद्धचति । लेखने पठने भाषणे च सदा विचारणीयम् । अकर्मकधातोःकर्मणोऽभावात्तस्य धातोः क्रियायां कर्म न भवति । कर्ममात्रेण स्थितस्य वाक्येऽन्वयः समान्ये कर्तुः कर्मणः क्रियापदस्य चानुलोमेन क्रियते क्वचित् विलोमेनापि ।

तिङ्कृत्तद्धितसमासैः प्रायेण अभिधानं(बोधनं) भवति । अर्थात् एभिर्योगे प्रायेण प्रथमाया विधानं भवति क्रियते वा । यत उक्ते कर्मणि प्रातिपदिकार्थमात्रे प्रथमा विधीयते । प्रथमाविहितः शब्दः प्रथमान्तः प्रोच्यते न तु कर्ता-

क) तिङा उक्तं कर्मं - कर्मणि (कर्मवाच्ये) तिङ् उक्तो भवति । तिङा निष्पन्नं क्रियापदमपि उक्तं ज्ञेयम् । उक्तेन तिङन्तक्रियापदेन कर्तृवाच्ये विहितं कर्म उक्तं भवति । उक्ते कर्मणि प्रथमा इति नियमानुसारमुक्तं कर्म प्रथमान्तं भवति । ततः प्रथमान्तानुसारं क्रियापदं प्रयुज्यते । कर्मणि कर्ताऽनुक्तो भवति । ततश्चानुक्तकर्ता तृतीयान्तो ज्ञेयः । यथा-लक्ष्म्या हरिः सेव्यते । छात्रैर्विद्यालयो गम्यते । मया पुस्तकमपठ्यत । युष्माभिरस्माभिर्वा तीर्थमकारि ।

ख) कृता उक्तं कर्म - कृता कृत्यक्तखल्प्रत्ययाः गृह्यन्ते । सकर्मकधातोःकर्मवाच्ये कृत्यक्तखल्प्रत्यया उक्तेऽर्थे विधीयन्ते । तैर्निष्पन्नं क्रियापदमपि उक्तमेव ज्ञेयम् । उक्ते निष्पन्नेन क्रियापदेन कर्तृवाच्ये स्थितं कर्म उक्तं भवति । तत उक्ते कर्मणि प्रथमा इति नियमानुसारं कर्म प्रथमान्तं भवति । ततः प्रथमान्तानुसारं क्रियापदं प्रयुज्यते । अनुक्तकर्ता तु तृतीयान्तो भवति । यथा

१- कर्मणि कृत्यःक्तश्च - मया देवो द्रष्टव्यः, दृष्टो वा । कृषकैः पशवो रक्षितव्याः रक्षिता वा । भक्तेन कृष्णः सेवितव्यः सेवितो वा । पुत्रेण पिता नन्तव्यः, नमनीयः, नम्यः प्रणम्यः, नतो वा । एवं सर्वत्र समाधेयम् ।

२- कर्मणि खल्- भगवान् भक्तेन सुलभः, अभक्तेन दुर्लभश्च । कुलालेन घटःसुकरः अन्येन दुष्करः । त्वया मया वा देवो दुर्दशः सुदर्शो वा । भक्तेन शिवो रामश्च सुदर्शः, अभक्तेन दुर्दर्शश्च । सुतरा नदी धीवरेणान्येन दुस्तरा । द्विजेन वेद ईषत्पठः सुपठो वा । जन्तुना मानुषं जन्म ईषल्लभं सुलभं दुर्लभं वा । युच्- सोमरसो ब्राह्मणेन ईषत्पानः सुपानो वा अन्येन दुष्पानः । खलचौ - प्राणी प्रलयकाले सुविलयो विलयो लयो वा जायते ।

ग) तद्धितेन उक्तं कर्म - कर्मणि प्रत्ययविधानेन निष्पन्ने कर्मवाचके तद्धितान्तपदेऽपि कर्म उक्तं भवति । तेनोक्तेन तत्र कर्म प्रथमा जायते । यथा - शतेन क्रीतः=शत्यः अश्वः । अत्र क्रयणक्रियया कर्मीभूतस्याश्वस्य यत्प्रत्ययेन उक्तत्वात्प्रथमा विभक्तिर्जाता ।

घ) समासेन उक्तं कर्म - यत्र प्रधानतया कर्माऽऽश्रित्य समासो विधीयते । तत्र तेन समासेन निष्पन्ने कर्मवाचके पदेऽपि कर्म उक्तं भवति । ततः प्रथमा विभक्तिर्जायते । यथा-प्राप्तमुदकं यं सः = प्राप्तोदको ग्रामः । अत्र प्रधानतया कर्मसङ्केतकं यमिति पदमाश्रित्य विहितेन बहुव्रीहिसमासेन कर्म उक्तं भवति । तेनोक्तेन प्राप्तोदकः शब्दः प्रथमान्तो भवति ।

ङ) क्वचिन्निपातेनापि कर्म उक्तं भवति । (क) विषवृक्षोऽपि सम्वर्ध्य स्वयं छेत्तुमसाम्प्रतमित्यत्र संवर्धनक्रियाकर्मीभूतस्य विषवृक्षस्य कर्मत्वेऽपि तत्र प्रयुक्तेन अपिशब्देन कर्म उक्तं भवति । ततः "उक्ते कर्मणि प्रथमा" इति नियमेन उक्ते कर्मणि विषवृक्षशब्दात्प्रथमा विधीयते । (ख) क्रमादमुं नारद इत्यबोधि स इत्यत्र बोधनक्रियाकर्मीभूतस्य नारदस्य कर्मत्वेऽपि तत्र प्रयुक्तेन इतिपदेन कर्म उक्तं भवति । तत "उक्ते कर्मणि प्रथमा" इति नियमानुसारमुक्ते कर्मणि नारदशब्दात्प्रथमा विधीयते । (ग) यं शैवाः समुपासते शिव इति" इत्यत्र उपासनक्रियाकर्मीभूतस्य शिवस्य कर्मत्वेऽपि तत्र प्रयुक्तेन इतिपदेन कर्म उक्तं भवति । ततः "उक्ते कर्मणि प्रथमा" इति नियमेन उक्ते कर्मणि शिवशब्दात्प्रथमा विधीयते । एवमेव ब्रह्मेति वेदान्तिनो बौद्धा बुद्ध इति इत्यादयोऽन्ये प्रयोगाः समाधेयाः ।

च) केषाञ्चन धातूनां कर्तृकर्मवाच्ययोर्वाक्ययोरुदहरणानि सहैव लेखिष्यन्ते । वाक्यन्ते प्रयुक्तानि अतिङन्तानि कृत्यक्तक्तवतुखल्प्रत्ययान्तपदानि क्रियापदरूपे विशेषणरूपे च स्मरणीयानि । एषां प्रयोगः कर्मप्रथमान्तानुसारमेव क्रियते । कर्मप्रथमान्तस्य शब्दस्य लिङ्गं विभक्तिर्वचनं च सदा

स्मरणीयान्येव । कर्तृवाच्ये उक्ते कर्तरि प्रथमा अनुक्ते कर्मणि द्वितीया, कर्मवाच्येऽनुक्ते कर्तरि तृतीया उक्ते कर्मणि प्रथमा च भवतीति नियमो न विस्मरणीयः । यस्मिन् वाक्ये या बहवः कृदन्तक्रियाः सन्ति वाशब्दो नास्ति । तत्र वाशब्दं संस्मृत्य अस् वृत् विद् एषां मध्येऽपेक्षया सङ्गत्यनुसारमेका क्रिया चिन्त्या -

१. कर्तरि - स ग्रामं व्रजति, व्रजितवान्, व्रजितः - गच्छति, गतवान्, गतः[1] - चलति चलितवान् चलितः - याति, यातवान्, यातः - एति, इतवान्, इतः - प्रपद्यते, प्रपन्नवान्, प्रपन्नः - प्राप्नोति, प्राप्तवान्, प्राप्तः - स्त्रियाम्-गतवती गता = कर्मणि - तेन ग्रामो व्रज्यते, व्रजितव्यः, व्रजितः, व्रज्यमानः, व्रजिष्यमाणः - गम्यते गन्तव्यः, गमनीयः, गम्यः, गतः, गम्यमानः, गंस्यमानः, सुगमः, दुर्गमः - चल्यते चलितव्यः, चलितः, चल्यमानः, चलिष्यमाणः, सुचलः दुश्चलः - यायते यातव्यः, यातः, यायमानः, यास्यमानः - ईयते एतव्यः, इतः, ईयमानः एष्यमाणः - प्रपद्यते प्रपत्तव्यः, आ-सं-प्रपन्नः, सं-प्रपद्यमानः सं-प्रपत्स्यमानः सुपदः, दुष्पदः - प्राप्यते प्राप्तव्यः, प्रापणीयः, प्राप्तः, प्राप्यमाणः प्राप्स्यमानः, सुप्रापः, दुष्प्रापः, स्वापः, दुरापो वा। तस्य पापं क्षयं याति मृतो मोक्षमवाप्नुयात् । इष्यति, प्रेष्यति=गच्छति । रामः पर्वतं लङ्घते लङ्घितवान्, लङ्घितः - रामेण पर्वतो लङ्घ्यते लङ्घितव्यः, लङ्घनीयः, लङ्घितः, लङ्घ्यमानः, लङ्घिष्यमाणः - प्रहिणोति प्रहितवान्, प्रहितः - प्रहियते प्रहेतव्यः (स्वादिः) अतिक्राम्यति, अतिक्रामति, अतिक्रान्तवान्, अतिक्रान्तः - अतिक्रम्यते अतिक्रमितव्यः, अतिक्रमणीयः, अतिक्रान्तः - ऋच्छति (भ्वादिः) इयर्ति, ऋतः (जुहोत्यादिः) । ये गत्यर्था धातवः सन्ति ते ज्ञानार्थकाः प्राप्यर्थका मोक्षार्थका नष्टार्थकाश्च ज्ञेयाः । (क्तक्तवतुप्रत्ययान्तानि पदानि स्त्रियाम्- ता वती क्लीबे तम्, वत् इति ज्ञेयानि) ।

२.. कर्तरि-मूषको विवरं प्रविशति प्रविष्टवान् प्रविष्टः-कर्मणि-मूषकेण विवरः प्रविश्यते प्रवेष्टव्यः, प्रवेशनीयः, प्रविष्टः, प्रविश्यमानः, प्रविक्ष्यमाणः, सुविशः, दुर्विशः । गम् विश धात्वोःकर्मणोऽविवक्षायामधिकरणे सप्तमी-रामो ग्रामे गच्छति । कृष्णो गृहे प्रविशतिगाहते) । एवंसर्वेषां गत्यर्थधातूनां गौणमुख्यक्रियाणां प्रयोगे द्वितीयाऽधिकरणञ्च विधीयतेधीगौणक्रियया शतृशानच्क्त्वाल्यबादिप्रत्ययान्तक्रिया ज्ञेया ।

३. कर्तरि-अहं कृष्णं वन्दे वन्दितवान्, वन्दितः, अभिवन्दे, अभिवन्दितवान्, अभिवन्दितः-कर्मणि - मया कृष्णा वन्द्यते वन्दितव्यः, वन्दनीयः, वन्द्यः, वन्द्यमानः, वन्दिष्यमाणः - अभिवन्द्यते, अभिवन्दितव्यः, अभिवन्दनीयः, अभिवन्द्यः, अभिवन्दितः, अभिवन्द्यमानः, अभिवन्दिष्यमाणः ।

४. कर्तरि-पुरुषाःकृष्णं नमन्ति नतवन्तः, नताः-कर्मणि-पुरुषैः कृष्णो नम्यते नन्तव्यः, नमनीयः, नम्यः, नतः, नम्यमानः, नंस्यमानः । नम्धातोः क्रियायाःप्रयोगे द्वितीया भवति चतुर्थी च । प्रणतः, आनतः - त्वां प्रणतोऽस्मि । मुनिमानतोऽस्मि । अयमकर्मकोऽपि - वृक्षो नमति । दारु न नमति । वेणुर्नमति । चतुर्थी सम्प्रदानकारके समुल्लेखिष्यते ।

५. कर्तरि - युवां फले खादथः खादितवन्तौ - कर्मणि - युवाभ्यां फले खाद्येते खादितव्ये खादनीये खाद्ये खादिते खाद्यमाने वा । खादति अत्ति जक्षिति भुङ्क्ते अश्नाति, अव्यवहरति, चम्नोति, भक्षयति - कर्मणि - खाद्यते, अद्यते, जक्ष्यते, भुज्यते, अश्यते, अव्यवह्रियते, भक्ष्यते । स्त्रियां खादितवती-वत्यौ-वत्यः ।

६. कर्तरि - छात्रा वेदानपठन् पठितवन्तः- कर्मणि- छात्रैर्वेदाः पठ्यन्ते अपठ्यन्त, पठितव्याः पठनीयाः पठिताः पठ्यमानाः पठिष्यमाणाः सुपठाः, दुष्पठाः वा । कर्तरि - अधीते, अधीयाते

---

[1] गत्यर्थधातुः कर्मणो विवक्षायां सकर्मको भूत्वा कर्मवाच्ये परिवर्तते । कर्मणोऽविवक्षायां तु स धातुरकर्मको भूत्वा भाववाच्ये परिवर्तते कर्मवाच्यस्य वाक्यं तूपरि प्रस्तुतम् । भाववाच्ये तु रामेण ग्रामे गम्यते गन्तव्यम्, गमनीयम्, गतम्, सुगमम्, दुर्गममं वा ।

अधीयते, अधीतवान् - कर्मणि - अधीयते, अध्येतव्याः, अध्ययनीयाः, अधीताः, अधीयमानाः, अध्येष्यमाणाः । स शास्त्रं जानाति - तेन शास्त्रं ज्ञायते ज्ञातव्यम्, ज्ञातम् ।

७. कर्तरि - हनुमान् रामं श्रयति-ते श्रितवान्, श्रितः- कर्मणि- हनुमता रामः श्रीयते श्रयितव्यः श्रयणीयः श्रितः । भूते कर्तरि कर्मणि च- संश्रितः, उपाश्रितः समाश्रितः (सम्+आ+श्रि) । स्त्रियाम्-श्रितवती-वत्यौ-वत्यः । श्रिता श्रिते श्रिताः ।

८. कर्तरि - सुदामा कृष्णं सेवते सेवितवान्- कर्मणि- सुदाम्ना कृष्णः सेव्यते सेवितव्यः सेवनीयः सेव्यः सेवितः सेव्यमानः सेविष्यमाणः (अस्ति) । स्त्रियाम् सेवितव्या सेवनीया सेव्या सेविता सेव्यमाना सेविष्यमाणा ।

९. कर्तरि- श्रोतारः पुराणानि शृण्वन्ति श्रुतवन्तः- कर्मणि - श्रोतृभिः पुराणानि श्रूयन्ते श्रोतव्यानि श्रवणीयानि श्रव्यानि श्रुतानि श्रूयमाणानि- निशामयति आकर्णयति = शृणोति । निशाम्यते-श्रूयते । आकर्ण्यते आकर्णयितव्यः, आकर्णितः, आकर्ण्यमानः, आकर्णयितुम्, आकर्ण्य (ल्यप्) ।

१०. कर्तरि- वयं धर्मं स्मरामः स्मृतवन्तः- कर्मणि - अस्माभिर्धर्मः स्मिर्यते स्मर्तव्यः, स्मरणीयः, स्मृतः, स्मिर्यमाणः, सुस्मरः, दुस्मरो वा । अधि+इक्=अधियन्ति=स्मरन्ति ।

११. कर्तरि- कृष्णो मां गोपायति गोपायितवान्, गुप्तवान्- कर्मणि- कृष्णेन अहं गोप्ये गोपायितव्यः, गोपितव्यः, गोप्तव्यः, गोप्यः, गोपायितः, गुप्तो वा । गोप्यते गोप्यमानः । रक्षति त्रायते पाति अवति पालयति - रक्ष्यते रक्षितव्यः, रक्षणीयः, रक्ष्यः, रक्षितः-पाल्यते पालयितव्यः पालनीयः पालितः । रक्षति, त्रायते, पाति, अवति । त्राणवान् त्रातवान्- त्रायते त्रातव्यः त्राण, त्रातः ।

१२. कर्तरि - सः नदीं तरति तीर्णवान्, तीर्णः- कर्मणि- तेन नदी तीर्यते तरि(री)तव्या तरणीया तार्या तीर्णा तीर्यमाणा सुतरा दुस्तरा वा । कर्तरि- अवतरति अवतीर्णवान्, अवतीर्णः - कर्मणि- अवतीर्यते अवतरि(री)तव्यः, अवतरणीयः, अवतीर्णः ।

१३. कर्तरि- भक्तः पुण्यं लभते लब्धवान्- कर्मणि- भक्तेन पुण्यं लभ्यते लब्धव्यम्, लभनीयम्, लभ्यम्, लब्धम्, लभ्यमानम्, लप्स्यमानम्, सुलभम्, दुर्लभं वा । स फलानि सुलभते सुलब्धवान् - तेन फलानि सुलभ्यन्ते सुलब्धव्यानि सुलभनीयानि सुलभ्यानि सुलब्धानि सुलभानि दुर्लभानि वा । आप्नोति प्राप्नोति, आप्तवान्, प्राप्तवान्- आप्यते, आप्तव्यः, आप्तः, स्वापः, दुरापः- प्राप्यते प्राप्तव्यः प्रापणीयः प्राप्तः सुप्रापः दुष्प्रापः । विन्दति-ते विन्नवान् - विन्नः, वित्तः । स्त्रियाम्-लब्धवती-त्यौ-त्यः । लब्धा लब्धे लब्धाः ।

१४. कर्तरि - शेषो धरणी धरति-ते धृतवान्- कर्मणि - शेषेण धरणी ध्रियते धर्तव्या धरणीया धार्या धृता ध्रियमाणा सुधरा दुर्धरा वा । स्त्रियाम्-धृतवती-त्यौ-त्यः । धृता धृते धृताः । पुंसि-धृतः-तौ-ताः ।

१५. कर्तरि - छात्रा वेदाक्षराणि समुच्चरन्ति समुच्चरितवन्तः (भ्वा.५५९ चर) समुच्चारयन्ति समुच्चारितवन्तः (चुरादिः १७४६ चर)- कर्मणि- छात्रैर्वेदाक्षराणि समुच्चर्यन्ते समुच्चरितव्यानि समुच्चरणीयानि समुच्चरितानि - समुच्चार्यन्ते समुच्चारितव्यानि समुच्चारणीययानि समुच्चारितानि ।

१६. कर्तरि - दर्शका नाटकं पश्यन्ति दृष्टवन्तः - कर्मणि - दर्शकैर्नाटकं दृश्यते द्रष्टव्यम्, दर्शनीयम्, दृष्टं दृश्यमानम्, सुदर्शम्, दुर्दशं वा । अवलोकयन्ति, अवलोकितवन्तः - अवलोक्यते अवलोकितव्यम्, अवलोकनीयम्, अवलोकितम्, अवलोक्यमानम् । ईक्षन्ते,

ईक्षितवन्तः - ईक्ष्यते, ईक्षितव्यम्, ईक्षणीयम्, ईक्षितम्, ईक्ष्यमाणम् । समीक्षते समीक्षितवन्तः - समीक्ष्यते, समीक्षितव्यम्, समीक्षणीयम्, समीक्षितः ।

१७. कर्तरि - योगिनो ब्रह्म ध्यायन्ति ध्यातवन्तः - कर्मणि - योगिभिर्ब्रह्म ध्यायते ध्यातव्यम्, ध्येयम्, ध्यातम्, ध्यायमानम् । भक्त ईश्वरं ध्यायति ध्यातवान् - भक्तेन ईश्वरो ध्यायते ध्यातव्यः, ध्येयः, ध्यातः, ध्यायमानः । स्त्रियाम्-ध्यातवती-वत्यौ-वत्यः । ध्याता ध्याते ध्याताः ।

१८. कर्तरि - ब्राह्मणा यज्ञपात्राणि पवन्ते (भ्वादिः १) पुनन्ति (क्र्यादि - ९) पूतवन्तः - कर्मणि - ब्राह्मणैर्यज्ञपात्राणि पूयन्ते पवितव्यानि पवनीयानि पूतानि पूयमानानि वा ।

१९. कर्तरि - भक्तो हरिं भजति-ते भक्तवान् - कर्मणि - भक्तेन हरिर्भज्यते भक्तव्यः, भजनीयः, भक्तः, भज्यमानो वा ।

२०. कर्तरि - आवां देवान्स्तुवीवः स्तुवः स्तुतवन्तौ - कर्मणि - आवाभ्यां देवाः स्तूयन्ते लुङ्-अस्ताविषत स्तोतव्याः स्तवनीयाः स्तुत्याः स्तुताः स्तूयमाना वा । स्त्रियाम् - स्तुवती-वत्यौ-वत्यः । स्तुता स्तुते स्तुताः । पुंसि-स्तुतः-तौ-ताः ।

२१. कर्तरि - शैवः शिवं यजति-ते, इष्टवान् - कर्मणि - शैवेन शिव इज्यते यष्टव्यः, यजनीयः, इष्टः, इज्यमानो वा । स्त्रियाम्-इष्टवती-त्यौ-त्यः । इष्टा इष्टे इष्टाः ।

२२. कर्तरि - होता घृतमग्नौ जुहोति हुतवान् - कर्मणि - होत्रा घृतमग्नौ हूयते होतव्यम्, हवनीयम्, हुतम् हूयमानम् ।

२३. कर्तरि - शेषः पृथ्वीं दधाति-धत्ते हितवान् - कर्मणि - शेषेण पृथ्वी धीयते धातव्या हिता धीयमाना वा ।

२४. कर्तरि - सा पुत्रं सूते (अदादिः) सूयते (दिवादिः) सूतवती - कर्मणि- तया पुत्रः सूयते सोतव्यः सवनीयः सूतः सूयमानो वा ।

२५. कर्तरि - माता मां पुष्यति पुष्टवती - कर्मणि - मात्राऽहं पुष्ये पोष्टव्यः पोषणीयः पुष्टः पुष्यमाणो वा ।

२६. कर्तरि - रामो ब्राह्मणांस्तृप्यति तृप्तवान् - कर्मणि- रामेण ब्राह्मणाः स्तृप्यन्ते तर्पितव्याः, तृप्तव्याः, तर्पणीयाः, तृप्ताः, तृप्यमाणा वा ।

२७. कर्तरि - यजमान आचार्यमवृणोत्-अवृणुत वृतवान् - कर्मणि - यजमानेन आचार्यो व्रियते वरि(री)तव्यः, वरणीयः, वृतः, व्रियमाणो वा । स्त्रियाम्-वृतवती-वत्यौ-वत्यः । वृता वृते वृताः ।

२८. कर्तरि - ऋत्विक् सोममभिषुणोति अभिषुतवान् - कर्मणि - ऋत्विजा सोमोऽभिसूयते, अभिषोतव्यः, अभिषुतः, अभिषूयमाणो वा ।

२९. कर्तरि - मृत्युर्मां तुदति तुन्नवान् - कर्मणि - मृत्युनाऽहं तुद्ये तोत्तव्यः, तुन्नः, तुद्यमानो वा ।

३०. कर्तरि - वयं पत्राणि लिखामः, लिखितवन्तः - कर्मणि - अस्माभिः पत्राणि लिख्यन्ते लेखितव्यानि लेखनीयानि लिखितानि लिख्यमानानि सुलिखानि दुर्लिखानि वा । स्त्रियाम्-लिखितवती-त्यौ-त्यः । लिखिता लिखिते लिखिताः ।

३१. कर्तरि - सूचीकारा वस्त्राणि कृन्तन्ति कर्तितवन्तः - कर्मणि - सूचीकारैर्वस्त्राणि कृत्यन्ते कर्तितव्यानि कर्तनीयानि कर्तितानि कृत्यमानानि वा ।

३२. कर्तरि - तक्षकः काष्ठानि छिनत्ति छिन्नवान् - कर्मणि - तक्षकेण काष्ठानि छिद्यन्ते छेत्तव्यानि छेदनीयानि छिन्नानि । स्त्रियाम्-छिन्नवती-वत्यौ-वत्यः । छिन्ना छिन्ने छिन्ना । कर्तरि - भृत्य

काष्ठानि भिनत्ति भिन्नवान् - कर्मणि - भृत्येन काष्ठानि भिद्यन्ते भेत्तव्यानि भेदनीयानि भिदेलिमानि भिन्नानि भिद्यमानानि वा ।

३३. कर्तरि - त्वमोदनं भुङ्क्षे भुक्तवान् - कर्मणि - त्वया ओदनः-नं भुज्यते भोक्तव्यः - व्यम्, भोजनीयः - यम्, भोज्यः-म्, भुक्तः-क्तम्-भोजनार्थे । भोग्यार्थे तु - महीं भुनक्ति, भुक्तवान्-वती, - कर्मणि - मही भुज्यते भोक्तव्या भोजनीया भोग्या भुक्ता भुज्यमानाः । भक्ष्यार्थे आत्मनेपदं, भोग्यार्थे परस्मैपदं च पठ्यते । स्त्रियाम्-भुक्तवती-वत्यौ-वत्यः । भुक्ता भुक्ते भुक्ताः । ओदनोऽस्त्री- अमरः २।९।४८॥ अयं पुनपुंसकयोरस्ति ।

३४. कर्तरि - पुरुषार्थी लक्ष्मीं तनोति-तनुते ततवान् - कर्मणि - पुरुषार्थिना लक्ष्मीस्तन्यते वितन्यते तनितव्या वितनितव्या तननीया तता तन्यमाना । स्त्रियाम्-ततवती-वत्यौ-वत्यः । तता तते तताः ।

३५. कर्तरि - ते कर्माणि कुर्वन्ति-कुर्वते कृतवन्तः - कर्मणि - तैः कर्माणि क्रियन्ते कर्तव्यानि करणीयानि कार्याणि कृतानि क्रियमाणानि सुकराणि दुष्कराणि वा । वयं धर्मं कुर्मः - विदध्मः विहितवन्तः - कर्मणि - अस्माभिर्धर्मःक्रियते कर्तव्यः करणीयः कार्यः कृतः क्रियमाणः करिष्यमाणः सुकरो दुष्करः - विधीयते विधातव्यः विहितः विधीयमानः (विधा+यक्+शानच्) । चित्तं विकरोति कामः । विदधाति-विधत्ते, समाचरति=करोतीत्यर्थः । विधेहि विधत्स्व=कुरु ।

३६. कर्तरि - वणिक् वस्तूनि क्रीणाति-क्रीणीते-क्रीतवान्- कर्मणि - वणिजा वस्तूनि क्रीयन्ते क्रेतव्यानि क्रयणानि क्रय्याणि क्रीतानि क्रीयमाणानि । उपसर्गः - विक्रीणाति विक्रीणीते स्त्रियाम्=क्रीतवती-वत्यौ-वत्यः । क्रीता क्रीते क्रीताः ।

३७. कर्तरि - वरः कन्यापाणिं गृह्णाति-गृह्णीते गृहीतवान् - कर्मणि - वरेण कन्यापाणिर्गृह्यते ग्रहीतव्यः, ग्रहणीयः, ग्राह्यः, गृहीतः, गृह्यमाणः, सुग्रहः, दुर्ग्रहो वा । स्त्रियाम्-गृहीतवती-त्यौ-त्यः । गृहीता गृहीते गृहीताः ।

३८. कर्तरि - गोपाला गा बध्नन्ति बद्धवन्तः - कर्मणि - गोपालैर्गावो बध्यन्ते बद्धव्याः, बन्धनीयाः, बद्धाः, बध्यमानाः । षिञ्=सि=सीनोति सिनुते (स्वादिः ५) सिनाति-सिनीते (क्र्यादिः ९)= (बध्नाति) सितवान् - सीयते सेतव्यम्, सेयः, सितः, सिनो वा ।

३९. कर्तरि - राजा मन्त्रिण आमन्त्रयति आमन्त्रितवान् - कर्मणि - राज्ञा मन्त्रिण आमन्त्र्यन्ते आमन्त्रयितव्याः, आमन्त्रणीयाः, आमन्त्रिताः, आमन्त्र्यमाणाः वा ।

४०. कर्तरि - भक्ता रामनामानि कीर्तयन्ति कीर्तितवन्तः - कर्मणि - भक्तै रामनामानि कीर्त्यन्ते कीर्तितव्यानि कीर्तनीयानि कीर्तितानि कीर्त्यमानानि वा । स्त्रियाम्-कीर्तितवती-वत्यौ-वत्यः । कीर्तिता कीर्तिते कीर्तिताः ।

४१. कर्तरि - माधवः परिवारं वर्जयति-ते वर्जति (चूरादिः १०) वर्जितवान् - कर्मणि - माधवेन परिवारो वर्ज्यते वर्जयितव्यः, वर्जनीयः, वर्जितः । वृक्ते (अदादिः २) वृक्तवान् । वृणक्ति (रुधादिः ७) वृक्तवान् - अदादिरुधाद्योः कर्मणि रूपाणि समानानि- वृज्यते वर्जितव्यः, वर्जनीयः, वृक्तः । अस्मिन्नेवार्थे - त्यजति जहाति उत्सृजति परिव्रजति, उज्झति ।

४२. कर्तरि - नार्य ऋषीन्पूजयन्ति पूजितवत्यः - कर्मणि - नारीभिर्ऋषयः पूज्यन्ते पूजयितव्याः पूजनीयाः पूज्याः पूजिताः पूज्यमानाः वा । अर्चन्ति, अर्चितवत्यः - कर्मणि - अर्च्यन्ते अर्चितव्याः, अर्चनीयाः, अर्चिताः अर्च्यमाना वा । पुंसि-पूजितवान्-वन्तौ-वन्तः । अर्चितवान्-वन्तौ-वन्तः । स्त्रियाम्-पूजितवती-वत्यौ वत्यः । अर्चितवती-वत्यौ वत्यः ।

४३. कर्तरि - खलाः (दुर्जनाः) सज्जनान्पीडयन्ति पीडितवन्तः - ताडयन्ति ताडितवन्तः - कर्मणि - खलैः (दुर्जनैः) सज्जनाः पीडचन्ते पीडयितव्याः पीडनीयाः पीडिताः पीडचमाना वा - ताडचन्ते ताडयितव्याः, ताडनीयाः, ताडिताः, ताडचमाना वा ।

४४. कर्तरि - वाल्मीकिः रामचरितं वर्णयति वर्णितवान् - कर्मणि - वाल्मीकिना रामचरितं वर्ण्यते वर्णयितव्यम्, वर्णनीयम्, वर्ण्यम्, वर्णितम्, वर्ण्यमानम् वा । स्त्रियाम्-वर्णितवती-त्यौ-त्यः । वर्णिता वर्णिते वर्णिताः ।

अतिवादाँस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥

अकर्मकधातुरुपसर्गवशात्सकर्मकः । तस्य वाक्यम् ।
अधःसमुल्लिखिताः शब्दा वाच्यपरिवर्तने
विज्ञेयाः

युष्मद्		अस्मद्		तद्	
द्वितीयायाः - प्रथमा		द्वितीयायाः - प्रथमा		द्वितीयायाः - प्रथमा	
त्वाम् -	त्वम्	माम् -	अहम्	तम् -	सः
युवाम् -	युवाम्	आवाम् -	आवाम्	तौ -	तौ
युष्मान् -	यूयम्	अस्मान् -	वयम्	तान् -	ते

४५ कर्तरि - स त्वामनुभवति, अनुभूतवान्, अनुभूतः - कर्मणि - तेन त्वमनुभूयसे, अनुभवितव्यः अनुभवनीयः, अनुभूतः, अनुभूयमानः ।

४६. कर्तरि - तौ युवामनुभवतः, अनुभूतवन्तौ, अनुभूतौ - कर्मणि - ताभ्यां युवामनुभूयेथे अनुभवितव्यौ, अनुभवनीयौ, अनुभूतौ, अनुभूयमानौ ।

४७. कर्तरि - ते युष्माननुभवन्ति, अनुभवन्तः, अनुभूताः - कर्मणि - तैर्यूयमनुभूयध्वे अनुभवितव्याः, अनुभवनीयाः, अनुभूताः, अनुभूयमानाः ।

४८. कर्तरि - त्वं मामनुभवसि, अनुभूतवान्, अनुभूतः - कर्मणि - त्वया अहमनुभूये अनुभवितव्यः अनुभवनीयः, अनुभूतः, अनुभूयमानः ।

४९. कर्तरि - युवामावानुभवथः, अनुभूतवन्तौ, अनुभूतौ - कर्मणि - युवाभ्या-मावामनुभूयावहे अनुभवितव्यौ, अनुभवनीयौ, अनुभूतौ, अनुभूयमानौ ।

५०. कर्तरि - यूयमस्माननुभवथ, अनुभूतवन्तः, अनुभूताः - कर्मणि - युष्माभिर्वयमनुभूयामहे अनुभवितव्याः, अनुभवनीयाः, अनुभूताः, अनुभूयमानाः ।

५१. कर्तरि - अहं तमनुभवामि, अनुभूतवान्, अनुभूतः - कर्मणि - मया सोऽनुभूयते अनुभवितव्यः अनुभवनीयः, अनुभूतः, अनुभूयमानः ।

५२. कर्तरि - आवां तावनुभवावः, अनुभूतवन्तौ, अनुभूतौ - कर्मणि - आवाभ्यां तावनुभूयेते अनुभवितव्यौ अनुभवनीयौ अनुभूतौ अनुभूयमानौ ।

५३. कर्तरि - वयंताननुभवामः अनुभूतवन्तः अनुभूताः - कर्मणि - अस्माभिस्तेऽनुभूयन्ते अनुभवितव्याः, अनुभवनीयाः, अनुभूताः, अनुभूयमानाः । परिभवति=निन्दति ।

१. आ+श्लिष् २. अधि+स्था ३. अधि+शी ४. उप+आस्
५. अनु+जनी ६. अनु+जृ ७. आ+रुह् ८. उप+वस्

गत्यर्थाकर्मक. इति सूत्रं दर्शनीयम् - ३-२ ।

१. कर्तरि - हरिर्लक्ष्मीमाश्लिष्यति आश्लिष्टवान्, आश्लिष्टः - कर्मणि - हरिणा लक्ष्मीराश्लिष्यते, आश्लेषितव्या, आश्लिष्टा, आश्लिष्यमाना । भक्तो हरिं संश्लिष्यति = आश्रयति । संश्लिष्टः = आश्रितः ।

२. कर्तरि - विष्णुर्वैकुण्ठमधितिष्ठति अधिष्ठितवान्, अधिष्ठितः - कर्मणि - विष्णुना वैकुण्ठोऽधिष्ठीयते, अधिष्ठातव्यः, अधिष्ठितः, अधिष्ठीयमानः ।

३. कर्तरि - हरिः शेषमधिशेते, अधिशयितवान्, अधिशयितः - कर्मणि - हरिणा शेषोऽधिशय्यते, अधिशयितव्यः, अधिशयनीयः, अधिशयितः, अधिशय्यमानः ।

४. कर्तरि - शैवाः शिवमुपासते, उपासितवन्तः, उपासिताः - कर्मणि - शैवैः शिव उपास्यते, उपासितव्यः, उपासनीयः, उपासितः, उपास्यमानः ।

५. कर्तरि - लक्ष्मणो राममन्वजायत, अनुजातवान्, अनुजातः - कर्मणि - लक्ष्मणेन रामोऽनुजायते अनुजनितव्यः, अनुजातः, अभिजातः अनुजायमानः । पुण्यवान् ब्रह्मकुलमभिजायते - पुण्यवता ब्रह्मकुलमभिजायते, अभिजनितव्यम्, अभिजातम् ।

६. कर्तरि - ईशो विश्वमनुजृणाति, अनुजीर्णवान्, अनुजीर्णः - कर्मणि - ईशेन विश्वमनुजीर्यते, अनुजरि(री)तव्यम्, अनुजीर्णम्, अनुजीर्यमाणम् ।

७. कर्तरि - विष्णुर्गरुडमारोहति, आरूढवान्, आरूढः - कर्मणि - विष्णुना गरुड आरू ह्यते, आरोढव्यः, आरोहणीयः, आरूढः, आरु ह्यमाणः, सुरोहः, दूरोहः । चटति= आरोहति । अधिरोहति, अधिरूढवान्, अधिरूढः ।

८. कर्तरि - भक्त एकादशीमुपवसति, उपोषितवान्, उपोषितः - कर्मणि - भक्तेन एकादशी उपोष्यते, उपवस्तव्या, उपवसनीया, उपोषिता, उपोष्यमाणा । अयं धातुरत्र उपवासार्थे (अनशनार्थे) गृह्यते । भोजनाभावेन उपवसति चेत्सप्तमी-वने उपवसति ।

क) गत्यर्थकधातुभ्यो गत्यर्थाकर्मक. इति सूत्रेण भूतकर्तरि भूतकर्मणि च क्तेन निष्पन्नान्युपसर्गेण रहितानि सहितानि च क्रियापदानि भवन्ति । तानि विशेषणान्यपि ज्ञेयानि । विशेषणत्वात्तानि विशेष्यस्य वचनानुसारं प्रयुज्यन्ते । एतानि कर्तृवाच्ये प्रयुक्ते सति कर्तृप्रथमान्तानुसारं कर्मवाच्ये प्रयुक्ते सति कर्मप्रथमान्तानुसारं च चिन्त्यानि । उभयोरर्थयोर्निष्पन्ना क्रिया अधः सङ्गृह्यन्ते प्रयुज्यन्ते च । पुंसि गतः, समागतः, आगतः, उपागतः, उपगतः, व्रजितः, ऋतः, स्वृतः, यातः, इतः, प्रतीतः, अतीतः, उपेतः, समितः, प्रविष्टः, सृतः, चलितः, लङ्घित, रूढः, आरूढः, ऊढः, आप्तः, प्राप्तः, अनुप्राप्तः, अवाप्तः, प्राप्तः, संप्राप्तः, अनुगतः, पतितः (गतः) उपपन्नः, प्रपन्नः, आयातः, आनीतः, अत्यस्तः (अतिक्रान्तः), आपन्नः, उपाश्रितः, संश्रितः, आश्रितः, उपाश्रितः, श्रितः, अनुश्रितः, समुपाश्रितः, समाश्रितः, तीर्णः, प्रविष्टः, अतिक्रान्तः इत्यादि । नञ्समासेन - अनागतः, अनाश्रितः अनुपपन्नः अनीतः अनुपश्रितः इत्यादयः । एषां स्त्रियां रमावत् नपुंसके ज्ञानवत् रूपाणि भवन्ति । एषां कर्तृवाच्ये प्रयोगः-

पुंसि - स त्वमहं भवान्वा गङ्गां गतः (यातः, प्राप्तः, व्रजितः, इतो वा) । स त्वमहं भवान्वा फलं प्राप्तः इतो वा । तौ युवामावां भवन्तौ वा ग्रामं गृहं वा गतौ (या तौ प्राप्तौ वा) । ते यूयं वयं भवन्तो वा फलानि पुस्तकानि वा प्राप्ताः (अधिगताः) । कृष्णो वैकुण्ठं स्वधाम वा शिवः कैलाशं ब्रह्मा ब्रह्मलोकं च गताः, याता वा । भ्रातरौ ग्रामं गतौ । छात्राश्छात्राश्च विद्यालयं गताः याता वा । मूषको विवरं प्रविष्टः । काको वृक्षमारूढः । रामः पञ्चवटीं यातः । रामकृष्णौ मथुरां गतौ यातौ वा । भक्ता मन्दिरं याताः । ये वै पराधीनतां यातास्ते वै जीवन्ति के मृताः । अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भावापवर्गं तव योगिभावितम् । नापितो गृहं गतः । सोऽपि निद्रावशं नीतः । भृत्यो भारमूढः । स जनो

दुःखमतीतः (पारितः)। बालःकूपं पतितः (गतः)। स नरः प्रलयं (पञ्चत्वं) गृहं वा यातः गतो वा। स त्वमहं वा संशयमापन्नः। जनो देवो वा स्वर्गं गतः, उपपन्नो वा। स कृष्णं श्रितः। अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स्वृतः (गतो) भासं ज्योतिषाम्। त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति। दिवं रुद्रा उपश्रिताः। स स्वर्गं प्राप्तः (यातः गतो)। वार्ता कथा वा पूर्णताङ्गता। समाचाराः पूर्णताङ्गताः। प्राणिनो विलयं गताः। आपदोऽस्तं गताः=नष्टाः। मूषिको विवरं गतः। तीर्णाः स्वयं भीमभवार्णवं जनाः। तौ युवामावां भवन्तौ वा नदीं तीर्णौ। स त्वमहं भवान्वा नदीं तीर्णः। धीवरो नदीं गङ्गां वा तीर्णः। भक्तो भवार्णवस्य पारं गतः (यातः)। पुत्रो नगरं गतः। भगवन्तमितोऽस्म्यहम्। सूर्योऽस्ताचलं गतः। सूर्योऽस्तङ्गतः। चन्द्रोऽस्ताचलं गतः। चन्द्रोऽस्तङ्गतः। स्त्रियाम् - बालिका नारी वा नदीं तीर्णा। पुत्री गृहङ्गता। रमा पर्वतं लङ्घिता। देवी फलं प्राप्ता। बधूर्जलमानीता। सीता मन्दिरङ्गता इत्यादिवाक्यं सिद्धयति। क्लीबे - जलं नीचैर्गतम्। कार्यं पूर्णङ्गतम्। नयने विकृतिं प्राप्ते। धनं जनमुपपन्नमित्यादि। कर्मणि - तेन फलं प्राप्तम्। पुत्रेण गृहङ्गतम्। ज्ञानं गुरोरापन्नम्। कार्यं पूर्णं गतम्।

ख) नमनार्थकान्नम्धातोः गत्यर्थाकर्मक. इति सूत्रेण भूतकर्तरि भूतकर्मणि च क्तः। नमनार्थेन गत्यर्थोऽपि बोध्यते - नम् = नतः, प्रणतः, आनतः। वदि-वन्द्=वन्दितः, अभिवन्दितः। १) कर्तरि पुंसि - नित्यं त्वां प्रणतोऽस्म्यहम्। चण्डिके त्वां नता वयम्। सद्गुरुं प्रणतोऽस्म्यहम्। पतञ्जलिं प्राञ्जलिरानतोऽस्मि। अहं मातरपितरौ मातरं वा नतः। भवान् स त्वमहं वा गुरुं वन्दितः। भवन्तौ तौ युवामावां वा शिवमानतौ। भवन्तस्ते यूयं वयं वा कृष्णमभिवन्दिताः। २) कर्मणि - तेन कृष्णो नतः पुत्रेण मातापितरौ वन्दितौ। तैः शिव आनतः। भूतकर्तरि क्तवतुः - नतवान्, प्रणतवान्, आनतवान्, वन्दितवान् अभिवन्दितवान्। स्त्रियाम्-वती-वत्यौ-वत्यः।

स्त्रियाम् - ब्रह्मपुत्रं नताऽस्मि। नारी देवं प्रणता। नता-ते-ताः। प्रणता-ते-ताः। आनता-ते-ताः। वन्दिता-ते-ताः। अभिवन्दिता-ते-ताः। नम्धातोः क्रियायोगे द्वितीया भवति चतुर्थी च - नतोऽहं सर्वदा देव तुभ्यम्। देव्यै नमामि सततं विनयेन चाहम्। वयं तुभ्यं नताः स्मः।

ग) सकमर्कधातुभ्यो भूतकर्तरि क्तवतुप्रत्ययेन निष्पन्नानां विशेषणबोधकानां क्रियापदानां कर्तृवाच्ये वाक्यानि। कर्तुर्वचनं सदा विचारणीयम्। पुंसि - स त्वमहं भवान्वा मन्दिरं यातवान् गतवान्, इतवान्, व्रजितवान् वा)। स पर्वतं लङ्घितवान्। रामोऽयोध्यां गतवान् यातवान्वा। तौ युवामावां भवन्तौ वा पुष्पाणि नीतवन्तौ। ते यूयं वयं भवन्तो वा शिवमुपाश्रितवन्तः। कृष्णो मथुरां गतवान्। शिवः कैलाशं यातवान्। देवाः स्वर्गं गतवन्तः। तौ युवामावां भवन्तौ वा गिरिं लङ्घितवन्तौ ते यूयं वयं भवन्तो वा मन्दिरं गतवन्तो विदेशं च चलितवन्तः। एवं प्रकारेण गत्यर्थधातूनां प्रयोगः गत्यर्थभिन्नानां धातूनां प्रयोगस्त्वेवमेवप्रकारेण प्रयोगः क्रियते - स त्वमहं भवान्वा नाटकं दृष्टवान् विलोकितवान्, ईक्षितवान्वा)। तौ युवामावां भवन्तौ वा स्वस्वपुस्तकं लब्धवन्तौ प्राप्तवन्तौ वा। भक्तः शिवस्य दर्शनं लब्धवान्। ते यूयं वयं भवन्तो वा फलानि दृष्टवन्तः। ब्रह्मा विश्वं (संसारं) रचितवान् प्राणिँश्च सृष्टवाँश्च विष्णू रक्षितवान् (त्राणवान् पालितवान्, गुप्तवान्) शिवश्च संहृतवान् (नाशितवान्) भक्तो हरिं नतवान्, अभिवन्दितवान्वा। अयं सांसारिकदुःखानि तीर्णवान्। रामलक्ष्मणौ समुद्रं तीर्णवन्तौ ते सर्वे भवसागरं तीर्णवन्तः। बालो नदीं तीर्णवान्। रामः श्यामश्च मातापितरौ मातरं पितरं च नतवन्तौ अभिवन्दितवन्तौ वा। आवां वृक्षान्सिक्तवन्तौ। ते कृष्णं सेवितवन्तः। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च पुराणानि श्रुतवन्तः। ब्राह्मणाः क्षत्रिया वैश्याश्च वेदान् पठितवन्तः (अधीतवन्तः) ब्रह्मचारी यमनियमान्सेवितवान्। वैज्ञानिको नवीनं दूरभाषायन्त्रमाविष्कृतवान्। वयं सर्वे जना धर्मं कृतवन्तः। इमे फलानि लब्धवन्तः। एतौ देवं पूजितवन्तौ। वैज्ञानिका नवीनं विषयमन्विष्टवन्तः एवं सर्वं वाक्यं समाधेयम्।

स्त्रियाम् - माता ग्रामं गतवती । पार्वती शिवं लब्धवती । बालिका नदीं तीर्णवती । छात्रा विद्यालयं यातवती । पुत्री ओदनं खादितवती । नार्यौ गीतं (गानं) गीतवत्यौ । नार्यः गीतानि गीतवत्यः । जनता घटनां नाटकं च दृष्टवती वार्तां च श्रुतवती । माता पुत्रं पुत्रीं (पुत्राय पुत्र्यै) च धर्मं कथितवती, उक्तवती वा । सा वस्त्रं परिहितवती । ते कृष्णगाथां आकर्णितवत्यौ (श्रुतवत्यौ) । ताः कार्याणि कृतवत्यः (विहितवत्यः) । प्रकृतिर्जगद्रचितवती । नार्यो जलमानीतवत्यः । पुत्र्यः मन्दिरं गतवत्यः । नारी गृहं भूषितवती । एवं सर्वं वाक्यं सिद्ध्यति ।

नपुंसके - अन्नं फलं दुग्धं जलं वा उदरं पूर्णवत् । फलानि गृहं पूर्णवन्ति । कुसुमानि पात्रमधिष्ठितवन्ति । फले भूमौ पतितवती । फलानि भूमौ पतितवन्ति । क्लीबे एवंप्रकारेण गतवत् गतवती गतवन्ति, फलितवत् फलितवती फलितवन्ति, इति रूपाणि चिन्त्यानि ।

घ) सकर्मकधातोः कर्मणोऽविवक्षायां भूतभावे क्तान्तेन निष्पन्नस्य क्रियापदस्य वाक्यम् - राजपुत्रैरुक्तम् । युष्माभिःकृतम् । तै रक्षितम् । तेन गतम् । हरिणाऽऽश्लिष्टम् । विष्णुनाऽधिष्ठितम् । कृष्णेनाधिशयितम् । भक्तैरुपासितम् । युवाभ्यामुपोषितम् । भगवताऽनुजीर्णम् । त्वयाऽऽरूढम् । ताभ्यां श्रुतं भाषितं चेत्यादि ।

ङ) अकर्मधातोर्भूतभावे क्तान्तेन निष्पन्नेन क्रियापदेन वाक्यम् - फलेन नष्टम् । तेन मया त्वया वा भूतम् । भवता जागरितम् उषितम् भीतम् वृद्धमित्यादि ।

च) सकर्मकधातोः कर्मणोऽविवक्षायामकर्मकधातोश्च भूतभावे यथा क्तान्तेन क्रियापदं निष्पद्यते तथैव सकर्मकाकर्मकधात्वोश्च क्लीबविशिष्टे भावे कालसामान्ये क्तान्तेन क्रियापदं निष्पद्यते । वाक्यविधौ न भिन्नो नियमः । अर्थोऽपि समान एव भवति । विशेषस्थितावेवैषां स्वरूपं विचार्यते । यथा - तैर्जल्पितम् । मया उक्तम् । रामेणाभिहितम् । विष्णुना शयितम् । रमया हसितम् । बध्वा लज्जितमित्यादि ।

छ) भावे खल्प्रत्ययेन निष्पन्नं पदं क्लीबैकत्वं ज्ञेयम् । यथा-सुवचम् ।

परिशिष्टम्

१- सकर्मकधातोः कर्तृवाच्यात्कर्मवाच्ये परिवर्तिता तिङन्ताऽतिङन्ता (तिङ्रहिता) च क्रिया प्रथमान्तानुसारं प्रयुज्यते । कर्मणि कर्तुः परिवर्तनेन तृतीयान्तो जातः स्मरणीयः । क) कर्मवाच्ये तिङन्तक्रियाया वाक्यानि - त्वया मया अन्यैश्च भवान्नम्यते, भवतौ नम्येते, भवन्तो नम्यन्ते । बहुभिः पठ्यते वेदः श्रूयते बहुभिर्जनैः । वित्तेन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ॥ मृदुना रक्ष्यते भूपःसुस्त्रिया रक्ष्यते गृहम् । सङ्ग सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयताम् । शान्त्यादिःपरिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ॥ दीयतां दीयतां कर्णो नीयतां नीयतां वचः । गीयतां गीयतां नित्यं हरेर्नामैव केवलम् ॥ हे नाथ ! मया विधिना तीर्थादिसेवनमहो नाकारि । भक्तेन स पूज्यते, तौ पूज्येते, ते पूज्यन्ते, त्वं पूज्यसे, युवां पूज्येथे, यूयं पूज्यध्वे, अहं पूज्ये, आवां पूज्यावहे, वयं पूज्यामहे वा । एवं सर्वेषु लकारेषु सर्वेषु पुरुषेषु सर्वेषु वचनेषु च वाक्यं समाधेयम् । अत्र सन्देहो न विधेयः ।

ख) कर्मणि निष्पन्नानां तिङ्भिन्नानां कृत्यान्तक्रियापदनां वाक्यम् - तेन ताभ्यां तैर्वा स त्वमहं भवान्वा सेवितव्यः (सेवनीयः सेव्यो वा) । तौ युवामावां भवन्तौ वा सेवितव्यौ (सेवनीयौ सेव्यौ वा) । ते यूयं वयं भवन्तो वा सेवितव्याः (सेवनीया, सेव्याः वा) । आत्मा वा अरे श्रोतव्यः मन्तव्यः निदिध्यासितव्यश्च । हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः । कुत्र कार्यो मया यज्ञः तत्स्थलं वाच्यतामिह । महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः । विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः । शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्ग्नान्येन केनचित् ॥ मयाऽस्य प्रतिकारः कर्तव्यः (करणीयः कार्यो वा) । तस्मादेकेन मनसा भगवान्सत्वतां पतिः । श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च सर्वदा ॥ सदा सर्वात्मना कृष्णो वन्द्यः कालादिदोषनुत् । गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् । नेयं सज्जनसङ्गे चित्तं

देयं दीनजनाय च वित्तम् ॥ न वाच्यं वाक्यमीदृशम् । अकृत्यं नैव कर्तव्यं न नोच्चार्यं कठिनं वचः । पितृभिर्मातृभिश्चैताः पतिभिर्देवरैस्तथा । पूज्या भूषयितव्याश्च नित्यकल्याणमीप्सुभिः ॥ एवं स्वयं प्रयोगः कार्योऽन्यैश्च कृतो ज्ञेयः ।

ग) कर्मणि तिङ्भिन्नानां क्तान्तक्रियापदानां वाक्यम् । सदा कर्ता परिवर्तनेन तृतीयान्तो भवतीति स्मरणीयम् - तेन ताभ्याम् तैः, जनेन जनाभ्यां जनैः, भक्तेन भक्ताभ्यां भक्तैर्वा स त्वमहं भवान्वा सत्कृतः, आवां सत्कृतौ, वयं सत्कृताः वा । तैर्भवान्निरस्तः । तेन स भक्षितः । त्वया सत्यमभिहितम् (उक्तम्) । त्वया भवता वा युक्तमुक्तम् । मया नीतिसारमाकर्णितम् । भवता तेन जनेन वा उक्तं वचनं युक्तम् । मुनिना रविराहूतः । त्वया छलः (कपटः) कृतः । मया सर्वं त्यक्तम् । मया युक्तं (ठीक) कृतम् । त्वयाऽयुक्तं (वेठीक) कृतम् । मयैकेन (व्याघ्रेण) गजो व्यापादितः । स संश्रयो मया विदितः । केनापि स त्वमहं भवान्वा प्रसंशितः । तौ युवामावां भवन्तौ वा प्रसंशितो । ते यूयं वयं भवन्तो वा प्रसंशिताः । भवता इयं ग्रन्थमाला कुत्र लब्धा । पूजा कृता नहि कदापि मया त्वदीया । रमया धर्मः कृतोऽन्यस्मै प्रोक्तश्च । सर्वैरहं सत्कृतः । भवान्मया नतः, भवन्तौ नतौ, भवन्तो नता वा । पुत्र्या जलं फलं वा नीतम् , फले नीते, फलानि नीतानि वा । त्वया विद्या नाधीता । एतत्कर्म युक्तमुचितं वा । मया कार्यं सम्पन्नम् ,त्वया कृतमेतत्कार्यं न युक्तं नोचितं वा । तेन मया भवता वा युक्तमुक्तम् । न युक्तं भवता कृतम् । त्वया युक्तं न भाषितम् (उक्तम्) । तेन युक्तं न कृतम् । लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् । एवं स्वयं प्रयोगःकार्योऽन्यैश्च कृतो ज्ञेयः ।

स्मरणीयो विषयः - कर्तरि निष्पन्नयोः क्तक्तवतुप्रत्ययान्तयोः पदयोः कर्मणि निष्पन्नस्य कृत्यान्तस्य क्तान्तस्य खलन्तस्य च पदस्यान्तेऽर्थस्याभिप्रायं विचार्यापेक्षानुसारं कर्तरि निष्पन्नानां भू अस् वृत् विद् (विद्य) धातूनां मध्ये कस्याप्येकस्य धातोः कर्मणि निष्पन्नानां दृश् प्रआप् लभ् मन् श्रु इत्यादिधातूनां मध्ये कस्याप्येकस्य धातोश्च कालानुसारस्य तिङन्तं क्रियापदं प्रयोक्तुं शक्यते । क्तक्तवतुप्रत्ययान्तक्रिया समापिका क्रिया बोध्या । किञ्च एषा क्रिया सामान्ये भूतकालार्थे निष्पन्नाऽस्ति ।

४-२-५ कर्मणो भेदाः

व्याकरणाचार्यैः कर्मणस्त्रयो भेदाः स्वीक्रियन्ते निवर्त्यकर्म (उत्पद्यमानकर्म) विकार्यकर्म प्राप्यकर्म चेति । एषां स्वरूपमधः प्रस्तूयते ।

१- निवर्त्यकर्म - पूर्वममूर्तरूपे स्थितं यद्वस्तु तत् क्रियाभिः (कर्मभिः) यदा मूर्तरूपे निवर्त्यते (निष्पद्यते) । तत् निवर्त्यकर्म प्रोच्यते । यथा -

१. स कटं करोति कुरुते कृतवान् - तेन कटः क्रियते कर्तव्यः करणीयः कार्यः कृतः क्रियमाणः । खल् - ईषत्करः सुकरो दुष्करो वा । अत्र कटो निवर्त्य कर्म प्रोच्यते । कृदन्तक्रिया प्रथमाया रूपानुसारं चिन्त्या ।

२. जना गृहं रचयन्ति रचितवन्तः - निर्मीमते निर्मीतवन्तः - जनैर्गृहं रच्यते रचयितव्यं, रचितं, निर्मीयते निर्मातव्यं निर्मितं निर्मीयमाणं वा ।

३. भवान् पत्रं लिखति लिखितवान् - भवता पत्रं लिख्यते लिखितव्यम्, लेखनीयम्, लिखितम्, लिख्यमानम्, सुलिखं दुर्लिखं वा ।

४. कुलालो घटं निर्माति निर्मितवान् - कुलालेन घटो निर्मीयते निर्मातव्यः निर्मीतः निर्मीयमाणो वा । तन्तुवायो वस्त्रं निर्माति ।

५. धार्मिकः पुण्यं लभते लब्धवान् - धार्मिकेण पुण्यं लभ्यते लब्धव्यम्, लभनीयम्, लभ्यम्, लब्धम्, लभ्यमानम्, सुलभम्, दुर्लभं वा । पुण्यमपि कर्मणा जातमिति मनसा स्मियते ।

६. कविः कवितां रचयति रचितवान् - कविना कविता रच्यते रचयितव्या रचनीया रचिता रच्यमाना सुरचा दूरचा वा ।

२- विकार्यकर्म - आदौ प्रकृतेर्मूलरूपं गुणाधानेन उच्छेदनेन वा परिवर्त्य यत्स्वरूपं स्थिरीक्रियते सा विकृतिः (विकारः) प्रोच्यते । तस्या यत्कर्म विधीयते तद्विकार्यकर्म भवति । प्रकृतेर्मूलरूपस्य संस्कारेण यत्स्वरूपं स्थिरीक्रियते तद्गुणाधानं तस्या विनाशेन यत्स्वरूपं स्थिरीक्रियते तदुच्छेदनं च प्रोच्यते । तयोरधःस्वरूपं प्रस्तूयते -

१-क) गुणाधानम् - प्रकृतौ सुवर्णं रजतं ताम्रं काष्ठं पाषाणो मृत्तिका कार्पासः पलालश्चेत्यादयः सदृशाः पदार्था गृह्यन्ते । तेषां संस्कारेण यत्स्वरूपं स्थिरीक्रियते तद्गुणाधानं ज्ञेयम् । गुणाधाने केवलं प्रकृतिः संस्क्रियते न तूच्छेदनम् । यथा-सुवर्णस्य कुण्डलादीनि, पाषाणस्य ताम्रस्य रजतस्य काष्ठस्य च मूर्तयः, मृत्तिकाया घटादयः पलालस्य कटादयश्च निर्मीयन्ते । निर्मीतानि वस्तूनि गुणाधानमागतानि ज्ञेयानि । गुणाधानकृतानि वस्तूनि विकृतयः प्रोच्यन्ते ।

१-ख) उच्छेदनम् - प्रकृतेर्मूलरूपस्य विनाशनमुच्छेदः । प्रकृतेरुच्छेदनेन भस्म चूर्णं वा भवति । यथा - काष्ठस्य तृणस्य पलालस्य च भस्म पाषणस्य काष्ठस्य च चूर्णानि खण्डानि च भवन्ति । चूर्णेन धूलिरपि ज्ञेया । तण्डूलानामोदनं माषाणां सूपः पयसः कुर्चिका चेत्यादयः पदार्था जायन्ते । अत्रापि प्रकृतेरुच्छेदनेन यत्स्वरूपं लभ्यते सा विकृतिरेव ज्ञेया ।

२- प्रकृतिविकृत्योर्वाच्यपरिवर्तनस्य नियमः - अत्र प्रकृतेः "अकथितं च" इति सूत्रेण विकृतेः "कर्तुरीप्सितमं कर्म" इति सूत्रेण च कर्मसंज्ञा भवति । तयोः कर्मणोर्वाच्यपरिवर्तनेऽयं नियमः प्रोच्यते - प्रकृतेर्विकृतेर्वापि यत्रोक्तिः स्याद्द्वयोरपि । गृह्णाति वाचकः संख्यां प्रकृतेर्विकृते[1]र्नहि ॥

यत्रैकस्मिन्वाक्ये प्रकृतेर्विकृतेश्च द्वयोरेकत्र उक्तिः (प्रयोगः) स्यात्तत्र वाच्यपरिवर्तने वाचकः प्रकृतेः संख्यां गृह्णाति न तु विकृतेः । संख्यया एको द्वौ त्रय इत्यादयो ज्ञेयाः ।

१-क) गुणाधानस्योदाहरणम् - कृधातोः करोत्यर्थे प्रयुक्तस्य विपूर्वकस्य धाधातोश्चरधातोश्चार्थः समानो ज्ञेयः-

१. सुवर्णकारः सुवर्णं (प्रकृ.) कुण्डले (विकृ.) करोति कुरुते कृतवान् - सुवर्णकारेण सुवर्णं कुण्डले क्रियते कर्तव्यम्, करणीयम्, कार्यम्, कृतम्, क्रियमाणम्, ईषत्करम्, सुकरम्, दुष्करं वा-विधा-विदधाति विधत्ते विहितवान् - विधीयते विधातव्यम् विहितम्, विधीयमानं वा । शतृशनाच्-कुर्वन् कुर्वाणः । क्त्वा-कृत्वा । तुमुन्-कर्तुम् । शतृशानचौ- विदधत् विदधानः । क्त्वो ल्यप्-विधाय । तुमुन्-विधातुम् ।

२. नारी पलालं(प.) कटं (वि.) करोति कुरुते कृतवती - नार्या पलालः कटं क्रियते कर्तव्यः करणीयः कार्यः कृतः क्रियमाणः, ईषत्करः सुकरो दुष्करो वा । शेषमुपरिवत् । चरति समाचरति चरितवान् समाचरितवान् - स्त्रियाम् - वती - चर्यते समाचर्यते चरितव्यम्, समाचरितव्यम्, समाचरणीयम्, चरितः समाचरितः सुसमाचरः, दुःसमाचरः सुचरः, दुश्चरो वा ।

[1] भर्तृहरिः - वाक्यपदीयम्

३. तक्षकः काष्ठं (प्र.) पीठं (वि.) पाषाणं ताम्रं रजतं सुवर्णं वा (प्र.) मूर्तिं (वि.) करोति कुरुते कृतवान् । कुलालो मृत्तिकां (प्र.) मूर्तिं घटं (वि.) च विदधाति विधते विहितवान् ।

१-ख) उच्छेदनस्योदाहरणम्[1] - क) रामः, पलालं तृणं काष्ठं वा (प्र.) भस्म करोति कुरुते कृतवान् - रामेण पलालः काष्ठं वा भस्म क्रियते कर्तव्यः - व्यम्, करणीयः-यम्, कार्यः-र्यम् कृतः-तम् क्रियमाणः- णम्, ईषत्करः-रम्, सुकरः-रम्, दुष्करः-रम् ।

ख) स पाषाणं काष्ठं वा चूर्णं चकार कृतवान्-तेन पाषाणः काष्ठं वा चूर्णं चक्रे । अन्यानि पदानि उपरितश्चिन्त्यानि ।

ग) रमा तण्डुलान् (प्र.) ओदनं (वि.) पचति पचते पक्ववती, पुं-पक्ववान्-रमया तण्डुला ओदनं पच्यन्ते पक्तव्याः पचनीयाः पचेलिमाः पाच्याः पक्वाः पच्यमानाः । पचन् पचमानः पक्तुम् पक्त्वा । स्त्रियाम्-पचन्ती पचमाना ।

संगृहीतान्यन्यान्युदारणानि - एकं पिण्डं द्वौ भागौ द्वौ द्वौ भागौ वा कृत्वा (विधाय प्रकृत्य हित्वा वा) । मूलं धनं त्रीँश्चतुरो वा भागान्कृत्वा विधाय[2] वा । एकं वृक्षं मञ्चं खट्वां नावं वा कृत्वा विधाय वा । सा साधूँश्च खलान्करोति विदुषो मुर्खान्हितान्द्वेषिणः प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् । एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा । मूकं करोति वाचालमीश्वरः कृपया यदा। स एव मानवः पश्चादीश्वरं परिनिन्दति ॥ रङ्कं करोति राजानं राजानं रङ्कमेव च । धनिनं निर्धनं चैव निर्धनं धनिनं विधिः ॥ अधनं सधनं दैवं सधनं निर्धनं तथा । अविद्यं च स सविद्यं च करोति स्वस्य लीलया ॥ अशक्तं जनं शक्तमशक्तां नारीं शक्तां वा कर्तुं (विधातुम्) दैवादन्यः कः शक्तो (समर्थः ईश्वरः, क्षमो वा)ऽस्ति । अधनिनं धनिनं विधातुं (कर्तुं) लक्ष्म्या अन्या का देवी शक्ता समर्था ईश्वरी क्षमा वाऽस्ति । अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् । दुर्जनं सज्जनं कर्तुमुपायो नहि भूतले । अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च । शुभं वेत्त्यशुभं पापं भद्रं दैवहतो नरः ॥

संस्कार्यकर्म - यत्र पदार्था वस्तूनि वा मार्जनादिभिः क्रियाभिः शुद्धानि निर्मलानि च क्रियन्ते ते,तानि वा । यथा - नारी भाण्डानि मार्जयति । जनो गृहमलङ्करोति संस्करोति वा । पुत्री भूषणानि समुज्वलयति । ऋत्विक् यज्ञपात्राणि पुनाति (पवते) । अहं पूजासामग्रीं कर्मभूमिं च प्रोक्षामि । इदं कर्म विकार्यकर्मण्यन्तर्भाव्यत इति तत्र भवान् सोमनाथसिग्देलो ब्रूते - प्रतिसंस्कृता सिद्धान्तकौमुदी - पूर्वार्धे पृ.१५२ ।

३- प्राप्यकर्म - यत्र यत्स्वरूपं कर्मणा न निष्पद्यते तत् । यथा = रामो ग्रामं याति । श्यामो वेदं पठति (अधीते) । ब्राह्मणो गायत्रीं जपति । रमा सूर्यं पश्यति । बालः पाषाणं गृहं (गृहे) नयति। भक्त ईश्वरं नमति । मुनिर्ब्रह्म चिन्तयति । जना जलं पिबन्तीत्यादयः ।

---

[1] १-क, ख - सोमनाथ सिग्देलः - प्रतिसंस्कृतासिद्धान्तकौमुदी - प्रकाशकः - नेपाल एकेडेमी नेपाल, प्रथमसंस्करण वैक्रमाब्दः २०१५ पृ.१५३ उद्धृतम् ।

[2] विशेषः - विधायाः प्रकारो भागश्चार्थोऽस्ति । प्रकारे भागे द्रव्यान्तरापादाने चार्थे धा विधीयते । धाप्रत्ययान्तं पदमव्ययं ज्ञेयम् यथा - एकं राशिं द्वेधा (द्वौ राशी प्रकारौ भागौ वा) त्रेधा (त्रीन् राशीन् प्रकारान् भागान्वा) वा करोति करोषि करोमि वा । एवमैकध्यम् एकधा, द्वैधम्, द्विधा, त्रैधम्, त्रिधा त्रेधा, चतुर्धा पञ्चधा षोढा-षड्धा सप्तधा अष्टधा नवधा दशधा एकादशधा सहस्रधा इत्यादि । य एकं रूपं बहुधा करोति । द्वेधा= दुइभाग - दो भाग । त्रेधा - तीन भाग । अनेकधा=अनेकप्रकार । ख) त्वं पञ्च भागान् राशीन्वा एकधा ऐकध्यं वा कुरु (विधेहि) कुरुष्व वा । भवान् त्रीन् चतुरो वा भागान् राशीन्वा ऐकध्यमेकधा वा विदध्यात् (कुर्यात्) । अहमेकं भागमनेकधा, अनेकं भागमेकधा वा करोमि (विदधे विदधामि) । अनेकं द्रव्यमेकं भूत्वा, एकधाभूय, एकधा भूत्वा एकधा भावम् । अनेकं द्रव्यमेकं कृत्वा (एकीकृत्य) एकधाकृत्य एकधाकारम् । नाधार्थप्रत्यये च्व्यर्थे ३।४।६२॥इति सूत्रेण-भूकृधातुभ्यां क्त्वाणमुलौ स्तः । क्त्वः स्थाने ल्यप् च । विष्णुस्त्रेधा निदधे पदम् । सर्वाणि धनानि षोढा (षट् भागान्) कृत्वा षट्सु पुत्रेषु विभजतु भवान् । सा बाला सहस्रधा बोधनेन किञ्चिद् दुग्धं पीतवती । इत्यादि ।

४-२-६ अनीप्सितं (अनभिलषितं) कर्म

तथायुक्तं चानीप्सितम् १।४।५०॥

ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् । ईप्सितः=इष्टः । अनीप्सितोऽनिष्टोऽनभिलषितश्चैते पर्यायाः । कर्मकारके यस्य कर्मणः क्रियाया सह योगो(सम्बन्धो) भवति । तत्कर्म कर्तुरीप्सिततमं प्रोच्यते । तस्य कर्मणः कर्मसंज्ञा ततः कर्म च विधीयते । एवं कर्म कर्तुः क्रियाया योगे भवति । परन्तु तत्कर्म कर्तुरीप्सिततमं न ईप्सितमपि न भवति । तत्र तदनीप्सितं प्रोच्यते । अत्रानीप्सितस्य कारकस्यानेन सूत्रेण कर्मसंज्ञा विधीयते । यथा - ग्राम गच्छन्, ओदन भुञ्जान इत्यत्र "कतुरीप्सिततमं कर्म" इति सूत्रेण कर्तुरीप्सितस्य ग्राम इति ओदन इति च शब्दस्योपरिसूत्रेण कर्मसंज्ञायां ततः "कर्मणि द्वितीया" इति सूत्रेण द्वितीयायां कृतायां ग्रामं गच्छन् ओदनं भुञ्जान इति रूपे सिद्धचतः । ग्रामं गच्छन् तृण स्पृशति[1] ओदनं भुञ्जानो विष भुङ्क्ते इत्यनयोर्वाक्ययोरनीप्सितस्य तृणस्य विषस्य च तथायुक्तं चानीप्सितमिति सूत्रेण कर्मसंज्ञायां "कर्मणि द्वितीया" इति सूत्रेण द्वितीयायां कृतायाम् ग्रामं गच्छन् तृणं स्पृशति, ओदनं भुञ्जानो विषं भुङ्क्ते इति वाक्ये सिद्धचतः ।

अत्यन्तेप्सितादन्यानीप्सितं कर्म द्विविधं द्वेष्यमुपेक्ष्यं च । यत्र क्रिययाऽनीप्सितं फलं बुध्यते तस्य (शब्दस्य) कर्मसंज्ञा । ततः कर्मसंज्ञशब्दात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति ।

क) द्वेष्यम् - ओदनं भुञ्जानो विषं भुङ्क्ते । मार्गे चौरान्पश्यति । पलायमानोऽहिं लङ्घते । चौराक्रान्तः कण्टकगुल्मं प्रविशति । व्याघ्राद्भीतो नदीमवगाहते । गुड इति विषं भक्षयति । गच्छन् पिपीलिकं मृद्नाति ।

ख) उपेक्ष्यम् - ग्रामं गच्छन् तृणं स्पृशति । ओदनं भुञ्जानो नेत्रे निमीलति । गच्छन् भित्तीः पश्यति । शिष्यान् ब्रूवन्नङ्गुलीर्भनक्ति । अङ्गुलीर्भञ्जन् वार्तां करोति । एवमेककर्मणो विधाने धातवो वहवः सन्ति ।

४-२-७ ण्यन्ताण्यन्तद्विकर्मकधातोः कर्तृकर्मवाच्ययोर्वाक्यम्

व्याकरणेऽण्यन्ता ण्यन्ताश्च द्विकर्मका धातवः सन्ति । तयोर्मध्ये प्रथममण्यन्तानां द्विकर्मकधातूनां वाच्यस्य वाक्यं प्रस्तूयते ।

१-क) अण्यन्तद्विकर्मकधातोः कर्तृकर्मवाच्ययोर्वाक्यम्[2] - भ्वादिदशगणेषु पठिता द्विकर्मकधातवोऽण्यन्ताः प्रोच्यन्ते । तेषां कर्तृवाच्यस्य वाक्ये गौणं मुख्यं च द्वे कर्मणी भवतः । तत्र यन्मुख्यं (प्रधानं) कर्म भवति । तस्य "कर्तुरीप्सिततमं कर्म" इति सूत्रेण कर्मसंज्ञा तस्मात्कर्मसंज्ञाशब्दात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । गौणकर्म अधःसूत्रेण विधीयते -

अकथितं च १।४।५१॥

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् । अपादानं सम्प्रदानमधिकरणं कर्म करणं कर्ता हेतुरित्येतैर्विशेषैरित्यर्थः । सदा कारकाणि विवक्षाधीने भवन्ति । यतो विवक्षया भिन्नकारकमपि प्रयुज्यते । अण्यन्तद्विकर्मका धातवः -

---

[1] स्पृश्यमानस्य ग्रामादेरीप्सितस्य क्रियायोगस्तज्जन्यसंयोगादिफलाधारत्वात् तथैवानीप्सितस्य तृणादेरपीति भावः । सिद्धान्तकौमुदी - तत्वबोधिनीटीकायाम् ।

[2] वाक्ये कारकाणि प्रयोक्तुं काठिन्ये समुपस्थिते कारकं विवक्षाधीनं भवतीति चरमं समाधानं प्रोच्यते ।

दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥

एतेषां षोडशानां धातूनामपादानादीनामविवक्षायाम् "अकथितं च" इति सूत्रेण यस्य कर्मसंज्ञा विधीयते । तस्मात्कर्मसंज्ञकशब्दात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । इदमेवाकथितं कर्म प्रोच्यते । अपादानादीनामविवक्षायां विहितं कर्म गौणकर्म प्रोच्यते । द्विकर्मकधातूनां क्रियापदेषु विधिना मुख्यं गौणं च कर्मणी निष्पद्येते । इयं संज्ञाऽर्थनिबन्धना अर्थात् दुहादीनां षोडशधातूनामर्थ इव यस्य धातोरर्थो मिलति स धातुरपि द्विकर्मको ज्ञेयः ।

अण्यन्तानां द्विकर्मकधातूनां संग्रहः

१. दूह प्रपूरणे ।
२. क) टुयाचृ याच्ञायाम् ।
ख) भिक्ष भिक्षायामलाभे लाभे च ।
ग) वनु याचने ।
घ) चते चदे याचने ।
ङ) वेथृ याचने ।
च) अर्द याचने ।
३. डुपचष् पाके[1]
४. दण्ड दण्डनिपातने ।
५. रुधिर् आवरणे ।
६. प्रच्छ ज्ञीप्सायाम् ।
७. चिञ् चयने ।
८. क) ब्रूञ् व्यक्तायां वाचि ।
ख) चक्षिङ् व्यक्तायां वाचि ।
ग) भाष व्यक्तायां वाचि ।
घ) वद व्यक्तायां वाचि ।
ङ) गद व्यक्तायां वाचि ।
च) ख्या प्रकथने ।
छ) वच परिभाषणे ।
ज) अभि+धा धारणपोषणयोः = (कथने) ।
झ) वि+आ+हृञ् हरणे=भाषणे ।
९. शासु अनुशिष्टौ ।
१०. जि जये ।
११. क) मुष स्तेये ।
ख) चुर स्तेये ।
ग) मूष स्तेये ।
घ) स्तेन चौर्ये ।
१२. मन्थ विलोडने ।
१३. णीञ्[2] प्रापणे ।
१४. वह प्रापणे[3] ।
१५. हृञ् हरणे ।
१६. कृष विलेखने (भ्वा.) ।

कथ वाक्यप्रबन्धे=कथने । ईर क्षेपे=उद्+ईर् = उदीरयति, समुदीरयति-ते ।

दुहादीनां द्वादशानां कर्तृवाच्यस्य वाक्ये प्रथमं गौणकर्म तदनन्तरं मुख्य(प्रधान) कर्म नीप्रभृतीनां चतुर्णां कर्तृवाच्यस्य वाक्ये प्रथमं मुख्य(प्रधान)कर्म तदनन्तरं गौणकर्म च प्रस्तूयते । दुहादीनां द्वादशानां गौणकर्मणि नीप्रभृतीनां च चतुर्णां मुख्यकर्मणि च वाच्यं परिवर्तते । "गौणे कर्मणि दुह्यादेः प्रधाने हृनीहृकृष्वहाम् । लादयश्च"[4] विधीयन्ते ह्येषां वाक्यं सदा स्मरेत् ॥ अत्र दुहादीनां क्रियाया वाक्यं यथा प्रस्तूयमानमस्ति । तदनुसारं सर्वत्र प्रयोगो बोध्यः -

---

१ श्रा पाके = श्रपयति । श्रै पाके = श्रायति । श्रीञ् पाके = श्रीणाति । एते सर्वे विक्लेदनार्थे द्विकर्मका अन्यार्थे तु न ।

२ नीधातुः प्रापणार्थको यापनार्थकश्च ज्ञेयः ।

३ वह्धातुरपि नीधातुवद्वोध्यः ।

४ भट्टोजिदीक्षितः - सि.कौ. भावकर्मप्रक्रियायाम् ।

गौ. कर्म   मु. कर्म

१. देवदत्तो गाः (गोः) पयो दोग्धि-दुग्धे दुग्धवान्[1] - देवदत्तेन गौः पयो दुह्यते दोग्धव्या दोहनीया दोह्या दुग्धा दुह्यमाना धोक्ष्यमाणा सुदोहा दुर्दोहा वा । गौणकर्मणोऽविवक्षायां त्वपादाने पञ्चमी- देवदत्तो गोः पयो दुग्धे दोग्धि दुग्धान् । द्विकर्मणोऽविवक्षायामकर्मकः - परोपकाराय दुहन्ति गावः ।

गौ. कर्म   मु. कर्म

२. वामनो बलिं (बलेः) वसुधां याचति-ते याचितवान् - वामनेन बलिर्वसुधां याच्यते याचितव्यः, याचनीयः, याच्यः, याचितः, याच्यमानः, याचिष्यमाणः । गौणकर्मणोऽविवक्षायां त्वपादाने पञ्चमी - वामनो बलेर्वसुधां याचति-ते याचितवान् । भिक्षते वनुते चदति-ते प्रार्थयते अर्दति ।

३. माता तण्डुला(तण्डुलैः)नोदनं पचति-ते पक्ववती[2] (पुंसि-पक्ववान्) - मात्रा तण्डुला ओदनं पच्यन्ते पक्तव्याः पचनीयाः पचेलिमाः पक्वाः पच्यमानाः, पक्ष्यमाणाः सुपचाः, दुष्पचाः वा । गौणकर्मणोऽविवक्षायां तु करणे तृतीया - माता तण्डुलैरोदनं पचति-ते । अत्र द्वितीयाया अविवक्षायां तृतीया विधीयते ।

४. राजा गर्गा(गर्गेभ्यः)ञ्शतं दण्डयति-ते दण्डितवान् - राजा गर्गाः शतं दण्डयन्ते दण्डयितव्याः, दण्डनीयाः, दण्ड्याः, दण्डिताः, दण्ड्यमानाः, दण्डयिष्यमाणाः सुदण्डाः, दुर्दण्डाः । कर्मणोऽविवक्षायां तु पञ्चमी - राजा गर्गेभ्यः शतं दण्डयति-ते ।

५. गोपो व्रजं(व्रजे) गा(गाः)मवरुणद्धि-अवरुन्धे अवरुद्धवान् - गोपेन व्रजो गा(गाः) अवरुध्यते अवरोधव्यः अवरोधनीयः अवरुद्धः, अवरुद्ध्यमानः । कर्मणोऽविवक्षायां तु सप्तमी - गोपो व्रजे गा अवरुणद्धि-अवरुन्धे ।

६. पान्थो माणवकं(माणवकेन) पन्थानं पृच्छति पृष्टवान् - पान्थेन माणवकः पन्थानं पृच्छ्यते प्रष्टव्यः प्रच्छनीयः पृष्टः पृच्छ्यमानः । गौणकर्मणोऽविवक्षायां करणे तृतीया- पान्थो माणवकेन पन्थानं पृच्छति । शिष्यो भक्तः पुत्रः कोऽपि वा गुरुं प्रश्नं पृच्छति ।

७. पुत्री वृक्षं(वृक्षात्) पुष्पाणि फलानि वाऽवचिनोति-नुते अवचितवती (पुंसि-अवचितवान्) - पुत्र्या वृक्षः फलानि अवचीयते अवचेतव्यः अवचयनीयः अवचेयः अवचितः अवचीयमानः अवचेष्यमाणः । गौणकर्मणोऽविवक्षायां तु पञ्चमी - पुत्री वृक्षात्फलानि अवचिनोति-नुते ।

८. पिता(गुरुः)माणवकं(माणवकाय)धर्मं ब्रूते ब्रवीति उक्तवान् - पित्रा(गुरुणा)माणवको धर्ममुच्यते वक्तव्यः, वचनीयः, वाच्यः, उक्तः, उच्यमानः, वक्ष्यमाणः, सुवचः, दुर्वचः । गौणकर्मणोऽविवक्षायां तु चतुर्थी विधीयते - पिता (गुरुः) माणवकाय धर्मं ब्रवीति ब्रूते[3] । वक्ति भाषते गदति वदति चष्टे - समाचष्टे ख्याति अभिदधाति अभिधत्ते कथयति व्यावहरति - उक्तवान्, भाषितवान्, गदितवान्, उदितवान्, ख्यातवान्, - आख्यातवान्, अभिहितवान्, कथितवान्, व्याहृतवान्, उदीरितवान् । ब्रुवःस्थाने आहो भवति - आह आहतुः आहुः । आत्थ आहथुः । उद्+ईर क्षेपे=उदीरयति-ते ।

---

[1] दुह् याच् दण्ड् चित्र् जि मन्थ् मुष् एषु अपादानत्वाविवक्षायां कर्मत्वविवक्षायाञ्च कर्मत्वे द्वितीया, तेष्वपादानत्वविवक्षायां ध्रुवमपायेऽपादानमिति सूत्रेणापादानसंज्ञायाम् अपादाने पञ्चमीति सूत्रेणापादानात्पञ्चमी ।

[2] पच् पृच्छ् अनयोः करणत्वाविवक्षायां कर्मत्वविवक्षायाञ्च कर्मत्वे द्वितीया, तयोर्धात्वोःकर्मत्वाविवक्षायां करणत्वविवक्षायां साधकतमं करणमिति सूत्रेण करणसंज्ञायां कर्तृकरणयोस्तृतीयेति सूत्रेण करणात्तृतीया ।

[3] ब्रूञ् शासु अनयोः प्रयोगे सम्प्रदानत्वाविवक्षायां कर्मत्वविवक्षायाञ्च कर्मत्वे द्वितीया । तयोर्धात्वोः कर्मत्वाविवक्षायाम् "बोधविषयेण कर्मणाऽभिप्रेयमाणत्वान्माणवकः सम्प्रदानमित्युक्तेः" सम्प्रदानविवक्षायां कर्मणा यमभिप्रैति. इति सम्प्रदानसंज्ञायाम् सम्प्रदाने चतुर्थीति सूत्रेण सम्प्रदानाच्चतुर्थी ।

गौण कर्म　　मु. कर्म

९. गुरुः शिष्य(शिष्याय)माचारं शास्ति शिष्टवान् - गुरुणा शिष्य आचारं शिष्यते शासितव्यः शासनीयः शिष्टः शिष्यमाणः शिक्ष्यमाणः सुशासः दुःशासः । गौणकर्मणोऽविवक्षायां तु चतुर्थी विधीयते - गुरुः शिष्यायाऽऽचारं शास्ति शिष्टवान् । शास्ति शिष्टः शासति । शासि शिष्टः शिष्ट । शास्मि शिष्वः शिष्मः ।

१०. देवदत्तो यज्ञदत्तं (यज्ञदत्तात्) शतं जयति जितवान् - देवत्तेन यज्ञदत्तः शतं जीयते जेतव्यः, जयनीयः, जेयः, जितः, जीयमानः, जेष्यमाणः सुजयः, दुर्जयः । गौणकर्मणोऽविवक्षायां त्वपादाने पञ्चमी - देवदत्तो यज्ञदत्तात् शतं जयति ।

११. चौरो धनिकं(धनिकाद्) शतं मुष्णाति मुषितवान् - चौरेण धनिकः शतं मुष्यते मोषितव्यः मोषणीयः मोषितः मोष्यमाणः । गौणकर्मणोऽविवक्षायां त्वपादाने पञ्चमी- चौरो धनिकाद् शतं मुष्णाति । मूषति, चोरयति-ते स्तेनयति-ते ।

१२. देवाः क्षीरनिधिं (क्षीरनिधेः) सुधां मथ्नन्ति मथितवन्तः - देवैः क्षीरनिधिः सुधां मथ्यते मथितव्यः, मथनीयः, मथितः, मथ्यमानः, मथिष्यमाणः । गौणकर्मणोऽविवक्षायां तु पञ्चमी - देवाः क्षीरनिधेः सुधाममन्थन् । मथ्नाति मथ्नीतः । मथ्नासि मथ्नीथः मथ्नीथ । मथ्नामि मथ्नीवः मथ्नीमः ।

मु. कर्म　　गौ. कर्म

१३-१४ भृत्यो अजां ग्रामं नयति-ते नीतवान्[1] । कर्षति कृष्टवान् - भृत्येनाजा ग्रामं नीयते नेतव्या नयनीया नेया नीता नीयमाना नेष्यमाणा सुनया दुर्णया । कृष्यते क्रष्टव्या कर्ष्टव्या कर्षणीया कृष्टा कृष्यमाणा । गौणकर्मणोऽविवक्षायां तु सप्तमी - भृत्योऽजां ग्रामे नयति-ते ।

१५. गोपो गां गोष्ठं (गोष्ठे) हरति-ते हृतवान् - गोपेन गौर्गोष्ठं (गोष्ठे) ह्रियते हर्तव्या हरणीया हार्या हृता ह्रियमाणा सुहरा दुर्हरा । गौणकर्मणोऽविवक्षायां तु सप्तमी - गोपो गां गोष्ठे हरति-ते । अर्थान्तरे स्थिते दानार्थे तु चतुर्थी-हृ=तस्मै जहार (ददौ) धनदो हैमं वीर शरासनम् । धातुरयं हरणम्=प्रापणम्, स्वीकारः स्तेयं नाशनं चेष्वर्थेष्वस्ति=भारं हरति=प्रापयति=अस्मिन्नर्थे उपरिलिखितम् । अशं हरति=स्वीकरोति । स्वर्णं हरति=चोरयति । पापं हरति=नाशयति ।

१६[2] भृत्यो भारं (गृहे) वहति-ते, ऊढवान्, ऊढः - भृत्येन भारो गृहं (गृहे) उह्यते वोढव्यः, वहनीयः, वाह्यः, ऊढः, उह्यमानः, सुवहः, दुर्वहः । गौणकर्मणोऽविवक्षायां तु सप्तमी - भृत्यो भारं गृहे वहति-ते । अर्थान्तरे त्वकर्मकः - परोपकाराय वहन्ति नद्यः ।

---

[1] रुधिर् नी हृ कृष् वह् एषु प्रयोगेऽधिकरणत्वाविवक्षायां कर्मत्वविवक्षायाञ्च कर्मत्वे द्वितीया, तेष्वधिकरणविवक्षायाम् आधारोऽधिकरणमिति सूत्रेणाधिकरणसंज्ञायाम् सप्तम्यधिकरणे चेति सूत्रेणाधिकरणात्सप्तमी ।

[2] विशेषः - दुहादिभ्यः षोडशेभ्यो द्विकर्मकेभ्यो धातुभ्यः शतृशानच्क्त्वाल्यप्तुमुन्प्रत्ययैर्निष्पन्नायां गौणक्रियायामपि प्रधानक्रियायामिवापादानादिकारकाणि विधीयन्ते । शतृशानच्प्रत्ययान्ताया गौणक्रियाया वाच्यपरिवर्तनमपि प्रधानक्रियायामिव भवति । अर्थात् कर्तृवाच्ये शतृशानच्भ्यां कर्मवाच्ये यक्-शानच्भ्यां च गौणक्रिया निष्पद्यन्ते । यथा-कर्तृवाच्ये गोपो गां पयो दुहन्प्राप्यते - कर्मवाच्ये - गोपालेन पयो दुह्यमाना गौः प्राप्यते । क्त्वाल्यप्तुमुन्प्रत्ययान्तगौणक्रियायामपि कारकाणि प्रधानक्रियायामिव प्रयुज्यन्ते । नियमोऽयमेव स्मरणीयः - अहं गा पयो दोग्धुं समागतोऽस्मि । स गाः पयो दुग्ध्वाऽऽपणं (आपणे) नयति । रामो गां पयो दुग्ध्वा पिबति । वामनो वलिं वसुधां याचित्वा देवेभ्योऽदात् । राजा गर्गान्शतान्दण्डयित्वाऽमुञ्चत् । एवमन्यासु सर्वासु द्विकर्मकगौणक्रियास्वपादानादीनां प्रयोगः कार्यः । एभ्यः षोडशकेभ्यो धातुभ्यः कर्तरि क्तवतुप्रत्ययेन कर्मणि क्तप्रत्ययेन च निष्पन्नानि पदानि भवन्ति । एभिर्निष्पन्ने वाक्ये "गौणे कर्मणि दुह्यादेः प्रधाने नृहृकृष्वहाम्" इति विधिः स्मरणीयः । दुहादीन् षोडशकानां धातूनामर्था इवान्येषां धातूनामर्था मिलन्ति । तेषामपि दुहादिवत्प्रयोगो विधेयः । स्मर्तव्यं यत् क्त्वाल्यप्तुमुन्प्रत्ययान्तगौणक्रिया वाच्ये न परिवर्तन्ते । दुहादिधातुभ्यः शतृशानज्भ्यो निष्पन्नानां पदानामन्ते भू अस् वृत् वि धातूनां कर्तृवाच्ये निष्पन्नासु क्रियासु लभ्-प्राप्-दृश्-विलोक-धातूनां कर्मणि निष्पन्नासु क्रियासु च मध्ये यस्याः क्रियायाः अर्थसङ्गतिर्मिलति । सा क्रिया प्रयुज्यते ।

१-ख) प्रेरणार्थे कृतनां ण्यन्तद्विकर्मकधातूनां कर्तृवाच्यस्य कर्मवाच्यस्य च वाक्यम् - अत्र स्मरणीयं यत् अण्यन्तावस्थाया यः कर्ता स व्यन्तावस्थायां प्रयोज्यः, ण्यन्तावस्थाया यः कर्ता सोऽण्यन्तावस्थायाः कर्तुः प्रयोजकश्च भवति । अयं प्रयोजकः प्रेरककोऽपि कथ्यते यत एतौ समानार्थकौ ज्ञेयौ । प्रयोज्यः प्रेर्यश्च पर्यायौ । अत्रापि स्मर्तव्यं यत् ण्यन्तावस्थाया यः प्रयोजकः स एव हेतुः कर्ता च भवति ।

ये गत्यर्थका ज्ञानार्थकाः केचन भक्षणार्थकाः शब्दकर्मका अनियन्त्रणार्थको वह्धातुर्जल्प-भाष्-वच्-विद्-हृ-कृधातवश्च ण्यन्तावस्थायां द्विकर्मका एव बोध्याः । अभिवदि-दृश् धातुश्च ण्यान्तावस्थायामात्मनेपदपक्षे वैकल्पिकौ द्विकर्मकौ ज्ञेयौ । यत एतदर्थकानां धातूनां ण्यन्ततिङन्तानि एभ्य एव धातुभ्यो भूतकर्तरि निष्पन्नानि क्तवतुप्रत्ययान्तानि च क्रियापदानि द्विकर्मकाणि ज्ञेयानि । तेभ्य एव धातुभ्यः शतृशानच्क्त्वाल्यप्तुमुन्प्रत्ययैर्निष्पन्नानि गौणक्रियापदानि अपि द्विकर्मकाणि बोध्यानि । एतदर्थकानां धातूनामण्यन्तावस्थायां येन विधिना मुख्यकर्म निष्पद्यते ण्यन्तावस्थायामपि तथैव । प्रयोज्यस्य कर्मणो विधिस्त्वधः प्रोच्यते -

गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामणि कर्ता स णौ १।४।५२॥

गतिर्गमनम्, बुद्धिर्ज्ञानम्, प्रत्यवसानं भक्षणमित्यर्था ज्ञेयाः । गत्याद्यर्थकानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात् । कर्म कर्मसंज्ञमित्यर्थः । अण्यन्तावस्थायाम् - शत्रवः स्वर्गमगच्छन् - श्रीहरिस्तान्प्रैरयत् इति प्रोक्ते ण्यन्तावस्थायाः "अगमयत्" क्रियायाः प्रयोगे "गतिबुद्धि." इति सूत्रेण शत्रुशब्दस्य कर्मसंज्ञायां ततः "कर्मणि द्वितीया" इति द्वितीया स्वर्गस्य तु कर्तुरीप्सिततमं कर्मेति कर्मसंज्ञायां ततः कर्मणि द्वितीयेति द्वितीया च विधीयते । तदनन्तरम् "श्रीहरिः शत्रून्स्वर्गमगमयत्" इति वाक्यं सिद्धचयति । एवं सूत्रे गृहीतानां सर्वेषां धातूनामण्यन्तावस्थाया यः कर्ता तस्य ण्यन्तावस्थायां "गतिबुद्धि." सूत्रेणैव कर्मसंज्ञा ततः "कर्मणि द्वितीया" इति सूत्रेण द्वितीया अण्यन्तावस्थायाः कर्मणस्तु कर्तुरीप्सिततमं कर्मेति कर्मसंज्ञा ततः कर्मणि द्वितीयेति द्वितीया च कार्या । सर्वत्रायमेव विधिः । गतिबुद्धि. इति सूत्रेण यस्य कर्मसंज्ञा भवति तत्प्रयोज्यं कर्म बोध्यम् । अण्यन्तावस्थाया यत्कर्म ण्यन्तावस्थायामपि तन्मुख्यं कर्म ज्ञेयम् ।

वाच्यपरिवर्तनस्य नियमः

बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः[1] ॥

अन्येषां ण्यन्तानां धातूनां प्रयोज्यकर्मणीति कथनेन गत्यर्थकस्याकर्मकस्य च धातोर्ण्यन्तावस्था स्मरणीया । श्लोकानुसारेण गत्यर्थस्याकर्मकस्य च धातोः प्रयोज्यकर्मणि बुद्धिभक्षार्थयोः शब्दकर्मकाणां च निजेच्छया = मुख्यकर्मणि प्रयोज्यकर्मणि वा वाच्यं परिवर्तते । कर्तृकर्मवाच्ययोर्वाक्यं सहैव प्रस्तूयते । अत्र कर्तरि कर्मणि च यथा प्रयोगो दर्शयन्नस्ति । अन्यत्रापि एवमेव प्रयोगः स्मरणीयः ।

१- गत्यर्थे गम्-प्रविश्-आरुह्-तृ-अधि+गम् प्राप्-नम-प्र+इष=प्रेष्-लघि-प+क्रम=अतिक्रम-आरोह-इत्यादयो धातवो गृह्यन्ते । एतेषां परिवर्तनस्य नियम उपरिप्रोक्तः । ध्येयं यत्-कर्मवाच्ये प्रयोज्यकर्मप्रथमान्तानुसारं क्रियापदं प्रयुज्यते ।

१-क. शत्रवः स्वर्गमच्छन् - श्रीहरिः शत्रून्स्वर्गमगमयत्[2] गमितवान् - श्रीहरिणा शत्रवः स्वर्गं गम्यन्ते गमयितव्याः, गमिताः - एवमन्येषां धातूनां प्रयोगाश्चिन्त्याः । प्रविश्= प्रविशन्ति-णिच्=प्रवेशयति प्रवेशितवान्-प्रवेश्यन्ते प्रवेशयितव्याः प्रवेशिताः । आरोहन्ति-णिच्=आरोहयति

[1] भट्टोजिदीक्षितः - सि.कौ. - भावकर्मप्रक्रियायाम् ।
[2] गम् यम् शम् दम् एषां णिचि उपधाया नो वृद्धिः ।

आरोहितवान् - आरो ह्यन्ते आरोहयितव्याः आरोहिताः । तरन्ति-णिच्=तारयति तारितवान्-तार्यन्ते तारयितव्याः तारणीयाः, तारिताः । अधिगच्छन्ति-णिच्=अधिगमयति अधिगमितवान्-अधिगम्यन्ते अधिगमयितव्याः अधिगमिताः । प्राप्नुवन्ति-णिच्=प्रापयति प्रापितवान्-प्राप्यन्ते प्रापयितव्याः प्रापिताः । नमन्ति-णिच्=नमयति नामयति [1] नमितवान्,नामितवान्-नम्यन्ते,नाम्यन्ते-नमयितव्याः,नामयितव्या-नमिताः,नामिताः । प्रेषति-णिच्=प्रेषयति प्रेषितवान्-प्रेष्यन्ते प्रेषयितव्याः प्रेषिताः । सर्वेषां ण्यन्तधातुभ्यो यकं विना तव्यत्तव्यक्तक्तवतुक्त्वातुमुन्प्रत्ययेषु इट् स्यात् । कर्मणि यकि परे क्तक्तवतुप्रत्यययोश्च परयोः णिचो लोपो भवति तव्यत्तव्यक्त्वातमुन्परेषु तु न ।

१-ख. पङ्गुर्गिरिं लङ्घते - यत्कृपा पङ्गुं गिरिं लङ्घयते लङ्घितवान् - यत्कृपया पङ्गुर्गिरिं लङ्घ्यते लङ्घयितव्यः लङ्घनीयः लङ्घितः । अतिक्रामति अतिक्रान्तवान् अतिक्रन्तः -णिच्=अतिक्रामयति अतिक्रामितवान् - अतिक्राम्यते अतिक्रामयितव्यः अतिक्रामितः ।

२- ज्ञाना(बोधा)र्थे विद् बुध्-ज्ञा-वच् शंस्-प्रति+इ(२इण्) इत्यादिधातवो गृह्यन्ते । एषां धातूनां वाच्यपरिवर्तनस्य नियम उपरि प्रोक्तः । एषां कर्मवाच्ये प्रयोज्यकर्म-प्रथमान्तानुसारं मुख्यकर्मप्रथमान्तानुसारं वा क्रियापदं प्रयुज्यते ।

क) स्वे वेदार्थं विदुः - गुरुः स्वान्वेदार्थमवेदयत् वेदितवान् -

गुरुणा स्वा वेदार्थं वेद्यन्ते वेदयितव्याः, वेदिताः ।
गुरुणा स्वान्वेदार्थो वेद्यते वेदयितव्यः वेदितः ।

ख) पुत्रः धर्मं बोधति बोधितवान् (भ्वादिः) बुध्यते बुद्धवान्-(दिवादिः) - पिता पुत्रं धर्मं बोधयति बोधितवान् -

पित्रा पुत्रो धर्मं बोध्यते बोधयितव्यः बोधितः ।
पित्रा पुत्रं धर्मो बोध्यते बोधयितव्यः बोधितः ।

प्रति+इण् गतौ=प्रति+प्रत्येति-बोधति-प्रत्याययति (बोधयति) प्रत्यायितवान्-प्रत्याय्यते प्रत्याययितव्यः प्रत्यायितः । प्रत्याययितुम् । बोधयितुम् ।

ग) रामः शास्त्रं जानाति-वसिष्ठो रामं शास्त्रं ज्ञापयति ज्ञापितवान् -

वसिष्ठेन रामः शास्त्रं ज्ञाप्यते ज्ञापयितव्यः ज्ञापितः ।
वसिष्ठेन रामं शास्त्रं ज्ञाप्यते ज्ञापयितव्यम् ज्ञापितम् ।

घ) कृष्णः सूक्तं वक्ति-गर्गः कृष्णं सूक्तं वाचयति वाचितवान् -

गर्गेण कृष्णः सूक्तं वाच्यते वाचयितव्यः वाचितः ।
गर्गेण कृष्णं सूक्तं वाच्यते वाचयितव्यम् वाचितम् ।

ङ) ताँस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः ।अत्र ण्यन्तः शंस्धातुर्द्विकर्मकः ।

३- आहारा(भक्षणा)र्थे अश् भुज् पा भक्ष् इत्यादिधातवो गृह्यन्ते । अत्र हिंसार्थे स्थितं भक्ष्धातुर्गृह्यते न हिंसार्थे । एषां वाच्यपरिवर्तनस्य नियम उपरिप्रोक्तः । एषां कर्मवाच्ये प्रयोज्यकर्मप्रथमान्तानुसारं मुख्यकर्मप्रथमान्तानुसारं वा क्रियापदं प्रयुज्यते ।

---

[1] णम=नम्,ज्वलह्वलह्मलनमामनुपसर्गाद्वा-गणसू. घटादौ णौ अत उपाधाया रति सूत्रेणोपधावृद्धौ अनेन गणसूत्रेण वैकल्पिके मित्- मितां ह्रस्व इति सूत्रेण धातोरुपधाया ह्रस्वो भवति मित्वाभावे उपधावृद्धिश्च तिष्ठति ।

क) देवा अमृतमश्नन् - श्रीहरिर्देवानमृतमाशयत् आशितवान् -

श्रीहरिणा देवा अमृतमाश्यन्ते आशयितव्याः, आशिताः ।
श्रीहरिणा देवान् अमृतमाश्यते आशयितव्यम्, आशितम् ।

ख) कृष्ण ओदनं भुङ्क्ते - यशेदा कृष्णमोदनं भोजयति भोजितवती -

यशोदया कृष्ण ओदनं भोज्यते भोजयितव्यः भोजितः ।
यशोदया कृष्णमोदनं भोज्यते भोजयितम्, भोजितम् ।
ओदनं पुंनपुंसकयोर्ज्ञेयम् ।

ग) शिशुर्दुग्धं पिबति - माता शिशुं दुग्धं पाययति पायितवान् -

मात्रा शिशुर्दुग्धं पाय्यते पाययितव्यः पायितः ।
मात्रा शिशुं दुग्धं पाय्यते पाययितव्यम्, पायितम् ।

घ) बलीवर्दाः सस्यं भक्षयन्ति - स बलीवर्दान्सस्यं भक्षयति भक्षितवान् ।

तेन बलीवर्दाः सस्यं भक्ष्यन्ते भक्षयितव्याः भक्षिताः ।
तेन बलीवर्दान् सस्यं भक्ष्यते भक्षयितव्यम्, भक्षितम् ।

४- शब्दकर्मकार्थे अधि+इङ्[1] पठ् शिक्ष् श्रृ ग्रह् इत्यादिधातवो गृह्यन्ते । एषां वाच्यपरिवर्तनस्य नियम उपरिप्रोक्तः । एषां कर्मवाच्ये प्रयोज्यकर्मप्रथमान्तानुसारं मुख्य-कर्मप्रथमान्तानुसारं वा क्रियापदं प्रयुज्यते ।

क) विधिर्वेदमध्यैत - श्रीहरिर्विधिं वेदमध्यापयत् अध्यापितवान् -

श्रीहरिणा विधिर्वेदमध्याप्यते अध्यापयितव्यः अध्यापितः ।
श्रीहरिणा विधिं वेदोऽध्याप्यते अध्यापयितव्यः अध्यापितः ।

ख) शिष्या वेदमध्यैरन् - गुरुः शिष्यान् वेदमध्यापयत्, अध्यापितवान् -

गुरुणा शिष्या वेदमध्याप्यन्ते अध्यापयितव्याः, अध्यापिताः ।
गुरुणा शिष्यान् वेदोऽध्याप्यते अध्यापयितव्यः, अध्यापितः ।

ग) छात्राः काव्यं पठन्ति - गुरुश्छात्रान्काव्यं पाठयति पाठितवान् -

गुरुणा छात्राः काव्यं पाठचन्ते पाठयितव्याः पाठिताः ।
गुरुणा छात्रान्काव्यं पाठचते पाठयितव्यम्, पाठितम् ।

घ) रामो ब्रह्मज्ञानं शिक्षते - वसिष्ठो रामं ब्रह्मज्ञानं शिक्षयति शिक्षितवान् -

वसिष्ठेन रामो ब्रह्मज्ञानं शिक्ष्यते शिक्षयितव्यः शिक्षितः ।
वसिष्ठेन रामं ब्रह्मज्ञानं शिक्ष्यते शिक्षयितव्यम् शिक्षितम् ।

ङ) परीक्षित् पुराणं श्रृणोति - शुकः परीक्षितं पुराणं श्रावयति श्रावितवान् -

शुकेन परीक्षित् पुराणं श्राव्यते श्रावयितव्यः श्रावितः ।
शुकेन परीक्षितं पुराणं श्राव्यते श्रावयितव्यम्, श्रावितम् ।

---

[1] अधि इ धातोर्णिचि आर्धधातुकसंज्ञायां गुणे अधि ऐ इ इति जाते क्रीङ्जीनां णाविति सूत्रेण आत्वे पुकि यणि अध्यापीति धातुः सिद्ध्यति ।

सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ।
स तु संश्रावयामास महाराजं परीक्षितम् ।

च) अर्जुनो धनुर्गृह्णाति - कृष्णोऽर्जुनं धनुर्ग्राहयति ग्राहितवान् -

कृष्णेनार्जुनो धनुर्ग्राह्यते ग्राहयितव्यः ग्राहितः ।
कृष्णेनार्जुनं धनुःर्ग्राह्यते ग्राहयितव्यम्, ग्राहितम् ।

५- अकर्मका धातवो णिचा सकर्मकाः - सर्वेऽकर्मका धातवो णिचा सकर्मका जायन्ते। अकर्मकधातोरण्यन्तावस्थाया कर्ता स ण्यन्तावस्थायां प्रयोज्यो भवति । ततः स ण्यन्तावस्थायां "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञा तदनन्तरं कर्मसंज्ञाशब्दात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । इत्थं पूर्वमकर्मके स्थितानां सर्वेषां धातूनां ण्यन्तावस्थायां प्रयोज्यस्य कर्म भवति ततो ण्यन्तानां सर्वेषामेककर्मकधातूनां वाच्यपरिवर्तनं प्रयोज्यकर्मणि क्रियते । कर्मवाच्ये प्रयोज्यकर्म प्रातिपदिकार्थमात्रे प्रथमान्तं भवति । अत्र प्रयोज्यकर्मप्रथमान्तानुसारं क्रियापदं प्रयुज्यते । हेतोः कर्तुस्तु अनुक्तत्वात्तस्य तृतीयान्तो भवति । अर्थात् हेतुः कर्ता तृतीयान्तः ।

पृथ्वी सलिले आस्ते - श्रीहरिस्तां प्रैरयरदिति प्रोक्ते "आशयत्" क्रियाप्रयोगे - "गतिबुद्धि." इति सूत्रेण पृथ्व्याः कर्मसंज्ञा ततः "कर्मणि द्वितीया" इति सूत्रेण तस्या द्वितीया विधीयते । ततः श्रीहरिः पृथ्वीं सलिले आसयत् आसितवानिति सिद्धम् - श्रीहरिणा पृथ्वी सलिले आस्यते आसयितव्या, आसिता । कृष्णः शय्यायां शेते - यशोदा कृष्णं शय्यायां शाययति शायितवती - यशोदया कृष्णः शय्यायां शाय्यते शायितव्यः शायितः । एवमकर्मकेभ्यो धातुभ्यो णिचा निष्पन्नानां सर्वेषां धातूनां क्रियाया वाक्यं समाधेयम् ।

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृतं देवान् वेदमध्यापयेद्विधिम् ॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ।
पुत्रानध्यापयत्ताँस्तु ब्रह्मर्षीन् ब्रह्मकोविदान् (तान्वेदान्) ॥

गतीत्यादिः किम् - गतीत्यादिरर्थः क्रिमर्थं क्रियते । यदि नोच्यते-पाचयत्योदनं देवदत्तेन यज्ञदत्त इत्यत्र देवदत्तस्य कर्म स्यात् । अत्र तु पच्धातुगत्यर्थे न पठचते । यतो हि देवत्तस्य कर्मसंज्ञा न भवति । कर्मसंज्ञाया अभावात् देवदत्तस्य ण्यन्तावस्थायामनुक्तत्वात् देवदत्तात्तृतीया विधीयते ।

अण्यन्तानां किम् - अण्यन्तावस्थायाः कर्तुः, कर्म स्यादिति किमु वक्तव्यम् । यदि नोच्यते - गमयति देवत्तेन यज्ञदत्तं विष्णुमित्र इत्यत्र पूर्वं गच्छति यज्ञदत्तस्तं प्रेरयतीत्यत्र णिचा गमयति इति जाते ण्यन्तावस्थाया कर्तुर्यज्ञदत्तस्य "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञा ततः "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । ततः गमयति देवदत्तो यज्ञदत्तमिति वाक्यं सिद्धचति । पुनस्त(देवदत्त)मपर प्रयुङ्क्ते (प्रेरयति) इत्युक्ते सति पुनः पूर्वण्यन्ताद्गमिधातोः पुनर्णिच्विधीयते । ततो वृद्धिं बाधित्वा पुन "णेरनिटि" इति सूत्रेण पूर्वणिचो लोपो भवति । ततो रूपसिद्धिप्रक्रियया पुनर्गमयति इत्येवं रूप सिद्धचति । ततोऽस्य पुनर्ण्यन्तावस्थायाः क्रियायां कर्तुर्देवत्तस्य "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञा भवेत् तस्य कर्मसंज्ञा न स्यादित्युक्त्वा सूत्रे किमुक्तम् । अण्यन्तावस्थायाः क्रियायाः कर्तुः कर्मसंज्ञा भवेदित्युक्तं न तु पुनर्ण्यन्तावस्थायाः क्रियायाः कर्तुः । यतः पुनर्ण्यन्तावस्थायाः कर्तुर्देवदत्तस्य कर्मसंज्ञाऽभावान्न द्वितीया । ततः पुनर्ण्यन्तावस्थायाः क्रियायाः कर्तुरनुक्तत्वाद्देवदत्तात्तृतीया विधीयते ।

नीवाह्योर्न - वा.-णीञ् प्रापणे, वह् प्रापणे इत्यनयोर्धात्वोरण्यन्तावस्थाया यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा न स्यात् । भृत्यो भारं ग्रामं वहति-ते नयति-ते णिचि-देवदत्तो भृत्येन भारं ग्रामं वाहयति वाहितवान् - नाययति नायितवान् इत्यत्र ण्यन्तावस्थाया वहनीधात्वोः प्रयोज्यस्य

सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ।
स तु संश्रावयामास महाराजं परीक्षितम् ।

च) अर्जुनो धनुर्गृह्णाति - कृष्णोऽर्जुनं धनुर्ग्राहयति ग्राहितवान् -

कृष्णेनार्जुनो धनुर्ग्राह्यते ग्राहयितव्यः ग्राहितः ।
कृष्णेनार्जुनं धनुःर्ग्राह्यते ग्राहयितव्यम्, ग्राहितम् ।

५- अकर्मका धातवो णिचा सकर्मकाः - सर्वेऽकर्मका धातवो णिचा सकर्मका जायन्ते। अकर्मकधातोरण्यन्तावस्थाया कर्ता स ण्यन्तावस्थायां प्रयोज्यो भवति । ततः स ण्यन्तावस्थायां "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञा तदनन्तरं कर्मसंज्ञाशब्दात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । इत्थं पूर्वमकर्मके स्थितानां सर्वेषां धातूनां ण्यन्तावस्थायां प्रयोज्यस्य कर्म भवति ततो ण्यन्तानां सर्वेषामेककर्मकधातूनां वाच्यपरिवर्तनं प्रयोज्यकर्मणि क्रियते । कर्मवाच्ये प्रयोज्यकर्म प्रातिपदिकार्थमात्रे प्रथमान्तं भवति । अत्र प्रयोज्यकर्मप्रथमान्तानुसारं क्रियापदं प्रयुज्यते । हेतोः कर्तुस्तु अनुक्तत्वात्तस्य तृतीयान्तो भवति । अर्थात् हेतुः कर्ता तृतीयान्तः ।

पृथ्वी सलिले आस्ते - श्रीहरिस्तां प्रैरयरदिति प्रोक्ते "आशयत्" क्रियाप्रयोगे - "गतिबुद्धि." इति सूत्रेण पृथ्व्याः कर्मसंज्ञा ततः "कर्मणि द्वितीया" इति सूत्रेण तस्या द्वितीया विधीयते । ततः श्रीहरिः पृथ्वीं सलिले आसयत् आसितवानिति सिद्धम् - श्रीहरिणा पृथ्वी सलिले आस्यते आसयितव्या, आसिता । कृष्णः शय्यायां शेते - यशोदा कृष्णं शय्यायां शाययति शायितवती - यशोदया कृष्णः शय्यायां शाय्यते शायितव्यः शायितः । एवमकर्मकेभ्यो धातुभ्यो णिचा निष्पन्नानां सर्वेषां धातूनां क्रियाया वाक्यं समाधेयम् ।

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृतं देवान् वेदमध्यापयेद्विधिम् ॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ।
पुत्रानध्यापयत्ताँस्तु ब्रह्मर्षीन् ब्रह्मकोविदान् (तान्वेदान्) ॥

गतीत्यादिः किम् - गतीत्यादिरर्थः क्रिमर्थं क्रियते । यदि नोच्यते-पाचयत्योदनं देवदत्तेन यज्ञदत्त इत्यत्र देवदत्तस्य कर्म स्यात् । अत्र तु पच्धातुगत्यर्थे न पठचते । यतो हि देवत्तस्य कर्मसंज्ञा न भवति । कर्मसंज्ञाया अभावात् देवदत्तस्य ण्यन्तावस्थायामनुक्तत्वात् देवदत्तात्तृतीया विधीयते ।

अण्यन्तानां किम् - अण्यन्तावस्थायाः कर्तुः, कर्म स्यादिति किमु वक्तव्यम् । यदि नोच्यते - गमयति देवत्तेन यज्ञदत्तं विष्णुमित्र इत्यत्र पूर्वं गच्छति यज्ञदत्तस्तं प्रेरयतीत्यत्र णिचा गमयति इति जाते ण्यन्तावस्थाया कर्तुर्यज्ञदत्तस्य "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञा ततः "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । ततः गमयति देवदत्तो यज्ञदत्तमिति वाक्यं सिद्धचति । पुनस्त(देवदत्त)मपरं प्रयुङ्क्ते (प्रेरयति) इत्युक्ते सति पुनः पूर्वण्यन्ताद्गमिधातोः पुनर्णिच्विधीयते । ततो वृद्धिं बाधित्वा पुनः "णेरनिटि" इति सूत्रेण पूर्वणिचो लोपो भवति । ततो रूपसिद्धिप्रक्रियया पुनर्गमयति इत्येवं रूपं सिद्धचति । ततोऽस्य पुनर्ण्यन्तावस्थायाः क्रियायां कर्तुर्देवत्तस्य "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञा भवेत् । तस्य कर्मसंज्ञा न स्यादित्युक्त्वा सूत्रे किमुक्तम् । अण्यन्तावस्थायाः क्रियायाः कर्तुः कर्मसंज्ञा भवेदित्युक्तं न तु पुनर्ण्यन्तावस्थायाः क्रियायाः कर्तुः । यतः पुनर्ण्यन्तावस्थायाः कर्तुर्देवदत्तस्य कर्मसंज्ञाऽभावान्न द्वितीया । ततः पुनर्ण्यन्तावस्थायाः क्रियायाः कर्तुरनुक्तत्वाद्देवदत्तात्तृतीया विधीयते ।

नीवाह्योर्न - वा.-णीञ् प्रापणे, वह् प्रापणे इत्यनयोर्धात्वोरण्यन्तावस्थाया यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा न स्यात् । भृत्यो भारं ग्रामं वहति-ते नयति-ते णिचि-देवदत्तो भृत्येन भारं ग्रामं वाहयति वाहितवान् - नाययति नायितवान् इत्यत्र ण्यन्तावस्थाया वह्नीधात्वोः प्रयोज्यस्य

कर्तुर्भृत्यस्य "गतिबुद्धि" इति सूत्रेण प्राप्ता कर्मसंज्ञा निवाह्योर्नेति वार्तिकेन निषिद्धयते । तदनन्तरं प्रयोज्यस्य कर्तुर्भृत्यस्य कर्मसंज्ञाभावात्तस्माद्भृत्यात् ण्यन्तावस्थायां तृतीया विहिता । नीवह्धात्वोर्ण्यन्तावस्थायामपि भारस्य ग्रामस्य च पूर्ववदेव कर्म । अत्र वहनार्थे धार्तुगृहीतः । यतः कर्म निषिद्धम् । एवं दुह्पचादिचतुर्दशानां द्विकर्मकधातूनां प्रयागोऽपि नीवह्धातुवद्भवति ।

नियन्तृकर्तृकस्य वहेरनिषेधः - वा.- नियन्तृकर्तृकार्थस्य वह्धातोरण्यन्तावस्थाया यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा न निषिध्यते । वाहा रथं वहन्ति सूतस्ता(वाहान्)न्प्रेरयतीति णिच्-सूतो वाहान् रथं वाहयति वाहितवान् इत्यत्र ण्यन्तावस्थायां नियन्त्रणार्थककर्तृकस्य वह्धातोः प्रयोज्यस्य कर्तुर्वाहस्य "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञायां प्राप्तायां "नीवाह्योर्न" इति वार्तिकेन निषेधे प्राप्ते सति ततोऽनेन वार्तिकेन प्राप्तो निषेधः "नियन्तृकर्तृकस्य वहेरनिषेधः" इति वार्तिकेन निषिध्यते । पुनः "गतिबुद्धि" इति सूत्रेण वाहस्य कर्मसंज्ञायां ततः "कर्मणि द्वितीया" इति सूत्रेण द्वितीया विधीयते । तत उपर्युल्लिखितं वाक्यं सिद्धम् । अत्र प्रयोज्यकर्मणि वाच्यं परिवर्तते । सूतेन वाहा रथं वाह्यन्ते वाहयितव्याः वाहिताः वाह्यमाना वा ।

आदिखाद्योर्न - वा.-अनयोर्धात्वोरण्यन्तावस्थाया यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा वा न स्यात् । अत्ति खादति वाऽन्नं वटुस्तं प्रेरयति माता-सा आदयति खादयति वाऽन्नं वटुना इत्यत्र ण्यन्तावस्थायां वटोः "गतिबुद्धि" इति सूत्रेण कर्मसंज्ञायां प्राप्तायां तस्याः संज्ञाया "आदिखाद्योर्न" इति वार्तिकेन निषेधो भवति । ततः कर्मणोऽनुक्तत्वात् वटोस्तृतीया विहिता ।

भक्षेरहिंसार्थस्य न-वा.-अहिंसार्थस्य भक्ष्धातोरण्यन्तावस्थाया यः कर्ता स णौ कर्मसंज्ञो न स्यात् । चुरादौ स्वार्थे णिचि कृते भक्षि इति जाते ततो प्रेरणार्थे हेतुमति चेति सूत्रेण णिचि तस्य "णेरनिटि" इति सूत्रेण पूर्वं चुरादौ कृतस्य णिचो लोपे पुनर्भक्षि इति जाते ततो लटि तिपि शपि गुणेऽयादेशे भक्षयति इति रूपं सिद्धयति । अहिंसार्थे - भक्षयत्यन्नं वटुः - तं प्रेरयतीत्यत्र "गतिबुद्धि." इत्यनेन प्राप्ता वटोः कर्मसंज्ञाऽनेन वार्तिकेन निषिध्यते । कर्मणोऽनुक्तत्वादण्यन्तावस्थायाः कर्ता ण्यन्तावस्थायां तृतीया विहिता - श्यामो भक्षयत्यन्नं वटुना । हिंसार्थे तु अण्यन्तावस्थायाः कर्तुर्ण्यन्तावस्थायां द्वितीया भवति - भक्षयति बलिवर्दान्सस्यं जनः ।

जल्पतिप्रभृतीनामुपसंख्यानम् - वा.-जल्प् भाष् विलप् आलप् एषां धातुनामण्यन्तावस्थाया यः कर्ता स णौ कर्मसंज्ञो भवति । अण्यन्तावस्थायाम् - रामो धर्मं जल्पति जल्पितवान्, भाषते भाषितवान्, विलपति विलपितवान्, आलपति आलपितवान् - तं प्रेरयति वसिष्ठः - ण्यन्तावस्थायाम् - वसिष्ठो रामं धर्मं जल्पयति जल्पितवान् भाषयति भाषितवान् विलापयति विलापितवान् आलापयति आलापितवान् - कर्मणि - वसिष्ठेन रामो धर्मं जल्प्यते जल्पयितव्यः जल्पितः जल्प्यमानः - भाष्यते भाषयितव्यः, भाषितः, भाष्यमाणः-विलाप्यते विलापयितव्यः, विलापितः, विलाप्यमानः-आलाप्यते, आलापयितव्यः, आलापितः, आलाप्यमानः । एषां जल्पादीनां वाच्यपरिवर्तनं प्रयोज्यकर्मणि भवति ।

दृशेश्च - वा.-दृशिर् प्रेक्षणे इत्यस्य धातोरण्यन्तावस्थाया यः कर्ता स णौ कर्मसंज्ञः स्यात् । भक्ता हरिं पश्यन्ति - तान्प्रेरयति स इति - महात्मा भक्तान्हरिं दर्शयति दर्शितवान् - महात्मना भक्ता हरिं दर्श्यन्ते दर्शयितव्याः दर्शिताः दर्श्यमानाः । अस्य धातोः प्रयोज्यकर्मणि वाच्यं परिवर्तते । वार्तिके दृश्धातोः पृथग्विधानात् गतिबुद्धि. इति सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामिति ज्ञाप्यते । तेन स्मरति जिघ्रातीत्यादीनां प्रयोज्यस्य कर्मसंज्ञा न भवति । एषां

प्रयोज्यकर्तुरनुक्तत्वात् तस्मात्तृतीया भवति । ९३३ स्मृ चिन्तायामित्यत्र चिन्तार्थकधातुर्गृह्यते न तु उत्कण्ठार्थकः । यतः प्रयोज्यकर्ता तृतीयान्तः - स्मारयति घ्रापयति देवदत्तेन[1]- स्मरति जिघ्रति देवदत्तः ।

शब्दायतेर्न - वा.-शब्दायेति क्यङन्तधातोरण्यन्तावस्थायाः यः कर्ता स णौ कर्मसंज्ञो न[2] स्यात् देवदत्तः शब्दायते - तं प्रेरयतीति - यज्ञदत्तो देवदत्तेन शब्दाययति - देवदत्तस्य कर्मत्वाभावात् प्रयोज्यकर्तुर्देवदत्तात्तृतीया विधीयते । येषां देशकालादिभिन्नं कर्म न संभवति । तेऽत्राकर्मकाः । न त्वविक्षितकर्मणोऽपि । तेन मासमायति देवदत्तमित्यादौ कर्मत्वं भवत्येव । देवदत्तेन पाचयतीत्यादौ तु न ।

हृक्रोरन्यतरस्याम् १।४।५३॥

हृक्रोर्धात्वोरण्यन्तावस्थाया यः कर्ता तस्य णौ कर्मसंज्ञा वा स्यात् । भृत्यः कटं करोति कुरुते हरति-ते-तं प्रेरयतीति प्रोक्ते ण्यन्तावस्थायां सूत्रेण भृत्यस्य वैकल्पिककर्मसंज्ञां ततः कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति । कर्मसंज्ञाया अभावे ततस्तृतीया विधीयते । देवदत्तो भृत्यं भृत्येन वा कटं कारयति[3] कारितवान्, हारयति हारितवान् वा देवदत्तेन भृत्यो भारं कार्यते कारयितव्यः कारितः कार्यमाणः - हार्यते हारयितव्यः, हारितः हार्यमाणो वा । अनयोर्धात्वोः प्रयोज्यकर्मणि पक्षे वाच्यं चिन्त्यं प्रयोज्यकर्मानुसारं क्रियापदं च । प्रयोज्यजककर्ता तृतीयान्तः ।

अभिवादिदृशोरात्मनेपदे वेति वाच्यम् - वा.-अभिवादिदृशोर्धात्वोरण्यन्तावस्थाया यः कर्ता स णौ वा कर्मसंज्ञः स्यादात्मनेपदे इति वाच्यम् । भक्तो देवमभिवदति पश्यति वा - यज्ञदत्तो भक्तं भक्तेन वा देवमभिवादयते दर्शयते वा । अनयोर्धात्वोर्ण्यन्तावस्थायामात्मनेपदपक्षे वैकल्पिककर्मसंज्ञा न तु परस्मैपदपक्षे । धात्वोः प्रयोज्यकर्मणि वाच्यं भवति । (प्रयोज्यकर्मण्येषां ण्यान्तानां लादयो मता इत्यनुसारं प्रयोगो दर्शितः ।)

ण्यन्तद्विकर्मकधातुप्रसङ्गे सूत्रवार्तिकेषु पठितेभ्यो धातुभ्यो भिन्नानां द्विकर्मकाणामेककर्मकाणां च धातूनामण्यन्तावस्थाया यः कर्ता तस्य ण्यन्तावस्थायां कर्तुवाच्ये तृतीया विधीयते । अर्थात् प्रयोज्यकर्ता तृतीयान्तः पठ्यते । अत्र ण्यन्तधातोः कर्तृकर्मवाच्ययोः क्रियायां येन क्रमेण पदानि प्रयुक्तानि सन्ति । अन्यत्रापि तेनैव प्रकारेण पदप्रयोगाश्चिन्त्याः ।

४-२-८ अध्याद्युपसर्गैरकर्मका धातवः सकर्मकाः

अधिशीङ्स्थासां कर्म १।४।४६॥

अधिपूर्वकाणामेषामाधारः कर्म स्यात् । शेष हरिरधिशेते इत्यत्राधारेऽर्थे "सप्तम्यधिकरणे च" इति सूत्रेण सप्तम्यां प्राप्तायां तां प्रबाध्यानेन सूत्रेणाऽऽधारस्य शेषस्य कर्मसंज्ञायां ततः शेषात् "कर्मणि द्वितीया" इति सूत्रेण द्वितीया भवति । ततः शेषमधिशेते हरिरिति सिद्ध्यति । एवं सर्वत्र -

१. हरिः सागरे शेषमधिशेते अधिष्ठितवान् अधिशयितः - हरिणा सागरे शेषोऽधिशय्यते, अधिशयितव्यः, अधिशयितः, अधिशय्यमानः ।
२. स वैकुण्ठमधितिष्ठति, अधिष्ठितवान्, अधिष्ठितः - तेन वैकुण्ठोऽधिष्ठीयते, अधिष्ठातव्यः, अधिष्ठितः, अधिष्ठीयमानः ।

---

[1] भट्टोजि दीक्षितः - सिद्धान्तकौमुदी - व्याख्याकारः - ज्ञानेन्द्रसरस्वती - कर्मकारके, तत्त्वबोधिनीटीकायाम् = आध्यानार्थकस्य स्मरतेः "घटादयो मितः" इति मित्वं न तु चिन्तार्थकस्येति भावः । देवदत्तेनेति । स्मारयत्येनं वनगुल्म इत्यत्र तु णेरणौ यत्कर्म णौ चेत् कर्ताऽनाध्याने इति सूत्रे भाष्ये प्रयोगादेव कर्मत्वं बोध्यम् ।

[2] आचार्योविश्वनाथशास्त्री प्रभाकरः - मध्यकौमुदी - पृ. ३८० - धात्वर्थसंगृहीतकर्मत्वेनाऽकर्मकत्वाद् गतिबुद्धीति प्राप्तं कर्मत्वमनेन निषिध्यते ।

[3] वि+धा प्+णिच्=विधापिक-विधापयति ।

३. हरिर्वैकुण्ठमध्यास्ते, अध्यासितवान्, अध्यासितः - हरिणा वैकुण्ठोऽध्यास्यते, अध्यासितव्यः, अध्यासितः, अध्यास्यमानः ।

४. रामोऽयोध्यामातिष्ठति आतिष्ठवान् आस्थितः - रामेणायोध्या आस्थीयते, आस्थातव्या, आस्थिता, आस्थीयमाना । कर्तरि - मन्थरकः सलिलमास्थितः । निमन्त्रितान्हि पितरः उपतिष्ठान्ति तान्द्विजान् । आङ्-अति-प्र-अनुप्र-उप+स्था । आङ्-अति+शीङ् । १०२१ आ+आस उपवेशने । अतिशेते - जयति=अधिकं भवतीत्यर्थः । उपादिपूर्वकोऽयं स्थाधातुः सकर्मकः ।

अभिनिविशश्च १।४।४७॥

अभिनीत्येतत्पूर्वकस्य विशतेराधारः कर्मसंज्ञः स्यात् । अभिनिविश इत्यस्य आग्रह इत्यर्थः । पथिकः सन्मार्गमभिनिविशते अभिनिविष्टवान् - पथिकेन सन्मार्गोऽभिनिविश्यते, अभिनिविष्टव्यः, अभिनिविष्टः, अभिनिविश्यमानः ।

उपान्वध्याङ्वसः १।४।४८॥

उप अनु अधि आङ् पूर्वस्य वसतेराधारः कर्म स्यात् । आधारे सप्तमी प्राप्यते तां प्रबाध्यानेन सूत्रेणाऽऽधारे कर्म विधीयते । हरिर्वैकुण्ठमुपवसति, उपोषितवान्, उपोषितः - अनुवसति, अनूषितवान्, अनूषितः - अधिवसति, अध्युषितवान्, अध्युषितः - आवसति ओषितवान् ओषितः - कर्मणि - हरिणा वैकुण्ठ उपोष्यते, उपवस्तव्यः, उपोषितः, उपोष्यमणः । अनूष्यते, अनुवस्तव्यः, अनूषितः, अनूष्यमाणः - अध्युष्यते, अधिवस्तव्यः, अध्युषितः, अध्युष्यमाणः - ओष्यते, आवस्तव्यः, ओषितः, ओष्यमाणः । शतृ - उपवसन्, अनुवसन्, अधिवसन्, आवसन् । तुमुन् - उपवस्तुम्, अनुवस्तुम्, अधिवस्तुम्, आवस्तुम् । अनु-उप-अधि-आङ्-अति-अभि-परि-उत्-परा-सम्-प्रति-प्र-नि-सन्नि एते उपसर्गपूर्वका अन्येऽकर्मकधातवोऽपि सकर्मका[1] भवन्ति । ते स्मरणीयाः । यतोऽन्वादिपूर्वकाणामकर्मकधातूनां कर्तरि निष्पन्नायाः क्रियायाः प्रयोगे कर्म भवति । यथा-खगा दिवमुत्पतन्ति (उड्डीयन्ते) । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः । स मामुपहसति । साधवोः दुराचारिणः पराभवन्ति (निन्दन्ति) । लौकिकानां हि साधूनामर्थं वागनुवर्तते । ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ ब्राह्मण आदित्यमहरहरुपतिष्ठते (उपास्ते प्रार्थयते पूजयति वा) । ब्राह्मणा आदित्यमहरहरुपतिष्ठन्ते (उपासते) । गङ्गा यमुनामुपतिष्ठति (उपश्लिष्यति सम्मिलति वेत्यर्थः) । स रथिकानुपतिष्ठते (मित्रीकरोतीत्यर्थ) । पन्थाः सुघ्नमुपतिष्ठते (प्राप्नोतीत्यर्थः) । स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती । देवभावेन पूजितवतीत्यर्थः । ते नार्या धनानि उपजीवन्ति । स शिवमुपास्ते उपासितवान् उपासितः - कर्मणि - शैवेन शिव उपास्यते, उपासितव्यः, उपासितः, उपास्यमानः । यं शैवा समुपासते शिव इति ब्रह्मेति वेदान्तिनो बौद्धा बुद्ध इति प्रमाण पटवः कर्तेति नैयायिकाः । यदत्र मामभिष्यात्तद्दीयताम् । अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते । भर्तारमुपतिष्ठति यौवनेन सा । साधुः साधुमनुवर्तते ।

अभुक्त्यर्थस्य[2] न-वा.-उपेत्युपसर्गपूर्वकस्य भोजनाभावार्थकस्य वसतेराधारः कर्म न स्यात् । यदा कर्म निषिध्यते तत्राधिकरणं भवति । वने उपवसति[3] सः - वने भोजनाभावेन उपवासं करोतीत्यर्थः । भोजननिवृत्ते(अनशनेऽभोजने वा)ऽर्थे तु कर्म विधीयते । यथा - उपवस्=भक्तो हरिदिनमुपवसति उपोषितवान्, उपोषितः - भक्तेन हरिदिनमुपोष्यते उपवस्तव्यम्, उपोषितम्, उपोष्यमाणम् ।

---

१ एभ्यः पूर्वका शतृशानच्क्त्वाल्यप्तुमुन्प्रत्ययान्ता भूतकर्तरि निष्पन्नाः क्तक्तवतुप्रत्ययान्ताश्चाकर्मिकाः क्रियाः सकर्मिकाः क्रियाश्च ज्ञेयाः ।

२ भोजना (खाद्यपदार्थ) भावादभुक्तिः ।

३ उपपूर्वकस्य वसेर्भोजनस्याभावेन उपवास इत्यर्थः ।

४-२-९ अकर्मकधातुभिर्योगे देशकालादिबोधे च कर्म

अकर्मकधातुभिर्योगे देशःकालो[1] भावो गन्तव्योऽध्वा[2] च कर्मसंज्ञक इति वाच्यम्-वा.-देशस्य कालस्य भावस्य गन्तव्यमार्गस्य च बोधकशब्दःकर्मसंज्ञः स्यादिति वाच्यम् । अत्यन्तसंयोगे एव कालाध्वनोरित्येव सिद्धम् । १. कुत्रापि ग्रामसमूहात्मकः कुरुपाञ्चालादिप्रदेशो गृह्यते न तु ग्रामादिः। यतः सदा देशवाचकशब्दो बहुवचने प्रयुज्यते न त्वेकवचनद्विवचनयोः । आदौ अकर्मकधातुभिरिति वार्तिकेन देशवाचकशब्दस्य कर्मसंज्ञा ततो द्वितीया - स कुरून्स्वपिति (शेते निद्राति संविशति)। ग्रामं स्वपिति तु न भवति । २. कालोऽहोरात्रसमूहो मासादिः । वर्षः (र्षम्), मुहूर्तम्, अब्दः पक्षः, होरा, ऋतुः, अयनं दिनं घटिका घण्टा रात्री चेत्यादयः समयबोधकाः सर्वे शब्दा गृह्यन्ते । आदौ वार्तिकेन समयबोधकशब्दस्य कर्मसंज्ञा ततो द्वितीया - रामो मासमास्ते । अयं वर्षं जीवति वसति वा । ३. भावप्रत्यान्तशब्दो गोदोहः । यतो भावबोधकशब्दे सति तस्य कर्मसंज्ञा ततो द्वितीया - गोदोहमास्ते। ४. अध्वा गन्तव्यत्वेन प्रसिद्धो नियतपरिणामः क्रोशादिः । आदौ वार्तिकेन क्रोशशब्दस्य कर्मसंज्ञा ततो द्वितीया - क्रोशमास्ते (क्रोशे वर्तते) सः । क्रोशेनाविच्छिन्नक्रोश एव गृह्यते न तु विच्छिन्नः । अत्र प्रयुक्ता द्वितीयान्ताः शब्दाः पर्यन्तार्थका ज्ञेयाः ।

४-२-१० अर्थान्तरेण धातुरकर्मकः

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥

१. धातोरर्थान्तरे=धातुपाठे पठितादर्थादन्यस्मिन्नर्थे वृत्तेः = वर्तनात् क्रिया अकर्मिका भवति। यथा - प्रापणार्थस्य वह्धातोः "भारं वहति (नयति) इत्यर्थोऽस्ति" । यदाऽयं धातुः स्यन्दनरूपार्थे प्रयुज्यते तदा स धातुरकर्मको भवति । यथा - नदी वहति= स्यन्दत इत्यर्थः । परोकाराय वहन्ति नद्यः। दोहनार्थे दुह्धातुर्द्विकर्मकः - स गां पयो दोग्धि-दुग्धे । अयमन्यस्मिन्नर्थेऽकर्मकः - गौर्दुहति=पयो ददाति । परोपकाराय दुहन्ति गावः ।

२. धात्वर्थेनोपसंग्रहात् क्रिया अकर्मिका भवति अर्थात् यदा धातोः कर्म धात्वर्थेऽन्तर्निहितं भवति चेत्तदा स धातुरकर्मकः । यथा - जीवति = प्राणान्धारयति । नृत्यति = गात्रं विक्षिपति ।

३. प्रसिद्धेः = कर्मणः प्रसिद्धेः क्रियाऽकर्मिका भवति । यथा - मेघो वर्षति । अत्र क्रियायाः वर्षकर्म जलमत्यन्तलोकविख्यातं विद्यते । तेनायमकर्मकोऽस्ति । शास्त्रेऽयं धातुरर्थान्तरे सकर्मकोऽपि लभ्यते - स देवीं शरवर्षेण ववर्ष समरेऽसुरः । चन्द्रः अमृतं वर्षेत् ।

४. कर्मणोऽविवक्षातः (अविवक्षायाम्) क्रियाऽकर्मिका भवति । अर्थात् यदा वक्ता तत्त्वकथने कर्म न विवक्षति तदा सा क्रियाऽकर्मिका भवति । यथा - हितान्न यः सशृणुते स किम्प्रभुरित्यत्र हितशब्दस्य कर्म कर्तव्यमासीत् । परं वक्ता हितशब्दं पञ्चम्यां प्रयोक्तुमिच्छति न तु कर्मणि । यतो हितशब्दो वक्तुरिच्छानुसारं पञ्चम्यन्तोऽस्ति । अत्र "आख्यातोपयोगे" इति सूत्रेण पञ्चमी । स किम्प्रभुः = स कुत्सितः प्रभुः अथवा किंस्वामीत्यर्थः ।

---

[1] कलो दिष्टोऽप्यनेहाऽपि समयः-अमरः- १।४।१॥ घस्रो दिनाहनी वा तु क्लीवे दिवसवासरौ - अमरः - १।४।२॥ संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः - अमरः - १।४।२० ॥ मासा वैशाखादयः । वत्सरे वर्षमस्त्रियाम् - अमरः - ३।४।२३२॥

[2] कालभावाध्वदेशानामन्तर्मूतक्रियान्तरैः । सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ।

४-२-११ उपपदैर्योगे द्वितीयादिविभक्तयः

पदमाश्रित्य जायमाना (विधीयमाना) विभक्तिरुपपद[1]विभक्तिरुच्यते । चादीनां परादीनां च निपातसंज्ञा क्रियते । स्वरादयो निपाताश्चाव्ययाः प्रोच्यन्ते । तेष्वव्ययशब्देषु केचन शब्दा उपपदेषु गह्यन्ते । तेषूपपदेषु मध्ये कैश्चनोपपदैर्योगे द्वितीया कैश्चनोपपदैर्योगे तृतीया कैश्चनोपपदैर्योगे चतुर्थी कैश्चनोपपदैर्योगे पञ्चमी कैश्चनोपपदैर्योगे षष्ठी कैश्चनोपपदैर्योगे सप्तमी च विधीयते । सामान्ये उपपदेन संबद्ध पदमुपपदात्पूर्व सन्निधावेव प्रयुज्यते । तथाप्युपपदेन विभक्तेरुत्पादितं पदं वाक्ये यत्र कुत्रापि स्थले प्रयोक्तुं शक्यते । परमर्थकाले विभक्तेरुत्पादितं तत्पदमुपपदात्पूर्वं सन्निधावेव प्रयुज्यते ।

क) **उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।**
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि[2] दृश्यते ।

तसिल्प्रत्ययान्ताभ्यामुभयसर्वशब्दाभ्यां धिक्शब्देन, उपरि अधि अधः एषामाम्रेडितेन ऋतेशब्देन च योगे (सम्बन्धे) स्थिते शब्दे द्वितीया विधीयते । यत उभयतः, सर्वतः, विश्वतः, धिक्, उपर्युपरि अध्याधि, अधोऽधः, ऋते चैभिः सह सम्बद्धे शब्दे द्वितीया भवत्येव । यत एभिः सह स्थितः शब्दो द्वितीयान्तः पठचते । उपरि अधः आभ्यामनाम्रेडिताभ्यां योगे षष्ठी, उपरियोगे क्वचित्पञ्चमी च विधीयते । यथा - गृहस्योपरि वृक्षस्याधरिति षष्ठी, वृक्षादुपरि इति पञ्चमी । उभयत आदीनामुपपदानां प्रयोगः -

१- उभयतः=दुवै तर्फ-तिर-पट्टी= दोनों ओर-तरफ

कृष्णमुभयतो गोपाः सन्ति । विश्वविद्यालयमुभयतो वृक्षा विद्यन्ते । राजमार्गमुभयतो वृक्षा रोपिताः सन्ति ।

२- सर्वतः, विश्वतः= सबै (चारै) तिर-तर्फ-पट्टी=(सब (चारों) ओर, तरफ

सर्वतः कृष्णं गोपिन्यः सन्ति विलोक्यन्ते निवसन्ति वा । पुष्करिणीं सर्वतो वृक्षाः कुसुमानि वा विद्यन्ते (दृश्यन्ते सन्ति कम्पन्ते वा) । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज । परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । त्वां सर्वतः (विश्वतः) सर्वे जनाः सन्ति दृश्यन्ते वा ।

३- धिक्=धिक्कार -धिक्कार

क) कृष्णस्याभक्तं धिक्[3] (अस्ति) । भवान्संस्कृतं निन्दति अतस्त्वां धिक् । यो वेदं नाधीते (पठति) धर्मं न करोति धनं नार्जयति पुराणं न श्रृणुते पुत्रं नोत्पादयति विकासं न विधत्ते मोक्षं न कामयते च तं धिक् । पिशुनं धिक् । यो बन्धोर्दुःखे मुखं न दर्शयति तं धिक् । धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना । धिग्धनं चानपत्यस्य धिग्कुलं सन्ततिं विना ॥ यस्माद्गीतां न जानाति नाधमस्तत्परो जनः । धिग्तस्य मानुषं देहं विज्ञानं कुलशीलताम् । गीतार्थं न विजानाति नाधमस्तत्परो जनः । धिग्शरीरं शुभं शीलं विभवं तद्गृहाश्रमम् ॥ गीताशास्त्रं न जानाति नाधमतत्परो जनः ।

---

[1] अत्र कानिचनोपपदानि संगृह्यन्ते अमितः, परितः, सर्वतः, उभयतः, समया, निकषा, हा, धिक्,अधि, अध्यधि, उपर्युपरि, ऋते, अन्तरा, अन्तरेण, अधोऽधः, परि, अनु, उप, आ, सह, अप, प्रति, उपरि, पृथक्, नाना, विना, नमः, स्वाहा, स्वधा, अलम्, वषट्, वौषट्, हुम्, फट्, यावत्, तावत्, स्वस्ति, अधः, अधस्तात्, उत्तरतः, दक्षिणतः, परतः, अवरतः, पुरः, पुरस्तात्, पश्चात्, अग्रे, धुरि, अति, उत्तरेण, दक्षिणेन, पूर्वेण, अधरेण, द्विः, त्रिः, चतुः, पञ्चकृत्वः, षट्कृत्वः, शतकृत्वः, लक्षकृत्वः, इत्यादीनि । यदैतानि उपपदानि मन्यन्ते । तदैव एभिर्योगेऽन्यनामसर्वनामादिशब्देभ्यो विभक्तयो विधीयन्तेऽयोगे (असम्बन्धे) तु न, अथवा क्रियाविशेषणे सति तु न । शौण्डः, धूर्तः, कितवः, व्याडः, प्रवीणः, संवीतः अन्तः, अधि, पटुः, पण्डितः, कुशलः, चपलः, निपुण इत्येतानि सदृशः, समः, तुल्यः, सदृक्षः, सदृक्, साधारणः, समानश्चेत्यादिभिः पदैर्योगेऽपि शब्दाद्विभक्तयो विधीयन्ते ।

[2] अन्यत्रपदेन ऋतेपदं गृह्यते ।

[3] धिग्शब्दोऽव्ययोऽस्ति । यतोऽस्य रूपं न चलति ।

धिग्प्रारब्धं प्रतिष्ठां च पूजां मानं महत्तरम् ॥ धिग्तां च तं च मदनं च इमां च मां च ॥ यो धर्मं न स्मरति तं धिक् । तौ स्वधर्मं न स्मरतस्तौ धिक् । ये स्वधर्मं न स्मरन्ति तान् धिक् । त्वं वेदं न पठसि त्वां धिक् । युवां पुराणं न शृणुथः, युवां धिक् । यूयं स्वकर्माणि न कुरुथ युष्मान् धिक् । अहं तीर्थं न गच्छामि मां धिक् । आवां स्वकर्माणि न कुर्वः, आवां धिक् । वयं कस्यापि कल्याणं न कुर्मः, अस्मान् धिक् । स कमपि नोपकरोति नोपकुरुते वा तं धिक् ।

ख) धिग्योगे प्रथमा - धिगर्थाः कष्टसंश्रयाः । अहो धिगियं दरिद्रता । धिग्दारिद्रचं खलु देहिनाम् ।

ग) धिग्शब्दः सम्बोधनेऽर्थेऽपि प्रयुज्यते - धिङ् मूर्ख यदि त्वं वेदं नाधीषे । धिग्पापाधम ! पुनर्जल्पसि । धिक् पापाधम ! विश्वासघातक ! वा ।

४- उपर्युपरि=ऊर्ध्वसमीपे[1]=माथि माथि-उपर उपर

ग्राममुपर्युपरि वनमस्ति-ग्रामस्योपरिष्टात्समीपे देश इत्यर्थः । नगरं पर्वतं वा उपर्युपरि वायुयानानि उत्पतन्ति =उड्डयन्ते(भ्वा.)उड्डीयन्ते(दिवादिः) । उपर्युपरि लोकं राजते देवः(मेघः) । य उपर्युपरि लोकं राजते सोऽलोकाकाशः प्रोच्यते ।

५- अध्यधि=अयमुपरिसमीपे-माथि, नगीच-उपर, नजदीक

अध्यधि सुखं सा प्राप्नोति - सुखस्योपरिष्टात्समीपे दुःखमित्यर्थः - नैरन्तर्यसुखादनन्तरकालसमीपे दुखमित्यर्थः - कालकृतः । सर्वे देवा अध्यधि लोकं वसन्ति निवसन्ति वा देशकृतः ।

६- अधोऽधः=अधःसमीपप्रदेशे-तलतल, मुनिमुनि-नीच नीचे

अधोऽधो लोकं पातालोऽस्ति - लोकस्याधस्तात्समीपे देश इत्यर्थः । अधोऽधो लोकं मनुष्याणां विपत्तिरस्ति । गिरिमधोऽधो वसतिर्विद्यते । नवान्बृहतः पयोधरानधोऽधो पर्वताः सन्तिः ।

७- ऋते=विना, छोडेर, बाहेक, नभइकन - विना, छोडकर

अनेन योगे द्वितीया तृतीया पञ्चमी च भवति । अत्रास्य योगे द्वितीया प्रस्तूयते - ऋतेऽपि त्वां न भविष्यन्ति सर्वे । कृष्णमृते नान्यं स्मरामि । फलं पुरुषाराधनमृते न फलति । कृष्णमृते नान्यं शरणं गच्छामि । ऋते कृष्णप्रकाशं तु स्वात्मबोधो न कस्यचित् । तत्प्रकाशस्तु जीवानां मायया पिहितः सदा ॥

ख) अभित-परित-समया-निकषा-हा-प्रतियोगेऽपि-वा.-एभिर्योगे द्वितीया स्यात् । एभिर्युक्तानि द्वितीयान्तपदानि -

१- अभितः परितः=चारै तरफ-तर्फ-पट्टी-चारों तरफ-ओर

कृष्णमभितः परितो वा गोपिन्यो भक्ता देवा वा शिवमभितः परितो वा नन्दिभृङ्गितुण्डिन्यश्च विद्यन्ते । सीतामभितः परितो वा राक्षस्यो राममभितः परितो वा वानरा ऋषयो देवाश्च वर्तन्ते । विष्णुमभितः परितो वा भक्ता ऋषयो देवा मुनिगणाश्च सन्ति । त्वां परितः (अभितः) सर्वे भक्ताः सर्वे ब्राह्मणा जना वा सन्ति दृश्यन्ते लभ्यन्ते वा । तडागं परितो वृक्षाः सन्ति ।

२- समया निकषा=समीपे=नगीच, समीप-समीप, निकट, नजदीक

ग्रामं समया निकषा वा नदी वनं वाऽस्ति । रामं सीतां च समया निकषा वा लक्ष्मणो हनुमाँश्च दृश्येते । लङ्कां निकषा भारतमस्ति ।

---

[1] पा.सू. - उपर्यध्यधसः सामीप्ये ८।१।७॥ उपरि अधि अधः एते आम्रेडिता(द्विरुक्ताः) भवन्ति सामीप्ये विवक्षिते । समीपता कालकृतं देशकृतं च । कर्मकारकस्य प्रसङ्गे - उपर्युपरिशब्देन योगे षष्ठी - उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः-तत्वबोधिनीटीकायाम् । सामीप्य इति किम् ? उपरि चन्द्रमा । उपरि शिरसो घटं धारयतीत्यत्र तु वस्तुतो विद्यमानमपि सामीप्यं न विवक्षितं किन्त्वौत्तराधार्यमेव केवलं विवक्षितमिति द्विवचनं न भवति । विवक्षा हि शब्दव्युत्पत्तेः प्रधानं कारणम्-सि.कौ., द्विरुक्तप्रक्रिया-४० तत्वबोधिनीटीकायम् ।

३- हा=खेदः=विषाद, पीडा, अपशोच, शोक-खेद, विषाद, पीडा, अपसोस, अपशोच

हा कृष्णाभक्तम् (कृष्णका अभक्तमा शोक छ - कृष्ण का अभक्त पर अपसोस है) । हा नास्तिकं य ईश्वरं न मन्यते (जो ईश्वर मान्दैन त्यस्तो नास्तिकमा खेद छ - जो ईश्वर न मानता है उस नास्तिक मे खेद है) । हा रामाभक्तम् । हा शिवाभक्तम् । हा दुर्गाभक्तम् । हा सरस्वत्या अभक्तम् । हा गणेशाभक्तम् ।

४-क) प्रति=लाई- को । शब्दोऽयं विविधाशयेषु प्रयुज्यते

बुभुक्षितं न प्रतिभाति किञ्चित् - किञ्चिदपि न परिस्फुरति । तान्प्रति एतदुच्यते । यजमानो ब्राह्मणं प्रति निमन्त्रणं प्रेषयति प्रेषितवान् । एके वादिनो वेदान्प्रति सन्निकर्षं मन्यन्ते । प्रामाण्यमपि तच्छाखाध्यायिनं प्रति भविष्यति । छन्दोगाश्च प्राथम्ये सनत्कुमारं प्रति नारदवाक्यमामनन्ति । गुरुं प्रति शिष्यः पाठं श्रावयति श्रावितवान् - गुरुं प्रति शिष्येण पाठः श्राव्यते श्रावयितव्यः, श्रावितो वा । लक्ष्मणो रामं प्रति दुःखं ब्रूते, उक्तवान् - रामं प्रति लक्ष्मणेन दुःखमुच्यते वक्तव्यम्, वाच्यम्, उक्तम् । उक्तं[1] च नारदेनैव तदा युधिष्ठिरं प्रति । भणितं च त्वां प्रति तया चन्द्रवत्या । आर्य ! ननु रामभद्र इत्येव मां प्रत्युपचारः शोभते । त्वदीया माया मां प्रति तु विपरीतं कृतवती । कदाचिदपि मया भवन्तं प्रति नैतदभिहितम् । वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिः । न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ॥ स ब्राह्मणं प्रति दक्षिणां ददाति दत्तवान् - तेन ब्राह्मणं प्रति दक्षिणा दीयते दातव्या देया दत्ता । पित्राऽऽर्जितं धनं पुत्रं प्रति भवति । मया कृतं दुःखं लोकान् संसारं जनान्वा प्रति भवति । द्वितीयाप्रभृतिप्रयाजेषु यज यज इत्येवं प्रैषं होतारं प्रति ब्रूयादध्वर्युः । जनान्प्रति वदतु सुवचनानि भवान् ।

४-ख) प्रति=लाई, माथि, उपर, मा-पर, उपर

दीनं प्रति दयां कुरु । प्राणिनः प्रति कृपां विधेहि (कुरु) । भगवान् भक्तं प्रति अनुकम्पां करोति । बालकान्प्रति भवान् दयावानस्ति । नारीं प्रति भवान् क्षमाशीलो भवतु । कालिदासो यं रसं प्रति दृष्टिं निक्षिपति तं रसं विलक्षणभावेन प्रतिपादयति । यदि इयं किंवदन्ती महाराजं प्रति स्यन्देत ततोऽतिकष्टं स्यात् । महिषो दैत्यो विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् । भक्तं प्रति भगवान् दयावान्, भगवती दयावती वा ऽस्ति। भगवान् सदा भक्तान्प्रति दयालुरस्ति । त्वं दीनान्प्रति कृपालुरसि ।

४-ग) प्रति=लाई, निमित्त, निम्ति - को, लिए, निमित्त

दण्डश्चक्रं प्रति हेतुः (कारणम्) । चक्रं घटं च प्रति दण्डो हेतुः (कारणम्) । जगद्यत्संमानं सदाचारवन्तं प्रति ददाति तद्धनवन्तं प्रति न दत्तवत् । अस्य अष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धत्वाद् शास्त्रदृष्ट्या विवृतमेव । उत्वं प्रति रुत्वस्यासिद्धत्वं न भवति । एते जशः कार्यं प्रत्युक्तसंज्ञा वा स्युः । प्रतिज्ञातं[2] च रामेण तदा वालिवधं प्रति । स एव हि ददौ भागं परोक्षमसुरान्प्रति । चर्त्वं प्रति थकारस्यासिद्धत्वात् । सृष्टिं प्रति प्रकृतिः कारणम् (हेतुः) । इयमुक्तिस्त्वां सदाचारन्तमुपकारिणं वा प्रति नास्ति ।

४-घ) प्रति=तर्फ, तिर, पट्टी, मा - ओर, तरफ, में, पर

तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः । न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते । शलभा अग्निं प्रति पतन्ति । सञ्जीवकेन पिङ्गलकं प्रति अभावि । भृत्यो गृहं प्रति भारं नयति नीतवान् नीतः - भृत्येन गृहं प्रति भारो नीयते नेतव्यः, नयनीयः, नेयः नीतः । श्रुत्वा साङ्ग्रामिकीं वार्तां भविष्यां स्वामिनं प्रति । प्रसन्नास्यो भवेद्यस्तु स भृत्योऽर्हो महीभुजाम् ॥ मां ग्रामं वा प्रति दृष्टिं देहि । ते जना गृहं प्रति प्रतस्थिरे प्रस्थितवन्तः प्रस्थिताः । स पापर्धिं कर्तुं वनं प्रति प्रस्थितः ।

---

१ नपुंसके भावे कालसामान्ये धातोः क्तो विहितो ज्ञेयः ।
२ भावे कालसामान्ये नपुंसके क्तः ।

४-ङ) प्रति=अगाडि, दृष्टिमा - आगे, दृष्टि में

सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् । अस्याष्टाध्यायीं प्रत्यसिद्धत्वात् शास्त्रदृष्टचा विवृतत्वमस्त्येव । उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति ।

प्रतिना योगे द्वितीया तु भवत्येव । परमयं प्रतिशब्दो विविधस्थले प्रयुज्यते । यतः प्रतिशब्दस्य स्थलानुसारमर्थं विचार्यार्थः करणीयः । स शब्दः सामान्यज्ञानार्थमत्र समुल्लिखितः । उपर्युक्तेषूदाहरणेषु प्रस्तुतः प्रतिशब्दो लक्षणार्थमपि प्रयुज्यते । लक्षणार्थे प्रयुक्तोऽयं शब्दः "लक्षणेत्थंभूताख्यान." इति सूत्रे द्रष्टव्यः ।

ग) अन्तरा=मध्ये, मध्यमा, बीचमा, भित्र - बीच में, मध्यमें, भितर । अन्तरेण=विना, मध्ये=नभइकन, छोडेर, विना, भित्र, माझमा, बीचमा, मध्यमा-विना, छोडकर, विषय में, भितर, मध्य में ।

अन्तरान्तरेण युक्ते द्वितीया २।३।४॥

अन्तरा अन्तरेण आभ्यां योगे द्वितीया स्यात् । योगः=सम्बन्धः । क) त्वां मां चान्तरा हरिरस्ति । गृहमन्तरा चौरः प्राविशत् प्रविष्टः । धर्ममन्तरेण (विना) संसारे कस्यापि सुखं नास्ति कार्यमपि न चलति । अन्तरेणारुणं कोऽन्यस्तिमिरं तिरयिष्यति । अथापीद(निरक्त)मन्तरेण पदविभागो न विद्यते । अथापीद(निरुक्त)मन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते । त्वामन्तरेणास्य कः प्रतिकरोति । धनमन्तरेण संसारे सुखं नास्ति । धनमन्तरेण सांसारिकं सुखं न विद्यते । त्वां भवन्तं वाऽन्तरेण कार्यं न सिद्ध्यति । त्वां भवन्तं वाऽन्तरेण एतत्कार्य कर्तुं कः समर्थः कोऽलम्(क्षमः शक्तः) । त्वामन्तरेण शत्रुं प्रतिकर्तुं कः शक्तः (क्षमः ईश्वरः विभुः) । ख) वनमन्तरा गृहाणि सन्ति । ग्रामं नगरं वाऽन्तरा लघुमार्गा निर्मिता विद्यन्ते । भगवन्तं वासुदेवमन्तरेण संसारसागरात्पारं नेतुं कोऽपि न प्रभवति (शक्तः, प्रभवः, प्रभुः, विभुः, क्षमः, ईश्वरो वा नास्ति) । त्वां भवन्तं वाऽऽन्तरेणास्य विषयस्य कः प्रतिकारं कर्तुं शक्नोति समर्थो वा ।

घ) अनु, परि, प्रति उप एषां कर्मप्रवचनीयानां प्रसङ्गः -

कर्मप्रवचनीयाः १।४।८३॥

इत्यधिकृत्य ।

अनुर्लक्षणे १।४।८४॥

लक्षणं निमित्तं कारणञ्च पर्यायाः । लक्षणे द्योत्ये अनुः कर्मप्रवचनीयः स्यात् । गत्युपसर्गसंज्ञकापवादः । अर्थात् यस्य पदस्य कर्मप्रवचनीयसंज्ञा भवति । तया संज्ञया गतिसंज्ञा उपसर्गसंज्ञा च बाध्येते । प्रादीनामव्ययानां चाभ्यां संज्ञाभ्यां (गत्युपसर्गसंज्ञाभ्यां) विना प्रादिभिरव्ययैश्च सह स्थितस्य पदस्य सस्य षत्वं नस्य णत्वं तेषामन्यपदैश्च सह समासश्च न भवति ।

कर्मप्रवचनीययुक्ते द्वितीया २।३।८॥

कर्मप्रवचनीयेन योगे द्वितीया स्यात् । योगः = सम्बन्धः । जप अनु इत्यत्र लक्षणद्योतकस्यानोः "अनुर्लक्षणे" इति सूत्रेण कर्मप्रवचनीयसंज्ञायां ततोऽनेन योगे "कर्मप्रवचनीययुक्ते" इति सूत्रेण जपशब्दात् द्वितीया विहिता । जपमनु=पश्चात् (पछि-पीछे) प्रावर्षत्पर्जन्यः= मेघः । जपस्य समाप्त्यन्तरं वृष्टिर्जाता । जपस्य कारणाद्वृष्टिर्जाता इत्यर्थः । एवं सर्वत्र चिन्त्यम् । कथाविरामः कर्तव्यो मध्याह्ने घटिका द्वयम् । तत्कथामनुकार्यं वै कीर्तनं वेष्णवैस्तदा ॥ अर्ध्वयुरितरान्सोमचमसाननु (पश्चात्) फलचमसानुन्नयेत् । तदनु= पश्चात्तेन कुपो दर्शितः । यं वै श्वसन्तमनु(पश्चात्) विश्वसृजःश्वसन्ति यं चेकितानमनु चित्तय उत्कचन्ति ।

तृतीयार्थे १।४।८५॥

तृतीयाया अर्थे द्योत्येऽनुरुक्तसंज्ञः स्यात् । अनु=सह । नदीमन्ववसिता सेना । नद्या सह सम्वद्धा सेना इत्यर्थः । षिञ् बन्धने धातोः क्तः । माणवकमनुक्रीडन्ति ते - माणवकेन सह क्रीडन्ति इत्यर्थः ।

हीने १।४।८६॥

हीनेऽर्थे द्योत्येऽनुरुक्तसंज्ञः स्यात् । अनु=हीनः (न्यूनः) । हरिमनु (हरि भन्दा न्यून - हरि से न्यून) सुराः (देवाः) सन्ति ।

उपोऽधिके च १।४।८७॥

अधिके हीने च द्येत्ये उपेत्यव्ययं कर्मप्रवचनीयं स्यात् । उप=अधिको (सर्वोत्कृष्टो) हीनश्चार्थः । अधिकोऽधिकरणे वक्ष्यते । अत्र हीनेऽर्थे संज्ञा विधीयते । उप हरिं (हरिले हीन भएका - हरि से हीन हुआ) सुराः (देवाः) सन्ति ।

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः १।४।९०॥

एष्वर्थेषु विषयभूतेषु प्रत्यादयः कर्मप्रवचनीयसंज्ञाः स्युः । प्रति परि अनु एते उपसर्गा लक्षणादिषु चतुर्षु विषयीभूतेष्वर्थेषु क्रमेण प्रयुज्यन्ते । प्रत्यादीनां त्रयाणां गत्युपसर्गसंज्ञकापवादः । प्रादीनामव्ययानां चाभ्यां संज्ञाभ्यां (गत्युपसर्गसंज्ञाभ्यां) विना प्रादिभिरव्ययैश्च सह स्थितस्यान्यपदस्य सस्य षत्वं नस्य च णत्वं तेषामन्यैः पदैश्च सह समासश्च न भवति । प्रतिशब्दस्तु प्रतिनिधिप्रतिदानयोरर्थयोरपि प्रयुज्यते । कोशकारोऽमरो वदति - प्रतिप्रतिनिधौ विप्सा लक्षणादौ प्रयोगत इति । प्रतिनिधि-प्रतिदान(विनिमय)योरुदाहरणमपादानकारके लेखिष्यते । अत्र लक्षणादिष्वर्थेषु प्रतिपर्यनुभिः कर्मप्रवचनीयैर्द्वितीया विहिता लिख्यते ।

१- लक्षणे(ज्ञापके)ऽर्थे=माथि, तर्फ, तरफ, पट्टी, तिर, चिह्न - में, से, उपर, पर, चिह्न ।

क) वृक्षं प्रति, परि, अनु वा विद्योतते विद्योतितवती वा विद्युत् ।

ख) कलाबलादुदयते श्रीः प्रतीचीं दिशं प्रति ।
व्यादायाऽऽननमभ्येति दुर्भिक्षं भारतं प्रति ॥

ग) गृहं प्रासादं वा प्रति परि अनु वा तडित् विद्योतते ।

२- इत्थंभूताख्यानेऽर्थे = यो यस प्रकारको हो, यस्तो व्यक्ति यस्तो हुन्छ, यस्तो भयो, यस्तो होला - यह इस प्रकारका है, ऐसा हुआ, ऐसा होगा -

क) भक्तो विष्णुं प्रति, परि, अनु वा भवति, भूतवान्, भूतः ।

ख) मातरं प्रति परि अनु वा साधुर्निपुणो वाऽस्ति कृष्णः ।

ग) प्राकृता अपि पाश्चात्या अभूवन्प्रकृतिं प्रति ।
भारतीया अपि पुनर्नाभूवन्भारतं प्रति ॥

३- भागः = स्वकीयोंऽशः = अयमस्य भागो जातः - यो यसको भाग - यह उनके हिस्से में पडा

क) लक्ष्मीर्हरिं प्रति, परि, अनु वा भवति भूतवती भूता ।

ख) हरिं प्रति श्रीः सुरभिर्मुनीन्प्रति, द्रुमः स कल्पोपपदः सुरान्प्रति ।
स कालकूटः किल कृत्तिवाससं प्रति, प्रवृत्तेऽम्बुधिमन्थने सति ॥

ग) यो मां प्रति सोंऽशो दीयताम् ।

घ) एतत्फलं भवन्तं प्रति भवेत्, भूतवत्, भूतम् - कल्पते कल्पितवत् ,कल्पितम्

४- वीप्सा = व्याप्तुमिच्छा वीप्सा । वि+ईप्सा=वीप्सा । यस्य पदस्य पठने लेखने भाषणे च द्विरावृत्तिर्भवति सा वीप्सा ज्ञेया । अर्थः - प्रत्येक ..... लाई - प्रत्येक .. को -

क) स वृक्षं वृक्षं प्रति, परि, अनु वा सिञ्चति सिञ्चितवान्वा - वृक्षै पीच्छे जल सेचन गर्दछ, प्रत्येक वृक्षलाई जल सेचन गर्दछ - प्रत्येक वृक्ष को जल सींचता है (सेचन करता है) ।

ख) गृहं गृहं प्रति, परि, अनु वा भिक्षार्थं याति भिक्षां याचति-ते वा ब्रह्मचारी याचको वा। स ग्रामं ग्रामं, मण्डलं मण्डलं नगरं नगरं देशं देशं पर्वतं पर्वतं वनं वनं वा प्रति, परि, अनु वा भ्रमति (पर्यटति) भ्रान्तवान् (पर्यटितवान्) गच्छति गतवान् वा । धनी ग्रामं ग्रामं जनं जनं वा प्रति, परि अनु वाऽऽर्थिकसहयोगं ददाति दत्ते दत्तवान् ।

ग) गेहं गेहं प्रति प्रीता गायन्ति सुयशः प्रजाः ।
प्रजाः प्रजाः प्रति पुरा धर्म आसीत् सनातनः ॥

एवं शतृशानच्क्त्वाल्यप्तुमुन्गौणक्रियापदेष्वपि कर्मप्रवचनीयपदेन योगे द्वितीयान्तपदं प्रयुज्यते। तत्प्रयोगे विचारणीयम् ।

अभिरभागे १।४।९१॥

भागवर्जे लक्षणादावर्थेऽभिः कर्मप्रवचनीयः स्यात् । लक्षणे-जयो हरिमभिवर्तते । इत्थंभूताख्याने -भक्तो हरिमभिविद्यते । वीप्सायाम्- स देवं देवमभिषिञ्चति । भागे किम् - यत्र मामभिष्यात्तद्दीयताम् - अर्थः - यदत्र मम भागः स्यात् तद्दीयताम् । अभिना कर्मविधानम् - तद्विज्ञानार्थं स गुरुमभिगच्छेत्। अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः । शतं चैका च हृदयस्य नाडचस्तासां मूर्धानमभिसृतैका । अग्निमभि शलाभाः पतन्ति ।

सुपूजायाम् १।४।९४॥

पूजार्थकः सुः कर्मप्रवचनीयसंज्ञः स्यात् । सिक्तमिति पदेन सह स्थितस्य सु इत्यस्यानेन सूत्रेण कर्मप्रवचनीयसंज्ञायां ततोऽनुपसर्गत्वान्न षत्वम् । सुसिक्तम् । एवं सुस्तुतम् । पूजायां किम् - सुषिक्तम् । अत्र निन्दा गम्यते न तु पूजा । यतो न कर्मप्रवचनीयसंज्ञा । अतः षत्वम् ।

अतिरतिक्रमणे च १।४।९५॥

अतिक्रमणे(आधिक्ये) पूजायां चातिः कर्मप्रवचनीयः स्यात् । अति=अधिकः (उत्तम उत्कृष्टः) पूज्यश्चार्थो बोध्यः । कृष्णो देवानतिवर्तते (अतिशेते अत्येति वा) - अधिकः पूज्यो वाऽस्ति । देवेभ्योऽधिकः पूज्यो वा कृष्णोऽस्तीत्यर्थः । अधिकयोगे विहिता पञ्चम्यपदानकारके सप्तम्यधिकरणे च समुल्लेखिष्येते ।

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥

स सर्वान् अतिशेते (अतिवर्तते, अत्येति)। स सर्वमतिक्रामति, अतिक्रान्तवान्, अतिक्रान्तः। रामः सर्वानतिवर्तते (अतिशेते, अतिशयितवान्, अतिशयिते वा)। माघः कलापक्षे अन्यान्कवीनतिशेते। माता स्वीयैः स्नेहादिगुणैर्दिवं भुवं चाप्यतिशेते।

अपि पदार्थसंभावनाऽन्वसर्गगर्हासमुच्चयेषु १।४।९६॥

एषु पदार्थादिषु द्योत्येषु अपिः कर्मप्रवचनीयः स्यात्। पदार्थद्योतकतायामपि - विन्दुः सर्पिषोऽपि स्यात्। अनुपसर्गत्वान्न षः[1]। संभावनायां लिङ्। तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन संबध्यते। सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य विन्दोरवयवावयविभावसम्बन्धे। इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्तते। सर्पिषो विन्दुना योगो न त्वपिनेत्युक्तत्वात्। संभावनायाम् - अपि स्तूयाद्विष्णुम्। संभावनं शक्त्युत्कर्षमाविष्कर्तुमित्युक्तिः। अपि स्तुहि त्वं तम् - अन्वसर्गः कामाचारानुज्ञा - इच्छानुसारस्य स्तुतिः। गर्हायाम् (निन्दायाम्) - धिग्देवदत्तं स वृषलमपि स्तुयात्। समुच्चये - अपि सिञ्च अपि स्तुहि। इह समुल्लिखितेषु वाक्येष्वपेः परस्य सस्य कर्मप्रवचनीयत्वेन न षत्वम्। अन्यत्रापि अपेः प्रयोगो विचिन्त्यः।

उपपदेन कर्मप्रवचनीयपदेन च विहिता द्वितीया समाप्ता।

कालाध्वनोरत्यन्तसंयोगे २।३।५॥

अत्यन्तसंयोगः=निरन्तरसंयोगः। संयोगः=सम्बन्धः। स एवाविच्छिन्नसंयोगः[2]। गुणक्रियाद्रव्यैः कालाध्वनोऽविच्छिन्नसंयोगे गम्ये कालवाचकादध्ववाचकाच्च शब्दात् द्वितीया स्यात्। कालवाचकानां शब्दानां संग्रहः ४-२-९ अकर्मकधातुभिर्योगे - इति शीर्षकप्रसङ्गे कृतः। तत्रैव द्रष्टव्यः। अत्र कालवाचकेनाविच्छिन्नसमयस्यान्तिमपर्यन्तोऽध्ववाचकेनाविच्छिन्नमार्गस्यान्तिमपर्यन्तश्चार्थः क्रियते।

१. कालवाचकशब्दात् द्वितीया -

क) मासं कल्याणी रात्रिरभवत् - गुणवाचकशब्देन योगे।

ख-१) शिष्यो वेदं मासमधीते (पठति) - क्रियावाकशब्देन योगे।

२) छात्रो व्याकरणं त्रीणि वर्षाणि पठति। श्यामो वेदान्पञ्च वर्षाणि अधिजगे। तमधीतो भृतो भूतो भावि। त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम्।

ग) मासं गुडधाना भवन्ति - द्रव्यवाचकशब्देन योगे। मासं स पुमान्भविता मासं स्त्री तव गोत्रजः। शतं जीवेम शरदः।

२. अध्ववाचकशब्दात् द्वितीया - (क्रोशः योजनम्)

क-१) क्रोशं कुटिला नदी विद्यते - गुणवाचकशब्देन योगे।

२) क्रोशं सरला गङ्गा अस्ति।

ख) वेदं क्रोशमधीते छात्रः - क्रियावाचकशब्देन योगे।

ग) क्रोशं गिरिरस्ति - द्रव्यवाचकशब्देन योगे।

२-क-ख- क्रोशं नदः, क्रोशं सरित् इत्यादि। ग- क्रोशं पर्वतः, क्रोशं शैलः इत्यादि।

---

१ अपिशब्दस्योपसर्गत्वाभावात् अपिशब्दात्परे स्थितस्य पदस्य सस्य न षत्वम्।

२ निरवच्छिन्नसम्बन्धः।

४-२-१२ यावच्छब्दयोगे द्वितीया[१]ऽयोगे तु न

अयं शब्दोऽवधिपर्यन्तयोरर्थे प्रयुज्यते । अवधिरव्ययोऽनव्ययश्चास्ति । अहं नदीं यावद्यामि । काष्ठमण्डपं यावद्गच्छामि । वाराणसीं यावद्व्रजामि । स पशुपतिं यावद्धावति । यावज्जीवं काश्यां वसामि । मासं द्विमासं वर्षं वा यावत्कार्यं भविष्यति । पञ्चविंशतिवर्षं यावत् ब्रह्मचर्यकालो विद्याध्यनकालश्च सर्वेषाम् । रघुवंशमहाकाव्यमारम्भादन्तिमं यावत् अतिसुन्दरमस्ति । रविवारात् रविवारतो वाऽऽरभ्य (प्रभृति) शुक्रवारं यावत्कार्यालये (अधिकरणे) कार्यं भविष्यति । रामगिरितः कैलाशं यावत् रमणीयानि दृश्यानि सन्ति । शैशवात्प्रभृति (आरभ्य) अद्य यावत् किं किं नाकरवम् । किं किं नापश्यम् - मया किं किं न कृतम् किं किं न दृष्टम् । प्राचीनकालात्प्राचीनकालतो वाऽद्य यावत् सर्वे हिन्दवो वेदं पूजयन्ति शिरसा धारयन्ति च - प्राचीनकालतोऽधुना यावत् सर्वैर्हिन्दुभिर्वेदाः पूज्यन्ते शिरसा धार्यन्ते च । यावज्जीवं दर्शपूर्णमासाभ्यां यजेत । पञ्चाशतः पञ्चाशत्तो वा आरभ्य पञ्चसप्ततिवर्षं यावत् वानप्रस्थकालः । स तत्र यावद्याति । तौ तत्र यावद्यातः । ते तत्र यावद्यान्ति । त्वं तत्र यावद्याहि । युवां तत्र यावद्याताम् । यूयं तत्र यावद्यात । अहं तत्र यावद्यामि । आवां तत्र यावद्यावः । वयं तत्र यावद्यामः । भवान् अत्र यावदागच्छतु । शतं वर्षाणि यावज्जीवति सः । विंशतिं त्रिंशतं वा यावत्स जीवति ।

४-२-१३ गौणक्रियापदानि

क) धातोश्छन्दसि भूतसामान्ये कर्तरि विहितस्य लिटः स्थाने कानच्क्वसुप्रत्ययौ, परस्मैपदिभ्यो धातुभ्यो वर्तमानकर्तरि लटः स्थाने शतृप्रत्ययः, आत्मनेपदिभ्यो धातुभ्यो वर्तमानकर्तरि लटः स्थाने शानच्प्रत्ययः, विद्धातोर्वर्तमानकर्तरि विहितस्य लटः स्थाने शतृप्रत्ययस्तत्स्थाने वसुप्रत्ययः, कर्तरि पूयजिभ्यां शानन्प्रत्ययस्ताच्छील्यादिषु त्रिष्वर्थेषु द्योतेषु कर्तरि चानश्प्रत्ययः, अकृच्छ्रिणि कर्तरि शतृप्रत्ययः, तच्छीलादिषु त्रिष्वर्थेषु कर्तृषु तृन्-इष्णुच्-उकञ्-उ-आदि-प्रत्ययाः, भविष्यदर्थे ण्वुल्प्रत्ययः, आधर्मण्यार्थे णिनिप्रत्ययः सर्वेभ्यो धातुभ्यो भावे क्त्वाल्यप्तुमुल्प्रत्ययाश्च विधीयन्ते । एभिःप्रत्ययैर्निष्पन्नानि पदानि गौणक्रियापदानि प्रोच्यन्ते । सकर्मकधातुभ्यो निष्पन्नानि पदानि सकर्मकगौणक्रियापदानि अकर्मकधातुभ्यो निष्पन्नानि पदानि अकर्मकगौणक्रियापदानि च भवन्ति । सकर्मकगौणक्रियापदेषु कर्म भवति अकर्मकगौणक्रियापदेषु तु न धातोःकर्मणोऽभावात् । क्त्वाल्यप्तुमुन्णमुल्प्रत्ययान्तक्रियापदानि विहायान्यानि शतृशानजादिप्रत्ययान्तपदानि सविशेषणानि भवन्ति । गौणक्रियापदानि[२] असमानक्रियायां प्रयुज्यन्ते । तानि वाक्येऽपूर्णक्रियापदानि मुख्यक्रियायाः क्रियायोगीनि च भवन्ति ।

ख) एवमेव ण्यन्त-सन्नन्त-यङन्त-यङ्लुङन्त-नामधातु-कण्वादिधातुभ्यः शतृशानजादि-प्रत्ययैर्गौणक्रियापदानि निष्पद्यन्ते । सन्नन्त-यङन्त-यङ्लुङन्त-नामधातु-कण्वादिधातूनां सकर्मकोऽकर्मकश्च विचारणीयः । ण्यन्तद्विकर्मकधातवः स्वल्पा ण्यन्तैककर्मकधातवोऽधिकाश्च सन्ति । तदनुसारं स्वल्पानि अधिकानि च गौणक्रियापदानि बोध्यानि ।

ग) गौणक्रियापदेषु कारकविधानम् - गौणक्रियायां कर्ता तु भवति । परं गौणक्रिया प्रधानक्रियामपेक्षते । कर्म सर्वासु सकर्मिकासु क्रियासु, करणं प्रायेण सर्वासु क्रियासु, सम्प्रदानं दानार्थकादिषु क्रियासु, अपादानं स्थिरपृथगादिषु प्रभवमदभयत्राणरक्षणप्रजनादिषु क्रियासु, अधिकरणं च प्रायः सर्वासु क्रियासु प्रयुज्यन्ते ।

---

१ यावच्छब्दः क्रियाविशेषणे यदा प्रयुज्यते तदा द्वितीया न ।

२ गौणक्रियापदानि वाक्यस्य विशेषमर्थं द्योतयितुं पूरयितुं वाऽर्थमपि सुन्दरं कर्तुं च सदा महत्वपूर्णानि भवन्ति । यतस्तानि पदानि पठने लेखने संभाषणे च सदा विचारणीयानि ।

कारकाणि प्रयुज्यन्ते यथा मुख्यक्रियापदे ।
तथैव तानि चिन्त्यानि सदा गौणक्रियापदे ॥

कर्तरि निष्पन्नेषु तिङन्तक्रियापदेषु भूतकर्तरि निष्पन्नेषु क्तक्तवत्वन्तेषु कृदन्तमुख्यक्रियापदेषु चैव गौणक्रियापदेषु प्रायेण कारकाणि समानरूपेण प्रयुज्यन्ते । परं गौणक्रियापदेन सदा वाक्यमपूर्णमेव भवति । यतो गौणक्रियापदं तु सदा प्रधानक्रियामपेक्षेते । सर्वासु क्रियासु सर्वाणि कारकाणि भवन्तीति न नियमः । सम्बन्धमात्रे सर्वत्र षष्ठी । तिङन्तक्रिया प्रकृत्या प्रधानम् । कृदन्तक्रियायां कृत्यक्तक्तवतुखल्प्रत्ययान्तपदानि मुख्यक्रियापदानि अन्यानि शतृशानच्क्त्वाद्यन्तानि गौणक्रियापदानि चामुख्यक्रियापदानि भवन्ति । तिङन्तातिङन्तयोःक्रिययोस्तिङन्तानि मुख्यानि अतिङन्तानि चामुख्यानि क्रियापदानि प्रोच्यन्ते । स्मरणीयं यत् वाक्ये गौणक्रियाया मुख्यक्रियायाश्च कर्ता एक एव भवति ।

घ) सकर्मकगौणक्रियापदेषु फलाश्रयवाचकशब्दस्य "कर्तुरीप्सितमं कर्म" इति सूत्रेण कर्मसंज्ञा ततः "कर्मणि द्वितीया" इति सूत्रेण द्वितीया विधीयते अकर्मकगौणक्रियापदे तु न । अन्यानि कारकाणि विवक्षानुसारं प्रयुज्यन्ते । पद्यस्य वाक्ये कारकपदानि प्रायेणान्वयक्रमेण (कारकक्रमेण) न प्रयुज्यन्ते । परमर्थकाले पदानामन्वयं विधायार्थः करणीयः । गद्यस्य वाक्ये तु प्रायेण पदानि अन्वयक्रमेण प्रयुज्यन्ते । यतः पाठकेन पठने लेखने च गद्यपद्ययोर्वाक्यसंङ्घटनस्य विचारः सदा विधेयः ।

ङ) गौणक्रियापदस्य वाच्यपरिवर्तनम् - सकर्मकधातुभ्यो वर्तमानकर्तरि लटः स्थाने शतृशानच्प्रत्ययाभ्यां तेम्य एव धातुभ्यः कर्मवाच्ये (कर्मणि) यक्-शानच्प्रत्ययाभ्यां च गौणक्रियापदानि निष्पद्यन्ते । अनयोः कर्तृकर्मणोर्गौणक्रियापदयोर्वाच्यं परिवर्ततेऽन्येषां न । किञ्च तृन् - इष्णुच्-घिनुण्-उ-आदिप्रत्ययान्तपदानि कर्तरि क्त्वाल्यप्तुमुन्णमुल्प्रत्ययान्तपदानि च भावे निष्पद्यन्ते न तु कर्मणि । यत एषां कर्मणि वाच्यं न परिवर्तते । यथा-गम् कर्तरि=गच्छन् । कर्मणि गम्यमानः । कम्=कर्तरि - कामयमानः । कर्मणि-काम्यमानः । पच्-कर्तरि-पचन् पचमानः । कर्मणि-पच्यमानः । कृ कर्तरि=कुर्वन् कुर्वाणः । कर्मणि-क्रियमाणः । विधा कर्तरि - विदधत् विदधानः । कर्मणि - विधीयमान इत्यादि ।

च) गौणक्रियापदे क्रियाविशेषणम् - मुख्यक्रियामात्रे एव नहि गौणक्रियापदेऽपि क्रियाविशेषणं प्रयुज्यते । क्रियाविशेषणं द्विविधं भवति अव्ययमनव्ययं च । प्रातः अधो नीचैः उच्चैः सहेत्यादीन्यव्ययानि सत्यं सुखं सविनयं सादरं सहर्षमित्यादीन्यनव्ययानि च पदानि क्रियाविशेषणानि ज्ञेयानि । ४-२-१८ उपशीर्षके क्रियाविशेषणम् द्रष्टव्यं । सत्यं सुखमित्यादिक्रियाविशेषणानां "सामान्ये नपुंसकम्" इति वार्तिकेन नपुंसकं विधाय तत् द्वितीयैकवचनान्तं प्रयुज्यते । अत्र स्मरणीयं यत् क्त्वाल्यप्तुमुन्णमुल्प्रत्यायन्तगौणक्रियापदानि विहायान्यानि शतृशानजादिप्रत्ययान्तपदानि वाक्ये क्वचिद् उद्देश्यविशेषणरूपे क्वचिद्विधेयविशेषणरूपे च विवक्षित्वा प्रयुज्यन्ते । पद्यवाक्ये एतादृश विशेषणं यत्र कुत्रापि प्रयुज्यते । अर्थकाले यस्य गौणक्रियापदस्य क्रियाविशेषणमस्ति तस्याग्रे तद्विशेषणं प्रयुज्यार्थो विधीयते गद्यवाक्ये तु प्रायेण क्रियाविशेषणं गौणक्रियापदात्पूर्वं सन्निधावेव प्रयुज्यते । गौणक्रियापदात्पूर्वं पश्चाद् यत्र कुत्रापि कर्मपदस्य क्रियाविशेषणस्य च प्रयोगेण वाक्यमशुद्धं न भवति । सर्वत्र सकर्मकगौणक्रियापदेषु कर्म चिन्त्यमकर्मगौणक्रियापदेषु तु न धातोरकर्मकत्वात् ।

छ) अत्र प्रसङ्गे विशेष्यात्पूर्वे सन्निधौ प्रयुक्तं क्वसुकानच्छतृशानजादिगौणक्रियापदमुद्देश्यं परे प्रयुक्तं विधेयं च विशेषणं ज्ञेयम् । १-क) यत्रोद्देश्ये प्रयुक्तात् क्वसुकानच्छतृशानजादि-गौणक्रियापदात्परे सन्निधौ विशेष्यं कर्ता भवति । तत्रास्माद्विशेष्यात्परेऽन्ते केवलं सकर्मकाकर्मकधात्वोः कर्तृवाच्यस्य तिङन्ताऽतिङन्ता वा मुख्यक्रिया प्रयुज्यते । क्वचिदन्ते प्रयुक्तायाः सकर्मकधातोर्मुख्यक्रियायाः पूर्वं विवक्षानुसारं कर्मापि प्रयुज्यते । तत्र कर्मणः पूर्वं विशेष्यकर्ता तिष्ठति । ख) यत्र प्रथमान्ताद्विशेष्यकर्तुः परे सकर्मकगौणक्रियापदं विधेयविशेषणे प्रयुज्यते । तत्रास्माद्विधेयविशेषणे प्रयुक्ताद्गौणक्रियापदात्परे सन्निधौ सकर्मकाकर्मकधात्वोः कर्तृवाच्यस्य सकर्मकधातोः कर्मवाच्यस्य च मुख्यक्रिया प्रयुज्यते । क्वचिदन्ते प्रयुक्तायाः सकर्मकधातोः कर्तृवाच्यस्य

तिङन्ताया अतिङन्ताया वा मुख्यक्रियाया विवक्षानुसारं कर्मापि प्रयुज्यते । तस्मात्कर्मणः पूर्वं विधेयविशेषणं तिष्ठति । तदनुसारमर्थश्च क्रियते । अकर्मकक्रियायां कर्म न भवति धातोः कर्मणोऽभावात् । २- यत्र कर्मणि परिवर्तितस्य प्रथमान्तस्य गौणक्रियापदं विधेयविशेषणमस्ति । तत्रास्माद्विधेयविशेषणात्परे सन्निधौ भू अस् वृत् विद् एषां धातूनां कर्तृवाच्यस्य प्राप्-दृशादि सकर्मकधातोश्च कर्मवाच्यस्य च तिङन्तातिङन्ता वा मुख्यक्रिया प्रयुज्यते । कर्मप्रथमान्तस्तु कर्मणि निष्पन्नाद्विधेये प्रयुक्ताद्गौणक्रियापदात्पूर्वं प्रयुक्त एव । तदनुसारमर्थश्च क्रियते । ततः कर्मण उत्तरे स्थितानि करणादिकारकाणि सकर्मकाकर्मकगौणक्रियायां यथानियमं प्रयुज्यन्ते । परं कर्मणि परिवर्त्य विहितं प्रथमान्तं विना यत्प्रथमान्तं विशेष्यं भवति । स कर्ता बोध्यः ।

४-२-१३-१- भूतसामान्ये छन्दसि लिटः क्वसुकानचौ प्रत्ययौ -

छन्दसि लिट् **३।२।१०५॥**
लिटः कानज्वा **३।३।१०६॥**
क्वसुश्च **३।२।१०७॥**

इहभूतसामान्ये छन्दसि लिट् तस्य स्थाने विधीयमानौ क्वसुकानचावपि छान्दसाविति त्रिमुनिमतम् । कवयस्तु बहुलं प्रयुञ्जते ।

क) कानच्प्रत्ययान्तः - **अग्निं चिक्यानः - तै.सं. ५।३।२।३६॥**
सोमं सुषुवाणः - मै.सं. ३।४।३॥
चक्राणो वृष्णिम् - मै.सं. ३।४।३॥

ख) क्वसुप्रत्ययान्तः - **पितुं पपिवान्- ऋ. १।६१।७॥**
अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं वाजजितं
सम्मार्ज्मि - वा.सं. २।१४॥
न वा अमुं लोकं जग्मुषे किञ्चनाकम् ।
श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
श्रेयांसि सर्वण्यधिजग्मिवाँस्तम् ।
यो नोऽअग्नेऽअररिवान् अघायुः-ऋ. १।१४७।४॥

४-२-१३-२ अविच्छिन्नवर्तमानेऽर्थे कर्तरि लट् । तस्य स्थाने शतृशानचौ प्रत्ययौ । आभ्यां निष्पन्नायाः गौणक्रियायाःपूर्वं कर्म

लटः शतृशानचावप्रथमासमानाधिकरणे ३।२।१२४॥

अप्रथमान्तेन सामानधिकरण्ये सति लटः एतौ स्तः कर्तर्यर्थे । भ्वादौ चुरादौ च धातोः शतृशानच्यप्रत्ययात्पूर्वं शप् ततः पररूपं च भवति । परस्मैपदपक्षे पचतीति पचेः शतृ-पचत्=पचन् । ओदनं पचन्नरोऽत्रैवास्ति । सूपं पचन्तीं[1] नारीं पश्य जानीहि वा । व्यञ्जनं पचन्तं नरं परिचिनोमि । आत्मनेपदे तु -

---

१ सर्वत्र शतृशानचोः परयोः शपि अतो गुणे इति सूत्रेण पररूपं भवति । उगिदचां सर्वनामस्थानेऽधातोरिति सूत्रेण नुम् । अयं नुम् शब्दस्याचोऽन्ते तिष्ठति । स्त्रियामन्ते उगितश्चेति सूत्रेण ङीप् च । २. अदादिभ्यः शतृशानचोः कृतयोस्ततः शपि ततोऽस्य लुकि, ३ जुहोत्यादिभ्यः शतृशानचोः कृतयोस्ततःशपि ततोऽस्य श्लौ द्वित्वे यणि चाऽऽकारान्तधातोरन्त्यस्याऽऽकारस्य च लोपे, ४. दिवादिभ्य शतरि कृते शपि प्राप्ते तं प्रवाध्य श्यनि पररूपे च, ५. स्वादिभ्यः शतृशानचोः कृतयोः शपि प्राप्ते तं प्रवाध्य श्नुः श्नावुवङि च, ६ तुदादिभ्यः शतरि कृते शपि प्राप्ते तं प्रवाध्य शः, शे परे पररूपे च, ७. रुधादिभ्यः शतृशानचोः कृतयोः शपि प्राप्ते तं प्रवाध्य श्नमस्याकारलोपः, ८. तनादिभ्यः शतृशानचोः कृतयोः शपि प्राप्ते तं प्रवाध्य उप्रत्यये तत उवङि च, ९. क्र्यादिभ्यः शतृशानचो

आने मुक् ७।२।८२॥

आने परेऽङ्गस्यातो मुमागमः स्यात् । अनेन कृतो मुम् आनस्याऽऽकारे मिलति । आत्मनेपदपक्षे पचते इति शानच् = पचमानः[२] । ओदनादिकं पचमानो नर आगच्छति । लडित्यनुवर्तमाने पुनर्लड्ग्रहणात्प्रथमसामानाधिकरण्येऽपि क्वचिद् लट् । तस्य स्थाने शतृ शानचौ । प.-भवतीति शतृ-भवत् = भवन् । अस्तीति सत्=सन् द्विजः । आ.-अधि+इ-शाचन्=अधीयानश्छात्रा अदन्ताङ्गत्वाभावान्न मुम् । सदा परस्मैपदिभ्यः शतृ आत्मनेपदिभ्यः शानच् उभयपदिभ्यश्च धातुभ्यः शतृशानचौ च भवेताम् । सर्वत्रायं विधिः स्मरणीयः । किञ्च धातवः परस्मैपदिन आत्मनेपदिन उभयपदिन च सन्ति । गच्छतीति शतृ=गच्छत् = गच्छन् । पिबतीति शतृ-पिबत् = पिबन् । श्रृणोतीति शृण्वत् = शृण्वन् इत्यादि । आ.-एधते इति शानच्-एधमानः । वन्दते इति वन्दमानः । सेवते इति सेवमानः । कामयते इति कामयमानः इत्यादि । शतृशानचौ क्रमेण = श्रयतीति श्रयत् = श्रयन् । श्रयते इति श्रयमाणः । नयतीति नयत् = नयन् । नयते इति नयमानः । धरतीति धरत् = धरन् । धरते इति धरमाणः । हरतीति हरत् = हरन् । हरते इति-हरमाणः । राजतीति राजत् = राजन् । राजते इति राजमानः । करोतीति कुर्वन् । कुरुते इति-कुर्वाणः । एवं सर्वत्र प्रकरणवशात्समाधेयम् ।

लक्षणहेतोः क्रियायाः ३।२।१२६॥

क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोर्लटः शतृशानचौ स्तः कर्तरि । शयते इति शानच् - शयानः । यवनाः शयाना ओदनं भुञ्जते । भोजनकालिकं (लीनं) शयनं यवनसूचकत्वम् । हेतुः फलं कारणं च । अर्जयतीति शतृ अर्जयत् = अर्जयन् । धनमर्जयन्वसति सः । अत्रार्जनं वासस्य फलम् । पश्यतीति पश्यत् = पश्यन् । स हरिं पश्यन्मुच्यते । अत्र हरेर्दर्शनं मुक्तेः कारणं हेतुः फलं वा । रामो वेदमधीयानो वसति । वेदस्याध्ययनं वासस्य फलं कारणं च । एवं सर्वत्र वाक्ये शतृशानच्यप्रत्ययान्तं गौणक्रियापदमुद्देश्यविधेययो रूपे प्रयुज्यते । विधेयविशेषणरूपे प्रयुक्ते तु क्रियायोगिनी अपि भवति तत्पदम् । विशेष्यात्पूर्वे प्रयुक्ते उद्देश्यं विशेष्यात्परे प्रयुक्ते विधेयं च विशेषणं भवति । अस्य चर्चा पूर्वं कृता ।

४-२-१३-२-क) परस्मैपदिनः सकर्मकधातोः शतृप्रत्ययान्तपदात्पूर्वं कर्म -

वणिक् वस्तूनि क्रीणन् वस्तूनि क्रीणानो वा गृहमागच्छत् आगतवान् आगतः-वणिजा वस्तूनि क्रिणता वस्तूनि क्रीणानेन वा गृहमागम्यते, आगन्तव्यम्, आगमनीयम्, आगतम्, आगम्यमानम्, आगंस्यमानम् वा । जनो गृहं गच्छन् मामाह्वयति, आहूतवान् - गृहं गच्छता जनेन अहमाहूये, आह्वातव्यः, आहूतः, आहूयमानो वा । भवन्तं जानती अत्राऽऽयाति । कन्या पितृकुलं जहती रोदिती रुदितवती वा । अयं जनो विद्यां बलं च बिभ्रत् वर्धते । देवी त्रिशूलं शक्तिं घण्टां च धरन्ती वसति । मन्दिरं गच्छन् जनो देवमर्चति अर्चयति अर्चितवान् - पूजयति, पूजिवान् - मन्दिरं गच्छता जनेन देवोऽर्च्यते, अर्चितव्यः, अर्चयितव्यः, अर्चनीयः, अर्चितः । स गृहमागच्छन् मां कथयति कथितवान् - गृहमागच्छता तेनाहं कथ्ये, कथयितव्यः, कथितः, कथ्यमानो वा । वृक्षं सिञ्चन्मालाकारो द्वारं प्राप्नोत् प्राप्तवान्, प्राप्तो वा - वृक्षं सिञ्चता मालाकारेण द्वारं प्राप्यते प्राप्तव्यम्, प्रापणीयम्, प्राप्तम्, प्राप्यमानं वा । आयन्नुत्सव आनन्दं जनयति । अहं जलं पिबन्तीं गामपश्यम् दृष्टवान् - मया जलं

कृतयोः शपि प्राप्ते तं प्रवाध्य श्नाप्रत्ययेऽस्याऽऽकारलोपे च कृते प्रकरणानुसारस्य निष्पन्नानि गौणक्रियापदानि भवन्ति । भ्वादिभ्यश्चुरादिभ्यश्च शानचि शपि च कृते पररूपे आने मुकित्यनेन मुकि च दिवादिभ्यः शानचि कृते शपि प्राप्ते तं प्रवाध्य श्यनि मुकि च तुदादिभ्यः शानचि कृते शपि प्राप्ते तं प्रवाध्य शे पररूपे मुकि च कृते प्रकरणानुसारेण निष्पन्नानि पदानि ज्ञेयानि । ततो ण्यन्त-सन्नन्त-यङन्त-यङ्लुङन्त-नामधातु-कण्ड्वादिधातुभ्यः शतृशानज्भ्यां निष्पन्नानि पदान्यपि बोध्यानि । शतृशानज्प्रत्ययान्तगौणक्रिया समानाधिकरणधातौ न प्रयुज्यन्ते । दशगणीयधातुभ्यो विहितायां तिङन्तक्रियायां शबादिप्रत्यानां दिग्दर्शनं २-४ कर्तृवाच्यस्य तिङन्तक्रियापदमिति शीर्षके दशगणे द्रष्टव्यम् ।

पिबन्ती गौर्दृश्यते द्रष्टव्या दर्शनीया दृश्या दृष्टा दृश्यमाना सुदर्शा दुर्दर्शा वा । राममनुगच्छन्ती सीता वनमगच्छन् गतवती गता वा । जलं पिबन्नरः पिबन्ती नारी वा न हसेत् । सर्वासु विभक्तिषु प्रयोगविधिः -

हरिं नमता, हरिं नमते वनं गच्छतः फलं खादतः वेदं पठति छात्रे - पुंसि । हरिं नमन्त्या हरिं नमन्त्यौ, वनं(ने) गच्छन्त्याः फलं खादन्त्याः साहित्यं पठन्त्यां छात्रायाम् - स्त्रियाम् ।

४-२-१३-२-ख) परस्मैपदिनोऽकर्मकधातोः शतृप्रत्ययान्तस्य कानिचनोदाहरणानि

अकर्मकधातौ कर्म न भवति कर्मणोऽभावात् - स वने गृहे वा निवसन् तिष्ठन् वा हरिं स्मरति स्मृतवान् भजति - ते । गुरुरासने उपविशन् छात्रान्वेदं पाठयति पाठितवान् (अध्यापयति अध्यापितवान् वा) । बालकः शय्यायां स्वपन् (शानच् शयानः) बालिका शय्यायां स्वपती (शयाना) वा मातुःस्तन्यं पिबती क्रमेण पीतवान् पीतवती वा । बालो भल्लुकाद्बिभ्यत् मातुरङ्के निवसति । बधूः श्वशुराद् व्रीडयन्ती(जिह्वयती) शाटचा मुखमाच्छादयति (पिधाति अपिदधाति अपिधत्ते पिधत्ते वा) । गुरुरासने उपविशन् विद्यार्थिनो व्याकरणमध्यापयति । बालः (शिशुः) स्वपन् बाला (शिशुः) स्वपन्ती वा शय्यायां क्रीडति क्रीडितवान्-वती । भल्लुकाद्बिभ्यद् बालो मातुरङ्कं गच्छति । एवं सर्वत्र ज्ञेयम् ।

अकर्मकधातोर्गौणपदात्पूर्वं सप्तमी - गृहे वने वा वसन्तं नरं वसन्तीं नारीं वा स परिचिनोति । कुटचां वसता नरेण वसन्त्या नार्या वा ईश्वरः पूज्यते । आसने उपविशते नराय उपविशन्त्यै - नार्यै वा वस्त्रं देहि त्वम् । मञ्चे वसतो नरात् वसन्त्याः नार्या वा रक्षा भवति । खट्वायां वसतो नरस्य वसन्त्या नार्या वा मुखं सुन्दरमस्ति । पर्णशालायां वसति साधौ वसन्त्यां साध्व्याम् - साधौ वा बहवो गुणाः सन्ति । तिष्ठन्तं तिष्ठन्तीम् । तिष्ठता तिष्ठन्त्या । तिष्ठते तिष्ठन्त्यै । तिष्ठतः २, तिष्ठन्त्याः २ । तिष्ठति तिष्ठन्त्याम् इत्यादिप्रयोगाः समाधेयाः स्त्रीपुंसोः ।

नपुंसके - आयत्सुखं हर्षं (आनन्दं) वा वर्षति (अत्र धातुः सकर्मकः) । वनवासिनां कुलानि वसन्ति उद्वसन्ति (छोड्दै-उदजडते) च इह यावत्समायातानि सन्ति । तानि कुलानि दरिद्रन्ति जीवन्ति । वायुना पुष्पाणि विकसन्ति (फुल्लन्ति) सन्ति दृश्यन्ते वा । वहत् जलं बालिकयाऽऽनीयते ।

४-२-१३-२-ग) आत्मनेपदिनःसकर्मकधातोः शानच्प्रत्ययान्तपदात्पूर्वं कर्म

पितरौ वन्दमानः पुत्रः प्रसन्नोऽस्ति । स्वर्गं कामयमानो जनो यज्ञं विदधाति-विधत्ते करोति-कुरुते । वैकुण्ठं कामयमानो नरो हरिं भजति-ते । रामं सेवमानो लक्ष्मणः सीतां भाषते (वदति) । सनत्कुमारं वन्दमानो नारदस्तस्माद्भागवतमशृणोत् श्रुतवान् । स्वाध्यायमधीयानो माणवकः पूर्णिकाया अवहतिं प्रकाशयितुं न गच्छति । लोके दुःखं सहमानो नरो दुर्लभः । दुःखं सहमाना नारी सुदुर्लभा । इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः । वाङ्मनोदेहजैर्नित्यं कर्मदोषैर्न लिप्यते ॥ प्रारब्धं भुञ्जमानो हि गीताभ्यासरतः सदा । भगवन् परमेशान भक्तिरव्यभिचारिणी । प्रारब्धं भुञ्जमानस्य कथं भवति हे प्रभो ॥ अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः । अहं भृतिमाशसानो भवतः समीपमायातोऽस्मि आसम् वा । मलिनानि वसनानि (वासांसि) वसान-(परिदधानः)स्त्वं मम निकटं न आगच्छ (न आयाहि) । राजपुरुषाः पलयमानान् चौरान् गृह्णन्ति । मम मित्राणां कुलानि लज्जमानानि निवसन्ति । उपकारिणामाननं दीप्यमानं दृश्यते । यज्ञे सज्जनाः स्मयमाना दुर्जना दुःखं ददानाश्च आयान्ति । सुन्दराणि वस्त्राणि परिदधाना जना अत्र सभायां सन्ति । वैकुण्ठं कामयमानो नरः कृष्णं भजेत । वस्त्राणि क्रीणानौ जनौ आपणेऽस्तः । एवं सर्वत्र विचारणीयम् ।

२-घ) आत्मनेपदिनोऽकर्मकधातोः शानच्प्रत्ययान्तगौणपदात्पूर्वं सप्तमी

क) सूर्यो दिवा (दिने) चन्द्रश्च नक्तं (रात्रौ) द्योतमानो (प्रकाशमानः) लभ्यते (प्राप्यते) । शय्यायां शयानो बालकः शय्यायां शयाना बालिका वाऽस्माभिः प्राप्यते दृश्यते वा । दीनः प्राङ्गणे कम्पमानः सर्वैर्लभ्यते दृश्यते वा । तव ममापि कुलं मोदमानं प्राक्प्यते । एवं विधस्य वाक्येऽन्ते कर्मवाच्यस्य क्रियापदं प्रयुज्यते ।

ख) दिवा (दिने) प्रकाशमानः सन् सूर्यो नक्तं (रात्रौ) द्योतमानः सन् चन्द्रश्च शनैः शनैरस्ताचलमगच्छत् (गतः गतवान्) । शय्यायां शयानं बालकं शयानां बालिकां च नोत्थापय । श्वशुराल्लज्जमाना बर्धूर्वस्त्रेण शिरसः कपालान् (केशान्) आच्छादयति । स प्राङ्गणे कम्पमानः सन् किं वदति न जाने । गृहे वर्तमानो नरः पुस्तकं पठति लिखति च । सभायां विद्यमानाः (वर्तमानः) जनाः केवलं विवदन्ते समस्यां न समादधते ।

२-ङ) एकपदिन उभयपदिनश्च द्विकर्मकधातोः शतृशानच्प्रत्ययान्ताभ्यां गौणक्रियापदाभ्यां पूर्वं द्वे कर्मणी प्रयुज्येते । अत्रापि गौणमुख्यकर्मणोर्विचारः कार्यः -

१. गां पयो दुहन्-दुहमानो वा गोपः कृष्णं स्मरति स्मृतवान् ।
गां पयो दहुती-दुहमाना वा गोपिनी कृष्णं स्मरति स्मृतवती ।

२. पुत्रं (पुत्राय) धर्मं ब्रूवन्-ब्रूवाणो वा पिता प्रसन्नोऽस्ति ।
पुत्रं (पुत्राय) धर्मं ब्रूवती-ब्रूवाणा वा माता प्रसन्ना विद्यते (वर्तते) ।

३. अजां ग्रामं (ग्रामे) नयन्-नयमानो वा नरः फलानि क्रीणाति-णीते क्रीतवान् ।
अजां ग्रामं (ग्रामे) नयन्ती-नयमाना वा नारी फलानि क्रीणाति-णीते क्रीतवती ।

४. गृहं (गृहे) भारं हरन्-हरमाणो वा पुरुषो मामाह्वयति आहूतवान् ।
गृहं (गृहे) भारं हरन्ती-हरमाणा वा स्त्री मामाह्वयति आहूतवती ।

५. खलं (खले) भारं वहन्-वहमानो वा भृत्यो गृहं याति यातवान् यातः ।
खलं (खले) भारं वहन्ती-वहमाना वा सेविका गृहं याति यातवती याता ।

एवं याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-शास्-जि-मन्थ्-मुष् धातूनां शतृशानच्प्रत्ययान्तगौणक्रियायां कारकाणि तिङन्तक्रियायामिव चिन्त्यानि । एषु धातुषु एकपदिन उभयपदिनश्च धातवो विचारणीयाः ।

२-च) केवलमेकसकर्मकाणामुभयपदिनां धातूनां च गौणक्रियापदात्पूर्वं कर्म -

१. धर्मं दधत्-दधानो वा मानवोऽसत्यं न वदति न वदेद्वा ।
धर्मं दधती-दधाना वा मानवी असत्यं न वदति न वेदद्वा ।

२. दीनायान्नं ददत्-ददानो वा नरः पुण्यं लभते स्वर्गं च गच्छति ।
दीनायान्नं ददती-ददाना वा नारी पुण्यं लभते स्वर्गं च गच्छति ।

३. शुभकर्माणि विदधत्-विदधानो वा जनः सुखेन दिनानि यापयति (गमयति अतिवाहयति)
शुभकर्माणि विदधती-विदधाना वा रमा सुखेन दिनानि अतिवाहयति (गमयति)

४. धर्मं कुर्वन्तं कुर्वाणं वा जनं सर्वे प्रशंसन्ति प्रशंसितवन्तः ।
धर्मं कुर्वतीं कुवाणं वा नारीं सर्वा नार्यः प्रशंसन्ति प्रशंसितवत्यः ।

५. ईश्वरं भजन्तं भजमानं वा भक्तं सर्वे जना नमन्ति नतवन्तः नताः ।

६. भक्तो गीतां पठन् दिनं यापयति ।

अन्यासु विभक्तिषु - धर्मं कुर्वता कुर्वाणेन वा जनेन, धर्मं कुर्वते कुर्वाणाय वा जनाय, धर्मं कुर्वतः कुर्वाणात् वा जनात्, धर्मं कुर्वतः कुर्वाणस्य वा जनस्य, धर्मं कुर्वति कुर्वाणे वा जने - पुंसि। धर्मं कुर्वत्या कुर्वाणया वा नार्या, धर्मं कुर्वत्यै कुर्वाणायै वा नार्यै, धर्मं कुर्वत्याः कुर्वाणाया वा नार्याः, धर्मं कुर्वत्याः कुर्वाणाया वा नार्याः, धर्मं कुर्वत्यां कुर्वाणायां वा नार्याम्-स्त्रियाम् ।

२-छ) उभयपादिनोऽकर्मकधातोः शतृशानच्प्रत्ययान्तपदात्पूर्वं सप्तमी -

१. राजा सिंहासने राजन् राजमानो वा अस्माभिः प्राप्यते दृश्यते वा ।
राज्ञी सिंहासने राजन्ती राजमाना वा अस्माभिः लभ्यते विलोक्यते वा ।

२. पण्डितो व्यासासने राजन् राजमानो वा पुराणं भक्तान् (भक्तेभ्यो) ब्रवीति ब्रूते, (अभिदधाति अभिधत्ते भाषते श्रावयति)

३. क्षेत्रे धावन्तं धावमानं वा जनमहं परिचिनोमि, परिचितवान् ।
क्षेत्रे धावन्तीं धावमानां वा नारीं स परिचिनोति परिचितवान् ।

उद्देश्यविशेषणे ण्यन्तशतृप्रत्ययान्तपदम्

लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥

विधेयविशेषणे उद्देश्यविशषणे च प्रयुक्तं शतृशानच्प्रत्ययान्तपदं चिन्त्यम् -

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः ।
हसन्नपि नृपो हन्ति प्रहसन्नपि दुर्जनः ।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः ॥
अशृण्वन्नपि बोधव्यो मन्त्रिभिः पृथिवीपतिः ।
एवं प्रकारेण वाक्ये उद्देश्यं विधेयं च विर्चायाध्यनीयम् ।

१. ॐ इत्येकाक्षरं ब्रह्म व्याहन्मामनुस्मरन् । यः प्रयाति त्यज्यन्देहं स याति परमां गतिम् ॥ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ॥ रुचं ब्राह्मञ्जनयन्तो देवाऽग्रे तदब्रुवन् । यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवाऽसन्वशे । इदं सूक्तं सायमधीयानो दिवसकृतं पापं नाशयति प्रातरधीयानो रात्रिकृतं पापं नाशयति । रुदती बाला मातरं प्राह । पुत्री पितृकूलं जहती रोदिति। हनुमान् सीतां विलपन्तीमपश्यत् । वधूः श्वशुराल्लज्जमाना वार्ता करोति । मया उपकारिणो मुखं शोभमानं दृश्यते । सूतः शिष्यगणैः सार्धं समायातो हरिं स्मरन् । मात्रा पित्रा वा पुत्री पत्रं लिखन्ती लभ्यते । मया सह स स्वकीयं पुस्तकं क्रीणन् क्रीणानो वा वर्तते । यज्ञं कुर्वन्तं दृष्ट्वा दुर्जनाः खिद्यमानाः सज्जना मोदमानाश्च सन्ति प्राप्यन्ते लभ्यन्ते दृश्यन्ते वा । तया हीनं विधातर्मां कथं पश्यन्न दूयसे । यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । २. ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लीमुल्लासयन्ती, स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्स्खलन्ती । श्रोणीपृष्टे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती, पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः पुनातु ॥ गोपा गाः मार्गं रुन्धन्त्यो रुन्धाना वा श्रूयन्ते, प्राप्यन्ते दृश्यन्ते वाऽस्माभिः । गुरुर्महाविद्यालये (विद्यापीठे) शिष्यान् शिष्येभ्यो वा वेदं शिक्षमाणः ब्रूवन्, ब्रुवाणो वा श्रूयते (आकर्ण्यते) । स्वामिना क्षेत्रं भारं वहन्ती वहमाना वा सेविका लभ्यते लब्धव्या लब्धा वा । तैः कृष्णस्य पत्नी कूपाज्जलमानयन्ती आनयमाना वा प्राप्यते । कृष्णेन गोपिनी गां बध्नती बधाना वा प्रोच्यते, वक्तव्या प्रोक्ता वा दृश्यते । कृष्णेन

भक्तिः स्वं भजन्ती भजमाना वा लभ्यते । त्वं मधुरं वचनं निगदद्भिर्भाषमाणैर्वा सज्जनैः सह सङ्गतं (सङ्गं) कुरु (विधेहि) । मलिनानि वस्त्राणि परिदधत् परिदधानो वा भवान्, मलिनानि वस्त्राणि परिदधती परिदधाना वा भवती च दृश्यते । सञ्जीवको नदीतीरे बालतृणानि भक्षयन् कतिपयैर्दिनैर्हरवृषभ इव बलवान्संवृत्तः सन् प्रत्यहं वल्मीकशिखराग्राणि शृङ्गाभ्यां विदारयन्नास्ते । त्वया मया वा गुरवश्छात्रान्वेदं पाठयन्तः (अध्यापयन्तः शिक्षयन्तो वा) धर्मं बोधयन्तः पुराणानि श्रावयन्तः देवान्याजयन्तो ब्राह्मणान्फलानि भोजयन्तः पुत्रेण गृहं पितरं प्रापयन्तश्चित्रं मां दर्शयन्तश्च प्राप्यन्ते । समं पश्यन्हि सर्वत्र समवस्थिमीश्वरम् । न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ मेघो जलं वर्षन् दृश्यते प्राप्यते वा । वर्षः सकर्मकोऽकर्मकश्च ।

कर्मणि वर्तमाने लटि यकि शानचि च कृते - वदि-वन्द्यमानः गम्-गम्यमानः । नम्-नम्यमानः । पच्-पच्यमानः । कृ-क्रियमाणः । विधा-विधीयमानः । क्री-क्रीयमाणः । सम्पद्-सम्पद्यमानः । हन्-हन्यमानः । हू-हूयमानः । यज्-इज्यमानः इत्यादीनि सकर्मकधातूनां कर्मवाच्ये रूपाणि साध्यानि । भक्तेन कृष्णो नम्यमानोऽस्ति । भरतेन रामः पूज्यमानो लभ्यते । रामेण शिव इज्यमानो विद्यते । अस्माभिः प्रायेण संस्क्रियमाणानि वस्तूनि लभ्यन्ते क्रीयन्ते वा ।

२-ज) शतुःस्थाने वसुप्रत्ययः । अस्मात्प्रत्ययान्तगौणक्रियायाः पूर्वं कर्म -

विदेः शतुर्वसुः ७।१।३६॥

वेत्तेः परस्य शतुः स्थाने वसुरादेशो वा स्यात् । वेत्तीति विद्वस् = विद्वान् । स्त्रियाम्-विदुषी । वसोरभावे शतृ विदत् = विदन् । स्त्रियाम्-विदती ।

अग्ने नय सुपथा रायेऽस्मान्विश्वानि देव वयुनानि विद्वान् । यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन ॥ शत्रोर्जन्ममृती विद्वाञ्जीवितं च जराकृतम् । पार्थमप्याययन्स्वेन तेजसा चिन्तयन्हरिः ॥ वेदं विद्वान् अर्थाभिज्ञः पुरुषः स च विद्वविधः । ये अर्वाङ् उत-वा पुराणं वेदं विद्वांसमभितो वदन्ति । तर्कं शास्त्रं च विदुषा विदुषां तोषकारिका । क्रियते जगदीशेन शब्दशक्तिप्रकाशिका ॥

२-झ) त्रिपदिभ्यो धातुभ्यो भविष्यदर्थे स्य+शतृशानचौ

तौ सत् ३।२।१२७॥

तौ शतृशानचौ सत्संज्ञौ स्तः ।

लृटः सद्वा ३।३।१४।

लृटः स्थाने विहितौ सत्संज्ञौ (शतृशानचौ) वा स्तः । इयं व्यवस्थितविभाषाऽस्ति । तेन अप्रथमासामानाधिकरण्ये प्रत्यये उत्तरपदे च परे सम्बोधने लक्षणहेतोश्च नित्यम् । शतृशानच्प्रत्ययविहिताभ्यां प्राक् लृट् शेषे चेति सूत्रेण लृट्प्रत्ययः । परस्मैपदे कृ-करिष्यतीति कृधातोः लृट् शेषे चेति सूत्रेण लृटि अस्य स्थाने शतरि स्यतासी लृलुटोरिति सूत्रेण स्यप्रत्यये तस्य आर्धधातुकं शेषः इति सूत्रेणाऽऽर्धधातुकसंज्ञायां आर्धधातुकस्येड्वलादेरिति सूत्रेण इटि प्राप्ते एकाच उपदेशेऽनुदात्तादिति सूत्रेण निषेधे ऋद्धनो स्ये इति सूत्रेण इटि सार्वधातुकार्धधातुकयोरिति सूत्रेण गुणे पत्वे करिष्यत् = करिष्यन् । आत्मनेपदे = करिष्यते इति कृधातो लृटि अस्य स्थाने स्यप्रत्यये आर्धधातुकसंज्ञायाम् आर्धातुक इति इटि प्राप्तेऽस्य एकाच उपदेश इति निषेधे आने मुकिति मुकि इटि गुणे पत्वणत्वयोश्च = करिष्यमाण = करिष्यमाणः । करिष्यन्तं करिष्यमाणं वा पश्य । शब्दसिद्धौ धातोः सेट् अनिट् च विचारणीयः । गम् = गमिष्यतीति गमेरिट् परस्मैपदेष्विति इट् गमिष्यत् = गमिष्यन् ।

पच् = पक्ष्यतीति पक्ष्यत् = पक्ष्यन् । पक्ष्यते इति पक्ष्यमाण=पक्ष्यमाणः । यक्ष्यतीति यक्ष्यत्=यक्ष्यन्। यक्ष्यत इति यक्ष्यमाण = यक्ष्यमाणाः अनिट्त्वान्नेट् । विधा = विधास्यतीति विधास्यत् = विधास्यन्। विधास्यत इति विधास्यमान = विधास्यमानः । हु = होस्यतीति होस्यत् = होस्यत् । सम्पद् = सम्पत्स्यत इति सम्पत्स्यमान = सम्पस्यमानः । पठ् = पठिष्यीति पठिष्यत् = पठिष्यन् । जपिष्यतीति जपिष्यत् = जपिष्यन् । खादिष्यती ति खादिष्यत् = खादिष्यन् । कर्मणि-गम् = गंस्यत इति = गंस्यमानः अत्र नेडात्मनेपदत्वात् । दृश् = द्रक्ष्यत इति द्रक्ष्यमाणः । कृ = कारिष्यत इति चिण्वद्भावपक्षे इट वृद्धिश्च- कारिष्यमाणः । चिण्वदभावपक्षे करिष्यत इति करिष्यमाणः च ऋद्धनोः स्य इति इट् । जप् = जपिष्यत इति जपिष्यमाणः । पठ् = पठिष्यत इति पठिष्यमाणः । खाद् = खादिष्यत इति खादिष्यमाणः । ष्टु=स्तु=स्ताविष्यत इति चिण्वद्भावपक्षे इट् वृद्धिश्च स्ताविष्यमाणः। स्तोष्यत इति चिण्वदभावपक्षे गुणमात्रम्- स्तोष्यमाणः ।

क) परस्मैपदिनः सकर्मकधातोः प्रयोगे - अग्ने वाजजिद्वाजं तं सरिष्यन्तं वाजजितं संमार्ज्मि। मासिकवेतनं प्रास्यन्भृत्योऽतीव प्रसन्नोऽस्ति । पुराणं श्रोष्यन् जनः पुण्यं लभते । विदेशं गमिष्यन् गोपालः पितरौ प्राणमत् । हिमशिखरमारोक्ष्यन् वीरः साहसं दर्शयिष्यति ।

ख) आत्मनेपदिनः सकर्मकधातोः प्रयोगे - स्वर्गं कामयिष्यमाणो जनो हरिं भजति-ते भक्ष्यति-ते वा -अत्र णिलोपः ।

ग) परस्मैपदिनोऽकर्मकधातोः प्रयोगे - ग्रामे स्थास्यन्तो जना इमे सन्ति । मन्दिरे वत्स्यन्तं नरं स परिचिनोति । पादकन्दुकेन क्रीडिष्यन्तश्छात्राः क्रीडाक्षेत्रं गच्छन्ति गमिष्यन्ति वा ।

घ) आत्मनेपदिनोऽकर्मकधातोः प्रयोगे - युद्धक्षेत्रे योत्स्यमानाः सैनिकाः सम्बन्धिन आपृच्छन्ति।

ङ) उभयपादिनः सकर्मकधातोः प्रयोगे - ग्रामं गां नेष्यन् नेष्यमाणो वा गोपोऽयमस्ति । धर्मं करिष्यन् करिष्यमाणो वा जनोऽयं दृश्यते ।

च) उभयपदिनोऽकर्मकधातोः प्रयोगे - सिंहासने राजिष्यन् राजिष्यमाणो वा स राजा विद्यते।

छ) गौणक्रियापदात्पूर्वं कर्मप्रवचनीयेन युक्तं कर्म - पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः। आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥

४-२-१३-३ शानन्प्रत्ययान्तपदात्पूर्वं कर्म -

पुङ्यजोः शानन् ३।२।१२८॥

आभ्यां शानन् स्यात् वर्तमाने कर्तरि । पवत इति पवमानः । सोमं पवमानो रामोऽस्ति । यजत इति यजमानः । कृष्णं यजमानं भक्तं सर्वे नमन्ति । शानन्प्रत्ययानन्तरं शप् पररूपं च कार्यं ।

४-२-१३-४ ताच्छील्यादिष्वर्थेषु चानशप्रत्ययान्तपदात्पूर्वं सन्निधौ कर्म -

ताच्छील्य-वयोवचन-शक्तिषु चानश् ३।२।१२९॥

तच्छील- वयोवचन- शक्तिष्वर्थेषु द्योत्येषु कर्तरि चानश् स्यात् । जुहोति तच्छील इति = अग्नौ जुह्वानः = हवनशीलः = हवनस्वभावः । भुनक्ति तच्छील इति भोगं भुञ्जानः = भोगशीलः = भोगस्वभावः । बिभर्ति तच्छील इति कवचं बिभ्राणः = युवा । जुहोत्यादित्वाच्छ्लौ द्वित्वादिः । हन्तुं तच्छील इति शत्रुं निघ्नानः (हननशीलः) गमहनेत्युपधालोपः । १. कवचं बिभ्राणो राजा वीरो दृश्यते। २. ओदनं भुञ्जानो विषं भुङ्क्ते । त्वं भोगं भुञ्जानः कालं नय महामते । संसारे गृहे वा नानाव्यञ्जनमिष्टान्नानि भुञ्जाना जनास्तेषां रसानास्वादयन्ति परमीश्वरं तु न स्मरन्ति । ३. अग्नौ

हविः(घृतं)र्जुह्वान ऋत्विक् अस्ति । अग्नौ हवींषि जुह्वाना ऋत्विजो मखजनितं फलं नाप्नुवन्ति । अग्नौ चरुं जुह्वानो ब्राह्मणो दक्षिणां लभते । ४. शत्रुं निघ्नानं जनं सर्वे परिचिन्वन्ति (जानन्ति) । आत्मानं मण्डयमानो नरःसुन्दरोऽस्ति ।

४-२-१३-५ अकृच्छ्रार्थे शतृप्रत्ययान्तपदात्पूर्वं कर्म -

इङ्धार्योः शत्रकृच्छ्रिणि ३।२।१३०॥

आभ्यां शतृ स्यात् अकृच्छ्रिणि (सुखे) अर्थे कर्तरि । कृच्छ्री=दुःखी । अकृच्छ्री=सुखी । अधि+इङ् अधीते इति अधीयत्=अधीयन् । धृञ्-धारि-धारयत्=धारयन् । देवदत्तो वेदमधीयन् कालं नयति यापयति अतिवाहयति गमयति । सुमहन्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः । छेत्तारः शंसयानां च क्लिश्यन्ते लोभमोहिताः ॥ शास्त्राणि धारयन्तो जना बहवो लभ्यन्ते परं शास्त्रानुसारं कर्म कुर्वन्तः कुर्वाणा वा जनाः प्राप्तुं दुर्लभाः (दुष्प्रापाः, दुरापाः) ।

द्विषोऽमित्रे ३।२।१३१॥

अस्मात् शतृ स्यात् अमित्रे कर्तरि । द्विषन् शत्रुः । **द्विषः शतुर्वा**-वा.-शतृप्रत्ययान्ते द्विष्शब्देन योगे वैकल्पिकी षष्ठी स्यात् पक्षे द्वितीया च । मुरस्य मुरं वा द्विषन् विष्णुः ।

४-२-१३-६ तच्छीलादिष्वर्थेषु कर्तृषु तृन्-इष्णुजादिप्रत्ययाः । एभ्यः प्रत्ययान्तपदेभ्यः पूर्वं कर्म -

आक्वेस्तच्छील-तद्धर्म-तत्साधुकारिषु ३।२।१३४॥

क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छील-तद्धर्म-तत्साधुकारिषु कर्तृषु बोध्याः । कर्तृष्वित्यर्थोऽधः सूत्रेष्वपि प्रवर्तते ।

तृन् ३।२।१३५॥

सर्वधातुभ्यस्तृन् स्यात् तच्छीलाद्यर्थेषु कर्तृषु । करोति कुरुते वा तच्छीलः, तद्धर्मः, तत्साधुरिति कर्तृ = कर्ता = करणशीलः, (करणस्वभावः) करणधर्मा, करणसाधुर्वा । अनेन योगे द्वितीया - कटान् कर्ता । ण्वुल्तृचाविति विहितस्य तृचः कर्मणि प्राप्ते तु षष्ठी विधीयते । कटस्य कर्ता । गम् = गन्ता । १. लोकान्कर्ता हरिः सर्वेषां हृदि निवसति, २. ग्रामं गन्ता स लभ्यते । रूप्यकाणि गणयिताऽन्नं क्रीणाति । मां रक्षिता रामोऽस्ति । वेदं पठिता बालकः । सेटोऽनिटश्च चिन्त्यम् ।

अलङ्कृञ्-निराकृञ्-प्रजनोत्पचोत्पतोन्मदरुच्यपत्रवृतु-वृधु-सह-चर इष्णुच् ३।२।१३६॥
एभ्यस्तच्छीलादिष्वर्थेषु कर्तृषु इष्णुच् स्यात् । अलङ्कृञ् - अलङ्करोति तच्छील इति अलङ्करिष्णुः = अलङ्करणशीलः, अलङ्करणधर्मा, अलङ्करणसाधुः । निराकृ-निराकरिष्णुः - निराकरणशीलः, निराकरधर्मा, निराकरणसाधुर्वा । एवमन्येऽपि विचारणीयाः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्तिष्णुः । वर्धिष्णुः । सहिष्णुः । चरिष्णुः । एषां क्रमेण प्रजन-उत्पचन-उत्पतन-उन्मदन-रोचन-अपत्रपण-वर्तन-वर्धन-सहन-चरण-शीलः, धर्मा साधुर्वा । आत्मानमलङ्करिष्णुः पुरुषो नारी वा गृहे नगरे नाटचशालायां कोष्ठे वास्ति । भुवनमलङ्करिष्णुर्विश्वकर्मा विष्णुं स्तौति । महतीं शङ्कां निराकरिष्णुं विद्वांसं सर्वे प्रशंसन्ति । समस्यां निराकरिष्णुं जनं सर्वेऽनुगच्छन्ति पूजयन्ति च । दुःखं सहिष्णुर्जनोऽन्ते सुखं लभते । अथ परमसुखमसहिष्णुः काकः पथिकस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः ।

लष-पत-पद-स्था-भू-वृष-हन-कम-गम-शृभ्य उकञ् ३।२।१५४॥

एभ्य उकञ् स्यात् तच्छीलादिस्वर्थेषु कर्तृषु । लष् = लाषुकः । अभिलष् = अभिलाषुकः । पत्-पातुकः । उपपद् = उपपादुकः । स्था = स्थायुकः (ग्रामाधिकः) । भू = भावुकः । वृष = वार्षुकः । हन् = घातुकः - हो हन्तेर्ञ्णिन्नेषु इति हस्य कुत्वमादौ वृद्धिः हनस्तोऽचिण्णलोरिति नस्य तकारश्च । कम् = कामुकः । गम् = गामुकः । शृ = शारुकः = हिंस्रकः । ज्ञानमभिलाषुको लाषुको वा नरः शास्त्रमभ्यसेत् । स्वर्गं लाषुको मनुष्यो यज्ञं कुर्यात् । मुक्तिमभिलाषुको मानवो ब्रह्म शिवं विष्णुं वा चिन्तयेत् स्मरेत् भजेत् वा । दैत्यान्घातुकं हरिं भक्ताः स्तुवन्ति । असुरान्घातुको हरिर्देवान् प्राणिनश्च रक्षति (पाति त्रायते गोपायति) । विद्यालयं गामुकः शिक्षकः शिष्यो वा गृह्यकार्यं (गृहकर्म) समाप्नुयात् । प्राणिनो (पशून्) घातुकस्य हृदि धर्मो दया उपकारकभावो वा न भवति । कामुकेन योगे षष्ठी - लक्ष्म्याः कामुको हरिः । अत्र सप्तमी - गृहे स्थायुकोऽयं जनः । ज्ञानमभिलाषुको जनः साधोः सङ्गमं (सत्सङ्गतं) कुर्यात् ।

सनाशंसभिक्ष उः ३।२।१६८॥

सन्नन्तेभ्यो धातुभ्यः शंस-भिक्षधातुभ्यां च उः स्यात् तच्छीलादिष्वर्थेषु कर्तृषु । कृ-सन् = चिकीर्षति तच्छीलः, तद्धर्मः तत्साधुर्वा इति = चिकीर्षुः । हन्+सन् = जिघांसति = जिघांसुः । हृ+सन् = जिहीर्षति = जिर्हिषुः । भू-सन् - बुभूषति = बुभूषुः । मुच्-सन् - मुमुक्षति - मुमुक्षुः । दा सन् - दित्सति = दित्सुः । आ+दा+सन् - आदित्सति = आदित्सुः । दृश्+सन् - दिदृक्षति = दिदृक्षुः । अधिगम्+सन् - अधिजिगमिषति = अधिजिगमिषुः । पठ्+सन् - पिपठीषति = पिपठीषुः । ग्रह+सन् - जिघृक्षति = जिघृक्षुः । आशंस - आशंसति-ते = आशंसुः । भिक्ष् - भिक्षते = भिक्षुः (याचकः) । भुज् - बुभुक्षति = बुभुक्षुः । विश+सन् - विविक्षति = विविक्षुः । वच्+सन् - विवक्षति = विवक्षुः । इष्=इच्छ-इच्छति = इच्छुः । युद्धं चिकीर्षवः कौरवाः कुरुक्षेत्रे सन्ति (विद्यन्ते वर्तन्ते) । अस्मान् चिकीर्षुर्जनोऽयमेव । विद्यालयं जिगमिषुर्वेदं पिपठीषुश्च रामोऽस्ति । बालाः स्वयमेव विद्यालयं जिगमिषवो भवेयुः । धनं लिप्सुर्जनः श्रमं (दुःखं) करोति कुर्याद्वा । एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः । तदर्थं निर्गतो गेहात्कामान्धो मृत्युमस्मरन् ॥ साधुर्गुरुर्वा योगाङ्गानि ज्ञानं चाधिजिगर्मिषूञ्जनान्कर्तव्यं बोधयति । ब्राह्मणाय गां दित्सुर्देवदत्त एव । स्वर्णरेखामहं स्पृष्ट्वा बध्यात्मानं च दूतिका । आदित्सुश्च मणिं साधुः स्वदोषाद्दुःखिता इमे ॥ पुरा त्रिपुरहन्तारं पर्वती भक्तवत्सला । श्रीरामतत्वं जिज्ञासुः प्रपच्छ विनयान्विता ॥ दिदृक्षवो यस्य पदं सुमङ्गलम् । हरिं दिदृक्षुर्भक्तो हरिमेव ध्यायेत् भजेत् जपेद्वा । व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः । मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥ अन्नं बुभुक्षुर्जनो क्षेत्रे धान्यं वपेत् । आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । मित्र ? भवता कथमसौ मां जिघांसुर्ज्ञातव्यः ज्ञातो वा । धनं जिहिर्षुं नरमहमपश्यम् । अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरन् । पतीन्प्रजानामसृजं महर्षीनादितो दश ॥ गुरवो योगाङ्गानि समाधिं चाधिजिगमिषूञ्जनान्कर्तव्यं बोधयन्ति । ब्रह्मतत्त्वं जिज्ञासुर्जन उपनिषदोऽनुशीलयेत् । ब्रह्मतत्त्वं जिज्ञासुना जनेन वेदान्तोऽनुशीलनीयः । ब्रह्म ज्ञानं वा जिज्ञासव उपनिषदोऽनुशीलयेयुः । वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा । वन एव वसेच्छान्तस्तृतीयं भागमायुषः ॥ विद्यामभीप्सुना जनेन सुखदुःखे न चिन्तनीये । कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना । विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते येन नयेन पौरुषम् ॥ कैलाशगौरं वृषमारुरुक्षोःपादर्पणानुग्रहपूतपृष्टम् । विद्यां शास्त्रं वा जिज्ञासुर्जनः शास्त्रस्य विद्याया वाऽभ्यासे यत्नं कुरु । मुच् = सन-शतृ = स शस्त्रं मुमुक्षन् (उत्सिसृक्षन्) स्थितोऽब्रवीत् ।

अकर्मकधातूनां तु - सन् द्विजः । भूमौ पतन् पतिष्णुः पातुको वा पक्षी दृश्यते । स भवन् भावुको भविष्णुर्वाऽस्ति । स पण्डितो बभूषुरस्ति । श्वा मुमूर्षुर्दृश्यते । एवं सर्वत्र विचिन्तनीयम् ।

आदृगमहनजनः किकिनौ लिट् च ३।२।१७१॥

आदन्तादृदन्ताद्गमादिभ्यश्च किकिनौ स्तश्छन्दसि तौ च लिट्वत् तच्छीलादिष्वर्थेषु कर्तृषु । पा = पिबति तच्छील इति पपिः (पानशीलः) सोमम् । दा = ददाति तच्छील इति-ददि(दानशीलः)र्गाः । भृ = बिभर्ति तच्छील इति-बभ्रि(धारणशीलः) वज्रम् । हन्ति तच्छील इति-जघ्नि (घातकशीलः) वृत्रममित्रम् ।

४-२-१३-७ भविष्यत्कालस्यार्थे विहितौ इनिणिनिप्रत्ययौ । आभ्यां प्रत्ययान्तपदाभ्यां पूर्वं सन्निधौ कर्म -

भविष्यति गम्यादयः ३।३।३

भविष्यति कालेऽर्थे गम्यादयःशब्दा इनिप्रत्ययान्ता निपात्यन्ते । गमिष्यतीति विग्रहे गम्धातोर्भविष्यत्कालेऽर्थे इनिप्रत्यये निपातिते गमिन् = गमी ग्रामम् । गृहं गमी । आगमिष्यतीति विग्रहे आङ्पूर्वकाद्गम्धातोर्भविष्यत्कालेऽर्थे गमेरिनौ "आङि णित्" इति वचनेनेनेर्णित्वे उपधावृद्धौ आगामिन् = आगामी । गमिष्यतीति विग्रहे गम्धातोर्भविष्यत्कालेऽर्थे इनिप्रत्ययेऽस्य णित्वे उपधावृद्धौ गामिन् = गामी । एवं भविष्यतीति विग्रहे भूधातोर्भविष्यत्कालेऽर्थे इनिप्रत्ययेऽस्य णित्वे अचो ञ्णितीति सूत्रेण वृद्धावावादेशे भाविन् = भावी । स ग्रामं गमी । नद्या अवारपारं गामी धीवरोऽस्ति । अत्यन्तं व्रजं गामी कृष्णो दृश्यते लभ्यते वा । मथुरां गामी कृष्णभक्तो विद्यते । अयोध्यां गामी हनुमान् अस्ति प्राप्यते वा । आगामी कालः(समयः) उपयुक्तोऽनुपयुक्तो वा किमस्ति विचारणीयः । अवश्यंभाविनो भावा भवन्ति महतामपि ।

४-२-१३-८ आवश्यके आधमर्ण्ये चार्थे णिनिः

आवश्यकाधमर्ण्ययोर्णिनिः ३।३।१७०॥

आवश्यके आधमर्ण्ये चार्थे गम्ये धातोर्णिनिः स्यात् । कर्तरि - करोतीति कारी । ददातीति दायी । हरतीति हारी । अनयोरर्थयोर्निष्पन्नेन पदेन योगे द्वितिया विधीयते न तु षष्ठी । नपुंसकत्वे द्वितीया । आवश्यके-अवश्यङ्कारी कृष्णः प्रत्यक्षं वर्तते । आधमर्ण्येऽर्थे - शतं दायी रामोऽस्ति । अंशं हारी पुत्रः ।

विशेषः - पूर्वकृदन्ते यस्माद्यस्मात्सकर्मकधातोः क्तक्तवतु- शतृ-शानच्-शानन्-चानश-तृन्-इष्णुच्-उक-उप्रत्ययैर्निष्पन्नैः शब्दैर्योगे यथा द्वितीया विधीयते तथैव नञ्समासेन निष्पन्नैस्तैः शब्दैर्योगेऽपि सा विभक्तिर्विधीयते ।

कृत्याश्च ३।३।१७१॥

आवश्यकाधमर्ण्ययोर्गम्ययोरर्थयोर्धातोःकृत्यप्रत्ययाः स्युः । कृत्यप्रत्ययाः - तव्यत्तव्यानीयर-यत्-ण्यत्-क्यबादयो ज्ञेयाः । आवश्यके ण्यत् - अवश्यं सेव्यो हरिः । आधमर्ण्ये यत्-शतं देयमुत्तमर्णाय भवता ।

४-२-१३-९ तुमुन्ण्वुल्प्रत्ययान्तगौणक्रियापदानि

पूर्वं कस्यापि धातोः क्रियार्थायां क्रियायामुपपदे तस्मिन्नेवोपपदे परे स्थीयमानाद्धातोर्भविष्यदर्थे भावे तुमुनि भविष्यत्यर्थे कर्तरि च ण्वुलि कृते गौणक्रियापदं निष्पद्यते । यस्मिन्नर्थे यत्पदं निष्पन्नमस्ति । तत्पदं भविष्यत्कालस्यार्थस्य बोधकं भवति । सकर्मकगौणक्रियापदेषु मध्ये एककर्मकगौणक्रियापदात्पूर्वं सन्निधावेव एकं कर्म द्विकर्मकगौणक्रियापदात्पूर्वं द्वे कर्मणी च भवतः । अकर्मकगौणक्रियापदे तु कर्म न भवति धातोः कर्मणोऽभावात् । स्मरणीयं यत् गौणक्रिया

मुख्य(प्रधान)क्रियायाः क्रियायोगिनी अपूर्णक्रिया च भवति । वाक्ये मुख्यक्रियाया अर्थपूरणार्थं विवक्षयैकं द्वे त्रीणि त्रिभ्योऽप्यधिकानि गौणक्रियापदानि प्रयुज्यन्ते ।

४-२-१३-९-१ तुमुन्ण्वुलोः प्रत्यययोर्विधानम्

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३।३।१०॥

क्रियार्थायां क्रियायामुपपदे भविष्यदर्थे धातोस्तुमुन्ण्वुलौ[1] एतौ स्तः । तुमुनि इटोऽनिटश्च धातोश्चर्चा २-७-१ ण्यन्त इति उपशीर्षकोपरि स्थितस्य विषेशस्य "ख"क्रमे द्रष्टव्या । द्रक्ष्यतीति भविष्यति भावे तुमुन् = द्रष्टुम् । एवं प्रकारेण पालयिष्यतीति भविष्यति भावे = पालयितुम् । भविष्यतीति, भवितुम् । द्रक्ष्यतीति भविष्यति कर्तरि ण्वुल् = दर्शकः । पालयिष्यतीति भविष्यति कर्तरि ण्वुल् = पालकः । भविष्यतीति भविष्यति कर्तरि ण्वुल् = भावकः । १-क) कृष्णं दर्शको भक्तो व्रजं याति[2] । सतः पालको विष्णुर्वैकुण्ठाद्भूमिमवतरति । स्मरणीयं यत् गौणमुख्यययोः क्रिययोः कर्ता एक एव ।

१-ख) भविष्यदर्थे भावे निमित्ते (हेतौ, कारणे) चार्थे तुमुना निष्पन्नं गौणक्रियापदम् । सकर्मकगौणक्रियायाःपूर्वं विवक्षानुसारं कर्म भवति अविवक्षायां तु न । अकर्मकगौणक्रियायां तु कर्म न धातोः कर्मणोऽभावात् । स कृष्णं द्रष्टुं व्रजं याति । अहं नगरमटितुं यामि । छात्रो वेदं पठितुं गुरोः समीपे निवसति । त्वमयोध्यायां रामं द्रष्टुं निवससि । स उद्यानमवलोकयितुं चलितः(गतः) । ते क्रीडाक्षेत्रे कन्दुकेन क्रीडितुं गच्छन्ति । ते जलं पातुं सरसि अगच्छन् । स त्वमहं वा गृहं गन्तुं भाषणं कर्तुं वा उत्स्थितः । चौरा रात्रौ धनानि चोरयितुं गृहं प्रविष्टाः । पिता रूप्यकाणि गणयितुं मामभिधत्ते अभिदधाति वा । रामस्य विग्रहं श्रोतुं नः (अस्माकम्) कुतूहलमस्ति । सर्वे जनाः कृष्णं द्रष्टुं मथुरायां समवेता आसन् । भवता तादृशं वचनं वक्तुमुचितं नाऽऽसीत् । द्विकर्मकः धातवः- अहं भवन्तमेकं प्रश्नं प्रष्टुमागच्छम् । भवते भवन्तं वा वार्तां वक्तुं समागतवान् (समागतः) अहं स त्वं वा । एवं प्रकारेण द्विकर्मका दुहादिधातवो समाधेयाः ।

४-२-१३-९-२ इच्छार्थेषु धातुषूपपदेषु परेषु तुमुन्

समानकर्तृकेषु तुमुन् ३।३।१५८॥

इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन्स्यात् । यत्र इच्छार्थबोधकस्य धातोः क्रियाया भिन्नधातोर्निष्पन्नायास्तुमुन्नन्तगौणक्रियायाश्च कर्ता एक एव भवति । तत्रैवाऽऽनेन सूत्रेण तुमुन् द्विकर्तरि सत्सु तु न । यथा-पुत्रस्य पठनमिच्छतीत्यत्र पुत्रः कर्तर्यस्ति । अत्र द्विकर्तृबोधकत्वात्पठ्धातोस्तुमुन्न ।[3] यतोऽस्य कर्तरि स्थितस्य पुत्रस्य पठनस्य योगे षष्ठी क्रियते । उपपदे स्थितायां इच्छार्थक्रियायाः पूर्वं भिन्नधातोस्तु तुमुन्नन्तगौणक्रियापदम् । सकर्मकधातोर्विहितायास्तुमुन्नन्तक्रियायाः पूर्वं यथावसरं कर्म चिन्तमकर्मकक्रियायां तु न - स ओदनं भोक्तुमिच्छति (काङ्क्षति वष्टि कामयते ईहते) । रामः प्रजा रक्षितुमभिलषति । अहं समाचारं श्रोतुं कामये (वाञ्छामि, ईहे, इच्छामि, अभिलषामि वशिम) । छात्रः परीक्षायां सफलो भवितुं वाञ्छति । बालः क्रीडाक्षेत्रे कन्दुकेन क्रीडितुमिच्छति । मम तस्य च वेदं पठितुमिच्छाऽस्ति (वर्तते विद्यते) ।

---

[1] भट्टोजिदीक्षितः - सि.कौ. - उत्तरकृदन्तम् - ६६, तत्त्वबोधिनीटीकायाम् - तुमुन्ण्वुलोः कृत्वविशेषेऽपि "अव्ययकृतो भावे" इति वचनाद्भावे तुमुन् । ण्वुल् तु कर्तरि क्रियायामिति सप्तमी । (णलावितौ वु इत्यस्य अकादेशश्च) ।

[2] सम्बद्धपदात्पूर्वे परे वा स्थितं पदमुपपदं प्रोच्यते । अत्र तुमुन्ण्वुल्भ्यां निष्पन्ने क्रिये स्वस्मात्परे उपपदं क्रियापदमपेक्षते । यतस्ताभ्यां क्रियाभ्यां पश्चान्मुख्यं (प्रधानं) क्रियापदं प्रयुज्यते । पदाभ्यां परेऽवश्यमुपपदं भवेत् । यथा यातीत्युपपदं विद्यते । एवं सर्वत्र बोध्यम् ।

[3] सि.कौ. - उत्तरकृदन्तम् ६६ तत्त्वबोधिनीटीकायाम् - इह सूत्रे समानकर्तृकेति पदाभावे पुत्रस्य पठितुमिच्छातीति प्रयोगः स्यात् । देवदत्तं भुञ्जानमिच्छतीति काशिका ।

दुष्टान्हन्तुमिच्छन्परमेश्वरो भूमिमवतरति । भक्तान् त्रातुं वाच्छन् कृष्णो भूमिमवतरति । स्वर्गं प्राप्तुमभिलषञ्जनो यज्ञं करोति (विधत्ते) । अहं तु श्रोतुमिच्छामि विस्तरेण स्फूटाक्षरम् । सज्जनान् त्रातुं भूभारं च हर्तुं वाञ्छनीश्वरोऽवतारं गृह्णाति । वयं तीर्थं गन्तुं पुराणं श्रोतुं यज्ञं विधातुं(कर्तुम्) वा कामयामहे (वाञ्छामः, इच्छामः, अभिलषामः, वश्मः, काङ्क्षामः ईहमहे) । इष = इच्छ, काक्षि वाक्षि कमु वाछि अभिलष् वश् एते सर्वे इच्छार्थका धातवः । ईह चेष्टार्थे । इच्छाकांक्षा स्पृहा वाञ्छाऽर्थेषु ईच्छार्थकेषु शतृशानच्क्त्वाल्यप्प्रत्यान्तगौणक्रियापदेषु चोपपदेषु परेषु अन्यधातोस्तुमुन् ।

४-२-१३-९-३ सामर्थ्यादिधातुषूपपदेषु परेषु तुमुन्

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ३।४।६५॥

एषूपपदेषु (स्थितेषु भूतेषु वा) धातोस्तुमुन्स्यात् । समर्थेऽर्थे ईशः, ईश्वरः, शक्तः, प्रभवः, प्रभविष्णुः, विभुः, प्रभुः, समर्थः, क्षमः, अलम्, सक्षमश्चैते पुंसि । ईशा, ईश्वरी, शक्ता, प्रभवा, प्रभविष्णु, विभ्वी-विभुः प्रभ्वी-प्रभुः समर्था, क्षमा, सक्षमा, अलञ्चैते स्त्रियाम् । ईशम् ईश्वरम्, शक्तम्, प्रभवम्, प्रभविष्णु, विभु, प्रभु, समर्थम्, क्षमम्, सक्षमम्, अलञ्चैतानि क्लीबे । एवमीश्वरादिशब्दा विशेषणवाचकाः सन्ति । यत एते त्रिषु लिङ्गेषु प्रयुज्यन्ते । ईश्वरादिशब्देषु केनापि एकेन शब्देन कार्यं भवति सर्वेषां समानर्थत्वात् ।

क) वाक्यान्ते समर्थेऽर्थे प्रोक्तेषु शकादिधातुषु शब्देषु चोपपदेषु परेषु सत्सु पूर्वं तुमुन्नन्तगौणक्रियापदं प्रयुज्यते । सकर्मकगौणक्रियापदात्पूर्वं प्रसङ्गानुसारं कर्माध्याह्रियतेऽकर्मक गौणक्रियायां तु न धातोः कर्मणोऽभावात् । समर्थेऽर्थे शक्धातुः प्रभू-क्षम-ईश-धातवोऽपि गृह्यन्ते । यथा-स ओदनं भोक्तुं शक्नोति शक्तवान्, शक्तः । स्वभावमन्यथा कर्तुं न शक्नोति कदा जनः (स्वादौ अकर्मकः १२६२) । यत्राऽकर्मकस्य शक्धातोः कर्तरि भावे च निष्पन्नायां तिङन्तातिङन्तक्रियायां प्रयुक्ता एककर्मकगौणक्रिया क्रियायोगिनी भवति । तत्र प्रयुक्तं कर्म गौणक्रियामन्वेति न तु मुख्यक्रियां धातोरकर्मकत्वात् । कर्तरि - भक्तो हरिं द्रष्टुं शक्यति शक्यते शक्तवान् - दिवादौ सकर्मकः - ११८७ - कर्मणि - भक्तेन हरिर्द्रष्टुं शक्यते शक्तव्यः शक्यः शक्तः । स्वभावश्चान्यथा कर्तुं शक्यते न जनेन वै । स्वभावमन्यथा कर्तुं(परिवर्तितुं) शक्यते(दिवादिः सकर्मकः) न ध्रुवं नरः । केषाञ्चिन्मन्त्राणामर्थो विज्ञातुं न शक्यते । अधिकं भोजनं कर्तुं न शक्नोति (स्वादिः) च बालकः । तस्माल्लक्षणप्रमाणरहितस्य वेदस्य सद्भावो नाङ्गीकर्तुं शक्यते । शक्यो वारयितुं जलेन हुतभुक् सूर्पेण सूर्यातपो, नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ । व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रैः प्रयोगैर्विषं सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः । एवं रूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरु प्रवीर ॥ भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः प्रजानामीशानस्त्रिपुरमथनः पञ्चभिरपि । विद्याधनं कोऽपि चोरयितुं(मोषितुम्) न प्रभवति न प्रभूतवान् न प्रभूतो वा । निपुणोऽपि स्वस्कन्धमारोढुं न प्रभवति । गुरुश्छात्रान्धर्मं वक्तुं (शासितुं) प्रभवति । गोपो गां पयो दोग्धुं च शक्नोति (प्रभवति) - अत्र द्विकर्मकधातवः स्मरणीयाः । कृष्णो देवान्स्वर्गं गमयितुं शक्नोति (प्रभवति इष्टे)क्षमते - अत्र सर्वे ण्यन्तद्विकर्मकधातवः स्मरणीयाः । श्रीहरिः सलिले पृथिवीमासयितुं प्रभवति शक्यते । अत्र ण्यन्तैककर्मकधातवः स्मरणीयाः । एकस्याप्यतिथेरन्नं यः प्रदातुं न शक्तिमान् । तस्यानेकपरिक्लेशे गृहे किं वसतः फलम् ॥ रामो वनं गन्तुं समुद्रं बद्धुं रावणं च हन्तुं शक्नोति (शक्तः, ईश्वरः, समर्थः, क्षमः, प्रभवः, प्रभुः, विभुः अलं वा) । कृष्णो जगन्मोहयितुं कंसं हन्तुं च प्रभुः (विभुः, ईशः, ईश्वरः, क्षमः, समर्थः अलम्, सामर्थ्यवान् वा) अस्ति । एतत्कार्यं कर्तुं मम शक्तिर्नास्ति । आहारवैकल्यान्मे वोढुं शक्तिर्नास्ति । देहशैथिल्यान्मे गन्तुं शक्तिर्न विद्यते ।

स दुःखं सोढुं क्षमते, (क्षान्तवान् क्षमः सक्षमो वा) । मनुष्यः शास्त्रेणैव कर्तव्याकर्तव्ययोर्ज्ञानं कर्तुं क्षमते (शक्नोति प्रभवति शक्तः, ईशः, ईश्वरः, क्षमः, सक्षमः, विभुः, प्रभुः अलं वा) । अहं तव

दुःखं सोढुं न क्षमे, न शक्नोमि न प्रभवामि वा । स कथां वक्तुं समर्थयते समर्थितवान् । ब्राह्मणा मन्त्रेणाऽग्निमुत्यादयितुं न समर्थयन्ते न समर्थितवन्तः । ब्रह्मा योग्यतां दृष्ट्वा तदनुज्ञातुं सति प्रमादे समाधातुं च समर्थो भवति । धनं धनं नैव मतं बुधानां विद्यैव वित्तं मतमस्ति तेषाम् । चौरो न तां चोरयितुं समर्थो भूपोऽपहर्तुं न च तां समर्थः । स वेदं पठितुं समर्थः । अहं पुराणमध्येतुं प्रभवामि । सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुं महेश्वरः । हनुमान् समुद्रस्य पारं यातुं प्रभवति । स तस्य गृहे गृहं वा धनानि चोरयितुं प्राविशत् (प्रविष्टवान् प्रविष्टो वा) । व्यासः कृष्णश्चरित्रं वाल्मीकिश्च रामचरितं वर्णयितुं समर्थितवन्तौ सक्षमौ अलं वा । स कामपि समस्यां समाधातुं सर्वेषामुपकारं कर्तुं तत्र गन्तुं वा क्षमः । एतत्कार्यं कर्तुं स त्वमहं भवान्देवो कोऽपि वा समर्थः अलं वा । तौ युवामावां भवन्तौ देवौ कावपि वा समर्थावलं वा । ते यूयं वयं भवन्तो देवा केऽपि वा समर्था अलं वा । रामः कृष्णो वा मृतं पुत्रमानेतुमीशोऽलं प्रभवो वा । महर्षे ! त्वमेवं विधं नरं समुद्धर्तुं समर्थोऽसि । एवं ईश्वरादिशब्दानां प्रत्येकं प्रयोगश्चिन्त्यः ।

दुर्गा महिषासुरं हन्तुं शक्नोति (शक्तवती प्रभवति प्रभवती क्षान्तवती ईशा ईश्वरी शक्ता समर्था विभ्वी-विभुः, प्रभ्वी-प्रभुः क्षमा सक्षमा अलं वा-स्त्रियाम्) ।

ब्रह्म सर्वं जगद्व्याप्तुं शक्तम्, समर्थम्, ईशम्, ईश्वरम्, विभु प्रभु क्षमम् सक्षमम् अलं वास्ति - क्लीबे । अलमिति पदमव्ययमस्ति ।

नकारेण योगे नञ्समासेन च शब्दस्यार्थो विपरीतो भवति । यथा विपरीतार्थे - एतां समस्यां समाधातुं कोऽपि न समर्थः, (नेशः, नेश्वरः, न क्षमः न विभुः, नालमित्यादयः) । विषयाधारविवक्षायां तु सप्तमी - स कर्मणि ईशः, शक्तः, अलमित्यादयः । नञ्समासेन - असमर्थः, अनीशः, अनीश्वरः, अशक्तः, अक्षमः, अप्रभुः, अविभुः, असक्षमः, अशक्तश्चैते असर्मार्था भवन्ति पुंसि । असमर्था अक्षमा अनीशा अनीश्वरी चेत्यादयः स्त्रियाम् । स कर्म कर्तुमशक्तः । अहं स वा तत्र गन्तुमनीशः । त्वं स वा वक्तुमक्षमः । तौ युवामावां वा भोक्तुमशक्तौ । ते यूयं वयं वा ओदनं भोक्तुमशक्ताः । नारी पुत्री वा तत्र गन्तुं नालम् । सा अक्षमा । ता अक्षमाः । तेऽसमर्थाः । एवमुपपदेषु समर्थार्थशब्देषु परेष्विव नकारेण नञ्समासेन च युक्तेष्वयुक्तेषु इच्छायोग्यार्हयत्नप्रयत्नादिशब्देषु च परेषु पूर्वं तुमुन्नन्तपदस्य प्रयोगः सदा विचारणीयः ।

ख) धृष्धातुर्धृष्टार्थेऽस्ति । अस्मिन्धातावुपपदे परे सति तुमुन् - स राज्यं भोक्तुं धृष्णोति (प्रगल्भते) । व्याख्यातुं धृष्टः सः ।

ग) ज्ञाधातुर्ज्ञानार्थेऽस्ति । अस्मिन्धातावुपपदे परे सति तुमुन् - स गृहं घटं च निर्मातुं जानाति । सा गीतं (गानं) गातु जानीते । रमा व्यञ्जनं रोटिकां च पक्तुं जानाति । रमेशः कवितां रचयितुं वेत्ति । तस्य गातुं ज्ञानमस्ति । स तत्कार्यं कर्तुं वेत्ति । स संस्कृतं पठितुं लिखितुं च जानीते । भवतस्तव तस्य वा गङ्गां तरि(री)तुं पुराणं पठितुं वक्तुञ्च ज्ञानमस्ति (बोधोऽस्ति) ।

घ) ग्लैधातुरसमर्थार्थे गृह्यते । अस्मिन्धातावुपपदे परे सति तुमुन् - स ओदनमत्तुं (भोक्तुं खादितुं वा) ग्लापयति - न शक्नोतीत्यर्थः ।

ङ) चेष्टार्थधातावुपपदे परे सति तुमुन् - स ओदनं फलं वा भोक्तुं (खादितुं) घटते ईहते वा । रामो गृहं गन्तुं चेष्टते (घटते) ७६३ - घट चेष्टायां भ्वादिः । ईह चेष्टायाम् (भ्वादिः ६३२) ।

च) आरम्भधातुरारम्भार्थेऽस्ति । अस्मिन्धातावुपपदे परे सति तुमुन् - प्र+आ+रभ् । प्र+उप+क्रम् = स वेदं पठितुमारभते (प्रारभते) । स कार्यं विधातुं (कर्तुं) प्रारभते । ते कार्याणि कर्तुं प्रक्रमन्ते (आरभन्ते) । गुरुश्छात्रेभ्यः पाठं कथावाचकः श्रोतृभ्यः कथां च वक्तुं प्रारभते (प्रक्रमते) । सूर्यः छात्राः संस्कृतं नेपालीभाषां हिन्दीमाङ्गलभाषां चाध्येतुं प्रक्रमन्ते (आरभन्ते प्रारभन्ते उपक्रमन्ते) ।

सायं चन्द्रश्च प्रातरस्ताचलं च गन्तुं प्रक्रमते । अस्माकं सूत्रकाराः श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-शुल्वसूत्राणि चाऽऽरचयितुमुपाक्रमन् (प्राक्रमन्त) । स संस्कृतं पठितुमारभते ।

छ) लभधातुर्लाभा(प्राप्त्य)र्थेऽस्ति । अस्मिन्धातावुपपदे परे सति तुमुन् - स ओदनं भोक्तुं लभते । बालः फलं भोक्तुं लभते ।

ज) उत्साहस्य साहसस्य चार्थबोकधातावुपपदे परे सति तुमुन् - द्विजो वेदमध्येतुमुत्सहते । स कार्यं (कर्म) कर्तुमुत्सहते । बालो वनं वने वा गन्तुमुत्सहते । अहं पर्वतमारोढुमुत्सहे । जनो नदीं तर्तुमुत्सहते । सैनिक एकाकी रणे (युद्धे) यातुमग्रसरति । अस्माकमस्मासु वा शत्रुभिः सह योद्धुमुत्साहो (साहसो)ऽस्ति । मम वेदं पठितुमुत्साहोऽस्ति । त्वं वनं गन्तुमुत्साहं मा कुरु । इमं भारं बोढुं नाहं सहिष्ये ।

झ) आस्त्यर्थधातावुपपदे परे सति तुमुन् - अस्त्यर्थेन भू विद् वृत् धातवोऽपि गृह्यन्ते । मया अन्नं भोक्तुमस्ति । त्वया पुस्तकं पठितु विद्यते । भवता कविता रचयितुमस्ति । त्वया मया च सर्वैर्वा कार्यं (कर्म) कर्तुं (विधातुं) विद्यते (अस्ति भवति वर्तते) ।

ञ) योग्यताया उचितस्य योग्यस्य अर्हस्य वा अर्थबोधकधातावुपपदे परे सति तुमुन् - स वर्णान्वक्तुमर्हति । रामस्तत्पदं प्राप्तु(लब्धुं)मर्हति । बालौ तत्र व्रजितुं नार्हतः । न चातुर्मास्यानि नित्यानि भवितुमर्हन्ति । तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः । विद्यायाः सदुपयोगो धर्मबुद्ध्या भवितुमर्हति । भवान् सर्वेषां दुःखानि निवारयितुं युक्तं कर्म करोतु (विधत्ताम्) । वयं दीनस्य दुःखानि निवारायितुमौचित्यं(उचितं योग्यं वा) मन्यामहे । स त्वमहं भवान्वा तत्पदं लब्धुमर्हो (योग्य उचितो वा) । तौ युवामावां भवन्तौ वा तत्पदं प्राप्तुमर्हौ योग्यौ उचितौ वा । ते यूयं वयं भवन्तो वा तत्र गन्तुमर्हाः, योग्या (उचिता) । तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्ववान्धवान् । स वस्त्राण्यानेतुं योग्यं (उचितं युक्तं वा) मन्यते । त्वं विकटां समस्यां निवारयितुं (अपसारयितुं निराकर्तुं वा) योग्यं मन्यसे । स राजा मन्त्री अध्यक्षोऽध्यापकः शिक्षकः, अधिकृतो वा भवितुमर्हति - योग्यः, उचितः, अर्हो वास्ति । त्वया कार्यं कर्तुं युक्तम्, कार्ये विधातुं युक्ते, कार्याणि कर्तुं युक्तानि इत्यादि ।

४-२-१३-९-४ पर्याप्ताद्यर्थेषूपपदेषु परेषु तुमुन्

पर्याप्तिवचनेष्वलमर्थेषु ३।४।६६॥

पर्याप्तिः पूर्णता । तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन् स्यात् । तुमुना वक्तुम्, भाषितुं, गदितुं विवेचितुं, पठितुं, भवितुमित्यादयो निष्पद्यन्ते । सामर्थ्येऽर्थे पर्याप्तः, दक्षः चतुरः, पेशलः,पटुः, पाटवः, प्रवीणः, निपुणः, निष्णातः, कुशल अलमित्यादयो गृह्यन्ते । सामर्थ्यार्थे स्थितेषु एषु शब्देषूपपदेषु परेषु पूर्वं तुमुन्प्रत्ययान्तं गौणक्रियापदं प्रयुज्यते । नञ्समासेन युक्तेष्वेषु शब्देषूपपदेषु परेष्वपि पूर्वं तुमुन्नन्तपदं प्रयुज्यते नहि तु न - ओदनं भोक्तुं पर्याप्तोऽस्ति । स त्वमहं भवान् रामः कृष्णो वा वेदं पठितुं प्रवीणः, निपुणः, दक्षः कुशलोऽलं ,समर्थोः वा - कर्त्रनुसारं क्रियापदं चिन्त्यम् । स तत्र गन्तुमलम् (समर्थः) । तौ युवामावां भवन्तौ वा ज्ञानं वक्तुं पटू (प्रवीणौ दक्षौ कुशलौ चतुरावलं समर्थौ वा) - कर्त्रनुसारं क्रियापदं चिन्त्यम् । ते यूयं वयं भवन्तौ वा वार्तां कर्तुं (विधातुं) चतुराः (दक्षाः, कुशलाः, निपुणाः पटवोऽलं समर्था वा) - कर्त्रनुसारं क्रियापदं चिन्त्यम् । शुम्भं हन्तुं देवी समर्थाऽलं वा । रमा तत्कार्यं कर्तुमलं(समर्था सक्षमा वा)मस्ति । भगवन्तं शिवं विष्णुं रमां दुर्गां वा ध्यातुं समर्थः समर्थौ समर्था वा । अयं कर्म कर्तुं तत्र गन्तुं भाषणं व्यवहार वा कर्तुं निपुणो (समर्थश्चतुरो वा)ऽस्ति । स छात्रान्पाठयितुमप्रवीणः । श्यामो रणे योद्धुमकुशलः ।

४-२-१३-९-५ कालादिष्वर्थेषूपपदेषु परेषु तुमुन्

कालसमयवेलासु तुमुन् ३।३।१६७।

पर्यायोपादानमर्थोपलक्षणार्थम् । कालार्थेषूपपदेषु धातोस्तुमुन् स्यात् । कालो दिष्टोऽप्यनेहाऽपि समयः - इत्यमरः । वेला = समयः । वाक्ये कालार्थेषूपपदेषु परेषु सन्निधौ सत्सु पूर्वं तुमुन्प्रत्ययान्तशब्दाश्चिन्त्याः-अयमोदनं भोक्तुं समयः कालो वा । एषा विद्यालयं गन्तुं वेलाऽस्ति । अयं कथां कथयितुं श्रोतुं च समयो विद्यते । इदानीं सम्प्रति वा सन्ध्यामुपासितुमनेहा कालो वा । अयं धर्मशास्त्राणि वेदं चाध्येतुं समयः । अयं तव मम वा कार्यं सम्पादयितुमवसरोऽस्ति । सर्वेषां गृहं गन्तुं कालोऽयम् । तवायमात्मानं प्रकटयितुं समयोऽवसरो वा । तव मम वा योग्यतां दर्शयितुं महत्वपूर्णोऽवसरःकालो वा । मम त्वां सभाजयितु(संभावयितुं)मयं महानवसरः (समयो) विद्यते । तव मम तस्य वा गृहं विद्यालयं कार्यालयं वा यातुं समयः (अवसरो) । अयं कार्यं कर्तुं समय इत्यादि ।

४-२-१३-९-६ उद्यतादिष्वर्थेषु धातूपपदेषु परेषु तुमुन्

६-क) उद्यतार्थधातावुपपदे सति - उद्+यत्= - वाक्ये कर्त्रनुसारं क्रियापदं चिन्त्यम् - स तत्र गन्तुमुद्यतः । बाल ओदनं खादितुमुद्यतोऽस्ति (दृश्यते लभ्यते प्राप्यते वा) । राम आत्मतत्वमगवन्तुमुद्यतः । स त्वं भवान्वा मामेकाकिनं त्यक्तुमुद्यतः - कर्त्रनुसारं मुख्यक्रियापदं चिन्त्यम् । तौ युवामावां भवन्तौ वा वेदं पठितुमुद्यतौ । ते यूयं वयं भवन्तो वा कार्यं कर्तुं बालं ताडयितुं वा समुद्यताः - कर्त्रनुसारं प्रधानक्रियापदं चिन्त्यम् । अहो वत महत्पापं कर्तुं व्यवसिता वयम् । यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ भवन्तश्चैतादृशा धर्मज्ञा मामतिथिं हन्तुमुद्यताः । बन्धुभिः स्वजनैः सार्धं व्रतं कर्तुं समुद्यतः । तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ । विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥ ते मामेकाकिनं मोक्तुमुद्यताः । स तां मोक्तुं तत्परः । ते यूयं वयं भवन्तो वा मामेकाकिनं मुक्त्वा गन्तुमुद्यताः । यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः । तेनाऽऽदिमं कार्यं विधाय गृहं यातुमुद्यमो विहितः । ते तत्र फलानि समादातुमुद्योगं (उद्यमं) चक्रुः । भवान्गृहं यातुमुद्यतः । रामस्त्वां स्वस्य गृहं (गृहे) नेतुं तत्परः । कपोतो हिरण्यकस्य पाशं छेत्तुं- दृष्ट्वा प्राह । कार्यं कर्तुमुद्यताञ्जनान्दृष्ट्वा प्रसन्नोऽस्मि । वेदं पठितुं सदाचारं पालयितुं सत्कर्म कर्तुं वा उद्यतान्पुत्रान्दृष्ट्वा पिता प्रसन्नोऽस्ति ।

६-ख) प्र+वृत्=प्रवर्तनार्थधातावुपपदे परे सति तुमुन् - स कार्यं (कर्म) कर्तुं (विधातुं) प्रवर्तते (प्रवृत्तवान् प्रवृत्तो वा) । त्वं वेदमध्येतुं प्रवर्तसे । अहं वेदं पठितुं प्रवर्ते । स त्वमहं भवान्वा समस्यां समाधातुं प्रवृत्तः । तौ युवामावां भवन्तौ वा दुःखं निराकर्तुं प्रवृत्तौ । ते यूयं वयं भवन्तो वा पुराणं श्रोतुमात्मानं ज्ञातुं च प्रवृत्तवन्तः प्रवृत्ताः वा । यः पुमान् व्याकरणेन शब्दार्थं मीमांसातात्पर्यं च शोधयितुं च प्रवृत्तस्तस्मै जनाय वेदःस्वकीयां तनुं विस्रसे । स जर्जरवंशेन भिक्षापात्रं ताडयितुं प्रवृत्तः । स योद्धुं युज्यते सज्जते वा । रावणो योद्धुं तत्परोऽस्ति । मन्त्राणामर्थमवबोधयितुं निरुक्तव्याकरणानि प्रवृत्तानि । मीमांसा सन्देहं निवारयितुं प्रवृत्ता । स गृहं गन्तुं भगवन्नाम वाचयितुं वा प्रवर्तते प्रवृतवान् प्रवृत्तः । प्रवृत्तेऽर्थे चतुर्थ्यपि भवति - स कार्याय प्रवृत्तः । अधः स्वीदासीदिति मन्त्रो न सन्देहप्रबोधाय प्रवृत्तः ।

६-ग) यत्नप्रयत्नयोरर्थे स्थिते धातावुपपदे परे सति - स संस्कृतं पठितुं (अध्येतुं) यतते - प्रयतते यतितवान् प्रयतितवान्वा । श्यामो व्याकरणमध्येतुं प्रयतते प्रयतितवान् वा । स त्वमहं भवान्वा कार्यं सम्पादयितुं कर्म विधातुं (कर्तुं) प्रयतितवान् । तौ युवामावां भवन्तौ वा गृहं यातुं यतितवन्तौ । ते यूयं वयं भवन्तो वा देशोन्नतिं (देशविकासं) कर्तुं प्रयतितवन्तः । त्वं परोपकारं कर्तुं स्वस्यान्यस्य च कार्यं सम्पादयितुं स्वार्थं त्यक्तुं (परित्यक्तुं हातुं विहातुं वा) च यतस्व प्रयतस्व वा । भवानुच्चपदं लब्धुं (प्राप्तुम्) यशोऽधिगन्तुं च प्रयत्नं कुर्वीत । मनुष्यो धनं प्राप्तुं शास्त्रण्यवगन्तुं(विज्ञातुं) च प्रयतेत ।

वयं देशस्य विकासं कर्तुं प्रयतामहे यूयमपि प्रयतध्वम् । रामो लङ्कां यातुमुपायं विदधाति । सर्वे मानवाः केऽपि वा दुश्चरितानि दुर्व्यसनानि च परित्यक्तुं सुचरितान्याचरितु(अनुसर्तुं) मात्मतत्त्वं ज्ञातुं च प्रयतेरन् । तत्रानेन लुब्धेन साधुना रात्रावुत्थाय रत्नं ग्रहीतुं यत्नः (प्रयत्नः) कृतः । जनान् रक्षितुं राज्ञो यत्न आसीत् । त्वां मां च पातुं (रक्षितुं त्रातुमवितुम्) शिवस्य विष्णोर्लक्ष्म्या दुर्गाया वा प्रयत्न आसीत् अस्ति वा । स्मरणीयं यत् यत्र प्रथमान्ताः समर्थाय, उत्साहः, साहसः, योग्यः, अर्हः, उचितः, उद्यतः, उद्यमः, उद्योगः, प्रवृत्तः, यत्नः, प्रयत्नश्च शब्दाः प्रयुज्यन्ते । तेषामन्ते प्रथमान्तस्य वचनानुसारम् भवति(भू) अस्ति(अस्) वर्तते(वृत्) विद्यते(विद्) दृश्यते (दृश्) एतेषु क्रियापदेषु किमपि एकं पदं प्रयोक्तुं शक्यते । सर्वे देशस्योन्नतिं (विकासं) विधातुं (कर्तुं) प्रयत्नं कुर्वीरन् कुर्युर्वा ।

६-घ) श्रेयः श्रेष्ठ इत्यादिशब्देषूपपदेषु परेषु पूर्वं तुमुनः प्रयोगो भवति - मम ग्रामं तत्र वा गन्तुं श्रेयः, श्रेष्ठः, मङ्गलं शुभं कल्याणमुत्तमं वाऽस्ति । किन्तु तद्रहस्यं वक्तुं काचिद्विश्वासभूमिर्नास्ति । गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके । मम वेदं व्याकरणं च पठितुं (अध्येतुं) शुभं श्रेयो वा भवति । त्वया भवता वा कथां वक्तुं कल्याणमुत्तमं वा भवति । इत्यादि ।

६-ङ) भविष्यत्कर्तरि ण्वुल्प्रत्ययेन निष्पन्नस्य विशेषणस्य विशेष्यानुसारं वचनम् - कृष्णं दर्शकं भक्तं स नमति । सतः पालकं विष्णुमहमर्चामि ।

६-च) तुमुन्प्रत्ययान्तपदात्परे स्थितस्य दक्षादिविशेषणस्य विशेष्यानुसारं वचनम् । दक्षादिशब्दा दक्षः, चतुरः, पेशलः, पटुः, प्रवीणः निपुणः, कुशलः पेशलश्चेत्यादयः - वेदं व्याख्यातुं निपुणं जनं सर्वे वाञ्छन्ति, स वाञ्छति अहं वाञ्छामि वा । पुराणं व्याकरणं वेदान्तं च व्याकर्तुं (विवेचितुं व्याख्यातुं वा) समाचारं वक्तुं मञ्चे नर्तितुं कर्म कर्तुं गानं गातुं व्यवसितुं च कुशलं जनं को न वाञ्छति । त्वं सदा कर्म कर्तुं जनं सुकर्मणि प्रवर्तय । भोक्तुं पर्याप्तान् (प्रशस्तान्) पदार्थान् सर्वे संगृह्णन्ति आनयन्ति वा । कथां वक्तुं कथाया रसं पातुं वा कुशलः, (व्यवसितः, प्रवृत्तो) नरः पुण्यमानन्दं वा लभते (प्राप्नोति) । एवमुक्त्वा स्वस्य पाशं छेत्तुमुद्यतं हिरण्यकं चित्रग्रीव आह । कथापानं कर्तुं कुशलेन नरेणाऽऽनन्दोऽनुभूयते । कर्म कर्तुं कुशलाय नराय अधिकारं देहि । मञ्चे नर्तितुं कुशलाया नार्या नृत्यं सुन्दरमस्ति । व्यवहारं कर्तुं (विधातुं) प्रवीणे नरे सर्वे विश्वसन्ति । अन्ये विशेषणशब्दा यथास्थाने एवमेवप्रकारेण चिन्त्याः ।

६-छ) तुमुन्प्रत्ययान्तपूर्वकौ काममनःशब्दौ तुमुन्प्रत्ययान्ताद्गौणक्रियापदात्पूर्वकयोः काममनः शब्दयोः समासे कृते तुमो मकारस्य लोपो[1] भवति । यथा-कर्तुं कामो यस्य स इति कर्तुं मनो यस्य स इति च विग्रहे कृते तयोः समासादिकार्यं विधायान्ते तुमो मकारस्य लोपे कृते सति प्रातिपदिकात्सुबुत्पत्तौ क्रमेण कर्तुकामः कर्तुमनाः इति रूपे सिद्धयतः । एवं द्रष्टुकामो द्रष्टुमनाः, गन्तुकामो गन्तुमनाः, वक्तुकामो वक्तुमनाः, भवितुकामो भवितुमनाः इत्यादिशब्दा निष्पद्यन्ते । अस्माच्छब्दात्पूर्वं कारकप्रयोगविधिः ४-२-१३'ग" क्रमे द्रष्टव्यः ।

स्वर्गमभिलाषुको जनः परोपकारं यज्ञं वा करोतु कुर्याद्वा । कर्म कर्तुकामं जनं सर्वे वाञ्छन्ति । पुत्रं द्रष्टुमनाः माता मार्गे शीघ्रं धावति । पुनरपि वक्तुमना आर्यो लक्ष्यते । संसारसागराद्गन्तुकामानां जनानां धर्मो नौर्ज्ञेयः । कुणपमिव सुनारीं त्यक्तुकामो विरागी । स यज्ञे ब्राह्मणाय गां दातुमना दृश्यते अस्ति वा । भवान् किं वक्तुमना अस्ति । बालो दोलादवरोहितुमना दृश्यते । भवान् कुत्र गन्तुमना अस्ति । अहं भवन्तं शय्यायां शयितुमनसं पश्यामि । छात्रं वेदं पठितुमनसं जानामि । रामो जलं

[1] लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि । समो वा हिततततयोर्मांसस्य पचि युड्घञोः ॥ कृत्ये = कृत्यप्रत्यये परे अवश्यो शब्दस्यान्त्यं मकारं लुम्पेत् = लोपो भूयात् । यथा अवश्यलाव्यम् । तुंकाममनसो परयोः = कामशब्दे मनःशब्दे च परे सति तुमो मकारं लुम्पेत्= कर्तुकामो गन्तुमना इत्यादि । एव हितशब्दे तत्शब्दपरे च समो मकारं वा लुम्पेत् = संहितम् सहितम् । सततम्, सन्ततम् । युड्घञोः = युड्प्रत्ययान्ते घञ्प्रत्ययान्ते च पच्धातोः पचनशब्दे पाकशब्दे च परे मांसस्य सकास्य अन्त्यम्=अकारं लुम्पेत् - मांस्पचनम् मांस्पाकः ।

पातुकामो विद्यते । स जीवितुमना जीवितुकामो वाऽस्ति । भवान् किं वक्तुमनाः, किं वक्तुकामो वा किं कर्तुमनाः, किं कर्तुकामः, किं भोक्तुकामः किं भोक्तुमना वा किं गृहे स्थातुमनाः किं गृहे स्थातुकामो वा किं पक्तुमनाः किं पक्तुकामो वाऽस्ति । अहं वेदं पठितुमनाः वेदं पठितुकामो वाऽस्मि । ग्रामे नगरे वा वस्तुमना वस्तुकामो वा जनो गृहं निर्मिमीत इत्यादि ।

४-२-१३-१० क्त्वाल्यप्णमुल्प्रत्ययान्तगौणक्रियापदानि

पूर्वकालिकभावार्थे सकर्मकाकर्मकधातुभ्यः क्त्वाल्यप्णमुल्प्रत्ययैर्गौणक्रियापदानि निष्पद्यन्ते । तानि मुख्यक्रियाया योगीनी अपूर्णक्रियापदानि च भवन्ति । क्त्वास्थाने ल्यप् विधीयते । अयं ल्यबपि भावार्थप्रत्यय एव बोध्यः । सकर्मकगौणक्रियासु मध्ये द्विकर्मकगौणक्रियायाः पूर्वं सन्निधौ द्वे कर्मणी एकसकर्मकगौणक्रियायाः पूर्वं सन्निधावेकं च कर्म भवति अकर्मकगौणक्रियापदे तु न धातोः कर्मणोऽभावात् । अत्रापि मुख्यक्रियाया अपूर्णमर्थं पुरयितुं विवक्ष्यैकं द्वे त्रीणि त्रिभ्योऽधिकानि च गौणक्रियापदानि प्रधानक्रियाया अग्रे सन्निधौ प्रयुज्यन्ते । क्वचिदपि गौणक्रियया वाक्यं पूर्णं न भवति। यतस्तत्पदं प्रधानक्रियामपेक्षते ।

४-२-१३-१०-१ क्त्वाप्रत्ययान्तगौणक्रियापदम्

समानकर्तृकयोःपूर्वकाले ३।४।२१॥

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् । अव्ययकृतो भावे भवन्तीति भाष्ये प्रोक्तत्वात्प्रत्ययो भावे भवति । इ ई उ ऊ ऋ ॠ श्रि इङ् इण् णीञ्=नी ष्टु=स्तु नु भू लू स्मृ कृ तृ कॄ अन्तेभ्यो धातुभ्यः क्त्वाप्रत्यये परे आर्धधातुकं शेष इति सूत्रेणार्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेरित्यनेन प्राप्त इट् "श्र्युकः किति" इति सूत्रेण निषिध्यते । यथा-श्रित्वा, इत्वा २, नीत्वा स्तुत्वा नुत्वा भूत्वा लूत्वा स्मृत्वा कृत्वा तीर्त्वा कीर्त्वा इत्यादयो भवन्ति । आकारान्तेभ्यः शक्लाद्यनुदान्तेभ्यश्च धातुभ्यः क्त्वापरेऽस्य आर्धधातुकं शेष इत्यार्धधातुकसंज्ञायां तत आर्धधातुकस्यड्वालादेरित्यनेन प्राप्त इट् एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषिध्यते । यथा आकारान्ताः - स्थित्वा मित्वा ध्यात्वा पीत्वा गीत्वा ध्मात्वा दत्वा गत्यर्थे-हात्वा, त्यागार्थे-हा=हीत्वा। धाधातोस्तु-हित्वा । इत्यादयो भवन्ति । शक्लाद्यनुदात्ताः - पक्त्वा मुक्त्वा उक्त्वा त्यक्त्वा भुक्त्वा सृष्ट्वा मत्वा छित्वा भित्वा क्रुद्ध्वा वप्त्वा शप्त्वा सुप्त्वा लब्ध्वा गत्वा नत्वा हत्वा दृष्ट्वा इत्यादयः। शीङ्=शयित्वा[1] । यस्य विशेषसूत्रेण इट्विहितस्तस्य इट् - मृडित्वा[2] उदित्वा[3] उषित्वा[4] इत्यादयः । उकारेत्संज्ञकधातोः क्त्वाप्रत्यये परे "उदितो वा" इति सूत्रेण वैकल्पिक इट्-कमित्वा कान्त्वा । शमित्वा शान्त्वा इत्यादयः । यस्य विशेषधातोर्विहितस्य सेटः क्त्वो वैकल्पिके कित्वे नलोपेन नलोपाभावेन च धातोर्द्वे रूपे भवतः यथा - श्रथित्वा[5] श्रन्थित्वा । विशेषधातोर्विहितस्य सेटः क्त्वो वैकल्पिके कित्वे गुणेन गुणाभावेन च धातोर्द्वे रूपे भवतः यथा-तर्षित्वा तृषित्वा[6] । मर्षित्वा मृषित्वा। सदा क्त्वाप्रत्यये परे धातुः सेट् अनिट् च विचारणीयः ।

सदा क्त्वाल्यप्णमुल्प्रत्यान्तगौणक्रियाया मुख्यक्रियायाश्च कर्ता एक एव भवति । वाक्ये सदा सकर्मकगौणक्रियायाः कर्म सकर्मकगौणक्रियायाः पूर्वं प्रयुज्यान्ते मुख्यक्रियापदं प्रयुज्यते । स्थलानुसारं

---

१ न क्त्वा सेट् इति सूत्रेण सेटो धातोः क्त्वायाः कित्वनिषेधात् गुणोऽयादेशश्च ।

२ मृडमृदगुधकुषक्लिशवदवसः क्त्वोति इट् किच्च ।

३ सेटः कित्वात्सम्प्रसारणम् ।

४ वसतिक्षुधोरिट् इति इट् ।

५ कित्ववैकल्पिकपक्षे "अनदितां हल उपधायाः क्ङिति" इति नस्य लोपः ।

६ तृषिमृषिकृषेः काश्यपस्येति वैकल्पितः कित् । कित्त्वपक्षे न गुणः । कित्त्वाभावे पुगन्तलघूपधस्येत्यनेन गुणः ।

सकर्मकमुख्यक्रियायां विवक्षया कर्माध्याह्रियतेऽविवक्षया न । अकर्मकगौणक्रियायां मुख्यक्रियायां च कर्म न धातोः कर्मणोऽभावात् । सकर्मकाकर्मक गौणक्रियायां करणादिकारकाणि यथानियमं प्रयुज्यन्ते । तानि पठने लेखने च विचारणीयानि- स कार्यं कृत्वा गच्छति । त्वं वेदं पठित्वा गच्छ । श्यामो घटनां लिखित्वा सूचयति । त्वं पुस्तकं फलानि वा नीत्वा गृहीत्वा (आदाय) वा हिण्डस्व । ईश्वरो जगत्सृष्ट्वा पाति (रक्षति अवति त्रायते गोपायति वा) । ते ओदनं भुक्त्वाऽगच्छन् । देवं पूजयित्वा भक्ता आगच्छन्ति । स गत्वा किं करोति । स भूत्वा किमभूत् । तौ खनित्वा खात्वा वा सुप्तः । यूयं सर्वे भूत्वा नगरं याथ । यूयं सर्वे मिलित्वा कार्यं कुरुथ । अहं तव गृहं गत्वा नृत्यं पश्यामि । त्वं पण्डितो भूत्वा किं करिष्यसि । अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । जनता मिलित्वा देशस्य विकासं कुर्वन्ति । भूत्वा द्विजवरो त्वं वै मामुपेष्यसि केवलम् । यूवां तत्र गत्वा पश्यतम् । आवां तत्र नर्तित्वाऽऽयावः । स शास्त्रं विदित्वा(ज्ञात्वा) जनान्बोधयति । तौ वृद्धान्नत्वाऽऽशिषं लभेते । भूमिं दृष्ट्वा पादं न्यसेत् । ते संभारान् (सामाग्रीः ब.व) नीत्वा गृहं (गृहे) गच्छन्तु । त्वं जलाशयं गत्वा जलमानय । यूवां विद्यालयं यात्वा संस्कृतं पठतम् । अहं पुराणनि पठित्वा दिनान्यतिवाहयामि । तौ फलानि नीत्वा गृहं यातः । सा पुत्रं नीत्वा यातु-यातात् । दधि मथित्वा घृतं निष्पादय । रामो लङ्कां गत्वा रावणं हत्वा सीतामयोध्यामानयत् । बालो दुग्धं पीत्वा ओदनं भुत्क्वा वा शयने क्रीडति (खेलति) मन्दते -शेते स्वपिति) हसति च । यूयं शत्रून्हत्वा जयं लभध्वम् । आवां राजानं सेवित्वा धनं लभावहे । यूयं नदीं तीर्त्वा पारं गच्छथ (याथ) । भवान् शास्त्राणि ज्ञात्वा व्याख्यां कुर्यात् । भाण्डं स्पृष्ट्वा तापं शीतं वा जानीहि । वृक्षाँश्छित्वा पशून्हत्वा कृत्वा रुधिरकर्दमम् । यद्येवं गम्यते स्वर्गो नरकं केन गम्यते ॥ मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा भक्तिर्भुवि गता । त्रैविद्या मां सोमपा पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । भक्तः प्रदक्षिणं कृत्वा भगवन्तं रमेश्वरम् । अभीष्टं च फलं नित्यं लभते नात्र शंसयः ॥ भगवान् नृसिंहो भूत्वा हिरण्यकशिपुमवधीत् (हतवान्) । भगवान् वामनो भूत्वा वलिं वलेर्वा क्ष्मामहरत् । विष्णुं नत्वा शिवं स्तुत्वा गणेशं पार्वतीं तथा । पूजयित्वा गृही नित्यं भुङ्क्ते पाचितमोदनम् ॥ नञ्समासेन युक्तेऽपि-अकृत्वा दृश्यमविलयमज्ञात्वा तत्त्वमात्मन इत्यादि ।

४-२-१३-१०-२ ल्यप्प्रत्ययान्तगौणक्रियापदम्

समासेऽनञ्पूर्वे क्त्वो ल्यप् ७।१।३७॥

अव्ययपूर्वपदे अनञ्समासे(नञ्समासभिन्ने) सति क्त्वः स्थाने ल्यबादेशः स्यात् । अव्ययपदेन स्वरादयाश्चादयो निपाताः क्त्वाल्यप्तुमुन्प्रत्ययान्ताः प्रादयस्तसि[1] ल्शसमामन्तप्रत्ययाश्च गृह्यन्ते । मान्तानिटां नान्तानिटां वनोत्यादीनां च क्त्वि परे नस्य लोपे ल्यपि परे "ह्रस्वस्य पिति कृति तुक्" इति सूत्रेण तुक् । आगत्य आगम्य । प्रणत्य प्रणम्य । वैकल्पिकोऽनुनासिकस्य लोपः । विधा=विधाय । विहा=विहाय (हित्वा त्यक्त्वा) नञ्समासे कृते तु अविहाय इति रूपम् । उत्सज्य प्रवज्य । च्वित्वे इत्वेन च - शुल्कीकृत्य नम्रीभूय, सरलीभूय । अनुकरणे - खाट्कृत्य, फूत्कृत्य हुंकृत्य । इत्यादि ।

ल्यप्प्रत्ययान्ते गौणक्रियापदेऽपि कारकविधिः क्त्वाप्रत्ययान्तगौणक्रियापदस्य इव ज्ञेयः । गौणमुख्यक्रिययोः कर्ता एक एव - स गुरुमभिवाद्याऽऽसने वसति । तौ देवान्प्रणम्य गृहं यातः । ते फलानि संगृह्य गृहे (गृहं) नयन्ति । स विहस्य मां वार्तामब्रवीत् । स तस्य वचनमाकर्ण्य प्रजीविनमाह । ते देवान्सम्पूज्यान्ते प्रार्थयन्ते । त्वं क्षेत्रं प्रपश्याऽऽयाहि । ते शिवं प्रणम्य गृहं यान्ति । वायुः सौरभमादाय वाति । त्वां विहाय (परित्यज्य) अहं कुत्रापि न गच्छामि । स विहस्य ब्रूते । अहमौषधं निगीर्य स्वपिमि । ते शीघ्रं कार्यं विधाय (निष्पाद्य सम्पाद्य) गृहं गच्छन्ति अगच्छन्वा । अहं धनं कुत आनीय ददामि (प्रयच्छामि) । स विहस्य तमवदत् । सूत्रकाराः श्रुतिवाक्यान्यनुसृत्य धर्मसूत्राणि मीमांसां च प्राणयन् । विप्राः वेदमधित्य यज्ञं निष्पादयन्ति । वयं धनानि प्राप्य दानं कुर्मः । भवान्

[1] तसिल् अम् आम् एते प्रत्यया ज्ञेयाः ।

हस्ताभ्यां पुष्पाण्यादाय भगवतेऽर्पयतु । स त्वमहं भवान्वा हस्तेन दण्डं प्रगृह्य याति । तौ युवामावां भवन्तौ वा भोजनं विधाय क्षेत्रे यातौ । ते यूयं वयं भवन्तो वा भगवन्तमाश्रित्य निर्भयं प्राप्ता । पुत्रः पात्रे स्थाल्यां वा दुग्धं संस्थाप्य गतः । निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् । बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥ प्रणम्य वाङ्मयीं देवीं रमाकान्तेन धीमता । क्रियते बालबोधाय ग्रन्थोऽयं नीतिविस्तरः ॥ मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥ अधीत्य विधिवद्वेदान्पुत्राँश्चोत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयत् ॥ अनधीत्य द्विजो वेदमनुत्पाद्य यथा सुतान् । अनीष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः ॥ स मुखं व्यादाय स्वपिति । स नेत्रे निमिल्य हसति । ग्राममतिक्रम्य नदी विद्यते । सर्वे पक्षिणः समेत्य (संमील्य, एकत्रीभूय) मन्त्रयितुमारब्धाः प्रचक्रमिरे वा । ते एवं निश्चित्य राजानं प्रोचुः । सर्वे देवाः समेत्य शिवं विष्णुं ब्रह्माणं दुर्गां वा दुःखमब्रूवन् । सामाजिका जना व्यक्तयो वा परस्परं संमील्य (मिलित्वा) कमपि कार्यं कुर्युः । ते सर्वे राजानः समेत्य तेन सह विग्रहं (युद्धं) चक्रुः । साष्टाङ्गं प्रणिप्रत्याह सुग्रीवो रामपादयोः । स साष्टाङ्गं प्रणिप्रत्याऽऽसनमन्ववसत् ।

४-२-१३-१०-३ ण्यन्तगौणक्रियापदम्

ल्यपि लघुपूर्वात् ६।४।५६॥

लघुपूर्वात्परस्य णेरयादेशः स्यात् ल्यपि । लघुपूर्वात्=लघुस्वरपूर्वात् । ण्यन्तात्क्त्वा । अस्य स्थाने ल्यप् । ल्यपि परेऽनेन सूत्रेण णेरयादेश - विगणय्य, प्रकथय्य । प्रणमय्य । प्रशमय्य प्रवेभिदय्य। णेर्लोपे तु - उत्तार्य । विचार्य । सम्प्रधार्य । संस्थाप्येत्यादि ।

४-२-१३-१०-४ द्विरावृत्तौ प्रयुक्तं णमुल्प्रत्ययान्तं क्त्वाप्रत्ययान्तं च पदम्

आभीक्ष्णे णमुल् च ३।४।२२॥

धातोः पौनः पुन्ये द्योत्ये णमुल्स्यात् क्त्वा च । रूपे सिद्धे सति "नित्यवीप्सयोः" इति सूत्रेण णमुल्प्रत्ययान्तस्य क्त्वाप्रत्ययान्तस्य च पदस्य द्वित्वम् । द्वित्वेन पदस्य द्विरावृत्तिर्भवति । अस्यां गौणक्रियायां कारककविधिः पूर्वगतगौणक्रियायामिव ज्ञेयः - पुत्रो मातापितरौ मातरं पितरं वा स्मारं स्मारं स्मृत्वा स्मृत्वा वा रोदिति । बालः पयः (दुग्धं) पायं पायं पीत्वा पीत्वा क्रीडति (खेलति) स्वपिति (शेते निद्राति मन्दते) वा । स भोजनं भोजं भोजं भुक्त्वा भुक्त्वा वा तृप्यति, तौ तृप्यतः, ते तृप्यन्ति, आवां तृप्यावः, वयं तृप्यामः । भक्तो भगवतो नामानि जापं जापं जप्त्वा जप्त्वा वा कथाः श्रावम् २ श्रुत्वा २ वा दिनानि यापयति (अतिवाहयति गमयति) । नगरस्यापूर्वां शोभां दर्शम् २ वा भगवतो स्वरूपं ध्यायम् २ ध्वात्वा २ स्वदेशस्य सुन्दरं दृश्यं दर्शम् २ दृष्ट्वा २ वा रामयादवस्य पञ्चवर्षीयो वालको मातापितरौ प्रतीक्षते । नामं नामं घनश्यामं ध्यायं ध्यायं परं ब्रह्म । स्मारं स्मारं दारुभूतो मुरारिः । जननीं नामं नामं सत्कथां च श्रावं श्रावं बालो गृहे निवसति । सत्सङ्गतेर्गुणगणान्गायं गायमनेकैः कविवरैः स्वकीयाः (स्वीयाः) काव्यकला निर्मलीकृताः । स स्मारं स्मारं शिवं नमति । स्मृत्वा २ वेदं पठति । श्रावं श्रावं मम वार्ता न वदति । केनापि ओदनं भोजं भोजं क्षुत् विनश्यति । इत्यादि ।

४-२-१३-१०-५ वाक्ये प्रधानक्रियापदात्पूर्वं विवक्षया द्वाभ्यां स्त्रिभ्यो वाऽधिकगौणक्रियापदानि ।

(क) शतृ शानचौ - गीतां पठन्स्मरन्नित्यं दिनं यापयति सज्जनः । पश्यन्शृण्वन्नपि जानन्न बोधयति मां जनः । आसीनः संविशँस्तिष्ठन् भुञ्जानः पर्यटन् महीम् । चिन्तयानो हृषीकेशमपश्यत् तन्मयं जगत् ॥

(ख) तुमुन् - ब्रह्म बोद्धुं वक्तुं च सरलो नास्ति । भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परं तपः ॥ कर्तुमकर्तुमन्यथाकर्तुं समर्थ ईश्वरः ।

(ग) क्त्वा - स्नात्वा पीत्वा गच्छति । स्नात्वा भुक्त्वा पीत्वा याति । नर्तित्वा गीत्वा खादित्वा व्रजति । श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः । न हृष्यति न ग्लापयति स विज्ञेयो जितेन्द्रियः ॥ एवं क्त्वः स्थाने कृतस्य ल्यप्प्रत्ययान्तस्यापि प्रयोगः एवमेव ज्ञेयः ।

४-२-१३-१०-६ क्त्वाल्यप्प्रत्ययान्तगौणक्रियापदपूर्वकं शतृशानच्तुमुन्प्रत्ययान्तगौणक्रियाप्रयोगः

क) स धैर्यमालम्ब्य विमर्शयन् यावन्मन्दं मन्दं गच्छति तावद् दुन्दुभिमपश्यत् । राजा दूतस्य वचनं श्रुत्वा विचारयन् चिन्तयमानो वाऽऽसने उपविष्टः ।

ख) स ओदनं भुक्त्वा गन्तुमिच्छति । श्यामो धृतानि वस्त्राण्युत्तार्य स्थातु(वस्तु) मभिलषति । कोऽपि वेदं धर्मशास्त्राणि पुराणानि च पठित्वा (अधीत्य) व्याख्यातुं कामयते । स कार्यं समाप्य यातुमिच्छति । पूजकः (भक्तः) भगवन्तं सम्पूज्य नर्तितुं वाञ्छति । छात्रः पाठं समाप्य भोक्तुं काङ्क्षति । त्वं कर्माणि समाप्य नाटकं द्रष्टुं गच्छ । स्वामिना तस्य सामर्थ्यमविज्ञाय(अविदित्वा) गन्तुं न युज्यते । बालो लेखं कार्यं वा समाप्य क्रीडितुं याति । सोऽवसरं विलोक्य वक्तुमिच्छति । शत्रुरवसरं विलोक्याऽऽक्रमितुं यतते । इत्यादि ।

४-२-१३-१०-७ एकस्मिन्वाक्ये सकर्मकगौणमुख्य(प्रधान)क्रिययोः स्वस्वकर्म

क) गद्यस्य वाक्ये प्रायेण गौणक्रियायाः कर्म गौणक्रियायाः पूर्वं प्रधानक्रियायाः कर्म प्रधानक्रियायाः पूर्वं च प्रयुज्यते । अर्थकालेऽपि प्रयोगानुसारस्य कर्म स्वस्वक्रियायामन्वीयार्थः क्रियते । कुत्रचिद्वाक्ये शतृशानजादिगौणक्रियासु मध्ये विवक्षानुसारं पृथग्पृथगेकैका पृथग्पृथग्बहवोऽपि गौणक्रियाः प्रयुज्यन्ते । कर्तरि उ-उक-शानन्-चानश्-इष्णुच्-तृन्प्रत्ययैः शतृस्थाने कृतेन वसुप्रत्ययेन च निष्पन्नाः शब्दा विशेषणत्वात्प्रथमाद्वितीयादिविभक्तिषु स्थितस्य विशेष्यस्य वचनानुसारं प्रयुज्यन्ते । गद्यपद्ययोर्वाक्ये शतृशानजादीनां प्रयोगः सदा विचारणीयः । अच्छन्दसि लिखितं वाक्यं गद्यं छन्दसि लिखितं वाक्यं पद्यञ्च प्रोच्यते ।

गद्यवाक्यानि

सदाऽऽदौ गौणक्रियाया वाक्यं पठित्वा ततः प्रधानक्रियाया वाक्यं पठचते । स कृष्णं द्रष्टुं व्रजं याति । अहं सुन्दरं नृत्यं द्रष्टुं गोकुलं गच्छामि । जना रामं द्रष्टुमयोध्यां गच्छन्ति (व्रजन्ति यन्ति यान्ति) । अहं कृष्णमवलोकयितुं गोकुलं गच्छामि (व्रजामि एमि यामि) । त्वं सन्देशमभिधातुं ग्रामं गच्छ (व्रज एहि याहि) । कृषकस्य पुत्रस्तत्र क्षेत्रे क्षीरं नीत्वा संस्थाप्य च पुनः स्वगृहमायातः । छात्र आपणात्पुस्तकं कृत्वा गृहं गत्वा गृहे पुस्तकधान्यां पुस्तकानि संस्थाप्य क्रीडाक्षेत्रे क्रीडितुं यातः । यत्तु स्वयं धूमादग्निमनुमाय परं प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुज्यते । कर्माणि कुर्वतो जानान्दृष्ट्वा निवृत्तोऽस्मि । हे ब्रह्मन् ! द्वारकां गन्तुं कृतमतिः कृष्णो रथमास्थितः । कार्यं कर्तुं कृतमतिं जनं को न वाञ्छति । स तपः कर्तुं वने वसति - (अयं धातुरकर्मकः । अस्य कर्म न भवति)

पद्यवाक्यानि

पद्यस्य वाक्ये गौणमुख्यक्रिययोः स्वकीयं स्वकीयं कर्म छन्दो मेलयितुं यत्र कुत्रापि प्रयुज्यते । अर्थकाले प्रथमं गौणक्रियायाः कर्म गौणक्रियायां प्रधानक्रियायाः कर्म प्रधानक्रियायां चान्वीयार्थः क्रियते । सदाऽऽदौ गौणक्रियाया वाक्यं पठित्वा ततः प्रधानक्रियाया वाक्यं पठचते । कुर्वन्हि वैतसीं वृत्तिं प्राप्नोति महतीं श्रियम् । युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । कौर्मं सङ्कोचमास्थाय प्रहरान्नपि मर्षयेत् । कृत्वापि पापं शतसंख्यमप्यसौ पतिं गृहीत्वा सुरलोकमाप्नुयात् ।

बलवन्तं रिपुं दृष्ट्वा सर्वस्वमपि बुद्धिमान् । दत्त्वा हि रक्षयेत्प्राणान् रक्षितैस्तैर्धनं पुनः ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधाय मनः प्राणमास्थितो योगधारणाम् ॥ नीचः श्लाध्यपदं प्राप्य स्वामिनं हन्तुमिच्छति । सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः । अहं प्रजाःसिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् । पतीन्प्रजानामसृजं महर्षीनादितो दश ॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । पशूनविधिनाऽऽलभ्य प्रेतभूतगणान् यजन् । नरकानवशो जन्तुर्गत्वा यात्युल्वणं तमः ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः । भुवोऽवतारयद्भारं जविष्ठं जनयन्कलिम् ॥ श्रुतिस्मृत्युदितं कर्ममनुतिष्ठन्हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥ कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । जनो गां पयो दुग्ध्वा सदा देवायाऽऽर्पयेत् । परीक्षिते कथां वक्तुं सभायां सस्थिते शुके । द्विकर्मकाणां धातूनां प्रयोगे एवमेव चिन्त्यम् ।

कर्मसहितायाः कर्मरहिताया वा मुख्यक्रियायाः पूर्वं स्थितं गौणक्रियापदं क्रियायोगिनि ज्ञेयम् ॥ सदाऽनञ्समासपूर्विका ल्यप्प्रत्ययान्तगौणक्रिया भवति चेन्नञ्समासपूर्विका क्त्वाप्रत्ययान्तगौणक्रियाऽपि भवति । यथा-प्रणम्य अनत्वा ।

४-२-१४ तिङन्तातिङन्तयोःक्रिययोर्वाक्यपरिवर्तनस्य नियमः

वाक्ये क्वचित्तिङन्तक्रिया (आख्यातः) कृदन्तक्रिया, कृदन्तक्रिया कृदन्तक्रिया च द्वे क्रिये समाने भवतः क्वचित्तु न । सदा वाच्यं तिङन्तक्रियायास्तिङन्तक्रियायां कृदन्तक्रियायाः कृदन्तक्रियायामेव परिवर्तते । तत् उभयोःकर्तृकर्मवाच्ययोरुक्तेरनुक्तेश्च वैपरीत्ये विभक्तयः परिवर्तन्ते। अकर्मकधातोर्भावे कर्तुः कर्तुर्विशेषणस्य च परिवर्तनं भवति सकर्मकधातोस्तु कर्मणि कर्तुःकर्मणश्चानयोर्विशेषणस्यापि परिवर्तनं च । भाववाच्ये कर्मवाच्ये च करणादीनामुपपदयोगिनां च पदानां परिवर्तनं न भवति । उपपदानां सङ्ग्रहः ४-२-११ संख्याया उपशीर्षकस्य प्रसङ्गे टीकायां कृतोऽस्ति ।

१क) भूतकर्तरि तिङन्तक्रिया	भूतकर्तरि - कृदन्तक्रिया
(१) देवदत्तोऽगच्छत् अगमत्	देवत्तो गतवान्, गतः ।
(२) विष्णुर्वैकुण्ठमध्यतिष्ठत् अध्यस्थात्	विष्णुर्वैकुण्ठमधिष्ठितवान् अधिष्ठितः ।
(३) स ग्रामं प्राप्नोत् प्रापत्	स ग्रामं प्राप्तवान् प्राप्तः ।

उभयोःसमानार्थः । व्याख्यायामुभे क्रिये परस्परं पर्यायवाचकरूपेण प्रयुज्येते ।

१-ख) सकर्मकधातोः कर्तरि विधौ तिङन्तक्रिया	सकर्मकधातोःकर्मणि विधौ कृदन्तक्रिया
(१) श्यामो ग्रामं गच्छेत्	श्यामेन ग्रामो गन्तव्यः गमनीयो वा ।
(२) हरिर्वैकुण्ठंमधितिष्ठेत्	हरिणा वैकुण्ठोऽधिष्ठातव्यः ।
(३) स फलं प्राप्नुयात्	तेन फलं प्राप्तव्यम् प्रापणीयं वा ।
(४) रमा गां ग्रामं नयेन् नयेत	रमया गौर्ग्रामं नेतव्या नयनीया नेया वा
(५) रामो धर्मं कुर्यात्-कुर्वीत	रामेण धर्मः कर्तव्यः करणीयः कार्यः वा

(अत्र कर्तृवाच्यस्य तिङन्तक्रियायाः कर्मणि कृत्यन्तक्रियायां परिवर्तनम्)

२-क) अकमर्कधातोर्भूतकालिकयोस्तिङन्तकृदन्तक्रिययोः समानार्थस्वरूपमकर्मकधातोः कर्तृक्रियायोः प्रयोगविधेरन्ते दर्शनीयम् ।

२-ख) अकर्मकधातोःकर्तरि विधौ तिङन्तक्रिया	अकर्मकधातोर्भावेविधौ अतिङन्तकृत्यक्रिया
(१) स (देवदत्तः) पण्डितो भवेत्	तेन पण्डितेन भवितव्यम् ।
(२) वालःशय्यायां शयीत	वालेन शय्यायां शयितव्यम् ।

(३) गुरुर्गृहे तिष्ठेत् — गुरुणा गृहे स्थातव्यम् ।

२-ग) अकमर्कधातोर्भूतकर्तरि कृदन्तक्रिया — अकर्मकधातोर्भूतभावे कृदन्तक्रिया

(१) रामो विद्वान् भूतवान्, भूतः — रामेण विदुषा भूतम् ।
(२) योगी तपसि स्थितवान्, स्थितः — योगिना तपसि स्थितम् ।
(३) भृत्यो रात्रौ जागृतवान्, जागृतः — भृत्येन रात्रौ जागृतम् ।

(अत्र कृदन्तक्रियायाः कृदन्तक्रियायां परिवर्तनम्)

३-क) सकर्मकधातोर्भूतकर्तरि स्थितायाः कृदन्तक्रियाया वाक्यम् — ख) सकर्मकधातोर्भूतकर्मणि स्थितायाः कृदन्तक्रियाया वाक्यम्

(१) माधवः पठनं त्यक्तवान् — माधवेन पठनं त्यक्तम् ।
(२) कृष्णः कर्माणि कृतवान् — कृष्णेन कर्माणि कृतानि ।
(३) अर्जुनो बाणं क्षिप्तवान् — अर्जुनेन बाणः क्षिप्तः ।

(अत्र कृदन्तक्रियायाः कृदन्तक्रियायां परिवर्तनम्)

४-क) वर्तमानकर्तरि लटःस्थाने कृतेन शतृचा निष्पन्ना कृदन्तगौणक्रिया ।

ख) वर्तमानकर्मणि लटःस्थाने कृतेन यका शानचा च निष्पन्ना कृदन्तगौणक्रिया

(क)	(ख)
(१) पुत्रः पितरं नमन्	पुत्रेण पिता नम्यमानः ।
(२) छात्रो वेदं पठन्	छात्रेण वेदः पठ्यमानः ।
(३) भक्तो हरिं ध्यायन्	भक्तेन हरिर्ध्यायमानः ।
(४) रामः कर्म कुर्वन्-कुर्वाणो वा	रामेण कर्म क्रियमाणम् ।
(५) कृष्णो दृष्टिं ददत्-ददानो वा	कृष्णेन दृष्टिर्दीयमाना ।

(कृदन्तक्रियायाः कृदन्तक्रियायां परिवर्तनम्)

५-क) ण्यन्ताद्वर्तमानकर्तरि शतृशानज्भ्यां प्रत्ययाभ्यां कृदन्तगौणक्रिया ।

ख) ण्यन्ताद्वर्तमानकर्मणि यक्- शानज्भ्यां प्रत्ययाभ्यां कृदन्तगौणक्रिया ।

(क)	(ख)
(१) हरिः शत्रून्स्वर्गं गमयन्	हरिणा स्वर्गं गम्यमानाःशत्रवः ।
(२) माता बालं स्तन्यं पाययन्ती	मात्रा स्तन्यं पाय्यमानो बालः ।
(३) गुरुःप्रेम्णा छात्रान्वेदमध्यापयन्	गुरुणा प्रेम्णा वेदमध्याप्यमानाश्छात्राः ।
(५) कृष्णोऽर्जुनं धनुर्ग्राहयन्	कृष्णेन धनुर्ग्राह्यमानोऽर्जुनः ।

(अत्र कृदन्तक्रियायाः कृदन्तक्रियायां परिवर्तनम्)

ण्यन्तद्विकर्मकधातुभ्यो वर्तमानकर्तरि शतृशानज्प्रत्ययाभ्यां निष्पन्नाभ्यां पदाभ्यां योगे स्थितस्य शब्दस्य "गतिबुद्धि." इति सूत्रेण कर्मसंज्ञायां कृतायां "कर्मणि द्वितीया" इति सूत्रेण द्वितीया विधीयते । ततस्तेभ्य एव धातुभ्यः कर्मवाच्ये वर्तमानकर्मणि यक्-शानच्भ्यां निष्पन्नस्य पदस्य "बुद्धिभक्षार्थयो." इति श्लोकानुसारं पदं परिवर्तते । शतृ-शानचौ-गमयन्,गमयमानः । पाययन्, पाययमानः । अध्यापयन्, अध्यापयमानः । श्रावयन्,श्रावयमाणः । ग्राहयन् ग्राहयमाणः ।

४-२-१५ गौणमुख्ययोःक्रिययोः कारकव्यवस्था

साधारणं कारकं यत्क्रिययोर्गौणमुख्ययोः ।
तत्र मुख्यानुसारेणोक्तानुक्तत्वे विभक्तयः[1] ॥

एकस्मिन्वाक्ये गौणमुख्यक्रिययोः प्रयोगे कृते कारकस्य का व्यवस्था इति जिज्ञासायां "गौणमुख्यभूतयोः (क) कृदन्ताख्यातयोः (ख) कृदन्तक्रिययोर्वा एकजातीयं भिन्नजातीयमपि साधारणं कारकं भवति । तत्र गौणक्रियानुसारेणान्यथापि मुख्यक्रियानुसारेण उक्तत्वमनुक्तत्वं कारकं चाश्रित्य विभक्तिर्भवति । यथा - (क) गोधूमः पिष्ट्वा पच्यते । स एवमुक्त्वा निर्जगाम । तण्डुलाः पक्त्वा भुक्ताः स्वदन्ते । गृहस्थेन सत्कृता अतिथय आशिषो ददुः । पुराणं श्रावयता व्याख्यायते । कार्यं साधु कृतवता भृत्येन स्वामी प्रमोद्यते । (ख) स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ । भवद्भिरुपदिष्टमाकर्ण्य वयं प्रसीदामः । भुक्तवन्तं निषिध्य कोऽर्थः । तेनासनं ग्राहितैर्मुनिभिः कुशलमपृच्छ्यत[2] ।"

विशेषः[3] - यत्कारकमेकस्याः क्रियायास्तत्र तदनुसारेणोक्तत्वानुक्तत्वे विभक्तिश्च समुचितैव । यत्तु कृदन्ताख्यातयोः[4] कृदन्तक्रिययोर्वा गौणमुख्यक्रिययोः साजात्येन वैजात्येन वा साधारणं कारकं भवति । तत्रैकतो दृशाऽन्यतो दृशा च वैषम्ये उपस्थिते आख्यातक्रिया कृदन्तक्रिया वा या मुख्या तदनुसारेण विभक्तिर्भवति न तु गौणक्रियानुसारेण गौणमुख्ययोर्मुख्यस्य प्राबल्यात् । यथा - १) गोधूमः पिष्ट्वा पच्यते इत्यत्रोभयतः कर्मभूते गोधूमे पेषणस्यानुक्तकर्मत्वेऽपि मुख्यपाकक्रियायामुक्तकर्मत्वेन प्रथमा । २) गुरुणा दत्तं राज्यं प्रतिपद्येत्यत्र दानप्रतिपत्योः कर्मभूते राज्ये दानस्योक्तकर्मत्वेऽपि तदपेक्षया प्रतिपत्तेरनुक्तकर्मत्वेन द्वितीया । ३) सत्कृतैरतिथिभिरपृच्छ्यतेत्यत्र सत्कारकर्मसु प्रश्नकर्तृषु चाऽतिथिषु सत्कारोक्तकर्मत्वेऽपि तदपेक्षया मुख्यस्य प्रश्नस्यानुक्तकर्तृत्वेन तृतीया । एवमन्यत्रापि साजात्ये वैजात्येऽपि मुख्यानुसारेण विभक्तय उह्या । ४) एष विषयः शाकः पचता भुज्यत इत्यादौ शाके गौणपाकक्रियाया अनुक्तकर्मत्वेऽपि प्रधानभोजनक्रियाया उक्तकर्मत्वेनैव प्रथमैव । प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत्प्रकाशते इति शाब्दोक्तिरिति शब्दशक्तिप्रकाशिकायाम् (विद्यते) । तदुक्तं भर्तृहरिणा -

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते[5] ॥

व्याख्या - यत्र प्रधानेतरयोः = प्रधानगौणयोः क्रिययोर्द्रव्यस्य गुणाश्रया शक्तिः पृथग्भवति । तत्र प्रधानम् = मुख्यक्रियापदमेवानुरुध्यते ।

---

१ सोमनाथ सिग्देलः - प्रतिसंस्कृता सिद्धान्तकौमुदी - पूवार्धे, प्रकाशक - प्रज्ञाप्रतिष्ठान काठमाडौं, नेपाल, सम्वत् २०१५ पृ.१८४ त उद्धृतः ।

२ सोमनाथसिग्देलः - प्रतिसंस्कृता सिद्धान्तकौमुदी - पूवार्धे, प्रकाशक - प्रज्ञाप्रतिष्ठान काठमाडौं, नेपाल, सम्वत् २०१५ पृ.१८४ त उद्धृतः ।

३ सोमनाथसिग्देलः - प्र.सं..सिं.कौ.-पूवार्धे प्र. - प्रज्ञाप्रतिष्ठान, काठमाडौं, नेपाल, संवत् २०१५, पृ.१८४तः समुद्धृतः ।

४ आख्यातपदेन तिङन्तक्रिया निर्दिश्यते । क्रियापदेषु मुख्यक्रियापदानि गौणक्रियापदानि च द्विविधानि सन्ति । गौणमुख्यक्रिययोर्मध्ये तिङन्तक्रिया मुख्या कृदन्तक्रियाऽमुख्या च भवति । कृदन्तपदेन कृत्यक्तक्तवतुखल्शतृशानजादिप्रत्ययान्तानि क्त्वाल्यप्तुमुन्णमुल्प्रत्ययान्तानि च तिङ्रहितानि गौणक्रियापदानि प्रोच्यन्ते । एतेष्वपि कृत्यक्तक्तवतुखल्प्रत्ययान्ताः क्रिया मुख्यक्रिया क्त्वाल्यप्तुमुन्णमुल्प्रत्ययान्ताश्च क्रिया गौणक्रिया अमुख्यक्रियाश्च प्रोच्यन्ते । प्रयोगे गौणमुख्ययोः क्रिययोर्मध्ये गौणमप्रधानं मुख्य प्रधानं च भवति । वाक्ये तयोर्मध्ये मुख्यक्रियायाः प्रावल्यं भवति । तिङन्ततिङन्तक्रिया सजातीया क्तान्तक्तान्तक्रिया सजातीया क्तवतुक्तवतुप्रत्ययान्तक्रिया च सजातीया ज्ञेया । एभ्यः प्रत्ययेभ्यो भिन्नाः शतृशानजादिप्रत्ययान्तक्रिया विजातीया ज्ञेया ।

५ भर्तृहरिः - वाक्यपदीये तृतीयकाण्डे, साधनासमुद्देशे श्लोकः ८१ ।

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते[1] ॥

व्याख्या - यदा प्रधानविषया = प्रधाननिरूपिता शक्तिः प्रत्ययेन लादिसन्प्रत्ययेनाभिधीयते तदा गुणे क्रियानिरुपिताऽनुक्ता कर्मत्वशक्तिरपि तद्वदभिहित-(कर्मोक्त)वत्प्रकाशते । यतो हि प्रातिपदिकार्थमात्रे कर्म प्रथमान्तं भवति । यथा-ग्रामो गन्तुमिष्यत इत्यत्र गतिक्रियापक्षे द्वितीयाचतुर्थ्यौ न कदापि भवतः, तदपेक्षया कर्मत्वमभिहितवत्प्रकाशते इति कैयटोक्तेरभिधानात् इत्यादि च मञ्जूषायाम् प्र.सं.सि.कौ.-पूर्वार्धे पृ. १८४तः समुद्धृतः ।।

४-२-१६ क्वचिद्गौणमुख्यक्रिययोर्विवक्षाभेदेन कर्मणो व्यवस्था

कुत्रचिद्वाक्ये गौणक्रिया मुख्यक्रिया च सहैव प्रयुज्येते । तत्र कर्मण का व्यवस्था भवतीति जिज्ञासायां प्रोच्यते - "पक्त्वा भुज्यते" इत्यादौ पचिभुजिभ्यां सहकर्मणो युगपच्छब्दान्वयो न भवति । अन्यतरेण शब्दः प्रयुज्यतेऽपरेणार्थश्च क्रियते । अतस्तत्र प्रथमा-द्वितीये व्यवस्थिते स्तः । यथा-पक्त्वा भुज्यते ओदन इति प्रोच्यते । तदा भुज्यत इत्यत्रार्थादोदन इति गम्यते । एवं च विवक्षाभेदेन "पूजयितुं शक्यते हरिर्हरिं वा इत्युभयं साधु । तथैवात्रापि विवक्षाभेदेन "ओदनः पक्त्वा भुज्यते, ओदनं पक्त्वा भुज्यत इत्युभयं साधु[2] । यतः कर्मवाच्ये विवक्षाभेदेन कर्म प्रथमान्तं मुख्यक्रियापदे, कर्म गौणक्रियापदे वान्वीय वाक्यं निष्पद्यते इत्युक्त्वा उभयः प्रयोगः साधु मतः प्राप्यते ।

४-२-१७ गौणक्रियापूर्विकाया भावे सिद्धायास्तिङन्तातिङन्तक्रियाया वाक्यम्

अकर्मकधातोः कर्मणोऽविवक्षायां सकर्मकधातोश्च भावे तिङ कृत्यक्तखल्प्रत्ययैश्च क्रियाः सिद्धयन्ति । भावोऽद्रव्यरूपो मतः । शब्दो द्विविधो द्रव्यमद्रव्यं च । तयोर्मध्ये यल्लिङ्गसंख्यान्वययोग्यं तद् द्रव्यं यल्लिङ्गसंख्याऽन्वयायोग्यं तदद्रव्यं च प्रोच्यते । भावे सिद्धे तिङ्न्तातिङन्तक्रियेऽद्रव्यरूपे भवतः । अतिङन्तक्रियया भावे सिद्धा कृत्यक्तान्तक्रिया गृह्यते । यत एते द्वे क्रिये लिङ्गं संख्यामन्वयं च नापेक्षेते । क) तदनुसारं भावे निष्पन्नया तिङन्तक्रियया सह युष्मदस्मदोः समानाधिकरणाभावत् मध्यम उत्तमश्च पुरुषौ न प्रवर्तेते । किन्तु प्रथमपुरुष एव प्रवर्तते । अस्यापि पुरुषस्य तिङन्तक्रियाया द्वित्वादिसंख्यादीनामप्रतीतेर्न द्विवचनं न बहुवचनं च प्रवर्तते किन्तु एकवचनमेव । यतः प्रथमपुरुषस्य एकवचनमेव प्रयुज्यते । ख) कृत्यक्तान्तक्रियाऽपि शब्दसाधुबोधाय स्वभावेन नपुंसके एकवचने प्रवर्तते । यतः सा क्रिया नपुंसके एकवचने प्रयुज्यते । तदनुसारं सकर्मकगौणक्रियापूर्विकाया भावे निष्पन्नायास्तिङन्तातिङन्तक्रियाया वाक्ये प्रयुक्तं कर्म सकर्मकगौणक्रियामन्वेति न तु भावक्रियाम् । किञ्च भावे निष्पन्नयोस्तिङन्तातिङन्तक्रिययोः कर्मणोऽभावात् - क) त्वया धनिनो गृहे कर्माणि कर्तुं स्थीयते । छात्रेण वेदं पठितुं(अधिगन्तुं) गुरोः सन्निधौ उष्यते । ख) नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । इदं सूत्रं त्यक्तुं शक्यम् । कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् । कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ तैः सर्वैर्भद्राकारमुलुकमालोक्याऽभिहितम् । सक्षोभं रुदतीं तामवलोक्यास्माभिरपि न पारितं निरोद्धुं नयनवाष्पाणि । तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तु सदा।

---

[1] ऐ ऐ
[2] नागेश भट्ट - वैयाकरणसिद्धान्तलधूमञ्जूषा ।

४-२-१८ क्रियाविशेषणम्

वाक्ये क्रियापदस्य विशेषमर्थं द्योतयितुं क्रियापदात्पूर्वं सन्निधौ यत्पदं प्रयुज्यते तत्पदं क्रियाविशेषणं प्रोच्यते । तद्विशेषणमपि द्विधा भवति अव्ययमनव्ययं च । प्रातः, अन्तः, बहिः, उच्चैः, नीचैः, पुनः, एकधा, सुष्ठु दुष्ठु, द्विधा, अधः, किम्, शमित्यादीन्यव्ययानि अव्ययक्रियाविशेषणानि अव्ययाद्भिन्नानि सत्यं शिवं सुन्दरं सुखं सादरं समीचीनं स्फुटं शर्म ध्रुवं सविनयं सादरतरं साधु लघु मानःपुरस्सरं क्षिप्रमवश्यमरमित्यादीनि चानव्ययक्रियाविशेषणानि प्रोच्यन्ते । क्रियायाः पूर्वे स्थितस्याव्ययभिन्नक्रियाविशेषणस्य (सामान्ये नपुंसकम्) इति वार्तिकेन नपुंसकत्वं विधीयते । तद्विशेषणं द्वितीयैकवचनान्तं प्रयुज्यते । उभयप्रकारकं विशेषणं सकर्मकाकर्मकधात्वोः कर्तृवाच्ये सकर्मकधातोः कर्मवाच्ये च निष्पन्नायास्तिङन्तक्रियायाः भूतकर्तरि (भूतकर्तृवाच्ये) निष्पन्नायाः क्तक्तवतुप्रत्यान्तक्रियायाः, कर्मवाच्ये निष्पन्नायायाः कृत्यक्तखल्प्रत्ययान्तायाश्च क्रियायाः, कर्तरि निष्पन्नायाः शतृशानच्प्रत्ययान्ताया भावे निष्पन्नायास्तिङन्तकृत्यक्तप्रत्ययान्तायाः क्रियायाः क्त्वाल्यप्तुमुन्प्रत्ययान्ताया गौणक्रियायाश्च पूर्वं सन्निधौ प्रयुज्यते ।

१) सकर्मकाकर्मकयोर्धात्वोः कर्तृवाच्ययस्य तिङन्तक्रियायां प्रयुक्तमव्ययक्रियाविशेषणम् - स किं वदति । भवान्किं भाषते मन्यते वा । कृष्णोऽच्छं (सम्यक्) ब्रवीति ब्रूते वा । तौ मिथः संभाषेते । स नूनं (निश्चयं) ब्रूते । ते मिथः (परस्परं) संभाषन्ते । चौरा मृषा (असत्यं) ब्रुवन्ति । रमा किं करोति । भवान् किं करोति । त्वं किं करोषि । ते किं कुर्वन्ति । एकं राशिं पञ्चधा करोति । स पुनराह । त्वं किं श्रृणोषि । स नीचै-(अधः)र्गच्छति । स तत्र वसति, । फलमधः पतति । मानवो दोषा (रात्रौ) शेते (स्वपिति) दिवा जागर्ति च । जना (मानवाः) नक्तं(रात्रौ) शेरते दिवा (दिने) जाग्रति च । कृष्णोऽन्तर्याति । शिवः सम्यक् नृत्यति । रामः काशीं परारि अगच्छत् । इदं कार्यं पूर्वेद्युरभवत् । स नीचै(अधः)रस्ति । स नाना पश्यति । अहं पश्चाद्गच्छामि । अहं परमात्मानमात्मसात्करोमि । शृगालो मन्दं मन्दं (शनैः शनैः) याति । यथैधांसि समिद्धोऽनिर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्नि सर्वकर्माणि भस्मसात्कुरुते तथा ॥ यजमानो यज्ञान्ते स्तोत्रं पठन् यज्ञस्य प्रदक्षिणं विधत्ते । स गृहे नूनं वसति । स गृहे नूनमस्ति । गुरुः नूनं पाठयति । स इतस्ततो भ्रमति । स कार्यं स्वयं विधत्ते । कवयः किं न पश्यन्ति किं न कुर्वन्ति योषितः । मद्यपाः किं न जल्पन्ति किं न खादन्ति वायसाः ॥ भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः (विस्तारपूर्वकम्) प्रभो । भो विद्वांस. ! यूयं मामपि सहैव नयथ । यात्यधोऽधोव्रजत्युच्चैर्नरःस्वैरेव कर्मभिः । स एवाधोऽधः पतति नूनं स्वैरेव कर्मभिः । भक्तो भगवन्तं साक्षात्करोति । भवान् क्व गच्छति । स उपर्युपरि याति । पुस्तकं पात्रं वा मञ्चस्योपरि स निदधाति त्वं निधेहि(स्थापय) यूयं स्थापयथ वा । स मम धुरि (अग्रे) वसति । एवं सर्वत्र ज्ञेयम् ।

२- सकर्मकाकर्मकयोः कर्तृवाच्यस्य तिङन्तक्रियायां प्रयुक्तमनव्ययं क्रियाविशेषणम्-

२-क) अकमर्कधातोः प्रधानक्रियायामनव्ययक्रियाविशेणम् - बालः शय्यायां सुखं शेते[1] (मन्दते स्वपिति निद्राति संविशति) । स साधु वर्धते । लक्ष्मीर्मञ्चे सुन्दरं नृत्यति । कोऽपि कस्मिन्नपि सदाऽविश्वासं तिष्ठेत् । स ग्रामे नगरे वा स्वच्छन्दं चरति हिण्डते भ्रमति वा । सा मञ्चे सानन्दं ननर्त । सुखं रात्रीः शयिता वीतमन्युः । वयं गृहे ग्रामे नगरे देशे वा सुखं वसामः । उद्योगी अनीशं यतते । बालः शीघ्रं धावति । सोऽतीव शीघ्रं धावति । एतत्कार्यं निश्चयमवश्यं वा भवेत् । स मञ्चे सुन्दरं नृत्यति । अकुलीननराकीर्णो न राजा सुखमेधते । शशिनो व्यपदेशेन वसन्ति शशकाःसुखम् । सुखं बालः सदा शेते सुखं च प्रतिबुध्यते । सुखं चरति लोकेऽस्मिनवमन्ता विनश्यति ॥ अभवः शरणं मम त्वम् । अघायुरिन्द्रियारामो माघं पार्थं स जीवति । तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखम् । विनापि सङ्गमं स्त्रीणां सुधियः सुखमासते । दिवसे कर्म तत्कुर्याद्येन रात्रौ सुखं वसेः । ब्रह्माकृत्या

---

[1] क्रियाविशेषणे द्वितीयैकवचनस्य प्रयोगेऽकृते तृतीयैकवचनमपि प्रयुज्यते - शेते सुखेन बालश्च सुखेन प्रतिबुध्यते ।

निवसति सुखं निष्क्रियो निर्विकल्पः । कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते । परमाणवः परस्परं (मिथः, अन्योन्यम्) मिलन्ति विभजन्ते च । सञ्जीवकोऽपि तं सादरं प्रणम्याग्रतः सविनयमतिष्ठत् । अधुना कार्यमवश्यं भवति ।

ख) सकर्मकधातोः प्रधानक्रियायां कर्मणा रहितं सहितं चानव्ययक्रियाविशेषणम् - स समीचीनं वदति (ब्रब्रीति ब्रूते) । रामो नित्यं गच्छति । छात्राः सत्वरं प्रयान्ति । कृष्णो मधुरं वक्ति । पिङ्गलकः सादरमाह । अयं गुरवे राज्ञे वा सविनयं निवेदयति । देवः शीघ्रं गच्छति करोति च । अथ तौ परस्परं मन्त्रयतः । गरुडः साभिमानं प्राह । गुरुः शीघ्रं भाषते (वदति ब्रवीति ब्रूते) । सीता साधु करोति । सूर्यश्चन्द्रश्चास्तं याति (गच्छति) । स ध्रुव(निश्चयं)मभिदधाति । श्यामः स्पष्टं (स्फुटं) ब्रूते । पिताऽवश्यमायाति । स दृढमातिष्ठते । स स्फुटं वदति । स त्वां मधुरं ब्रूते । भवन्तमहं समीचीनं ब्रवीमि । त्वं जनं स्फुटं (स्पष्टं) वद । रामो वसिष्ठं सादरं वक्ति । माता व्यञ्जनं स्तोकं बहु वा पचति । निवेदको भवन्तं सादरमाह । अथ शशकस्तं सविनयं प्रोवाच । छात्रो गुरवे काठिन्यं सविनयं निवेदयति । स पाठमवश्यं(निश्चयं)विदधाति । अहं पितरं मातरं वा स्वपठनं पाठं वा क्षिप्रं श्रावयामि । छात्रो गुरुं धर्ममधिकं पृच्छति । सा तैत्तिरीयश्रुतिराह सादरं न्यासं प्रशस्ताखिलकर्मणां स्फुटम् । बालःश्छात्रः पुत्री च पाठं सुन्दरं पठति लिखति च । प्रदक्षिणं त्वं कुरु देवदेवम् । मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु । सर्वे जना भागवतीं कथां वारम्वारं शृण्वन्तु । भवान्वार्तां सविस्तरं कथयतु । तत्त्वं वद सविस्तरम् । शुकः कृष्णस्य चरितं विस्तरं सविस्तरं वा वर्णयति श्रावयति वा । सर्वं ज्ञात्वा यतिः पश्चाद्विप्रमूचे सविस्तरम् । स मां मिथ्या(मृषा) वदति । रामः कार्यं नूनं (अवश्यं) करोति । एवं सर्वत्र चिन्तनीयम् ।

विशेषः - यत्र विपूर्वकस्य स्तृधातोरप्प्रत्ययेन[1] निष्पन्नो विस्तरशब्दो ग्रन्थ-शास्त्र-वार्ता-शब्द-कथा-ब्रह्म-वाक्य-तृणानादिनां विस्तारेऽर्थे प्रयुज्यते । यथा-ग्रन्थविस्तरः, शास्त्रविस्तरः, वार्ताविस्तरः शब्दविस्तरः, कथाविस्तर, ब्रह्मविस्तरः वाक्यविस्तरः, तृणविस्तरः सविस्तरो गुणविस्तरश्चेत्यादयः । आयामेऽर्थे तु विस्तारः पठ्यते । यथा-पटस्य (वस्त्रस्य) विस्तारः । क्वचित्क्रियायाःसन्निधौ स्थितादव्ययक्रियाविशेषणात्पूर्वं सन्निधावनव्ययक्रियाविशेषमपि प्रयुज्यते - राजा तं सविनयं पुनरुवाच ।

ग) सकर्मकधातोः कर्तृवाच्यस्य तिङन्तक्रियायामनव्ययक्रियाविशेषणात्पूर्वं सन्निधावव्ययपदं प्रयुज्य वाक्यम्-सोऽतीव शीघ्रं भाषते (ब्रूते) लिखति च । स नूनं सत्वरं याति । अहं तमतीव स्पष्टं पश्यामि । स पुराणमतीव शीघ्रं पठति (अधीते) । कृष्णः कार्यमतीवाऽऽशु विधत्ते । सा कार्यमतीव अरं (शीघ्रं) करोति ।

घ) सकर्मकधातोः कर्तृवाच्यस्य तिङन्तक्रियायां द्विरावृत्तियुक्तमव्ययक्रियाविशेषणं प्रयुज्यते - १. वालो गृहं शनैः शनैर्गच्छति । वटुर्वेदं शनैः शनैः पठति । पिता पुत्रं पाठं मुहूर्मुहूः स्मारयति शिक्षयति वा । पुत्रो मातरं पुनः पुनः ब्रूते स्मरति वा । गुरुः शिष्यं व्याकरणं पुनः पुनः पाठयति (अध्यापयति) तथापि शिष्यो न पठति न स्मरति च । श्राद्धकर्ता ब्राह्मणान्मन्दं मन्दं (शनैः शनैः) भोजयेत् । विप्रो ब्राह्मणीं मन्दं मन्दं प्राह । शिक्षको बालकेभ्योऽक्षराणि शनैः शनैः शिक्षते । तथैव कर्मवाच्यस्य तिङन्तातिङन्तक्रियायामपि - भक्तैर्हरिर्नाम मुहूर्मुहूर्जप्यते । छात्रेण पाठोऽसकृत्पठ्यते । गुरुणा पाठो वारम्वारं प्रोक्तः । पण्डितेन पुराणं मुहूर्मुहूः श्रावितम् । हे पुत्र ! त्वं शनैःशनैर्गच्छ ।

ङ) सकर्मकाऽकर्मकधात्वोः कर्तृवाच्यस्य तिङन्तक्रियायामव्ययक्रियाविशेषणात्पूर्वं सन्निधावन्यमव्ययक्रियाविशेषणम्- त्वं निशङ्को भूत्वा मुहूर्मुहुर्वृथा नदसि । स विष्णुशर्मा तव पुत्रान्नूनं

---

[1] पा.सू.- ऋदोरप् ३।३।५७।

द्राक्प्रबुद्धान्करिष्यति । बालः पश्चाच्छनैः शनैर्याति । अहं पश्चाच्छनैः शनैरागच्छामि । पुत्रः पश्चाच्छनैरायाति । वानरः शमीवृक्षमारुह्य पक्षिणः कुलायं शतधा खण्डशोऽकरोत् । सहसा विदधीत न क्रियाः । स पश्चाच्छनैः शनैः परिवर्तते । वृक्षः पश्चाच्छनैः शनैर्वर्धते । एवमतिङन्तक्रियायामपि चिन्त्यम् ।

च) गत्यर्थधातोः क्रियायां क्रियाविशेषणम्- गत्यर्थकेभ्यो गम् व्रज् इण् या प्रपद् प्र+आप् आ+श्रि एभ्यः कृधातो श्च धातुभ्यः कर्तृवाच्ये तिङ भूतकर्तरि क्त[1] क्त[2]वतुभ्यां च प्रत्ययाभ्यां निष्पन्नायां क्रियायां नपुंसके स्थितं रक्षणार्थकमनव्ययक्रियाविशेषणं शरणमरणं[3] च प्रयुज्यते - स भगवन्तं शरणं गच्छति । त्वं कृष्णं शरणं गच्छ । अहं रामं शरणं गच्छामि । अहं त्वां शरणं व्रजामि (यामि) । व्रजामि शरणं हरिम् । सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । तमेव शरणं गच्छ सर्वभावेन भारत । निरालम्बो लम्वोदरजननि कं यामि शरणम् । ततोऽहं तं वेद्यं सततममलं यामि शरणम् । प्राप्ता वयं त्वां शरणं शरण्यम् । तमेकदन्तं शरणं व्रजामः । कं वा दयालुं शरणं व्रजेम । नहि त्वाहं हित्वा कमपि शरणं चान्यमगमम् । श्रीरामदूतं शरणं प्रपद्ये । शरणमहं रघुनन्दनं प्रपद्ये । धर्मः कं शरणं गतः । शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् । सत्यात्मकं त्वां शरणं प्रपन्नाः । भवन्तं (त्वां) परित्यज्याहं कमन्यं(अन्यं कं) शरणमाश्रये । अहं कृष्णं शरणं गच्छामि । शिष्यो गुरुं शरणं याति । त्वं तं शरणं याहि । तव पादौ साम्प्रतं मे शरणम् । अहमन्यं शरणं नाश्रये । अहं नान्यं शरणं यामि । श्रीरामचन्द्रं शरणं प्रपद्ये ।

अहं (कर्दमः) स्त्रीकामः सन् तव मनोरथपूरकौ चरणौ शरणं प्राप्तोऽस्मि । श्रीरामचन्द्रचरणौ शरणं प्रपद्ये । अजानती पतिं साध्वी अश्विनौ शरणं ययौ । नारायण करुणामय शरणं करवाणि तावकौ चरणौ । एवं क्त्वाल्यप्तुमुन्प्रत्ययान्तगौणक्रियायाः प्रयोगेऽपि शरणारणयोः प्रयोगो ज्ञेयः ।

३. कर्मवाच्यस्य तिङन्तक्रियायाः पूर्वं सन्निधावव्ययमनव्ययं च क्रियाविशेषणम् । कर्ता तृतीयान्तः । कर्म प्रथमान्तं प्रथमान्तानुसरं क्रियापदं च प्रयुज्यते ।

क) कर्मवाच्यस्य तिङन्तक्रियायामव्ययक्रियाविशेषणम् - रामेण ग्रामो दिवा गम्यते । विप्रैर्वेदाः सम्यग्पठचन्ते । एतानि पुस्तकानि अस्माभिर्नितरामपठचन्त । ज्ञानी अग्निसाद्दृश्यते । रमया ग्रामः श्वो गंस्यते । तेन वार्ता मृषा प्रोच्यते । तेन नक्तं (रात्रौ) नदी न गम्यते । द्विजेन नक्तं दिवा च वेदः पठचते हरेर्नाम च जप्यते । एवं सर्वत्र ज्ञेयम् ।

ख) कर्मवाच्यस्य तिङन्तक्रियायामनव्ययक्रियाविशेषणम् - छात्रेण गुरुः सादरं नम्यते प्रोच्यते च । भवता अतिथिः साधु पूज्यते । बालैः फलानि निश्चयं (अवश्यं) प्राप्यन्ते । स्वामिना भृत्यः क्षेत्रेऽवश्यं प्रेष्यते । अस्माभिर्विष्णुः शिवो दुर्गा लक्ष्मीर्वेदाः पुराणानि व्याकरणं च सादरं स्मर्यन्ते । शिष्येण गुरोश्चरणौ सादरं प्रणम्येते । सर्वेषु भारतीयदर्शनेषु उपनिषदां प्रभावः स्फुट(स्पष्टं)मवलोक्यते । भूयसि हि दूरे पर्वते वृक्षाः स्पष्टं न दृश्यन्ते । अकारादिवर्णः अङ्गभूतशिक्षाग्रन्थे स्पष्टं समुदीर्यते । एते समर्थेन नित्यं समस्यन्ते । सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते । मयि दूरीभूते गृहं स्पष्टं न दृश्यते । एवं शव्दशक्तिर्विपश्चिद्भिः साधु निरूप्यते ।

४) कर्मणि निष्पन्नायां कृत्यान्तक्रियायामव्ययमनव्ययं च क्रियाविशेषणम् अस्माभिर्विद्या कथमुपार्जनीया । प्रातः कमनीयम् । वेदः शनैः शनैः पठितव्यः । आत्मा सदा चिन्तनीयः । देवता प्रातः पूजनीया । भवता रमा साधु सेव्या । एतौ मन्त्रौ सस्वरं पूरणीयौ । त्वया हरिरवश्यं सेव्यः । पठने शव्दस्यावृत्तिरवश्यं करणीया । त्वया मया च कार्यमिदमवश्यं विधाताव्यम् । एते प्रयोगा यथाग्रन्थं

---

[1] गत्यर्थाकर्मक इति सूत्रेण क्तः ।

[2] निष्ठा इति सूत्रेण क्तवतुः ।

[3] अरणस्यार्थः शरणमेव ज्ञेयम् ।

समाधेयाः । सर्वैर्मानवैर्धर्मोऽवश्यमनुष्ठातव्यः, अनुष्ठेयो वा । द्विजैर्वेदा अवश्यमध्येतव्याः । तद्वाचकशब्दवृत्तिरवश्यं विधेया । ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरम् । केनापि विप्रेण क्षत्रियेण वैश्येन वा वेदा नित्यमवश्यं वा पठनीयाः । एते प्रयोगा विषया वा प्रमाणपुरस्सरं प्रतिपादनीयाः । ज्ञानस्य जिज्ञासुना पुस्तकं प्रतिदिनमवश्यं पठितव्यं, पठनीयं वा । सदा पुस्तकस्यावृत्तिरवश्यं कर्तव्या करणीया कार्या वा छात्रेण । अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।

५-क) कर्मणि निष्पन्नायां क्तान्तक्रियायामव्ययक्रियाविशेषणम्-स नीचैर्गतः । मूषको गृहेऽन्तः प्रविष्टः । भवताऽहं शं कृतः । मां प्रति त्वया समाचारो मृषा(मिथ्या) प्रोक्तः । मया भवान् शं कृतः । दैवो विस्तरशः प्रोक्त आसुरीं पार्थ मे शृणु । तेनायं दोषः स्वयं कृतः । भवाप्ययौ भूतानां श्रुतौ विस्तरशो (विस्तारपूर्वकं) मया ।

ख) कर्मणि निष्पन्नायां क्तान्तक्रियायामनव्ययक्रियाविशेषणम् - अयं विषयः पूर्वमेव प्रपञ्चितः । भूमे रचनाविशेषः पूर्वमेव वर्णितः । तेन क्षुद्रेण तौ पूर्णं विश्वसितौ । पाणिनिना सूत्रैःशब्दाः सविस्तरक्षु निरूपिताः । मयाऽस्यापराधो वारम्वारं सोढः । दर्शपूर्णमासौ प्रयाजाश्च परस्परं सम्बद्धाः सन्ति । चन्द्रः सूर्यो वाऽस्तं गतः । ततस्तौ राज्ञा सादरमवलोकितौ प्रणम्योपविष्टौ । सर्वैः सूत्रकारैर्मन्त्रब्राह्मणयोरुभयं वेदत्वं निःशङ्कमभ्युपगतम् । महाभारते राजधर्मविषयः सविस्तरं वर्णितः । ऋषिभिर्विभिन्ना देवता मन्त्रेषु साधु दृष्टाः । तया (राजकुमार्या) स कौलिको रात्रौ सविनयमभिहितः । एवं तैर्देवैः सादरं स्तुतो हरिस्तानुवाच । वेददीपे भाष्ये मन्त्राः सप्रसङ्गं सविस्तरं व्याख्याताः । गहने वेदकान्तारे स्वच्छन्दं विहरता जैमिनिकेशरिणाप्ययमेवाशयः साधु स्पष्टीकृतः ।

६) वाक्यान्ते कृत्यक्तान्तक्रिययोर्यथावसरमनुलोमविलोमक्रमेण सहैव प्रयोगः -अनुलोमः = क्रमः । विलोमः = विक्रमो वैपरीत्यं वा । १. मूढो योधावमन्ता च सुखं छेद्यो रिपुःस्मृतः । अहो विधेर्नैपुण्यम्, एते तिला अभोज्याःकृताः । २. सिज्लोप एकादेशे सिद्धो वाच्यः । बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः । कोऽपि सहजः शत्रुःप्रिये स्थितोऽपिच्छेद्यः ।

७) भावे निष्पन्नयोः कृत्यक्तान्तक्रिययोरव्ययमनव्ययं च क्रियाविशेषणम् - तेन शनैःशनैःकर्तव्यम् । त्वया सत्वरं मन्तव्यम् । तेन शनैरुक्तम् । तया शनैः शनैरभिहितम् । शृगालेन सादरमुक्तम् । शृगालेन सहर्षमुक्तम् ।

८) गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनजॄधातुभ्यो भूतकर्तरि निष्पन्नायां क्तान्तक्रियायामव्ययमनव्ययं च विशेषणम् - स शनैर्गतः सा शनैः शनैर्गता । सुखं प्राप्त-प्ता-प्तम् । प्रपन्नः, आपन्नः । पुत्रः सुखं स्थितः । पुत्री सुखमुषिता । कार्यं शनैर्जातम् । कार्याणि शनैः शनैर्जातानि । कार्यं शीघ्रं जातम् । साधुः सुखमासीनः । पुत्री सुखमासीना । पत्रं सत्वरं जीर्णम् । पत्राणि अविलम्वितं जीर्णानि । पुत्रोऽविलम्वितमागतः । पत्रं शनैः शनैर्जीर्णम् । प्राणिनः शनैः शनैर्जीर्णाः । भूतानि पत्राणि च शनैः शनैर्जीर्णानि । एवमन्येषां धातूनां प्रयोगाश्चिन्त्याः ।

९) शतृशानजादिगौणक्रियायामव्ययमनव्ययं च क्रियाविशेषणम् - कथावसाने निजलाभपूर्णःशुको भागवतं शनैः शनैः पठन् ऋषीणां सभायां समागतः । उपर्युपरि पश्यन्तः सर्व एव दरिद्रति । अधोऽधः पश्यतः कस्य महिमा नोपचीयते ॥ भगवतो नित्यं सेव्यमानस्य कालः सम्यग्याति । अहं साम्प्रतं कार्यक्रमं दृष्ट्वा प्रसन्नोऽस्मि । स व्याधः सुदूराज्जालापहारकाँस्तानवलोक्य पश्चाद्धावन् व्यचिन्तयत् । इति सहर्षमुच्चैः शंसन्तः सर्वेण जगता व्यालेकिषत । तस्मिँश्च सम्यगनिशं परिपुष्यमाणे । दुरिचयचमूर्निर्भरं भर्त्सयन्ती । सुखं शयाना निलये निजेऽपि नामानि विष्णोः प्रवदन्ति मर्त्याः । सुखं शयानं निलये च विष्णुं देवर्षिमुख्या मुनयः प्रपन्नाः ।

१०) क्त्वाल्यप्तुमुन्प्रत्ययान्तगौणक्रियासु अव्ययमनव्ययं च क्रियाविशेषणम् - कृत्वा प्रदक्षिणं देवं त्वं गच्छ । स भगवतः कथा विस्तरशः (विस्तारपूर्वकं) श्रुत्वा गृहे याति । त्वं शनैः शनैर्गत्वा (व्रजित्वा) वार्तां वद श्रावय वा । अहं वार्तां विस्तरतो विस्तरशो वा श्रोतुमिच्छामि । देवा असुरैः सह मिलित्वा समुद्रममन्थन् । पुत्री सखिभिः सह मिलित्वा गृहाद्विद्यालयमगच्छत् । शिवं प्रदक्षिणं कृत्वा दिनेशः स्वगृहं गतः । रामः प्रदक्षिणं कृत्वा पितरं रथमारुहत् । अथ दमनकः सत्वरं गत्वा साक्षेपं तमिदमाह । भुक्त्वा भोगान्यथाकर्मं देवीसायुज्यमाप्नुयात् । स श्रीमते वार्तां सविनयं निवेद्यागच्छत् । त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः । असौ राजा प्रसन्नमनाः सादरं तान्समर्प्य परां निर्वृत्तिमाजगाम । अनात्मीयं धनं पदार्थं वा मुहूर्तं क्षणमपि वा भोक्तुं कोऽपि न प्रभवति न लभते न प्राप्नोति वा न क्षमोः समर्थो न शक्तो वा । प्राज्ञो ह्यवाप्य धर्मार्थौ शक्नोति सुखमेधितुम् ।

११) पद्यवाक्यस्य क्रियायां क्रियाविशेषणम् - पद्यस्य वाक्ये यत्र कुत्रापि स्थलेऽव्ययमनव्ययं च किमपि क्रियाविशेषणं प्रयुज्यते । तद्विशेषणमर्थकाले क्रियापदात्पूर्वं[1] सन्निधावेव प्रयुज्यते - जोषं जोत्स्नीषु रात्रीषु विहरन्ति विलासिनः । शान्ता मिथः समासीना मन्त्रयन्ते महीभुजः ।

१२) अव्ययपूर्वकाः समस्तशब्दाः - सरामः सहरामः । सकृष्णः, सहकृष्णः । सपुत्रः, सहपुत्रः । सच्छात्रः, सहच्छात्रः[२] । सभृत्यः, सहभृत्यः । केवलं सहवासो न तु सवासः । संमुखः । ईषद्धनम् । बहिर्गृहम् । अभिमुखः । अतिधनः । द्राक्प्रबुद्धः । नानावर्णाः । अवश्यंभावी । सुष्ठुवचनम् । अन्तर्गृहम् । साक्षाद्रामः । साक्षात्कृष्णः । साक्षाच्छिवः । साक्षाद्देवी । साक्षाद्दुर्गा । साक्षाद्द्रष्टा । असमस्तशब्दाः- स्वयं रामः । स्वयं कृष्णः । स्वयं दुर्गा । स्वयं भगवती । स्वयं गणेशः । स्वयं हर्ता । स्वयं कर्ता । स्वयं हर्त्री । स्वयं कर्त्री । स्वयं धर्त्री ।

१३) नाम्नः पूर्वमव्ययविशेषणम्- नाम्नःपूर्वं यदाऽव्ययं प्रयुज्यते तदा श्लोकोऽयं स्मरणीयः "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति । उद्देश्ये प्रयुक्तमव्ययं केषामपि पुंस्त्रीनपुंसकलिङ्गानां नाम्नां कस्या अपि विभक्तेरेकवचने द्विवचने बहुवचने वा स्थिताद्विशेष्यात् (नाम्नः) पूर्वं प्रयुज्यते । तत्पदमुद्देयविशेषणं प्रोच्यते । क्रियायाःपूर्वं सन्निधौ प्रयुक्तं विशेषणं क्रियाविशेषणं भवातीति पूर्वमेव चर्चितम् । अत्र नामवाचकशब्दात्पूर्वं सन्निधौ प्रयुक्तं विशेषणं प्रदर्श्यते - वृथा (व्यर्थः) श्रमः, श्रमाः । वृथा श्रमम्, श्रमान् । वृथा श्रमेण श्रमैः । वृथा श्रमाय, श्रमेभ्यः । वृथा श्रमात्, श्रमेभ्यः । वृथा श्रमस्य, श्रमाणाम् । वृथा श्रमे, श्रमेषु इत्यादि । एवं द्विवचनेऽपि प्रयोगाश्चिन्त्याः ।

क) उच्चैः स्वरः स्वराः । नीचैः स्वरः स्वराः । उच्चैरुदात्तः । नीचैरनुदात्तः । एवमग्रे - उच्चैः कर्म, कर्माणि । सर्वशः कर्म, कर्माणि । सर्वशो मनुष्याः (मानवा जनाः) । स नूनं कार्यं करोति । तवाद्य कार्यं भवेत् । ह्यःकार्यमभवत् । नाना विद्या अविद्याश्च । भवतः श्वः कार्यं भविष्यति । तवान्येद्युः (अपरेद्युः) कार्यं स्यात् । रामः शनैः शनैर्गृहमगच्छत् । स स्वयं कार्यं करोति । त्वं घृतं पृथग्पात्रे स्थापय (निधेहि) । स आसने वस्तु(स्थातुं)-मितस्ततः स्थानमन्वेष्यति । वेदस्य पाठ उच्चैः स्वरेण कार्यः । तस्य नाना नामानि सन्ति । भक्तः स्वयं भगवतः पूजां विदध्यात् (कुर्यात्) । अतः परं स्वयं सक्षात्प्रत्यगात्मा न चेतरः । नूनं (निश्चयं) स लुब्धः । वृथा कर्म न कर्तव्यं मानवेन कदाचन । मयि जगत् मिथ्या प्रतीतिर्भवति । स्वयं रामः स्वयं कृष्णः स्वयं सीता स्वयं रमा । स्वयं रुद्रः स्वयं गौरी त्रायन्ते सकलं जगत् । ध्रुवं (निश्चयं) स आगमिष्यति । साक्षाद्धरिरागतः । स मिथ्या वार्तां कथयति । स सदा ओदनं पचति । भवान्सदा सत्यं वदति । त्वं सदाऽसत्यं वदसि । त्वं मुहूर्मुहूर्मां सत्यं भाषसे । इत्यादि ।

---

१ क्रियापदेन तिङन्तातिङन्तक्रिये स्मरणीये । अतिङन्तक्रियया कृत्यक्तक्तवतुक्त्वाल्यप्तुमुन्शतृशानजादिप्रत्ययान्ताः क्रियाः स्मरणीयाः ।

२ छे चेति तुक् चुत्वं च ।

ख) एकशः, एकैकशः, अनेकशः, शतशः, बहुशः(अधिकशः), सहस्रशश्चेत्यादयः शब्दा अव्ययाः सन्ति। यत एते क्वचिदेकवचने क्वचिद् बहुवचने वा स्थितस्य विशेष्यस्योद्देश्यविधेययो रूपे प्रयुज्यन्ते। देशेऽनेकशो रोगाः सन्ति । तान्निराकर्तुं निवारयितुं वा वयं यतामहे । देशेऽनेकशः समस्याः सन्ति । पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णकृतानि च ॥ अस्मिन्मेलापके शतशः सहस्रशः लक्षशः बहुशो वा जना आगता आसन् । तत्र कोटिशो धनानि जना वा सन्ति । कोऽपि कोटिशो लक्षशो वा धनान्यर्जयितुमपेक्षन्ते । इत्यादि । एवं शतशो जनान् । शतशो जनैः । शतशो जनेभ्यः २ । शतशो जनानाम् । शतशो जनेषु । एवमेकैकशः अनेकशः बहुशः सहस्रशश्चेत्यादयो ज्ञेयाः । एकैकशोऽङ्गानि धियाऽनुभावयेत् । सुपस्त्रीणि त्रीणि वचनानि एकैकशः एकद्विवचनबहुवचनसंज्ञानि स्युः । क्वचिद् एकश एकैकशो वा जनो ब्राह्मणो वा आगच्छतु । बहुशः सैन्यस्य वधः । मया सर्वैरुद्गीयमानं ते बहुशो यशः श्रुतम् । पैशुन्यं चापि सर्वशः । सोऽत्राधिकश आगच्छति । पुत्रः सर्वान्विषयान् अधिकशो जानाति । धाप्रत्ययान्तः - प्रकृतेर्दशधा शतधा सहस्रधा वा विकाराः सन्ति। परं तेऽसङ्ज्ञात्मानं न स्पृशन्ति यथा घनः (मेघः) गगनमिव ।

१४) विशेष्यतः पूर्वमनव्ययविशेषणम् - मयि ज्ञानस्य स्फुटं (स्पष्टं) प्रतीतिर्भवति । शिष्यः सप्रणय(सनम्र)मिदमाह । अथ तस्य ध्रुवं (निश्चयं) मृत्युर्भविष्यति । यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः। स तत्पादौ गृहीत्वा सप्रश्रयमिदं ब्रूते ।

१५) उद्देश्यविशेषणात्पूर्वमव्ययमनव्ययं च विशेषणम् - सोऽतीव सरलाः पुरुषः । इदमतीव मिष्टं फलम्। अयमतीव महान् देशः । इदमतीव रम्यं (सुन्दरं) वस्त्रमुद्यानं वाऽस्ति । अयमतीव सुन्दरो लेखः। इयमतीव सुन्दरी नारी । अयमतीव सुन्दरः पुरुषः। इदमतीव रमणीयं दर्शनीयं वा स्थलं चित्रं काव्यं पुष्पं नाटकं वाऽस्ति । इयमतीव मनोरमा भणितिः । इदमतीव सुन्दरं कथनम्। अत्यन्ता मधुरा वाणी श्रूयते सर्वदा मया । तस्यात्यन्तो मधुरः स्वरः। अत्यन्तं मधुरं पयः। अत्यन्तं मधुरं फलम्।

१६) विधेयविशेषणात्पूर्वमव्ययमनव्ययं च विशेषणम् । अनव्ययविशेषणं तु द्वितीयैकवचनान्तं प्रयुज्यते - स किं कुशलः । त्वं किं निपुणः । ते किं निरामयाः । भवन्तः किं कुशलिनः । अयं विषयो नितरामभिरामः । द्विशब्दो नित्यं द्विवचनान्तः । कतिशब्दो नित्यं बहुवचनान्तः । उभशब्दो नित्यं द्विवचनान्तः। सोऽतीव सुन्दरः । साऽतीव सुन्दरी । सोऽतीव कुशलः । साऽतीव कुशला । अयं बालो निश्चयं (ध्रुवं) सरलः । यः परस्परमहङ्कारः । रामोऽतीव निपुणः । तस्येदं स्फुटं वचः । तौ अतीव प्रवीणौ नरौ। तेऽतीव प्रवीणे नार्यौ ।। ते ता वाऽतीव कुशलाश्चतुराश्च जनाः ।

इति कर्मकारकम् ॥४-२॥

४-३ करणकारकम्

अस्मिन्कारके तृतीया कथं विधीयत इति चिन्तनीयो विषयः ।

स्वतन्त्रः कर्ता १।४।५४॥

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् । यः करोति स कर्ता । वाक्ये कर्ता स्वतन्त्रो भवति। यः स्वतन्त्रो भवति तत्प्रधानं ज्ञेयम्। सर्वत्र प्रधानानुसारं क्रियापदं चिन्त्यम्। कर्तृवाच्ये सदा तिङन्तेन क्तक्तवत्वन्तेन च क्रियापदेन कर्ता उक्तो भवति । उक्ते कर्तरि विहितायां क्रियायां स्वातन्त्र्येण विवक्षितस्योक्तस्या(अभिहितस्या)र्थबोधकशब्दस्यानेन स्वतन्त्रः कर्तेति सूत्रेण कर्तृसंज्ञायां ततः कर्तृसंज्ञाशब्दात् "प्रातिपदिकार्थ." इति सूत्रेण प्रातिपदिकार्थमात्रे प्रथमा भवति । ततः कर्ता प्रथमान्तः। यथा - स भवति। तौ भवतः। ते भवन्ति। त्वं भवसि। युवां भवथः। यूयं भवथ। अहं भवामि। आवां भवावः। वयं भवामः। १. भूधातोर्लट्लकारे तिङां त्रिषु पुरुषेषु निष्पन्नेषु क्रियापदेषु तद्युष्मदस्मच्छब्दानां प्रथमान्तकर्तारो येन विधिना प्रयुक्ताः । तथैवावशिष्टेषु लिडादिलकारेषु

प्रथममध्यमोत्तमपुरुषेषु क्रियापदेषु तद्युष्मदस्मच्छब्दानां प्रथमान्ताः कर्तारो वचनक्रमेण प्रयुज्यन्ते। अत्र स्मरणीयं यत् युष्मदस्मच्छब्दयोः प्रथमाविभक्ते रूपाणि विनाऽवशिष्टानां त्रिलिङ्गिनां शब्दानां प्रथमाविभक्ते रूपाणि अवशिष्टेभ्यो धातुभ्यः सर्वेषु लकारेषु प्रथमपुरुषे निष्पन्नासु क्रियासु वचनक्रमेण प्रयुज्यन्ते। यथा - स वसति तौ वसतः। ते वसन्ति। कृष्णः पश्यति। भक्तो वन्दते। व्यासो वदति। रमा नृत्यति। गौरी ब्रूते। रामकृणौ पश्यतः। शिष्यः स्नाति। बालः शेते। शुको ब्रवीति। सोऽवदत्। शिवावगमताम्। हरिः पठति। पिता जागर्ति। भक्ता भजन्ति-न्ते। इट् स्यात्। हल् भवति। राजानो युद्धचन्ते। कार्यमभवत्। कार्याण्यभवन्। २) एवं सर्वेषु लकारेषु मध्यमपुरुषे निष्पन्नासु क्रियासु युष्मच्छब्दस्य प्रथमान्तकर्तार उत्तमपुरुषे निष्पन्नासु क्रियासु अस्मच्छब्दस्य प्रथमान्तकर्तारश्च वचनक्रमेण प्रयुज्यन्त इति न विस्मरणीयम्।

साधकतमं करणम्[1] १।४।४२॥

क्रियासिद्धौ[2] प्रकृष्टोपकारकं[3] करणसंज्ञं स्यात्।

कर्तृकरणयोस्तृतीया २।३।१८॥

अनभिहिते (अनुक्ते) कर्तरि करणे च तृतीया स्यात्। कर्तृवाच्ये स्थितो य उक्तःकर्ता स कर्मवाच्ये भाववाच्ये चानुक्तः कर्ता भवति। ततोऽनेन सूत्रेणानुक्ते कर्तरि तृतीया विधीयते। ततोऽनुक्तकर्ता तृतीयान्तो भवति। कर्तृवाच्यस्य कर्मवाच्यस्य भाववाच्यस्य च क्रियायाः प्रयोगे करणवाचकाच्छब्दा(साधनवाचकात्)त्तृतीया भवति। कर्तृवाच्ये स्थितं कर्म कर्मवाच्ये परिवर्तनेनोक्तं भवति। ततः कर्मण्युक्ते "प्रातिपदिकार्थ." इति सूत्रेण प्रातिपदिकार्थमात्रे प्रथमा विधीयते। ततः कर्म प्रथमान्तं भवति। ततः कर्मप्रथमान्तानुसारं क्रियापदं प्रयुज्यते। सदा वाच्यपरिवर्तनेऽयमेव नियमः स्मरणीयः। कारकाणि उत्तरोत्तरबलक्रमेण प्रयुज्यन्ते। कर्मादीनामन्वयः सामान्येऽनुलोमेन विलोमेन वा विधेयः। वाक्ये प्रायेणादौ कर्ता पठचते। भावकर्मवाच्ययोर्निष्पन्नानां तिङन्तातिङन्तानां क्रियापदानां प्रयोगेऽनुक्ते कर्तरि करणे च विहितं तृतीयान्तपदं द्वयं भवत्येव। वाक्येऽनुक्तकर्तरि विहिता तृतीया तु प्रायेणादावेव पठचते।

१. कर्तृवाच्ये-रामो वाणेन रावणं हन्ति, जघान, अवधीत् हतवान्वा।
   कृष्णश्चक्रेण शिशुपालं व्यापादयति, व्यापादयञ्चकार, व्यापीपदत्;, व्यापादितवान् वा।
२. कर्मवाच्ये-रामेण वाणेन वाली हन्यते हन्तव्यः, हतः, हन्यमानः सुहनो वा। कृष्णेन चक्रेण शिशुपालो व्यापद्यते, व्यापादयितव्यः, व्यापादितः, व्यापाद्यमानो वा।
३. भावे - त्वया मया अन्यैश्च भूयते। मया नृत्यते शिष्येण स्नायते।
   पित्रा जागर्यते। बालः शय्यते।

कर्तृकर्मवाच्ययोः सहैव वाक्यानि - कर्तरि-रामकृष्णौ रथेन गोकुलं यातः यातवन्तौ यातौ - कर्मणि - रामकृष्णाभ्यां रथेन गोकुलं यायते यातव्यम्, यातम्, यायमानं वा। अक्रूरो रथेन गोकूलमयात्, यातः, यातवान् - कर्मणि - अक्रूरेण रथेन शेषं पूर्ववत्। ते पद्भ्यां शकटेन चतुश्चक्रिकया द्विचक्रिकया वायुयानेन वा नगरं यान्ति यातवन्तः, याताः - गच्छन्ति गताः, गतवन्तः, - यन्ति इतवन्तः, इताः - व्रजन्ति व्रजितवन्तः, व्रजिताः - प्रपद्यन्ते प्रपन्नवन्तः, प्रपन्नाः - प्राप्नुवन्ति

---

[1] यद्व्यापारा(व्यवहारा)नन्तरं कार्यस्य निष्पत्तिः (सिद्धिः) फलस्य प्राप्तिर्वा भवति येन कार्यं सिद्धचति वा तत्करणं ज्ञेयम्। तत्साधनमपि प्रोच्यते। उक्तञ्च - क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्षिते यदा यत्र करणं तत्तदा स्मृतम्॥

[2] क्रियायाः (कार्यस्य) सिद्धौ=सम्पन्नायाम्।

[3] अत्यन्तोपकारकम्।

प्राप्तवन्तः, प्राप्ता वा । जना नेत्राभ्यां मूर्तिं पश्यन्ति । पद्भ्यां मन्दिरं गच्छन्ति तत्र भगवन्तं भगवती च नमन्ति च । अहं चक्षुर्भ्यां गां पश्यामि । स कर्णाभ्यां कथां शृणोति । ते श्रोत्राभ्यां वार्तां शृण्वन्ति नासिकया गन्धं जिघ्रन्ति हस्तपादैर्नावा वा नदीं तरन्ति च । अहं हस्तपादैर्नावा वा नदीं तरामि । बालाः कन्दुकेन प्राङ्गणे (अजिरे) क्रीडन्ति क्रीडितवन्तः, खेलन्ति खेलितवन्तो वा । सर्पः कुक्षिबलेन भूमिं भूमौ वा सरति । जलेन पिपासाया निवृत्तिर्भवति । पथिकाः पद्भ्यां मार्गं हिण्डन्ते । सा मुखेन विलपति । भक्तः स्तोत्रैर्मन्त्रैःश्लोकैर्वा विष्णुं स्तौति । सगुणं ब्रह्म संसारे पद्भ्यां चलति (हिण्डते) कर्णाभ्यां दुःखं शृणोति, नेत्राभ्यां लोकमवलोकयति हस्ताभ्यां कार्यं करोति । विप्रो वेदवचनेन शिवं स्तौति । जना नावा नदीं तरन्ति तीर्णवन्तः, तीर्णा वा । स हस्तपादैर्नदीमतरत् । मानवा जलयानेन (पोतेन) सागरे यात्रां कुर्वन्ति । अहं पोतेन गङ्गां तरामि तीर्णवान्, तीर्णो वा । योगी ज्ञानी कोऽपि वा ज्ञानेन भवसागरं तरति तीर्णवान्, तीर्णो वा । यज्ञेन यज्ञमयजन्त देवाः । भवान्गन्धाक्षतपुष्पादिभिः शिवं विष्णुं दुर्गां लक्ष्मीं वा यजति-ते इष्टवान् वा । ब्राह्मणा यज्ञे पाद्यार्घगन्धपुष्पादिभिर्विष्णुं पूजयन्ति (अर्चन्ति अर्चयन्ति) यजन्ति वा । तैर्मम कार्यं न भवति न सिद्ध्यति वा । नारी दृषदि उपलेन तण्डुलान् पिनष्टि पिष्टवती वा - नार्या दृषदि उपलेन तण्डुलाः पिष्यन्ते पेष्टव्याः पेषणीयाः पिष्टा वा । नार्या उलुखले मुसलेन व्रीहीन्कुट्टयन्ति (अवहन्ति) । कृष्णः पाद्यादिभिः सुदाम्नं सदकरोत् । श्यामो मुद्गरेण असिना अस्त्रेण परशुना वा नारीकेलं भिनत्ति भिन्नवान् वा - श्यामेन मुद्गरेण नारिकेलं भिद्यते भिदेलिमम्, भेत्तव्यम्, भेदनीयम्, भेद्यम्, भिन्नम्, भिद्यमानं वा । हरिरेकयाऽङ्गुल्या चक्रमेकहस्तेन शङ्खमन्यहस्तेन कमलमितरेण करेण च गदां धरति-ते, धारयति-ते, धृतवान्, बिभर्ति, बिभृते, भृतवान्वा । ज्ञानेन शास्त्रेण वा बुद्धिर्निर्मलीभवति । सत्सङ्गेन परमेश्वरे विश्वासो भवति भगवत्कथायां परमात्मनि च रुचिर्भक्तिश्च वर्धते । त्वं योगेन ध्यानेन ज्ञानेन वा मनसो मलं निवारय । स जलेन शरीरं ज्ञानेन मनश्चित्तं वा पवते पुनाति पूतवान् वा । भवान् विचारेण विवेकेन ज्ञानेन वा तत्वं जानीयात् (विद्यात्) । श्रीरामचन्द्रचरणौ मनसा स्मरामि, श्रीरामचन्द्रचरणौ वचसा गृह्णामि । नाक्षतैरर्चये(पूजये)द्विष्णुं न तुलस्या गणाधिपम् । न दूर्वया यजेद्देवीं विल्वपत्रैश्च भास्करम् ॥ अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति । विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत । अहम्...... अस्मिन्शुभकर्मणि आचार्यकर्म कर्तुं चन्दनाक्षतपुष्पवस्त्रालङ्कारादिभिस्त्वां वृणे । भवान् ज्ञानेन वयसा स्थानेन च श्रेष्ठोऽस्ति । त्वं शास्त्रेण ज्ञानेन वा स्वकीयमाभ्यान्तरिकमज्ञानं निवारय नाशय वा । केनापि जनेन कर्मणाऽवश्यं फलं लभ्यते । भक्तो देवं वेदमन्त्रेण स्तोत्रेण श्लोकेन वा स्तौति । दिष्टचा (भाग्येन) दैवेन वाऽस्माकं कार्यमसिद्ध्यत् ।

प्रकृत्यादिभ्य उपसंख्यानम् = वा. = प्रकृत्यादिगणपठितेभ्यः शब्देभ्यस्तृतीया स्यात् । आकृत्या हि प्रकृत्यादिगणपठितशब्दा ज्ञेयाः । गवां पयःप्रकृत्या स्वभावेन वा मधुरम् । स प्रकृत्या स्वभावेन वा सुन्दरः । रमा स्वभावेन शान्ता । प्रायेण भवान्याज्ञिकः । स गोत्रेण गार्ग्यः । सा समेन विषमेन वा याति (एति गच्छति) । निसर्गेण रम्यमिदम् । रामः सुखेन दुःखेन वा गच्छति । स सा वा सुखेन दुःखेन वा संसारे जीवति । द्विद्रोणेन ध्यान्यं क्रीणाति । नाम्ना सुतीक्ष्णश्चरितेन दान्तश्च सः । नाम्ना रामोऽयम् । एष माठरेण पिङ्गलः । लक्ष्मण आकृत्या सुन्दरो वर्णेन गौरश्चास्ति । रामः क्षमया पृथ्वीसमः । दशसहस्ररूप्यकेण पशून्गृह्णाति स । शतेन रूप्यकैर्गौर्मिलति । शालिभिर्गोधूमानादत्ते रमा पार्वती लक्ष्मीर्वा । रामो वेदं सरलतया पठति । स त्वमहं भवान्वा प्रकृत्या मनोरमः । तौ युवामावां भवन्तौ वा स्वभावेन कोमलौ सरलौ वा । ते यूयं वयं भवन्तो वा प्रकृत्या (स्वभावेन) मनोरमाः । स संज्ञया (नाम्ना) कृष्णः । लक्ष्मीः प्रकृत्या चञ्चला । स स्वभावेन चञ्चलः । तदहं तेऽभिधास्यामि सावधानतया शृणु । भवान्भागवत्कथां सावधानेन शृणुयात् । त्वं सावधानेन (सावधानतया) वेदं पठ (अधीहि) धर (धारय) वद चिन्तय प्रसारय च । अहं सावधानतया कथां शृणोमि । ततो देवशर्मा तेषां त्रयाणां वृत्तान्तं

विस्तरेणाऽकथयत् । प्रकृत्या स कृपणः सा कृपणा वा । नाम्ना (संज्ञया) रामोऽहम् कृष्णोऽहं वा । त्वं सावधानेन सावधानतया वा ज्ञानं तत्त्वं वा विचारय कोऽपि विचारयेद्वा ।

दिवः कर्म च १।४।४३॥

दिवो धातोःसाधकतमं कारकं कर्मसंज्ञं स्याच्चात्करणमपि । अक्षैरक्षान्वा दीव्यति -अत्र धातुर्द्युतक्रीडाया अर्थे गृह्यते । अक्षः=पाशकः ।

अपवर्गे तृतीया २।३।६॥

अपवर्गः फलप्राप्तिः । तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् । अत्यन्तसंयोगः=निरवच्छिन्नसम्बन्धः । कालबोधकशब्दानां संग्रहः ४-२-९- अकर्मकधातुभिर्योगे. इति वार्तिकप्रसंग्रे द्रष्टव्यः ।

१. छात्रोऽह्ना क्रोशेन वाऽनुवाकमधीते अधीतवान्वा - छात्रेणाह्ना क्रोशेन वाऽनुवाकोऽधीयते अध्येतव्यः, अध्ययनीयः, अध्येयः अधीतो वा ।

२. रामो मासेन वर्षेण वा वेदान्तं पठति पठितवान्वा - रामेण मासेन वर्षेण वा वेदान्तः पठचते पठितव्यः, पठनीयः, पठितो वा । द्वाभ्यां मासाभ्यां वर्षाभ्यां वा । त्रिभिर्मासैर्वर्षैर्वा इत्यपि बोध्यम् ।

३. स द्वादशभिर्वर्षैर्वेदं समाप्स्यति समाप्तवान्वा - तेन द्वादशभिर्वर्षैर्वेदः समाप्स्यते समाप्तव्यः समापनीयः समाप्तो वा ।

४. व्यासस्त्रिभिर्वर्षैर्महाभारतमलिखत् लिखितवान् वा । विंशत्या दिवसैरिमं ग्रन्थमलिखत्सः । द्वादशभिर्वर्षैर्व्याकरणं श्रूयते ।

५. त्रिभिर्वषैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव पलमश्नुते ॥

६. द्वादशभिर्द्वादशभिर्वर्षैश्चत्वारो वेदाः पठचन्ते ।

सहयुक्तेऽप्रधाने २।३।१९॥

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । ..... सार्धं तु साकं सत्रा समं सह इत्यमरः ३।४।४॥ सहार्थेन सम्बद्धं पदं सदाऽप्रधानं भवति । क्रियाया निमित्तं पदं प्रधानं क्रियाया अनिमित्तं पदमप्रधानं च ज्ञेयम् । तस्मादनेन सूत्रेणाप्रधानात्तृतीया विधीयते - पिता पुत्रेण सह तीर्थमगच्छत्, गतवान्गतो वा। आचार्यः शिष्येण सह नदीं याति यातवान्यातो वा । सार्धं निजैः परिजनैः सखिभिश्च साकं सत्रा स्वया दयितया च समं च पुत्रैः । पूज्यैः सहर्षहृदयैश्च सह स्वकीयैःस्निग्धान्तराः सुकृतिनः समयं नयन्ति॥ रामः सीतया लक्ष्मणेन च सह वनमयात् । हनुमान् जाम्बवदादिभिः सह वने जानकीं मार्गयामास मार्गितवान्वा । अहं त्वया युवाभ्यां युष्माभिर्वा सह वने निवत्स्यामि । गुरुः शिष्यैः सममुद्याने भ्राम्यति भ्रामति भ्रान्तवान्वा । सूतः शिष्यगणैः सार्धं समायातो हरिं स्मरन् । सद्भिरेव सहाऽऽसीत सिद्भिःकुर्वीत सङ्गतिम् । सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ धर्मेण हिनाः पशुभिःसमानाः । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी । स तेन ताभ्यां तैर्वा सह मन्त्रयति । अहं तया ताभ्यां ताभिर्वा सह वार्तां करोमि कुर्वे विदधे वा । त्वया सह कार्यमस्ति । तृणानां सङ्गमो नास्ति कदापि वह्निना सह । हे भगवन् साधुभिः सह सङ्गतिर्भवतु न त्वसाधुभिः । पुत्री पुत्रो वा सखिभिः सह विद्यालयमगमत् । अनेन सह मम प्रयोजनं नास्ति । मया तया सह वार्ता कृता । मम तया सह वियोगोऽभवत् ।

वाक्येऽन्तर्निहितैः सहादिभिर्योगे तृतीया विहिता ज्ञेया - मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः । मूर्खाश्च मूर्खैः सुधियः सुधिभिः समानशीलव्यसनेन सख्यम् । स्वजनैः कलहश्च । बन्धुजनैःकलिः । उपकर्त्राऽरिणा सन्धिर्न मित्रेणापकारिणा । उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ भवान् तेन सङ्गतिं (सङ्गमं सङ्गतं वा) न कुर्यात् न कुर्वीत वा । सतां सद्भिःसङ्गः कथमपि हि पुण्येन भवति ।

येनाङ्गविकारः २।३।२०॥

येन विकृतेनाङ्गेन[1] अङ्गिनो विकारो[2] लक्ष्यते ततस्तृतीया स्यात् । सः अक्ष्णा काणः (अत्र अक्षि विकृतमङ्गमस्ति काणोऽङ्गी । तेन विकारेणाङ्गेनाङ्गी पुरुषः काणः प्रोच्यते । यतो विकृतादङ्गात्तृतीया विहिता । एवं सर्वत्र चिन्त्यम् । पादेन खञ्जः कर्णेन बधिरो हस्तेन विकलाङ्गो वा पुरुषः । स पाणिना कुणिरस्ति । अकेशैः खल्वाटो जनोऽयमस्ति । रमेशः कटचा कुब्जः, रमा कटचा कुब्जा च विद्यते । मानवश्चक्षुषा काणः कर्णेन बधिरश्च सः । पादेन खञ्जो वृद्धाऽसौ कुब्जा पृष्ठेन मन्थरा ॥

इत्थंभूतलक्षणे २।३।२१॥

कञ्चित्प्रकारकं प्राप्तस्य लक्षणे तृतीया स्यात् । लक्षणम् = चिह्नम् । येन चिह्नेन यः परिचीयते तदेव लक्षणं[3] ज्ञेयम् । लक्षणबोधकशब्दादनेन सूत्रेण तृतीया - जटाभिस्तापसः । जटा एव तापसस्य चिह्नम् । एवमन्येऽपि प्रयोगाः समाधेयाः - शिखया हिन्दुः, कुचेन शोधकारी, भस्मना शैवः, मृगचमर्कमण्डल्वादिभिर्ब्रह्मचारी, जात्या ब्राह्मणः, क्षत्रियोः, वैश्यः शूद्रो वा, सामर्थ्येन पराक्रमेण साहसेन वा वीरः (शूरः), पीतवस्त्रेण दण्डेन च यतिः, तिर्यक्पुण्ड्रेण शैवः, ऊर्ध्वपुण्ड्रेण वैष्णवः, त्रिशूलेन शिवः, दुर्गा वा, चक्रेण विष्णुः गजमुखेन गणेशः, षड्मुखेन कार्तिकेयः, चर्तुमुखेन ब्रह्मा, गाण्डीवधनुषा अर्जुनः, पुस्तकेन छात्रः, मुकुटेन राजा, सिन्दुरेण विवाहिता नारी, असिन्दुरेण अविवाहिता नारी(कुमारी) च मन्यते (बुध्यते ज्ञायते दृश्यते लभ्यते अस्ति विद्यते वर्तते) । अयं कमण्डलुना साधुः, वास्या तक्षाऽस्ति । राज्येन राजा राष्ट्रपतिर्वा । वटुरसौ ..... जटाभिर्ब्रह्मचारी वयसा षोडशवर्षदेशीयः कम्बुकण्ठश्चाऽऽसीत् । स्वरेण रामभद्रमनुकरोति । धनेन धनी । ज्ञानेन ज्ञानी इत्यादि ।

संज्ञोऽन्यतरस्यां कर्मणि २।३।२२॥

संपूर्वस्य जानातेर्धातोःकर्मणि तृतीया स्यात् । अनेनैकपक्षे तृतीया तृतीयाया अभावे द्वितीया - स पित्रा पितरं वा संजानीते ।

हेतौ २।३।२३॥

हेत्वर्थे तृतीया स्यात् । द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम् । द्रव्यादिषु द्रव्य-गुण-क्रिया गृह्यन्ते । करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च ।

क) द्रव्येण सह हेतुः - कुलालो दण्डेन घटं निर्माति निर्मीतवान् - कुलालेन दण्डेन घटो निर्मीयते निर्मातव्यो निर्मीतो वा । अत्र घटो द्रव्ये दण्डो हेतौ च । स दण्डेन चक्रेण च द्वाभ्यां घटं निर्माति । कुलालो दण्डेन चक्रं भ्रामयति ।

---

1 अवयवेन खण्डेन भागेन वा ।
2 विकृतिः ।
3 लक्षणं किमपि वस्तु पदार्थं वा बोधयति ।

ख) गुणेन सह हेतुः - पुण्येन गौरवर्णोऽस्ति - गौरवर्णो गुणे पुण्यं च हेतौ गण्यते । एवम् - गुणेन स महान् । रमा सीतरवादनेन त्वामतिशेते । सा रूपेण लक्ष्मीमतिक्रामति अतिक्राम्यति वा । स कर्मणा महान् । ब्रह्मचर्येण तपसा च स महान् ऋषिः मुनिर्वा ।

ग) क्रियाय सह हेतुः - पुण्येन हरिं पश्यति - पुण्येन हरिर्दृश्यते द्रष्टव्यः दृष्टो वा - अत्र दर्शनरूपक्रियाया हेतुः पुण्यं भवति । एवम् - यत्नेन लभते धनम् । अभ्यासेन विद्याऽऽयाति । विद्यया शास्त्रेण वा ज्ञानं वर्धते । आवृत्या वेदस्य स्मृतिर्भवति । शास्त्राभ्यासेन बुद्धिरेधते । वाचा कलहो जायते । भक्तो भक्त्या हरिं लभते - भक्तेन भक्त्या हरिर्लभ्यते । ज्ञानेन बुद्धिर्निर्मलीभवति । भक्त्या तपसा वा चित्तं निर्मलीभवति । विद्यया शुभकर्मणा वा यशो वितन्यते । स विद्यया शुभकर्मणा वा कीर्तिं वितनोति ।

घ) फले हेतौ - बालोऽध्ययनेन वसति - वासस्य हेतुरध्ययनं भवति । एवम् - बाल ओदनेन पयसा वा वसति । जनो जलेन वसति । इत्यादि । तादर्थ्यविवक्षायां चतुर्थ्यपि भवति । इह चतुर्थ्या सह तृतीया विकल्प्यते - अध्ययनाय वसति छात्रश्छात्रा च ।

गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका = यत्र पदस्यार्थमात्रेण क्रिया स्वतःप्रवर्तते तत्र सा क्रिया कारकव्यवस्थायां प्रयोजिका भवति । अर्थात् यत्पदं क्रियापदमिव विभक्तिञ्चोत्पादयितुं प्रभवति तत्पदं कारकव्यवस्थायां प्रयोजकं भवति ।

अत्रापिशब्देन श्रूयमाणक्रिया समुच्चीयते । श्रूयमाणक्रियया तिङ्कृत्यक्तक्तवतुखल्प्रत्ययान्ताः क्रियाः शतृशानजादिप्रत्यायान्ताःक्त्वाल्यप्तुमुन्प्रत्ययान्ताश्च गौणक्रिया अपि बोध्याः । आसां श्रूयमाणक्रियाणां प्रयोगे "कर्तृकरणयोस्तृतीता" इति सूत्रेण करणे या तृतीया विधीयते । सा सूत्रेण विहिता विभक्तिः कारकविभक्तिः प्रोच्यते । यथा - १. रामो रथेन ग्रामं गच्छति गतवान् गतो वा - रामेण रथेन ग्रामो गम्यते गन्तव्यः, गमनीयः, गम्यः, गतः, गम्यमानः, सुगमः, दुर्गमो वा २. रामो वाणेन रावणं हन्ति हतवान् - रामेण वाणेन रावणो हन्यते हन्तव्यः, हननीयः, हतः, हन्यमानः सुहनः, दुर्हनो वा । अत्र रथस्य वाणस्य च करणे विहिता तृतीया कारकविभक्तिर्ज्ञेया । इत्यादि ।

उच्यते यत् न केवलं श्रूयमाणक्रिया एव कारकविभक्तौ प्रयोजिका भवति किन्तु गम्यमाना[1]क्रियाऽपि । गम्यमानक्रियया अलम्, कृतम्, किम्, किमु इत्यादयः शब्दाः प्रोच्यन्ते । यत एभिः शब्दैर्योगे क्रियां विनाऽपि कारकविभक्तिर्विधीयते । ततोऽपि वाक्यं सिद्धं ज्ञेयम् । यथा -

१. अलं श्रमेण = श्रमेण साध्यं नास्ति । इतोऽधिकश्रमेण व्यर्थम् (वृथा) ।
अलं विस्तरेण = विस्तरेण साध्यं नास्ति । इतोऽधिकविस्तरेण व्यर्थम् (वृथा) ।
अलं विवादेन = विवादेन साध्यं नास्ति । इतोऽधिकविवादेन व्यर्थम् (वृथा) ।

अलं महीपाल तव श्रमेण । तव यत्नेन (प्रयासेन) अलम् । भो बलीवर्द ! अलमनया शङ्कया । अलमत्यन्तकोपेन तात मन्युमिमं जहि । अलं प्रजाभिः सृष्टाभिरिदृशीभिः सुरोत्तम ॥ तदिदानीं गृहनरकवासेनाऽलम् । अवयोरुत्तरोत्तरेण विवादेनाऽलम् । एतादृशेन कार्येण, एतादृशा चिन्तनेन, एतादृशा पठनेन, एतादृश्या दृष्टया, एतादृशा प्रयत्नेन वा अलम्= व्यर्थम् । अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः । अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥ एवं प्रसङ्गादत्रालंशब्दस्य व्यर्थमित्यर्थः क्रियते ।

२. परिच्छिन्नेऽर्थे = खण्डे खण्डेऽर्थे

शतेन शतेन वत्सान्पाययति = एकैकेन शतेन वत्सान्पाययति ।

---

[1] सोमनाथ सिग्देलः - प्रतिसंस्कृता सि.कौ. पूर्वार्धे. पृ. १६१ - गम्यां (साधनक्रियां) प्रति श्रमःकारणम् ।

३. ऋते = विना = छोडेर, नभइकन - छोडकर, विना
न ह्यृतेऽर्थेन वर्तेते धर्मकामाविति श्रुतिः (वदति)।

४. शास्त्रेषु कृतम्, कार्यम्, प्रयोजनम्, किं प्रयोजनम्, किम्, किमु, कोऽर्थः, को धन्यः, कः पुण्यवान्, को लाभः, का प्रीतिः, कुतो मुक्तिश्चेत्यादिशब्दैर्योगे तृतीया विहिता लभ्यते। एषां प्रयोगे ध्यानं देयम्।

क) कृतमिति निवारणनिषेधयोरिति गणव्याख्याने। कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठचते। कृतम् = व्यर्थम्-विवादेन कृतम्। बहुजल्पनेन कृतम्। रे लोकाः कृतं चेष्टितैः। अस्माकमस्ति न कथञ्चिदिहावकाशं तस्मात्कृतं चरणपातविडम्बनाभिः। द्विषता विहितं त्वयाऽथवा यदि लब्धा पुनरात्मनः पदम्। जननाथ तवानुजन्मना कृतमाविष्कृतपौरुषैर्भुजैः॥

ख) कार्यम् - दन्तस्य निष्कोषणकेन राजन् कर्णस्य कण्डूयनकेन वापि। तृणेन कार्यं भवतीश्वराणां किमङ्ग वाग्घस्तवता नरेण॥ न मे कार्यं गुप्तधनेन। स्मर कार्यं न मे नाथ जीवितेन त्वया विना।

ग) प्रयोजनम् - तव सङ्गमेन मे न प्रयोजनम्। देवपादपानां सेवकैर्न प्रयोजनम्। न मे सांसारिकवैभवेन प्रयोजनम्। यदि तेऽभक्षितेन धनेन प्रयोजनम् ततस्त्वामपि गुप्तधनं करोमि। अथवा ते दत्तभोग्येन धनेन प्रयोजनम्, तदुपभुक्तधनं करोमि। राज्ञामुत्तममध्यमाधमैः सर्वैरपि प्रयोजनम्।

घ) किं प्रयोजनम् - गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम्। मया किं ते प्रयोजनम्। मुग्धे! मम चिन्तया तव किं प्रयोजनम्। त्वया किं मे प्रयोजनम्। अस्माकमनेन सङ्गेन किं प्रयोजनम्।

ङ) किम् = किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि - इति मेदिनीकोषः। किं पृच्छायां जुगुप्सने इत्यमरः। किं वानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्। किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा। किं विद्यया किं तपसा किं त्योगन श्रुतेन वा। किं विवेकेन मौनेन स्त्रिभिर्यस्य मनो हृतम्॥ किं धनैर्धनदैर्वापि कामैर्वा कामदैरुत। मृत्युना ग्रस्यमानस्य कर्मभिर्वोत जन्मदैः॥ किं मोहतो रक्षितेन सुपुष्टेन बलीयसा। अध्रुवेण शरीरेण शुकशास्त्रकथां विना॥ किं बहुना। बहुनोक्तेन किम्। मूर्खेण पुत्रेण किम्। अविवेकेन भृत्येन किम्। अविवेकिना स्वामिना अस्माभिः किं क्रियते। भक्तेनासमर्थेन सेवकेन किम्। तव मम चानेन व्यापारेण किम्। बहुना किमिहोक्तेन शृणु नारद तत्त्वतः। अथवा बहुनैतेन किं ज्ञानेन तवार्जुन। किं चन्दनैः सकर्पूरैःस्तूहिनैः किञ्च शीतलैः। सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीम्॥ कि तया क्रियते धेन्वा या न सूते न दुग्धदा। काणेन चक्षुषां किं वा चक्षुपीडैव केवलम्। किं तया क्रियते लक्ष्म्या या वधूरिव केवला। विवेकेन भवेत्किं मे पुत्रं देहि बलादपि। तेन किं वद। अहो वृथाजल्पनेन किम्। अस्माकमनेन व्यापारेण किम्। तत्तेन वृथास्वामिना किम्। वृथाऽटनेन किम्। विना वृथा वा प्रयासेन श्रमेण परिश्रमेण वा प्राप्तेन धनेन किम्। अमृतस्य प्रवाहैः किं कालक्षालनवैभवैः। चिरान्मित्रपरिष्वङ्गो योऽसौ मूल्यविवर्जितः॥ धनेन किं यो न ददाति नाश्नुते, बलेन किं यश्च रिपून्न बाधते। श्रुतेन किं यो न च धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो भवेन्॥ लोभश्चैदगुणेन किं पिशुनता यद्यस्ति किं पातकैः सत्यं चेत्तपसा च किं शुचिमनो यद्यास्ति तीर्थेन किम्। सौजन्यं यदि किं बलेन महिमा यद्यस्ति किं मण्डनैः। सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना॥ वृथा कर्मणा किम्। सत्यां क्षितौ किं कपिशोः प्रयासैर्बाहौ स्वसिद्धे ह्युपवर्हणैः किम्। सत्याञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः॥ श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः। संक्षेपात्कथ्यते धर्मो जनाः किं विस्तरेण वः। मम देहस्यार्धेन किम्। इत्यादि। अत्र तु किं क्रियाविशेषणम् - किमुद्यमैः

करिष्यन्ति देवाः समरभीरवः । चिराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् । रुद्धा गुहाः किमुजितोऽवति नोपसन्नान् कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ॥

च) किमु किमुत चैतौ प्रश्ने तर्के चार्थे स्तः - किमु जपैश्च तपोभिरुताध्वरैरपि किमुतमतीर्थनिषेवणैः । किमुत शास्त्रकदम्बविलोकनैर्भजत रे मनुजाः कमलापतिम् ॥ अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना । किमु वैदैश्च शास्त्रैश्च किमु मन्त्रैः किमौषधैः ॥ किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि । व्रीडा चेत्किमु भूषणैः ।

छ) कोऽर्थः - वद कोऽर्थो विवादेन फलं नो लभ्यते यदि । कोऽर्थः शुष्कविवादेन यदि धर्मो न रक्ष्यते । कोऽर्थस्तेषां पार्थिवस्याश्रयेण । अज्ञानावृतचेनसामतिरुषां कोऽर्थस्तिरश्चां गुणैः । कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः । काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥ मम मूर्खेण भृत्येन कोऽर्थः ।

ज) को धन्यः - को धन्यो बहूभिः पुत्रैः कुशूलापूरणाढकैः । वरमेकः कुलालम्बी यत्र विश्रूयते पिता ॥

झ) कः पुण्यवान् - कुकर्मणा कः पुण्यवान् भवेत् । कुकर्मणा कुप्रयासेन वा कः फलं लभते लाभं प्राप्नोति वा ।

ञ) को लाभः - अनेन कर्मणा प्रयासेन वा को लाभः स्यात् ।

ट) का प्रीतिः - गृहपत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः । विषयाधारविवक्षायां तु सप्तमी - विषयेषु का प्रीतिर्मानवानाम् ।

ठ) कुतो मुक्तिः - अकृत्वा दृश्यविलयमज्ञात्वा तत्त्वमात्मनः । बाह्यशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृ(नृ)णाम् ॥

५. शून्यः, हीनः, ऊनः, न्यूनः, उत्कृष्टः, उत्कृष्टतमः, उत्तमः, अत्युत्तमः, सहितः, रहितः, प्रत्ययः, युतः, संयुतश्चैभिर्योगे तृतीया विधीयते -

क) शून्यः - प्रजादुःखेन शून्योऽहं प्राणान्त्यक्तुमिहागतः । विचारेण विवेकेन ज्ञानेन वा शून्यो जनःकिमपि न जानाति न स्मरति किमपि कर्तुं न प्रभवति च । ज्ञानेन शून्या नारी किं करोति ।

ख) हीनः - धर्मेण हीनाः पशुभिः समानाः । विद्यया विहीनो जनः समाजेऽसभ्योऽन्धो जढश्च भवति प्रोच्यते वा । धनेन हीनं नरं कोऽपि नाद्रियते ।

ग) ऊनः (न्यून) - ऊनाः किलैकेन मता दशग्रहाः । षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः ॥ एकेन द्वाभ्यां त्रिभिः पञ्चभिर्वा ऊना संख्या ऊना जना वा । स पादेन ऊनोऽस्ति । न्यूनः - त्वं वा मृणालधवलः पादैर्न्यूनः पदाचरन् । अयं पादेन न्यूनोऽस्ति । एष स वा पादाभ्यां पादैर्वा न्यूनो विद्यते ।

घ) उत्कृष्टः - स स्थानेन वयसा कर्मणा विद्यया ज्ञानेन योग्यतया वा उत्कृष्टः, उत्कृष्टतमः, उत्तमः, अत्युत्तमो वा जनोऽस्ति ।

ङ) रहितः सहितः - धनेन रहितो जनः किं विधत्ते । विद्यया धनेन च सहितो जनः किं न विधत्ते (करोति) ।

च) प्रत्ययः(विश्वासः) - तव शपथैर्न विश्वासः । शपथैस्तव विश्वासं वयं न कुर्मः ।

ज) क्षयः = भोगेन कर्मणां क्षयो भवति । अकर्मणा फलं नष्टं यतःकर्म सदा कुरु । अनभ्यासेन विद्या नश्यति क्षयति विस्म्रियते वा ।

झ) युतः संयुतः - उवाच नारदं रामः प्रीत्या परमया युतः । शुभदिने गीतवाद्यादिभिः संयुतः । सूर्यो भौमेन संयुतः । चन्द्रः शुक्रेण संयुतः ।

अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया = वा. = वैदिकमार्गानुयायिनः शिष्टास्तद्विपरीता अशिष्टाः । अशिष्टव्यवहारे दाण्धातोः प्रयोगे चतुर्थ्यर्थे तृतीया भवति । कामुको दास्या मालां यच्छते - अशिष्टव्यवहारे धातुरात्मनेपदे प्रयुज्यते शिष्टव्यवहारे तु परस्मैपदे । यथा भार्यायै (पत्न्यै) मालां संयच्छति(ददाति) पतिः ।

परिशिष्टोदाहरणानि

१. कर्तृवाच्ये - जनो जलेन शरीरं ज्ञानेन च चित्तं पुनाति (पुनीते पवते शोधयति वा) । द्विजो जलेन देहं ज्ञानेन चित्तं मार्जयति । नारी अद्भिस्तण्डुलान्प्रक्षालयति । रामो हस्ताभ्यां पात्रं गृह्णाति । सूर्यस्य प्रकाशेनान्धकारो (तमः) नश्यति (अपैति) । ज्ञानेन चित्तशुद्धिर्भवति बुद्धिनिर्मला च । स जलेन हस्तौ पादौ मुखं च प्रक्षालयति त्वं प्रक्षालयसि, अहं प्रक्षालयामि वा । छात्रा हस्तकन्दुकेन पादकन्दुकेन वा क्रीडाक्षेत्रे (क्रीडाभूमौ) क्रीडितुं यान्ति, यन्ति । ऋत्विक् प्रणीतापात्रस्य जलेन यज्ञपात्राणि प्रोक्षेत् । अहं जलेन हस्तौ पादौ मुखं च प्रक्षालयामि । भक्तो भक्त्या पाद्यार्घ्यगन्धाक्षतपुष्पादिभिर्हरिमाराधयति अर्चति अर्चयति पूजयति यजति-ते वा । हरिः ॐतत्सत् ३ ॐ विष्णुः ३ श्रीमद्भगवतो महापुरुषस्य .... अमुकगोत्रोत्पन्नः अमुकशर्माऽहं .... करिष्यमाणेऽमुककर्मणि वेदपाठं कर्तुं गन्धाक्षतपुष्पवस्त्रादिभिर्वेदपाठकत्वेन त्वां युवां युष्मान्वा वृणे । विष्णुर्योगनिद्रया समुद्रे शेते । विद्यया विन्दतेऽमृतम् । विद्ययाऽश्नुतेऽमृतम् ।

देवकीनन्दनः कृष्णो गीतापाठेन तुष्यति । लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्मणा । मूर्खं छन्दानुरोधेन याथातथ्येन पण्डितम् ॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्विषान् । प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ यः प्रीणयेत्सुचारितैः पितरं स पुत्रः । गावो गन्धेन पश्यन्ति वेदैः पश्यन्ति वै द्विजाः । चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः । श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः ॥ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके । घण्टास्वेनन नः पाहि चापज्यानिःस्वनेन च ॥ इन्द्रियाणां निरोधेन रागद्वेषक्षयेन च । अहिंसया च भूतानाममृतत्त्वाय कल्पते ॥ आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि । पितृन्श्राद्धैश्च नृनन्नैर्भूतानि बलिकर्मणा ॥ वासन्तैः शारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशाँश्चरुँश्चैव विधिवन्निर्वपे(दद्यात्)त्पृथक् ॥ मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा । एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ॥ मधुना पायसेनैव स देवाँस्तर्पयेत् द्विजः । पितृन्मधुघृताभ्यां च ऋचोऽधीते तु चान्वहम् ॥ यजूँषि शक्तितोऽधीते योऽन्वहं स घृतामृतैः । प्रीणाति देवानाज्येन मधुना च पितृन्तथा ॥ स तु सोमघृतैर्देवाँस्तर्पयेद्योऽन्वहं पठेत् । सामानि तृप्तिं कुर्याच्च पितृणां मधुसर्पिषा ॥

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन । योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥ यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दीव्यैः स्तवैर्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः । ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ ब्रह्मानन्दरसानुभूतिकलितैः पूतैः सुशीतैः सीतैर्युष्मद्वाक्कलशोज्झितैः श्रुतिमुखैर्वाक्यामृतैः सेचयः । सन्तप्तं भवतापदावदहनज्वालाभिरेनं प्रभो धन्यास्ते भवदीक्षणक्षणगते पात्रीकृताः स्वीकृताः ॥ एवमेव कर्तरि क्तक्तवतुप्रत्ययाभ्यां निष्पन्नायाः क्रियायाः प्रयोगाश्चिन्त्या : ।

२-क) कर्मवाच्यस्य तिङन्तक्रियापदानां वाक्यम् - केनापि जनेन सुकर्मणा फलं लभ्यते। जनेन जनाभ्यां जनैर्वा चक्षुर्भ्यां नाटकं दृश्यते कर्णाभ्यां गीतं श्रूयते । पद्भ्यां द्विचक्रिकया चतुश्चक्रिकया केनापि यानेन वा ग्रामो नगरं वा गम्यते । धीवरेण नावा नदी तीर्यते । अस्माभिरेतानि प्रमाणानि स्वीक्रियन्ते (उररीक्रियन्ते अङ्गीक्रियन्ते) । गुरुणाऽऽपणे रूप्यकैः पुस्तकानि क्रीयन्ते । भक्तेन गन्धाक्षतादिभिर्देवाःपूज्यन्ते । वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् । वायुना नीयते मेघः पुनस्तेनैव नीयते । मनसा कल्प्यते बन्धो मोक्षस्तेनैव कल्पते ॥ हृद्गाभिःपूयते विप्रः कण्ठगाभिस्तु भूमिपः । वैश्योऽद्भिः प्राशिताभिःस्तु शूद्रः स्पृष्टाभिरन्ततः ॥ सम्यग्दर्शनसम्पन्नः कर्मभिर्न स बध्यते । वैदहकेन त्वाम्बष्ठ्यांमुत्पन्नो वेण उच्यते। तीर्थादिसेवनमहो विधिना हि नाथ नाकारि येन मनसो मम शोधनं स्यात् । वसुमतीपतिना न सरस्वती बलवता रिपुणाऽपि न नीयते । समविभागहरैर्न विभज्यते विबुधबोधबुधैरपि सेव्यते ॥ इति सहर्षमुच्चैः शंसन्तः सर्वेण जगता व्यालोकिषत । व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः। निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः । तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥

२-ख) कर्मप्रथमान्तानुसारं विधेयाविशेषणरूपे स्थितं कृत्यान्तपदं सदा वाक्यान्ते प्रयुज्यते तिष्ठति वेति न विस्मरणीयम् । वाक्ये कर्ता तृतीयान्तः । कर्म प्रथमान्तम् । प्रथमान्तानुसारं क्रिया चिन्त्या - मुमुक्षुणा आत्मा वा अरे द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निधिध्यासितव्यश्च । सदा सर्वात्मभावेन सेवनीयो व्रजेश्वरः । श्रवणेनापि यो न लभ्यः । केनापि ईश्वरो ध्यातव्यः । छात्रेण पाठः पठनीयः । पुरुषेण नारी संरक्षितव्या । सदा सर्वात्मना कृष्णः सेव्यः कालादिदोषनुत् । कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा । त्वया यद्वक्तव्यं तदुच्यताम् । अहं सर्वैर्वेदैर्वेद्योऽस्मि । अहं सर्वैः पूज्यः। अतिथिः केनापि पूजनीयः पूज्यो वा । स त्वमहं भवान्वा सर्वैर्ज्ञेयः । स स्तुत्योऽस्ति । त्वया पुस्तकं पठनीयमास्ति भवता वा । स्थलं दर्शनीयं वर्ततेऽस्माभिः । इत्यादि । उद्देश्यविशेषणे प्रयुक्ते तु विशेष्यात्पूर्वमेव तत्पदं प्रयुज्यते । यथा - तेन श्राव्यः समाचारः श्रूयते । शिष्येण विप्रेण वा पठनीयो वेदो पठ्यते ।

२-१- द्वितीयायां विधेयरूपे प्रयुक्तं कृत्यान्तपदम् - ध्येयं वदन्ति शिवमेव हि केचिदन्ये शक्तिं गणेशमपरे तु दिवाकरं वै । तत्पुस्तकं नाटकं स्थलं वा दर्शनीयं (आलोकनीयम्) सर्वे ब्रुवन्ति । ते त्वया मया च संस्कृतभाषां च पठनीयां भाषन्ते । जना ब्राह्मणेन क्षत्रियेण वैश्येन च स्वगृहं गमनीयं (गम्यं) गदन्ति (अभिदधति) । २- उद्देश्यरूपे प्रयुक्तं द्वितीयान्तं कृत्यान्तपदम् - स मान्याञ्जनान्मानयति वन्द्यान्पुरुषान्वन्दते च । केचन अभक्ष्यं पदार्थं खादन्ति अपरेऽकृत्यं कर्म कुर्वन्ति। अकृत्यं मन्यते कृत्यमगम्यं मन्यते सुगम् । अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो जनः ॥ अनिन्द्यमपि निन्दन्ति स्तुवन्त्यस्तुत्यमुच्चकैः । स्वापतेयकृते मर्त्या किं किं नाम न कुर्वते ॥ यच्छ्रोतव्यं च ज्ञातव्यं यत्कर्तव्यं च नृभिः प्रभो । स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥ प्राप्तव्यमर्थं लभते मनुष्यः। एवं वाक्ये विशेष्यानुसारं विचार्य तृतीयादिष्वपि कृत्यान्तपदं प्रयुज्यते ।

३-क) भूतकर्मणि निष्पन्नं क्तान्तपदं विशेषणं भवत्येव । वाक्यान्ते प्रयुक्तमेतत्पदं विधेयविशेषणं क्रियापदं चेभे बोध्ये - १. मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । अस्मद्देशस्य साहित्यं युद्धगाथाभिः परिपूरितम् । असौ मया हतः शत्रुः । तेन ब्राह्मणेन भिक्षार्जितैर्भुक्तशेषैः सक्तुभिः कलशः परिपूरितः । रामः कृष्णो वा सर्वैर्देवैः सर्वैजनैर्वा पूजितः । गात्रं सङ्कुचितं गतिर्विगलिता दृष्टिश्च नाशङ्गता। ईश्वरः सर्वैर्जनैरनुध्यातः । विद्वद्भिःसेवितः सद्भिर्नित्यमद्वेषरागिभिः । हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥ त्वया खलुपुराणानि सेतिहासानि चानघ । आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ इदानीं दिष्ट्या(भाग्येन) नः प्रयोजनं सिद्धम् । २. उद्देश्यविशेषणे स्थितं तत्पदं विलोकनीयम् -

कर्मेन्द्रियैः पञ्चभिरञ्चितोऽयं प्राणो भवेत्प्राणमयस्तु कोशः । दर्शनेन विहीनस्तु संसारं प्रतिपद्यते । कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः । सौमित्रिणा स्पृष्ट उदारबुद्धिना रामः कथा प्राह पुरातनीः शुभाः । राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूः पुण्यताकारणः । लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् ॥ शस्त्रैर्हता नहि हता रिपवो भवन्ति प्रज्ञाहतास्तु रिपवो सुहता भवन्ति । एवं सर्वत्र विचारणीयम् । द्वितीयादिषूद्देश्यविशेषणरूपे प्रयुक्तं क्तान्तपदमधः प्रस्तूयते - सदा विचारणीयाम् ।

ख) उद्देश्ये प्रयुक्तं द्वितीयान्तं क्तान्तपदम् - भाग्येन लब्धं फलं भुनज्मि । दुःखेन लब्धं पुत्रं दृष्ट्वाऽऽनन्दितोऽस्मि । त्रिभिर्गुणमयैर्भावैरेभिःसर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥

ग) उद्देश्ये प्रयुक्तं तृतीयान्तं क्तान्तपदम् - केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः । स्मरता धृतियुक्तेन विपाकं निजकर्मणाम् ॥

घ) उद्देश्ये प्रयुक्तं चतुर्थ्यन्तं क्तान्तपदम् - एतैर्दोषैर्विहीनाय ब्राह्मणाय प्रियाय च । साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषिताम् ॥ वस्तुभूषणगन्धाद्यैः पूजिताय यतात्मने । आचार्याय सुधीर्दत्वा मुक्तः स्याद्भवबन्धनैः ॥

ङ) उद्देश्ये प्रयुक्तं पञ्चम्यन्तं क्तान्तपदम् - रक्षिताद्धर्मादस्माकं रक्षा भवति । उदितात्सूर्यादन्धकारमपैति । प्रज्वलिताद्दीपाद्रात्रौ पदार्था दृश्यन्ते । प्रज्वलिताया विद्युतो वयं मार्गं पश्यामः । पतितादृक्षादिन्धनानि भवन्ति ।

च) उद्देश्ये प्रयुक्तं षष्ठयन्तं क्तान्तंपदम् - संचितस्यापि महता वत्स क्लेशेन मानवैः ॥ यशसस्तपसश्चैव क्रोधो नाशकरः परः ॥ विषदग्धस्य भक्तस्य दन्तस्य चलितस्य च । अमात्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् ॥

छ) उद्देश्ये प्रयुक्तं सप्तम्यन्तं क्तान्तपदम् - बुधैस्त्यक्ते राज्ये नहि भवति नीतिर्गुणवती । रजनीचरनाथेन खण्डिते तिमिरे निशि । यूनो मनांसि विव्याध दृष्ट्वा दृष्ट्वा मनोभवः ॥ ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ । माधवः पाण्डवश्चैव दीव्यौ शङ्खौ प्रदध्मतुः ॥ कर्त्राऽवित्रा प्रवक्त्रा च भवता मधुसूदन । त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ॥

ज) उद्देश्ये प्रयुक्तं सम्बोधनान्तं क्तान्तपदम् - कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाऽऽम्बिके । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

३. वर्तमानकर्तरि धातोर्लटः स्थाने विहिताभ्यां शतृशानच्प्रत्ययाभ्यां निष्पन्नयोर्गौणक्रियापदयोस्तृतीयायाः प्रयोगः । गौणक्रियायां कारकस्य प्रयोगनियमः ४-२-१३ "गौणक्रियापदानि" शीर्षके समुल्लिखितः । तत्रैव द्रष्टव्यः - अहं मुखेन स्तोत्रं पठन् नदीं प्राविशम् । जलेन वृक्षान्सिञ्चन् समायातोऽस्मि । अनेन विधिना देहं साधयन्विजितेन्द्रियः । ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥ सा च तान्प्रहितांस्तेन चूर्णयन्ती शोत्करैः । उवाच तं मदोद्धूतमुखरागकुलाक्षरम् ॥ कोऽपि सिंहस्कन्धाधिरुढां त्रिभुवनमखिलं तेजसा पूरयन्तीं देवीं ध्यायेत् । भक्तः पाद्यार्घ्यगन्धाक्षतपुष्पादिभिरीश्वरं पूजयन् (अर्चन् अर्चयन् आराधयन् वा) कालं नयति (यापयति, गमयति, अतिवाहयति) । स वादरायणिर्विष्णुरातस्य (परीक्षितः) वचो निशम्य निभृतेन मनसा तं सभाजयन् जगाद । देवपूजको गन्धाक्षतपुष्पादिभिर्देवान् पूजयन् (यजन् यजमानोऽर्चन् अर्चयन् वा) दिनानि गमयति । यजमानो मधुपर्कगन्धाक्षतपुष्पवस्त्रादिभिर्ब्राह्मणान् वृणन् वृणानो वा तानन्नपानादीन् भोजयन् दिनानि कालं वा यापयति (क्षपयति अतिवाहयति गमयति वा) ।

४. भविष्यत्कर्तरि धातोर्लृटः स्थाने विहिताभ्यां शतृशानच्प्रत्ययाभ्यां स्यप्रत्ययेन च निष्पन्नयोर्गौणक्रियापदयोस्तृतीयायाःप्रयोगः - अहं हस्ताभ्यामवचेष्यन्ति पुष्पाणि साम्प्रतमेवावचिनोमि। स आत्मना करिष्यत् करिष्यमाणं वा कर्म इदानीमेव समाप्नोति । रामः पादमर्दनादिभिः सेविष्यमाणं वसिष्ठं सीता पादमर्दानादिभिः सेविष्यमाणामरुन्धतीं च स्वदुःखं वक्ष्यति ।

५. वर्तमानकर्मणि विहितयोर्यक्-शानच्प्रत्ययान्तयोः प्रयोगे कर्ता तृतीयान्तः । कर्मप्रथमान्तानुसारं गौणक्रियापदम् - मया इयं वार्ता श्रूयमाणाऽस्ति । मया तस्मै दीयमानं पुस्तकं विद्यते । अहं भवद्भिः क्रियमाणं कार्यक्रमं प्रशंसामि । मुखनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् । सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् । पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य पदस्य ज्ञेयम् । क्रियाकारकेण प्रतीयमानो वाक्यार्थो लोकवेदयोरविशिष्टः । अथ केनापि पठचमानं श्लोकद्वयं सुदर्शनो नाम नरपतिः शुश्राव । कदाचित्तेन देवी समालिङ्गचमाना दृष्टा भविष्यति । कदाप्यसौ सद्भावैर्निषेव्यमाणो भवति कदाप्यसौ चाञ्चल्येन धूयमानो जायते कदाप्यसौ मोहेन मुह्यमानः सञ्जायते कदाप्यसौ स सात्त्विकैः कर्मभिः प्रकाशवहुलं नाकमश्नुते । तस्मात्तेषां गद्यकाराणां गद्यमस्मत्पुरः परममञ्जुलतयाऽऽलिङ्गचमानमलङ्कारैरलङ्क्रियमाणं दीर्घदीर्घतरसमासैराक्रम्यमाणमुपतिष्ठति । दुर्जनैरुच्यमानानि संमतानि प्रियाण्यपि । अकालकुसुमान्येव भयं सञ्जनयन्ति हि ॥ पञ्चेन्द्रियैः पञ्चभिरेव होतृभिः प्रचीयमानो विषयाज्यधारया । जाज्वल्यमानो बहुवासनेन्धनैर्मनोमयाग्निर्दहति प्रपञ्चम् । त्वयैव चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना । सानुबन्धाः कथं न स्युः सम्पदो मे निरापदः ॥ यो लुब्धकपाशैर्नित्यं निबध्यमानानामस्माकं रक्षां न विधत्ते (न करोति) तेन वृथा स्वामिना किम् । साधुभिः पूज्यमानोऽपि पीडचमानोऽपि दुर्जनैः । समभावो भवेद्यस्य स जीवन्मुक्त उच्यते । एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः सभायाम् । आश्चर्यमेकं समभूत्तदानीं तदुच्यते संश्रृणु शौनक त्वम् ॥

६. भविष्यत्कर्मणि स्य+शानच्प्रत्ययान्तशब्दप्रयोगेऽपि वर्तमानकर्मणि इव बोध्यम् - भक्तैः श्राविष्यमाणानि श्रोष्यमाणानि वा पुराणानि बहूनि सन्ति । तेन कारिष्यमाणं करिष्यमाणं वा कार्यं स द्रक्ष्यति अहं द्रक्ष्यामि वा । रामेण सेविष्यमाणो वसिष्ठोऽस्माभिः स्मर्यते पूज्यते च । तेनाऽहं दर्शिष्यमाणो द्रक्ष्यमाणो वाऽभवत् । यूष्माभिरध्येष्यमाणानि पुस्तकानि बहूनि सन्ति । विप्रैः पठिष्यमाणा वेदा अस्माभी रक्ष्यन्ते । रामेण घानिष्यमाणो हनिष्यमाणो वा रावणो लङ्कायां निवसति । रामेण पूजिष्यमाणो वसिष्ठो राममध्यात्मज्ञानं श्रावयति ।

विशेषः - क) अजन्तस्य ण्यन्तस्य च धात्वोर्मध्येऽकर्मकाद्भविष्यद्भावे सकर्मकाद्भविष्यत्कर्मणि च स्य-शानचोः कृतयोः "स्यसिच्सीयुट्" इति सूत्रेण चिण्वद्भावे इटि च कृते एकं रूपं चिण्वदभावे सति सेड्धातोरेकमनिड्धातोश्चैकं रूपं कृत्वा द्वे द्वे रूपे भवतः । यथा भू - भाविः सेट् = भाविष्यमाणः भावयिष्यमाणः । स्था अनिट् = स्थायिष्यमाणः स्थास्यमानः । एवमन्येऽपि - नी अनिट् = नायिष्यमाणः, नेष्यमाणः । श्री सेट् = श्रायिष्यमाणः श्रयिष्यमाणः । कृ अनिट् = कारयिष्यमाणः करिष्यमाणः । अस्य कृधातोश्चिण्वद्भावपक्षे इटा चैकं रूपं कर्मणि चिण्वदभावपक्षे कर्तरि च समानं रूपम् । यथा - करिष्यमाणः । सेट् अनिट् च कर्मवाच्येऽपि स्मरणीयौ ।

ख) आत्मनेपदात्सकर्मकधातोर्भविष्यति कर्तरि भावे कर्मणि च स्य+शानचि कृते समानं रूपम्। वन्दि = वन्दिष्यमाणः । लघि = लङ्घिष्यमाणः - कर्तरि । गम् = कर्तरि = गमिष्यन् । कर्मणि तु नेट् आत्मनेपदत्वात् = गंस्यमानः । सर्वस्याकर्मकस्य धातोः भावे सर्वस्य सकर्मकधातोश्च कर्मणि सेट् अनिट् च स्मरणीयौ । आत्मनेपदस्य कर्तरि कम्प् = कम्पिष्यमाणः । भावे तु - कम्पिष्यमाणम् । इत्यादि । अजन्तस्य हलन्तस्य चाकर्मकधातोः कर्तरि भावे यक्+शानच्भ्यां निष्पन्ना गौणक्रिया सिद्धयति । सा भावे औत्सर्गिकत्वेन क्लीबैकत्वे प्रथमाया एकवचने प्रयुज्यते ।

इति करणम् ॥४-३॥

४-४ सम्प्रदानकारकम्

सम्प्रदाने कथं कुत्र केन च योगे चतुर्थी विधीयत इति विषयश्चिन्त्यते ।

कर्मणा यमभिप्रैति स सम्प्रदानम् १।४।३२॥

दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः[1] स्यात् । अभिप्रैति = सम्बध्नाति ।

चतुर्थी सम्प्रदाने २।३।१३॥

अनुक्ते (अनभिहिते) सम्प्रदाने चतुर्थी स्यात् । विप्राय गां ददातीत्यत्र दात्रा स्वस्वत्वनिवृत्तिपूर्वकं देयेन वस्तुनाऽभिप्रेयमाणस्य विप्रस्य सम्प्रदाने विवक्षिते कर्मणि द्वितीयायां प्राप्तायां तां प्रबाध्य "कर्मणा यमभि." इत्यननेन संप्रदानसंज्ञायां ततोऽनुक्ते सम्प्रदाने "चतुर्थी सम्प्रदाने" इति सूत्रेण विप्राच्चतुर्थ्यां विहितायां "विप्राय" इति रूपं सिद्धम् । एवं सर्वत्र ।

१. दा-दद्-दाशृ[2] =दाश् दाण्= (यच्छ[3]) - दासृ[4] =दास् षणु = सन[5] - रा[6] - श्रण[7] - वितृ - ऋ+पुक् णिच् - अर्पि सम्+ऋ+पुक् णिच् = समर्पि-दिश-अतिसृ एते दानार्थका धातवः सकर्मका सन्ति । क्रियायां कारकाणि विवक्षानुसारेणोत्तरोत्तरबलक्रमेण प्रयुज्यन्ते । कर्मवाच्ये करणादीनि न परिवर्तन्ते । अन्वयोऽपि सामान्ये विलोमेनानुलोमेन वा चिन्त्यः । कर्ता प्रायेणादौ पठचते । सर्वेषां दानार्थकानां धातूनां सकर्मकत्वात् एषु चतुर्थ्या सहैव कर्म चिन्त्यम् -

क) विप्राय यज्ञस्यादावन्ते च गां ददाति दत्तवान् । स्त्रियाम् - दत्तवती - तेन विप्राय यज्ञस्यादावन्ते च गौर्दीयते दातव्या दानीया देया दत्ता दीयमाना सुदा दुर्दा वा । शतृ- ददत् । शानच् - ददानः । तुमुन् = दातुम् । क्त्वा = दत्त्वा । ल्यप् = प्रदाय । ल्युट् = दानम् । हे भक्त ! अहं तुभ्यं वरं ददामि तं गृहाण । यजमानो यज्ञान्ते बहुभ्यो ब्राह्मणेभ्यो गा ददाति । त्वमन्तिकात् (समीपात्) कस्मै ब्राह्मणाय वस्तु देहि ।

ख) छात्रो गुरवे दक्षिणामयच्छत्, दत्तवान्-छात्रेण गुरवे दक्षिणा दीयते दातव्या दानीया देया दत्ता दीयमाना सुदा दुर्दा वा । शतृ = दा = यच्छत् - यच्छन् । तुमुन् क्त्वाल्यप्ल्युट्सु उपरिवत् । दाण्धातोः सार्वधातुके यच्छो भवति न त्वार्धधातुके ।

ग) जनता देशोन्नतये धनं ददते ददितवती - जनतया देशोन्नतये धनं दद्यते ददितव्यम् ददनीयम् ददितम् ददमानं वा ।

घ) धनिको दीनेभ्यो वस्त्राणि वितरति वितीर्णवान् - धनिकेन दीनेभ्यो वस्त्राणि वितीर्यन्ते वितरि(री)तव्यानि वितरणीयानि वितीर्याणि वितीर्णानि वितीर्यमाणानि सुवितराणि दुर्वितराणि वा । वितरन्, वितरि(री)तुम्, तीर्त्वा=वितीर्य, वितरणम् (ल्युट्) ।

ङ) अहं भगवते भवते तुभ्यं तस्मै वा नैवेद्यमर्पयामि, अर्पितवान्, समर्पयामि समर्पितवान् वा- मया भगवते तुभ्यं वा नैवेद्यं समर्प्यते समर्पयितव्यं समर्पणीयं समर्पितं वा ।

च) उप+हृ = भेटी - उपहार दिनु - उपहार देना = देवेभ्यो बलिमुपहरेत् । वीरवरो देव्यै स्वपुत्रमुपहारीकरोति ।

---

[1] कर्ता दानस्य कर्मणा यमीप्सति तत्कारकं सम्प्रदानं ज्ञेयम् । यत्सम्यक्प्रदीयतेऽस्मै तत्सम्प्रदानमित्यनुसारेण यदपुनर्ग्रहणाय स्वस्वामित्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनं तद्दानं प्रोच्यते । दानाद्भिन्नेऽर्थे गम्ये दाधातोः प्रयोगे षष्ठी भवति न तु चतुर्थी । यथा रजकस्य वस्त्रं ददाति । २. दाशति । ३. यच्छति । ४. दासति । ५. सनोति । ६. राति । ७. श्रणति ।

२. ब्रूञ - शास् - भाष् - वच् - चक्ष् - गद् - अभिधा - वद् - ख्या - कथ् -वि+आ+हृ एते भाषणार्थका धातवो द्विकर्मका ज्ञेयाः । एतेषां धातूनां कर्तृवाच्ये सम्प्रदानस्याविवक्षायां द्वे गौणं मुख्यं च कर्मणी भवतः । गौणकर्मण उदाहरणं कर्मकारके "अकथितं च" इति सूत्रस्य प्रसङ्गे समुल्लिखितम् । तत्रैव द्रष्टव्यम् । गौणकर्मणोऽविवक्षायां सम्प्रदानविवक्षायां "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रेण यस्य सम्प्रदानसंज्ञायां जातायां तस्मात् "चतुर्थी सम्प्रदाने" इति सूत्रेण चतुर्थी भवति । तदनुसारेण ब्रूञादिधातुषु सम्प्रदानं कर्म च द्वे कारके प्रस्तूयेते ।

क) आचार्यो माणवकाय धर्मं ब्रूते[1] ब्रवीति उक्तवान् - शास्ति शिष्टवान् - भाषते भाषितवान् - वक्ति उक्तवान् - आचष्टे - गदति गदितवान् - अभिदधाति अभिधत्ते अभिहितवान् - वदति उदितवान् - आख्याति आख्यातवान् - कथयति कथितवान् वा - आचार्येण शिष्याय धर्म उच्यते वक्तव्यः, वचनीयः, वाच्यः, उक्तः उच्यमानः सुवचः दुर्वचो वा । एवं शासादीनां धातूनां रूपाणि प्रयुज्यन्ते । शतृ-शानचौ = ब्रूवन्, ब्रूवाणः । तुमुन् = वक्तुम् । क्त्वा = उक्त्वा । ल्यप् = प्रोच्य । ल्युट् = वचनम् । शास् = शासत् = शासत् । शासितुम् । शिष्ट्वा । शासित्वा । प्रशास्य । शासनम् । भाष् शानच् = भाषमाणः । भाषितुम् । भाषित्वा । संभाष्य । भाषणम् । वच् = वक्तुम् । उक्त्वा । प्रोच्य । वचनम् । वि+आ+ख्या = व्याचक्षाणः । व्याख्यातुम् । ख्यात्वा । व्याख्याय । व्याख्यानम् । गद् - शतृ=गदत्=गदन् । गदितुम् । गदित्वा । निगद्य । अभि+धा = अभिदधत् अभिदधानः । अभिधातुम् । अभिधाय । अभिधानम् । वद=वदन् । वदितुम् । उदित्वा । अनूद्य । वदनम् । ख्या इति तु चक्षिङः ख्याञादेशोऽपि - आख्यातुम् । ख्यात्वा । आख्याय । आख्यानम् । कथ्=कथयन् कथयमानः । कथयितुम् । कथयित्वा । प्रकथ्य । कथनम् । व्यारहत् = व्याहरन् । व्याहर्तुम् । व्याहृत्य ।

३. निविद्-सम्+उप+दिश्-शंस-विज्ञा एषां धातूनां क्रियायां कर्मणा युक्ता चतुर्थी विधीयते । एषां सम्प्रदानविवक्षायां "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रेण सम्प्रदानसंज्ञायां ततः "चतुर्थी सम्प्रदाने" इति सूत्रेण चतुर्थी विधीयते । एषां कर्मवाच्ये क्रियापदं कर्ता कर्म अनयोर्विशेषणं च परिवर्तते न तु चतुर्थी ।

क) अहं प्रियम्वदामार्यायै गौतम्यै निवेदयामि[2] निवेदितवती (पुंसि-निवेदितवान्) - मया प्रियम्वदाऽऽर्यायै गौतम्यै निवेद्यते निवेदयितव्या निवेदनीया निवेदिता निवेद्यमाना वा । अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः (अर्जुनः) । न्यवेदयत्तं प्रियायै शोचन्त्या आत्मजान्हतान् ॥ स राज्ञे दुःखं निवेदयति । शतृ = निवेदयत् = निवेदयन् । निवेदयितुम् । निवदेयित्वा । निवेद्य[3] । निवेदनम् । निवेदयिष्यत् - निवेदयिष्यन् । ख) यथोपदिदेश श्रीकण्ठः परमेष्ठिवैकुण्ठादिभ्यश्चतुषष्ठये शिष्येभ्यः काव्यम् । भवान् मह्यं शास्त्रमुपदिशतु । देवाः सर्वं दुःखं विष्णवे विज्ञापयामासुः । यथा निविदादिधातवःकथनार्थे पठचन्ते तथैव कृत्धातुरपि - कीर्तय तानि मह्यम् ।

क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् = वा. = यः क्रियया यं सम्बद्धमीप्सति स सम्प्रदानसंज्ञो भवतीत्यर्थः । पत्ये शेते (स्वपिति संविशते) पत्नी । मदीयं शयनं दृष्ट्वा पतिः शयीतेत्यभिप्रायेण शयनं करोतीति भावः ।

---

१ क्रियया तिङन्ताऽतिङन्ता चोभे क्रिये प्रोच्येते । अतिङन्तया कृत्यक्तक्तवतुशतृशानच्तुमुन्क्त्वाल्यप्प्रत्ययान्ताः क्रिया निर्दिश्यन्ते । तिङन्तक्रियायां येन विधिना चतुर्थी विधीयते । तेनैव विधिना कृत्यादिक्रियास्वपि चतुर्थी क्रियते । लटस्तिवादीनां पञ्चानां स्थाने क्रमेण णलादिषु पञ्चसु कृतेषु ब्रून्धातोः स्थाने आहादेशः क्रियते । ततोऽस्य धातोराहपक्षे आह, आहतुः, आहुः । आत्थ आहथुरिति पञ्च रूपाणि भवन्ति । अत्र धर्मो मुख्यं कर्म बोधनानुकूलव्यापारो ब्रून्धातोरर्थः । बोधविषयेण कर्मणाभिप्रेयमाणत्वान्माणवक सम्प्रदानमिति वचनेन मणवकाच्चतुर्थी विहिता । यथा माणवकाच्चतुर्थी विहिता तथैव बोधविषयेण कर्मणाऽभिप्रेयमाणत्वाच्छिष्यः पुत्रो जनो रामः कृष्णो वा सम्प्रदानं भवति । ततश्चतुर्थी विधीयते । एवं सर्वत्र प्रयोगो बोध्यः ।

२ निविदादिधातूनां तिङन्तक्रियायां यथा चतुर्थी विहिता तथैवातिङन्तक्रियायामपि चतुर्थी विधीयते ।

३ क्वचित्सामीप्याधिकरणं विवक्ष्य सप्तमी - सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्तिनि कलत्रे । स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति - पञ्चतन्त्रे - १।१।११०॥

यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा = वा. = भवति । अत्र यजनार्थे (दानार्थे) स्थितो यज्धातुर्गृह्यते । अस्मिन्नर्थे स्थितस्य यज्धातोः प्रयोगे विभक्तिर्वैपरीत्यते । यतो वार्तिकेन कर्मणि करणं सम्प्रदाने च कर्म विधीयते । पशुना रुद्रं यजते - पशुं रुद्राय ददातीत्यर्थः । इदं वाक्यं वेदे चिन्त्यम् ।

रुच्यर्थनां प्रीयमाणः १।४।३३॥

रुच्यार्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् । अन्यकर्तृकोऽभिलाषो रुचिः । यः प्रीत्याश्रये स्वप्रीतिं जनयति तत्प्रीत्याश्रयतश्चतुर्थी[1] । हरये रोचते भक्तिः - हरिं प्रीणयतीत्यर्थः । भक्तिः प्रीत्याश्रये हरौ स्वप्रीतिं जनयतीत्यर्थः । एवं सीता रामाय लक्ष्मीर्विष्णवे च रोचते । गणेशाय हनुमते बालकाय वा मोदको रोचते । बालकाय जनाय मह्यं वा स्वदते ओदनः-नं दुग्धं सूपो वा । अप्रीयमाणे तु न चतुर्थी - देवदत्ताय रोचते मोदकः पथि - अत्र प्रीयमाणतया देवदत्तः सम्प्रदानं न तु पन्थाः ।

श्लाघ-ह्नुङ्स्था-शपां ज्ञीप्स्यमानः १।४।३४॥

एषां धातूनां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात् । गोपी स्मरात्कृष्णाय श्लाघते ह्नुते (अपनयति) तिष्ठते शपते वा । शिशुपालः कृष्णाय दुष्टः सज्जनाय च शपति । कृष्णाय शिशुपालो सज्जनाय च दुष्टो गालीं ददातीत्यर्थः । तिष्ठते आशयं प्रकाशत इत्यर्थः ।

धारेरुत्तमर्णः १।४।३५॥

धारयतेः प्रयोगे उत्तमर्णः[2] सम्प्रदानं स्यात् । उत्तमर्ण ऋणदाता अधमर्णश्च ग्राहकः प्रोच्यते । भक्ताय धारयति मोक्षं[3] हरिः । भक्तसम्वन्धिनं मोक्षं हरिरवस्थापयति । इह भक्त उत्तमर्ण हरिश्चाधमर्णो ज्ञेयः । उत्तमर्णः किम्-देवदत्ताय शतं धारयति ग्रामे । ग्रामे इत्यत्र उत्वमर्णत्वं न ततश्चतुर्थ्यपि न ।

स्पृहेरीप्सितः १।४।३६॥

स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात् । स पुष्पेभ्यः स्पृहयति । इह केवलमिष्टमात्रे चतुर्थी । स्पृहयामि दुर्ललितायास्मै । परीक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये । भवबन्धच्छिदे तस्मै स्पृहयामि न मुक्तये । अपवादे विषये सप्तमी - स्पृहावती वस्तुषु केषु मागधी ।

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः १।४।३७॥

क्रुध् द्रुह् ईर्ष्या असूया अर्थानां धातूनां प्रयोगे यं प्रति (यस्योपरि) कोपः स सम्प्रदानं स्यात् । क्रोधोऽमर्षः । द्रोहोऽपकारः । ईर्ष्याऽक्षमा । असूया गुणेषु दोषाविष्करणम् । द्रुहादयोऽपि कोपप्रभवा एव गृह्यन्ते । यथा - हरये दैत्यः क्रुध्यति[4] (कुप्यति) द्रुह्यति ईर्ष्यति असूयति वा । सीता रावणाय कुप्यति । अज्ञा हितवादिने क्रुध्यन्ति । कोपार्थस्यैव बोधे एषां धातूनां प्रयोगे चतुर्थी भिन्नार्थबोधे तु द्वितीया - अन्योऽद्राक्षीदिति एनां भार्यामीर्ष्यति ।

---

[1] प्रीत्याश्रय एवाभीष्टवस्तु । योऽभीष्टे वस्तुनि स्वविषयां प्रीतिं जनयति तदभीष्टवस्तुनश्चतुर्थी । भक्तिः स्वविषयां प्रीतिमभीष्टे हरौ जनयतीत्यर्थः ।

[2] उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्रहकौ क्रमादित्यमरः ।

[3] मोक्षोऽप्यवश्यं देयत्वेन ऋणं भवति । यो भक्त्या यमधिकं स्मरति स उत्तमर्णः । स्मर्त्रे भक्ताय यः संरक्षणं करोति फलं वरं वा ददाति वा सोऽधमर्णो ज्ञेयः । यतो यो यमधिकं स्मरति स स्मर्ता उत्तमर्णो येन योऽधिकं स्म्रियते सोऽधमर्णश्च बोध्यः ।

[4] यस्योपरि क्रोधःक्रियते स चतुर्थ्यन्तो भवति । स यन्मह्यमपराध्यति - क्रुध्यतीत्यर्थः ।

क्रुधद्रुहोरुपसृष्टयोः कर्म १।४।३८॥

सोपसर्गयोरनयोर्यं प्रति कोपस्तत्कारकं कर्म स्यात् । सम्प्रदानसंज्ञापवादः । कंसः कृष्णं देवी महिषासुरं चाभिक्रुध्यति अभिद्रुह्यति ।

राधीक्ष्योर्यस्य विप्रश्नः १।४।३९॥

साध् ईक्ष् एतयोः प्रयोगे यस्य विषये विविधः प्रश्नः क्रियते स सम्प्रदानं स्यात् । गर्गः कृष्णाय राध्यति ईक्षते वा । कृष्णविषये स्पृष्टो गर्गः शुभाशुभं (दैवं भाग्यं वा) पर्यालोचयति । शुभाशुभरूपयोः कर्मणो धात्वर्थेनोपसंग्रहकादकर्मकौ । अनयोरकर्मकतया "षष्ठी शेषे" इति सूत्रेण प्राप्ता षष्ठी अनेन सूत्रेण बाध्यते ।

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता १।४।४०॥

आभ्यां परस्य शृधातोर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्ता सम्प्रदानं स्यात् । यजमानो विप्राय गां प्रतिशृणोति आशृणोति (प्रतिजानीते - प्रतिज्ञां करोति) । विप्रेण मह्यं देहीति प्रवर्तितो यजमानः प्रतिजानीत इत्यर्थः । विप्राय गां दातुं यजमानः प्रतिबद्धो भवति ।

अनुप्रतिगृणश्च १।४।४१॥

आभ्यां परस्य गृणातेः पूर्वव्यापारस्य कर्तृभूतं कारकं सम्प्रदानसंज्ञं स्यात् । अध्वर्युर्होत्रेऽनुगृणाति प्रतिगृणाति वा । होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयति ।

परिक्रयणे सम्प्रदानमन्यतरस्याम् १।४।४४॥

नियतकालं भृत्या (वेतनादिना) स्वीकरणं परिक्रयणम् तस्मिन्साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात् । पक्षे तृतीया भवति । शतेन शताय वा भृत्यः परिक्रीयते, परिक्रेतव्यः, परिक्रेयः परिक्रीतो वा । शतेन शताय वा स भृत्यं परिक्रीणाति परिक्रीतवान्वा । सुवर्णादिद्रव्यशतेन रूप्यकशतेन सुवर्णादिद्रव्यशताय रूप्यकशताय वा इत्यर्थः ।

तादर्थ्ये चतुर्थी वाच्या = वा. = तादर्थ्यं निमित्तम् । तादर्थ्येनोपकार्योपकारकभावो गृह्यते। तत्रोपकार्यादेव चतुर्थी भवति - भक्तो मुक्तये (मुक्त्यर्थं) हरिं भजति - ते भक्तवान् वा - भक्तेन मुक्तये हरिर्भज्यते भजनीयः, भक्तः, भज्यमानः, सुभजः, दुर्भजो वा । त्वं वैकुण्ठाय कृष्णं सेवस्व सेवितवान् वा - वैकुण्ठाय कृष्णः सेव्यते सेवितव्यः सेवनीयः सेवितः सेव्यमानः । विप्रो हविषे गां दुदोह दुग्धवान् - विप्रेण हविषे गौर्दुह्यते दोग्धव्या दोहनीया दो ह्या दुग्धा दुह्यमाना सुदोहा दुर्दोहा वा। स ज्ञानाय वेदं धर्मशास्त्रं महाभारतं वा पठति अधीते ब्रवीति गदति वा । स कल्याणाय शिवं रामं कृष्णं गणेशं दुर्गां लक्ष्मीं वा स्मरति स्मृतवान्वा । ईश्वरो धर्मस्य रक्षणाय लोककल्याणाय च लोकेऽवतरति । अग्नये त्वां हविर्गृह्णामि । अग्निषोमाभ्यां जुष्टं त्वां हविर्गृह्णामि । यूपाय दारु। कुण्डलाय हिरण्यम् । पाकाय स्थाली । अवहननाय (कुट्टनाय) उलूखलम् । धनलाभाय राजसेवा राज्यसेवा वा । जनसेवाय कर्म । विद्यायै अभ्यासः । समिध्भ्यः प्रस्थिता वयम् । अतो विमुक्त्यै प्रयतेत विद्वान् । सर्वे धनाय यतन्ते । बालो दुग्धाय क्रन्दति । स कर्मणे प्रस्थितः । विजयाय रघुः प्रस्थितः। सर्वे जना देशविकासाय देशोन्नतये (न्नत्यै) ग्रामविकासाय वा प्रयतन्ते प्रयतन्ताम्, मिलन्ति, मिलन्तु, सन्ति, सन्तु वा । सुखाय कर्माणि करोति (विदधाति) लोकः । बहुजनहिताय बहुजनसुखाय च वचनं सत्यम् । ज्ञानाय शास्त्रं प्रपठामि नित्यं लाभाय कर्माणि करोम्यहं च । इन्द्रोः वित्रासुराय वज्रं प्राहरत्। अर्थान्तरे दुहूवहावकर्मकौ - परोपकाराय दुहन्ति गावः परोपकाराय वहन्ति नद्यः ।

क्लृपि सम्पद्यमाने च = वा. = क्लृपि धातौ प्रयुज्यमाने सति सम्पद्यमानेऽर्थे वर्तमानाच्चतुर्थी वाच्या । सम्पद्यमानेऽर्थे क्लृप्-भू-अस्-जन्-सस्ज्-वृत्-सन्नह्-सम्पद्-विद् इत्यादयो धातवो गृह्यन्ते । भक्तिर्ज्ञानाय कल्पते । जन्म मरणायास्ति । यवागूर्ब्राह्मणाय भवति । काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये वा कल्पते (सम्पद्यते जायते भवति अस्ति वर्तते[1] वा) । शत्रुर्युद्धाय सज्जति-ते । युद्धाय सन्नह्यति-ते रावणः । सैनिका युद्धाय सन्नद्धास्तत्परा वा सन्ति । वायुना हृतगन्धा भूः सलिलत्वाय कल्पते । सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते । सोऽमृतत्त्वाय कल्पते । परोपकारः पुण्याय पापाय परपीडनम् । विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय । खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय ॥ इद्रियाणां निरोधेन रागद्वेषक्षयेन च अहिंसया च भूतानाममृतत्त्वाय कल्पते ॥ आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय च ।

उत्पातेन ज्ञापिते च = वा. = प्राणिनां शुभाशुभसूचको भूतविकार उत्पातो ज्ञेयः । उत्पातेन सूचितेऽर्थे विद्यमानाच्च शब्दाच्चतुर्थी वाच्या । वाताय कपिला विद्युदातपायाऽतिलोहिता । पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥ उत्पातज्ञानाय सदा विद्युतः स्वरूपमन्विष्यते ।

हितयोगे च-वा.-हितशब्देन योगे चतुर्थी वाच्या । ब्राह्मणाय हितम् । लोकाय जनाय पुरुषाय नार्यै तस्मै तस्यै वा हितं (कल्याणं) भवति ब्रूयाद्वा । भूधातौ हितं प्रथमान्तं ब्रूञ्धातौ च कर्म ज्ञेयम् ।

क्रियार्थोपपदस्य च कर्मणि स्थानिनः २।३।१४॥

क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी । स फलेभ्य उद्यानं याति - स फलान्याहर्तु(आनेतुं)मुद्यानं याति । भृत्यः समिद्भ्यो वनं याति - भृत्यः समिध आनेतुं वनं याति । वनाय (वनं गन्तु) गां मुमोच । वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच । स युद्धे गमनाय क्रमते उत्सहते वा । छात्रो वेदस्य पठनाय (अध्ययनाय) उत्सहते प्रक्रमते वा । तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः । दुदोह गां स यज्ञाय सस्याय मधवा दिवम् ।

यो यं स्वानुकूलयितुं नमस्करोति । तस्मात्स्वानुकूलयितुमभिलषिताच्चतुर्थी - नमस्कुर्मो नृसिंहाय - वयं नृसिंहमनुकूलयितुं नमस्कुर्मः । एवं स्वयम्भुवे नमस्कृत्येत्यादि । नम्धातोरपि स्वानुकूलयितुमित्यर्थे चतुर्थी - कृष्णाय नौम्यहम् । नौमीडयतेऽभ्रवपुषे तडिदम्बराय । नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे । नतोऽस्म्यहं सर्वदा देव तुभ्यम् । नत्वा भगवतेऽजाय लोकानां धर्मसेतवे । अस्य धातोः प्रयोगे द्वितीया भवत्येव - स नमति पितरम् । भक्तो देवं नमति । त्वां नमामि गजाननम् । त्वां नता वयम् । इत्यादि । क्वचिद् "क्रियाग्रहणमपि कर्तव्यम्" इति प्रोच्य चतुर्थी - भक्त्या गुरौ मय्यनुकम्पया च प्रीताऽस्मि ते पुत्र वरं वृणीष्व -रघुवंशः-२।६३ । अत्र क्रियाग्रहणे ते[2] इति चतुर्थी ।

तुमर्थाच्च भाववचनात् २।३।१५॥

भाववचनाश्चेति[3] सूत्रेण घञ्-क्तिन्-अच्- ल्युट् इत्यादयः प्रत्यया विधीयन्ते । भाववचनाश्चेति सूत्रेण यो विहितः प्रत्ययस्तदन्ताच्छब्दाच्चतुर्थी स्यात् । अत्र तुमर्थे भावप्रत्ययैर्निष्पन्नः शब्दोऽन्विष्यते । यथा घञा-यागः, त्यागः, पाठ इत्यादि । तुमर्थे निष्पन्नाद्भावप्रत्यान्तशब्दादनेन सूत्रेण चतुर्थी विधीयते - यागाय (यष्टुं) याति । त्यागाय(त्यक्तुं) वाञ्छति । एवं पाकाय (पक्तुं) प्रवर्तते । स्नानाय(स्नातुं) व्रजति ।

---

1 सम्पद्यमानेऽर्थे गृहीतासु आसु क्रियासु एका क्रिया वाक्ये प्रयोज्या ।
2 रघुवंशः २।६३ सञ्जीवनीटीकायाम् ।
3 अस्मिन्सूत्रे भावे इति सूत्रतोऽधिकृत्य घञादयोऽनुवर्तन्ते ।

स्नानाय प्रतिवासरं भवतु मे गाङ्गं जलं निर्मलम् । दानाय(दातुं) धनमर्जयति । परोपकाराय धनं सङ्गृह्णाति । पाठाय पठनाय वा वसति । क्तिन् = भूतये(भवितुं) सम्पद्यते । पुष्टये (पोष्टुं) ददाति ।

नमः स्वस्तिस्वाहास्वधाऽलंवषट्योगाच्च २।३।१६॥

एभियोर्गे चतुर्थी स्यात् । १. हरये लक्ष्म्यै रमायै शिवाय शिवायै पार्वत्यै देव्यै गणेशाय ऋद्धयै सिद्धयै भगवते परमात्मने वा नमः । वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते शत्रुक्षयं कुर्वते । पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ **उपपदविभक्तेः कारकविभक्तिर्बलीयसी** = प. = उपपदमाश्रित्य जायमाना विभक्तिरुप[1]पदविभक्तिरुच्यते । संस्कृतभाषायां केवलं कारकैर्विभक्तयो न विधीयन्ते अनु अन्तरा विना इत्यादिभिर्नमः स्वस्ति स्वाहा स्वधा इत्यादिभिश्चोपपदैर्योगेऽपि विभक्तयो विधीयन्त इति पूर्वं चर्चितम्।

क्रियापदमाश्रित्य जायमाना विभक्तिः कारकविभक्तिः प्रोच्यते । क्रियापदमाश्रितानि उपपदानि क्रियार्थपरकाणि भवन्ति । यतस्तानि क्रियासदृशानि भवन्ति । यथा - नमस्करोति देवान्भक्त इत्यत्र नमः शब्दं मत्वा "नमः स्वस्ति." इति सूत्रेण चतुर्थ्यां प्राप्तायां "उपपदविभक्ते." इति परिभाषया क्रियापदेन सहस्थितेन क्रियार्थपरकेण नमः शब्देन योगे उपपदविभक्तेः कारकविभक्तर्बलीयसी इति परिभाषया कारकविभक्तेर्बलीयस्त्वात्, द्वितीया विधीयते न तु चतुर्थी । अन्यान्युदाहरणानि - मुनित्रयं नमस्कृत्य । नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ इत्यादि । स्वस्त्यादयः[२] - २. राज्ञे प्रजाभ्यः यजमानाय भक्ताय प्राणिभ्यो लोकाय वा स्वस्ति । ३. अग्नये, देवेभ्यः, इन्द्राय, विष्णवे, शिवाय, देव्यै लक्ष्म्यै गौर्यै वा स्वाहा । ४. मात्रे पित्रे पितृभ्यो वा स्वधा । ५. अलमत्र पर्याप्तं समर्थश्चेत्यर्थः - हरिर्दैत्येभ्योऽलम् = समर्थः, शक्तः, विभुः प्रभवः प्रभुः, ईशः ईश्वरः, क्षमः सक्षमो वा । दुर्गा शुम्भायाऽलम् = समर्था शक्ता विभ्वी-विभुः प्रभ्वी=प्रभुः ईशा ईश्वरी क्षमा प्रभवा सक्षमा वा । विधिरपि न येभ्यो प्रभवति । पर्याप्ता(समर्था)र्थभिन्ने तु न चतुर्थी। प्रभ्वादियोगे (समर्थार्थस्थितानां योगे) षष्ठ्यपि साधुः - प्रभुर्बुभुषुर्भुवनत्रयस्येति सिद्धम् । ६. वषट् इन्द्राय । चकारः पुनर्विधानार्थः । आशीर्वादर्विवक्षायां परस्थितेन "चतुर्थी चाशिषि." इति सूत्रेण प्राप्तां षष्ठीं "नमः स्वस्ति." इत्यनेन बाधित्वाऽनेनैव सूत्रेण चतुर्थी भवति । स्वस्ति स्ताद्भूमिपालाय । १. ॐ हृदयाय नमः २. ॐ शिरसे स्वाहा ३. ॐ शिखायै वषट् ४.ॐ कवचाय हुम् ५. ॐ नेत्रत्रयाय वौषट् ६. ॐ अस्त्राय फट् इति हृदयादिन्यासः । स्वाहा = सुहुतमस्तु चेत्यर्थः । स्वाहाशब्दश्छन्दसि विविधार्थे प्रयुज्यते । सूत्रोक्तचशब्देन वौषट् फडादयोऽनुक्ताः शब्दा अपि गृह्यन्ते ।

नमः स्वाहा स्वधा इत्याद्यव्ययानां कथ्-वच् भाषादीनां धातूनां च प्रयोगे युमष्दस्मच्छब्दयोश्चतुर्थीविभक्तौ सिद्धानां रूपाणां स्थाने क्रमेण ते मे वाम् नौ वः न इति शब्दा भवन्ति । एतानि पदानि पदात्परे एव तिष्ठन्ति न तु पदादौ । प्रयोगे ते शब्दाः पदादौ सन्ति न वेति सदा विचारयतु ।

१. युमष्द्= तुभ्यम्=ते	२. युवाभ्याम्=वाम्	३. युष्मभ्यम्=वः ।
१. अस्मद्=मह्यम्=मे	२. आवाभ्याम्=नौ	३. अस्मभ्यम्=नः ।

१ उपपदैर्योगे द्वितीया इति शीर्षकस्य प्रसङ्गे टीकायामुपपदानि सङ्गृहीतानि । तत्रैव तानि द्रष्टव्यानि ।

२ स्वस्तिशब्दोऽनव्ययोऽपि - प्रतिगृह्णाति मे धेनुं कुटुम्बार्थे विशेषतः ॥ स्वस्तिर्भवतु मे नित्यं सुखं चानुत्तमं तथा - भविष्योत्तरपुराणात्।

अधःस्थिते श्लोके द्वितीयाचतुर्थीषष्ठीविभक्तीनां पदानि क्रमेण बोध्यानि

क) श्रीशस्त्वाऽवतु माऽपीह दत्तात्ते मेऽपि शर्म सः ।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥
दाधातुना सह स्थिताया चतुर्थ्या द्वे द्वे पदे ज्ञेये ।

ख) इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे । सर्वं वक्ष्यामि ते भद्र कश्मलं ते गमिष्यति । नमस्ते रुद्र । स्वस्त्यस्तु ते । स्वस्ति वाम् (युवाभ्याम्) । नमो वः । स्वस्ति नो (अस्मभ्यम्) बृहस्पतिर्दधातु । ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः । पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति (दाण्=यच्छ) । इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः । नमस्तेऽस्तु । नमो नमस्तेऽस्तु सहस्रकृत्वःपुनश्च भूयोऽपि नमो नमस्ते । अत्र ते कीर्तयिष्याम इतिहासं पुरातनम् ।

स्वागतशब्देन योगे चतुर्थी -

स्वागतं सूर्यपुत्राय कालाय च महात्मने ।
मृत्यवे चाथ धर्माय किं कार्यं करवाणि वः ॥

क्वचित्षष्ठ्यपि -

१. भद्र सुस्वागतं तेऽस्तु ब्रूहि किं करवाणि ते ।
२. भगवन् सुस्वागतं तेऽस्तु किं करोमि तवानघ ।

मन्यकर्मण्यादरे विभाषाऽप्राणिषु २।३।१७॥

प्राणिवर्ज्ये मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे । अहं त्वां तृणं तृणाय वा मन्ये । तृणाय मत्वा रघुनन्दनोऽपि । तृणोऽस्तित्वहीनो घासविशेषः । यतोऽत्र वैकल्पिका चतुर्थी विहिताऽस्ति । प्राणिवर्ज्ये तिरस्कारे चार्थे दिवादिधातोः प्रयोगे एतादृशं वाक्यं भवति । श्यना निर्देशात्तनादिधातुभिर्योगे तु न । नाहं त्वां तृणं मन्ये । अप्राणिष्वित्यपनीय । **नौकाकान्नशुकशृगालवर्ज्येष्विति वाच्यम्-वा.-** नौकाकादिभिः सह तुलनायां जातायां द्वितीया भवति । नाहं त्वां नावमन्नं वा मन्ये इत्यत्राप्राणित्वेऽपि चतुर्थी न । नाहं त्वां शुने मन्ये इत्यत्र प्राणित्वेऽपि चतुर्थी भवत्येव । अनादरस्योक्तौ नेह चतुर्थी -

अश्मानं सदृशं मन्ये मन्ये काष्ठमुलूखलम् ।
वन्ध्यायास्त्वां सुतं मन्ये यस्य माता न पश्यति ॥

गत्यर्थकर्मणि द्वितीया-चतुर्थ्यौ चेष्टायामनध्वनि २।३।१२॥

अध्वभिन्ने गत्यर्थानां कर्मणि एते द्वितीयाचतुर्थ्यौ स्तश्चेष्टायाम् । श्यामो ग्रामं ग्रामाय वा गच्छति (व्रजति याति एति चलति) । स ग्रामं ग्रामाय वा गन्तु(यातुं चलितुं व्रजितुं) मिच्छति । ग्रामं ग्रामाय वा गत्वाऽऽयाति । चेष्टायां किम् - मनसा हरि स्मरति । अनध्वनीति किम् - पन्थानं गच्छति । गन्त्रधिष्ठितेऽध्वन्येवायं निषेधः । यदा तूत्पथात्पन्था एवाऽऽक्रमितु(उल्लङ्घयितु)मिष्यते तदा चतुर्थी भवत्येव ।

परिशिष्टोदाहरणानि -

१. निमित्तेऽर्थे स्थितस्य कृते इत्यस्यार्थस्य च शब्दस्य योगे षष्ठी विधीयते । इयं षष्ठी कृते इत्यस्मादर्थाच्च शब्दात्पूर्वं प्रयुज्यते । अर्थशब्देन योगे तु "चतुर्थी चाशिष्यायुष्यम्" इति सूत्रेण चतुर्थी षष्ठी चोभे भवतः । अत्र षठ्याः प्रसङ्गो लिख्यते -

क) कृते = स भोजनस्य कृते वसति । जनाः धनस्य कृते किं किं न कुर्वन्ति । भवान् अस्माकं कृते कार्यं प्रयतते । अहं तव कृते सानुरागः समुद्राल्लक्ष्मीं विहायैवागतः । सर्वे जना देशस्य समाजस्य वा कृते प्रयतन्ते । यथा लोके सन्न्यासधर्मो विरागिणः कृते उचितोऽस्ति सरागिणः कृतेऽनुचितः । यदि कस्यापि कृते किमपि कर्तव्यं निर्धायते तदा तेन कर्तव्येन समं तस्य कोऽप्यधिकारः स्थिरीक्रियते । स कालिदासः स्वकीयानि काव्यानि सर्वेषां कृते (बुधवराणामबुधवराणां च कृते - सर्वेभ्यो जनेभ्यः) ससर्ज । स स्वकीयवैदुष्यस्य प्रतिष्ठापनाय स्वकीयवैदुष्यस्य कृते वा काव्यानि न चकार । स तु लोकाराधनस्य लोककल्याणाचरणस्य च कृते वा रचनां रचयामास । न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः । नारीणां कृते सुशिक्षा सुशिक्षायाः कृते सुप्रबन्धश्च कर्तव्यः ।

ख) अर्थे - त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ॥ इक्ष्याकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ।

ग) स वेदस्य पठनार्थं यतते । पदार्थानां (वस्तूनां) संग्रहार्थं रामो यतते । धनस्योपार्जनार्थं श्यामो विदेशं याति । स वेदस्याध्ययनार्थं वाराणसीं व्रजति । तदेतेषां प्रबोधनार्थं किञ्चिच्छास्त्रं विचिन्त्यताम् । कर्मणां तु विवेकार्थं धर्माधर्मौ व्यवेचयत् । आगमर्थं तु देवानां गमनार्थं तु रक्षसाम् । घण्टानादं प्रकुर्वीत तस्मात्घण्टां प्रपूजयेत् ॥ पुरुषस्य दर्शनार्थं कैवल्यार्थं प्रधानस्य । लोकानां तु विवृद्धचर्थं मुखबाहूरुपादतः । ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्तयत् ॥ धर्मस्य रक्षणार्थं पापस्य निरसनार्थं पुण्यस्य संचयार्थं च केनापि प्रयत्नः करणीयः । तव कल्याणर्थं कार्यं करोमि । भगवतस्तव वा दर्शनार्थमागतोऽस्मि ।

घ) कर्तृवाच्यस्य तिङन्तक्रियाया योगे चतुर्थी - अहमस्याः सभाया आयोजकाय धन्यवादं (साधुवादं) ददामि । एतत्पवित्रमग्रे मुनिरासुरयेऽनुकम्पया ददौ । त्वमेकैकस्मिन्प्रहरे रोगिणे औषधं देहि । विद्या ब्राह्मणमित्याह तथा स्यां वीर्यवत्तमा ॥ यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम् । तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ॥ तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्संप्रादुः । एतैर्दोषैर्विहीनाय ब्राह्मणाय प्रियाय च । साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषिताम् ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः । अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ सर्वं सहन्तु मन्यन्ते तृणाय रिपवश्च तम् ॥ ग्रामदोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयम् । शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने । विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् । शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् ॥ उपदिक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः । त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये । लक्ष्मणोऽपि सुमित्रां तु कौशल्यायै समर्पयेत् । अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् । रात्रिः स्वप्नाय भूतानां चेष्ठायै कर्मणामहः । तस्माद्युद्धाय युजस्व योगःकर्मसु कौशलम् । अयं देशः संसाराय धनुर्वेदमयच्छत् । तेभ्य उपकारकर्तृभ्यो गुरुभ्यः सोमनाथपौडेलनामधेयेभ्यो भक्तिपूर्विकां कृतज्ञतां प्रकटयामि । ज्ञानिनस्ते(तुभ्यं) ज्ञानं समुपदिशन्ति । भवन्तो मह्यं धर्मशास्त्रमुपदिशन्तु । अहमेतानि वस्तूनि एतानि वस्त्राणि एतान् तण्डुलान् एता मूर्तीर्वा भवते भवत्यै वा उपहारीकरोमि (ददामि) । रागात्मिकया भक्त्याऽखिलानि कर्मणि भगवतेऽर्पयेदिति वदति पञ्चरात्रशास्त्रम् । करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेतत् । तस्मा महाराज ! भवान् एतान् पुत्रान् तस्मै समर्पयतु । प्रातरुपानीय तं तस्मै अवश्यं निवेदयेत् । तस्या

प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य । प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयैव ॥ मा चास्मै त्वं कृथा द्वेषं बद्धाऽनेनेति मत्प्रिया ॥

ङ) कर्मवाच्यस्य तिङन्तक्रियाया योगे चतुर्थीचिन्तनम् - विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दीयताम् । नैतत्त्वया दाम्भिकाय नास्तिकाय च दीयताम् । अशुश्रूषोरभक्ताय दुर्विनीताय न दीयताम् ॥ शुश्रुषवे च भक्ताय विनीताय प्रदीयताम् ।

च) कर्मवाच्यस्याऽतिङन्तकृत्यप्रत्ययान्तक्रियाया योगे चतुर्थी - श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः । ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च । पान्थो देयो ब्रह्मणाय गोभ्यश्च राज्ञ एव च । वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च ॥ देयं दीनजनाय च वित्तम् । इदं ते नातपस्काय नाभक्ताय कदाचन । न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ इदमथर्वशीर्षमशिष्याय न देयम् । नाश्रद्धधानाय न नास्तिकाय नाधर्मनिष्ठाय न निर्घृणाय । न हेतुदुष्टाय गुरुद्विषे वा न नात्मभूताय निवेद्यमेतत् ॥

छ) कर्मवाच्यस्य तिङ्भिन्नक्तान्तक्रियाया योगे चतुर्थी - त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम् । त्वया तस्मै वरो दत्तः प्रीतेन भगवँस्तदा । अर्हत्तमाय विप्राय तस्मै दत्तं महत्फलम् ॥ प्रत्यर्पितो मे भवताऽनुकम्पिना भृत्याय विज्ञानमयः प्रदीपः । आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा । कृष्णो भक्तानां कल्याणाय दुष्टानां विनाशाय चावतीर्णोऽस्ति भूमौ ।

ज) भूतकर्तरि निष्पन्नायाअतिङन्तक्तवतुप्रत्यान्तक्रियाया योगे चतुर्थी- इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ प्रियायै गिरीशस्तस्यै गूढं व्याख्यातवान्स्वयम् । यदा त्वं सनकादिभ्यो येन रूपेण केशव । योगमादिष्टवानेतत् रूपमिच्छामि वेदितुम् ॥

झ) वर्तमानकर्तरि निष्पन्नेन शतृशानच्प्रययान्तेन भविष्यत्कर्तरि स्य-शतृशानच्प्रत्ययान्तेन च गौणक्रियापदेन च योगे चतुर्थीविधानम् - कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः । न विव्यथे तस्य मनो नहि प्रियां प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ अयं महाकवी रत्नाकरो महाकर्वेर्माघस्य कृष्णचरितावलम्बिने महाकाव्याय स्पर्धमानः श्रीकण्ठचरितं हरविजयं निबबन्ध ।

ञ) भावे निष्पन्नाया तुमुन्प्रत्ययान्तगौणक्रियाया योगे चतुर्थी- येनाहं हस्तस्थं सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि । परीक्षिते कथां वक्तुं सभायां संस्थिते शुके । सुधाकुम्भं गृहीत्वैव देवास्तत्र समागमन् ॥ वलिर्वामनाय महीं दातुं जग्राह जलभाजनम् । हरि ॐ तत्सत् ३ ॐ विष्णुः ३ श्री मद्भगवतो .... इत्यादिपूर्वकं सङ्कल्पमुच्चार्य अमुकगोत्रोऽमुकशर्माऽहं ... न्यूनातिरिक्तकर्मपरिपूर्णार्थं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ... नानागोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यः कन्याकुमारेभ्यश्च इमां भूयसीदक्षिणां यथाकालं यथाभागं विभज्य दातुमहमुत्सृजे । नैवात्मने महेन्द्राय रोषमहर्तुमर्हसि ।

ट) भावे निष्पन्नाया क्त्वाल्यप्प्रत्यान्तगौणक्रियाया योगे चतुर्थी- १) क्त्वा-गुरवे वस्त्रभूषादि दत्त्वा गां च समर्पयेत् । वृकासुराय गिरीशो वरं दत्त्वाऽऽप सङ्कटम् ॥ वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने । आचार्याय सुधीर्दत्वा मुक्तः स्याद्भवबन्धनैः ॥ सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्यसे कथम् । स तस्मै सुकृतं दत्त्वा पुण्यमादाय गच्छति । अर्पयित्वा उक्त्वा गदित्वा भाषित्वा । २) क्त्वः स्थाने ल्यप् = अथ कौलिकभार्या गृहं गत्वा देवशर्मणे गतास्तरणां भग्नां च खट्वां समर्प्येदमाह । वितीर्य प्रदाय प्रोच्य इत्यादि ।

ठ) दादिधातुभ्यः कृत्प्रत्ययेन निष्पन्नेन शब्देन योगे चतुर्थी - प्रातर्भजामि रघुनाथ करारविन्दं रक्षोगणाय भयदं वरदं निजेभ्यः । वृतेभ्य ऋत्विग्भ्यो मधुपर्कदानम् । अध्वर्युद्वारा यजमानायारण्योः प्रदानम् । वसतीवरीणां यजमानाय समर्पणम् । तेभ्यो गणेश वरदो भव नित्यमेव ।

आधानसमाप्तावनयोर्वाससोरध्वर्यवे प्रदानम् । यज्ञान्ते ऋत्विग्भ्यो दक्षिणादानम् । अग्नौ जाते सति यजमानोऽध्वर्यवे वरदं कुर्यात् । अनृजवेऽधर्मशीलाय शिष्याय विद्यादानं कस्यापि महान्दोषः । पितुःपुत्राय यद्वेषो मरणाय प्रयोजितः । सिंहाधिरुढो वरदोऽस्तु मह्यम् । तथाक्षसूत्रं वरदोऽस्तु मह्यम् । अहं गुरवे पित्रे मात्रे आचार्याय वा निवेदनं करोमि । भक्ताय मोक्षस्य धारणा कृष्णेन क्रियते । जनैर्दीनेभ्यो वस्त्राणां वितरणं क्रियते ।

ङ) वाक्यस्यादौ दादिधातोः क्तेन निष्पन्नाद्विशेषेणात्पूर्वं चतुर्थ्यन्तपदम्- कृष्णाय प्रदत्तां कन्यामहमपश्यम् । तस्मै प्रदत्तं फलं भवान्न भक्षयेत् । भगवते भगवत्यै वा समर्पितानि घृतपक्वानि कदलीफलानि च नैवेद्यानि भक्ता भक्षयन्तु (अदन्तु) । एवं सर्वत्र दादिधातोस्तिङन्तातिङन्तप्रत्ययेन युक्तेन क्रियापदेन योगे चतुर्थी विधीयते । अतिङन्तपदेन कृत्यक्तक्तवतुशतृशानच्-उ-क्त्वाल्यप्तुमुन्ल्युट्प्रत्यान्तपदानि बोध्यानि ।

इति सम्प्रदानम् ॥४-४॥

४-५ अपादानकारकम्

अस्मिन्कारके कुत्र कथं कीदृशेन धातुना च योगे पञ्चमी विधीयत इति चिन्त्यो विषयः । स्मरणीयं यत् येन पदेन योगे पञ्चमी विहिता भवति । प्रयोगे तस्मापदात्पूर्वं सदा पञ्चम्यन्तपदं प्रयुज्यते ।

ध्रुवमपायेऽपादानम् १।४।२४॥

अपायो विश्लेषः = पृथग्भवनम्, तस्मिन्साध्ये ध्रुवं (अवधिभूतं) कारकमपादानं स्यात् । यद्वस्तु पदार्थो वा यस्माद्वियुज्यते, यस्माद्यः पृथग् (भिन्नो) भवति वा स विश्लेषः प्रोच्यते ज्ञेयो वा । ध्रुवं स्थिरमचलं च ज्ञेयम् । तत्रापि ध्रुवं क्वचित्स्थिरं क्वचिच्चलनमपि भवति । अनयोरुदाहरणमधः समुल्लिख्यिते । यो ध्रुववाचकशब्दो भवति तस्यापदानसंज्ञा क्रियते । ततोऽधः सूत्रं प्रवर्तते -

अपादाने पञ्चमी २।३।२८॥

अपादाने पञ्चमी स्यात् । अपादानसंज्ञकशब्दादनेन सूत्रेण पञ्चमी विधीयते । ध्रुवं मूर्तममूर्तं च द्विधाऽस्ति । तत्रापि मूर्तं द्विविधमचलं चलं च । अचलं स्थिरं ज्ञेयं चलमस्थिरं च । वस्तु पदार्थश्चैतौ पर्यायौ बोध्यौ ।

क) यस्य यत्स्थानमचलं (स्थिरं) दृश्यते भवति बुध्यते वा तदेव मूर्तं ध्रुवं (मूर्तस्थिरं) प्रोच्यते ज्ञेयं वा । यथा - ग्रामः पर्वतः, वृक्षः, उपरितलम्, सोपानम्, मञ्चः गृहम्, आकाशः-शम्, बिलः, शिखरश्चेत्यादयः । एतादृशान्मूर्तस्थिरबोधकशब्दात्पञ्चमी विधीयते । यथा - स ग्रामादायाति । पर्वतात्पाषणो भ्रश्यति[1] । वृक्षात्पत्राणि पतन्ति । आगच्छति (आयाति) बाल उपरितलात् । भाण्डः सोपानात्पतति । रामो मञ्चादुत्तिष्ठति । कृष्णः खट्वाया अवरोहति । नारी तस्माद्गृहाद्धान्यानि आनयति । सर्वे जना गृहान्निसरन्ति (निष्कामन्ति निर्गच्छन्ति निर्यान्ति वा) । स प्रकोष्ठान्निःसरति । कुडचाद्दधिभाण्डः पतति । पथिकः शिखरादुपत्यकायां राजा विमानाद् चतुश्चक्रिकाया वा अवरोहति । जनौ शकटात्त्रिचक्रिकायाश्चतुश्चक्रिकाया द्विचक्रिकाया वा अवरोहतः । नारद आकाशाद्भूमावववतरति (अवरोहति) । मृत्तरणात् (गाडीवाट, मोटरबाट - गाडी से, मोटर से) जना भूमौ अवरोहन्ति अवतरन्ति वा । भल्लुको गुहाया मूषकः सर्पो वा विलाच्च निःसरति (निर्गच्छति निर्याति निष्कामति वा) । वायुयानचालक आकाशाद्भूमौ वायुयानमवतारयति । अहं सञ्जीवकं प्रभोर्विश्लेषयामि ।

---

[1] भ्रंसु स्रंसु ध्वंसु भ्रंशु पत् एते भ्वादयो, भ्रशु भ्रंशु एतौ दिवादी च सन्ति । सर्वे धातवः पतनार्थाः ।

पृथग्करोमि)। अहमेकदा गृहान्निर्यामि (निर्गच्छामि निःसरामि निष्क्रामामि वा)। मामुद्धर भवार्णवात्। स मां कुसङ्गाद्वियुनक्ति। धर्मो मां पापाद्वियोजयति (पृथग्करोति)। स मम गृहात्तैलं घृतं रूप्यकाणि वा नयति। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यमि मा शुचः। आचारोऽनाचारात् व्यभिचारात् कुकर्मणः कुसङ्गाद्वा जनं विश्लेषयति (पृथग्करोति) रक्षति (पाति)। पुत्रो ग्रामाद् नगराद् विदेशाद्वा आगच्छत् (आगतवान् आगतः, आयात् आयातवान् आयातो वा)। सः त्वमहं भवान्वा तत आगतवान् (आगतः, आयातवान् आयातो वा)। सूर्यः पृथिव्या रसमाकर्षति आदत्ते वा।

ख) मूर्तचलध्रुवम् = वस्तुनो यत्स्थानं गतिशीलं चलायमानं कम्पमानं वा दृश्यते बुध्यते तत्स्थानं मूर्तचलध्रुवं (मूर्तचलस्थिरं) प्रोच्यते ज्ञेयं वा। यथा = धावन् अश्वः, धावन्ती द्विचक्रिका, कम्पमानो वृक्षः, उत्पतत् उड्डीयानम् उड्डयानं वा वायुयानम्, भ्रमत् चक्रम्, धावत् धूमयानमित्यादीनि मूर्तचलध्रुवाणि (मूर्तचलस्थिराणि) प्रोच्यन्ते ज्ञेयानि वा। ततः पञ्चमी विधीयते - स धावतोऽश्वात् धूमयानाद्वाऽपतत्। धावन्त्या द्विचक्रिकायास्त्रिचक्रिकायाश्चतुश्चक्रिकाया वा जनः पतति। कुलालो भ्रमतश्चक्रात्घटं पृथग्करोति। जना उड्डीयानाद्वायुयानादपतन्। धावतो मृत्तरणात् (मोटरबाट, गाडीबाट - मोटर से, गाडी से) जना भूमौ नावरोहन्ति। सूर्यप्रकाशादन्धकारमपैति।

ग) मेषयोः परस्परविभागे परस्परमवधिर्भवति। ततः पञ्चमी - मेषो मेषान्तरादपसरति। मेषौ परस्परमपसरतः।

घ) क्वचिदमूर्तमपि कल्पनाया विभागवदवधिरङ्गीक्रियते। ततः पञ्चमी - स कार्यादपसरति। बालो धैर्याद्भ्रश्यति। पुण्यवान्स्वर्गात्पतति। मूर्खः कर्तव्याच्च्योतति। स धर्मात्सुखाद्वाऽपैति (अपवहति)। स दुःखान्मामपनयति। रामो मां पापाद्वियुनक्ति (पृथग्करोति)। पुत्रः पठनादपसरति (पश्चात्सरति)। शिष्याः पठनादपसरन्ति। पुण्ये क्षीणे स्वर्गलोकात्पतन्ति (च्यवन्ते)। स स्वधर्माद्वियुज्यतेपृथग्भवति)।

ङ) क्वचित्कल्पितविभागरूपया क्रियया यः पृथग् भवति। ततः पञ्चमी - पुत्रः पितुर्विभज्यते। कनिष्ठो भ्राता जेष्ठाद्भ्रातुर्विभजते (भिन्नो भवति)। स तस्माद्विभजते -वियुङ्क्ते)।

च) यतः, ततः, अतः, इतः, ग्रामतः, सोपानतः, वृक्षतः, कुतः, वायुयानतः, त्वत्तः, मत्तः, इत्यादयः पञ्चम्यन्तस्य स्थाने तसिल्प्रत्ययेन निष्पन्नाः शब्दा बोध्याः। १. सर्वकारो जनताभ्यः करमादत्ते। गुरुः शिष्याद् ब्राह्मणो यजमानाच्च दक्षिणां शिक्षको विद्यार्थिभ्यश्च शुल्कं गृह्णाति गृहीतवान् - आदत्ते आददत् आदत्तवान्वा - सर्वकारेण जनताभ्यः करः (शुल्कः) गृह्यते ग्रहीतव्यः, ग्रहणीयः, ग्राह्यः, गृहीतः, गृह्यमाणः, सुग्रहो दुर्ग्रहो वा आदीयते आदातव्यः, आदेयः, आदत्तः आदीयमानो वा। बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः॥ स विषयेभ्य इन्द्रियाणि निगृह्णाति। आचाराद्विच्युतो विप्रो न वेदफलमश्नुते। भगवान् संसारमहाभयाद्भवसागराद्वा मां तारयतु। ईशो मां संसारदुःखाद्विश्लेषयति। त्वं पिङ्गलात्तं वियोक्तुं न प्रभवसि न समर्थो वा। गुरुरासनादुत्तिष्ठति उत्थितवान् उत्थितो वा। स मञ्चादुत्तिष्ठति। धैर्यरहितो गन्तव्यमार्गाद्विचलति विचलितवान् वा। ईश्वरोऽस्मान्दुःखादुद्धरति। ते गृहान्निर्गच्छन्ति निष्क्रामन्ति वा। भक्तः संसारसागरान्निस्तरति। भारवाहकः पर्वतादवरोहति आयाति वा। ईशो मां संसारसागरादुद्धरति। वराहयूथानि पल्वलेभ्य उत्तरन्ति उत्तीर्णवन्ति उत्तीर्णानि वा। शिवः कैलाशात् विष्णुर्वैकुण्ठात् ब्रह्मा ब्रह्मलोकाच्च भूमाववतरन्ति अवतीर्णवन्तो वा। गौरी हिमालयादवतरति अवतीर्णवती अवतीर्णा[1] वा। कृष्णो मां भवबन्धनान्निरस्यति-ते। मोटरचालको जनानवतारयति(अवरोहयति)। गुरुः शिष्यमज्ञानात्तारयति साधुर्दुःखितजनान्दुःखात्पारयति। न्यायात्पथः प्रविचलन्ति पदं न धीराः। रामो लङ्कादयोध्यायां

---

[1] अवतरन्ती, अवतरीतुम्, अवतीर्य, अवतरन्। अवतरणम् = अस्य योगे चतुर्थी षष्ठी च क्रमेण सहैव विधीयेते। यथा लोककल्याणाय भगवतोऽवतरणं भवति।

प्रत्यावर्तते (आवर्तते निवर्तते, प्रत्यावृत्तवान्, आवृत्तवान्, निवृत्तवान्) । स गृहाद्गृहं याति । अहं वनाद्वनं गच्छामि (एमि) । स वनात्प्रत्यावर्तत गृहम् । पुत्री कुपाज्जलमानयति । चौरो गृहात् ग्रामाद् नगरात् देशाद्वा पलायते । सेवको गृहादपलायत । स तस्माच्छत्रोःपराभवति । स्वामी गवाक्षात्प्रेक्षते । स वनान्तादुपावृत्तः प्रत्यावृत्तो वा । स धर्मादपैति । तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भूतदयां विस्तारय तारय संसारसागरतः । अहं प्रारम्भादारम्भाद्वा कथां श्रोतुं कामये । स परधनेभ्यो व्यावर्तते। शब्दत्वं हि सर्वेभ्यो नित्यभ्योऽनित्येभ्यश्च व्यावृत्ते शब्दमात्रवृत्ति । स जलाशयाज्जलमानयति ।

च-२) तसिलन्ताः - सारं ततो ग्राह्यमपास्य फल्गु । वयमतो न गच्छामः । त्वत्तो (भवतः) वार्तां शृणोमि । कृष्ण इतः (अस्माद्) स्थानात् याति न याति वा । इदं फलं कुत आपतत्। भवान् इदं फलं कुत आनयत् आनीतवान्वा । स इतोऽगच्छत्, गतवान्, गतो वा । आदितः (प्रारम्भतः) कथां शृणोमि । विना ज्ञानं कुतो मुक्तिर्विना मुक्तेः कुतः सुखम् । धीरः कर्तव्यपथान्न च्यवते । कुत आयातः तत आगतः । इतो गतः, यातो वा ।

जुगुप्सा-विराम-प्रमादर्थानामुपसंख्यानम्-वा.- जुगुप्सा = निन्दा, विरामः = विरतिः, उपरमणमुपरतिः, प्रमादः = असावधानम् एतदर्थकानां धातूनां प्रयोगेऽवधिभूतं कारकमपादानं स्यात्। एतदर्थकेभ्यो धातुभ्यः कृत्प्रत्ययेन निष्पन्नानां शब्दानां प्रयोगेऽपि पञ्चमी स्यात् । जुगुप्सा निन्दा कुत्सा इत्यमरः । स पापाज्जुगुप्सते । सा कर्मणो विरमति । भृत्यः कार्यात् पुत्रश्छात्रो वाऽध्ययनद्विरमति विरतवान् उपरमति-ते वा । न निश्चितार्थाद्विरमन्ति धीराः । तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः । विरागिणो विषयेभ्य उपरतिः (उपरमणं) सम्यगस्ति । नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः । स कार्याद् (कर्मणः, पदात्) निवर्तते निवृत्तवान् उपरमति-ते वा । तस्य प्राणाघातान्निवृत्तिः । सोऽहं त्वं भवान्वा अध्ययनादुपरतवान् उपरतो वा । स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् । तस्य विषयेभ्यः परावृत्तिरस्ति । तेषां कार्यात्परावृत्ति(निवृत्तिः)र्विद्यते । ते यूयं वयं वा कार्याद्विरतवन्तः, विरताः, उपरतवन्तः, उपरता वा । तौ युवामावां वा कर्मणो निवारितौ । स धर्मात्प्रमाद्यति । जिज्ञासुरध्ययनान्न प्रमाद्येत् । तेन स्वधर्मान्न प्रमाद्यताम्, न प्रमदितव्यम्, न प्रमत्तम् वा । त्वया सत्यात्स्वाध्यायप्रवचनाभ्यां कुशलाद्धर्माद्देवपितृकार्याभ्यां वा न प्रमदितव्यम् न प्रमत्तं वा। स स्वाधिकारात्प्रमत्तः । अपनयनमपसरः = स कार्यादपसरति । स पश्चात्कर्तव्यकर्मणोऽपासरत् नापासरद्वा । निःस्पृहः = निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ।

भीत्रार्थानां भयहेतुः १।४।२५॥

भयार्थकानां त्राणार्थकानां च धातूनां प्रयोगे हेतुरपादानं स्यात् । एतदर्थकेभ्यो धातुभ्यो विहितेन कृत्प्रत्ययेन निष्पन्नानां शब्दानां प्रयोगे पञ्चमी विधीयते । ... दरस्त्रासो भीतिर्भीः साध्वसं भयमित्यमरः । भय-भीत-भीति-भी एतैर्योगे पञ्चमी भवति । १- भी त्रस् एतौ भयार्थकौ धातू । २- उद्+विज् = उद्वेगितार्थकः - भयं विचलनं सन्तप्तं क्षुब्धं च । ३- गुप् रक्ष् पा त्रैङ् देङ् अव पाल (पालि) एते रक्षणार्थका धातवः । ४- शकि शङ्कार्थः । अत्र कवलं क्रमसंख्यामात्रम् ।

बालो व्याघ्रात्सिंहाद्भल्लुकाद्वा बिभेति भीतवान्वा - बालेन व्याघ्राद्भीयते भेतव्यम्, भीतम् । स त्रस्यति त्रसति त्रसितवान्वा - त्रस्यते त्रसितव्यम् त्रसितम्, त्रस्तम् वा । चोराद्विभेति सः । स तस्मादुद्विजते । यस्मान्नोद्विजते लोको लोकान्नोद्विजते यः । ईशो मां संसारदुःखाद्धर्मोऽधर्माच्च रक्षति रक्षितवान् - त्रायते त्राणवान्, त्रातवान्वा - ईशेनाहं संसारदुःखाद् रक्ष्ये रक्षितव्यः, रक्षणीयः, रक्ष्यः, रक्षितः, रक्ष्यमाणः, सुरक्षः, दूरक्षो वा - त्रायते त्रातव्यः, त्राणः त्रातो वा । कोऽपि पापात् शङ्कते शङ्कितवान् वा - केनापि पापाच्छङ्क्यते शङ्कितव्यम्, शङ्कनीयम्, शङ्कितं वा । त्वं काकाद्दधि, अग्नेर्वस्त्रं चौराद्धनं जलादग्नेश्च पुस्तकं दुःखाद्बालकं दुष्टात्सज्जनं सिंहाद्गाश्च रक्ष, पाहि, अव, त्रायस्व, पालय, गोपाय - राक्षितवान्, पातवान्, अवितवान्, त्राणवान्, त्रातवान् पालितवान्वा - तया काकाद्दधि रक्ष्यते

रक्षितव्यम्, रक्षणीयम्, रक्षितम् - पायते पातव्यम्, पातम् - अव्यते अवितव्यम्, अवनीयम्, अवितम् - त्रायते त्रातव्यम् त्राणम्, त्रातम् - पाल्यते पालयितव्यम् पालनीयम् पालितम् - गोपाय्यते गुप्यते गोपायितव्यम् गोपितव्यम्, गोप्तव्यम्, गोपायितम् गुप्तं वा । भी शतृ=बिभ्यत् । त्रस् = त्रस्यत्-न् । रक्ष्-रक्षन् । पा-पालयन् । अव = अवन् । शानच् = त्रायमाणः । पाल-पालि = पालयन् । गोपायन् । देङ्-शानच् = दयमानः । शकि = शङ्कमानः । तुमुन् = भेतुम् । त्रै त्रातुम् । रक्ष = रक्षितम् । पा = पातुम् । अव = अवितुम् । गुप् = गोपायितुम्, गोप्तुम् । त्रस् = त्रसितुम् । उद्विज् = उद्वेजितुम् । शकि = शङ्कितुम् । क्त्वा = भीत्वा । त्रसित्वा । गोपायित्वा गोपित्वा गुप्त्वा । रक्षित्वा । पालयित्वा । त्रात्वा । शङ्कित्वा । पात्वा । रामाद्वेष्यति कालभीमभुजगः । रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम । असज्जनात्कस्य भयं न जायते । अनुगृहाण मां वामे रामान्नास्ति भयं मम । द्रोग्धुर्वै परतो भयम् । यन्तो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च । सरीसृपेभ्यो दष्ट्रिभ्यो भूतेभ्योऽहिभ्य एव च ॥ राजतः सलिलादग्ने श्चोरतः स्वजनादपि । भयमर्थवतां नित्यं मृत्योः प्राणभृतामपि ॥ कस्मादपि भयं नास्ति त्वां स्मरामि सदा प्रभो । यक्षोरक्षःपिशाचेभ्यो नासुरेभ्यः कथञ्चन । भयं नोत्पद्यते तत्र यत्र विप्राः सुसंयताः ॥ मम कुतोऽपि भयं नास्ति । तस्करेभ्यो नियुक्तेभ्यः शत्रुभ्यो नृपवल्लभात् । नृपतिर्निजलोभाच्च प्रजा रक्षेत्पितेव हि ॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः । न शस्त्रानलतोयौघात्कदाचित्सम्भविष्यति ॥ अन्यायेभ्यः कोऽपि शङ्केत भीयाद्वा । दुराचारात्कोऽपि जनः शङ्केत । गुप्-रक्ष्-पा-त्रै-अव-पाल एषां प्रयोगे तृतीयाऽपि-दारान् रक्षेद्धनैरपि । शूलेन पाहि नो देवि ।

पराजेरसोढः १।४।२६॥

पराजेः प्रयोगेऽस ह्योऽर्थोऽपादानं स्यात् । छात्रोऽध्ययनात्पराजयते ग्लायतीत्यर्थः पराजितवान् = ग्लानवानित्यर्थः । असोढ इत्युक्तेर्नेह पञ्चमी जाता-शत्रून्पराजयते (अभिभवति) ।

वारणार्थानामीप्सितः १।४।२७॥

प्रवृत्तिविघातो वारणम् । वारणार्थानां धातूनां प्रयोगे ईप्सितोऽपादानं स्यात् । यवेभ्यो गां वारयति । धान्येभ्यो वृषं निवर्तयति निवारयति वा । ईप्सित इत्युक्ते क्षेत्रे इत्यस्य नापादानम् - यवेभ्यो गां वारयति क्षेत्रे कृषकः ।

अन्तर्धौ येनादर्शनमिच्छति १।४।२८॥

अन्तर्धिः = व्यवधानम् । व्यवधाने सति यो यस्मादात्मनोऽदर्शनमिच्छति तदपादानं स्यात् । कृष्णो मातुर्निलीयते अन्तर्धत्ते (अन्तर्हितो भवति) गोपीभ्यश्च । बालः पितुश्छात्रो गुरोः सेवकः स्वामिनश्चान्तर्धत्ते । अनन्तर्धाने तु नापादानम् - स चौरान्दिदृक्षते ।

आख्यातोपयोगे १।४।२९॥

आख्याता = अध्यापयिता (गुरुः) वक्ता वा । उपयोगो नियमपूर्वकविद्याग्रहणम् । उपयोगे वाच्ये वक्ताऽपादानं स्यात् । शिष्य उपाध्यायाद्वेदमधीते अधीतवान् वा । शिष्यौ गुरोर्वेदमधीयाते अधीतवन्तौ वा । शिष्या गुरोर्वेदमधीयते अधीतवन्तः । गुरोर्वेदं प्राप्नोति अधिगच्छति वा छात्रः । रामो गुरोः (शिक्षकाद् अध्यापकाद्वा) व्याकरणं पठति पठितवान् - शिक्षते शिक्षितवान्वा । तेभ्योऽधिगन्तुं निगमन्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि । तस्माद्गुरोर्विद्या मयाऽधिगता । अहं गुरोर्वेदान्तमधिगच्छामि अधिगतवान् अधिगतो वा प्राप्नोमि प्राप्तवान् प्राप्तः - लभे लब्धवान्, लब्धो वा - मया गुरोर्वेदान्तोऽमधिगम्यते अधिगन्तव्यः, अधिगमनीयः, अधिगम्यः अधिगतः- प्राप्यते, प्राप्तव्यः प्रापणीयः, प्राप्यः, प्राप्तः- लभ्यते लब्धव्यः,लब्भ्यः, लब्धो वा । अधिगच्छति = प्राप्नोति । श्रोता पण्डिताद्भागवतं साधोर्ज्ञानं च शृणोति श्रूतवान्वा - श्रोतारः शृण्वन्ति श्रुतवन्तो वा - श्रोत्रा पण्डिताद्भागवतं श्रूयते

श्रोतव्यम्, श्रवणीयम्, श्रुतं वा - श्रोतृभिःपण्डिताद्भागवतं श्रूयते श्रोतव्यम्, श्रवणीयम्, श्रूतं वा । त्वं मे=मम मुखाद्वास्तविकं तत्वं श्रृणु । अहं भवतो मुखात्पुराणं श्रोतुमिच्छामि (कामये) । हितान्न यः संशृणुते स किं प्रभुः । शिष्यो गुरोर्विद्यां गृह्णाति । स त्वमहं वा भवतो ज्ञानं लब्धवान् । तौ युवामावां वा ज्ञानं लब्धवन्तौ । ते यूयं वयं वा ज्ञानं लब्धवन्तः ।

जनिकर्तुः प्रकृतिः १।४।३०

प्रकृतिर्हेतुरुच्यते । जायमानस्य हेतुरपादानं स्यान् । हेतुः कारणमित्यर्थः । यत उत्पत्याश्रयस्य यो हेतुस्तस्यापादानसंज्ञा भवति । ततः पञ्चमी- ब्रह्मणः प्रजाः प्रजायन्ते प्रजातवत्यः प्रजाता वा। अत्रोत्पत्याश्रयस्य हेतुर्ब्रह्मा । ततः पञ्चमी । एवमन्यच्चिन्त्यम् ।

तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि यज्ञिरे । छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ चन्द्रमा मनसो जातश्चक्षोःसूर्योऽअजायत ॥ पद्भ्याꣳशूद्रोऽजायत । नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णोद्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ ॥ अकल्पयन् ॥ एतस्मादात्मा आत्मन आकाश आकाशाद्वायुर्वायोस्तेजस्तेजस आपः अद्भ्यः पृथिवी च जायते । यतः सतः पुरुषात्केशलोमानि (सम्भवन्ति) तथाक्षरात्सम्भवतीह विश्वम् । हिमाद्रेः पार्वतिराविर्भवति[1], आविर्भूतवती आविर्भूता (स्त्रियाम्-अविर्भूते-ताः) सम्भवति सम्भूतवती सम्भूता वा (पुंसि-आविर्भूतवान्-वन्तौ आविर्भूताः - सम्भूतवान्-वन्तौ-सम्भूताः) । प्रधानाबुद्धिरुत्पद्यते उत्पन्नवती उत्पन्ना वा । बुद्धेरहङ्कार उत्पद्यते उत्पन्नवान्, उत्पन्नो वा । अहङ्कारादेकादशेन्द्रियाणि पञ्चतन्मात्राणि पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि चोत्पद्यन्ते उत्पन्नवन्ति उत्पन्नानि वा । सात्विकादहङ्कारात्पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनश्चेति एकादशको गणो जायते । तामसादहङ्काराद् शब्दस्पर्शरूपरसगन्धाख्यानि पञ्चतन्मात्राणि प्रादुर्भवन्ति । एभ्यः पञ्चतन्मात्रेभ्यः क्रमश आकाशवायुतेजोजलपृथिवीनामकानि पञ्चमहाभूतानि समुद्भवन्ति (जायन्ते) । ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः । देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः ॥ संसारे प्रकृतिपुरुषयोः संयोगात्सृष्टिर्जायते । कौशेयं कृमिजं सुवर्णमुपलादूर्वापि गोरोमतः पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात् । काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना । अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः । त्वत्तो जगद्भवति - तसिलान्तः ।

विशेषः - क्वचिद्बीजप्रदाताऽपदानं क्वचिन्तृतीया विधीयते ।

क) अपादानम् = अपादानेन पञ्चमी निर्दिश्यते - ब्राह्मणाद्वैश्यकन्यायामुत्पन्नो वेण उच्यते। क्षत्रियाद्वैश्यकन्याया सूतो भवति जातितः । क्षत्रियाद्वैश्यकन्यायां जातो माहिष्यः । माहिष्यात्करण्यां जातो रथकारः । रथकारस्तु माहिष्यात्करण्यां यस्य सम्भवः ।

ख) बीजदातुरनुक्तकर्तरि तृतीया विधीयते - वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते (उक्तः)। माहिष्येण करण्यां तु रथकारः प्रजायते (प्रजातः) । स्याच्चण्डालस्तु जनिता ब्राह्मण्यां वृषलेन यः ॥

ग) सम्बन्धविवक्षायां तु षष्ठी - सूत जानासि भद्रं ते भगवान्सात्वतां पतिः । देवक्यां वसुदेवस्य जातो यस्य चिकीर्षयाः ॥ नाशस्यापि रेणुकायां तनयो जातः ।

---

[1] उद्भवति उद्भूतवान्-वती, उद्भूतः - ता, उद्भवः,वा ।

भुवः प्रभवः १।४।३१॥

भवनं भूः - प्रभवत्यस्मादिति प्रभवः । भूकर्तुः प्रभवोऽपादानं स्यात् । हिमवतो गङ्गा प्रभवति प्रभूतवती प्रभूता । (प्रकाशते प्रकाशितवती प्रकाशिता) । हिमवद्भ्यो नद्यः प्रभवन्ति ।

ल्यप्लोपे कर्मण्यधिकरणे च-वा.-ल्यप्लोपे कर्मण्यधिकरणे चापादानं स्यात् । स प्रासादाज्जनान्प्रेक्षते प्रासादमारु ह्य आसने उपवेश्य प्रेक्षत इत्यर्थः (प्रेक्षितवान् - पश्यति दृष्टवान्वा) - कर्मणि - तेन प्रासादाज्जनाः प्रेक्ष्यन्ते प्रेक्षितव्याः प्रेक्षणीयाः प्रेक्षिताः - दृश्यन्ते द्रष्टव्याः दर्शनीयाः, दृष्टाः, दृश्यमानाः, सुदर्शाः, दुर्दशा वा । बधूः श्वशुराल्लज्जते -श्वशुरं वीक्ष्य बधूर्लज्जत इत्यर्थः । (लज्जितवती लज्जिता, जिह्रेति ह्रीतवती ह्रीता - व्रीडयते व्रीडितवती व्रीडिता) ।

गम्यमानापि क्रिया कारविभक्तीनां निमित्तम्[1] = कस्मात्त्वमहं नद्या आगतः । कुतो भवानहं नगरादायातः । **यतश्चाध्वकालनिर्माणं तत्र पञ्चमी - वा.** - यदवधित्वेनाश्रित्याध्वनः कालस्य च निर्माणं परिच्छेदः प्रतिपद्यते ततः पञ्चमी स्यात् । **तद्युक्तादध्वनः प्रथमासप्तम्यौ = वा.** - तेन पञ्चम्यन्तार्थेनार्थद्वारा युक्तान्निर्मीयमाणाध्ववाचिनः प्रथमासप्तम्यौ स्तः । **कालात्सप्तमी च वक्तव्या =** वा. = क) वनाद्ग्रामो योजने योजनं वास्ति । प्रयागात्प्रतिष्ठापुरं क्रोशः क्रोशे वास्ति । योजनं क्रोश इति इमे प्रथमान्तैकवचनरूपौ ज्ञेयौ । ख) कालावधौ - कार्तिक्या मासे आग्रहायणी । उद्वाहात्प्रथमे शुचौ यदि वसे द्भर्तुगृहे कन्यका । विवाहाच्चतुर्थे दिने चतुर्थी भवति ।

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते २।३।२९॥

अन्य आरात् इतर ऋते दिक्वाचकशव्द अञ्चूत्तरपदशब्द आच् आहि एतैर्योगे पञ्चमी स्यात् । परः, बहि, अपरः,भिन्नः, परतरः, अनन्तरः, ऊर्ध्वम्, अधिकः, अतिरिक्तः अधि आरभ्य प्रभृति, पुरा, अन्यत्र अन्यथा अवधि एभिर्योगेऽपि पञ्चमी विधीयते । अधिकः अधि आभ्यां योगे सप्तम्यपि भवति । अनयोः सप्तम्यधिकरणे लेखिष्यते । स्मरणीयं यत् - अस्मिन्सूत्रप्रसङ्गे संगृहीता परादिशब्दाः कासामपि विभक्तीनां कस्मिन्नपि वचने च प्रयुक्ता भवेयुः । तेभ्योऽव्ययेभ्यस्तसिलान्तेभ्यश्च शब्देभ्यः पूर्वं पञ्चम्यां निष्पन्नं किमप्यन्यत्पदमवश्यं भवेत् ।

१) लोके मम कृष्णादन्यः अन्यतरः, इतरः, भिन्नः, अपरो वा रक्षको नास्ति । जगति मम कृष्णादन्यः अन्यतरः, इतरः, भिन्नः, अपरो वा रक्षकःकोऽस्ति । संसारे मम कृष्णादन्यः अन्यतरः, इतरः, भिन्नः, अपरो वा को मां रक्षति (त्रायते दयते गोपायति अवति पालयति वा) ।

तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात् । बन्धमोचनकर्ता तु स्वस्मादन्यो न कश्चन । दुःखमोचनकर्ता तु स्वस्मादन्यो न कश्चन । को वा दयालुः स्मृतिकामधेनुरन्यो जगत्यां रघुनाथकादहो । अन्यो न दृश्यते त्राता त्वत्तः कमललोचन । धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते । रामादितरो मम पालको रक्षकस्त्राता वा कोऽपि नास्ति । विश्वासघातादन्यत्पापतरं कर्म नास्ति । आत्मा देहाद्भिन्नः । ईश्वरो जगतो भिन्नो नास्ति । ब्रह्म जगतो भिन्नं नास्ति । देहस्तु भिन्नः पुरुषात्समीक्ष्यते को वाऽत्र भोगः पुरुषेण भुज्यते । देह आत्मनो भिन्नः स्थातुं न प्रभवति न समर्थो वा । ब्रह्मणोऽभिन्नत्वं आत्मा । अयम्, एषः असौ स वा ततो न भिन्नः । लोके त्वत्तो मत्तश्चान्योऽधिकतरो धन्यतरो वा कोऽपि नास्ति । नान्यं तस्मान्नाचिकेता वृणीते । नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति । गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥

[1] येन प्रश्नवाचकेन किंशब्देन उत्तरे गम्यमाना क्रियाऽपेक्ष्यते तदा तत्प्रश्चवाचकशब्दः कारकविभक्तीनां निमित्तं भवति ।

२. आरात् = समीपे, अन्तिके दूरे वा

वनादारात् ग्रामोऽस्ति । ग्रामादाराद् वनं विद्यते । कृष्णादाराद्गोपः, गोपिकाः, उद्धवः, अर्जुनः भक्ता वा सन्ति । रामादारात् भक्ता ऋषयश्च विद्यन्ते । शिवादाराद् नन्दिभृङ्गीवीरभद्रकाल्यादयो वर्तन्ते ।

३. ऋते=विना वर्जयित्वा=अस्य योगे द्वितीया तृतीया पञ्चमी च भवति । अत्र पञ्चमी प्रस्तूयते

यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवशङ्कल्पमस्तु । अशुभकर्मणो जीवस्य ऋते ज्ञानान्न मुक्तिः । अभ्यासादृते विद्या नायाति न स्मर्यते न वर्धतेऽन्ते च विस्मर्यते । तेभ्यश्च बलिमादध्याद्धीनकोशो महीपतिः । ऋते ब्रह्मसमेभ्यश्च देवकल्पेभ्य एव च ॥ काव्ये रसादृते कश्चिदर्थो नहि प्रवर्तते । महान्त एव महतामर्थं साधयितुं क्षमाः । ऋते समुद्रादन्यः को बिभर्ति वडवानलम् ॥ नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः । तस्माद् ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् ॥ नहि दण्डादृते शक्यः कर्तुं पापविनिग्रहः । यस्मादृते किञ्चन कार्यं न सिद्धयति न चलति तं गृह्णीयात् न त्यजेच्च । ज्ञानादृते न सुखं न मुक्तिश्च । धनादृते न सुखम् । कृष्णादृते किं करोसि । रामादृते कस्यापि नेच्छाऽस्ति । रामात्कृष्णाद्वा ऋते कमपि न जानामि ।

४. दिग्वाचकशब्दः

शब्दोऽयं विशेषणरूपे स्मरणीयः । दिशि दृष्टः शब्दो दिक्शब्दः । तेन देशकालवृत्तिना योगेऽपि पञ्चमी - ग्रामात्पूर्वः, दक्षिणः, पश्चिमः, उत्तरो वा पर्वतः । ग्रामात्पूर्वा दक्षिणा पश्चिमा उत्तरा वा नदी । ज्येष्ठात्पूर्वो वैशाखः । आषाढात्पूर्वो ज्येष्ठः । ग्रीष्मात्पूर्वो वसन्तः । वसन्तादुत्तरो ग्रीष्मः । एवमन्याश्चिन्त्याः । उत्तरतः = उत्तरपट्टी-तर्फ-उत्तर तरफ-ओर = गृहादुत्तरतो मार्गः, राजमार्गो वा। एवमन्ये चिन्त्याः । अतीताया रात्रेः पश्चादर्धेनागमिन्याः (रात्रेः) पूर्वार्धेन च सहितः कालो (दिवसः)ऽद्यतनस्तद्भिन्नोऽनद्यतनः । अनद्यतनो द्विविधो भूतो भविष्यच्च । अतीतः (व्यतीतः) समयो भूतः आगामी समयो (कालः) भविष्यच्च प्रोच्यते । यतः उच्यते कालो(समयः)ऽनद्यतनभूतोऽनद्यतनभविष्यच्च। अद्यतनकालो वर्तमानकालो ज्ञेयः । अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् । मम गृहात्पूर्वस्यां पूर्वायां वा दक्षिणस्यां दक्षिणायां वा महान्वृक्षोऽस्ति ।

५. अच्चूत्तरपदशब्दः = प्राक् अर्वाक् इत्यादि

नगरात्प्राक् पर्वतोऽस्ति । गृहात्प्रत्यक् उदग्वा मार्गो विद्यते । कूपात् अर्वाक् शिंशपावृक्षो वर्तते। प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते । ण्वुल्तृचावित्यतः प्राक् कृत्यप्रत्ययाः स्यु । ग्रामात्प्राची अवाची प्रतीची उदीची वा नदी विद्यते । शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् । कामक्रोधो द्भवं वेगं स युक्तः स सुखी नरः ॥ उत्पत्तेः प्राक् कार्यं कारणेऽव्यक्ततत्वेन निषीदति (तिष्ठति) । तस्मै हितमित्यतः प्राक् यदधिक्रियते । स तस्मात्पूर्वतः, पश्चिमतः, दक्षिणतः, उत्तरतो वा वसति सोऽस्ति वा । ततः प्राक् (पूर्वं) भवान् एतत्कार्यं न कुर्यात् । पूर्वशब्दोऽग्रार्थेऽपि प्रयुज्यते ।

६. आच्=दक्षिणा उत्तरा । आहि=दक्षिणाहि उत्तराहि=दक्षिणतर्फ - दक्षिणतरफ, उत्तरतर्फ-उत्तरतरफ

ग्रामाद्दक्षिणा गृहाद्दक्षिणाहि वा राजमार्गोऽस्ति ।
ग्रामादुत्तरा गृहादुत्तराहि वा नदी वनं वा विद्यते ।
दक्षिणा दक्षिणाहि उत्तरा उत्तराहि चैतेऽव्यया ज्ञेयाः ।

७. आरभ्य, प्रभृति (आरम्भं कृत्वा) - एतौ समानार्थकौ ज्ञेयौ

आभ्यां योगेऽन्यशब्दात्पञ्चमी भवत्येव । एताभ्यां प्रागपञ्चम्यन्तस्य स्थाने विहितं तसिल्प्रत्ययान्तपदमपि प्रयुज्यते । तसिलन्ताः = यतः, ततः, इतः, अतः, ग्रामतः, पुरुषतः, नारीतः, कुकर्मत इत्यादि । वेदस्य प्रथमाध्यायादारभ्य प्रभृति वा पाठं कुर्यात् । यौवनावस्थाया आरभ्य प्रभृति वा हरिं सेवेत । कार्तिकात्प्रभृति शुभं भविष्यति । गीतायाः प्रथमाध्यायादारभ्य प्रभृति वा पाठं कुर्यात् समाप्नुयाच्च । अथ तौ बाल्यात्प्रभृति सहचारिणावास्ताम् । सप्तशत्याः प्रथमाध्यायात्पाठमारभेत - कर्मणि - सप्तशत्याः प्रथमाध्यायात्पाठ आरभ्यते आरब्धव्यः, आरम्भणीयो वा । शुको जन्मन आरभ्य प्रभृति वा ज्ञानं प्रावर्तत । अव्ययात् = अद्यारभ्य प्रभृति वा मन्दिरं यामि वेदं पठामि च । सोऽद्य प्रभृति तस्य दासोऽभूत् । अद्यप्रभृति प्रसादनिग्रहादिकं त्वयैव कार्यम् । इतः प्रभृति यावज्जीवं मयाऽऽत्मा भवते दत्तः । इत आरभ्यात्र पर्यन्तमेकां रेखां विदध्यात् । तदद्यप्रभृति आवयोः उलूककाकयोः सान्वयं वैरं सञ्जातम् । अद्यारभ्य व्रतं करोमि । वैदिकधर्मेषु समुल्लिखिता गर्भाधानत आरभ्य (प्रभृति) अन्त्येष्टिपर्यन्ताः संस्काराः सनतनधर्मिभिः क्रियन्ते । शैशवात् आरभ्याद्यपर्यन्तं शाठ्यं नाकरवम् । सप्तशत्याः प्रथमाध्यायत आरभ्य त्रयोदशपर्यन्तस्याध्यायस्य पाठं समाप्नुयात् । ततः प्रभृति कार्यस्य प्रारम्भो जातः । अस्याः कथाया वार्ताया वा मूलादारभ्य रहस्यं मां वद ।

विशेषः - आरभ्येत्यस्य पदस्याव्ययविवक्षायाः कृते पञ्चमी गौणक्रियाविवक्षायाः कृते द्वितीया च भवति । उभय्यामवस्थायां तस्य पदास्यार्थः "आरम्भं कृत्वा" इत्येव भवति । उक्तञ्च - आरभ्येति क्रियापेक्षया कर्मत्वेन विवक्षायां द्वितीयैव, "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इत्युक्तेः । तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः । अन्यत्रापि यथावसरं प्रयोगो विचारणीयः ।

८. परः = अस्य सर्वासां विभक्तीनां वचनानां रूपाणि ज्ञेयानि । परशब्दादग्रे सन्निधावन्यशब्दस्य पञ्चम्याः किमपि पदं प्रयुज्यते

अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य नुम् । अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्याङ्गस्य नुम् । अं अः इत्यचः परावनुस्वारविसर्गौ स्तः । आमन्ताल्लिट्पराः कृभ्वस्तयोऽ-नुप्रयुज्यन्ते । नावसथ्यात्परो धर्मो नावसथ्यात्परं तपः । नावसथ्यात्परं श्रेयो नावसथ्यात्परं यशः ॥ नावसथ्यात्परा सिद्धिर्नावसथ्यात्परा गतिः ॥ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ इन्द्रियेभ्यः पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु पराबुद्धिर्यो बुद्धेः परतस्तु सः ॥ प्राणायामात्परं न तपः । नास्ति सत्यात्परो धर्मो नानृतात्पातकं महत् । नास्ति दानात्परं मित्रमिह लोके परत्र च ॥ अचः परस्य यरो द्वे, वा स्तो न त्वचि । डात्परस्य सस्य धुड्वा । अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वास्तः । रेफषकाराभ्यां परस्य नस्य णः स्यादेकपदे । अतोऽङ्गात्परस्य भिस ऐः स्यात् । आवर्णान्तादङ्गात्परस्यौङः शी स्यात् । अतोऽङ्गात्परयोःस्वमोरम् स्यात् । नद्यन्तात्परेषां ङितामाडागमः स्यात् । स कदापि सत्यात्पराङ्मुखो विमुखो वा न भवति । परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः । ततः पश्चात्स समायतः । यतः, इतः, ततो वा परे स्थित आत्मा मित्रं ज्ञेयः । परिनिविभ्य परेषामेषां सस्य षः ।

९. परतरम्

यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता । रामान्नास्ति परायणं परतरं रामस्य दास्योऽस्म्यहम् । कृष्णान्नास्ति परायणं परतरं कृष्णस्य दासोऽस्म्यहम् । राष्ट्रान्नास्ति परायणं परतरं राष्ट्रस्य दास्योऽस्म्यहम् । मत्तः परतं नान्यत्किञ्चिदस्ति धनञ्जय । नातः परतरं पुण्यं नातः परतरा सखा । नातः परतरा विद्या नातः परतरं तपः । नातः परतरो धर्मो नातः परतरा गतिः ॥

१०. अपरः

महेशान्नापरो देवो महेशान्नापरा स्तुतिः । अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः पदम् ॥ नहि गोत्रादपरो गोत्रप्रत्ययः । एतस्मादपरं किञ्चिन्मनः शुद्धचै न विद्यते । प्रियङ्गपालीव प्रकामहृद्या न कालिदासादपरस्य वाणी । परतः परतरतः अपरतः इतरतः, अन्यतश्चैते तसिलान्ताः ।

पार शब्दयोगे तु षष्ठी,पारे मध्ये षष्ठचा वेति वचनात्-विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ विषयाख्यो ग्रहो येन सुविरक्त्यसिना हतः । स गच्छति भवाम्बोधेः पारं प्रत्यूहवर्जितः ॥ त्वत्पादभाजो भगवन्नवापुः पारमध्वनः । अहमेकदा संसारसागरस्य पारं यामि ।

११. पुरा

गर्भाधानमृतौ पुंसः सवनः स्पन्दनात्पुरा । वृद्धेभ्यश्च युवभ्यश्च भोज्यन्ते शिशवः पुरा। ज्ञानोदयात्पुरारब्धं कर्म ज्ञानान्न नश्यति ।

१२. बहिः

नगराद्बहिर्विद्यालयो नास्ति । स ग्रामाद्बहिर्न याति । गृहाद्बहिः कोऽपि न गच्छेत् न यायाद्वा। गृहाद्बहिः कोलाहलोऽस्ति कः क्रन्दति वा । सर्वे छात्रा विद्यालयाद्बहिर्निरगच्छन् निर्गतवन्तः, निर्गताः, निरक्राम्यन्, निरक्रामन्, निष्क्रान्ताः, निरसन्, निःसृतवन्तः, निःसृता वा । ग्रामकण्टको ग्रामाद् देशकण्टको देशाद्वा बहिर्निरगच्छत्, निर्गतवान्, निर्गतः, निरसत्, निःसृतवान्, निःसृतो वा । बहिस्तेभ्यः कृत्वा स्वपदशरणं मानय विभो । राजधान्या बहिः कोऽपि गन्तुं नेच्छति । स तस्माद्बहिर्भूतः । त्वं गृहाद्बहिर्न गच्छ । स समाजाद्बहिर्जातः ।

१३. ऊर्ध्वम् = उपरि = उपरियोगे षष्ठ्यपि भवति

स मुहूर्तादूर्ध्वं तिष्ठति वसति वा । मुहूर्तादूर्ध्वं यजेत् यजेत वा शिवम् । इत ऊर्ध्वमापादसमाप्तेरधिकारोऽयम् । इत ऊर्ध्वमापादसमाप्तेराभीयम् । अत ऊर्ध्वं पतितसावित्रिका भवन्ति । वरयात्रायां शतात् सभायां द्विशतात् जनकपुरधाम्नि रामनवमीमेलापके लक्षाच्चोर्ध्वं जना आगच्छन् आगतवन्तः आगता वा । मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा त्वं छन्दोऽधीष्व ।

१४. अन्यत्र

चित्रम् ! आम्नायादन्यत्र नूतनश्छन्दसामवतारः । आज्यादन्यत्रान्येन द्रव्येण होमः कर्तव्यः। रमणादन्यत्र तु रञ्जयति तृणदानेन । यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः । समासादन्यत्र सन्धेर्वैकल्पिकं वर्तते । अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मत्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यति तद्वद ॥

१५. अन्यथा

अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा । स्मरणीयां यत् - बहिः उपरि ऊर्ध्वम् अन्यत्र अन्यथा एभ्यः पूर्वं सन्निधौ पञ्चम्यां सिद्धमन्यत्किमपि पदं भवति।

१६. अनन्तरम्

इयं गौर्मासादनन्तरमधिकं दुग्धं दाता । स द्विमासादनन्तरं वाराणसीं याता । पञ्चदिनादनन्तरं कार्यं प्रारब्धास्मि । पुराणपत्रावगमादनन्तरं लतेव सन्नद्धमनोज्ञपल्लवा । पाणिग्रहणविधेरनन्तरं लाजादिहवनं क्रियते । एतत्कार्यस्य समाप्तेरनन्तरं तत्कार्यं कुरु कुरुष्व प्रारभस्व वा ।

१७. अधिकः, अधि=अतिरिक्तः समधिकः इत्यमरः

अधिकशब्देन योगे सप्तमीपञ्चम्याविष्यते - वा. - इति वार्तिकेन अधिकेन योगे सप्तमी पञ्चमी च भवतः । तथैव अधिशब्देनापि । क) तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृतम् । अस्य मूल्यं महत्वं वा तस्माद् (ततः) अधिकम् । अद्यत्वे कोऽपि लक्षेभ्योऽधिकानि धनानि अर्जते अर्जयते वा गृहे धनागारे (कोशागारे) निदधाति च । ख) त्वत्तोऽधिकः कोऽस्ति । मत्तोऽधिको वायुरस्ति । उपनिषदोऽष्टोत्तरशततोऽधिका आसन् सन्ति च । अद्य सभायां गोष्ठ्यां विद्यालयस्य महोत्सवे वा जनाः पञ्चशततोऽधिका आसन् । ग) सत्वादधि महानात्मा महतो व्यक्तमुक्तमम् । सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । अधेर्योगे सप्तमी अधिकरणे लेखिष्यते ।

१८. अतिरिक्तः व्यतिरिक्तः = अन्यः

क) सर्वेभ्योऽतिरिक्तः स सारोऽस्ति । न ह्यस्त्यविद्या मनसोऽतिरिक्ता मनो ह्यविद्या भवबन्धहेतुः । संसारे त्वत्तोऽतिरिक्तः (व्यतिरिक्तः) कोऽपि न विद्यते अस्ति वा । मत्तो व्यतिरिक्तः कश्चिन्न । संसारे आत्मनो व्यतिरिक्त विषयो न चिन्तनीयः ।

ख) अधिकार्थे-अति = पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते । धार्मिकभावनयैव मानवाः पशुभ्योऽतिरिच्यन्ते (अधिका भवन्ति) ।

१९. अवधि पर्यन्तम् = सम्म, तक, पर्यन्त - सीमा, तक, पर्यन्त

एतौ शब्दौ सीमाबोधार्थकौ स्तः । सीमाऽन्तिमा भवति । यत इमौ शब्दौ यस्य शब्दस्यान्तिमे प्रयुज्येते तस्य शब्दस्यार्थसहितः पर्यन्ता(सीमा)र्थः क्रियते । इमावाकृत्याऽव्ययौ ।

१-क) अवध्यन्तशब्देन योगे पञ्चमी विधीयते । फाल्गुनाद्वैशाखावधि कार्यं भविष्यति । रविवाराच्छुक्रवारावधि विद्यालये पठनं पाठनं चधिकरणे (कार्यालये) च कार्यं भविष्यति । श्रावणात्पौषावधि दक्षिणायनं माघादाषाढावधि चोत्तरायणं भवति प्रोच्यते वा । प्रातः कालात्सायङ्कालावधि सर्वे जना यत्र तत्र भ्रमन्ति (पर्यटन्ति) । प्राचीनकालतोऽद्यावधि वेदाः सर्वैर्मानवैः पूज्यन्ते शिरसा धार्यन्ते तेषामेकरूपता च लभ्यते । भारतीयदर्शनानि वैदिककालादारभ्या(प्रभृति)द्यावधि अविच्छिन्नरूपेण सन्ति प्रवहन्ति च ।

ख) पूर्वपञ्चम्यन्तपदाद्विनापि - सप्तजन्मावधि तव पुत्रो नैव च नैव च । सत्यं शौचं दया दानमेकभक्त तु भोजनम् । वर्षावधि स्त्रिया कार्यं तेन पुत्रोऽपि निर्मलः ॥ प्रातः कालं समारभ्य जपेन्मन्त्रं दिनावधि । कतिपयायाः संहितायाः पदपाठस्त्वद्यावधि अमुद्रित एवास्ति । बहुभिर्व्याख्यातान्यपि सूत्राणि बहुत्रानाविष्कृतभावान्यद्यावधि वर्तन्ते । अत एवं वेदमन्त्राणां विनियोगेऽनेकेषामृषीणां नामान्यद्यावधि शास्त्रज्ञैर्याज्ञिकैर्वा प्रयुज्यन्ते स्मर्यन्ते पूज्यन्ते च । तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः । दण्डिनो द्विसन्धानकाव्यमद्यावधि अप्राप्यमस्ति नावाप्यते वा । एतत्कार्यं वैशाखावधि भवति तत्पश्चान्न ।

२-क) पर्यन्तान्तस्थशब्देन योगे पञ्चमी - ग्रामाद्वनपर्यन्तं नगरपर्यन्तं वा मार्गोऽस्ति । तव गृहाद्विद्यालयपर्यन्तं रम्याणि गृहाणि सन्ति । पूर्वाया मेचीनद्याः पश्चिममहाकालीपर्यन्तं महेन्द्रराजमार्गोऽस्ति । रघुवंशे दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिताऽस्ति ।

ख) कालबोधकशब्दपूर्वकं पर्यन्तपदम् - एतत्कालपर्यन्तम्, अद्यपर्यन्तम्, इदानींपर्यन्तम्, अधुनापर्यन्तम्, प्रातःकालपर्यन्तम्, सायङ्कालपर्यन्तम्, दशदिनपर्यन्तम्, दशवादनपर्यन्तम्, चतुर्वादनपर्यन्तम्, तत्रपर्यन्तम्, अत्रपर्यन्तम्, एतावद्दिनपर्यन्तं - चैभिर्योगे क्वचित्पञ्चमी क्वचिन्न - १) प्राचीनकालादद्यपर्यन्तं वेदाः सर्वैः, पूज्यन्ते पूजनीयाः(पूज्याः) वा सन्ति । प्राचीनकालादद्यपर्यन्तमीश्वरस्य चर्चा केन न कृता तं के नाऽस्मरन् । २) पूर्वपञ्चम्यन्तपदं विनापि - इदानींपर्यन्तं कोऽपि नायातः । अधुनापर्यन्तं कार्यं नाभवत् । एतावद्दिनपर्यन्तं ब्रह्मत्वं धारितं मया । भवान्तत्रपर्यन्तं गन्तुं प्रभवति प्रभुर्वा । एवमन्ये प्रभुवाचकशब्दा अपि स्मरणीयाः । इत्यादि ।

विशेषः - अवधिः पर्यन्तश्च शब्दौ विशेषणरूपेऽपि प्रयुज्येते

१) अवधिः = अयं पुंसि हरिवत्पठचते-वासनानुदयो भोग्ये वैराग्यस्य परो (अन्तिमो)ऽवधिः । इति यतोऽवधिः = यहाँसंम यत्‌को सीमा वा प्रयोग हो - यहाँतक यत् का सीमा या प्रयोग है । इति छयतोः पूर्णोऽवधिः = यहाँसंम छ र यत्‌को पूर्ण सीमा या प्रयोग हो - यहाँतक छ और यत् का पूर्ण सीमा या प्रयोग है ।

२) पर्यन्तः = सम्म तक - तक = मान्तेन रहितस्य अस्य रूपाणि रामवद्भवन्ति -गीताया प्रथमाध्यायतोऽष्टादशपर्यन्ता अध्यायाः सन्ति । त्रैवर्णिकानां जन्मतोऽन्त्येष्टिपर्यन्ताः संस्काराः प्रोक्ताः विद्यन्ते ते त्रैवर्णिकैः क्रियन्ते च । शुक्लयजुर्वेदे प्रथमाध्यातश्चत्वारिंशत्पर्यन्ता अध्याया वर्तन्ते ।

२०. सीमा(पर्यन्ता)र्थे यावत्

क) निश्चितस्थानबोधकात्पञ्चम्यन्तपदात्परे द्वितीयान्तेन युक्तो यावच्छब्दः प्रयुज्यते । पूर्वस्या मेचीनद्याः (नदीतः) पश्चिमां महकालीं यावत्सर्वो नेपालः स्वतन्त्रो (स्वधीनो)ऽस्ति । काश्मीरात्केरलं यावत्सर्वं भारतं स्वाधीनमस्ति । पारसीकातो हिन्दोशियां यावत्तस्य राज्यविस्तारः । विक्रमार्कनृपसमयात् (यतः) ६९५ वर्षपूर्वं यावत् नृपाणां शासनकालः पुराणेषु समुल्लिखितः प्राप्यते। आदिकालात्(लतः)अद्यतनं यावद्भारतवर्षे ये विद्वांसः सञ्जातास्तेऽधुनापि श्रुतिस्मृतिपुराणामहाभारतरामायणादिपठनेनैव विद्वांसः सन्ति ।

ख) ... आरभ्य .... यावत् = आरभ्यपदेन योगे पञ्चमी यावता योगेन द्वितीया चैकस्मिन्वाक्ये - रघुवंशकाव्यं प्रथमसर्गादारभ्याऽष्टादशसर्गं यावत् अतिसुन्दरं वर्तते । संस्कृते ककारादारभ्य हकारं यावत् त्रयस्त्रिंशद्व्यञ्जनवर्णाः सन्ति । साहित्ये वक्रोक्तेर्विस्तारो वर्णादारभ्य प्रबन्धं यावदस्ति ।

ग) अव्ययेन सह यावत् = अत्रयावत् तत्रयावत् वा सुन्दरो मार्गोऽस्ति । अद्ययावत् मम शोभनमस्ति । प्राचीनकालतोऽद्ययावत् वेदा यथावत् विद्यन्ते त्रैवर्णिकैः पठचन्ते सर्वैर्जनैरनुसन्धीयन्ते पूज्यन्ते शिरसा धार्यन्ते च । अद्ययावत् मम कार्यं नाभवत् । अद्ययावत् कोऽपि नायातः कार्यमपि न जातम् । तत्रयावत् त्वं गच्छ पठ विलोकय (पश्य) वा । अधुनायावत् कोऽपि नायात् कार्यमपि नाभूत्। तत्रयावद्गन्तुमत्रयावदागन्तुं वा समर्थः(क्षमः) सः । केवलं क्रियाविशेषणे जाते तु द्वितीया न भवति - यावद्गच्छति तावत्सुखं भवेत् ।

अप परि आङ् प्रति एषां कर्मप्रचवनीयसंज्ञा । एतैर्योगे पञ्चमीविधानम् -

अपपरी वर्जने १।४।८८॥

अप परि एतौ वर्जनेऽर्थे कर्मप्रवचनीयौ स्तः ।

आङ्मर्यादावचने १।४।८९॥

मर्यादायामाङ् कर्मप्रवचनीयः स्यात् । वचनादभिविधावर्थेऽपि । तेन विना इति मर्यादा, तेन सह इत्यभिविधिश्च बोध्यः । मार्यादापदेन सीमा अभिविधिपदेनासीमश्च ज्ञेयः । अभिविधेरर्थोऽभिव्यापको व्यापकश्चोभावपि प्रोच्येते ।

पञ्चम्यपाङ्परिभिः २।३।१०॥

अप आङ् परि एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् । पूर्वं हरिशब्देन सह स्थितयोरपपरिशब्दयोः "अपपरि वर्जने" इत्यनेन मुक्त्या सह स्थितस्य आ इत्यस्य च "आङ्मर्यादा." इत्यनेन कर्मप्रवचनसंज्ञायां ततः हरेर्मुक्तेश्च पञ्चमी विधीयते । ततः अप परि वा हरेः (वर्जनेऽर्थे - हरिं त्यक्त्वा) संसारोऽस्ति । लक्षणादौ तु - हरिं परि इति प्रयोगे द्वितीया भवति । मर्यादाया अर्थे आङ् - मर्यादायां सीमा अवधि पर्यन्तश्च शब्दा गृह्यन्ते । यतोऽस्मिन्नर्थे - आमुक्तेः[1] (मुक्तेःपर्यन्तं मुक्तेप्राग्वा) संसारोऽस्ति । आलयात् = आमरणपर्यन्तमामरणात्प्राग्वा जीवनं संसारो वा । अभिव्यापके (व्यापके)ऽर्थे - आसकला(आसंसारा)द्ब्रह्म ईश्वरो वाऽस्ति = ब्रह्म ईश्वरो वा सकलमभिव्याप्य (ब्रह्म सर्वत्र व्यापकमीश्वरःसर्वत्र व्यापकश्च भूत्वा) तिष्ठति वसति वा । अनेनाऽऽसकलशब्देन स्वर्गो मर्त्यः पातालं च गृह्यते । आबालेभ्यो हरिभक्तिः । एवं सर्वत्र प्रयोगो बोध्यः ।

अन्यान्युदाहरणानि - आवनाद्गच्छ त्वम् । अहमानद्या गच्छामि । आषोडशवर्षाद्ब्रह्मणस्य नातीतकालो भवति, आद्वाविंशाद्राजन्यस्य आचतुर्विंशाद्वैश्यस्य, आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते । आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः । अधिकारोऽयमाशास्त्रसमाप्तेः । आतृतीयाध्यायसमाप्तेरधिकारोऽयम् । आद्वाराद्विकीर्णाः शर्कराः सन्ति । इत ऊर्ध्वमापादसमाप्तेराभीयम् । आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् । कथामामूलाच्छ्रोतुमिच्छामि । आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥ आपञ्चमपरिसमाप्तेरापादपरिसमाप्तेर्वाऽधिकारोऽयम् । अहं मम गृहे भवतो गृहे वा आसप्ताहाद्भागवतं शृणोमि । पुषादयस्तु आगणान्तादिति प्रोच्यन्ते । तवाऽऽमासात्कार्यं भविष्यति अहमावर्षात्तीर्थे तिष्ठामि । स आद्विवर्षादात्रिवर्षाद्वा तीर्थे वसति । अहमादिनाद्गृहे वसामि ।

प्रतिः प्रतिनिधिप्रतिदानयोः १।४।९२॥

प्रतिनिधौ प्रतिदाने चार्थे प्रतिः कर्मप्रवचनीयसंज्ञः स्यात् । मुख्यस्याभावे तत्सदृशो योऽन्यो दीयते गृह्यते निर्दिश्यते वा स प्रतिनिधिर्भवति । प्रतिदानं विनिमयः । एकपदार्थेन (एकवस्तुना) समानमन्यपदार्थग्रहणं प्रतिदानम् । स पदार्थविनिमयो वस्तुविनिमयो वाऽपि प्रोच्यते ।

प्रतिनिधिप्रतिदाने च यस्मात् २।३।११॥

कर्मप्रवचनीयैर्येगे पञ्चमी स्यात् । क) प्रतिनिधेरर्थे प्रति- १. प्रद्युम्नः कृष्णात्प्रतिवर्तते - प्रद्युम्नः कृष्णस्य प्रतिनिधिरस्ति, २. कृष्णः पाण्डवेभ्यः प्रतिविद्यते - कृष्णः पाण्डवानां प्रतिनिधिरस्ति,

---

[1] अव्ययीभावसमासे आङ् मर्यादाभिविध्योरिति सूत्रेण वैकल्पिकसमासे कृते समस्तशब्दो नपुंसकं भवति । आमुक्तेरिति (मुक्तिपर्यन्तं मुक्तेःप्राग्वा) आमुक्ति संसारः । आसकलं ब्रह्म ईश्वरो वा आबालकं हरिभक्तिः । अत्र पञ्चमी द्वितीया च फलिते स्तः ।

३. प्रजानुरञ्जनपरो राजाकल्पद्रुमात्प्रति । अनुरक्तप्रजावर्गः कामधेनुव्रजात्प्रति । अनुरक्तप्रजावर्गः (जनता) कामधेनुव्रजस्य (राज्ञः) प्रतिनिधिरस्ति । पञ्चम्यन्तस्य स्थाने तसिल्[१] - प्रद्युम्नः कृष्णतः प्रतिमन्यते - प्रद्युम्नः कृष्णस्य प्रतिनिधिर्मन्यते ॥ ख) प्रतिदाने (विनिमये)ऽर्थे प्रति - जना माषान्तिलेभ्यः प्रतियच्छन्ति (विनिमयं कुर्वन्ति) । ग्रामिणस्तैलात्घृतं घृतात्तैलं वा धान्येभ्यो गोधूमान् गोधूमेभ्यो धान्यानि वा प्रतियच्छन्ति । माषेभ्यः प्रतियच्छन्ति तिलान्तेमनकाङ्क्षिणः । तिलेभ्यःप्रतियच्छन्ति माषान्तपर्णकाङ्क्षिणः ।

अकर्तर्यृणे पञ्चमी २।३।२४॥

कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात् । हेत्वर्थे हेताविति सूत्रेण प्राप्ता तृतीयाऽनेन सूत्रेण बाध्यते । शताद्वद्धः । अकर्तर्यर्थे विहिते तु तृतीयैव भवति न तु पञ्चमी - शतेन (रूप्यकैः) बद्धो बन्धितो वा ।

विभाषा गुणेऽस्त्रियाम् २।३।२५॥

गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्पक्षे तृतीया च । य एक एव शब्दो गुणवाचको हेतुवाचकश्च भवति बुध्यते वाऽस्माच्छब्दात्पञ्चमी तृतीया च विधीयते केवलं स्त्रीवाचकशब्दात्तु तृतीया । गुणहेतुवाचकशब्दाः - जाडचम्, पाण्डित्यम्, सामर्थ्यम्, सौन्दर्यम्, माधुर्यम्, मौर्ख्यम्, मौढ्यम्, मार्दवम्, लावण्यम्, पाटवमित्यादि ।

१- जाडचाज्जाडचेन वा बद्धो जनः किं करोति । दुःखाद् दुःखेन वा मुक्तो (विमुक्तो) जनः सुखमानन्दं वा लभते (विन्दते अधिगच्छति प्राप्नोति) । द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् । तथा विद्वान्नामरूपाद्विमुक्तः । हर्षमर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः । सर्वेषां ज्ञानेनज्ञानाद्वा विद्यया विद्याया वा मुक्तिः (विमुक्तिर्मोक्षो वा) अज्ञानेनाज्ञानाद्वा बन्धनम् । श्रीमदभागवतान्मुक्तिर्निश्चयेन भवेज्जनाः । विषयेभ्यो विनिर्मुक्तो ब्रह्मानन्दं च विन्दते (प्राप्नोति लभते अधिगच्छति) अमृतमश्नुते । विषयस्तु स्वर्गमर्त्यपाताललोकपर्यन्तं भवति । यतो विषयी ब्रह्मानन्दं न लभते विषयानन्दं तु । विषयासक्तस्य पुनः पुनर्जन्म मरणं च भवति । गुणे किम् - बुद्धचा मुक्तः । भीत्या पलायितः । धनेन कुलं मन्यते । विभाषेति सूत्रस्य योगविभागादगुणे स्त्रियां च पञ्चमी विधीयते । इदं पञ्चम्यन्तं पदं वाक्यादावन्ते वा प्रयोक्तुं शक्यते - धूमवत्वादग्नि(वह्नि)मान्पर्वतः । पर्वतेऽग्निरस्ति धूमात् । वस्त्रमस्ति तन्तुभूतत्वात् । स सज्जनोऽस्ति कुकर्माचरणरहितत्वात् । घृतमस्ति दुग्धत्वाद् दधित्वाद्वा । रजो दुःखस्य कारणं रागद्वेषात्मकत्वात् । स शैवोऽस्ति त्रिपुण्डधारणत्वात् । स वैष्णवोऽस्ति ऊर्ध्वपुण्डधारणात् । वृष्टिर्जाता वर्धितजलवतीत्वात् । तमो मोहस्य हेतुर्मोहात्मकत्वात् । लृवर्णस्य द्वादश भेदास्तस्य दीर्घाभावात् । एचां द्वादश भेदास्तेषां ह्रस्वाभावत् । अतिपरिचयादवज्ञा (अपमानम्) । एवं सर्वत्र प्रयोगाचिन्त्याः । २. गुणे स्त्रियाम् - ईश्वरो नास्ति अनुपलब्धेः । घटो नास्ति अनुपलब्धेः । स नास्ति अनुपलब्धेः ।

३. तृतीयान्तपूर्विका हेतुपञ्चमी - क) तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात् । इत्थं देवतया प्रार्थितत्वात् । तस्य वचनान्तरेण विहितत्वात् । मालविकाग्निमित्रे कालिदासेन स्मर्यमाणत्वाद्भासस्य कालिदासात्प्रचीनत्वं सिद्धचति । गोत्रत्वेन जातित्वात् ङीष् । अतोऽन्यैःसर्वैर्वेदैरादृतत्वादभ्यर्हितत्वं (पूजितत्वं) प्रसिद्धम् । तदा होमस्य वाक्यान्तरेणैव विहितत्वादुद्देशेन गुणमात्रं विधीयते । इत्यादि ।

---

१ प्रतियोगे पञ्चम्यास्तसिः ५।४।४४॥ कर्मप्रवचनीयेन प्रतिना योगे वा पञ्चमी तदन्तात्तसिः स्यात् । प्रद्युम्नः कृष्णतः प्रति (कृष्णस्य प्रतिनिधिः) । वाकारानुवृत्ते पक्षे - कृष्णात्प्रति । २. पुरा पदार्थस्य पदार्थेन विनिमयोऽक्रियताद्यत्वे रूप्यकेण ।

४. सप्तमीपूर्विका हेतुपञ्चमी - क) मन्त्रेष्वपि हेत्वादिसद्भावात् । सक्तुषु गत्यभावात् । तत्र तत्र विस्पस्टमभिहितत्वात् । छन्दोविषयाणां तत्र तत्र विहितत्वाद् । अङ्गप्रधानयोर्देशकालादौ परस्परविरोधात् द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः । अज्ञातज्ञापकेषु ब्रह्मविधिष्वपि परस्परविरोधात् नास्ति प्रामाण्यम् । इत्यादि ।

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् २।३।३२॥

एभिर्योगे तृतीया स्यात् पञ्चमी द्वितीया च । अन्यतरस्यामिति पदेन पञ्चमी द्वितीया चानुवर्तेते । पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जने इत्यमरः । एते सर्वे वर्जनार्थे ज्ञेयाः । अत्र पृथग् विना नाना ऋते एभिर्योगे क्रमेण द्वितीया तृतीया पञ्चमी च विहिता लिख्यते । यतो वाक्ये एषु पदेषु मध्ये एकेन पदेन सहस्थिता द्वितीया तृतीया पञ्चमी वा एका इच्छानुसारं प्रयोक्तुं शक्यते -

१. रामं रामेण रामाद्वा पृथक् विना नाना ऋते वा कं स्मरामि ।
२. कृष्णं कृष्णेन कृष्णाद्वा पृथक् विना नाना ऋते वा कथं जीवामि ।
३. धनं धनेन धनाद्वा पृथक् विना नाना ऋते वा किं कार्यं सिद्धचति ।
४. रामं रामेण रामाद्वा पृथक् विना नाना ऋते वा शिवस्य धनुरुत्थापयितुं कः शक्नोति, कः प्रभवति, क इष्टे, कः शक्तः, कः प्रभवः, क ईशः, क ईश्वरः, कः क्षमः, कः समर्थः, को विभुः, कः प्रभुः, कोऽलम् वा ।
५. लक्ष्मीं लक्ष्म्या लक्ष्म्याः वा पृथक् विना नाना ऋते वा भक्ताय धनं दातुं का देवी शक्नोति प्रभवति इष्टे वा का शक्ता, का प्रभवा, का ईशा, का ईश्वरी, का क्षमा, का समर्था, का विभ्वी-विभुः, का प्रभ्वी-प्रभुः काऽलम् वा ।
६. हनुमन्तं हनुमता हनुमतो वा पृथ्क विना नाना ऋते वा पर्वतमुद्यम्या (उच्चाल्य) नेतुं कः शक्नोति ।
७. दुर्गां दुर्गया दुर्गाया वा पृथक् विना नाना ऋते वा महिषासुरं हन्तुं का देवी प्रभवति । का इष्टे वा का शक्ता इत्यादि ।
८. विष्णुं विष्णुना विष्णोर्वा पृथक् विना नाना ऋते वा संसारं रक्षितुं (पालायितुं त्रातुं वा) कः क्षमते । कः प्रभवति क इष्टे वा कः शक्त इत्यादि ।
९. चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥
१०. अतः पृथङ् नास्ति जगत्परात्मनः । न कुम्भरूपं पृथगस्ति कुम्भः ।

(क) केवलं पञ्चम्यन्तप्रयोगो यथा -

पाको नास्ति विना वीर्यात् वीर्यं नास्ति विना रसात् ।
रसो नास्ति विना द्रव्यात् द्रव्यं श्रेष्ठमतः परम् ॥

(ख) तृतीयान्तप्रयोगः

पङ्कैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥
न शौरिणा विना पार्थो न शौरिः पाण्डवं विना (अर्जुनं विना) ।
कथं विना रोमहर्षं द्रवता चेतसा विना ।

विनाऽऽनन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाऽऽशयः ॥
न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः ।
लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः ॥
यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम् ।
तथा पुरुषाकारेण विना दैवं न सिद्ध्यति ॥
उदृदन्तैर्यौति-रु-क्ष्णु-शीङ्-स्तु-क्षु-शिव-डिङ्-श्रिमिः ।
वृङ्वृञ्भ्यां विनैकाचोऽजन्तेषु निहताः स्मृताः ।
नह्यर्थेन विना कोऽपि जगति लभते सुखम् ॥

(ग) द्वितीयान्तप्रयोगः - वर्जनार्थे हित्वा, विहाय, त्यक्त्वा, परित्यज्य, उत्सृज्य चैता गौणक्रियाः प्रोच्यन्ते । आसां योगेऽपि द्वितीया विधीयते -

विना तानं यथा रागो यथा मानं विना नृपः । यथा दानं विना हस्ती यथा ज्ञानं विना यतिः - (निरर्थकः न शोभते वा) ॥ विना तीर्थं विना कृष्णं पुराणपठनं विना । पौरुषं च विना कोऽपि स्वर्गस्य लभते फलम् ॥ विना वातं विना वर्षं विद्युदुत्पातनं विना । विना हस्तिकृतौ दोषौ केनेमौ पतितौ द्रुमौ ॥ विना दानं विना ध्यानं विना तीर्थावगाहनम् । रामगीतां नरोऽधीत्य तदनन्तफलं लभेत् ॥ विना श्रमं दुर्लभा वत्स विद्या । ब्रह्मज्ञानं विना मुक्तिर्न भवेत्स्मर नित्यशः । समाजे त्वां विना कार्यं न सिद्ध्यति । त्वां विनाऽहं नात्र वसामि न तत्र गच्छामि । शास्त्रस्य तत्त्वं ज्ञानं वा विना न कस्यापि मनसि हृदि वा न शान्तिर्भवति, न कोऽपि आनन्दं लभते। विन्दते) । भक्तिं विना ईश्वरो न लभ्यते । पदार्थज्ञानं विना वाक्यस्यार्थज्ञानमाशयश्च न ज्ञायते । गुरुकृपां विना मुक्तिर्न भवति । सत्सङ्गं विना विवेको नोदयते । ज्ञानं विना जीवनं निष्फलं भवति सार्थकं न भवति वा । ज्ञानं विना मोक्षो (मुक्तिः) नास्ति । शब्दशास्त्रस्य ज्ञानं विना मानवस्य कर्ममार्गस्य ज्ञानं न भवति संसारश्चान्धकारो जायते । शास्त्रं विना शास्त्रस्य तत्वस्य च ज्ञानं वा विना बुद्धिर्न निर्मला ॥ केनापि ज्ञानं विनाऽऽनन्दो न लभ्यते । गुरुं विना को ज्ञानं लभते ।

११. नाना=विना

नाना नारीं निष्फला लोकयात्रा । विष्णुं नाना मुक्तिदानाय कोऽन्यः ।

१२. हिरुक्=विना

हिरुक् पथ्यसेवां हि रुक् किं प्रयाति ।

१३. अनेकप्रकारार्थे (बहुविधार्थे) नानाशब्दः

स नाना पश्यति । अहं संसारे नानापदार्थान्पश्यामि । आपणे नानावस्तूनि सन्ति। तानि जनैः क्रीयन्ते विक्रीयन्ते च । नाना तु विद्या चाविद्या च । नानादैवत्याः । नानावर्णाभिधाकारो नानैव विधिनेज्यते । अधर्मलक्षणा नाना नरकाश्चानुवर्णिताः । जगति नानात्वेन प्रतिमासमानानि नानाविधानि वस्तूनि प्राप्यन्ते दृश्यन्ते च । तानि नित्यानि न सन्ति अथवा तानि अनित्यानि सन्ति । यतो लोके व्यवहारे वा मानवानां वस्तूनां च नानारूपाण्यस्माभिर्दृश्यन्ते । तानि विज्ञाय व्यवहारं कुर्वीत । पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतानि च ॥ नानाविधर्मया दृष्टस्तस्य ज्ञानं कथं भवेत् । द्रव्याणि नाना दृश्यन्ते तेषां ज्ञानं कथं भवेत् ।

१४. ऋते=विना

नित्याभ्यासादृते विद्यां न प्राप्नोति कदाचन । नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः । नह्यन्योऽर्हति काव्यानां यशोभाग् राघवादृते ।

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य २।३।३३॥

स्तोक अल्प कृच्छ्र (दुःख) कतिपय एभ्योऽद्रव्यव[1]चनेभ्यः शब्देभ्यः करणे तृतीया-पञ्चम्यौ स्तः । स स्तोकेन स्तोकाद्वा मुच्यते मोक्तव्यः, मोचनीयः, मुक्तो वा । अल्पेन अल्पाद्वा ग्रामोऽतिक्रम्यते अतिक्रमितव्यः, अतिक्रमणीयः, अतिक्रान्तः - पार्यते पारयितव्यः, पारणीयः, पारितो वा । भवान् कृच्छ्रेण (दुःखेन) कृच्छ्राद्वा दृश्यते द्रष्टव्यः, दर्शनीयः, दृष्टो वा मया । कतिपयेन कतिपयाद्वा सा मुच्यते भोक्तव्या मोनचीया मुक्ता वा । दुःखेन दुःखाद्वा स मुच्यते । अल्पेन अल्पाद्वा हीना संख्या न्यूनो भागो वा तवास्ति । स्तोकेन स्तोकाद्वा कृच्छ्रेण कृच्छ्राद्वा नरः फलं लभते, कार्यं समाप्नोति । अद्रव्यवचनेभ्यः (द्रव्यभिन्नवचनेभ्यः) इत्युक्तेर्नेह - तोकेन विषेण स हतः । अत्र स्तोकशब्दो विशेषणरूपे प्रयुक्तोऽस्ति यतोऽत्र पञ्चमी नाभूत् । करणे इत्युक्तेः क्रियाविशेषणं तु नपुंसके द्वितीयान्तैकचनम् - स्तोकं मुञ्चति । अल्पं लभते । दुःखं मन्यते वा ददाति मह्यं सः ।

दूरान्तिकार्थेभ्यो द्वितीया च २।३।३५॥

एभ्योऽर्थेभ्यो द्वितीया स्याच्चात्पञ्चमी-तृतीये स्तः । प्रातिपदिकार्थमात्रे विधिरयम् । दूरार्थे दूरं विप्रकृष्टमिति शब्दौ ज्ञेयौ[2] । अन्तिके = समीपेऽर्थे निकटः, आसन्नः सन्निकृष्टः, सनीडः, सदेशः, अभ्यासः, सकाशः, सविधः, समर्यादः सवेशः, उपकण्ठ अभ्यर्णश्चैते बोध्याः[3] । एभ्य एव द्वितीया पञ्चमी तृतीया च दूरान्तिका. इत्यनेनैव सूत्रेण विधीयेते । एभ्यःशब्देभ्यः सप्तम्यपि विधीयते । दूरन्तिकार्थैः शब्दैर्योगे तु "दूरान्तिकार्थैः षष्ठचन्यतरस्याम्" इति सूत्रेण षष्ठी पञ्चमी च भवति । प्रयोगे द्वितीया तृतीया पञ्चमी सप्तमी च चतस्रो विभक्तयः फलिताः प्राप्यन्ते -

१. नगरस्य नगराद्वा दूरम् दूरेण दूराद् दूरे वा अन्तिकम् अन्तिकेन अन्तिकाद् अन्तिके वा वनमस्ति ।

२. गृहस्य गृहाद्वा आसन्नम् आसन्नेन आसन्नाद् आसन्ने वा नदी विद्यते ।

३. विद्यालयस्य विद्यालयाद्वा समीपम् समीपेन समीपाद् समीपे वा राजमार्गोऽस्ति ।

४. ग्रामस्य ग्रामाद्वा निकटम् निकटेन निकटाद् निकटे वा मन्दिरमस्ति । एवं सर्वे सामीप्यार्थकाः शब्दा बोध्याः ।

५. दूरादावसथान्मूत्रं दूरात्पादावसेचनम् । उच्छिष्टान्नं निषेकं च दूरादेव समाचरेत् ॥ असत्ववचनस्येत्युनुवर्त्तनेह - अदूरः पन्थाः ।

विशेषः - तोकान्मुक्त इत्यत्र "करणे च तोकाल्पकृच्छ्र. इति सूत्रेण दूरादागत इत्यादौ "दूरान्तिकार्थेभ्यो द्वितीया" इति सूत्रेण च पञ्चमी भवति । एतादृशानां स्थले "स्तोकार्थकृच्छ्राणि इति

---

[1] क) सत्वं द्रव्यम् । लिङ्गसंख्यादिविशेषणविशेष्यत्वेन विवक्षितं द्रव्यमुच्यते । यथा - अयं एष स इत्यादिविशेषणेषु हरिश्चन्द्रो रामः कृष्ण इत्यादिविशेष्येषु च लिङ्गसंख्यादयोऽन्वियन्ते । यत एतानि द्रव्याणि प्रोच्यन्ते । ख) असत्वमद्रव्यम् - लिङ्गसंख्यादिविशेषणविशेष्यत्वेनाविवक्षितमद्रव्यम् । चादिषु प्रादिषु तिडन्तक्रिया च लिङ्गसंख्यादयो नान्वियन्ते (न विवक्ष्यन्ते) । यत एतान्यद्रव्याणि प्रोच्यन्ते । अथवा लिङ्गसंख्यान्वययोग्यं द्रव्यं सत्वमयोग्यमद्रव्यमसत्वं च प्रोच्यते ।

[2] अमरवाणः - अमरकोशः ३।१।६८॥

[3] ऐ ३।१।६६-६७॥

सूत्रेण समासे कृते पञ्चम्याः स्तोकादिभ्य" इति सूत्रेण सुपोऽलुक् । प्रयोगो यथावत्तिष्ठति - स्तोकान्मुक्तः अन्तिकादागतः, दूरादागत इत्यादि ।

पञ्चमी विभक्ते २।३।४२॥

विभक्तो भेदः = भिन्नता पृथक्ता वा । निर्धार्यमाणस्यार्थस्यानुवृत्तिः "यतश्च निर्धारणम्" इति सूत्रात् (सूत्रतः) आयाति । निर्धार्यमाणस्य यत्र भेदस्ततः पञ्चमी स्यात् । ययोर्द्वयोर्वस्तुनोर्येषां बहूनां वस्तूनां वा तुलनायां यो भिन्नो (भेदः) निर्धार्यते । तस्माद्भिन्नात्पञ्चमी विधीयते । अत्र भेदे पञ्चमीविहितपदात्पृथग्स्थितस्य विशेष्यस्य विशेषमर्थं द्योतयितुं तरः, तमः, वरः, वरिष्ठः श्रेष्ठः, ज्यायान्, उत्तमः, महान्, श्रेयान्: श्रेयः वरीयान्, जेष्ठः सुन्दरः, गरीयान्, गरीयः, पटीयान्, उत्कृष्टः उन्नतः प्राचीनः अर्वाचीनः, गरीयसी, प्राचीनतरः अर्वाचीनः, अर्वाचीनतरः सत्यम्, पराङ्मुखः, विमुखः इत्यादिविशेषणशब्दा भेदबोधकात्पञ्चम्यन्तपदात्परे विशेष्यात्परे वा प्रयुज्यन्ते । अत्र न्यूनः अन्यूनः, ऊनः, अनूनश्चैभिर्योगेऽपि पञ्चमी तृतीया च विहिता लिख्यते । तृतीयाया उदाहरणं करणकारके गम्यमानक्रियाया अलमिति प्रसङ्गे १ संख्यायां क्रमेण दर्शितम् ।

१. माथुराः पाटलिपुत्रेभ्य आढ्यतराः । तस्मादयं महानस्ति । रामः श्यामाद्वरः श्रेष्ठः, उत्तमः, वरिष्ठः, ज्यायान् सुन्दरो वास्ति । उदीच्याः प्राच्येभ्यः पटवः, पटुतराः, पटीयांसो वा सन्ति । अस्मात्तस्माद्वाऽयमुत्कृष्टः, उत्कृष्टतरो वा विद्यते । सगरमाथाहिमालयोऽन्यपर्वतेभ्य उन्नतः, उन्नततमो वा । श्यामाद्रमेशः पटुः पटुतरो वा । तस्मादयं सुन्दरः । अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः । धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥ अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम् । श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते । ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिर्निरन्तरम् । जननी जन्मभूमिश्च स्वर्गादपि गरीयसी । जन्मभूमि प्राणेभ्योऽपि प्रियतरा स्वर्गादपि गरीयसी । मौनात्सत्यं विशिष्यते । कृष्णः सर्वदेवताभ्यो गरीयान् । देवी सर्वदेवताभ्यो गरीयसी । धनाज्ज्ञानं गुरुतरम् । निवृत्तिमार्गः प्रवृत्तिर्माच्छ्रेयान् । श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनिष्ठितात् । पादारविन्दविमुखाद् श्वपचं वरिष्ठम् । यास्कः पाणिनेरपि प्रचीनतरः । पाणिनिर्यास्कादर्वाचीनः । महीधर उव्वटाचार्यादर्वाचीनः । मतिरेव बलाद्गरीयसी । नेपालस्य भूभागः भारतात्स्वल्पः । पृथिवी इतरेभ्यो भिद्यते गन्धवत्वान् । इति ते गुह्यमाख्यातं गुह्याद्गुह्यतरं मया । चोदनपाठान्मन्त्रपाठो बलवान् ।

२. इमामनूनां सुरभेरवेहि । ज्ञानाद्धनं न्यूनम् । द्रुतप्रसर्पणे वायुर्नूनं न्यूनोऽस्ति चेतसः । गर्भधारणपोषाभ्यां पितुर्माता गरीयसी । अयं सुतः(पुत्रः) प्राणेभ्योऽपि प्रेयान् (अतिप्रियः) । इयं भार्या प्राणेभ्योऽपि प्रेयसी (अतिप्रिया) । श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः । पुरुषकृतमप्युपगच्छद्भिरपि व्यासवाल्मीकिप्रभृतिभ्योऽन्यूनमहिमभिरेव महर्षिभि प्रदृष्टो रचितो वेदराशिः । भगवान् श्रीकृष्णः "योगी तपस्विभ्यो ज्ञानिभ्यः कर्मिभ्यश्च श्रेष्ठ" इति वदति ।

परिशिष्टम्

१-क) कर्तृवाच्योदाहरणानि - एभ्यः शब्देभ्यो ण्यादिप्रत्ययः स्यात् । यतः कुतोऽपि धनं गृह्णीयात् । तस्माच्छब्दस्पर्शरूपरसगन्धादिविषयेभ्यः सर्वेषां कर्मणि प्रवृत्तिर्भवति । यः सुकर्मणो धर्मात्सदाचारात्कर्तव्याद्वा पराङ्मुखो(विमुखो) भवति । यः पापं कुकर्म दुराचारं वा करोति कुरुते वा । स कदापि सुखं न लभते तस्य सुखं न भवति वा । नाशाभिभङ्गाद्विमुखाः प्रयान्ति । पूर्णतया धर्मे दृष्टिं निदधानो मानवः पापेभ्यो बिभीयात्, दुराचारेभ्यस्त्रस्येत्, अन्यायेभ्यः शङ्केत दुर्व्यसनेभ्यो व्यपेतः । कोऽपि दुराचाराच्छङ्केत । पाणिनियादनन्तरं व्याकरणं प्रसृतम् । कलिकताया देहलीं यावत् देहलीपर्यन्तं वा राजमार्गो निर्मितोऽस्ति । पूर्वमेघे त्वादितोऽन्तं यावत् प्रकृतेरेव कमनीया कृतिर्दृग्गता जायते । सत्यं मानवा अन्येभ्यः प्राणिभ्यो (जन्तुभ्यो) विवेकिनो भवन्ति । तस्मात्प्राक्परं किमस्ति तद्दर्शनीयम् ।

जीवनं पापात्त्रायते दुःखान्मोचयति आपद्भ्यो रक्षति च । तव गृहादष्टौ चौरा अपलायन्त (पलायिताः) । यस्य ज्ञनेन ज्ञानाद्वा दुःखक्षयो भवति तज्ज्ञानं ज्ञानं जानीहि । आत्मा जरामरणाभ्यामस्मानुद्धरति । कोऽपि स्वधर्माद् सुकर्मणः स्वाचरणाच्च पराङ्मुखो[1](विमुखो) न भवतु । स यतः कुतोऽपि वस्तूनि पदार्थान् वाऽऽनयति ।

ख) भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् । गुढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् ॥ सत्वात्सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादामोहौ तमसो भवतोऽज्ञानमेव च ॥ श्रद्धधानः शुभां विद्यामाददीताऽवरादपि । अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥ सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते । क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च । यजुर्वेदादभिनयान् रसमाथर्वणादपि ॥ लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते । लोभान्मोहाश्च कामश्च लोभः पापस्य कारणम् ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते । स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ द्रवत्वात्सर्वलोहानां निमित्तान्मृगपक्षिणाम् । भयाल्लोभाच्च मूर्खाणां सङ्गतं दर्शनात्सताम् ॥ उपकाराच्च लोकानां निमित्तान्मृगपक्षिणाम् । भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात्सताम् ॥ सदाचारत्कुले जन्म सदाचाराच्छुभा छवि । सदाचाराच्छुभा विद्या सदाचारात्कुलामला ॥ प्रजानां विनयाधानाद्रक्षणाद्भरणादपि । स पिता पितरः तासां केवलं जन्महेजवः ॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः । सर्वतः सारमादध्यात्पुष्पेभ्य इव षट्पदः ॥ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमस्य धर्मस्य त्रायते महतो भयात् ॥ शुभात्फलं शुभं ज्ञेयं चाशुभादशुभं फलम् । एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं जगत् । नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः । सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः । सत्यान्नास्ति परो धर्मो सत्यान्नास्ति परं तपः । सत्यान्नास्ति परा सिद्धिः सत्यानास्ति परा गतिः ॥ आचाराद्विच्युतो विप्रो न वेदपलमश्नुते ॥ अर्थेभ्योऽपि हि वृद्धेभ्यः संवृत्तेभ्य इतस्ततः । प्रवर्तन्ते क्रियाः सर्वाःपर्वतेभ्य इवापगाः ॥ मुच्यते च ऋणत्रयात् । श्रेष्ठी सभ्यानामग्रे आदितः सर्वं वृत्तान्तं निवेदयामास (अवदत् अब्रवीत्, अकथयत्) । मयाऽत्र स्थित्वाऽऽदितोऽन्तपर्यन्तमियं कथा श्रुता ।

ग) दुर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनाद्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ॥ पूर्वं समाधेरखिलं विचिन्तयेदोङ्कारमात्रं सचराचरं जगत् ॥ न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।

घ) त्वत्तः शास्त्राणि शृणोमि । यः प्रतिपदोऽमावास्यां यावत् अमावास्यापर्यन्तं वाऽर्धपक्षो भवति स कृष्णपक्षः । यः प्रतिपदः पूर्णिमां यावत् पूर्णिमापर्यन्तं वाऽर्धपक्षः स शुल्कपक्षश्च प्रोच्यते । दिनस्य पञ्चदशमुहूर्तेषु मध्याह्नात्परमेकमुहूर्तादनन्तरमर्थात् तस्मात्कुतुपकालात्सूर्यो मन्दते । स श्राद्धकालोऽनन्तफलप्रदश्च । कुतुपात्पूर्वं आद्य मुहूर्ताच्च परं पञ्चमुहूर्ताः । तथा कुतुपमादाय च समष्टियोगाद्दश मुहूर्ताः श्राद्धं कर्तुं योग्याः ।

ङ) एवमेव भूतकर्तरि निष्पन्नायाः क्तक्तवतुप्रत्ययान्तक्रियाया अपि प्रयोगः - स पापान्निवृत्तवान् उपरतो वा । सस्त्वमहं भवान् वा कुकर्मणः सुरक्षितवान् । वयमापदो दुःखतो वा रक्षितवन्तः ।

२. भावकर्मणोर्निष्पन्नायाः कृत्यक्तखल्प्रत्ययान्तक्रियायाः प्रयोगः - कर्मणि = मातुर्भोजनं लभ्यते लब्धव्यम्, लभ्यम्, लब्धम्, सुलभम्, दुर्लभं वा । छात्रेण उपाध्यायाद्वेदोऽधीयते अध्येतव्यः, अध्ययनीयः, अधीतः - पठ्यते पठितव्यः पठनीयः पठितः सुपठः, दुष्पठो वा । ईश्वरेण भक्तो दुःखादुद्धार्यते उद्धारणीयः, उद्धार्यः उद्धारितो वा । विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् । अमित्रादपि

---

[1] पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः - इत्यमरः - ३।१।३३॥ प्राचीनः - तरः । अर्वाचीनः - तरः । विमुखः । उच्चः उन्नत इत्यपि ।

सद्वृत्तममेध्यादपि काञ्चनम् ॥ स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम् । विविधानि च शिल्पानि समादेयानि सर्वतः । भावे - श्यामेन ग्रामादागन्तव्यम्, आगतम् वा । भल्लुकात्सर्वैर्भेतव्यम्, भीतं वा। गृहादष्टाभिश्चौरैः पलायितव्यम्, पलायितं वा । गुरुभिरासनादुत्स्थीयते, उत्थातव्यम् उत्स्थितं वा । वृक्षात्पत्रैः पतितव्यम्, पतितं वा ।

३. शतृशानच्क्त्वाल्यप्तुमुन्प्रत्ययान्तगौणक्रियायाः प्रयोगेऽपि - आकाशादवतरन्तं नारदं व्यासोऽपश्यत् । स एव मुनिः शिखरादवतरन् ब्रह्मचारिवटुभ्यामदर्शि । सोऽध्यक्षपदात् मन्त्रिपदात् प्रधानमन्त्रिपदात्, राष्ट्रपतिपदाद्वा निर्वतमानोऽस्ति अभूद्वा । बालो वने सिंहाद्भल्लुकाद्वा बिभ्यत् भीत्वा वा पलायते । गरुढादवतीर्य विष्णुर्ब्रह्मादीन्प्रोवाच । उपरितस्ततो वाऽऽगत्य मामेवमुवाच । लघुपतनको वृक्षादवतीर्य हिरण्यकमालिङ्गितवान् । निष्क्रष्टुमर्थं चकमे कुबेरात् । अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति । त्वं परिधिर्यजमानमसुरेभ्यो रक्षितुं (पातुं त्रातुं) पश्चिमदिशि स्थापितः । मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः कः समर्थः । स त्वमहं भवान्वा तस्मात्तं वियोजयितुमसमर्थ एव । मां संसारसागरात् दुःखसागरात् भवसागरात् दुःखाद्वा पातुं भगवतोऽन्यः कः क्षमः, कः शक्तः, को विभुर्वा । यद्यपि ते बुद्धिप्रागल्भ्यं तथापि त्वं तं पिङ्गलकाद्वियोजयितुमसमर्थ एव ।

४. जन्महर्षादिशब्दानां योगे पञ्चमी - जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः । मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदा इत्यमरः । भेषः=भयम् भ्रंशः पतनमित्यादयः - मनुष्यस्य पशोश्च जन्म मातुर्भवति । विविधाया गङ्गाया नद्याश्चोत्पत्तिर्हिमालयाद्भवति । वृक्षाणां तृणानामन्नादीनां चो द्भवः पृथिव्या जायते । पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानामुत्पत्तिर्भवति । धर्मादस्माकं रक्षा भवति । न चान्यतस्तस्य शरीररक्षा । मानवेनास द्भचो (दुराचारेभ्यो दुर्व्यसमनेभ्यश्च) बालकानां बालिकानां च रक्षणं कार्यम् । शिक्षाया उद्देश्यं जनानां दुराचाराद्रक्षणमेव । सर्वस्यारिभयात्पलायनं कर्तव्यम् । तस्य यानादवतरणं भवति । सर्वेभ्यो विषयेभ्य उपरमणमुपरतिः । मम दुःखान्मुक्तिर्भवेत् । पुत्रात्प्रमोदो हर्षो वा जायते । चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् । अद्य प्रभृति गृहान्निष्क्रमणं न करोषि चेत्ततस्त्वामुन्मोचयामि । विद्याऽनुभवशून्यस्य जनस्यानेकापद्भचो रक्षां विधत्ते । अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम् । काश्यां मरणान्मुक्तिः । तस्यावश्यं प्राणाघातान्निवृत्तिः । स एवायं नागः सहति कमलेभ्यः परिभवम् । चित्तवृत्तेर्निरोधं विना कुतो योगः । इन्द्रियाणां निग्रहं विना विषयेषु संसक्तानां कुतः शान्तिः, कुतः, आनन्दः, कुतः सुखं च । रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम । जरायोर्नरगौमहीषादीनां स्वेदात् कृमिदंशादीनां अण्डात् पक्षिमण्डूकसर्पादीनां बीजात्तरुगुल्मधान्यदीनां चोद्भवो भवति (जायते) । जलस्याकाशात् मनुष्यस्यानैतिकाचरणात् (कुकर्माचरणात्) शिशोः खट्वायाः पाषाणस्य च पर्वतात्पतनं भवेत् । श्रीमदभागवतान्मुक्तिः सप्ताहं वाचनं कुरु । अहं संसारबन्धनान्मुमुक्षुरस्मि । तस्मादस्माकं त्राणं भवति । नलस्य नृपते राज्यात्परिभंशनम् । जनाद् दायादाद्वा तस्य परिभवो (निन्दा, तिरस्कारः) भवति । इत्यादि ।

५. क्तान्तविशेषणेन योगेऽपि पञ्चमी-सिंहाद्भीता जनाः पलायन्ते । भल्लूकाद्भीता जनाः कोलाहलं कुर्वन्ति । वृक्षात्पतितानि फलानि मानवाः खदन्ति । इत्यादि ।

टिप्पणी - अपादानकारके यस्य यस्य धातोस्तिङन्तातिङन्तक्रियाया यस्य यस्य च शब्दस्य योगे पञ्चमी विधीयते । तस्मात्तस्माद्धातोः क्रियायास्तस्मात्तस्माच्छब्दाच्च पूर्वं सन्निधौ विहितं पञ्चम्यन्तपदमवश्यं भवेदित्युक्तिर्न विस्मरणीया । तदनुसारमर्थाश्च चिन्त्याः ।

इति अपादानकारकम् ॥४-५॥

४-६ षष्ठी

षट् कारकाणि क्रियायामन्वीयन्ते षष्ठी तु न । यतः षष्ठी कारकेषु न गण्यते । सर्वत्र सम्बन्धमात्रविवक्षायां षष्ठी भवति ।

षष्ठी शेषे २।३।५०॥

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धस्तत्र शेषः षष्ठी स्यात् । व्यतिरिक्तपदेन कर्तृकर्मादिकारकेभ्यो भिन्न इत्यर्थो बोध्यः । स्वस्वामिभावादिसम्बन्धः क्रमेण समुल्लिख्यते ।

१. स्वस्वामिभावसम्बन्धः - स्वत्वस्वामित्वयोः परस्परं यः सम्बन्धो भवति सः । अनयोर्मध्ये स्वत्वमप्रधानं स्वामित्वं च प्रधानं भवति । तयोर्मध्ये प्रधानात्षष्ठी - स राज्ञःपुरुषः । इदं गृहं रामस्यास्ति । अयमस्य नृपस्य देशः । इयं द्विचक्रिका चतुश्चक्रिका वा रमेशस्य ज्ञेया । एतानि रूप्यकाणि भवतो वर्तन्ते । पार्वती शिवस्य पत्नी लक्ष्मीश्च विष्णोः । गणेशस्य ऋद्धिःसिद्धिश्च पत्न्यौ स्तः । अयं राज्ञ्याः पुत्रः । गणेशः पार्वत्यास्तनयः । इदं गृहं तवास्ति । अयं मम तव वा देशः । एषु पुरुषादेःस्वत्वं राजनादेश्च स्वामित्वं ज्ञेयम् । क्वचिदप्राधानादपि षष्ठी विधीयते - प्रजानां राजा नृपतिरधिपो[1] वा । शिवः पार्वत्याः पतिर्लक्ष्म्या विष्णुश्च । अस्य देशस्य राष्ट्रपतिः प्रधानमन्त्री, राष्ट्राध्यक्षः सर्वकारो वा । कुरूणामधिपः । इत्यादि ।

२. जन्यजनकभावसम्बन्धः - यो जायते स जन्यः । यो यं जनयति स जनको भवति । उभयोः परस्परं यः सम्बन्धः सः । अत्र जन्यात्षष्ठी - दशरथो रामस्य पिता, रामस्य पिता दशरथो वा - एवंप्रकारेण सर्वत्र प्रयोगाश्चिन्त्याः । पठने लेखने च सरलं भवेत् । वसुदेवः कृष्णस्य जनको माता देवकी च । भरतस्य माता कैकेयी । हिमालयः पार्वत्या पिता माता मेनका चास्ति । पार्वती गणेशस्य जननी । कार्तिकेयस्य जननी षाड्मातुरः । कौशल्या रामस्य माता । लक्ष्मणस्य जननी सुमित्रा । अस्य जनकः सः । इयं बालस्य माता । अयं तव पिता । सा मम जननी । कृष्णद्वैपायनस्य (व्यासस्य) पिता पराशरो माता सत्यवती च । एवं सर्वत्र प्रयोगाश्चिन्त्याः ।

३. अङ्गाङ्गीभावसम्बन्धः - मूलस्य यो भागः सोऽङ्गो (अवयवः, खण्डः, अंशः) यन्मूलं सोऽङ्गी (अवयवी) च प्रोच्यते । उभयोः परस्परमविच्छिन्नरूपेण विच्छिन्नरूपेण च यः सम्बन्धः सः । अङ्गी प्रधानमङ्गमप्रधानम् । प्रधानात्षष्ठी -

क) अङ्गाङ्गिनोऽविच्छिन्नसम्बन्धः - इदं सुवर्णस्य कङ्कणम् । इमौ मनुष्यस्य हस्तौ । भगवतः पादौ सुन्दरौ स्तः । नद्या जलं स्वच्छमस्ति मधुरं च । अस्य पुरुषस्य करौ दीर्घौ स्तः । सुवर्णस्याङ्गुलीयं रम्यमस्ति । मनुष्यस्य पक्षिणश्च द्वौ द्वौ पादौ भवतः । गोरश्वस्य महिषस्य शूनःसिंहस्य शृगालस्य गर्दभस्य च पादाश्चत्वारो भवन्ति । भ्रमरस्य षट् पादाः सन्ति । स्त्रियाः केशा लम्बाः (प्रलम्बाः) भवन्ति । अस्य गृहस्य चत्वारि प्रकोष्ठानि सन्ति । अस्य भवनस्य प्रकोष्ठानि षोडश सन्ति । अस्य वृक्षस्य पत्राणि हरितानि शुष्काणि वा सन्ति । इदं जगद्ब्रह्मणोऽस्ति । सत्वरजस्तमांसि गुणाः प्रकृतेः सन्ति । अस्य मुखं सुन्दरं नेत्रे सुन्दरे नासिका सुन्दरी चास्ति । रमायाः कर्णौ रम्यौ नेत्रे विशाले च सन्ति । लक्ष्म्या स्तनौ स्थूलौ स्तः । तस्या अङ्गुलयः प्रलम्बा विद्यन्ते । अस्य वृक्षस्य शाखाः बहवः - बह्व्यो वा दृश्यन्ते । इयं शिलायास्ताम्रस्य काष्ठस्य सुवर्णस्य रजतस्य वा मूर्तिः इदं पात्रं वा । इत्यादि ।

---

[1] स्वामी त्वीश्वरः पतिरीशिता । अधिभूर्नायको नेता प्रभुः परिवृढोऽधिप इत्यमरः ३।१।१०-११ । स्वामी ईश्वर आभ्यां योगे स्वामीश्वराधिपति. इति सूत्रेण षष्ठीसप्तम्यौ स्तोऽन्यैर्योगे तु न । ईशित्रादिभिर्योगे कर्तृकर्मणोः कृति इत्यनेन षष्ठी ।

ख) अङ्गाङ्गिनो विच्छिन्नसम्बन्धः - अयं पाषणस्य खण्डः । वृक्षस्य शाखा इन्धनं वा । अयं वस्त्रस्य खण्डः । अस्य तरोर्बहवो मञ्चा बह्व्यः खट्वाश्च सन्ति । आम्रवृक्षस्य (सहकारस्य) फलानि प्रकोष्ठे प्रसेवके (झोलामा - झोला में) च सन्ति । अस्माकं गृहे वृक्षाणां फलानि पत्राणि च सन्ति ।

४. सेव्यसेवकभावसम्बन्धः - यः सेव्यते स सेव्यः । यःशुश्रुषादिकं करोति स सेवकः । उभयोर्यः सम्बन्धः सः । तयोःसेवकोऽप्रधानं सेव्यः प्रधानं च भवति । अत्र प्रधानात्षष्ठी - हनुमान् रामस्य सेवको भक्तश्च । उद्धवः कृष्णस्य भक्तः । नारदो विष्णोर्भक्तः । ते शिवस्य भक्ताः । अहं शिवस्य विष्णोर्वा भक्तः । वयं राष्ट्रस्य सेवका प्रहरिणः सैनिकाः कर्मचारिणः शिक्षकाः प्राध्यापका वा । वयं यूयं ते वा दुर्गाया भक्ताः ।

५. बन्धुभाव (बन्धुता) सम्बन्धः[1] - यस्य जन्मना मित्रभावेन च यः सम्बन्धः सः । यस्य येन सम्बन्धो बुध्यते । सम्बन्धबोधकशब्दात्षष्ठी । । स रामस्यानुजः लक्ष्मणः । कृष्णो वसुदेवस्य पुत्रः । स्त्रियः पतिः । अयं मम पुत्रः पौत्रो वा । इयं रमायाः पुत्री पौत्री वा । स मम मातुलः मातुलपुत्रः मातुलपुत्री वा । भवान्ममाऽऽचार्यः । एष तव मम वा पितृव्यः । स तव मम वा भागिनेयः । अयं मम तव वा श्वशुरः । स मम तव वा पिता पितामहः प्रपितामहो वा माता प्रमातामहो वृद्धप्रमातामहो वा । अयं मम सखा मित्रं वा । पाण्डवाः पाण्डोः पुत्राः । अयं राज्ञो भ्राता । अयं मम पितृष्वसेयो मातृष्वसेयो भागनियो वा ।

६. कार्यकारणभावसम्बन्धः - कारणं प्रकृति कार्यं च विकृतिरुच्यते । कारणकार्ययोः परस्परं यः सम्बन्धः सः । कारणं प्रधानं कार्यमप्रधानं च भवति । कारणात्षष्ठी - क) कार्पासस्य सूत्रं वस्त्रं च सुन्दरं भवति । इदमङ्गुलीयं सुवर्णस्यास्ति । प्रकृतेः सत्वरजस्तमांसि गुणाः । एते घटाः कपालाश्च मृदः सन्ति (वर्तन्ते) । गोर्महिस्याश्च दुग्धं दुग्धाद् दध्नश्च धृतं भवति । तिलस्य सर्षपस्य च तैलम् । गोर्घृतम् । रामो दशरथस्य पुत्रः । कृष्णो वसुदेवस्य पुत्रः । पार्वती हिमालयस्य पुत्री ।

ख) कार्यादपि षष्ठी - जगतः कारणं ब्रह्म ईश्वरः प्रकृतिर्वा । समाधानस्य हेतुर्भवान् । बुद्धेः कारणंः प्रधानम् (महत्) ।

७. गुणगुणीभावसम्बन्धः - गुणो धर्मो गुणी धर्मी च प्रोच्यते । यत्रोभयोरविच्छिन्नो यः सम्बन्धः सः । गुणिनोऽभावे गुणो न दृश्यते । यतः गुणितः षष्ठी - क) ईशस्य मनुष्यस्य वस्तुनो वा स्वरूपं सुन्दरमस्ति । फलानां रसः । द्राक्षाया रसः । मनुष्यस्य स्वभावः । मूर्खस्यं बहवो दोषा सतां च बहवो गुणाः ।

विशेष - क) तद्धिते कर्मणि भावे च त्व-तल्-इमनिच्-ष्यञ्-यक्-ढक्-अञ्-वुञ्-छ-त्वतलादिप्रत्ययैर्निष्पन्नैः शब्दैर्योगेऽपि गुणितः षष्ठी - सर्वे तस्य विद्वत्वं विद्वत्तां वा जानन्ति । तस्य पाण्डित्यमहं जाने । विद्याया महत्वं धनादधिकम् । वधादेशस्य द्वित्वं न भवति । वस्त्रस्य शौक्ल्यं शुक्लिमा वाऽस्ति । इत्यादि ।

ख) विषयस्य विवक्षायां तु सप्तम्यपि भवति - अद्यत्वे न मानवेषु मानवता, न हिन्दुनारीषु स्वसंस्कृत्यां निष्ठा, न बन्धुषु बन्धुत्वम्, न मित्रेषु मित्रत्वम्, न शासनकारिषु जनवात्सल्यं च प्रायेण लभ्यते - ४-७-२ वैषयिकाधारो द्रष्टव्यः ।

---

[1] वध्नाति स्नेहेन यः स वन्धुः । तत्रापश्यत्स्थितान्पार्थ पितृनथ पितामहान् । आचार्यान्मातुलात्भ्रातृन्पुत्रान्पौत्रान्सखींस्तथा श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि । तान्समीक्ष्य स कौन्तेय सर्वान्वन्धूनवस्थितान् ॥ गीता - १।२६ -२७ ॥ भ्रातुर्यविष्ठः सुतान्विवन्धून्प्रवेश्य लाक्षाभवने ददाह - भागवते ३।१।६॥ विवन्धून् पितृहीनान् = श्रीधरीटीकायाम् । पितृहीनान्पाण्डवान् = चूर्णिकायाम् । स्तोकानां पितरौ वन्धू दृशः पक्ष्म स्त्रियाः पतिः भा.६।४।१२॥ आत्मनः पितृष्वसृमातृष्वसृमातुलपुत्राः आत्मवान्धवाः पितुः पितृष्वसृमातृष्वसृमातुलपुत्राःपितृवान्धवाः, मातु मातृष्वसृपितृष्वसृमातुलपुत्रा मातृवान्धवाः । एते त्रिविधा वान्धवाः प्रोच्यन्ते ।

ग) सम्बन्धविवक्षायां षष्ठ्यन्ताद्गुणिवाचकशब्दात्परे सर्वासु विभक्तिषु सर्वेषु वचनेषु स्थितानि गुणवाचकशब्दस्य रूपाणि प्रयुज्यन्ते । अत्रैकवचनान्तरूपं समुल्लिख्यते - तस्य विद्याम्, विद्यया विद्यायै विद्यायाः २ विद्यायां वा । वस्तुनः स्वरूपम् स्वरूपेण स्वरूपाय स्वरूपात् स्वरूपस्य स्वरूपे वा । त्वतलादिप्रयान्तशब्दे सति - विदुषां वैदुष्यम् २ वैदुष्येण वैदुष्याय वैदुष्यात् वैदुष्यस्य वैदुष्ये वा । तत्र स्यातुं भवतः क्षमता सामर्थ्यं वा नास्ति । इमं विषयं ज्ञातुं तव योग्यता नास्ति । इत्यादयो भवन्ति ।

घ) वाक्ये उत्तरोत्तरसम्बन्धविवक्षायामुत्तरोत्तरा षष्ठी भवति - शिवस्य पुत्रस्य पत्नी । श्रीकृष्णस्याग्रजस्य पत्नी रेवती । रामस्य तनयस्य गृहस्य जनाः सरलाः सन्ति । अस्माकं देशस्य जनताया भावना निर्मलाऽस्ति । श्रियः कुरूणामधिपस्य पालनीम् । सूत्रद्वयोक्तेभ्यः सन् स्यात्मानादीनामभ्यासस्य दीर्घश्च । एवमन्योऽपि समाधेयः ।

कर्मादीना[1]मपि सम्बन्धमात्रविवक्षायां षष्ठ्येव- १. सतां गतम् । अयं भावे विहितः क्तः । इहोक्तकर्तुरविवक्षायां षष्ठी । सत्पुरुषसम्बन्धि गमनमित्यर्थः । अनुक्तकतुर्विवक्षायां तु तृतीयैव - सद्भिर्गतम् । २. सर्पिषो जानीते । फलानां तृप्तः - इह करणे सम्बन्धविवक्षायां षष्ठी । करणत्वविवक्षायां तु तृतीयैव - सर्पिषा जानीते । फलेन तृप्तः । ३. मातुः स्मरति[2] । एधो दकस्योपकुरुते । भजे शम्भोश्चरणयोः - इह कर्मणि सम्बन्धविवक्षायां षष्ठी । कर्मत्वविवक्षायां तु द्वितीयैव - मातरं स्मरति । एधोदकमुपस्कुरुते । भजे शंभोश्चरणौ ।

षष्ठी हेतुप्रयोगे २।३।२६॥

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अत्र हेतुशब्दस्यार्थो निमित्तो ज्ञेयः । अत्र हेतुशब्दाद्धेतौ द्योत्ये हेतौ इति सूत्रेण हेतौ तृतीयायां प्राप्तायामनेन सूत्रेण तां बाधित्वाऽनेनैव सूत्रेण हेतुशब्दात्षष्ठी विधीयते । सम्बन्धमात्रेऽन्नशब्दात्षष्ठी - अन्नस्य हेतोः स सा वा वसति । एवमन्येऽपि ज्ञेयाः । धनस्य हेतोः प्रेषितोऽयं जनः । धर्मस्य हेतोः प्रयतेत धीरः । नरः सुखस्य हेतोर्दुःखं करोति (विदधाति) । स्वर्गस्य हेतोः स यज्ञं विधत्ते (कुरुते) । राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः । मानिनोऽन्यस्य वा हेतोः श्रीमदान्धाः क्षिपन्ति हि ॥ अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् । स्वसुखनिरभिलाषः खिद्यते लोकहेतोः । एता हसन्ति च रुदन्ति च कार्यहेतोः । लक्ष्मीः स्वयं याति निवासहेतोः । प्रणमति उन्नतिहेतोर्जीवितहेतोर्मुञ्चति प्राणान् । दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥ श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव ऋत्विजः । जनो धनस्य हेतोर्विदेशं गच्छति कर्मणि च प्रवर्तते ।

विशेषः १. हेत्वर्थबोधकात्पञ्चम्यन्तपदात्पूर्विका षष्ठी - गुरोरभावादस्माकं पठनं नास्ति (भवति) । कर्तुरभिहितत्वात्प्रथमा । न हि वेदाः प्रमाणं तल्लक्षणस्य दुःसम्पादत्वात् । कर्तुरनभिहितत्वात्तृतीया । कर्मणोऽनुक्तत्वात् द्वितीया । कर्मण उक्तत्वात्प्रथमा । तस्याभावात्कार्यं न सम्पद्यते । चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रवणत्वात् । कर्तृत्वं विना कार्यस्यानुपपत्तेः । कारणं विना कार्यस्यानुपपत्तेः । तस्य रागतः (रागेण) प्राप्तवात् । एकस्यापि रुद्रस्य स्वमहिम्ना सहस्रमूर्तिस्वीकारान्नास्ति व्याघातः । वाक्ये हेतुबोधकशब्द एवं प्रकारणे प्रयुज्यते ।

२. वाक्ये हेत्वर्थबोधकपञ्चम्यन्तपदात्पूर्वे स्थितं षष्ठ्यन्तपदमर्थस्य प्रसङ्गानुसारं क्वचिद्वाक्यस्यादौ क्वचिद्वाक्यस्य मध्ये क्वचिद्वाक्यस्यान्तेऽपि प्रयुज्यते । क्वचिद्धेत्वर्थकपञ्चम्यन्तपदमात्रं वाक्यस्यादौ मध्येऽन्तेऽपि अर्थस्य प्रसङ्गानुसारं प्रयुज्यते ।

---

[1] कर्मादीनामिति कथनेन धातुभ्यः कर्मणि विहितानां क्तप्रत्यान्तानां पदानां सम्बन्धमात्रविवक्षायां षष्ठी भवतीति प्रोक्तमस्ति ।
[2] स्मरन् राघावबाणानां विव्यथे राक्षसेश्वरः । एवमपि स्मरन् राघवबाणाँश्च विव्यथे राक्षसेश्वरः ।

सर्वनाम्नस्तृतीया च २।३।२७।।

सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् चकारात्षष्ठी च । यदा सर्वनामशब्दो हेतुशब्दाश्चोभौ सहैव प्रयुज्येते । तत उभाभ्यां शब्दाभ्यामादौ तृतीया तदनन्तरं षष्ठी च विधीयते । यत उभौ शब्दौ तृतीयान्तौ तृतीयान्तौ षष्ठचन्तौ षष्ठचन्तौ वा प्रयुज्येते । सदाऽऽदौ सर्वादिशब्द[1]स्ततो हेतुशब्दश्च प्रयुज्येते । यथा - सर्वेण हेतुना सर्वस्य हेतोर्वा स वसति याति वा दुःखं करोति च । केन हेतुना कस्य हेतोर्वा कर्म विदधाति सः । अनेन हेतुना अस्य हेतोर्वा अहं नगरं गच्छामि । तस्यैव हेतोः प्रयतेत विद्वान् । हेतुर्निमित्तमित्यर्थः । इत्यादि ।

निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्-वा.-निमित्तपर्यायाणां प्रयोगे तेभ्यः सर्वनामभ्यस्तत्समानाधिकरणेभ्यश्च शब्देभ्यः सर्वासां विभक्तीनां प्रायेण प्रयोगो भवतीत्यर्थः । निमित्तार्थकशब्दाः सन्ति निमित्तं हेतुः कारणं प्रयोजनं च । निमित्तपर्यायाः सर्वादयश्च समानविभक्तिवचने सहैव प्रयुज्यन्ते । तयोरादौ सर्वादिशब्दस्ततो निमित्तादिशब्दाश्च प्रयोक्तव्याः ।

१	२	३	४	विभक्तिः
१. किं निमित्तम्	किं कारणम्	किं प्रयोजनम्	को हेतुः	प्र.
२. किं निमित्तम्	किं कारणम्	किं प्रयोजनम्	कं हेतुम्	द्वि.
३. केन निमित्तेन	केन कारणेन	केन प्रयोजनेन	केन हेतुना	तृ.
४. कस्मै निमित्ताय	कस्मै कारणाय	कस्मै प्रयोजनाय	कस्मै हेतवे	च.
५. कस्मात् निमित्तात्	कस्मात् कारणात्	कस्मात् प्रयोजनात्	कस्मात् हेतोः	प.
६. कस्य निमित्तस्य	कस्य कारणस्य	कस्य प्रयोजनस्य	कस्य हेतोः	ष.
७. कस्मिन् निमित्ते	कस्मिन् कारणे	कस्मिन् प्रयोजने	कस्मिन् हेतौ	स.

एवमुपरि दर्शितयोरुभयोः शब्दयोः क्रमेण द्विवचनबहुवचनयोरपि प्रयोगाश्चिन्त्याः । प्रायग्रहणादसर्वनाम्नः[2] शब्दात्प्रथमा-द्वितीये न स्तः । ज्ञानेन निमित्तेन शास्त्रं चिन्त्यं सतां सङ्गतिश्च कार्या । ज्ञानाय निमित्ताय, ज्ञानात् निमित्तात्, ज्ञानस्य निमित्तस्य, ज्ञाने निमित्ते । अध्ययनेन कारणेन अध्ययनाय कारणायेत्यादयो ज्ञेयाः ।

षष्ठचतसर्थप्रत्ययेन २।३।३०।।

अतसुजर्थप्रत्ययान्तशब्देन योगे षष्ठी स्यात् । अन्यारादितरर्ते. इति सूत्रेण प्राप्तः पञ्चम्या अपवादः । येन योगे षष्ठी विहिता । तस्मात्षष्ठीविहितपदात्परे उत्तरत आदिशब्दा अवश्यं स्युः । यथा - ग्रामस्य उत्तरतः, दक्षिणतः, पूर्व = पूर्वतः = पुरः[3], पुरतः, पुरस्तात्, अधर = अधः, अधरतः, अधस्तात्, अवर = अवः, अवरतः-तात् अवस्तात् (दक्षिणदिशाबोधकशब्दः) पर = परतः, परस्तात्, अपरः = पश्चात् अपरतो (अपरस्मात्) वा नदी विद्यते । ग्रामस्य ऊर्ध्वम् = उपरि उपरिष्टाद्वा वनमस्ति । तस्य उपरि उपरिष्टाद्वा रमणीया वसतिरस्ति दृश्यते आगच्छति आगता वा । अतसुजादि प्रत्ययान्ताः शब्दा अव्यया ज्ञेयाः ।

---

[1] सर्वादयः पञ्चत्रिंशत् सन्ति - १. सर्व, २. विश्व, ३. उभ, ४. उभय, ५. डतर (कतर, यतर), ६. डतम (कतम यतम), ७. अन्य ८. अन्यतर, ९. इतर, १०. त्वत्, ११. त्व, १२. नेम, १३. सम, १४. सिम, १५. पूर्व, १६. पर, १७. अवर, १८. दक्षिण, १९. उत्तर २०. अपर, २१. अधर, २२. स्व, २३. अन्तर, २४. त्यद्, २६. यद्, २७. एतद्, २८. इदम्, २९. अदस्, ३०. एक, ३१. द्वि, ३२. युष्मद्, ३३. अस्मद्, ३४. भवतु (भवत्), ३५. किमिति ।

[2] सर्वनामशब्दाद्भिन्नशब्दात्प्रथमा द्वितीया च न स्तः ।

[3] पुरसाद्यव्ययशब्दाः क्रियाविशेषणत्वात्क्रियापदात्पूर्वं सन्निधौ प्रयुज्यन्ते ।

पूर्वतः पश्चिमतः दक्षिणतः, उत्तरतः, अग्रतः (तसिल्) धुरि अग्रे चैतान्यव्ययानि । अग्रणीः, पुरोगः, प्रष्ठः अग्रेसरः, पुरःसरः, पुरोगमः, पुरोगामी[1] । पुरोगतः, अग्रगामी चैभिर्योगे अकृत्या (स्वभावेन) षष्ठी । इयं षष्ठी पुरगादिशब्दानामग्रे तिष्ठति - सुदक्षिणा अपांसुलानां धुरि कीर्तनीयाऽऽसीत् । इमे (नीलकण्ठानन्तप्रभृतयः) हि व्याख्यातारः प्रकाण्डपण्डितशालिनां मनीषिणां धुरि वर्तन्ते । खट्वाया अधः, अधस्ताद्वा फलानि सन्ति । वृक्षस्य गृहस्य वोपरि उपरिष्टाद्वा पक्षिण उड्डीयन्ते (दिवादिः) उड्डयन्ते (भ्वादिः) । रामस्य पश्चाल्लक्ष्मणोऽस्ति । कृष्णस्य विष्णोः शिवस्य रामस्य वाऽग्रे भक्तोऽस्ति । केऽपि विद्यावतां पुरः, पुरतः, पुरस्तादग्रे वा नतमस्तका भवन्ति । तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः । किं जीर्णं तृणमत्ति मानमहतामग्रेसरःकेशरी । ममाग्रे सत्यमेव कथ्यताम् । गार्हपत्यस्य पश्चात्स्थितं शकटमनुगच्छेत् । पत्नी च गार्हपत्यस्य पश्चाद्भागे उपविशेत् । गार्हपत्यस्य कुण्डस्य पश्चादध्वर्युरग्निमन्थनं कुर्यात् । युधिष्ठिरं प्रति द्रौपद्याः कथनस्य पश्चाद्भीमो ब्रूते । पुरोडाशानां धान्यानां चोपरि अङ्गारान्निदध्यात् । यजमानस्य पूर्वतो वेदेर्दक्षिणतो ब्रह्मा उपविशेत् । गृहस्य पूर्वतः, दक्षिणतः, पश्चिमत उत्तरतो वा भागे मार्गोऽस्ति । ममोपरि दैवं लग्नम्, शत्रवो लग्ना वा । उपायः किं स्यात् । तस्योपरि किं जतम् । मम शिरस उपरि किमपि नास्ति । पश्चाद्योगे पञ्चमी षष्ठी चोभौ भवतः - ततः पश्चात्कार्यं प्रारभस्व । तस्य पश्चात् त्वं वस । इत्यादि । उपरियोगे पञ्चम्यपि - मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत्, अगच्छति वा ।

द्वितीयाषष्ठ्योर्विधानम्

एनपा द्वितीया २।३।३१॥

एनब्प्रत्ययान्तशब्देन योगे द्वितीया स्यात् । एनपेति योगविभागात्षष्ठी । ग्रामं ग्रामस्य वा पूर्वेण दक्षिणेन अवरेण अपरेण उत्तरेण अधरेण वा नदी वनं वाऽस्ति । षष्ठीपञ्चम्योर्विधानम्

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् २।३।३४॥

दूरान्तिकार्थैश्च शब्दैर्योगे षष्ठी स्यात्पञ्चमी च । स्याद्दूरं विप्रकृष्टकमित्यमरः । अन्तिकार्थकस्य पर्यायवाचकशब्दा अपादानकारके "दूरान्तिकार्थेभ्यो द्वितीया च" इति सूत्रप्रसङ्गे संगृहीतास्तत्रैव द्रष्टव्याः । अन्तिकार्थेन सामीप्यं बोध्यम् । गृहस्य गृहाद्वा दूरं नदी विद्यते । मार्गस्य मार्गाद्वा अन्तिकं गृहमस्ति । समुद्रस्य समुद्राद्वा वनस्य वनाद्वा समीपे स वसति । कृष्णस्य कृष्णाद्वा समीपे (सन्निधौ) गोपाः सन्ति गोपिन्यो भक्ताश्च । तस्य तस्माद्वा निकटं मन्दिरं विद्यते । तव सन्निधौ कोऽपि नास्ति न वसति वा ।

ज्ञोऽविदर्थस्य करणे २।३।५१॥

जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् । सर्पिषो ज्ञानम् । नहि तु सर्पिषा ज्ञानं - करणे । एवं दुग्धस्य मधुनश्च ज्ञानम् । वायो वेस्तोकानामग्निराज्यस्य वेत्तु (शु.य.वे ६।१६) वेदे ज्ञानार्थस्य विद्धातोः प्रयोगे कर्मणि षष्ठी विहिताऽस्ति । लोके तु हे वायो त्वं स्तोकान्विद्धि जानीहि अग्निराज्यं वेत्तु इति ।

अधीगर्थदयेशां कर्मणि २।३।५२॥

एषां कर्मणि षष्ठी स्यात् । अर्थात् अधिपूर्वक इक् दय ईश एषां धातूनां तिङन्तातिङन्तक्रियाणां शब्दानां च प्रयोगे कर्मणि षष्ठी विधीयते । अधि+इक् स्मरणे = एषामध्येति

[1] अमरकोशः - २।९।७२॥

अध्ययनम् वा । दिङ् रक्षणे = सर्पिषो दयते दयमानं दयनं वा । ईश ऐश्वर्ये = जगत ईष्टे ईशानः, ईशः, ईशनं वा । स्मृ चिन्तायाम् = मातुः स्मरति स्मरन् स्मरणं वा । अधि+इङ् अध्ययने = वेदस्याधीते अधीयन् अध्ययनं वा । यथा - येषामध्येति प्रवसन्येषु सौमनसो बहु । मम दयमानो हरिरेवास्ति । भक्तस्य ईशानः शिवः । स्मरन् राधववाणानां विव्यथे राक्षसेश्वरः । ससीतयो राधवयोरधीयन्[१] । शौवस्तिकस्त्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मात् । तव दयमानो भगवानेव ।

कृञः प्रतियत्ने २।३।५३॥

प्रतियत्नो गुणाधानम् । कृञः कर्मणि शेषे षष्ठी स्यात् । एधोदकस्योपकरणम् ।

रुजार्थानां भाववचनानामज्वरे २।३।५४॥

भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् । चौरस्य रोगस्य रुजा (रोगकर्तृका कर्मभूता चौरसम्बन्धिनी तापादिपीडा) । रुजा इति पदं स्त्रीलिङ्गस्याऽऽकारान्तं प्रथमान्तं बोध्यम् । **अज्वरिसंताप्योरिति वाच्यम्-वा.**-अनयोः कर्मणि शेषे षष्ठी स्यादित्यर्थः । रोगस्य चौरज्वरः चौरसन्तापो वा । रोगकर्तृकं चौरसम्वन्धि ज्वरादिकमित्यर्थः ।

आशिषि नाथः २।३।५५॥

आशीरर्थस्य नाथतेः (नाथ्धातोः) शेषे कर्मणि षष्ठी स्यात् । सर्पिषो नाथनम् - सर्पिर्मे भूयादित्याशासनमित्यर्थः । अयं धातुराशिषि आत्मनेपदमन्यत्र परस्मैपदम् ।

जासिनिप्रहणनाटक्राथपिषां हिंसायाम् २।३।५६॥

हिंसार्थानामेषां धातूनां शेषे कर्मणि षष्ठी स्यात् । चौरस्योज्जासनम् । निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा धातुरूपे प्रयुज्येते । यथा - चौरस्य निप्रहणं प्रणिहननं प्रहणनं वा । नट अवस्कन्दने - चुरादिः - चौरस्योन्नटनम् । क्रथ हिंसायाम् इति धातुर्घटादौ पठचते - चौरस्य क्राथनम् । पिष्लृ संचूर्णने - रुधादिः = वृषलस्य पेषणम् ।

व्यवहृपणोः समर्थयोः २।३।५७॥

अनयोः शेषे कर्मणि षष्ठी स्यात् । वि+अव+हृ इति पण इति च । द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता । शतस्य व्यवहरणं पणनं वा ।

दिवस्तदर्थस्य २।३।५८॥

द्युतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात् । दिव्धातोरनेकार्थाः सन्ति । तेषु मध्येऽनयोरर्थयोः स्थितोऽयं धातुश्चिन्त्यः । युधिष्ठिरः शतस्य दीव्यति । अन्यस्मिन्नर्थे तु - ब्राह्मणं दीव्यति स्तौतीत्यर्थः ।

विभाषोपसर्गे २।३।५९॥

द्युतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात् । दिव्धातोः क्रियायाः प्रयोगे दिवस्तदर्थस्येत्यनेन षष्ठ्यां प्राप्तायामनेन तां प्रबाध्यानेनैव सूत्रेण वैकल्पिकायां षष्ठ्यां

---

[१] इङ अध्ययने इति धातोरकृच्छ्रार्थे शतृप्रत्ययेन निष्पन्नः शब्दोऽयम् । अधिशब्दोच्चारणम् इङिकावध्युपसर्गं न व्यभिचरत इति ज्ञापनार्थमिति वचनात्षष्ठीः ।

जातायां शतस्येति षष्ठ्या अभावे द्वितीयायां जातायां शतमिति रूपं सिद्धम् । शतस्य शतं वा प्रतिदीव्यति । अधः सूत्रं वैदिकप्रयोगमभिलक्ष्य चिन्त्यम्

प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने २।३।६१॥

वेदे देवतासम्प्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोःकर्मणो हविर्विशेषस्य वाचकशब्दात्षष्ठी स्यात् । इष्यतेर्दैवादिकस्य प्रेष्य इति ब्रुवेरदादेः अनुब्रूहि इति च लोटो मध्यमपुरुषस्यैकवचनान्तपदे ज्ञेये । अग्नये छागस्य हविषो वपायाः, मेदसः प्रेष्य अनुब्रूहि वा । वेदे छागस्य हविषो वपाया मेदसश्चैषां षष्ठी विहिता । लोके द्वितीयैव न तु षष्ठी - अग्नये छागस्य हविर्वपां मेदः प्रेष्य अनुब्रूहि वा ।

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे २।३।६४॥

कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात् । "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" इति सूत्रेण पञ्चन्षडादिसंख्यावाचकशब्देभ्यः कृत्वसुच्प्रत्ययेन पञ्चकृत्वः षट्कृत्वः सप्तकृत्वः इत्यादयः "द्वित्रिचतुर्भ्यः सुच्" इति सूत्रेण द्वित्रिचतुःशब्देभ्यः सुच्प्रत्ययेन द्विः, त्रिः, चतुश्चेति "एकस्य सकृच्च" इति सूत्रेण एकशब्दात्सुच्प्रत्ययेन एकस्य स्थाने सकृद्विधानेन सकृच्च शब्दा वारेऽर्थे निष्पद्यन्ते । यत एषामर्थो वारः क्रियते

१. बालोऽह्नः पञ्चकृत्वो भोजनं करोति, ओदनं खादति (अत्ति भुङ्क्ते भक्षयति वा) पयो जलं वा पिबति च ।
२. स दिनस्य द्विः, त्रिः, चतुर्वा कार्यं विधत्ते (करोति) भक्तं खादति (अत्ति जक्षिति भक्षयति वा) दुग्धं वारि वा पिबति च ।
३. याचकाश्छात्रा जनाश्च दिनस्य सकृद्भोजनं लभन्ते ।
४. भवान्दिवसस्य द्विर्भोजनं विदधाति । बाला दिनस्य त्रिश्चतुर्वा ओदनं भुञ्जते (खादन्ति भक्षयन्ति अदन्ति, जक्षति वा) ।
५. अहं दिनस्य सकृत् (एकवारम्) ओदनं खादामि (अद्मि भुञ्जे जक्षामि भक्षयामि वा) ।
६. अयं वासरस्य पञ्चकृत्वस्तं ताडयति । तौ षट्कृत्वस्तत्र गच्छतः । स दिवसस्य शतकृत्वो लक्षकृत्वो वा जनान्स्मारयति ।
७. पक्षस्य त्रिर्गीतामधीते । मासस्य चतू रुद्रिं पठति । मासस्य द्विः पञ्चकृत्वो वा सप्तशतीमधीते । कृत्वसुजादिप्रत्ययान्तशब्दस्यार्थबोधनार्थमेकवारः, द्विवारः, त्रिवारः, चतुर्वारः, पञ्चवारः, सप्तवारः, शतवारः, लक्षवारः, कोटिवारश्चेत्यादयः शब्दाः प्रयुज्यन्ते । तदनुसारं तेषां शब्दानामर्थाः क्रियन्ते । अनिश्चितसंख्याबोधे तु - भूरिवारः बहुवार, अनेकवार(धेरैपटक-वार-बहुतवार, अनेकवार)श्चेत्यर्थे एते शब्दाः प्रयुज्यन्ते । यथा - स चायकं बहुवारं पिबति । अहं फलानि अनेकवारं खादामि । स मन्दिरं भूरिवारं गच्छति ।

कर्तृकर्मणोः कृति २।३।६५॥

कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् । कृति=कृत्प्रत्ययेन (कृदन्तप्रत्ययेन) निष्पन्नशब्देन योगे इत्यर्थः । अत्र कर्तरि कर्मणि चेति पदाभ्यां कर्तृकर्मणोः प्रयुक्तं कर्तृपदं कर्मपदं च बोध्यम् । तयोः(कर्तृकर्मणोः)कृत्प्रत्ययान्तेन (कृदन्तप्रत्ययान्तेन) शब्देन योगे तयोः(कर्तृकर्मणोः) क्रमशोऽनुक्ततः कर्तृतः प्राप्तायां तृतीयायामनुक्ततः कर्मतः प्राप्तायां द्वितीयायां च तामनेन सूत्रेण बाधित्वाऽऽनेनैव सूत्रेण षष्ठी विधीयते ।

क) यथा कर्तरि (कर्तृवाच्ये)- कृष्णो जगत्करोतीत्यत्र तिङन्तक्रियायां कृष्णस्योक्ते कर्तरि प्रथमा विहिताऽस्ति । तदनन्तरं कृधातोर्भावे कृत्प्रत्यये क्तिनि कृते कृतिर्निष्पद्यते । ततः कृष्ण कृतिरित्यत्र कृत्प्रत्ययेन निष्पन्नेन कृतिशब्देन योगे कृष्णस्यानुक्ते कर्तरि प्राप्तां तृतीयां बाधित्वा कर्तृकर्मणोः कृतीति सूत्रेण षष्ठी विधीयते । ततः कृष्णस्य कृतिरिति स्वरूपं सिद्ध्यति । एवं प्रकारेणान्येऽपि समाधेयाः । मम दृष्टिः । अस्य स्थितिः । कालस्य गतिः । अचो वृद्धिः । उपाधाया वृद्धिः । तव भक्तिः । कालिदासस्य कृतिः । वेदं पठितुं तव शक्तिर्नास्ति । तस्य योद्धुं शक्तिर्नास्ति । द्वितीयादौ - मम दृष्टिं न निवारय । अस्य स्थितिं शोभनां करोतु । एवमन्ये प्रयोगाश्चिन्त्याः । तस्य शयनम् (स्वपनम्)-ल्यु-अन । तस्य स्थानम् । शिशो रोदनम् । तस्य तव वा रचना । तव गमनम् । शब्दस्य वाक्यस्य कथाया मम विभूतेर्वा विस्तरः (अप्) । नास्त्यन्तो विस्तरस्य मे । एष तूद्देशतः प्रोक्तो विभूतेविस्तरो मया । लौकिकानां शब्दानां विस्तरस्तु यथाशास्त्रं शब्दकौतुभे दर्शितः । भवतः शायिका (ण्वुलकौ) । तस्य कारकः, कारिका । अस्य पाचकः पाचिका । पुत्रस्य बाधकः । अस्य श्लोकस्य भावः (घञ्) । तव त्यागः । केनापि कर्मणो गतिः संख्या फलं वा वक्तुं न शक्यते । भवतः शायिका (कर्तरि ण्वुल्-अक) । इत्यादि ।

ख) यथा कर्मणि - कृष्णो जगत्करोतीत्यत्र तिङन्तक्रियायां जगतोऽनुक्ते कर्मणि द्वितीया विहिताऽस्ति । ततः कृधातोः कर्तरि कृत्प्रत्यये तृचि कृते कर्ता निष्पद्यते । जगत् कर्ता इत्यत्र कृत्प्रत्ययेन निष्पन्नेन तृजन्तशब्देन योगेऽनुक्ते कर्मणि द्वितीयायां प्राप्तायां तां बाधित्वा "कर्तृकर्मणोः कृति" इति सूत्रेण जगतः षष्ठी विधीयते । ततो जगतः कर्ता कृष्णः इति स्वरूपं सिद्ध्यति । एवमन्यज्ज्ञेयम् । वेदस्याध्येता (तृच्), पाठको (ण्वुलि-अक) वा श्यामः । सतां धाता । अद्यत्वे वेदस्य पठनं (ल्युट्-अन) कः करोति । स घृतस्य हवनं विधत्ते । मया तव वचनं श्रूयते । तस्य विकारः-(अण्) । वेदस्य पठनमद्यत्वे नास्ति । गृहस्य निर्माणम् । काव्यस्य रचना । वेदस्य पाठः - घञ् । राक्षसानां घातः । शङ्कायाः परिहारः । राज्यस्य प्राप्ति-क्तिन् । जगतःसृष्टिः । फलस्य प्राप्तिः । ओदनस्य भोजनम्-ल्युटि-अन । शास्त्रस्य ग्रन्थस्य व्यक्तेः स्थानस्य वा परिचयः - (अच्) । तस्याऽऽदेशः - अच् । ओदनस्य पाचकः - (ण्वुल्-अक) । कस्या अपि विद्याया (क्यप्-टाप्) तपसः (असुन्) परिश्रमस्य (घञ् न वृद्धिः) वा फलं मिष्टं भवति ।

विशेषः - कृदन्तशब्दयोगे षष्ठी तु भवत्येव । तत्रापि यस्य धातोस्तिङन्तक्रियायां यत्कारकं भवति । तदनुसारं कृदन्तशब्दयोगेऽपि तद्विचारणीयम् - क) ब्राह्मणाय गोर्दानं विधेहि । जनताभ्यो दुःखिभ्यो वा वस्त्रस्यान्नस्य च वितरणं कुरु । बन्धनाद्दुखाद्वा मुक्तये कस्य स्पृहा (इच्छा) नास्ति । कृष्णाय गोप्या श्लाघा शिशुपालस्य च शापो भवति । भक्तो वैकुण्ठाय कृष्णस्य सेवां करोति । राजा गोःसेवां दोहनं च विधत्ते । स शत्रोःकदनं विधत्ते । ख) सोपानाद्दाण्डस्य वृक्षात्पत्राणां फलानां च पतनं भवति । पर्वतात्पाषाणस्य भ्रशनं जायते । गुहाया भल्लुकस्य विलात्सर्पस्य मूषकस्य च निःसरणं (निर्गमनं) दृश्यते । शिखरात्पथिकस्य विमानाद्राज्ञः शकटाच्चतुश्चक्रिकाया वा जनानां चावतरणं (अवरोहणं) भवति कृतं अवलोक्यते वा । दुःखात्सङ्कटाद्वा भगवान् माता पिता गुरुर्वा मम रक्षां (त्राणं रक्षणं) करोति (विधत्ते) । अहङ्कारात्पञ्चतन्मात्राणामेकादशेन्द्रियाणां चोत्पत्तिर्भवति । पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानामुद्भवो जायते । उद्भवार्थे - जनुर्जननिजन्मानि जनिरुत्पत्तिरु द्भवः - अमरः । एषा प्रयोगे "जनिकर्तुः प्रकृतिः" इति सूत्रेण पञ्चमी ।

गुणकर्मणि वेष्यते-वा.-द्विकर्मकधातोः कृत्प्रत्ययेन निष्पन्नशब्देन योगे गुणकर्मणि = अप्रधानकर्मणि षष्ठी वेष्यते । कर्तरि - अश्वं स्रुघ्नं नयतीत्यत्र अश्वे प्रधानकर्मणि कर्मणि द्वितीयेति सूत्रेण गौणकर्मणः स्रुघ्नस्य अकथितं चेति सूत्रेण कर्मसंज्ञायां ततः कर्मणि द्वितीयेति सूत्रेण च द्वितीयायां कृतायामुपरिदर्शितं वाक्यं सिद्धम् । अनेन वार्तिकेन कृदन्तप्रत्ययान्तेन नेता इति पदेन योगेऽप्रधानकर्मणि स्रुघ्ने वैकल्पिका षष्ठी विधीयते । प्रधानकर्मणि तु नित्यं षष्ठी । यथा - नेताऽश्वस्य

सुघ्नस्य सुघ्नं वा । एवं गोर्गां वा पयसो दोहः । तण्डुलानां तण्डुलान्वा ओदनस्य पाकः । द्विकर्मकधातूनामनेन प्रकारेण प्रयोगः समाधेयः ।

उभयप्राप्तौ कर्मणि २।३।६६॥

उभयोः (कर्तरि कर्मणि च) प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात् न तु कर्तरि । आश्चर्योऽगोपेन गवां पयसो दोहः[1] । गौणकर्मणि गवि षष्ठी । अनुक्ते कर्तरि स्थिताङ्गोपात्तृतीया । मुख्यकर्मणि पयसि नित्यं षष्ठी । **स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः-वा.**-स्त्रियां क्तिन् इत्यधिकारेऽविहितयोरक अ इति प्रत्यययोः कृतोः प्रयोगे कर्मण्येवेत्युक्तनियमो नास्तीत्यर्थः । कृति-अकेन भेदिका अप्रत्ययेन बिभित्सा च सिद्धयति । भेदिका बिभित्सा वा रुद्रस्य जगतः[2] । उभयोः कर्तरि कर्मणि च स्त्रीप्रत्यययोरिति वार्तिकेन षष्ठी । कर्तरि - भिनत्ति बिभित्सति-ते वा रुद्रो जगत् । शाम्भोर्जिहीर्षा दुःखस्य । **शेषे विभाषा-वा.**-अक अ इति व्यतिरिक्तप्रत्यययोगे "उभयप्राप्तौ कर्मणि" इति सूत्रस्य नियमो विकल्प्यत इत्यर्थः । स्त्रीप्रत्यययोरकाकारयोरित्येके शेषे विभाषा इति वार्तिकस्य विकल्पः स्त्रीप्रत्यययोगे सत्येव भवतीति मन्यन्ते इत्यर्थः । कृति-हरेर्हरिणा वा जगतः कृतिर्विचित्रा[3] - अस्य कर्तरि वाक्यम् = जगत् विचत्रं करोति हरिः । केचिद्विशेषेण विभाषामिच्छन्ति । आचार्यस्याचार्येण वा शब्दानुशासनम् ।[4]

क्तस्य च वर्तमाने २।३।६७॥

वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात् । "न लोकाव्ययनिष्ठा." इति सूत्रस्य निषेधस्यापवादः = बाधकः । सर्वत्र "मतिबुद्धिपूजार्थेभ्यश्च" इति सूत्रेण वर्तमाने विहितस्य क्तस्य योगेऽनेन सूत्रेण षष्ठी विधीयते । राज्ञां मतः, बुद्धः पूजितः, विदितः, इष्टः, अर्चितः, रक्षितः, तुष्टः - पुंसि । सतां मतः, मतम्, मतेन इत्यादि । सतां सा मता बुद्धा पूजिता विदिता इष्टा अर्चिता रक्षिता तुष्टा - स्त्रियाम् । एते शब्दा विशेषणरूपे सर्वासु विभक्तिषु सर्वेषु वचनेषु च चिन्तनीयाः । भूतकर्मणि निष्पन्ने क्तान्ते सति तु तृतीयैव भवति न तु षष्ठी - राज्ञा मतः बुद्धः, पूजित इत्यादि । पूजितो यः सुरासुरैः ।

अधिकरणवाचिनश्च २।३।६८॥

अधिकरणे निष्पन्नस्य क्तस्य योगे षष्ठी स्यात् । इदमेषामसितं शयितं गतं भुक्तं वा स्थानम् । मुकुन्दस्यासितमिदमिदं यातं रमापतेः । भुक्तमेतदनन्तस्येत्युचुर्गोप्यो दिदृक्षवः ॥

---

[1] गाः पयो दोग्धि अगोप इत्याश्चर्यमित्यस्मिन्कर्तृवाच्यस्य वाक्ये स्थितस्य दुह्धातोर्भावे कृदन्तेन घञ्प्रत्ययेन निष्पन्नेन दोह इति पदं सिद्धम् । अस्य पदेन योगे कर्तृकर्मणोः कृति इति सूत्रेण कर्तरि कर्मणि च प्राप्तां षष्ठीम् उभयप्राप्ताविति सूत्रेण प्रबाध्यानेनैव सूत्रेण गौण(अप्रधान)कर्मणि गवि षष्ठी विधीयते । ततः प्रधानकर्मणि पयसि नित्यं षष्ठी । अनुक्ते कर्तरि स्थितादगोपशब्दात्तृतीया भवति । तत उपर्युक्तं वाक्यं सिद्धम् ।

[2] कर्तरि - भिनत्ति विभित्सति-ते वा रुद्रो जगत् । कृति ण्वुलि अके टापि इत्वे-भेदिका, भेत्तुमिच्छा=अ टापि=विभित्सा चानयोः शब्दयोर्योगे रुद्र जगत् इत्यत्र उभयप्राप्तौ कर्मणीत्यनेन कर्मण्येव विहितायाःषष्ठयाः स्त्रीप्रत्यययोरित्यनेन वार्तिकेन निषेधेऽनेनैव वार्तिकेन कर्तरि कर्मणि चोभयोः षष्ठी भवति । इति प्रक्रियया उपर्युक्तं वाक्यं सिद्धम् ।

[3] अक अ इत्याभ्यां व्यतिरिक्तप्रत्ययकथनेन आभ्यां प्रत्ययाभ्यां भिन्नानां शेषकृदन्तप्रत्ययैर्निष्पन्नानां शब्दानां योगे कर्तरि कर्मणि चोभयोः शेषे विभाषेति वार्तिकेन वैकल्पिकी षष्ठी स्यात् । अत्राभिप्रायोऽयं यत् उभयप्राप्तौ कर्मणीति सूत्रेण कर्मणि तु नैरन्तर्या षष्ठी भवत्येव । शेषे विभाषेति वार्तिकेन तूभयोः कर्तृकर्मणोः षष्ठयां प्राप्तौ सत्यामपि कर्तर्येव वैकल्पिकी षष्ठी भवति । अत्राप्येकेषामाचार्याणां मते शेषे विभाषेति वार्तिकस्य विकल्पः स्त्रीप्रत्यययोरकाऽकारयोर्योगे सत्येव भवतीति कथनेन अक अ भिन्नप्रत्ययस्य कस्यापि कृदन्तशब्दस्यात्रापि स्त्रीप्रत्ययान्तस्य योगे इयं शेषे षष्ठी लगेत् । एतत्कथानानुसारं कर्तृवाच्यस्य हरिर्विचित्रं जगत्करोतीति वाक्यस्य कृदन्तप्रत्यययायाः कृतेर्योगे हरि जगत् कृतिर्विचित्रा इति जाते ततः कर्मणि जगति नित्यं षष्ठी शेषे विभाषेति वार्तिकेनानुक्तकर्तरि हरौ वैकल्पिकी षष्ठी च भवति षष्ठ्या अभावे तृतीया च - हरेर्हरिणा वा जगतः कृतिर्विचित्रा । शेषे विभाषेति वार्तिकेन कृता इयं षष्ठी शेषषष्ठी प्रोच्यते ।

[4] केषाञ्चिदाचार्याणां मते कृदन्तस्यानुशासनशब्दस्य योगे आचार्ये वैकल्पिका षष्ठी भवति षष्ठ्यभावेऽनुक्तकर्तरि तृतीया ।

न लोकाव्ययनिष्ठाखलर्थतृनाम् २।३।६९॥

ल उ उक अव्यय निष्ठा खलर्थ तृन् एषां योगे षष्ठी न स्यात् । कर्तृकर्मणोः कृति इति सूत्रेण प्राप्ता षष्ठी अनेन सूत्रेण निषिध्यते । कर्मणि निष्ठाखलर्थप्रत्ययाभ्यां निष्पन्नौ शब्दौ विनाऽन्येषां योगे द्वितीया । लादेशैः शतृशानच्कानच्क्वस्वादयो गृह्यन्ते । शतृशानचौ - सृष्टिं कुर्वन् कुर्वाणो वा हरिः । कानच् - सोमं सुषुवाणः । क्वसु = पितरं पपिवान् । उः- हरिं दिदृक्षुर्नरो नारी वा । अन्नं बुभुक्षुर्नारी पुरुषो वा । धनं लिप्सुः पुरुषः स्त्री वा । उप्रत्ययेन इष्णुच्प्रत्ययोऽपि गृह्यते- बालिकामलङ्करिष्णुर्नरो नारी वा । उकञ् - दैत्यान्घातुको हरिः । फलमभिलाषुको गामं ग्रामुको वा जनः । **कमेरनिषेधः-वा.**-कर्मेर्योगे षष्ठ्या निषेधो नास्तीत्यर्थः । न लोकाव्ययनिष्ठा. इति सूत्रेण प्राप्ता निषेधषष्ठी अनेन वार्तिकेन निषिध्यते । लक्ष्म्याः कामुको हरिः । अव्ययम् - अव्ययेन क्त्वाल्यप्तुमुन्णमुल्प्रत्ययान्तक्रिया गृह्यन्ते जगत्सृष्ट्वा । शिवं प्रणम्य । सुखं कर्तुम् । कृष्णं द्रष्टुम् । नामं नामं घनश्यामम् । ध्यायं ध्यायं गुरुं देवम् । निष्ठा - विष्णुना हता दैत्याः । विष्णुर्हतवान् दैत्यान् । खलर्थः - सुकरः ईषत्करः प्रपञ्चो हरिणा । तृन्निति शतृशानचाविति तृशब्दस्य तृनो नकारपर्यन्तः[१] प्रत्याहारो गृह्यते । शानन् - सोमं पवमानः । चानश् - आत्मानं मण्डयमानः । शतृ-वेदमधीयन् । तृन् - कर्ता लोकान् । विद्यां धनं वा दाता । **द्विषः शतुर्वा-वा.**-शत्रन्तद्विष्धातोर्योगे षष्ठ्या निषेधो वा वक्तव्य इत्यर्थः । न लोकाव्ययनिष्ठा. इत्यनेन प्राप्ता निषेधषष्ठी अनेन वार्तिकेन वा विधीयते । मुरस्य मुरं वा द्विषन्नयं कृष्णः । सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः । शेषे षष्ठी तु स्यादेव-ब्राह्मणस्य कुर्वन् कुर्वाणो वा । नरकस्य जिष्णुः । आत्मनस्तंत्वज्जिज्ञासुः । जिज्ञासुरपि योगस्य ।

अकेनोर्भविष्यदाधमर्ण्ययोः २।३।७०॥

भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात् । तुमुन्ण्वुलौ. इति सूत्रेण भविष्यत्यर्थे कर्तरि ण्वुलि अकि कृते तस्य स्थाने कृतस्याकारान्तशब्दस्य योगे कर्तृकर्मणोः कृतीत्यनेन प्राप्तायाः षष्ठ्या अनेन सूत्रेण निषेधे सति द्वितीया -सज्जनान्पालकोऽवतरति लोके । कृष्णं दर्शकः सुदामा व्रजं याति । भविष्यति गम्यादयश्चेति सूत्रेण भविष्यदर्थे कृतस्य णिनिप्रत्ययान्तशब्दस्य योगे कर्मणि षष्ठीप्राप्तायामनेनैव सूत्रेण निषेधे द्वितीया एतेन योगे - व्रजं गामी कृष्णोऽग्रे वर्तते । आवश्यकाधमर्ण्ययोरिति सूत्रेणाऽऽधमर्ण्यार्थे णिनिः - शतं रूप्यकं दायी जनोऽयम् । नेह - अवश्यङ्करोतीति अवश्यङ्कारी कटस्य । अत्र षष्ठी विहिता न तु द्वितीया ।

कृत्यानां कर्तरि वा २।३।७१॥

कृत्यानां कर्तरि षष्ठी वा स्यात् । अनेनादौ वैकल्पिका षष्ठी । षष्ठ्यभावे तृतीया । यतः कर्मणि विहितानां कृत्यानां योगे यदा कर्ता उक्त कर्तरि तिष्ठति । तस्मिन्नुक्तकर्तरि वैकल्पिकी षष्ठी । यदा कर्ताऽनुक्तकर्तरि तिष्ठति । तदा विकल्पाऽभावेऽनुक्तकर्तरि तृतीया च भवति । कृत्येन तव्यत्तव्यानीयर्यत्क्यप्ण्यत्प्रत्ययाः स्मरणीयाः । पूर्ववाक्यम् - अहं हरिं सेवे-कर्मणि-सेव्यस्य योगे उक्ते अहमिति कर्तृपदे वैकल्पिकी षष्ठी । विकल्पाऽभावे अनुक्ते अहमिति कर्तृपदे तृतीया विहिता - मया मम वा सेव्यो हरिः । एवं त्वया तव वा पिता पूजनीयः पूज्यो वा । त्वया मया वा तव मम वा माता पूजनीया पूज्या वा । मया मम वा तस्य नमस्कारो वाच्यः । एवं सर्वत्र प्रयोगश्चिन्त्यः । कर्तरीति किम् - गेयो माणवकः साम्नाम् । भव्यगेय. इत्यनेन कर्तरि यद्विधानादनभिहितं कर्म । अत्र सूत्रे योगो विभज्यते । कृत्यानाम् = कृत्यानां प्रयोगे उभयप्राप्ताविति नेति चानुवर्तते । अर्थात् कृत्ययोगे कर्तृकर्मणोरुभयोः प्रसक्ता षष्ठी नेत्यर्थः फलति । यत उभये षष्ठी न । कर्मणि- कृष्णेन

---

१ तृन्प्रत्याहारेण शतृ-शानच्-शानन्-चानश्-शतृ-तृन् प्रत्यया गृह्यन्ते ।

गावो व्रजं नेतव्याः कर्तरि-कृष्णो गा व्रजं नयति-ते । कर्मणि-गोपेन गावः पयो दोग्धव्याः - दोहनीयाः, दो ह्या वा । कर्तरि - गोपो गाः पयो दोग्धि दुग्धे । एवं द्विकर्मकधातूनां प्रयोगः क्रियते । अत्र गौणे कर्मणि दुह्यादेरिति श्लोकस्य नियमः स्मरणीयः । ततः - कर्तरि वा । **उक्तोऽर्थः** = उपरिसूत्रेण या वैकल्पिकी षष्ठी विहिता सा एव ।

तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् २।३।७२॥

तुल्यार्थैर्योगे तृतीया वा स्यात् विपक्षे षष्ठी । वाच्यलिङ्गा समस्तुल्यः सदृक्षः सदृशः सदृक् । साधारणः समानश्चैते तुल्यार्थाः । एते शब्दा असमासेऽन्येभ्यस्तृतीयान्तेभ्यः षष्ठन्तेभ्यश्च शब्देभ्यः पूर्वापरयोः प्रयोक्तुं शक्यन्ते । अर्थकाले तु तुल्यादिशब्देभ्यः पूर्वं तृतीयाषष्ठ्यन्तशब्दौ प्रयुज्येते । एते शब्दाः समासेऽन्यशब्देभ्यः परे तिष्ठन्ति = कृष्णेन कृष्णस्य वा समः, तुल्यः, सदृशो वा कोऽपि नास्ति । रामेण रामस्य वा सदृशः सदृक्षः सदृक् समानो वा पटुःकोऽपि न लभ्यते । क्रोष्टुशब्दस्तृजन्तेन तुल्यं वर्तते । कर्मस्थया तुल्यक्रियया कर्ता कर्मवत्स्यात् । लोके पितुस्तुल्य इव पुत्रो भवति अतुल्यश्च । अनेन अस्य वा समानोऽन्यो न कश्चन । येन हेतुना तुल्यमतुल्यं तदुपरिष्टाद्वक्ष्यामः । नहि ज्ञानेन सदृशं पवित्रमिह विद्यते । मातृतुल्यगुणो जातस्त्वनुजातः पितुः समः । आकारसदृशः प्राज्ञः प्रज्ञया सदृशागमः । आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ इत्यादि । तुलनोपमाभ्यां योगे तु केवलं षष्ठी - कृष्णस्य तुलना उपमा वा केनापि सह न भवति । न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना । केनोपमा भवतु तेऽस्य पराक्रमस्य । शुक्रेण राज्यस्योपमा वृक्षेण सह क्रियते । रामस्य उपमा तुलना वा केनापि सह न जायते । कृष्णस्य रामस्य वा तुलनां उपमां वा केनापि सह मा कुरु न विधेहि वा । तस्य तुलना केनापि सह न भवति । आहारनिद्राभयमैथुनञ्च सामान्य(समान) मेतत्पशुभिर्नराणाम् ।

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः २।३।७३॥

एतैर्योगे षष्ठी स्यात् पक्षे चतुर्थी चाशीर्वादार्थे । आयुष्यं चिरजीवितं भद्रं मद्रं कुशलं निरामयं सुखं शं शुभम्, अर्थः प्रयोजनं हितं पथ्यं वा कृष्णाय कृष्णस्य वा भूयात् । व्याख्यानात्सर्वत्र ग्रहणम् - चिरञ्जीवी शर्मसातसुखानि च । श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् । भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् । शस्तं चेत्यमरः ।

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनदपस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ॥ पुरुषस्य दर्शनार्थं कैवल्यार्थं प्रधानस्य । लोकानां तु विवृद्ध्यर्थम् । मङ्गलं कौशलेन्द्राय महनीयगुणाब्धये । मङ्गलं रामचन्द्रस्य रामभद्रस्य मङ्गलम् ।

परिशिष्टम्

१. योग-वियोग-वियोगिशब्दैर्योगे तृतीया षष्ठी च भवति - क) तृतीया - एतेन योगे द्वितीया स्यात् । कर्मप्रवचनीयेन योगे द्वितीया स्यात् । स्तोः ष्टुना योगे ष्टुः स्यात् । अन्तरा अन्तरेण आभ्यां योगे द्वितीया स्यात् । आभ्यां यागे सप्तमी स्यादर्चायाम् । एभिर्योगे चतुर्थी स्यात् । एतैर्योगे पञ्चमी स्यात् । अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् । स्वजनैर्वियोगो वियोगी वा स्यात् । ख) षष्ठी - क्तस्य योगे षष्ठी स्यात् । कृञो योगे डाच् स्यात् । कमेर्योगे षष्ठ्या निषेधो नास्ति । एषां योगे षष्ठी स्यात् । पतिपत्न्योर्वियोगे कारुण्यमाविर्भवति । स्वजनेन सह कस्य वियोगो न । स्वजनस्य वियोगी दुःखी भवति । स्वजनस्यातिप्रियवस्तुनो वा वियोगे दुःखं भवति ।

२. प्रयोगेण योगे षष्ठी - क) ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । एषां प्रयोगे षष्ठी न स्यात् । एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात् । एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात् । क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स सम्प्रदानं स्यात् ।

ख) संयोगेन योगे षष्ठी - सदाऽनयोः संयोगः स्यात् । अस्य तेन सह संयोगो भवति । अपामग्नेश्च संयोगाद्धैमं रोप्यं च निर्बभौ । तयोः संयोगे सदा विवादः स्यात् । अनयोः संयोगाय यत्नं कुरु ।संयोगेन च मद्भक्त्या याति ब्रह्मसनातनम् ।

३. शास्त्रेषु कृते पार्श्वे समक्षम् (अग्रे) अन्तरः, स्थानम्, अन्तश्चैभिर्योगे षष्ठी विहिता लभ्यते। अन्तरस्य बहिर्मध्यश्चार्थौ । अन्तशब्दस्याभ्यन्तरो मध्योऽन्त्यश्चेत्यादयोऽर्थाः । अन्तः, अन्तरश्चाभ्यां योगे सप्तम्यपि विधीयते-वनेऽन्तः । अविद्यायामन्तरे वर्तमानाः ।

क) कृते - आचार्यस्य कृते इयं दक्षिणा । सेर्वेषां कृते कर्मेदम् । ज्ञानं ज्ञानिनामज्ञानिनां च कृते भवति । नियमः, सद्विचारः, सद्भावः क्षमाशीलत्वं च जीवनस्य कृते सर्वैरपेक्ष्यन्ते । तव कृते एष प्रयत्नः । देशस्य कृते सर्वे जनाः सङ्कट्टिता भवेयुः । ततः (तस्मात्कारणात्) भवता तेषां कृते काचिद्विभीषिका क्रियताम् ।

ख) पार्श्वे =समीपे । पार्श्वम्=समीपम् - अहं तव पार्श्वे महता कार्येण समागतः । मम पार्श्वे स वसति । तस्य पार्श्वे त्वं न गच्छ । अहं भगवता नारायणेन तव पार्श्वे प्रेषितः । कृष्णस्य पार्श्वे भक्ता गोपिन्यश्च सन्ति । दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ।

ग) समक्षम् - मनुष्याणां समक्षं (अग्रे अग्रतः पुरः पुरतः पुरस्ताद्वा) घोरात् घोरतरादपि विपत्समुपतिष्ठते । तव मम वा समक्षं कठिनादपि कठिनी समस्या समुपतिष्ठते (समुपस्थिता भवति) । देशस्य समक्षं महती समस्या विद्यते समुपतिष्ठते अस्ति वा ।

घ) अन्तरः - वृक्षस्य अन्तरे स विद्यते । स गृहस्याऽन्तरे वस्तूनि (पदार्थान्) निदधाति । अपरं च सेव्यसेवकयोरन्तरं पश्य । अनन्तरम् = यतः स्वामिनोऽनन्तरम् (पश्चात्) भृत्याः कार्याः ।

ङ) अन्तः,[१] अन्ते - नास्त्यन्तो विस्तरस्य मे । बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते । तदा सेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् । गृहस्यान्ते माता पुत्री पुत्रो वा वर्तते । वारिणोऽन्त(मध्ये)र्यत्तटं तद्वीपः अन्तरीपं चेति चोच्यते । जलस्यान्ते(अभ्यान्तरे)मत्स्या मण्डुकाश्च निवसन्ति । नास्त्यन्तो विस्तरस्य मे । अन्तर्योगे सप्तम्यपि ।

४. समान्तात्ः (वरिपरि, चारैतर्फ - चारों ओर-तरफ) = अस्य योगे षष्ठी - उलूकराजो रात्रावभ्येत्य सदैव न्यग्रोधवृक्षस्य समन्तात्परिभ्रमति । यतोऽस्मात्परिग्रहोऽस्य चन्द्रमसः समान्ताद्वसति। कदलीदलकुञ्जायितस्य एतत्कुटिरस्य समन्तात्पुष्पवाटिका आसीत् । तस्य ह्रदस्य समन्ताच्छशकविलानि असंख्यानि सुकोमलभूमौ तिष्ठन्ति । एते बालका जना भक्ता वा मम अस्य तस्य वा समन्ताद्वसन्ति । अथ ते विश्वासमापन्नाः तात ! मातुल ! भ्रातः !अहंपूर्वमहंपूर्वमिति ब्रूवाणास्तस्य समन्तात्परितस्थुः ।

५. मिथः - अस्य योगे षष्ठ्या द्विबहुवचने स्तः - ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् । तयोर्मिथो मेलनं सख्यमस्ति आसीद्वा । तयोर्मिथः सम्बन्धोऽस्ति नास्ति आसीद्वा । त्यदादीनां मिथः सक्तौ यत्परं तच्छिष्यते । तेषां तयो तेषु वा मिथो मित्रता सख्यं वा नास्ति । परस्परम् - तयोस्तेषां वा परस्परं सम्बन्धोऽस्ति । अन्यत्र तु - एतौ परस्परं मिलतः । एतौ मिथः सवर्णौ न स्तः ।

६. सम्बन्धः - अस्य योगे षष्ठी तृतीया च भवति - क) जनकाणां रघूणां च सम्बन्धः कस्य न प्रियः । अस्य सम्बन्धस्तेन सह नास्ति अस्ति वा । नेपालस्य सम्बन्धो भारतचीनदेशाभ्यां सह विद्यते । अलाभे पुनरेतेषां सम्बन्धेन तदीशितुः । तस्य मम वा सम्बन्धस्तेन सहास्ति । एषां तेषां वा

---

१ अव्ययोऽनव्ययश्च चिन्त्यः शब्दोऽयम् ।

युष्माकमस्माकं वाऽनेन आभ्याम् एभिर्वा सह सम्बन्धोऽस्ति । ख) यजमानस्य यज्ञेन सम्बन्धो भवति । सत्यपि स्वेन सम्बन्धे न हन्ति शुभभुक्तिषु । तेन ताभ्यां तैर्वा सह मम सम्बन्धो नास्ति । न मे देहेन सम्बन्धो मेघेनैव विहायसः । नाथेनान्यतरेणापि सम्बन्धाद्योगकारकौ ।

७. किम्, कोऽर्थः, को लाभः, का सिद्धिः, किं प्रयोजनम् अलमित्यादिभिर्योगे षष्ठयन्तपदात्पूर्वे परे वा तृतीया । क) कस्यापि मूर्खेण पुत्रेण कोऽर्थः किं वा । स्वामिनोऽनुशासनहीनेन सेवकेन किं कोऽर्थो वा । मया किं ते प्रयोजनम् । कोऽर्थस्तेषां पार्थिवस्याश्रयेण । अनेन कर्मणा तव को लाभः । अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । अलं महीपाल तव श्रमेण । अलं तव प्रयत्नेन । अलं विस्तरेण तवेत्यादि ।

ख) लक्षणं स्वरूपञ्च शब्दौ कृदन्तौ बोध्यौ । अनयोर्योगे षष्ठी - वेदस्य साहित्यस्य न्यायस्य वा किं लक्षणम् । कृष्णस्य शिवस्य ब्रह्मणो लक्ष्म्या दुर्गाया वा किं स्वरूपम् । पृथिव्याः किं लक्षणम् । आकाशस्य वायोस्तेजसो जलस्य पृथिव्या वा को गुणः । तव मम तस्य वा स्वरूपं कीदृक् अस्ति ।

८. द्वित्रि इत्यादिपूर्वकाणां संख्यावाचकानां शतसहस्रादिशब्दानां समाहरद्विगुसमासेन विशेष्यवाचकशब्दा निष्पद्यन्ते न तु विशेषणवाचकशब्दाः । तादृशेभ्यः शब्देभ्यो ङिपि कृते स्त्रीलिङ्गिनः शब्दा भवन्ति । यथा द्विशती त्रिशती चतुःशती पञ्चशती षट्शती द्विसहस्री त्रिसहस्री चतुसहस्रीत्यादयः । एषां योगे स्थिताच्छब्दात्षष्ठी - छात्राणां छात्राणां वा द्विशती त्रिशती चतुःशती वाऽस्ति । अत्र पण्डितानां पञ्चशती तिष्ठति वसति वा । मद्दतां वृत्तिं भुञ्जानानां जनानां सप्तशती विद्यते । रामस्य वानरसैन्यानां द्विसाहस्री आसीत् ।

९. विंशत्यादिशब्दा[1] नित्यैकवचनान्ताः संख्येये संख्यायां च विद्यन्ते । एते शब्दा विशेषणे विशेष्ये चोभयो रूपे प्रयुज्यन्ते । एतेषु संख्यार्थे स्थितेषु मध्ये यस्याः संख्याया द्विरावृत्तिः[2] क्रियते सा संख्या द्विवचनं यस्याः संख्यायास्त्रिरावृत्तिश्चतुरावृत्तिश्च क्रियते सा संख्या बहुवचनं च भवति । यथा द्वे विंशती (४०) तिस्रो विशत्यः (६०) इत्यादि । तेषां योगे स्थिताच्छब्दात्षष्ठी विधीयते । यदा संख्यावाचकशब्दो विशेषणं भवति । तदाऽनेन सह षष्ठी न विधीयते । विशेष्यं भवति चेदस्य योगे स्थिताच्छब्दात्षष्ठी विधीयते ।

क) विशेष्ये निष्पन्ना द्विगुणितसंख्यावाचकशब्दाः - मम रूप्यकाणां द्वे ऊनविंशती आनय । स फलानां तिस्रो विंशतीः नयति । आम्राणां द्वे विंशती वहाम्यहम् । जनानां चतस्रो विंशतीस्ते पश्यन्ति ।

ख) विशेषणे प्रयोज्या अगुणितसंख्यावाचकशब्दाः - मम विंशतिः पुस्तकानि सन्ति । तस्य विंशतिं फलानि आनय । विद्यालये पञ्चाशदध्यापकाः सन्ति । अस्माकं विद्यालये त्रयोदशाधिकशतं छात्रा पठन्ति तत्रैव क्रिडन्ति च । तव द्वौ छात्रौ गतौ । रमेशस्य त्रयः पुत्रा विद्यन्ते । अस्य षट् गृहाणि सन्ति । दशरथस्य चत्वारः पुत्रा आसन् । शिवादिदेवानां पञ्च मन्दिराणि वर्तन्ते (विद्यन्ते) । राजश्चत्वारिंशत्सैनिका युद्धे हताः । अस्य पुस्तकस्य पादोनसहस्रद्वयं मूल्यमासीत् अस्ति वा । फलानां तिस्रः संख्या आसन् । पाण्डोः पञ्च पुत्रा आसन् ।

ग) विशेष्ये प्रयुक्तानां संख्यावाचकशब्दानां योगे स्थिताच्छब्दात्षष्ठी विधीयते - अध्यापकानां पञ्चाशदस्ति । बालकानां पञ्चविंशतिरागतवती । तेषां शतं गतम् । नृणां जन्मसहस्रेषु भक्तौ प्रीतिर्हि जायते । मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । छात्राणां पञ्चशतं विद्यते ।

---

[1] विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः । संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः - अमरः २।१०।८४॥ संख्येयसंख्ययोः = विशेषण विशेष्ययोरिति बोध्यम् ।

[2] आवृत्तिर्गुणिता इत्येतौ शब्दौ समानार्थौ ।

१०. यदा द्वि त्रि इत्यादिसंख्यावाचकपूर्वकैः शब्दैः सह गुण गुणित आवृत्त आवर्तित एते शब्दाः समस्यन्ते । ततो द्विगुणः, द्विगुणितः, त्रिगुणः, त्रिगुणितः, त्रिरावृत्तः, त्रिरावर्तित इत्यदिशब्दा निष्पद्यन्ते। एतानि विशेषणानि ज्ञेयानि । एषां प्रयोगः - तस्य भवनस्य उच्चता अस्माद्भवनाद् द्विगुणा विद्यते। अस्मिन्विद्यालये पञ्चाशद्गुणादधिकाश्छात्राः सन्ति । अस्य मार्गस्य लम्बता (दीर्घता) शतगुणा वर्तते। स धनं वर्षे सहस्रगुणं लक्षगुणं कोटिगुणं वाऽधिकमर्जयेत् परं न यशः । ब्रह्मचारिणस्त्रिगुणां मेखलां (कटिधारणरज्जुं) धारयन्ति (बध्नन्ति) । इयं गौर्बल्वजस्य द्विगुणया (द्विरावृत्तया) रज्ज्वा बद्धाऽस्ति । इयं बाला कार्पासस्य त्रिरावृत्तं त्रिरावर्तितं त्रिगुणं त्रिगुणितं वा दाम धारयति (बध्नाति) । ब्रह्मचारिणस्त्रिगुणा मेखला भवति ।

११. द्वाराशब्देन योगे क्वचित्षष्ठी कुत्रचित्तृतीया च विधीयते । यथा - क) षष्ठी - कृष्णस्य द्वारा, व्यासस्य द्वारा, वाल्मीकेर्द्वारा इत्यादि - कृष्णस्य द्वारा गीता प्रोक्ता । व्यासस्य द्वारा महाभारतं रचितम् । वाल्मीकेर्द्वारा रामायणं व्यासस्य द्वारा श्रीमद्भागवतं च विरचितम् (व्यरचि) । कालिदासस्य द्वारा रघुवंशमहाकाव्यं शाकुन्तलं नाटकं च भवभूतेर्द्वारा उत्तररामचरितं श्रीहर्षस्य द्वारा नैषधमहाकाव्यं चाग्रथि (ग्रथितम्) । षष्ठचन्तं पदं द्वाराशब्देन सह समासं विधाय निष्पन्नः शब्दः - कृष्णद्वारा गीता प्रोक्ता । वाल्मीकिद्वारा रामायणं व्यासद्वारा भागवतं च व्यरचि । कालिदासद्वारा रघुवंशमहाकाव्यं विरचितम् । श्रीहर्षद्वारा नैषधमहाकाव्यं प्रणीतम् । वृष्टिद्वारा धान्यानि अभवन् बीजानि उदभवँश्च। एवं सर्वत्र प्रयोगः संमाधेयः ।

ख) तृतीया - वेदपाठेन द्वारा मन्त्राणामवबोधो भवति । तेन द्वारा कार्यं भवेत् ।

१२. निजस्वात्मन्युष्मदस्मदादिशब्दाः सम्बन्धबोधकाः सन्ति । येषु निजशब्दो विशेष्यानुसारं स्वादिस्शब्दाः स्वलिङ्गानुसारं षठचां प्रयुज्यन्ते । (निजः, स्वः, आत्मा = आफ्नो-फ्नी=अपन-ने-नी। युष्मद् = तव = तिम्रो-म्रा-म्री=तेरा-री-रे । अस्मद् = मम = मेरो-रा-री=मेरा-री-रे ।

१. स निजां मातरं सेवते - स स्वस्य मातरं सेवते ।
२. त्वं निजं नाम ब्रूहि - त्वं तव नाम ब्रूहि ।
३. ते निजया लेखन्या पत्रं लिखन्ति - ते आत्मनो लेखन्या पत्रं लिखन्ति ।
४. यूयं निजं पितरं सेवध्वम् - यूयं स्वानां पितरं सेवध्वम् ।
५. अहं निजं पुत्रं पश्यामि - अहं मम (आत्मनः) पुत्रं पश्यामि ।
६. कृष्णो निजं कार्यं (कर्म) विधत्ते - कृष्णः स्वस्य कार्यं (कर्म) विधत्ते ।
७. भवान् निजं भागं गृह्णीयात् - भवान् स्वस्य (आत्मनः) भागं गृह्णीयात् ।
८. वयं निजं कर्म विदध्मः(कुर्मः) - वयमस्माकं कर्म कुर्मः(विदध्मः) ।
९. त्वं निजं कर्म (कार्यं) कुरु (विधेहि) - त्वंमात्मनः (स्वस्य) कर्म(कार्यं) विधेहि (कुरु)।

१३. कर्मवाच्यस्य कृत्यान्तक्रियायां पूर्वमुक्तकर्तरि विहितायां प्रथमायां (पूर्वं कर्तृवाच्ये विहिते कर्तरि) वैपल्पिकं षष्ठचन्तं विकल्पाभावेऽनुक्तकर्तरि विहितं तृतीयान्तं च पदं भवति । तत उक्तकर्मणि विहितं प्रथमान्तपदानुसारं क्रियापदं च प्रयुज्यते । स्मरणीयं यत् क्वचित्तत्कर्मप्रथमान्तपदात्पूर्वं विवक्षया षष्ठचन्तपदमपि विधीयते ।

क) अस्मद् युष्मद्

१. मम[1] मया वा तव युवयोः युष्माकं वा नमस्कारो वक्तव्यो वाच्यो वा ।
२. आवयोः आवाभ्याम् वा तव युवयोः युष्माकं वा अपराधः क्षन्तव्यः क्षम्यो वा ।
३. अस्माकं अस्माभिर्वा तव युवयोः युष्माकं वा दुःखं ज्ञातव्यम्, ज्ञेयम् वा ।

---

[1] कृत्यानां कर्तरि वेति पक्षे षष्ठी विपक्षे तृतीया ।

ख) युष्मद् अस्मद्

१. तव त्वया वा मम आवयोः, अस्माकं वा वार्ता श्रोतव्या श्राव्या श्रुता वा ।
२. युवयोः आवाभ्यां वा मम, आवयोः, अस्माकं वा गृहं गन्तव्यम्, गम्यम् वा ।
३. युस्माकम् अस्माभिर्वा मम आवयोः अस्माकं वा नाटकं द्रष्टव्यम् द्रष्टम्, वा ।

१४. कर्मवाच्यस्य तिङन्तातिङन्तक्रियायां प्रायेणाऽऽदौ अनुक्तकर्तरि विहितं तृतीयान्तपदं ततः कर्मप्रथमान्तपदं तदनुसारं क्रियापदं प्रयुज्यते विवक्षया कर्मप्रथमान्तपदात्पूर्वं षष्ठ्यन्तपदं च ।

१. तेन ताभ्याम् तैर्वा तव युवयोः युष्माकं वा गृहं निर्मीयते निर्मातव्यम् निर्मीतं वा ।
२. भवता, भवद्भ्याम् भवद्भिर्वा मम आवयोः अस्माकं वा उपकारः क्रियते कर्तव्यः करणीयः कार्यः कृतो वा ।
३. रामेण कृष्णेन वा तव मम वा युवयोरावयोर्वा युष्माकमस्माकं वा शत्रुर्हन्यते हन्तव्यः हतो वा - शत्रू हन्येते हन्तव्यौ हतौ - शत्रवो हन्यन्ते हन्तव्याः, हता वा ।

क्षन्तव्यो मेऽपराधः शिव शिव भो श्रीमहादेवशंभो । दुर्गया लक्ष्म्या शिवेन हरिणा वा तव मम वा युवयोरावयोर्वा युष्माकरस्माकं वा (मह्यम्, तुभ्यम्, युवाभ्याम् ,आवाभ्याम्, युष्मभ्यम्, अस्मभ्यं वा) वरो दीयते दातव्यः दानीयः देयः दत्तो वा । त्वया कृष्णस्य सान्निध्यं प्राप्यते प्राप्तव्यम्, प्रापणीयम्, प्राप्यम् प्राप्तं वा । तेन शिवस्य लोको गम्यते गन्तव्यः, गमनीयः, गम्यः, गतो वा । जगन्मातर्मातस्तव चरणसेवा न रचिता न वा दत्तं देवि द्रविणमपि भूयस्तव मया । देयं दीनजनाय च वित्तम् । इत्यादि ।

१५. समूहः, सङ्घः, वर्गः, समुदायः, समुदयः, निवहः, व्यूहः, सञ्चयः, समवायः, गणः, संहतिः, वृन्द[1]ञ्चेत्यादिसमूहार्थवाचकशब्दानां योगे षष्ठी - जनानां समूहः । छात्राणां सङ्घश्चेत्यादि ।

विशेषः - कृति तृच्=कर्ता, हर्ता धर्ता, द्रष्टा, पक्ता । ण्वुल्=दर्शकः, हारकः पाचकः । अण्=कुम्भकारः भारहारः । घञ्=पाकः भावः । अच्=चयः, जयः, क्षयः । अप्=शरः, करः, स्तरः, स्तवः, लवः । अथुच्=वेपथुः, श्वयथुः । नङ्=यज्ञः, याच्ञा, यत्नः, विश्नः प्रश्नः । नन्=स्वप्नः । कि=उपाधिः, सन्धिः । क्तिन्=कृतिः, स्तुतिः । क्यप्=व्रज्या, इत्या, कृत्या । शः=क्रिया इच्छा । अः=चिकीर्षा ईहा ऊहा । अङ्=जरा त्रपा भिदा कृपा चिन्ता, पूजा, कथा चर्चा । युच्=हारणा, कारणा, वन्दना, वेदना । इत्यादि । कृतस्त्रयो भेदाः सन्ति कृत्यः कृदुणादिश्च । कृत्यस्य प्रसङ्गो यत्रतत्र समुल्लिखितोऽस्ति । षष्ठीविधाने कृदन्त उणाद्यन्तश्च शब्दौ सावधानतया विचारणीयौ ।

स्मरणीयं यत् येन पदेन योगे षष्ठी विधीयते । तस्माद्युक्तपदात्पूर्वं सन्निधौ विहितं षष्ठ्यन्तपदं प्रयुज्यते । पद्यस्य वाक्ये एकत्र षष्ठ्या विधीयमानपदमन्यत्र यत्र कुत्रापि स्थले षष्ठ्यन्तं पदं प्रयुज्यते । अर्थकाले, षष्ठ्या विधीयमानपदात्पूर्वं सन्निधौ षष्ठ्यन्तं पदं प्रयुज्यते । गद्यस्य वाक्ये तु प्रायेण षष्ठीविधीयमानपदात्पूर्वं सन्निधौ षष्ठ्यन्तं पदं प्रयुज्यते ।

इति षष्ठी ॥४-६॥

४-७ अधिकरणम्

अधिकरणे कीदृश्यां क्रियायां केन केन शब्देन योगे कीदृशे भावलक्षणे इत्यादिविषये सप्तमी कथं विधीयत इति चिन्त्यो विषयः ।

---

[1] अमरकोशः - २।६।४१-४४॥

आधारोऽधिकरणम् १।४।४५॥

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् । तन्निष्ठक्रियाया कर्तृकर्मनिष्ठक्रियाया इत्यर्थः । क्रियापदेन तिङन्तक्रिया कृदन्त(अतिङन्त)क्रिया चोभे गृह्येते । अत्रापि तिङन्तक्रिया मुख्य(प्रधान)क्रियाः कृदन्तक्रियाश्च गौणक्रिया बोध्याः । कृदन्तक्रियायामपि कृत्यक्तक्तवतुखल्प्रत्ययान्तक्रिया मुख्याः शतृशानजादिप्रत्ययान्तक्रियाश्च गौणक्रिया ज्ञेयाः । आध्रियतेऽस्मिन्नित्याधारः = आश्रयः । यो यस्मिन्तिष्ठति निवसति, यमाश्रयति वा येन यत्र स्थीयते उष्यते वा सोऽपि आधारः = आश्रयो बोध्यः ।

सप्तम्यधिकरणे च २।३।३६॥

अधिकरणे सप्तमी स्यात् चकाराद्दूरान्तिकार्थेभ्यश्च । दूरान्तिकार्थाः शब्दा अपादानकारके दूरान्तिकार्थेभ्यश्च. इति सूत्रप्रसङ्गे संगृहीताः । आधारस्त्रिधा औपश्लेषिको वैषयिकोऽभिव्यापकश्च । चतुर्थं सामीपिकमधिकरणमपि गण्यते ।

१. औपश्लेषिकाधार[1]: - अयमेकदेशमात्रस्याधारो गृह्यते । यस्मिन्नाधारे (आश्रये स्थले वा) कर्ता कर्म वा निवसति तिष्ठति वा तस्मादाधारवाचकशब्दात्सप्तमी विधीयते । सदा कर्ता कर्म च आधेय (आश्रेयः) आश्रयश्चाधारो भवति । तयोराधाराधेययोरव्यवधानेन परस्परं यः सम्बन्धः स संयोगसम्बन्धो[2] निगद्यते । यत्राधेयस्याधारस्य च यः सम्बन्धो भवति स आधाराधेयभावसम्बन्धः प्रोच्यते ।

४-७-१-१) कर्तृद्वारक औपश्लेषिकाधारः-अस्त्यादेरकर्मकधातोस्तिङन्तातिङन्तक्रियायां[3] कर्तृद्वारा कटादेः सप्तमीविधाने साक्षात्क्रियाधारत्वं न भवति । यतः कटादेःक्रियाधाराधारस्य परम्परया औपश्लेषिकाधारं मत्वा तस्य कटादेरधिकरणसंज्ञं कृत्वा तस्मादौपश्लेषिकाधारवाचकात्कटादिशब्दात्सप्तमी विधीयते । आदौ औपश्लेषिकाधारवाचके कटादावाश्रितः कर्ता समुल्लिख्यते - क) पुत्रः कटे आस्ते (उपविशति) आसीतवान् आसीनो वा । वानराः पादपे सन्ति । पुत्री पतिगृहे तिष्ठति स्थितवती स्थिता वा । स खट्वायामासने पीठे वोपविशति उपविष्टवान् उपविष्टो वा । अहमासने उपविशामि (निविशामि) । चक्रं भ्रमति मस्तके । लतासु वृक्षे वा कुसुमानि विकसन्ति (फुल्लन्ति) । वृक्षे वृक्षयोर्वृक्षेषु वा फलानि फलन्ति । द्वारपालो रात्रौ राजद्वारे जागर्ति जागृतवान् वा । वृक्षो दिने दिने पृथिव्यां वर्धते । मञ्चे खट्वायां वा पुस्तकानि सन्ति । अस्ति गोदावरीतीरे विशालः शाल्मली तरुः । क्रीडनका क्रीडाक्षेत्रे क्रीडन्ति क्रीडितवन्तो वा । प्राणिनो दिने दिने धरण्यां जायन्ते म्रियन्ते च । चन्द्रो रात्रौ आकाशे प्रकाशते (राजति-ते चकास्ति वा) । नटो मञ्चे नृत्यति । विद्वान् सभायां शोभते । सूर्यो गगने (आकाशे) तेजसा दीप्यते (प्रकाशते) । बालो निशायां शय्यायां रोदिति रुदितवान् वा । स सा वा जले मज्जति निमज्जति स्नाति वा । मानवाः पानीये (जले) मज्जन्ति निमज्जन्ति स्नान्ति वा । रात्रौ गगने तारकाः प्रकाशन्ते । पात्रे भाण्डे वा घृतमस्ति । वृक्षा दिने दिने वायुना भूमौ कम्पन्ते कम्पितवन्तो वा । अहं मलनिवारणाय गङ्गायां नद्यां तडागे जलाशये कूपे धारायां वा स्नामि । वृक्षेषु वानरा उत्प्लवन्ते (उत्पतन्ति) । मन्दिरे घण्टाः क्वणन्ति । दिने आकाशे तारका न प्रकाशन्ते । सन्तो विजने स्थले तपस्यन्ति । पुण्यवान् प्रेत्य स्वर्गे महीयते । विष्णुर्भक्तौ शास्त्रेषु च व्यवतिष्ठति व्यवस्थितो वा । जनः शय्यायां शेते[3] शयितवान् शयितः - स्वपिति सुप्तवान् सुप्तो व । हरिः समुद्रे जले वा शेषे शेते संविशति संविष्टवान्वा । मत्स्या

---

१ उपश्लेषः संयोगादिसम्बन्धस्तत्प्रयोज्य आधार औपश्लेषिकः - विश्वनाथशास्त्री - मध्यकौमुदीटीकायाम् - पृ. ३९७ ।

२ संयोगसम्बन्धेनाविच्छिन्नसम्बन्धो ज्ञेयः (भवति) । संयोगसम्बन्धविच्छेदे सति तु द्वे वस्तू द्वौ पदार्थौ वा पृथक् पृथक् तिष्ठतः ।

३ अतिङन्तक्रियया गत्यर्थाकर्मक इति सूत्रेण भूतकर्तरि क्तेन निष्ठा इति सूत्रेण च भूतकर्तरि क्तवतुना च निष्पन्ना क्रिया गृह्यते ।

३ शीङ् स्वप् अनुसंविश् निद्रा मदि एते शयनार्थकाः । अकर्मकाः - लज्जा-सत्ता-स्थिति-जागरणं वृद्धि-क्षय-भय-जीवित-मरणम् नर्तन-निद्रा-रोदन-वासाःस्पर्धा-कम्पन-मोदन, हासाः । शयन-क्रीडा-रुचि-दीप्त्यर्था धातव एते कर्मणि नोक्ताः ।

सागरे जले वा सन्ति निवसन्ति वा । पक्षिणो वृक्षे वसन्ति उषितवन्तः उषिता वा । मुखे ते ताम्बूलं नयनयुगले कज्जलकला ललाटे काश्मीरं विलसति गले मौक्तिकलता । स्फुरत्काञ्ची शाटी पृथुकटीतटे हाटकमयी भजामि त्वां गौरीं नगपतिकिशोरीमविरतम् ॥ कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं नासाग्रे गजमौक्तिकं करतले वेणुःकरे कङ्कणम् । सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावलिर्गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥ पक्षिणो गगने उत्पतन्ति (उड्डयन्ते - भ्वादिः, उड्डीयन्ते - दिवादिः) । नक्षत्राणि (तारकाः) रात्रौ आकाशे (गगने) चकासति (प्रकाशन्ते) । रामः कटे निवसति । सर्वे प्राणिनो भूमौ निवसन्ति । घटो भूतलेऽस्ति । राजा सभायां राजते (शोभते) । पुत्रो गृहेऽस्ति । स कर्मणि प्रवर्तते । त्रैलोकस्यापि प्रभुत्वं त्वयि युज्यते ।

ख) अकर्मकधातोर्भावे निष्पन्नायां तिङन्तक्रियायामौपश्लेषिकाधारे सप्तमी, कर्ता तृतीयान्तः - भवता आसने उपविश्यताम् । बालेन शय्यायां शय्यते । तेन तया वा जले स्नायते मज्ज्यते वा । रात्रौ दिवि तारकैःप्रकाश्यते । पुत्रेण कटे आस्यते । एवमन्येषामकर्मकधातूनां प्रयोगः क्रियते ।

ग) अकर्मकधातोर्भावे निष्पन्नायामतिङन्तायां कृत्यक्तप्रत्ययान्तक्रियायामौपश्लेषिकाधारे सप्तमी । कर्ता तृतीयान्तः । कृत्यक्तान्तक्रिया भावे क्लीवैकत्वं ज्ञेयम् - भवद्भिःशुभकर्मणि यतितव्यं यतनीयं यतितं वा । बालेन शय्यायां शयितव्यम्, शयनीयम् शयितं वा । जनैर्गृहे स्थातव्यम् स्थेयम् स्थितं वा । अत्र त्वया निःशङ्केन वर्तितव्यम् । अद्य रात्रौ त्वया जागरितव्यम् जागृतं वा । नटैर्मञ्चे नर्तितव्यम्, नर्तितं वा । क्रीडनकैः रङ्गशालायां क्रीडितव्यम् क्रीडितं वा । संसारे मानवैर्विनयशीलैर्भवितव्यम्, भूतं वा । अस्माभिर्व्यवहारे विचारशीलैः स्थातव्यम्, स्थितं वा । त्वया मया च पठनकर्मणि सावधानेन भवितव्यं भूतं स्थातव्यं स्थितं वर्तितव्यं वा । ब्रह्मचारिणाऽऽश्रमे वस्तव्यम्, उषितं वा । विष्णुना जले सागरे वा शेषे शयितव्यम्, शयनीयम्, शयितं वा । त्वया मया युष्माभिरस्माभिर्वा जले स्नातव्यम्, स्नानीयम्, स्नानं वा । इत्यादि ।

घ) परस्मैपदिनोऽकर्मकधातोःशतृप्रत्यान्तगौणक्रियायामौपश्लेषिकाधारे सप्तमी - पृथिव्यां तिष्ठन्यो यमयति महीं वेद न धरा । पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसन् । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ वेदशास्त्रार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन् । इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते ॥ अस्माभिस्त्वया मया वा जना गृहे तिष्ठन्तो (निवसन्तो) दृश्यन्ते (लभ्यन्ते) । परकीयराज्ये निवसता दूतेन स्वदेशस्य सर्वाणि कार्याणि सम्पाद्यन्ते । राष्ट्रे निवसतां जनानां (निवसन्तीनां जनतानां) परस्परविरोधेन विकासः (उन्नतिः) शान्तिश्च कथं भवति । स्वदेशे तिष्ठतां (निवसतां) जनानां (तिष्ठन्तीनां निवसन्तीनां वा जनतानां) रक्षां राजा सर्वकारो वा विधत्ते (करोति विदधाति) । स्वदेशे परदेशेऽपि निवसद्भिर्जनैः (निवसन्तीभिः जनताभिः) स्वदेशाय हितं चिन्त्यते चिन्तितव्यं चिन्तनीयं चिन्त्यं वा । सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि । साऽट्टालिकायां वसन्ती मां पश्यति । सेवेतेमाँस्तु नियमान्ब्रह्मचारि गुरौ वसन् = गुरोः समीपे वसन्नित्यर्थः । गुरुकुले निवसद्भिर्ब्रह्मचारिभिर्गुरोः शास्त्राणि शिक्ष्यन्ते (अधीयन्ते पठचन्ते वा) । मात्रा पित्रा वा शिशुः बालो वा शय्यायां क्रीडन् (खेलन्) दृश्यते लभ्यते (प्राप्यते) । दर्शकैर्नर्तको नृत्यन् नर्तकी नृत्यन्ती चादृश्यत ।

२) आत्मनेपदिनोऽकर्मकधातोः शानच्प्रत्ययान्तगौणक्रियायामौपश्लेषिकाधारे सप्तमी - विभक्त्यादिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते सोऽव्ययीभावः । तेषु सम्यग्वर्तमानो गच्छत्यमरलोकताम् । गुणेषु वर्तमानोऽपि देहजेष्वनपावृतः । गुणैर्न बध्यते देही बध्यते वा कथं विभो ॥ अविद्यायामन्तरे वर्तमानाः । अहर्निशं ब्रह्मणि ये रमन्तः । मेधा-विद्या-धैर्यादिकाः सर्वे गुणा रामे राजमानाः (राजन्तः) आसन् । परश्वदिने सम्पत्स्यमाने कार्यक्रमे भवानवश्यमागमिष्यति । युद्धक्षेत्रे संपत्स्यमानाः सैनिकाः सम्बन्धिन आपृच्छन्ति । ऐह्यलौकिकेऽर्थे विद्यमानस्य सिद्धचतेरेव आत्वं स्याण्णौ । समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् ।

च) अकर्मकधातोस्तुमुन्प्रत्ययान्तक्रियायामौपश्लेषिकाधारे सप्तमी - देवेन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः । क्रीडका रङ्गशालायां (क्रीडाक्षेत्रे) क्रीडितुमारब्धाः । भवान् शयने शयितुमासने स्थातुं वस्तुमुपवेष्टुं वा गच्छतु ।

छ) अकर्मकधातोः क्त्वाल्यप्प्रत्ययान्तगौणक्रियायामौपश्लेषिकाधारे सप्तमी । गौणमुख्यक्रिययोःकर्ता एक एव - १) क्त्वा - छात्रः कटे मञ्चे खट्वायां वा स्थित्वा उषित्वा वा वेदं व्याकरणं वा पठति । बालः शय्यायां सुप्त्वा (शयित्वा) क्रीडति हसति रोदिति वा । खेलकाः कन्दुकेन क्रीडास्थले (क्रीडाभूमौ खेलस्थले खेलभूमौ रङ्गशालायां वा) क्रीडित्वा गृहं गताः । द्वारपालो रात्रौ जागरित्वा गृहं गृहस्य वस्तूनि च रक्षति । युवकः क्रीडायां युवत्यां वा रमित्वा रन्त्वा वा गृहस्य कार्याणि त्यजति । विप्रः सायं (सन्ध्याकाले) आसने उषित्वा सन्ध्यां कुर्वीत (गायत्रीं जपेत्) । भक्तो भगवत्कथां श्रुत्वा मञ्चे नर्तित्वा चासने उपविशति (निवसति) । गर्ज = गर्जित्वा । म्लै = म्लात्वा । क्षर = क्षरित्वा । शम् = शमित्वा शान्त्वा । भ्रम् = भ्रमित्वा भ्रान्त्वा । मद् = मदित्वा । मृङ् = मृत्वा । मस्ज् = मङ्क्त्वा मक्त्वा । एवंप्रकारेण सर्वत्र विचारणीयम् ।

ज) क्त्वःस्थाने ल्यप् = ब्राह्मणः प्रातःकाले सरसि स्नात्वाऽऽसने उपविश्य गायत्रीं जपति जपेद्वा ईश्वरस्य ब्रह्मणो वा ध्यानं करोति । ज्या = प्रज्याय ।

४-७-१-२) कर्मद्वारक औपश्लेषिकाधारः- पचादेः सकर्मकधातोस्तिङन्तातिङन्तक्रियाया कर्मद्वारा स्थाल्यादेः सप्तमीविधाने साक्षात्क्रियाधारत्वं न भवति । यतः स्थाल्यादेः क्रियाधाराधारस्य परम्परया औपश्लेषिकाधारं मत्वा तस्य स्थाल्यादेरधिकरणसंज्ञां कृत्वा तस्मादौपश्लेषिकाधारवाचकात्स्थाल्यादिशब्दात्सप्तमी विधीयते । अत्र पचादिक्रियाभिर्निष्पन्नेषु वाक्येषु औपश्लेषिकाधारवाचके स्थाल्यादावाश्रितं कर्म प्रयुक्तं लिख्यते - क) माता तण्डुलान्स्थाल्यां (पाकभाण्डे पाकभाजने वा) पचति पक्ववती वा । पुंसि-पक्ववान् । नारी घटे जलपात्रे वा जलमानयति आनीतवती आनीता[१] वा । स सा वा धान्यान्याढके घृतं पात्रे च निदधाति निधत्ते निहितवान् - निहितवती वा । त्वं तैलं स्नेहपात्रे कुतूपे निधेहि निहितवान्वा । सा वस्तूनि भाण्डेषु निदधाति निधत्ते निहितवती वा । ऋत्विक् अग्नौ स्रुवेण घृतं हस्तेन चरुं च जुहोति । आस्मिन्हव्या जुहोतन । श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति । शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ रूपाणि चक्षुषा राजञ्ज्योतिष्यभिनिवेशयेत् । अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा । वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिसक्षमम् ॥

ख) बालो गृहे मातरं स्मरति स्मृतवान् वा । गोपालो गोष्ठे गां बध्नाति बध्नीते । माता पात्रे घृतं निदधाति स्थापयति । त्वं पुस्तकधान्यां पुस्तकं निधेहि (स्थापय) । शैवो मन्दिरे शिवं वन्दते वन्दितवान्, वन्दितः - नमति नतवान्, नतः - उपास्ते उपासितवान् उपासित[२] उपतिष्ठते (उपास्ते) वा । छात्राः पुस्कालये पुस्तकानि वाचनालये समाचारपत्राणि च पश्यन्ति दृष्टवन्तो[३] वा । ईश्वरः संसारे भक्तं प्राणिनं च दुःखाद्रक्षति रक्षितवान् - त्रयते त्राणवन् त्रातवान् - अवति अवितवान् - गोपायितवान् गुप्तवान् - पालयति पालितवान्वा । वायुयानं द्विवादनसनये द्विवादने त्रिवादनसमये त्रिवादने चतुर्वादनसमये चतुर्वादने काष्ठमण्डपतो जनकपुरं जनकपुरतः काष्ठमण्डपं वाऽऽयाति । माता पुत्रं स्कन्धे पृष्टे वाऽऽरोहयति आरोहितवती । कोऽपि पूर्वजन्मनि कृतानि कर्माणि संसारेऽस्मिञ्जन्मनि भुनक्ति । सर्वकारः शिवशर्माणं राजदूतपदे नियोजयति । ईश्वरभक्तः पत्न्यां पुत्रे

---

१ गत्यर्थधातोः "गत्यर्थाकर्म इति सूत्रेण, कृतःक्तो निष्ठा इति सूत्रेण कृतःक्तवतुश्च प्रत्यययो भूतकर्तरि विहितश्चिन्त्यः ।

२ गत्यर्थाकर्मक. इति सूत्रेण क्तः ।

३ इक्षति अवलोकयति ।

धने गृहे पश्वादिषु च मायां ममतां च जहाति (त्यजति) करोति वा । गायन्ति सामकुशला यमजं मखेषु ध्यायन्ति धीरमतयो यतयो विविक्ते । पश्यन्ति योगिपुरुषाः पुरुषं शरीरे दृग्गोचरो भवतु मेऽद्य स दीनबन्धुः ॥ प्राच्यां रक्षतु मामैन्द्री आग्नेयामग्निदेवता । दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥

ख) सकर्मकधातोः कर्मवाच्यस्य यक्सहितायां रहितायां च क्रियायामौपश्लेषिकाधारे स्थितमुक्तं कर्म प्रथमान्तं भवति । तदनुसारं क्रियापदं प्रयुज्यते । अनुक्तकर्तरि तृतीया- ऋत्विजा प्रैषमन्त्रः प्रयोगकाले पठ्यते । अयं विषयो मुद्रिते ग्रन्थे नावाप्यते । पुराणानां गणना इतिहासेऽपि क्रियते । अनित्या जननमरणवन्तो ववराख्या वेदे श्रूयन्ते । अद्यापि बहूनि समाचारपत्राणि संस्कृतभाषायामेव प्रकाश्यन्ते । अयं सञ्जीवकोऽर्थाधिकारे नियुज्यताम् । अद्यापि संस्कृतस्य विद्वद्भिः संस्कृतभाषायामेव पुस्तकानि लिख्यन्ते । ईश्वरस्य महिम्नो वर्णनं सर्वेषु वेदेषु (मन्त्रभागे ब्राह्मणभागे उपनिषदि च) स्मृतिषु रामायणे महाभारते गीतासु पुराणेषु च स्फुटं लभ्यते । अनुष्ठेयोऽर्थ उपरितने "अजाक्षीरेण जुहोति" इति वाक्ये विधीयते । वेदे रामायणे चैव पुराणेषु च भारते । आदिमध्यावसानेषु हरिः सर्वत्र गीयते ॥ विवृत्तौ चावसाने च ऋचोऽर्धे च तथा परे । पदे च पादसंस्थाने शून्यहस्तं विधीयते ॥ व्यासेन कृष्णस्य महिमा भागवतेऽवर्णि । एवं सर्वत्र चिन्त्यम् ।

ग) सकर्मकधातोः कर्मवाच्यस्यातिङन्तायां कृत्यक्तप्रत्ययान्तक्रियायामौपश्लेषिकाधारे स्थितमुक्तं कर्म प्रथमान्तं भवति । तदनुसारं क्रिया प्रयुज्यते । अनुक्तकर्ता तृतीयान्तो ज्ञेयः - १) कृत्यः = त्वया शुभदिने कर्म आरब्धव्यम्, आरम्भणीयम्, आरब्धम् कर्तव्यम्, करणीयम्, कार्यम्, कृतम्, सुकरम्, दुष्करम् - विधातव्यम्, विधेयम्, विहितं वा । भवद्भिर्मनो भगवति योक्तव्यम् योजनीयम् योज्यम् युक्तं वा । द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः । उपदेशो न दातव्यो यादृशे तादृशे जने । नियन्तव्यः सदा कोपो बालवृद्धातुरेषु च । २) क्तः = धर्मसंस्कारराजनीतिविषया धर्मशास्त्रेषु (स्मृतिषु) प्रोक्ताः (समुपदिष्टाः) सन्ति । व्यासप्रणीतेषु पुराणग्रन्थेषु परमेश्वरस्य सहस्रशः कथा गीता वर्तन्ते प्राप्यन्ते वा । ज्योतिषस्य प्रयोजनं तस्मिन्नेव ग्रन्थे निगदितम् । मात्रा घृतं पात्रे निहितम् । केनापि जनेन तण्डुलाः प्रसेवके निहिताः । ततस्तेनासौ विश्वासकार्येषु नियोजितः । किं ते कृण्वन्ति कीटकेषु इति मन्त्रे कीटको नाम जनपद आम्नातः । मानवेन पूर्वजन्मनि कृतानि शुभाशुभानि कर्माणि इह संसारे भुक्तानि । नियः कर्तृस्थे कर्मणि यदात्मनेपदे प्राप्तं तच्छरीरावयवभिन्ने एव स्यात् । तीर्थे वापि वने वापि सर्वथा श्रवणं मतम् । धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । विप्रैर्भागवती वार्ता गेहे गेहे जने जने । कारिता कणलोभेन कथासारस्ततो गतः ॥ वेदेषु धर्मवचनेषु तथागमेषु रामायणेऽपि च पुराणकदम्बके वा । सर्वत्र सर्वविधिना गदितस्त्वमेव तस्मात्त्वमेव शरणं मम दीनबन्धो ॥ राज्ञा योग्यसचिवे राज्यस्य समस्तो भारो न्यस्यते न्यस्तो वा ।

विशेषः - क्रियाया योगे सप्तमी भवतीति प्रोच्यते । यथा क्रियासु युक्तैर्नृपचारचक्षुषः - कीरातार्जुनीयम् १।४, व्याख्याकारः - समीरशर्मा ।

घ) परस्मैपदिनः सकर्मकधातोरतिङन्तायां शतृप्रत्ययान्तायामात्मनेपदिनः सकर्मकधातोः शानच्प्रत्ययान्तायामुभयपदिनो सकर्मकधातोः शतृशानच्प्रत्ययान्तायां च गौणक्रियायामौपश्लेषिकाधारे स्थितस्य कर्मण उदाहरणानि - निशायां मनुष्याणां तापं परिहरन् हिमाशुर्दिवा प्रभादारिद्र्यं प्राप्नोति । दिवा जनानां लोचनानन्दं वितरन्ती कमलिनी रात्रौ सौभाग्यहीना मलिना चावलोक्यते । मध्याह्नसमये किरणैर्जनान्परितापयन्सहस्रांशुः सन्ध्याकालेऽस्ताचलं गच्छति । अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ शालग्रामशिलायां वा देवागारे शिवालये । तीर्थे नद्यां पठन्तीतां सौभाग्यं लभते ध्रुवम् ॥ पतिं पशूनां हृदि भावयन्तः । जन्मान्तरे पुरीषोत्सर्गं कुर्वता (कुर्वाणेन) मया चिर्भटिका न भक्षिता ।

ङ) सकमर्कधातोरतिङन्तायां क्त्वान्तगौणक्रियायामौपश्लेषिकाधारे स्थितं कर्म - ईश्वरो गतकल्पीयं वेदमस्मिन्काले स्मृत्वा समुपदिशति । ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यः।

च) क्त्वः स्थाने ल्यप् भवति । अतिङन्तायां ल्यबन्तगौणक्रियायामौपश्लेषिकाधारे स्थितं कर्म - निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् । बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुद्धच च । मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः । बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव । शरं धनुषि सन्धाय पुरेष्वस्त्रं व्यमुञ्चयत् । इष्ट्वा यथोपदेशं मां दत्त्वा सर्वस्वमृत्त्विजे । अग्नीन्स्वप्राणे आवेश्य निरपेक्ष्य परिव्रजेत् ॥ विमाने वैष्णवान्वीक्ष्य गोकर्णो वाक्यमब्रबीत् । शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्धनः । यद्राजसंसदि विभज्य महेशचापं सीताकरग्रहणमङ्गलमाप सद्यः। आशां विहाय परिहृत्य परस्य निन्दां पापे रतिञ्च सुनिवार्य मनः समाधौ । आदाय हृत्कमलमध्यगतं परेशं वाराणसीपुरपतिं भज विश्वनाथम् ॥ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि । मां तत्र मनसा ध्यायन् विश्वं पश्यति सूक्ष्मदृक् ॥ दुग्धं दधि घृतं वा पात्रे निधाय त्वं तत्र शीघ्रं गच्छ । शुकनाम्नि मन्त्रिणि राज्यभारं समारोप्य स यौवनसुखमनुबभूव ।

छ) अतिङन्तायां तुमुनन्तगौणक्रियायामौपश्लेषिकाधारे स्थितं कर्म - अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् । अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय । अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति । स एव निधनं याति कीलोत्पाटीव वानरः ॥

ज) तच्छीलकर्तरि इष्णुच्प्रत्ययेन निष्पन्नस्यालङ्करणार्थस्य कृधातोर्गौणक्रियाया योगे औपश्लेषिकाधारे प्रयुक्तं कर्म - नाटचयशालायां नर्तकं नर्तिकां च विवाहे कन्याञ्चालङ्करिष्णुर्नरो नारी वाऽत्रैवास्ति ।

४-७-१-३) समवायत्वौपश्लेषिकाधारः[1] - यो यत्र समवायत्वेनो(नित्यसम्बन्धेनो)पश्लिष्य तिष्ठति। तस्मात्समवायत्वौपश्लेषिकाधारवाचकात्सप्तमी विधीयते - शरीरे चेष्टाऽस्ति - शरीरं चेष्टायाः समवायत्वेनौपश्लेषिकाधारो भवति । शरीरे सति चेष्टाऽऽश्रयति । एवमन्यप्रयोगोऽपि बोध्यः । रूपे रूपत्वमस्ति । घटे घटत्वं लभ्यते । नेत्रे निमेषं भवति । तैले घृते वा स्निग्धता(स्निग्धत्वं) भवति लभ्यते वा । सूर्ये चन्द्रे च प्रकाशो विद्यते । दुग्धे जले च मधुरता (मधुरत्वं माधुर्यम्)ऽस्ति । कर्णे शब्दत्वं भवति । त्वयि सुन्दरताऽस्ति । शर्करायां फले मधुनि च मिष्टता भवति लभ्यते वा । तव शरीरे लावण्यम्(सुन्दरता)अस्ति । अस्मिन्फले मिष्टता तिक्तता आम्लता मधुरता सौगन्ध्यं वा विद्यते । तस्य मुखे तेजस्कता दृश्यते । वाण्यां च मधुरध्वनिर्विद्यते । दर्शने चक्षुषी श्रवणे कर्णौ चलने (हिण्डने) पादौ सङ्कल्पविकल्पयोर्मनो निर्णये बुद्धिश्च कार्यं विदधाति विधत्ते करोति कुरुते वा ।

४-७-२) वैषयिकाधारः - यस्य इच्छादिविषयस्य सम्बन्धेन यो विषय आधारो भवति स वैषयिकाधारः प्रोच्यते । तस्माद्वैषयिकाधारवाचकशब्दात्सप्तमी - तव मम वा मोक्षे इच्छा[2]ऽस्ति । अत्र इच्छाविषयेण मोक्षविषये आधारो विहितः । एवमन्येषु प्रयोगेषु आधारो बोध्यः । क) शिवस्य मम वा

---

१ अनन्तभट्टः - तर्कसंग्रहः, उद्देश्यप्रकरणम् - समवायस्त्वेक एव । दीपिकाकारः स्वयंग्रन्यकारश्च - समवायस्य भेदो नास्ति । इन्दुमतीकारः - रामचन्द्रः - समवायः (नित्यसम्वन्धः) एक एव-पृ.४ । ग्रन्थकारः - तर्कसंग्रहः - समवायलक्षणप्रकरणम् - नित्यसम्वन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवाऽवतिष्ठते तावयुतसिद्धौ । (अस्यार्थः - ययोर्द्वयोर्मध्ये आश्रितस्यावस्था यावन्न नश्यति तावद्द्वितीयस्तत्राऽऽश्रयति । तावयुतसिद्धौ प्रोच्येते) । यथा अवयवाऽवयविनौ गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति-पृ.४० अस्य संग्रहस्य व्याख्याकारष्टीप्पणीकारश्च - आचार्य शेषराजशर्मा रेग्मी = टिप्पण्याम् - समवायस्य लक्षणम् - नित्यसम्वन्धत्वं समवायलक्षणम् । यथा अवयवावयविनोः, जातिव्यक्त्योः गुणगुणिनोः, क्रियाक्रियावतोः, विशेष - नित्यद्रव्ययोश्च सम्वन्धः समवायः कथ्यते । प्रकाशक - चौखम्बा सुरभारती, प्रकाशन, सन् २००३, पृष्ट ६ ।

२ वरदराजाचार्यः - लघुकौमुदी - प्रकाशकः - गोविन्दभवन कार्यालय, गीताप्रेस, तेइसवाँ सं.२०५२, पृ. १७ अस्तिक्रियाकर्तृभूतेच्छाद्वारा अस्तिक्रियाया मोक्षेऽधिकरणसंज्ञः ।

रामे कृष्णे वा भक्तिरस्ति । तव मम तस्य कस्यापि वा भगवति कृष्णे रामे शिवे भगवत्यां दुर्गायां लक्ष्म्यां देव्यां वा भक्तिरस्ति । कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः । त्वयि भक्तिर्मे स्याद्यदि मयि कृपां भो कुरु सदा । यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । मयि भक्तिं परां कृत्वा मामेवैष्यत्यसंशयः । भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व । वासुदेवे भगवति भक्तियोगः प्रयोजितः । नृणां जन्मसहस्रेषु भक्तौ प्रीतिर्हि जायते । प्रीतिः शौनक चित्ते ते ह्यतो वच्मि विचार्य च । विषयेषु आसक्तिर्न शोभना । तव भगवति प्रेम विद्यते । । मम कर्मफले स्पृहा नास्ति । मारात्मके त्वयि कथं विश्वासः । मम त्वयि मारात्मके चञ्चले अदृढस्वभावे वा कः प्रत्ययः (विश्वासः) । यत्त्वया मम वचसि प्रत्ययः कृतस्तस्य फलं भुज्यताम् । कस्य पत्न्या गृहे वासः पितुः मातुश्च स्नेहो माया ममता च मान्यजने आदरश्च न भवति । सेवकस्य रात्रौ जागरणं याजकस्य पात्रे दानं घृतस्य पात्रे स्थापनं स्थाल्यां तण्डुलानां पाको वा भवति । मन्त्रे तीर्थे द्विजे दैवे दैवज्ञे भेषजे गुरौ । यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ अथ सत्सु दयां कृत्वा भक्तवत्सल मा व्रज । आत्मौपम्येन भूतेषु दयां[1] कुर्वन्ति साधवः । ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च । प्रेम-मैत्री-कृपोपेक्षां यः करोति स मध्यमः ॥ तथापि त्वं स्नेहं मयि निरूपमं यत्प्रकुरुषे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति । तथापि त्वच्चेतो यदि मयि न जायेत सदयं निरालम्वो लम्वोदरजननि कं यामि शरणम् । अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः । यशःशरीरे भव मे दयालुः । जगदम्व विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि । तद्रहस्यमपि मे ब्रूहि यदि तेऽनुग्रहो मयि । धर्मे श्रद्धा रुचिः शास्त्रे देवे भक्तिर्गुरौ नुतिः । राज्ञि प्रीतिः स्पृहा देशे सदा भद्राय जायते ॥ निर्गुणेष्वपि सत्वेषु दयां कुर्वन्ति साधवः । तापसकन्यायां शकुन्तलायां ममाभिलाषः । समः शत्रौ च मित्रे च तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः[2] सङ्गविवर्जितः ॥ स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु । सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥ राजमातरि देव्यां च कुमारे मुख्यमन्त्रिणि । पुरोहिते प्रतिहारे सदा वर्तेत राजवत् ॥ मुरारिपदचिन्ता चेत्तदा माघे रतिं कुरु । तव सेवकेऽनुरक्तिः । भक्तो हरौ प्रीतिं करोति । गुरुजने क्षमा । भूमिनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥ रज्जौ सर्पभ्रमणारोपस्तद्वद्ब्रह्मणि जगदारोपः । समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ऋचि क्रमते(नावरुन्धे) बुद्धिः । स कर्मणि घटते चेष्टते प्रवर्तते वा । न जाने किञ्च बालेऽस्मिन्सदा स्निह्यति मे मनः । वेदज्ञाता यज्ञसम्पादने क्षमते प्रभवति वा । योगिनो जनसंसदि अरतिः शोभना । न्यायःसर्वासु विद्यासु समानः । भगवत्तत्वर्णने स त्वमहं भवान्वा न समर्थः, नेशो वा । न्यायः सर्वासु जनतासु चिन्त्यः । इदानीं चिन्ता न शास्त्रेषु न दृढबन्धः काव्येषु, न रागविलसितानि गीतेषु, न व्यसनं सद्गुणेषु, न निग्रह इन्द्रियेषु, न श्रमो विद्यासु, न आत्मीयता स्वजनेषु, न कृतज्ञता उपकारिषु, न श्रद्धा वृद्धेषु, न अभिरुचिर्दानेषु, न अनुरक्तिस्तपःसु, न स्पृहा सत्कर्मसु न बन्धुता बन्धुषु, नोन्नतिः कलासु, न जुगुप्सा हिंसासु, न घृणा दोषेषु, न मौनं ज्ञाने, न क्षमता शक्तौ, नोत्साहस्त्यागे, न भक्तिर्भगवति, न प्रीती राष्ट्रे, न शुचिता चरित्रे, न निष्ठा न्याये, न पक्षपातो धर्मे, न विमलता चित्ते, न प्रयत्नो दोषदूरीकरणे, न समुत्थानं शिक्षायां, न रतिः सद्व्यवहारे, न विरतिश्च व्यभिचारे, भारतीयानां नैपालीयानां च विलोक्यते ।

ख) तच्छीलकर्तरि उप्रत्ययेन निष्पन्नस्य मोक्षणार्थकस्य मुच्धातोर्गौणक्रियाया योगे वैषयिकाधारे युक्तं कर्म - मृगेषु शरान्मुमुक्षो राज्ञः ।

---

[1] ..... कारुण्यं करुणा घृणा । कृपा दयाऽनुकम्पा स्यानुकोशः - अमरः १।७१९॥ स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः - अमरः - ३।१।१३॥

[2] समः समानः सदृशादिशब्दैर्योगे तृतीया षष्ठी च भवत्येव । एभिः शब्दैर्विषयबोधेसप्तमी विधीयते ।

४-७-३) अभिव्यापकाधारः - यः सर्वस्मिञ्जगति जगतः सर्वस्मिन्नंशेंऽशे चाभिव्याप्य तिष्ठति सोऽभिव्यापकः(अभिव्यापी) । स एवाधारोऽभिव्यापकाधारः प्रोच्यते तस्मादभिव्यापकवाचकशब्दात्सप्तमी । अयमाधारः सकर्मकाकर्मकधात्वोः क्रियायां चिन्त्यते । ।

क) सकर्मकधातोः कर्तृवाच्यस्य तिङन्तायामतिङन्तायां क्रियायामभिव्यापकाधारे स्थितस्य कर्मण उदाहरणानि - यस्तु सर्वाणि भूतान्यात्मान्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ योगी ज्ञानी वा जगति ब्रह्म ब्रह्मणि च जगत्पश्यति, (ईक्षते, अवलोकते) । भक्तः सर्वेषु प्राणिषु परमात्मानं (ईश्वरं) परमात्मनि (ईश्वरे) सर्वान्प्राणिनश्च पश्यति । यो भगवति प्राणिनः प्राणिषु चेश्वरं विलोकते । स महात्मा निगद्यते । भक्तो भगवति प्राणिनः प्राणिषु भगवन्तं च पश्यति । सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ पुष्पे गन्धं तिले तैलं काष्ठे वह्निं पयोघृतम् । इक्षौ गुडं तथा देहे पश्यात्मानं विवेकतः । भक्तो हरौ प्रीतिं करोति । ब्रह्मण्याधाय कर्मणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ निर्गुणे ब्रह्मणि मयि धारयन् विशदं मनः । परमानन्दमाप्नोति यत्र कामोऽवसीयते ॥

ख) अकर्मकधातो कर्तृवाच्यस्य तिङन्तायामतिङन्तायां च क्रियायामभिव्यापकाधारे स्थितस्य कर्तुरुदाहरणानि- माया सर्वजन्तुषु व्याप्नोति । सर्वस्मिन्नात्माऽस्ति । आत्मनि सर्वं जगदस्ति । सर्वेषु भूतेषु आत्माऽस्ति । ईश्वरे सर्वं जगद्वर्तते । दुग्धे दध्नि दधनि वा घृतं तिलेषु सर्षपेषु वा तैलं काष्ठे काष्ठेषु वाऽग्निश्च भवति । सर्वे स्थावरा जङ्गमाश्च प्राणिनोऽव्यक्ताद् द्वयक्ते जगति (संसारे) व्यक्तीभवन्ति । व्यक्तीभूताः सर्वे प्राणिनोऽन्तेऽव्यक्ते लीयन्ते । प्रलये सर्वं जगद्ब्रह्मणि लीयते विलीनं भवति वा । ईश्वरः सर्वेषु प्राणिषु भूतेषु वा विद्यते । जीवो ब्रह्मणि लीयते । मनश्चात्मनि (स्वात्मनि) लीयते । सर्वेषां प्राणिनां हृदि ईश्वरस्तिष्ठति । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । पुष्पे गन्धस्तिले तैलं काष्ठे वह्निः पयो घृतम् । इक्षौ गुडं तथा देहे आत्मा तिष्ठति संस्मर ॥ सर्वे प्राणिन ईश्वरे सन्ति विद्यन्ते निवसन्ति तिष्ठन्ति वा । मयि ते तेषु चाप्यहम् । दिने जागृतीभूतानां सर्वेषां प्राणिनामिन्द्रियाणि सुषुप्तौ मनसि लीयन्ते । विश्वस्मिन् जगति ईश्वरोऽस्ति । स्वर्गे मर्त्ये पाताले च लोके ईश्वरोऽस्ति । घटे मठे पटे वृक्षे तृणे लतादिषु चाऽऽकाशोऽस्ति । अहर्निशं ब्रह्मणि ये रमन्तः । संसारे ईश्वरस्य महत्वं सदा विधते (भवति वर्तते अस्ति) । यथा ब्रह्माण्डे चराचरं जगतद्विद्यते भाति वा तथैव पिण्डे(शरीरे)ऽपि । सांख्यं वदति उत्पत्तेः प्राक् कार्यं कारणेऽव्यक्ततत्वेन निषीदति(तिष्ठति) । स सा वा विष्णौ शङ्करे रमायां दुर्गायां वा चित्तवृत्तिं चित्तं वा करोति कृतवान् धारयति-ते धरति-ते धृतवान्वा ।

४-७-४) सामीपिकमधिकरणम्-येन लक्षणेन यद्वस्तु सामीप्येऽस्तीति बुध्यते (गम्यते) । तस्मात्सामीप्यलक्षणशब्दवोधकशब्दादधिकरणे सप्तमी । यथा - गङ्गायां घोष इत्यत्र गङ्गाशब्दस्य लक्षणया गङ्गायाः समीपे (तीरे) इत्यर्थः क्रियते । ततो गङ्गायाःसमीपे (तीरे) घोषो (गोपग्रामो)ऽस्तीत्यर्थः स्वीक्रियते । एवमन्येऽपि - कूपे (कूपस्य समीपे) गर्गकूलम् । नद्या मन्दिरम् = नद्याः समीपे तीरे वा मन्दिरमित्यादयः

क्वचित्कर्तुःक्रियाया अदर्शनेऽप्यधिकरणे सप्तमी । क्रियापदं प्रथमाया वचनानुरूपं प्रयुज्यते - विपदि धैर्यमथाऽभ्युदये क्षमा सदसि वाक्यटुता युधि विक्रमः । यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

दूरान्तिकार्थेभ्य. इति सूत्रे पठितेन विभक्तित्रयेण सह सप्तम्यपि विधीयते । अनेन प्रकारेण द्वितीया तृतीया पञ्चमी सप्तमी च चतस्रो विभक्तयः फलिताः - वनस्य वनाद्वा दूरं दूरेण दूराद् दूरे वा गृहमस्ति । दूरान्तिकार्थेभ्य. इति सूत्रमपादानकारके द्रष्टव्यम् ।

क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्-वा.-क्तप्रत्ययान्ताज्जातस्येन्प्रत्ययान्तस्य कर्मणि सप्तमी वाच्येत्यर्थः । अधीतमनेनेति विग्रहे "इष्टचादिभ्यश्च" इति सूत्रेण कर्तरि इनि कृते अधीती इति रूपं सिद्धम् । शब्दोऽयमिन्नन्तो ज्ञेयः । स त्वमहं भवान्वा वेदे निरुक्ते छन्दसि व्याकरणे वाऽधीती (पठिती) । सोऽनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः । **साध्वसाधुप्रयोगे च-वा.**-साधु असाधु शब्दयोर्योगे सप्तमी वाच्येत्यर्थः । कृष्णो मातरि साधु मातुले असाधुः । यमो ईश्वरस्य भक्ते साधुरभक्ते असाधुः । **निमित्तात्कर्मयोगे-वा.**-कर्मयोगे हेतुवाचकशब्दात्सप्तमी वाच्येत्यर्थः । कर्मयोगे = कर्मणो योगे । निमित्तशब्देनेह फलं गृह्यते । यत इह फलवाचकशब्दात्सप्तमी विधीयते । **चर्मणि द्विपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥** (इति भाष्यम्) ॥ चर्मणि = चर्मार्थम् (व्याघ्रस्य त्वगिनिमित्तम्), द्विपिनम् व्याघ्रम् दन्तयोः = दन्तार्थम्(दन्तनिमित्तम्) कुञ्जरम् = हस्तिनम्, केशेषु = केशार्थम् (केशनिमित्तम्) चमरीम् = तन्नामिकां गाम्, सीम्नि = अण्डकोषार्थम् (अण्डकोषनिमित्तम्), पुष्कलकम् = गन्धमृगं च हन्ति । सीम्नि = सीमाऽवाप्यर्थं पुष्कलकः = ग्राममुख्यः हतः । यस्य प्राणिनो हिंसया यदङ्गमपेक्ष्यते तस्मादङ्गवाचकशब्दात्सप्तमी विधीयते । पुष्कलकस्य सीम्ना सम्बन्धात् सीम्नि इति सप्तमी विहिता ।

भावे (क्रियायां) सप्तमी - अन्यक्रियाया अपेक्षायां कृत्यक्तक्तवतुशतृशानजादिक्रियातः सप्तमी विधीयते । अपेक्षानुसारं तादृशात्पदात्परे समानलिङ्गविभक्तिवचनमनुसृत्य सच्छब्दोऽपि प्रयुज्यते । अधस्तनेन सूत्रेण विहिता सप्तम्यन्ताः कृत्यक्तक्तवतुशतृशानजादिप्रत्ययान्तशब्दा विधेयविशेषणे चिन्त्याः । विशेष्यात्पूर्वे स्थितं विशेषणमुद्देश्याविशेष्यात्परे स्थितं विधेयं च प्रोच्यते ।

यस्य च भावेन भावलक्षणम् २।३।३७॥

यस्य क्रियया क्रियान्तरं (अन्या क्रिया) लक्ष्यते (अपेक्ष्यते) ततः सप्तमी स्यात् । भावः = क्रिया । अर्थात् यत्र यया पूर्वक्रियया पश्चादन्या क्रिया अपेक्ष्यते । पूर्वक्रियातः सप्तमी भवतीत्यर्थः एतादृशी क्रिया सदा कर्त्राश्रया कर्माश्रया च भवति । तदा सा क्रिया विशेषणं भवति । अस्याः क्रियातः सूत्रेण सप्तमी विधीयते एव । तस्याः क्रियाया विशेष्यात्कर्तुः कर्मणश्च सप्तम्यपि विधीयते । अत्र स्मर्तव्यं यत् वाक्ये विधेयविशेषणं विशेष्यादन्यत्र यत्र कुत्रापि स्थले प्रयुज्यताम् । अर्थकाले विशेष्यात्परे सन्निधावेव तद्विधेयविशेषणपदं प्रयुज्यते ।

क) कर्मणि निष्पन्नायां यक्-शानच्प्रत्ययान्तक्रियायां सप्तमी - गोषु दुह्यमानासु गोपालोऽगच्छत् गतवान् गतो वा । मया कर्मसु क्रियमाणेषु सम्पद्यमानेषु वा सहदेव आयात्, आयातवान्, आयातो वा । तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः । तिङ्वाच्यकारकवाचिनि अष्मदि प्रयुज्यमानेऽप्रयुज्यमाने चोत्तमः । प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः । योग्ये कर्तरि गम्यमाने (बुध्यमाने) कृत्यतृचश्च भवन्ति । शरेषु क्षीयमाणेषु भज्यमानेषु धन्वसु । शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेककाः ॥

ख) कर्तरि निष्पन्नाभ्यः शतृशानच्प्रत्ययान्तक्रियाभ्यः सप्तमी - भवति गृहे तिष्ठति अहमपि तिष्ठामि । भवति आसने निवसति (उपविशति) अहमपि निवसामि (उपविशामि) । त्वयि भवति वसति तिष्ठति वा मम नास्ति चिन्ता अस्माकं समस्या वा । कारणे सति कार्यं भवति किञ्च कारणं विना कार्यं न भवति । कार्ये सति कारणं भवति । किञ्च कार्यं विना कारणं नान्विष्यते । तस्मिनाच्छति स गच्छति । त्वयि भवति वा गच्छति अहमपि गच्छामि । त्वयि भवति वा निवसति उपविशति वा अहमपि निवसामि । पत्तने (नगरे) विद्यमाने ग्रामे रत्नपरीक्षा । स्त्रियां तु रोचमानायां सर्वं तत्रोचते कुलम् । तस्यां त्वरोचमानायां सर्वमेव न रोचते । त्वयि रोदिति अहमपि रोदीमि । भवति रोदिति सोऽपि रोदिति । परिवारे रात्रौ शयाने बुद्धः प्रासादान्निर्ययौ । अङ्गिनि विद्यमानेऽङ्गस्य कार्यं भवति । ब्राह्मणेषु स्वस्तिवाचनं समाप्नुवत्सु सत्सु कार्यं प्रारभस्व प्रारभत वा । एवं ब्रूवाणे सति

वादरायणौ मध्ये सभायां हरिराविरासीत् । एवं ब्रूवति वै तत्र नारदे वैष्णवोत्तमे । परिभ्रमन्समायातः शुको योगेश्वरस्तदा ॥ स त्वमहं भावान्वा ब्राह्मणेषु वेदमधीयानेषु समागतः । ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने । पूर्वे वयसि यः शान्तः स शान्त इति मे मतिः । धातुषु क्षीयमाणेषु शमः कस्य न जायते ।

ग) कृत्यप्रत्ययान्तक्रियाभ्यःसप्तमी - उपधादीर्घे कर्तव्ये संयोगान्तस्यासिद्धं न स्यात् । समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात् । कपाले उत्तरपदे हविषि वाच्ये आत्वं वक्तव्यम् । पौनःपुन्येभृशार्थे द्योत्ये लोट् स्यात् । अनेकसमुच्चयःर्थे द्योत्ये प्रागुक्तं स्यान् । गोशब्दे परे युक्त इति गम्येऽष्टन आत्वं स्यात् ।

घ) क्तप्रत्ययान्तक्रियाभ्यः सप्तमी - नाभावे कर्तव्ये कृते च मुभावो नासिद्धः । रामे वनं गते (याते व्रजिते) दशरथः प्राणान्तत्याज । कृष्णे स्वधामं गते (उपेते) धर्मः कं शरणं गतः । त्वयि मयि वा स्थिते उषिते वा स तिष्ठति वसति वा । त्वयि पुत्रे दृष्टे मधुरवचने च श्रुते मे मनः प्रसीदति । त्वयि याते (गते) स गच्छति अहं गच्छामि वा । भवति उषिते स वसति अहं वसामि वा । सूर्ये उदितेऽन्धकारो नश्यति (अपैति) । ज्ञाने उदिते तमो (अज्ञानं)ऽपैति (विनश्यति) । पितरि तीर्थं गते पुत्रोऽपि गतः । भवति याते (गते) स त्वमहं भवान्वा आयातः । सूर्ये उदितेऽहमुत्थितः । सवितरि अस्तङ्गते चन्द्र उदैत्, उदितः । भानावस्तङ्गते (अस्तमिते अस्तंयाते) स त्वमहं भवान् वा शयितवान् शयितो वा । अध्यापके गुरौ शिक्षके वा पाठिते (अध्यापिते)ऽपि छात्रा न पठन्ति । सूर्य उदितेऽनुदिते वाऽग्निहोत्री समिध अग्नौ जुहोति आदधाति वा । यत्ने कृते यदि न सिद्धचति कोऽत्र दोषः । समयेऽतीते (व्यतीते) कः किं कर्तुं शक्नोति कः शक्तः, समर्थो वा । प्रत्यये लुप्ते तदाश्रितं कार्यं न स्यात् । भवति उपस्थिते मम कार्यं सिद्धचति । रात्रौ सर्वेषु सुप्तेषु (शयितेषु) पुत्री रोदिति । ततो दमनके गते सञ्जीवकश्चिन्तयामास । तेन दुःखे कृते कथं फलं न लभ्यते । पूर्णिमायां रात्रौ चन्द्रमसि उदिते जगद्रमणीयं (कियद्रमणीयं) दृश्यते । वयसि गते क कामविकारः शुष्के नीरे कः कासारः (तडागः) । नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ निर्वाणदीपे किमु तैलदानं चौरे गते वा किमु सावधानम् । वयोगते किं वनिताविलासः पयोगते किं खलु सेतुबन्धः ॥ हते भीष्मे हते द्रोणे कर्णे च विनिपातिते । आशावलवती राजन् शल्यो जेत्स्यति पाण्डवान् ॥ न मय्यनशिते भुङ्क्ते न स्नाते स्नाति मत्परः । मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भवेत् ॥ श्रीमद्भागवते महानुनिकृते किं वा परैः । स्वपक्षस्य क्षये जाते को नस्त्राता भविष्यति । तेन गुणे प्राप्तेऽनेनैव सूत्रेण निषेधः ।

ङ) क्तवतुप्रत्ययान्तक्रियाभ्यः सप्तमी-गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये भवति गतवति (यातवति) अत्र कोऽपि न वसति । प्राणे स्थितवति देहस्तिष्ठति । प्राणे यातवति देहो विनश्यति । भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि । भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती ॥

च) सतीसप्तमी -सप्तम्यां प्रयुक्तायाः क्रियाया विशेष्यस्य वाऽन्ते सप्तम्यन्तः सच्छब्दः प्रयुक्तो भवतु वा न भवतु तत्र स शब्दः सत्यां सप्तम्यां स्थितः स्मरणीयः - क्षते प्रहारा निपतन्त्यभीक्ष्णं धनक्षये वर्धति जाठराग्निः । आपत्सु वैराणि समुल्लसन्ति छिद्रेष्वनर्था बहुलीभवन्ति ॥ प्रादयः क्रियायोगे गतिसंज्ञाः स्युः । आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम् । तृतीये नार्जितं ज्ञानं चतुर्थे किं करिष्यति ॥ व्यतीतेषु (अतीतेषु गतेषु यातेषु वा) दिनेषु कालेषु (समयेषु) वा मया सहस्राणि पुस्तकानि पठितानि । गतेषु दिनेषु कति (कियन्ति) कार्याणि जातानि न जाने । तुल्यबलविरोधे परं कार्यं स्यात् । ब्राह्मणपाठ-मन्त्रपाठयोर्विरोधे मन्त्रपाठो बलीयान् । तत्सत्त्वे तत्सत्ता तदभावे तदभावः । सत्यां क्षितौ किं कपिशोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् । सत्यञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः । बाधायां सत्यां कः कार्यं कर्तुं शक्नोति शक्तः,क्षमते क्षम, अलं वा । यथा - क्षते सति, धनक्षये सति, आपत्सु सत्सु, आद्ये वयसि सति, व्यतीतेषु सत्सु, गतेषु दिनेषु सत्सु, तुल्यवलविरोधे सति इत्यादि ।

छ) यत्र वाक्ये कस्या अपि विभक्तेः कस्मिन्नपि वचने निष्पन्नं क्तान्तादिपदं विधेयविशेषणं भवति । तत्र तस्य विधेयविशेषणशब्दस्य पश्चात् तस्य वचनानुरूपं यथास्थलं विवक्ष्य सच्छब्दः प्रयुज्यते - स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः । जलाभिलाषी जलमाददनां छायेव तां भूपतिरन्वगच्छत्- रघुवंशः २।६ ॥ प्रतिष्ठायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः । निषण्णायां निषीदास्यां पीताम्भसि पिबेदपः- रघुवंशः १।८९ ॥

अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च-वा.-सप्तमी । पूजां कर्तुं योग्योऽर्हः पूजां कर्तुमयोग्योऽनर्हश्च ज्ञेयौ । अत्र सच्छब्देन सज्जनोऽसच्छब्देनाऽसज्जनश्च निर्दिश्यते । सज्जनात्सप्ती- सत्सु तिष्ठत्सु असन्तस्तरन्ति । असज्जनात्सप्तमी - असत्सु तिष्ठत्सु सन्तस्तरन्ति । असत्सु तरत्सु सन्तस्तिष्ठन्ति (आसते वसन्ति) ।

षष्ठी चानादरे २।३।३८॥

अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः । स रुदतो रुदति वा प्राव्राजीत् । स रुदन्तं पुत्रादिकमनादृत्य सन्यस्तवानित्यर्थः । मम पश्यतो मयि पश्यति वा चौरो धनानि अपहरत् । पितुर्निवारयतः पितरि निवारयति वा पुत्रः कुकर्म अकरोत् ।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च २।३।३९॥

स्वामिन् ईश्वर अधिपति दायाद साक्षिन् प्रतिभू प्रसूत एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । षष्ठ्यां कृतायां पाक्षिकं सप्तम्यर्थं वचनम् । गवां गोषु वा स्वामी ईश्वरो वा गोपालोऽस्ति । प्रजानां प्रजासु वा अधिपतिः रामः । राजन्यः प्रजानामधिपतिः । स्वामी ईश्वरः, अधिपतिः, एभ्यो भिन्ने तु केवलं षष्ठी न तु सप्तमी - प्रजानां पतिर्नायकः ईशितः, अधिभूर्नेता प्रभुः, अधिपः परिवृढो वा सः । धनानां धनेषु वा दायादः प्रतिभूः (मध्यस्थो) वाऽयम् । स तस्य तस्मिन्वा साक्षी । गवां गोषु वा प्रसूतः ।

आयुक्तकुशलाभ्यां चासेवायाम् २।३।४०॥

आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्येऽर्थे । आसेवा = तत्परता तत्परः । आयुक्तः = प्रवर्तितः नियुक्तः समर्पितश्च । भक्तो हरिपूजनस्य हरिपूजने वा आयुक्तः कुशलो वा ।

शास्त्रेषु संलग्नेऽर्थे लग्नः, संलग्नः, मग्नः, निमग्नः, लीनः, विलीनः व्यस्तः, कटिबद्धः, रतः, उपरतः,अभिरतः, प्रलीनः व्यापृत इत्यादिक्रियायां सप्तमी विहिता लभ्यते - स भावनायां लीयते । योगी ब्रह्मणि लीनो भवति । अयं प्रजल्पन्मत्पदे लग्नः । स कार्ये (कर्मणि) संलग्नोऽस्ति । यः सद्भक्त्या पठति हि नित्यं ब्रह्मणि लीनो भवति हि सत्यम् । छात्रः पठने मग्नः, निमग्नः, व्यग्रः, तत्परो वाऽस्ति । रामः कर्मणि व्यस्तः कटिबद्धः, व्यापृतो (लग्नः) वा विद्यते । सीता गृहकार्ये तत्परा व्यग्रा मग्ना निमग्ना लग्ना संलग्ना व्यस्ता कटिबद्धा व्यापृता वाऽस्ति । संसारसागरे मग्नं दीनं मां करुणानिधे । कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ॥ कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे । वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥ निमग्नस्य पयोराशौ पर्वतात्पतितस्य च । तक्षकेणापि दष्टस्य आयुर्मर्माणि रक्षति ॥ समाने वृक्षे पुरुषो निमग्नः । योगी ध्यानेन ब्रह्मणि लीयते लीनवान्, लीनो वा । भक्तः शिवे विष्णौ वा रज्यति रक्तवान् रक्तो वा । चन्द्रगुप्ते प्रकृतयो दृढमनुरज्यन्ति । अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते । वैभाषिका प्रत्यक्षवादे रज्ज्यन्ति । युवा युवत्यां भोगी विषये च रज्ज्यते । एते हि भक्ता मयि चानुरक्ताः । स्वामी मयि किमनुरक्तो विरक्तो वास्तीति ज्ञास्यामि । योगी ब्रह्मणि विद्वान्सत्ये बालः क्रीडायां भोगी विषये संसारे वा रमते रतवान्, रतो वा । पञ्चविंशतितत्त्वज्ञो यत्रकुत्राश्रमे रतः । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः । भगवति कृष्णे मेऽनवद्या रतिरस्तु । यत्र विश्वं लीयते । स ब्रह्मणि लीनः ।

यतश्च निर्धारणम् २।३।४१॥

जाति-गुण-क्रिया-संज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं ततः षष्ठीसप्तम्यौ स्तः। अत्र निर्धारणे जातिसमुदायो गुणसमुदायः, क्रियासमुदायः संज्ञासमुदायश्च गृह्यन्ते । यतः समुदायात्पृथङ्निर्धारिताच्छब्दात्षष्ठीसप्तम्यौ विधीयते । वाक्ये निर्धारणे विहितात्षष्ठीसप्तम्यन्तपदात्परे मध्यशब्दो विवक्षानुसारं प्रयुज्यते । द्वयोर्वस्तुनोर्बहूनां वस्तूनां वा तुलनायां यः पृथग् निर्धार्यते ततः "पञ्चमी विभक्ते" इति सूत्रेण पञ्चमी विधीयते । सूत्रमिदमपादानकारकेऽन्तिममस्ति ।

१. जातिसमुदायात्षष्ठीसप्तम्यौ - नृणां नृषु वा ब्राह्मणः श्रेष्ठः, महान्, उत्तमः, वरिष्ठः, ज्यायान् वरीयान्वा । नृणां नृषु वा क्षत्रियः शूरः, वीरः पराक्रमी वा । पुष्पाणां पुष्पेषु वा जाती उत्तमा। जीवानां जीवेषु वा मानवो वरिष्ठः । जनानां जनेषु वा वैश्यो धनी (वित्तवान्) । २. गुणसमुदायात्षष्ठीसप्तम्यौ - रक्तः, पीतः, नीलः, कृष्णः, श्वेतः, हरितः, कपिलश्चेत्यादयो गुणवाचका ज्ञेयाः । गवां गोषु वा कृष्णा गौर्बहुक्षीरा । गवां गोषु वा कपिला गौर्ब्राह्मणाय देया । स्त्रीणां स्त्रीषु वा श्यामा अतीव सुन्दरी । वस्त्राणां वस्त्रेषु वा श्वेतं पीतं वा वस्त्रं सुन्दरम् । गवां गोषु वा कपिला गौर्दाने श्रेष्ठा । ३. क्रियासमुदायत्षष्ठीसप्तम्यौ - गच्छतां गच्छत्सु वा धावन् श्यामः शीघ्रं जातः। पठतां पठत्सु वाऽधीयतामधीयत्सु वा कृष्णस्य ध्वनिः सुन्दरः । ४. संज्ञासमुदायात्षष्ठीसप्तम्यौ - छात्राणां छात्रेषु वा कृष्णः पटुः पटुतमो वा । विद्यार्थिनां विद्यार्थिषु वा श्यामश्चतुरश्चतुरतमो वा। छात्राणां छात्रासु वा राधा चतुरा, चतुरतमा, पटुः-पट्वी पटुतमा वा । भ्रातृणां भ्रातृषु वा रामो ज्येष्ठःशत्रुघ्नः कनिष्ठो वा । हिमपर्वतनां हिमपर्वतेषु वा सगरमाथा उन्नतत्तमः पर्वतः । राज्ञां राजसु वा दीलिपः श्रेष्ठः । गजानां गजेषु वा ऐरावतो मुख्यो वरश्च । अश्वानामश्वेषु वा उच्चैश्रवाःसर्वोत्तमः। गवां गोषु वा नैचिकी धेनुः श्रेष्ठा उत्तमा वरीयसी वरा महती ज्यायसी वरिष्ठा मुख्या वा । स्त्रीणां स्त्रीषु वा पद्मा श्रेष्ठा वरा वरिष्ठा ज्यायसी मुख्या वरीयसी सर्वोत्तमा वा । फलानां फलेषु वा बदरीफलं निकृष्टतमम् । कवीनां कवीषु वा कालिदासः श्रेष्ठः, महान्, वरः, मुख्यः, उत्तमः, वरीयान्, वरिष्ठो वा ।

५. जात्यादिसमुदायस्य प्रसङ्गे निर्धारणे सर्वादिशब्देभ्यः[1] षष्ठी सप्तमी च - १. पुंसि-सर्वेषां सर्वेषु वा तेषां तेषु वाऽयं कालिदासः श्रेष्ठः महान् वेत्यादि । २. स्त्रियाम्-सर्वासां सर्वासु वा तासां तासु वा इयं लक्ष्मीर्मही वा श्रेष्ठा महती वेत्यादि । ३. क्लीबे-सर्वेषु वा तेषां तेषु वा इदं नारीकेलफलं श्रेष्ठं महीय इत्यादि । १. पुसिं-एषामेषु वा अयं जनः श्रेष्ठः, वरः, वरिष्ठः, वरीयान्, महान्, उत्तमः ज्यायान् मुख्यो वा । २. स्त्रियाम्-आसाम् आसु वा इयं नारी सुन्दरी मनोरमा उत्तमा महती श्रेष्ठा वरिष्ठा वरा श्रेयसी ज्यायसी वरीयसी वा । ४. क्लीबे-एषां एषु वा मुम्मय्या आम्रफलं मिष्टम् । १-२-३ युष्माकं युष्मासु वा अयं श्रेष्ठः, इयं श्रेष्ठा, इदं श्रेष्ठम्, इदं प्रधानं प्राधान्यं वा । १-२-३ संख्याभिर्लिङ्गं बोध्यम् ।

---

[1] सर्वादयः सर्वनाम्नस्तृतीया चेति सूत्रप्रसङ्गे टीप्पण्यां द्रष्टव्याः । किंयत्तदोर्निधारणे द्वयोरेकस्य डतरच् ५।३।९२॥ द्वयोरेकस्य (जातिगुणक्रियासंज्ञाभिः) निर्धारणे गम्ये निर्धार्यमाणवाचिभ्यः किमादिभ्यो डतरच् स्यात् । भवतोः कतरः कठः । अनयोः कतरः पटुः। युवयोः कतरोऽध्यापकः । अनयोः कतरो देवदत्तः । भवतोर्यतरः शैवः । अनयोः कतरो निपुणः कारको रामो वा । एवं ततरः । व बहूनां जातिपरिप्रश्ने डतमच् ५।३।,९३। जातौ परिप्रश्ने च गम्ये बहूनामेकस्य निर्धार्यमाणवाचिभ्यः किमादिभ्यो डतमच् स्यात् । कतमो भवतां कठः (भवतां मध्य कतमः कठः) । कतमो भवतामध्यापकः । एषां यतमः पाचकः । एषां ततम आगच्छतु । एकान्च प्राचाम् ५।३।९४॥ प्राचामाचार्याणां मते एकशब्दात् डतरच् डतमच्च स्यात् । द्वयोनिर्धारणे डतरच् । बहूनां निर्धारणे डतमच् । अनयोरेकतरो मैत्रः । एषामेकतमो देवदत्तः । अन्यतरान्यतमशब्दौ द्विवहूवचनविषये निर्धारणे स्तः ।

६. निर्धारणे विहितयोः षष्ठीसप्तम्योरेकद्विबहुवचनान्तशब्दस्याऽन्ते विवक्षानुसारं कस्मिन्नपि वचने स्थितो मध्य[1]शब्दोऽपि प्रयुज्यते - दशानां लकाराणां दशसु लकारेषु वा मध्ये पञ्चमो लेट्लकारो वेदे पठ्यते । एतेषां कोशानामेतेषु कोशेषु वा मध्येऽयं विज्ञानमयकोशः । अचां अक्षु वा मध्ये योऽन्त्यः स आदिर्यस्य तस्य टिसंज्ञः स्यात् । बालानां बालेषु वा मध्ये कृष्णः सुन्दरः । अस्माकं अस्मासु वा मध्ये रामो दक्षोऽस्ति । दशानां फलानां दशसु फलेषु वा मध्ये द्वयं फलं क्रयणीयं क्रेयं वास्ति । पक्षिणां पक्षिषु वा मध्ये वायस श्चतुरः । एवं ब्रूवाणे सति बादरायणौ मध्ये सभायां हरिराविरासीत् । अस्माकमस्मासु वा मध्येऽयं विद्वान् पटुश्च । सेनयोरुभयोर्मध्ये रथं स्थाय मेऽच्युत । कर्तृशक्त्योर्मध्येऽयं कालः । कर्तृकर्मशक्तयोर्मध्येऽयं देशः । आवयोः २ मध्येऽयं सुन्दरःकुशलश्च्च । भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् । आर्यावर्तपुण्यभूमिर्मध्यं विन्ध्यहिमालयोः । क्लीवाव्ययं त्वपदिशं दिशोर्मध्ये विदिक्स्त्रियाम् । ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसाम् । उवास सदसो मध्ये सर्वःशिष्यगणैर्वृतः । युवयोः २ मध्येऽयं चतुरः । युष्माकं युष्मासु वा अस्माकमस्मासु वा मध्येऽयं निपुणः । सभायाः सभायां वा मध्ये राजा राष्ट्रपतिर्विद्वान्वा विद्यते ।

७. अन्यान्युदाहरणानि - काव्यानां काव्येषु वा कालिदासस्य रघुवंशमहाकाव्यं सुन्दरम् । नाटकानां नाटकेषु वा कालिदासस्य शाकुन्तलं नाम नाटकं रम्यम् । हिन्दूनां हिन्दुषु वा केचन मूर्तिपूजनं न कुर्वन्ति । सतीनां स्त्रीणां सतीषु स्त्रीषु वा पद्मा श्रेष्ठा सुन्दरी च । भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः । बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥ ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतवुद्धयः । कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः ॥ जीवेषु मानवाः श्रेष्ठा मानवेष्वपि पण्डिताः । वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् । स्त्रीणां च शतरूपाऽहं पुंसां स्वायम्भुवो मनुः । नारायणो मुनीनां च कुमारो ब्रह्मचारिणाम् ॥ रसोऽहमप्सु कौन्त्येय प्रभास्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ पुष्पेषु जाती नगरीषु काशी नारीषु रम्भा पुरुषेषु विष्णुः । नदीषु गङ्गा क्षितिपेषु रामः काव्येषु माघः कविकालिदासः । वेदमधिकृत्या विद्वत्सु गभीरो मतभेदो दृश्यते । अन्धदेशानामन्धदेशेषु वा काणो राजा । मूकदेशानां मूकदेशेषु वा गलकण्ठस्तरुणः ।

साधुनिपुणाभ्यामचार्यां सप्तम्यप्रतेः २।३।४३॥

आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेर्योगे । योऽर्च्यःपूज्यः संमान्यो वा भवति ततः सप्तमी - मातरि साधुर्निपुणो वा कृष्णः । साधुशब्दप्रयोगे त्वर्चां विना "साध्वसाधुप्रयोगे" चेति वार्तिकेन सप्तमी भवत्येव । इह साधुशब्दस्तत्वकथने गृह्यते । साधुकथनेन गुणशीलः सुशीलः शीलवान् सुचरित्रश्च गृह्यते । उदाहरणं पूर्व गतम् । अर्चायां किम् - निपुणो राज्ञे, भृत्यः। इह तत्वकथने तात्पर्यम् । शौण्डः, धूर्तः, कीतवः, व्याडः, प्रवीणः, संवीतः, अन्तः, अधि, पटुः, पण्डितः, कुशलः, चपलः, निपुण इति शौण्डादयः समासे "सप्तमी शौण्डैरिति" सूत्रे संग्रहीताः सन्ति । तत्पुरुषसमासे "पूर्वसदृशसमानार्थ." इति सूत्रे पठितेन निपुणेन योगे तृतीयाऽपि विहिता लभ्यते । निष्णातः, दक्षः, चतुरः, पेशलः, विशारदश्चेत्यादिभिर्योगेऽपि सप्तमी विधीयते । चतुरः, पेशलः, पटुश्चैते चतुरेऽर्थे दक्षः, निष्णातः, प्रवीणः, निपुणः, कुशलश्चैते कुशलेऽर्थे च प्रोच्यते । नञ्समासेन युक्तानामेषां शौण्डादिशब्दानां योगेऽपि सप्तमी विधीयते । अन्तरशब्दयोगेऽपि सप्तमी - अविद्यायामन्तरे वर्तमाना ।

---

[1] आवयोः २ अस्माकम्, अस्मासु वा मध्यः मध्यौ मध्याः । मध्यम् मध्यौ मध्यान् । मध्येन मध्याभ्याम् मध्यैः । मध्याय मध्याभ्याम् मध्येभ्यः । मध्यात्-द् मध्याभ्याम् मध्येभ्यः । मध्यस्य मध्ययोः मध्यानाम् । मध्ये मध्ययोः मध्येषु । अन्यतरान्यतमशब्दौ निर्धारणे स्वभावाद्द्विबहुवचनविषये स्तः । यथा - तयोः २ मध्ये सोऽन्यतरः । एषाम्-षु तेषाम्- तेषु वाऽयं देवोऽन्यतमः । यत्र तरप्तमप्प्रत्ययान्तशब्दौ प्रयुज्येते तत्र सप्तमी ग्रहीतुमुपयुक्ता भवेत् । यथा - अनयोरयं सुन्दरतरः । एषु अयं सुन्दरतमः । एवमन्येऽपि चिन्त्याः ।

१. कृष्णो गुरौ मान्यजने भक्ते मातरि च साधुः, शास्त्रे शस्त्रविद्यायां च निपुणः, प्रवीणः, निष्णातः, कुशलः[1], विशारदः, दक्षो वाऽस्ति। रामो मातरि पितरि गुरौ मान्यजने भक्ते च साधुः, शास्त्रे शस्त्रविद्यायां धनुर्विद्यायां वा निपुणः प्रवीणः निष्णातः कुशलः, विशारदः, दक्षो वा विद्यते। श्यामो व्यवहारे कितवः, धूर्तः, शठो वा। सोऽक्षेषु शौण्डो (उन्मत्तः)विद्यते। पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने। सत्यमुक्तं त्वया विद्वन् निपुणोऽसि विचारणे। श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः। शब्दे ब्रह्मणि निष्णातः परस्मिँश्च भवान् खलु। शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि। श्रमस्तस्य श्रमफलो ह्यधेनुरिव रक्षतः॥ अयं स वा मान्यजने साधुर्निपुणो वा। स यस्मिन्कस्मिन्नपि विषये शास्त्रे वा निष्णातः कुशलो वा। अयं वेदेषु पुराणेषु च कुशलः, दक्षः, निष्णातो वास्ति। गणिते निपुणः सः। वेदे प्रवीणोऽयम्। व्याकरणे दक्षो रामः। स गृहे पदे वने वाऽन्तोऽस्ति। या अप्स्वन्तर्देवताः। उपकरिषु यः साधुः साधुत्वे तस्य को गुणः। अपकारिषु यः साधुः स साधुः सद्भिरुच्यते। आत्मदेवः पुरे तस्मिन्सर्वविद्याविशारदः। नानाशास्त्रप्रहरणाः सर्वे युद्धविशारदाः॥ स काव्यकलासु शिरोमणिः। योगः कर्मसु कौशलम्। पाटवं संस्कृतोक्तिषु। दाक्षिण्यं स्वजने।

अप्रत्यादिभिरिति वक्तव्यम्-वा.-प्रति परि अनु एतैर्योगे सप्तमी न स्यात्। मातरं पितरं भक्तं च प्रति परि अनु वा साधुर्निपुणो वा कृष्णः। अत्र कर्मप्रवचनीयेन योगे द्वितीया विधीयते।

प्रसितोत्सुकाभ्यां तृतीया च २।३।४४॥

आभ्यां योगे तृतीया सप्तमी च स्यात्। तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उत्सुक इत्यमरः। हरिणा हरौ वा प्रसितः, उत्सुकस्तत्परो वा सोऽस्ति। तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे। कर्मणा कर्मणि वा पठनेन पठने वा स उत्सुकोऽस्ति।

१. युक्तपदेन योगे तृतीया सप्तमी च भवति - नक्षत्रेण युक्तः कालः। स तया श्रद्धया युक्तस्तस्याराधनमीहते। क्रियासु युक्तैर्नृपचारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः। युक्तरूपमिदं त्वयि। स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि। देवे कर्मणि युक्तो हि बिभर्तीदं चराचरम्॥ द्रव्ये नियुक्तः क्षत्रियः खड्गं दर्शयते ध्रुवम्। योऽसाधुदर्शी कश्यप इमामाश्रमधर्मे नियुङ्क्ते (नि+युज+श्रम्(+त)। तेन तस्मिन्वा प्रयुक्तः शब्दोऽतीव सुन्दरोऽस्ति। गृहपतिना संयुक्ते ञ्यः। व्यापारितः - नियुक्तः स्थापितः।

२. प्रसक्तः सक्तः असक्त आसक्तः सज्जः सज्जित उपपद्यन्ते चेत्यादिशब्दैः क्रियया च योगे सप्तमी विधीयते। क्रिययाऽन्या क्रियाऽपि चिन्त्या। फले वाञ्छा यदि ते स्यात्कर्तव्ये तत्परो भव। विषयेष्वासक्ता जनाः परार्थचिन्तने तत्परा न भवन्ति। धनाढ्वादे संपन्नवादे (पूजीवादे) वा धनिनो दीनानां शोषणे तत्परा भवेयुः। स कर्मणि सदा तत्परो भवेत्। कर्मणि नियुक्तो जनः कर्माणि कुर्यात्। एककाले चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे। भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति॥ अयुक्तः कामकारेण फले सक्तो निबध्यते। कोऽपि निष्कामकर्मणि पठने पाठने स्नाने भोजने भजने गमने कवितारचनायां वा सक्तस्तत्परो वा स्यात्। नारी भर्तुः शुश्रूषणे तत्परा भवेत्। सा शुभकर्मणि सज्जिता। भोगी विषयेष्वासक्तो भवति। त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते। दयादाक्षिण्यादिगुणा रामे उपपद्यन्ते। क्लैव्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते। अत्र योग्यताया उपयुक्ततायाश्चार्थे युज्- उपपद्धातूभ्यां निष्पन्नेन पदेन योगे सप्तमी विहिता बोध्या। तृतीया - इतरैरप्रसक्ताश्चेद्विशेषफलदायकाः।

[1] शूर - वीरयोर्योगेऽपि सप्तमी कुशलादिवत्। क्षमःशूरः कर्मवीरः दानवीरः।

३. स्थितः , उषितः, अनुरागः, अनुरक्तः, जागृतः, शयितः, जातः, विरक्तः, निरतः, निहितः, प्रकाशितः, न्यस्तः, सन्न्यस्तः, व्यापृतः, व्यापारितः, भक्तः, स्नातः, आसीनः, उपविष्टः, क्षिप्तः, क्रीडितः, खेलितः, पतितः, संस्थितः, मिलितः, आरोपितः, इत्यादिक्रियायां सप्तमी प्रयुज्यते ।

४. यदा कार्यबोधकशब्देन सह कारणवाची शब्दः प्रयुज्यते । तदा कार्यवाचकशब्दात्सप्तमी विधीयते - दैवमेव हि नृणां वृद्धौ क्षये कारणम् । गुरुश्छात्रस्य ज्ञानप्राप्तौ कारणम् । अभ्यासः कस्यापि विद्याप्राप्तौ कारणम् । अभ्यासश्छात्रस्य विद्याप्राप्तौ हेतुः । श्रमो धनप्राप्तौ हेतुः । कर्म तपो वा ज्ञानप्राप्तौ कारणं हेतुर्वा । वृक्षः फललाभे कारणं हेतुर्वा । ज्ञानं मुक्तौ हेतुः कारणं वा । विवेको ज्ञानोदये हेतुः कारणं वा ।

नक्षत्रे च लुपि २।३।४५॥

नक्षत्रे प्रकृत्यर्थे यो लुप्तसंज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे । मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् । मूले= मूलनक्षत्रे युक्ते काले, श्रवणे = श्रवणनक्षत्रयुक्ते काले देवीं विसर्जयेत् ।

सप्तमीपञ्चम्यौ कारकमध्ये २।३।७॥

शक्ति(कारक)मध्ये यौ कालाध्वनौ ताभ्यां सप्तमीपञ्चम्यौ स्तः । सामीपिकाधिकरणे सप्तम्यामेव प्राप्तायां विभक्तिद्वयार्थं वचनम् । अद्य भुक्त्वाऽयं द्व्यहे द्व्यहाद्वा भोक्ता । कर्तृशक्त्योर्मध्येऽयं कालः । इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् । इह तिष्ठन्नयमिष्वास इषुणा क्रोशोत्तरसमीपे देशे लक्ष्यं विध्येदित्यर्थः । कर्तृकर्मशक्त्योर्मध्येऽयं देशः । अहमद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्तास्मीत्यादयोऽपि चिन्त्याः । इहस्थः, तत्रस्थः ।

अधिकशब्देन योगे सप्तमीपञ्चम्याविष्येते - तदस्मिन्नधिकमिति दशान्ताड्ड इति यस्मादधिकं यस्य इति च सूत्रनिर्देशात् । लोके लोकाद्वा अधिको हरिः । यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः । अकुलीनः कुलीनो वा स श्रिया भाजनं नरः ॥ ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने । सत्त्वम् = बलम्, जन्तुश्च । तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ अस्मिन्सुवर्णशते एकादश माषा अधिकाः । तेभ्यस्तेषु वा एभ्य एषु वा कोऽप्यधिको नास्ति । ततोऽधिकः कोऽपि नास्ति । स जन इतोऽप्यधिकदूरादधिदूरे वा गतः । त्वत्तोऽधिकः कोऽस्ति । मत्तोऽधिको वायुरस्ति । तस्मात्तस्मिन्वाऽधिकः कृष्णो रामो वा । अस्य प्रसङ्गोऽपादानकारकेऽपि समुल्लिखितः ।

अधिरीश्वरे १।४।९७॥

सस्वामिभावसम्बन्धेऽधि कर्मप्रवचनीयसंज्ञः स्यात् ।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २।३।९॥

यस्मादधिकः, यस्येश्वर इत्यर्थे कर्मप्रवचनीययुक्ते सप्तमी स्यात् । अत्र उप इति पदमधिकेऽर्थे गृह्यते । उपपरार्धे (परार्धादधिकाः) हरेर्गुणाः सन्ति । समीपार्थकस्योपपदस्य 'उपोऽधिके च" इति सूत्रेण कर्मप्रवचनीयं भवतीति कर्मकारके प्रोक्तम् । अत्रोपपदेन योगे सप्तम्येव विधीयते । ऐ श्वर्ये तु स्वस्वामिभ्यां पर्यायेण (क्रमेण) सप्तमी - अधि भुवि रामोऽस्ति । अधि रामे भूरस्ति । असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम् । तेषा ँ सहस्रयोजने. । अस्मिन्महत्यर्णवे भवा अधि । तेषा ँ सहस्रयोजने. । यो देवेषु अधिदेव एक आसीत् । ये भूतानामधिपतिर्यस्मिँल्लोका अधिश्रिताः । सप्तमी शौण्डैरिति सूत्रेण समासे कृते तु रामाधीनाः । अखक्षा. इत्यादिना खः । खस्य इनः ।

विभाषा कृञि १।४।९८॥

अधिः करोतौ कर्मप्रवचनीयसंज्ञो वा स्यादीश्वरे (स्वामित्त्वे)ऽर्थे । अत्राधेः कर्मप्रवचनीयत्वेन द्वितीया । यो मामधिकरिष्यति । इह विनियोक्तुरीश्वरत्वं (स्वामित्वं) गम्यते । अगतित्वात् "तिङि चोदात्तवति" इति निघातो (अनुदात्तो) न । विषये इत्यर्थे प्रयुक्तेनाधिना योगे तु द्वितीयैव विधीयते वेदमधिकृत्याहं चर्चां करोमि लेखं लिखामि वा । संस्कृतमधिकृत्य कालिदासमधिकृत्य रामं कृष्णं यं कं वाधिकृत्य चर्चां विदधे । वेदस्याऽऽविर्भावकालमधिकृत्य विद्वत्सु गभीरो मतभेदो लभ्यते । वाल्मीकिरामायणं महाभारतं श्रीमद्भागवतं ब्रह्माणं जीवमात्मानं नेपालं वाऽधिकृत्य (विषये) किञ्चिद्वदामि । तामाश्रमललामभूतां शकुन्तलामधिकृत्य किञ्चिद् ब्रवीमि । वासवदत्तामधिकृत्य किञ्चिद् कथयामि किञ्चिल्लिखामि विशेषरूपेण विवेचयामि वा ।

अधिकारार्थे प्रयुक्तेनाधिना योगे तु सप्तम्येव विधीयते - मनुष्या एव कर्मसु अधिक्रियन्ते । सर्वैः स तस्मिन्कर्मण्यधिक्रियते । तुल्यप्रमाणानां यजमानानां सत्रेऽधिकारः । श्रौतयज्ञसम्पादने वेदस्याध्येतृणामधिकारः । श्रौतयज्ञकर्मणि अविवाहितस्याधिकारो नास्ति । शास्त्रे कृतदारपरिग्रहस्य त्रैवर्णिकस्य दर्शपूर्णमासादिषु श्रौतक्रतुषु अधिकारः प्रोक्तः । कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलेहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ निषेकादिश्मशानान्तो मन्त्रैर्यस्यादितो विधिः । तस्य शास्त्रेऽधिकारोऽस्मिञ्ज्ञेयो नान्यस्य कस्यचित् ॥ अस्मिन्विषयेऽस्याधिकारो नास्ति । मनुष्याणामेव कर्मस्वधिकारो न तु देव-रक्ष आदीनाम् । सत्रेषु ब्राह्मणनामेवाधिकारो न तु क्षत्रियवैश्ययोः । स स्वपक्षे विशेषकर्मणि वाऽधिकृतः । यद्यपि कतिपयेषु यज्ञेषु वर्णविशेषस्याधिकारः श्रुतिभिः स्थिरीक्रियते । विष्णुदीक्षाविहीतानां नाधिकारः कथाश्रवे । प्रतिप्रस्थाता पश्विडादिभक्षणेषु अधिकारी । निषादस्थपतिर्गावेधुकेऽधिकृतः । ब्राह्मणनामेवाऽऽर्त्विजेऽधिकारः । अन्तपुरे त्वधिकृतः स्यादन्तर्वेशिको जनः । मनुष्याणामेव कर्मसु कर्मसु मनुष्याणामेव वाऽधिकार इत्युभयप्रकारेण प्रयोगः कर्तुं शक्यते । व्याकरणज्ञो वेदपठनेऽन्यधर्मशास्त्रादिपठने शास्त्रान्तरे वाऽधिकारी भवति । अत्राधिकारी सः । अत्र स्मर्तव्यं यत् अधिपूर्वकः कारशब्दो यत्र भवति तत्र षष्ठी सप्तमी चोभे भवतः । एवं क्तिन्प्रत्यान्तशब्देन योगेऽपि षष्ठी सप्तमी चोभ विधीयेने । यथा-तव कृष्णे भक्तिरस्ति । तस्य कर्मणि प्रवृत्तिर्नास्ति । केवल षष्ठी-अस्य गतिः केवलं सप्तमी-गुरौ भक्तिः । त्यादि ।

इत्यधिकरणम् ॥४-७॥

विशेषः वाक्ये प्रयोज्यानां प्रयुक्तानां च पदानां चिन्तनम्

१. कर्तृवाच्यस्य तिङन्तक्रियायाः कर्तुश्च प्रयोगः - कर्तृवाच्यस्य तिङन्तक्रियाया वाक्ये धातोर्मध्यमपुरुषस्य क्रियापदेषु युष्मच्छब्दस्य प्रथमाविभक्ते रूपाणि[१] उत्तमपुरुषस्य क्रियापदेषु अस्मच्छब्दस्य प्रथमाविभक्ते रूपाणि[२] प्रथमपुरुषस्य क्रियापदेषु ततोऽवशिष्टानां सर्वेषामजन्तानां हलन्तानां च शब्दानां प्रथमाया रूपाणि[३] च सदा सर्वत्र वचनक्रमेण प्रयुज्यन्ते । कर्तृवाच्ये प्रथमान्तरूपाणि कर्तृपदानि प्रोच्यन्ते ।

२. कर्मवाच्यस्य तिङन्तक्रियायां प्रथमान्तस्य च प्रयोगः - सकर्मकधातोः कर्तृवाच्यस्य क्रियायां तद्युष्मदस्मच्छब्दानां यत्कर्म भवति । कर्मवाच्ये परिवर्तनेन केवलं तत्कर्म प्रथमान्तं[४] भवति

---

१ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १।४।१०५॥

२ अस्मद्युत्तमः १।४।१०७॥

३ शेषे प्रथमः १।४।१०८॥

४ प्रातिपदिकार्थलिङ्गपरिमाणवचमात्रेप्रथमाः इति सूत्रेण ।

न तु प्रथमान्तः कर्ता । कर्मवाच्यस्य तिङन्तक्रियायां तद्युष्मदस्मच्छब्दानां प्रथमाया रूपाणि कर्तृवाच्यस्य तिङन्तक्रियायामिव प्रयुज्यन्ते । परं युष्मदस्मच्छब्दौ विनाऽन्येषामजन्तहलन्तशब्दानां प्रथमाया रूपाणि कर्तृकर्मवाच्ययोः प्रथमपुरुषस्य क्रियासु वचनक्रमेण प्रयुज्यन्ते । कर्मणः स्थाने परिवर्तितः प्रथमान्तः कर्मवाच्यस्य वाक्ये प्रधानं भवति । यतः कर्मप्रथमान्तानुसारं कर्मवाच्यस्य तिङन्तक्रियापदं प्रयुज्यते । कर्मवाच्ये च कर्ता परिवर्तनेन (अनुक्तेन) तृतीयान्तो[१] भवति ।

३. भावेऽकर्मकधातुभ्यस्तिङा सर्वेषु लकारेषु प्रथमपुरुषस्यैकवचनमात्रे क्रिया[२] निष्पद्यते । भावे एव कृत्य[३]-क्त[४]-ख[५]ल्प्रत्ययैर्निष्पन्नं पदमौत्सर्गिकत्वेन नपुंसकत्वं प्रथमैकवचनान्तं भवति । अत्र (भावे) कर्ता तृतीयान्तस्तृतीयान्त एव कर्ता च भवति ।

४. धातुभ्यो भूतकर्तरि क्त [६] क्तव [७] तुप्रत्ययाभ्यां निष्पन्ना अतिङन्ताः कर्मणि (कर्मवाच्ये) कृत्य [८]-खल् [९] प्रत्ययाभ्यां भूतकर्मणि क्तप्रत्ययेन[१०] च निष्पन्ना अतिङन्ताश्च क्रियाः पुंस्त्रीनपुंसकलिङ्गानां सर्वेषां शब्दानां प्रथमाविभक्ते रूपाणां वचनानुसारं क्रमशः प्रयुज्यन्ते (लिख्यन्ते) पठ्यन्ते भाष्यन्ते च । कर्म कर्मवाच्ये परिवर्तनेन प्रथमान्तं कर्ता तृतीयान्तश्च[११] भवति । क्तान्तक्रियायां कुत्रचिद्विवक्षानुसारं करण (साधन) बोधकं तृतीयान्तपदं क्रियायोगे सप्तम्यन्तपदं च द्वे सहैव विधियेते, क्वचित्तयोर्द्वयोर्मध्ये एकं पदमात्रमपि विधीयते । कृत्यक्रियायामपपि तथैव चिन्त्यम् ।

५. कर्तृक्रिययोर्मध्येऽन्यानि कारकाणि विशेषणमव्ययमुपपदै[१२]र्युक्तं च द्वितीयान्तं तृतीयान्तं चतुर्थ्यन्तं पञ्चम्यन्तं षष्ठ्यन्तं सप्तम्यन्तं च पदं यथास्थलं विवक्षानुसारं प्रयुज्यते ।

६. कस्या अपि विभक्तेः कस्मिन्नपि वचने निष्पन्नेन केनापि पदेन सह सम्बध्य यस्माच्छब्दात्षष्ठी विधीयते । तस्मात्सम्बद्धात्पदात्पूर्वं षष्ठ्यन्तपदं प्रयुज्यते । अतसुजादिप्रत्यान्तादव्ययात्पूर्वमपि षष्ठ्यन्तपदं भवति ।

७. सम्बोधनं वाक्ये यत्र कुत्रापि प्रयुज्यते । अर्थकाले तत्पदं वाक्यादौ पठ्यते ।

८-क) विशेषणं विशेष्यात्पूर्वे परे वा प्रयुज्यते । विशेषणे गुण-द्रव्य-क्रियावाचकाः सर्वादयश्च शब्दा भवन्ति । यथा गुणवाचकशब्दः- पुण्यवान् नरः, पुण्यवती नारी, पुण्यवत् कुलम् । द्रव्यवाचकशब्दः - दण्डी पुरुषः, दण्डिनी नारी, दण्डि कुलम् । क्रियावाचकशब्दः - पाचकः पुरुषः, पाचिका नारी पाचकं कुलम् । सर्वादयः -स[१३] नरः, सा नारी, तत्कुलम् । ख) यत्तच्छब्दौ पूर्वपरयोः स्वस्य स्वस्य विशेष्यात्प्राग्प्रयुज्येते । तदनुसारमर्थश्च क्रियते । यत्तदोर्नित्यसम्बन्ध इत्युक्तिरस्ति । ग) क्वचिद्विशेषणमेव विशेष्यं भवति ।

---

1. कर्तृकरणयोस्तृतीया ३।२।१८॥
2. भावकर्मणोः १।३।१३॥ भावे कर्मणि यो लकारस्तस्यात्मनेपदं स्यात् । सार्वधातुके यक् ३।१।६७॥ धातोर्यक् भावकर्मवाचिनि सार्वधातुके । अनेन सूत्रेण सार्वधातुकेषु लट्लोट्लङ्विधिलिङ्लकारेषु यक् भवति आर्धधातुकेषु लिट्लुट्लृट्-आ.लिङ्लुङ्लृङ्लकारेषु तु न । भावे तिङन्तक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीते न द्विर्वचनादि किंत्वेकवचनमेवोत्सर्गतः प्रवर्तते । कर्मणि तु सर्वेषु लकारेषु त्रिषु पुरुषेषु त्रीणि त्रीणि रूपाणि भवन्ति ।
3. तयोरेव कृत्यक्तखलर्थाः ३।१।९६॥ एते भावकर्मणोरेव स्युः ।
4. निष्ठा ३।२।१०२॥ धातोर्भूतकर्मणि भूतभावे क्तो भूतकर्तरि क्तवतुश्च स्तः । नपुंसके भावे क्तः ३।३।११४॥सर्वधातुभ्यः क्तो भवति ।
5. ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल् ३।१।९६॥ धातोर्भावकर्मणोः खल् स्यात् एष्वर्थेषु ॥
6. गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ३।४।७२। एभ्यो भूतकर्तरि क्तश्चकारेण भावकर्मणोश्च ।
7. क्तक्तवतू निष्ठा १।१।२६॥ निष्ठा ३।२।१०२॥
8. तयोरेव कृत्यक्तखलर्थाः ३।१।९६॥ एते भावकर्मणोरेव स्युः ।
9. ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल् ३।१।९६॥
10. निष्ठा ३।२।१०२
11. कर्तृकरणयोस्तृतीया २।३।१८॥
12. पदमाश्रित्य जायमाना विभक्तिरुपपदविभक्तिरुच्यते=यत्पदमाश्रित्य या विभक्तिर्विधीयते तत्पदमुपपदविभक्तिकपदं ज्ञेयम् ।
13. सर्वनामविशेषणं प्रायो विशेष्या(नाम्नः)त्प्राग्प्रयुज्यते । द्रष्टव्यम् ५-३-१- यश्चित्तसन्ततलयः स लयः प्रदिष्ट इत्यादि ।

तस्मात्प्रागसर्वनामविशेषणम् । यथा -स दक्षः । अयं मूर्खः । गुणादिवाचकं विशेषणम्- महान् वक्ता । सर्वनामविशेषणपूर्वकं गुणादिवाचकविशेषणम्-स महान् धनी । घ) कुत्रचित्त्यदादिशब्दो विशेष्यं भवति । तस्मात्प्राग्विशेषणं प्रयुज्यते । यथा सुन्दरः सोऽस्ति । विज्ञेन त्वया सर्वं प्रोक्तम् । चञ्चलस्त्वं न तिष्ठसि । ङ) कुत्रचित्त्यदादिषु द्वौ शब्दौ परस्परं मिलित्वा एकमर्थं बोधयतः । यथा सोऽहम् । अयं स एव । अयमहमेव । एषोऽहम् । स त्वम । योऽयम् । स एषः । एतादृशे द्वे विशेषणे विशेष्यात्प्रागप्रयुज्येते । यथा सोऽहं रामस्त्वया ज्ञेयः । स एष जीवः । योऽयं योगस्त्वया प्रोक्तः । सैष दाशरथी रामः । स्मरणीयं यत् विशेष्यस्य विवक्षानुसारमेकं द्विस्त्रिस्त्रिभ्योऽधिकमपि विशेषणं प्रयुज्यते ।

९. क्वचित्क्रियापदं विना कर्तृपदेन क्वचित्कर्तृपदमप्रयुज्य क्रियापदेन च वाक्यं निष्पद्यते । तत्र कर्तृपदानुसारं साङ्गतिकं क्रियापदं क्रियापदानुसारं च प्रथमान्तपदमध्याह्रियते ।

१० वाक्ये पुंस्त्रीनपुंसकलिङ्गशब्दाः प्रयुज्यन्ते । तेषां लिङ्गानुसारं सप्तसु विभक्तिषु मध्ये कस्याः कस्या विभक्ते रूपं रूपे रूपाणि वा सन्ति । तत्पदम् ते पदे तानि पदानि वाऽभ्यासे पठने लेखने भाषणे च विचारणीयानि ।

११. यथासंभवं वाक्ये प्रयुक्तस्य पदस्य व्युत्पत्तिरपेक्ष्यते । व्युत्पत्तौ कृदन्त-समास-तद्धिताश्च शब्दाः समागच्छन्ति ।

१२. अन्वयः सामान्ये कारकाणामुत्तरोत्तरविहितक्रमेण चिन्त्यः ।

१३. सकर्मकधातोः कर्तृवाच्यस्य तिङन्तक्रियाया क्तक्तवतुप्रत्ययान्ताया अतिङन्तायाः क्त्वाल्यप्तुमुन्प्रत्ययान्तायाश्च गौणक्रियायाश्च स्वस्वकर्माणि विधीयन्ते । तानि अर्थकाले स्वस्वक्रियायामन्वीय पठितव्यानि । क्त्वाल्यप्तुमुन्प्रत्ययान्ताः शतृशानच्प्रत्ययान्ताश्च क्रिया गौणक्रिया अतिङन्ताश्च प्रोच्यन्ते । यतस्तिङन्ता अतिङन्ताश्च क्रियाः सदा ज्ञेयाः ।

इति कारकप्रकरणे चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ॥ ५ ॥

५-१ अजहल्लिङ्गविशेषणम्

यः शब्दः केवलमेकलिङ्गी अस्ति स शब्दोऽजहल्लिङ्गी शब्दः प्रोच्यते । स विशेष्यशब्दो विशेषणशब्दश्च भवति । विशेषणं प्रायेण नियमानुसारं विशेष्यस्य लिङ्गं विभक्तिं वचनं चानुसृत्य प्रयुज्यते । परमजहल्लिङ्गविशेषणं विशेष्यस्य लिङ्गं विभक्तिं वचनं च नानुसरति । यतस्तु अजहल्लिङ्गविशेषणमजहल्लिङ्गविशेष्यस्य लिङ्गं विभक्तिं वचनं चानुसृत्य न प्रयुज्यते । अजहल्लिङ्गविशेष्यशब्दः कस्यापि लिङ्गस्य प्रथमाविभक्तेः कस्मिन्नपि वचने भवतु अजहल्लिङ्गविशेषणं सदा प्रथमाविभक्तेरेकवचनमेव प्रयुज्यते न तु द्विबहुवचने । विशेष्यात्प्राग्स्थितं विशेषणमुद्देश्यं परे स्थितं च विधेयं प्रोच्यते । केषाञ्चनाजहल्लिङ्गविशेषणानां संग्रहः ।

अ) प्रमाणम्, स्थानम्, पदम्, प्रस्थानम्, पात्रम्, पवित्रम्, मित्रम्, बीजम्, कृपणम्, भाजनम्, मूलम् दैवतम् शरणम्, निधानम्, साधनम्, आस्पदम्, वरम्, द्रव्यम्, रत्नम्, लक्षणम्, अभिभवास्पदम्, अवलम्बनम्, विषम्, दुरितम्, निमित्तम्, बहुलम्, स्थलम्, उद्देश्यम्, अमृतम् सुखम् प्रधानम्, सर्वस्वम्, क्षेत्रम्, विभूषणमित्यादीन्यजहन्नपुंसकविशेषणानि ज्ञेयानि ।

आ) हेतुः, व्यवहारः, गुरुः, शत्रुः, विचारः, न्यायः, आत्मा, अभ्यासः, धर्मः, मोक्षः, ब्राह्मणः, क्रियाविधिः, भारः, प्रतिनिधिः, अर्थः, महानिधिः, कालः, ग्रन्थः, विग्रह इत्यादयोऽजहपुँल्लिङ्गविशेष्यशब्दा ज्ञेयाः ।

इ) प्रकृतिः, राजधानी, राजनीतिः, मूर्तिः, देवताः, वृत्तिः, शान्तिः, गतिः, मतिः, कृतिः, लक्ष्मीः, गौरीः, शुद्धिः, विद्या, नीतिः, भूषा, कला, दिक्, संख्या, स्मृतिः, भाषा, व्यक्तिः, निवासभूमिः, विश्वासभूमिः, अविद्या कर्मभूमिरित्यादयोऽजहत्स्त्रील्लिङ्गविशेष्यशब्दा बोध्याः ।

ई) अजहन्नपुंसकलिङ्गविशेष्यशब्दाः - ज्ञानम्, फलम्, धनम्, वनम्, वारि, दधि, पयः, घृतम्, तैलमित्यादयः । अजहत्पुंस्त्रीनपुंसकलिङ्गशब्दा व्यवहारत अकृत्या वा ज्ञेयाः सदा विशेष्यमादौ विशेषणञ्चान्ते प्रयुज्येते । तयोः प्रयोगेऽयमेव विधिरस्ति ।

१-(क) प्रथमान्तस्याजहत्पुँल्लिङ्गविशेष्यस्याजहन्नपुंसकल्लिङ्गविशेषणम् यस्मिन्वाक्येऽजहत्पुँल्लिङ्गविशेष्यं प्रथमाविभक्तेरेकवचने द्विवचने बहुवचने वा प्रयुक्तं स्यादजहल्लिङ्गविशेषणं तेंकवचनमेव प्रयुज्यते । प्रथमायां प्रयुक्तेन विशेष्यपदेन कर्तृपदं बोध्यम् । वाक्ये क्रियापदं विशेष्यानुसारेण प्रयुज्यते न तु विशेषणानुसारेण ।

a) स सा तत् भवान् भवती वा	वेदानां धर्माणां घटनायाः विश्वस्य जगतो वा	प्रमाणं कारणं मूलं हेतुर्निमित्तं बीजं निदानं वा अस्ति ।
तौ ते ते भवन्तौ भवत्यौ वा	" " " " " वा	" " " " " " " " वा स्तः ।
ते ताः तानि भवन्तः भवत्यो वा	" " " " " " वा	" " " " " " " " वा सन्ति ।
त्वम्	" " " " " वा	" " " " " " " वा असि ।
युवाम्	" " " " " वा	" " " " " " वा स्थः ।
यूयम्	" " " " " " वा	" " " " " " " वा स्थ ।

अहम्	"	"	"	"	"	"	"
	"	"	वा	"	"	"	वा अस्मि ।
आवाम्	"	"	"	"	"	"	"
	"	"	वा	"	"	"	वा स्वः ।
वयम्	"	"	"	"	"	"	"
	"	"	वा	"	"	"	वा स्मः ।

b) भवन्तौ किल विश्वस्य जगतः कारणं परम् । हिन्दूनां (सनातनधर्मिणां वैदिकधर्मावलम्बिनां) वेदः वेदौ वेदा वा प्रमाणं कारणं मूलं बीजं निदानं निधानं हेतुर्वा सन्तिः (अस्ति स्तः - वचनानुसारम्)। अस्या घटनाया अस्य कर्मणो वा भवन्तः प्रमाणम् । तस्यान्वेषणे शिलालेख एव प्रमाणम् । धर्मशास्त्रोपदेशाय भवन्तः प्रमाणं सन्ति, भवन्तौ कारणं स्तः, भवन्तो हेतुः सन्ति । संसारे वेदा अमरकाव्यं मन्यन्ते । वेदाः स्वतः प्रमाणम्, परतः प्रमाणम् । कर्मप्रतिपादने मन्त्राः कारणं हेतुर्वा स्मरणीयाः । शतभुजिप्रभृतिमन्त्राः सन्त्यत्रविषये प्रमाणम् । तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् ।

c) उद्योगः सम्पदां पदम् । सहसा बिदधीत न क्रियामविवेकः परमापदां पदम् । बलवानपि निस्तेजाः कस्य नाभिभवास्पदम् । नित्यं हि प्रपठेद्वेदं स भवेत्सम्पदां पदम् । सम्पदः पदमापदाम्। अगरीयान्न पदं नृपश्रियः । स भवेत्सम्पदां पदम् ।

द्वितीयायामपि - वदन्ति मर्त्याः प्रायेण विषयान्पदमापदाम् । सर्वे धर्मसूत्रकाराः स्मृतिकारा हिन्दवश्च वेदमेव आदिमं मूलं मन्यन्ते । भ्रमाद् जीवः स्वं(आत्मानं) पञ्चक्लेशानामास्पदं मन्यते ।

d) लोभः पापस्य कारणं हेतुर्निदानं मूलं वा । गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः। पाकिस्तानिवासिन आरम्भत एव भारतवासिनां शङ्कास्थानम् । विश्वासः सम्पदां मूलं तेन यूथपतिर्गजः ।

e) भवन्तः श्रुतेर्भाजनं सन्ति । इमे पुत्राश्छात्राश्च स्नेहस्य भाजनं विद्यन्ते । भोगस्य भाजनं राजा न राजा कार्यभाजनम् । स एव लक्ष्म्याः यशसां च भाजनम् । दीना दयाया पात्रं सन्ति । स भवान् रामः कृष्णश्चास्माकं तव मम वा विश्वासपात्रम् । गुणानां भाजनं नरः ।

f) अग्निः पवित्रं भवति । स मां पुनातु । त्रीणि दर्भतृणानि पवित्रं शाखायां बध्नीयात् । सूर्यः पवित्रं भवति । स मां पुनाति(पवते) । वायुः पवित्रं भवति । स तं पुनाति । द्वितीयायामपि - प्रार्थयामि जगन्नाथ पवित्रं कुरु मे गृहम् ।

g) कुपिता मला रोगाणां मूलं जायन्ते । क्रोध ऐश्वर्यस्य नाशस्य मूलं जायते । वेदाऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ सर्वेषां मानवानां वेदाः स्मृतय ऋषीणां शीलं च धर्ममूलम्-१- शुचौ तु चरिते=चरित्रे शीलमित्यमरः १।१०।२८॥ धर्ममूलं हि भगवान् सर्वदेवमयो हरिः । विश्वासः सम्पदां मूलम् । स्मृतयः (धर्मशास्त्राणि) पुराणानि महाभारतं रामायणं च हिन्दूनामेव नहि सर्वेषां मानवानां च धर्ममूलम् । विष्णुः शिवश्च सृष्टेर्मूलम् । लक्ष्मीर्धनस्य मूलं हेतुर्निदानं वा । अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् । आचारस्तपसो मूलं हेतुर्वा । अनाचारः पतनस्य हेतुः कारणं वा ।

h) मङ्गलं भगवान्विष्णुर्मङ्गलं गरुडध्वजः । मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः (क्वचिद्-मङ्गलायतनमपि लभ्यते) ।

i) विस्मय एव कापुरुषस्य लक्षणम् । स प्रत्ययार्थे परिमाणो प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम् ।

j) बालस्य नेह शरणं पितरौ नृसिंहः । साम्प्रतं मे तव पादौ शरणम् । हरिः शरणमेवं हि नित्यं येषां मुखे वचः । अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन क्षमस्व परमे श्वरः । श्रीकृष्णः शरणं मम श्रीकृष्ण एव शरणम् । शिवः शरणं प्रभो शिवः शरणम् । श्रीरामः शरणं समस्तजगताम् ।

k) सर्वेषां कामादयो दोषा दुःखस्य कारणं हेतुर्निदानं वा । मन्त्रभाग एव सर्वासां विद्यानां कारणं निदानं हेतुर्वा अस्ति आसीत् भविष्यति वा । संसारस्य परिवर्तने रज एव महत्कारणम् । रस एव सर्वेषामाकर्षणस्य निदानमुच्यते । इह साधनक्रियां प्रति श्रमः कारणम् । धनलाभे धनप्राप्तौ वा श्रम एव हेतुः । दण्डो चक्रं प्रति हेतुः कारणं वा । चक्रं घटं प्रति कारणम् । कुलालो दण्डञ्चक्रं च प्रति कारणं हेतुर्वा । फललाभे पुरुषार्थो यत्न उद्योगो वा कारणं निदानं हेतुर्वा । ईश्वर(फल)प्राप्तौ तप एव निदानं हेतुर्वा विद्यते । ब्रह्मा उत्पत्तौ विष्णू रक्षणे शङ्करो लये च कारणं हेतुर्वा मतः ।

l) अभिमन्युः श्रेण्यारत्नं कुलावतंसश्चासीत् । संस्कृतसाहित्ये(संस्कृतवाङ्मये) महाकविकालिदासो रत्नमस्ति । मयूरभट्टः श्रीहर्षनरपतेः सभायां द्वितीयं कविरत्नमासीत् । नेपालीसाहित्ये भानुभक्त आचार्यो रत्नं विद्यते । संस्कृतसाहित्ये वाल्मीकिः पुराणे व्यास श्च रत्नं स्तः ।

m) देवादृते वरः श्रेष्ठे स्त्रीषु क्लीबे मनाक्प्रिये - अमरः ३।३।१७३॥ वरशब्दो देवसकाशाद् वृते=वरस्याभिलषिते पुंसि=पुंल्लिङ्गे, श्रेष्ठे=उत्तमेऽर्थे स्त्रीषु पुंस्त्रीक्लीबलिङ्गेषु, मनाक्=अल्पेऽर्थे प्रिये=इष्टे चाऽर्थे क्लीबे=नपुंसके प्रयुज्यते - १. वरं गर्भस्रावो वरमपि च नैवाभिगमनं वरं जातः प्रेतो वरमपि च कन्यैव जनिता । वरं वन्ध्या भार्या वरमपि च गर्भेषु वसतिर्न चाविद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः ॥ वरं मौनं कार्यं न च वचनमुक्तं यदनृतं वरं क्लैव्यं पुंसां न च परकलत्राभिगमनम् । वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचिर्वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥ वरं शून्या शाला न च खलु वरो दुष्टवृषभो वरं वेश्या पत्नी न च पुनरविनीता कुलवधूः । वरं वासोऽरण्ये न पुनरविवेकाधिपपुरे वरं प्राणत्यागो न पुनरधमानामुपगमः ॥ वरमेको गुणी पुत्रो न च मूर्खाशतान्यपि । एकश्चन्द्रस्तमो हन्ति न च तारागणेऽपि तत् । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् । वरं वनं वरं भैक्ष्यं वरं भारोपजीवनम् । वरं व्याधिर्मनुष्याणां नाधिकारेण सम्पदः ॥ अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः । यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो भवेत् ॥ वरमिह वा सुतमरणं मा मूर्खत्वं कुलप्रसूतस्य । पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः । मम मृत्यू रामाद्वरं न तु रावणात् ।

n) कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते । योगारुढस्य तस्यैव शमः कारणमुच्यते ।

o) सन्तोष एव पुरुषस्य परं निधानम् । त्वमस्य विश्वस्य परं निधानम् । सर्वौषधीनाममृतं प्रधानं सर्वेन्द्रियाणां नयनं प्रधानम् । सर्वेषु सौख्येष्वशनं प्रधानं सर्वेषु गात्रेषु शिरःप्रधानम् ॥ एते वर्तमाने संज्ञायां च बहुलं स्युः । समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । अयं नपुंसकं स्यात् । एतदन्तस्तत्पुरुषः क्लीबं वा स्यात् । रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् ।

p) हे भगवन् ! त्वमेव परमं ब्रह्म त्वमेव परमं पदम् । परं ब्रह्म परं धाम पवित्रं परमं भवान् । सर्वस्वं मे रामचन्द्रो दयालुः । त्वं मे सर्वस्वम् । त्वमेव सर्वं जगत् । वेदास्तु सर्वेषां हिन्दूनां ब्राह्मणानां च सर्वस्वम् ।

q) अयं संसारो भगवतः क्रीडास्थलम् । मानवस्यान्यप्राणिनश्च शरीरात्प्राणवियोग एव मरणम् । अयं संसारो मानवानां क्रीडास्थलं व्यवहारस्थलं कर्म(कार्य)स्थलं वा । भगवत्तत्त्वं सर्वेषां प्राप्तिस्थानम् । वेदान्ते उपनिषदःप्रथमं प्रस्थानं ब्रह्मसूत्रं द्वितीयं प्रस्थानं गीता तृतीयं प्रस्थानं च ज्ञेयाः ।

r) अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽदित्या देवता मरुतो देवता विश्वेदेवा देवता वृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता । शिवो देवता विष्णुर्देवता ब्रह्मा देवता । लक्ष्मीर्देवता । भवान् देवता । काली देवता । ऋद्धिर्देवता ।

s) चरुर्द्रव्यम् । लता द्रव्यमस्ति ।

t) धर्मो मित्रं मृतस्य च । रामःकृष्णो वा मम मित्रम् । स त्वं भवान्वा तस्य मित्रम् । इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । भवान्परं दैवतम् । अहं तव मित्रम् । सर्वा आशा मित्रं भवन्तु । ध्वनिरेव काव्यस्यात्मा सर्वस्वं च ज्ञेयः । पुत्रो राकृष्णो रामः शिवश्च मम सर्वस्वम् । काव्यानां रस आत्मा सर्वस्वं वा । सद्गुणा नरस्य सर्वस्वं सन्ति ।

१ख) प्रथमान्तस्याजहत्स्त्रीलिङ्गविशेष्यस्याजहत्पुंनपुंसकलिङ्गविशेषणम् । अन्यः सर्वे नियमः १-क) स्थले द्रष्टव्यः - प्रकृतिरेव स्थावरजङ्गमानामुत्पत्तेर्हेतुः कारणं निदानं वा । दुर्गा वैष्णवी वा देवी जगतो मूलं बीजं निधानं वाऽस्ति । बुद्धिरेव मानवस्योन्नतेः कारणं निदानं वा । सत्सङ्गतिर्हि विदिता तव भक्तिहेतुः । भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम् । धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः । हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः । सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः । हिरण्यपाणिमुतये स चेत्ता देवता पदम् । अहिंसैवास्मकं धर्मः । आपःपृथिव्यां परमं पवित्रम् । श्रीमद्भागवती कथा भक्तेरुद्भवास्पदम् । उपनिषदः प्रथमं प्रस्थानम् । गीता तृतीयं प्रस्थानम् । सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् । सौन्दर्यप्रियताऽनाचारस्य लक्षणं नास्ति । देहात्मधीरेव नृणामसिद्धयां जन्मादिदुःखप्रभवस्य बीजम् । धर्मो मित्रं दया क्षमा । लोकेऽकर्मण्यता महद्दुरितं प्रोच्यते । दुहितारः परं कृपणं सन्ति । गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम् । निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् । भार्या त्रिवर्गकरणं शुभशीलयुक्ता । श्रुतिः श्रुती श्रुतयो वा स्मृतिः स्मृती स्मृतयो वाऽस्माकं धर्मस्य प्रमाणं कारणं निदानं मूलं हेतुर्वा । सर्वत्रार्थार्जने प्रवृत्तिः सन्देह एव । विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च । व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ॥ गीता मे हृदयं पार्थ गीता मे सारमुत्तमम् । गीता मे चोत्तमं स्थानं गीता मे परमं पदम् ॥ गीता मे ज्ञानमत्युग्रं गीता मे ज्ञानमुत्तमम् । गीता मे परमं गुह्यं गीता मे परमो गुरुः ॥ विद्या परं दैवतम् । वस्तुतो भक्तिर्हि गीताया हृदयम् । मातृभूमिरस्माकं क्रीडास्थलम् । मार्तकी स्थाली दोहनपात्रम् । त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया । अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम् । विषं सभा द्ररिद्रस्य वृद्धस्य तरुणी विषम् । स्वस्य विद्याबन्धसम्बन्धमोक्षात्सत्यज्ञानानन्दरूपात्मलब्धौ । शास्त्रं युक्तिर्दैशिकोक्तिः प्रमाणं चान्तः सिद्धा स्वानुभूतिः प्रमाणाम् ॥ संसारे राजनीतिर्व्यवहारोऽस्ति । सर्वा आशा (दिशः) मम मित्रं भवन्तु । **नभोभूषा पूषा कमलवनभूषा मधुकरो वचो भूषा सत्यं करविभवभूषा वितरणम् । मनोभूषा मैत्री विमलकुलभूषा सुचरितं सदोभूषा सूक्तिः सकलगुणभूषा च विनयः ॥** हिंसाकर्मणो निवृत्तस्य जनस्याहिंसा धर्ममार्गः । नारी गृहस्य भूषणम् । क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम् । अपराधेषु सत्वेषु नृपाणां सैव च दूषणम् ॥ वस्तुतो भक्तिर्हि भगवतः (शिवस्य कृष्णस्य रामस्य च) भगवत्या (दुर्गाया लक्ष्म्याश्च) हृदयं ज्ञेया । सा नारी रत्नमेवासीत् । देवी फलप्राप्तौ कारणं निदानं हेतुर्वा । आप ओषधीनां प्राणिनां च रसः । नराणां विद्याऽलङ्कारः । अहिंसा परमो धर्मः । चर्तुदश विद्या उज्ज्वलं ज्योतिः । सर्वेषां रूपसिद्धिरेव प्रयोजनम्, लक्ष्यम्, उद्देश्यं वा । दुर्गा भगवती मे सर्वस्वम् । सीता माता मे सर्वस्वम् । तत्र भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि च ।

१(ग) अजहन्नपुंसकलिङ्गविशेष्यस्याजहत्पुंलिङ्गि अजहत्स्त्रीलिङ्गि अजहन्नपुंसकलिङ्गि च विशेषणं वाक्ये प्रयुज्यते । क्रियापदं विशेष्यस्य वचनानुसारं प्रयुज्यते न तु विशेषणस्यानुसारम् । विशेषणं विशेष्यात्प्रागुद्देश्यं पश्चाद्विधेयं च भवतीति प्रोक्तमेव - ज्ञानं विद्याऽस्ति अज्ञानमविद्या च । संयुक्तोदाहरणानि-

a) वैदिकधर्मावलम्बिनां धर्मस्य मूल प्रमाणं वेदोऽस्ति वेदौ स्तः, वेदाः सन्ति वा । धर्मस्य धर्मशास्त्राणां पुराणानां काव्यानां च मूलं स्रोतो वेदोऽस्ति वेदा वा सन्ति । प्रमाणैर्वस्तुपरीक्षणं न्यायः । प्रमाणैरर्थपरीक्षणं न्यायः । सर्वैर्ज्ञानाधिष्ठानमात्मा ज्ञेयः । सृष्टिस्थितिप्रलयानां कारणं देवी ईश्वरः शिवो विष्णुर्वा । ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमः । विद्याया मूलमभ्यासः । मोक्षस्य मूलं तपो ज्ञानं वा । तपस्याया ज्ञानस्य वा फलं मोक्षोऽस्ति । वेदपठनस्य फलं ज्ञानं स्वर्गः सुखं वाऽस्ति । स्वराणां प्रयोजनं वेदपाठस्य परिरक्षणम् । द्वितीयं प्रयोजनं तु तत्पदगतस्यार्थस्य निर्धारणम् । अस्माकं प्रथमं प्रयोजनं देशविकास एव । द्वितीयं प्रयोजनं (उद्देश्यं) जनानां सुखावाप्तिः । अस्माकं देशविकासस्य ग्रामविकासस्य नगरविकासस्य वा लक्ष्यमुद्देश्यं प्रयोजनं वा जनताभ्यः सुखप्रदानमेव । अस्य विवादस्य समाधानस्य दुःखनिराकरणस्य वा बीजं निदानं कारणं हेतुर्वा भवानस्ति भवन्तौ स्तः भवन्तः सन्ति वा । कर्तव्यस्य पालनं तव मम अस्माकं तस्य युष्माकं मानवमात्रस्य वा धर्मः । धर्मस्य हेतुः कारणं बीजं वा वेदः पुराणं वाऽस्ति । ज्ञानस्य मूलं क्रियाविधिरेव । राज्यस्य मुख्यं कर्तव्यं जनताभ्यः सुखप्रदानमेव । लोकाविरुद्धेन कर्मणा प्रजानां रक्षणं राज्यस्य प्रमुखो धर्मः । तपस्याया मूलमाचारः । यमनियमादीनां मूलमाचारः=क्रियाविधिरेव । धर्मस्य मूलं ब्राह्मणः । दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना । वस्तुतो दर्शनशास्त्रं ज्ञानविज्ञानस्य महानिधिरेव । यम-नियमानां पालनं मानवस्य प्रथमं कर्तव्यं परमो धर्मो वा । देशरक्षणमस्माकं परमो धर्मः । युद्धस्य विवादस्य वा बीजं कारणं हेतुर्वा सीमारेखा भूभागो वाऽस्ति । सर्वेषां जनानां कलहस्य कारणं हेतुर्वा राजनीतिरेव । कौटिल्यमतानुसारेण राज्यं राष्ट्रियाकाङ्क्षाया प्रतिनिधिरेव । बलवतामभिभूतस्य विदेशगमनं तदनुप्रवेशो वा नीतिः । त्रीणि दर्भतृणानि पवित्रं भवन्ति । सुखस्य मूलं धर्मः, धर्मस्य मूलमर्थः, अर्थस्य मूलं राज्यम् । वेदज्ञानस्य मूलं क्रियाविधिरेव । धर्मस्य शीलस्य च मूलमाचारः । पुराणश्रवणस्य फलं भगवति मनसो योजनं भक्तेरुद्भावनं च ।

b) जगति सर्वद्रव्येषु विद्यैव सर्वश्रेष्ठं द्रव्यं धनं वा । सृष्टेरुपादानकारणं हेतुर्वा प्रकृतिरेव । योषितां परमं दैवं पतिरेव न संशयः । ब्रह्मतत्त्वज्ञानमेव मुक्तिर्ज्ञेया । मरणं प्रकृतिः शरीरिणां प्रकृतिर्जीवितमुच्यते बुधैः । चतुर्वर्गस्य फलप्राप्तिसाधनं विद्यैव । शब्दाह्वयं ज्योतिर्विद्यैव । संसारे विद्या नामैकः खलु प्रदीपोऽस्ति । नाट्यं प्राचीनकाले जीवितकलाऽऽसीत् । सर्वैर्विद्या पुरुषो जलं लता पशुर्वा द्रव्यं ज्ञेयम् । प्राच्यादिव्यवहारहेतुर्दिक् । एकत्वादिव्यवहारहेतुः संख्या (गणना) । अतीतव्यवहारहेतुः कालः । जगतो जन्मादिकारणं ब्रह्म एव । संस्कारमात्रजन्यं ज्ञानं स्मृतिस्तद्भिन्नमनुभवः । पुरा भारतवर्षे संस्कृतं व्यवहारभाषाऽऽसीत् । राजनीतिर्व्यवहार एव न तु परमार्थः । सर्वस्य जगतो मूलकारणं मूलहेतुर्वा मूलप्रकृतिः प्रकृतिर्वा । भवान्महती व्यक्तिः । वेदान्तो मानवीयमेधाकृतचिन्तनस्य परा काष्ठा । सदा काव्यं सजीवप्रेम्णां चारुतरचित्रशाला एव । अहो निधनता सर्वापदामास्पदम् । मानप्राप्तौ आदरप्राप्तौ पूजाप्राप्तौ वा विद्या ज्ञानमाचारस्तपस्तपस्या सद्व्यवहारो वा कारणं हेतुर्वा ।

c) द्यौः शान्तिरन्तरिक्ष ॅं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ॅं शान्तिः शान्तिरेव शान्तिः[1] सा मा शान्तिरेधि ॥ अर्थस्य मूलं निकृतिः(कपटः) क्षमा च कामस्य रूपं च वपुर्वयश्च । धर्मस्य यागादिदया दमश्च मोक्षस्य सर्वोपरमः क्रियाभ्यः ॥ वेदाः प्रमाणं स्मृतयः प्रमाणं तद्वाक्ययुक्तं वचनं प्रमाणम् । एतत्त्रयं यत्र भवेत्प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम् । गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी । भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः । माता पृथिव्या मूर्तिस्तु भ्राता स्वमूर्तिरात्मनः ॥ स्वदेशेषु धनं विद्या व्यसनेषु धनं मतिः । परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥

[1] क्वचिदजहत्स्त्रीलिङ्गविशेष्यस्याजहत्स्त्रीलिङ्गविशेष्यमेव विशेषण भवति ।

बलं विद्या हि विप्राणां राज्ञां सैन्यं परं बलम् । बलं वित्तं च वैश्यानां शूद्राणां च कनिष्ठता ॥ सत्यमेव परो धर्मः सत्यमेव परा गतिः । सत्यमेव परो लोकः सत्यमेव परा स्थितिः ॥ परमं यो महत्तेजः परमं यो महत्तपः । परमं यो महत् ब्रह्म परमं यः परायणम् ॥ अमृतं शिशिरे वह्निरमृतं प्रियदर्शनम् । अमृतं राजसम्मानममृतं क्षीरभोजनम् ॥ अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम् । स्वभूमिःश्वापदादीनां राज्ञां मन्त्री परं बलम् ॥ पशुशब्दःकृषेरपि उपलक्षणम् । थासा साहचर्यादिकवचनं तशब्दो गृह्यते । स रहस्यानामपि रहस्यम् । चतुर्युगानां संज्ञा महायुगमुच्यते । लोकव्यवहाराणां स्थापनं धर्मशास्त्रस्य विषयः । अनुक्रमणिकानां षडङ्गादीनां च ग्रन्थानां प्रणयनप्रयोजनं (उद्देश्यं लक्ष्यं वा) मुख्यतो वेदरक्षणमेव ज्ञेयम् । साधारणवर्णाश्रमधर्मप्रतिपादको ग्रन्थो धर्मसूत्रं धर्मशास्त्रं वास्ति । जातिकर्मसंस्काराणामेकाग्निसाध्यानां च कर्मणां प्रतिपादिको ग्रन्थो गृह्यसूत्रम् । छन्दःशास्त्रसम्बन्धी ग्रन्थः पिङ्गलस्य पिङ्गलच्छन्दःसूत्रमेव । सदाऽऽत्मा शुद्धं चैतन्यमस्ति । परार्थाभिधानं वृत्तिः । वाक्यार्थाबबोधकं वाक्यं विग्रहः । सत्वमेव रजस्तमसोवृत्तिर्हेतुः । भारतवर्षभूमौ विराजमानं पुनीतम् (पवित्रं) स्थान(स्थलं)मृषीणां देवानां च निवासभूमिः । नैपालीयानां नेपालो भारतीयानां भारतममेरिकानिवासिनाममेरिका च कर्मभूमिः । अस्माकं कर्मभूमिर्नेपालो भारतं वेलायतो वा । अहं स्नानशीलो दाता वृद्धो गलितनखदन्तः कथं न विश्वासभूमिः । नेपालस्य काष्ठमण्डपो भारतस्य देहली अमेरिकादेशस्य वाशिंगटनश्च राजधानी विद्यते ज्ञेया वा । सर्वेषां जनानां कर्मभूमिः पृथिवी । एष संसारो गीतासिद्धान्तानुसारं कर्मभूमिः । ईश्वरो जगत उत्पत्तिस्थितिलयानां हेतुः कारणं निदानं वाऽस्ति । स्मृतिस्तु धर्मशास्त्रमस्ति । कर्तव्यपालनं सर्वेषां साधारणो धर्मः । क्रियां विना ज्ञानं विद्या वा भारः । ज्ञानं भारः क्रियां विना । कलायाः परिभाषा - अन्तरङ्गस्थानां पूर्णानामपूर्णानां च भावानां बाह्योत्पादनसामग्र्या मूर्तित्वोत्पादानमेव कला, मूर्तित्वाभिव्यक्तिरेव कला । एतदपेक्षयापि व्यापकरूपेण प्रतिपादनमित्थम् - येन सौन्दर्यस्य भावनं प्रकाशश्च प्रतिपाद्यते सैव वास्तुकला । योऽस्माकं हृदयतन्त्रीं मुखरयते सा कला । पुराणं जगत् न केवलं जडजगदेवास्ति किन्तु सच्चिदानन्दघनस्य भगवतो लीलाभूमिरस्ति । ब्रह्मणः सकाशादुत्पन्नानां राज्ञामृषीणां च भूतभविष्यद्वर्तमानकुलपरम्परा वंशः कथ्यते। यथा लूता (माकुरो - मकडी) तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं (साधनम्) च भवति । संसारो जगद्वा ईश्वरस्य कृतिः रचना वा । अतिचमूशब्दे तु नदीकार्यं विशेषः ।

d) अस्माकं शिक्षायाः प्रथममुद्देश्यं छात्रेभ्यो जनताभ्यो वा वास्तविकज्ञानप्रदानम्, ब्रह्मचिन्तनस्यं लक्ष्यं मोक्षप्राप्तिरेव मुक्तिरेव वा । कर्मणः प्रयोजनं जनानां सुखप्रदानं स्वर्गप्रदानं वाऽस्ति । ममोद्देश्यं कस्यापि कर्मणि प्रवर्तनमेव । मानवः समाजस्य प्रधानमङ्गम् । दुःखस्य कारणं जातिः, जातेः कारणं भवः, भवस्य कारणमुपादानम् (साधनम्), उपादानस्य कारणं तृष्णा, तृष्णायाः कारणं नामरूपेः, नामरूपयोः कारणं विज्ञानम्, विज्ञानस्य कारणं संस्कारः, संस्कारस्य कारणमविद्या । जन्मनो मूलकारणमविद्या । अत एव भारतीयालङ्कारिकाणां मते काव्यस्य प्रथममुद्देश्यं कल्याणस्य वधर्नम्, द्वितीयमुद्देश्यं मधुरशब्देनोपदेशश्च । काव्यस्य सर्वश्रेष्ठमुद्देश्यं प्रयोजनं लक्ष्यं वा पाठकानां हृदये आनन्दप्रदानमेव । यत्काव्यं लाभाय उपदेशाय वा न स्यात् तत्तु वाग्जृम्भणमेव (वाग्विलास एव) । कस्यापि कीर्तिरक्षा मुख्यं लक्ष्यम् ।

e) वरं प्राणपरित्यागः शिरसो वापि कर्तनम् । न तु स्वामिपदावाप्तिपातकेच्छोरुपेक्षणम् ॥ सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा । शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः । अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् । मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ पितामहस्य जगतो माता धाता पितामहः । वेद्यं पवित्रमोङ्कारमृक्साम यजुरेव च ॥ गतिर्भर्ता प्रभुःसाक्षी निवासः शरणं सुहृत् । प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च । अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ त्वं स्वाहा त्वं स्वधा तं ह्रीर्वषट्कारः स्वरात्मिका । सुधा त्वमक्षरे नित्ये त्रिधा

मात्रात्मिका स्थिता ॥ त्वमेव सन्ध्या सावित्री त्वं देवी जननी परा ॥ त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥ माता रामो मत्पिता रामचन्द्रःस्वामी रामो मत्सखा राघवेशः सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं जाने नैव जाने न जाने ॥ विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः । विद्या बन्धुजनो विदेशगमने विद्या परा देवता विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥ मनोबुद्ध्यहङ्कारचित्तानि नाहं न च श्रोत्रजिह्वे न च घ्राणनेत्रे । न च व्योमभूमी न तेजो न वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ मित्रं कोऽपि न कस्यापि नितान्तं न च वैरिकृत् । अहं सर्वाणि भूतानि ।

f) लक्ष्मीर्दुर्गा वा मे गतिः । आर्तत्राणपरायणः स भगवान् नारायणो मे गतिः । येषां गतिरहं परा । रामः कृष्णो वा मे सदा गतिः । स एव मे गतिः । गतिस्त्वं गतिस्त्वं त्वमेका भवानी । भवान् मे (मम) गतिः । त्वं मे (मम) गतिः । अहं तव गतिः । गतिस्त्वं गतिस्त्वं सदा मे श्रीकृष्णः - श्रीरामः । एवं सर्वत्र ज्ञेयम् । स्खलनं मानवस्य धर्मः । स्थानं प्रधानं न नरः प्रधानम् । स्थानं प्रधानं न बलं प्रधानम् । प्रधानाद्बुद्धिरुत्पद्यत इति विकृतिः प्रधानस्य विकारः । अहमृतूनां मधुमाधवौ । अहं ब्रह्माब्रह्माणी । अहं विद्याविद्ये । अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययाश्च ।

५-२ अजहल्लिङ्गविशेष्यस्य वचनानुरूपमजहल्लिङ्गविधेयविशेषणस्य वचनम्

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेषेष्यस्य । तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि इति वचनानुसारं विशेषणं सदा विशेष्यस्यानुसारि भवति । यदा उभावजहल्लिङ्गिनौ विशेष्यविशेषणशब्दौ स्वं स्वं लिङ्गं भजन्ते । तदा विधेयविशेषणं विशेष्यस्य लिङ्गं नानुसरति । परं तद्विशेषणं विशेष्यस्य वचनं त्वनुसरति । अथवा विशेष्यं यस्मिन्वचने प्रयुज्यते विशेषणमपि तस्मिन्नेव वचने प्रयुज्यते । यथा - पदार्थानां गुणधर्मा एव बन्धनानि । गुणाः सत्वरजस्तमांसि - सत्वरजस्तमांसि गुणाः प्रोच्यन्ते । सांख्यरीत्या सत्वरजस्तमांसि प्रकृतेर्गुणाः । प्रतिज्ञाहेतुदाहरणोपनयननिगमनानि पञ्चावयवाः । यमनियमासनप्राणायामप्रत्याहारा बहिरङ्गानि साधनानि मतानि धारणाध्यानसमाधयश्चान्तरङ्गानि । सनातनधर्मिणां वेदाः सर्वश्रेष्ठानि निर्भ्रान्तसाधनानि सन्ति । सर्वाणि पुराणानि भारतवर्षीयायाः नेपालदेशीयायाश्च संकृतेःकोशाः सन्ति । वेदा हिन्दुधर्मिणाममरभास्वररत्नानि सन्ति । वेदवेदाङ्गपुराणस्मृत्यादयो(वेदाः = श्रुतयः गृह्यसूत्रम्, धर्मसूत्रम्, स्मृतिः रामायणं महाभारतं पुराणानि च)ऽस्माकं धर्मशास्त्राणि कथ्यन्ते । शौचसन्तोषतपःस्वाध्येश्वरप्रणिधानानि नियमाः । प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि पुरुष इति एतानि पञ्चविंशतितत्वानि व्यक्ताव्यक्तज्ञाः प्रोच्यन्ते । यूयं धर्मज्ञानरता विश्वासभूमयः स्थ । प्राचीनेतिहासाः पुराणानि चाऽस्माकं जिज्ञासूनां कृते निधयः सन्ति । ते यशसो भाजनानि । गुणा वस्तुतो द्रव्याण्येव सन्ति । श्राद्धे त्रीणि पवित्राणि दौहित्रः कुतपस्तिलाः । तत्र द्वौ कुजेरश्यामौ मित्रे प्रतिवसतः । मित्रे सौम्यशनी कवेः । विधोर्बुधरवी मित्रे स्तः । मित्राणि द्युमणेः कुजेज्यशशिनः सन्ति ।

५-३ यत्तदोः प्रयोगविधिः

सर्वनाम[1]शब्दाः सामान्यतया नाम्नः स्थाने प्रयुज्यन्ते । किन्च ते शब्दा नाम्नः सम्बोधकाः परस्परबोधकाश्च सन्ति । तेषु मध्येऽनयोः "यत्तदोर्नित्यसम्बन्धो भवति" इत्युक्तिरस्ति । यतोऽनयोःप्रयोगे इयमुक्तिः सदा स्मरणीया । आभ्यां शब्दाभ्यामनव्ययवाचकोऽव्ययवाचकश्च शब्दौ निष्पद्येते । यत्रैकवाक्ये यच्छब्दोऽपरवाक्ये तच्छब्दश्च प्रयुज्येते । तौ शब्दौ स्वस्ववाक्ये स्थितस्य स्वस्य स्वस्य विशेष्यात्पूर्वं प्रयुज्येते । तदनुसारमर्थश्च क्रियते । क्वचिदेकस्मिन्वाक्येऽनयोःशब्दयोर्मध्ये य एकः शब्दः

[1] यो यत्स्थानं प्राप्नोति स तद्धर्मांल्लभते ।

प्रयुज्यते तत्र तेन प्रयुक्तेन शब्देनापरस्मिन्वाक्येऽप्रयुक्तः शब्दः सहैव स्थितः स्मरणीयः । क्वचिदेतौ शब्दौ स्वस्ववाक्ये (पूर्वापरवाक्ये) सम्बन्धप्रक्रियया यत्र कुत्रापि प्रयुज्येते । अर्थकाले प्रायेण स्वस्ववाक्ये स्थितस्य स्वस्य स्वस्य विशेष्यस्यादौ तौ शब्दौ प्रयुज्यार्थः क्रियते । अर्थात् आदौ प्रायेण यच्छब्दः पश्चात्त्च्छब्दः पठचते । एतावर्थस्य विवक्षानुसारं क्वचित्समानविभक्तिवचनयोः प्रयुज्येते क्वचिदसमानविभक्तिवचनयोरपि ।

यत् = जो, जुन - यह

पुंसि			स्त्रियाम्			नपुंसके			
यः	यौ	ये	या	ये	याः	यत्	ये	यानि	प्र.
यम्	,,	यान्	याम्	,,	याः	,,	,,	,,	द्वि.
येन	याभ्याम्	यैः	यया	याभ्याम्	याभिः				तृ.
यस्मै	,,	येभ्यः	यस्यै	,,	याभ्यः	शेषं पुंवत् ।			च.
यस्मात्-द्	,,	,,	यस्याः	,,	,,				पं.
यस्य	ययो	येषाम्	,,	ययोः	यासाम्				ष.
यस्मिन्	,,	येषु	यस्याम्	,,	यासु				स.

तत् = त्यो उ, उनी - वह

पुंसि			स्त्रियाम्			नपुंसके			
सः	तौ	ते	सा	ते	ताः	तत्	ते	तानि	प्र.
तम्	,,	तान्	ताम्	,,		,,	,,	,,	द्वि
तेन	ताभ्याम्	तैः	तया	ताभ्याम्	ताभिः			तैः	तृ.
तस्मै	,,	तेभ्यः	तस्यै	,,	ताभ्यः	शेषं पुंवत् ।			च.
तस्मात्-द्	,,	,,	तस्याः	,,	,,				पं.
तस्य	तयोः	तेषाम्	,,	तयोः	तासाम्				ष.
तस्मिन्	,,	तेषु	तस्याम्	,,	तासु				स.

त्यदादीनां सम्बोनं नास्ति । अनयोः शब्दयोः रूपाणां प्रयोगोऽनेन क्रमेण बोध्यः । यः सः, यौ तौ, ये ते - प्र. । यम् तम्, यौ तौ, यान् तान् - द्वि. । येन तेन, याभ्याम् ताभ्याम्, यैः तैः - तृ. । यस्मै तस्मै, याभ्याम् ताभ्याम्, येभ्यः तेभ्यः - च. । यस्मात्-द् तस्मात्-द्, याभ्याम् ताभ्याम्, येभ्यः तेभ्यः - पं. । यस्य तस्य, ययोः, तयोः, येषाम् तेषाम् - ष.। यस्मिन् तस्मिन्, ययोः तयोः, येषु तेषु - स.। स्त्रियाम् - या सा, ये ते, याः ताः - प्र. । याम् ताम्, ये ते, याः ताः - द्वि.। यया तया - इत्यादि। क्लीबे - यत् तत्, ये ते, यानि तानि - प्र.। यत् तत्, ये ते, यानि तानि - द्वि.। शेषं पुंवत् । यावत् = यावान् यावन्तौ यावन्तः । तावत् = तावान् तावन्तौ तावन्तः । अनयोःशब्दयोरव्यये त्वधोदर्शिते स्तः।

अनव्ययः		अव्ययाः								
१. यादृक्-ग्	यादृशः	यत्	यदा	यथा	यावत्	यतः	यत्र	यदि-चेत्	यदि, चेत् वा	यदा
२. तादृक्-ग्	तादृशः	तत्	तदा	तथा	तावत् तदा	ततः	तत्र	तर्हि	तदा	तर्हि

अव्ययाः

१. यद्यपि	यावता	अनयोः	इदम्=अत्र, इह वा	अतः	इतः	तत्=ततः
२. तथापि	तावता	सम्बन्धः	तत्=तत्र	तत्र	ततः	इदम्=अत्र

संभावनाया अर्थो यत्र क्रियते तत्र यदि चेत् वा तर्हि इति प्रयोगः क्रियते ।

अधस्तनशब्दानां सम्बन्धः । अव्ययाः

एकः / १. अन्यः / २. अपरः / ३. इतरः	एके	एकत्र	एकतः	एकतः	इदम्=इह (अत्र)
	अन्ये	अन्यत्र	{ अपरतः इतरतः	समन्ततः	अदस् = अमुत्र
	अपरे इतरे	परत्र वा	अन्यतः वा		पर=परत्र वा

उपरिसंगृहीतानां शब्दानां प्रयोगो वाक्ये विचारणीयोऽर्थश्च करणीयः ।

१. सः सुहृद्व्यसने यः स्यात् स पुत्रो यस्तु भक्तिमान् । स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः । पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः । यो बलिः स राजा । यो यो धूमवान् स स वह्निमान् यथा महानसम् । एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् । यश्चित्तसन्ततलयः स लयः प्रदिष्टो यस्तु प्रभञ्जनविधानरतो हठः सः । यो मन्त्रमूर्तिवशगः स तु मन्त्रयोगो यश्चित्तवृत्तिरहितः स तु राजयोगः ॥ योऽविद्यया युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥ स स्निग्धोऽकुशलान्निवारयति यस्तत्कर्म यन्निर्मलं सा स्त्री याऽनुविधायिनी स मतिमान यः सद्भिरभ्यर्च्यते । सा श्रीर्या न मदं करोति स सुखी यस्तृष्णया मुच्यते तन्मित्रं यदकृत्रिमं स पुरुषो यः खिद्यते नेन्द्रियैः ॥ यो मां जयति संग्रामे यो मे दर्पं व्यपोहति । यो मे प्रतिबलो लोके स मे भर्ता भविष्यति । ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते । श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः । स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः । ये नः सपत्ना अप ते भवन्तु । ये देवा मनोजाताः मनोयुजो दक्षक्रतवस्तेऽवन्तु तेभ्यः स्वाहाः । सर्वहिंसा निवृत्ता ये नराः सर्वसहाश्च ये । सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥

२. त्वं यं पश्यसि तमाह्वय । भवान्यमामन्त्रयति तं पूजय । यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥ यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ संबोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात् ।

३. उद्यमेन विना राजन् यद्भावि तद्भविष्यति । यदस्मदीयं नहि तत्परेषाम् । नहि तद्विद्यते किञ्चिद्यदर्येन न सिद्धयति । अयशः प्राप्यते येन येन चापगतिर्भवेत् । स्वर्गाच्च भ्रश्यते येन तत्कर्म न समाचरेत् । दूरात्सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् । दूरात्संबोधने यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात् । कृपो यो रेफस्तस्य लः स्यात् । वेदस्थं ब्रह्म पुराणेषु असंख्यैर्नामरूपभावैर्विभिन्नरूपेषु आत्मानं प्रकटयति तदेव ब्रह्मा विष्णुः शिवो गणेशो वास्ति ।

४. आकाशे यानि नक्षत्राणि दृश्यन्ते तानि आकर्षणशक्त्या सङ्घरूपे स्थितानि सन्ति । अस्मिञ्जगति यानि वस्तूनि दृश्यन्ते तानि सर्वाणि विनाशप्रायाणि सन्ति । यानि अस्माकं प्रारब्धकर्माणि सन्ति तानि भोग्येन नश्यन्ति नान्योपायेन ।

५. मानवो यादृशं कर्म करोति स तादृशं फलं प्राप्नोति (लभते) । यो यादृगस्ति स तादृशं फलं लभते ।

६. यथा ते प्रीतिः स्याद्धितकर तथा त्वं कुरु विभो । यथादावुच्चरेद्वर्णांस्तथैवैनान्समापयेत् । यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत् । यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ॥ यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्न तथा पितृलोके । यथाऽऽप्सु परीव दृश्यते तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके । यथा बुभुक्षितस्यान्नं तथा रुग्णस्य भेषजम् । एवं ज्ञात्वा महादेवी यथा योग्यं तथा कुरु । यथा रामस्तथा कृष्णः स्मर्यते च सदा बुधैः । यथा यथा प्रत्यगवस्थितं मनस्तथा तथा मुञ्चति बाह्यवासनाः ।

७. यदि बह्निर्न स्यात् तर्हि धूमोऽपि न स्यात् । यदि नियमेनानुष्ठानं न स्यात्तर्हि विधेर्वैयर्थ्यमापद्येत ।

८. प्रचयो यत्र दृश्येत तत्र हन्यात्स्वरं बुधः । स्वरितः केवलो यत्र मृदु तत्र निपातयेत् ॥ यत्र विद्वज्जनो नास्ति श्लाध्यस्तत्राल्पधीरपि ॥ यत्रानेक विधमान्तर्यं तत्र स्थानत आन्तर्थं बलीयः । यत्र यत्र धूमस्तत्र तत्र बह्निः (अग्निः) । नाम गोत्रो वा यत्र प्रत्यभिवादनवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते ।

९. यदा यातास्तटं ते तु तदा कोलाहलोऽप्यभूत् । भूर्लोके देवलोके च ब्रह्मलोके तथैव च ॥ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसङ्कल्पसन्यासी योगारुढस्तदोच्यते ॥ सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ॥ मूषिकशब्दं यदा यदा श्रृणोति सिंहस्तदा तदा मांसाहारदानेन तं बिडालं संवर्धयति । यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

१०. तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते । यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः । यावत्स्याद्गुणवैषम्यं तावदीश्वरतो भयम् । यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः । नानात्वमात्मनो यावत्पारतन्त्र्यं तदैव हि । यावद्ग्रन्थराजस्य महाभारतस्याध्ययनं न विधीयते तावत्प्राक्तनराजनीतिविषयकं ज्ञानं न जायते । यावदहं कार्यमसमाप्य गृहं नागच्छामि तावत्त्वमपि मम गृहे तिष्ठ मां प्रतीक्षस्व वा ।

११. इह रामो वसतु तत्र कृष्णः । इह लक्ष्मणो वर्तते तत्र रामः ।

१२. ततः (तस्मात्स्थानात्) लक्ष्मणोऽत्र आव्रजेत् ।

१३. इतः (अस्मात्स्थानात्) रामस्तत्र गच्छेत् ।

१४. यतो हस्तस्ततो दृष्टिर्यतो दृष्टिस्ततो मनः । यतो मनस्ततो भावो यतो भावस्ततो रसः ॥ यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥

१५. विमुञ्चति यदा कामान्मानवो मनसि स्थितान् । तर्ह्येव पुण्डरीकाक्षो भगवत्वाय कल्पते ।॥

१६. यस्माच्च येन च यथा च यदा च यच्च
यावच्च यत्र च शुभाशुभमात्मकर्म ।
तस्माच्च तेन च तथा च तदा तच्च
तावच्च तत्र च विधातृवशादुपैति ॥

१७. एकत्र राजविश्वासो नश्यत्यन्यत्र बान्धवः ।
किं करोमि क्व गच्छामि पतितो दुःखसागरे ॥

१८. एकः पचति अन्यो खादति । एकः पठति अन्यः खेलति । एको हसति अन्यो रोदिति । एको मञ्चे वसति अन्यः शय्यायां शेते (स्वपिति) । एक आयाति अन्यो याति । एक आसने वसति अन्यो धावति । एके मृता अन्ये पलायिताः । एके आचार्याः साधु वदन्ति अन्येऽसाधु ब्रुवन्ति । स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।

१९. एको वेदं पठति अपरः साहित्यमधीते । एक उत्तीर्णः अपरोऽनुत्तीर्णः । एको गदति अपरः शृणोति । एके पचन्ति इतरे खादन्ति । एके पठन्ति अपरे लिखन्ति इतरे क्रीडन्ति च । एके मृता अपरे पलायिताः ।

२०. सांख्ये बुद्धियोगः कर्मयोगे कर्मयोगः । एकत्र ज्ञानमार्गोऽपरत्र कर्ममार्गः, एकत्र तत्वचिन्तनेन मोक्षोऽपरत्र समाधिप्रयोगेण चित्तवृत्तेर्निरोध इत्येव वैषम्यमपि लक्ष्यते । वैदेशिका विद्वांस

एकत्र कथयन्ति यत् भारतीयानामितिहासज्ञानं नासीत् अपरत्र ते वेदेष्वपीतिहासं मार्गयन्ति । एकत्र धर्मतत्वसमीक्षा अपरत्र धर्मतत्वव्यवहृतिश्च कृता लभ्यते विद्वद्भिः ।

२१. संस्कृतभाषायां प्राचीनैराचार्यैरेकतो जीवब्रह्मणोः प्रकृतेश्च मनोरमं विवेचनं विहितमपरतश्च धर्मशास्त्र-नीतिशास्त्र-कामशास्त्र-राजनीतिशास्त्र-शिल्पकलादिशास्त्राणां ग्रन्था विरचिताः । तामेकतस्तव बिभर्ति गुरुर्विनिद्रस्तस्या भवानपरधूर्यपदावलम्बी । इयं संस्कृतभाषा एकतः परमललिता मधुरा च अपरतः परमकठोरा गभीरा चास्ति ।

२२. हर्षादिमात्रविपक्षायां यद्यपि तङ् प्राप्तस्तथापि सुडभावान्नेष्यते । यद्यपि स परिश्रमपूर्वकं कार्यं करोति तथापि सफलतां न लभते सफलो न भवति वा । रामो यद्यपि पठने परिश्रमं विधत्ते (करोति) तथापि परीक्षायामनुत्तीर्णो (असफलो) भवति । यद्यपि स कर्मणि परिश्रमं करोति तथापि अपेक्षितं फलं न लभते ।

२३. वज्रं च राजतेजश्च द्वयमेवातिभीषणम् ।
एकमन्यत्र पतति पतत्यन्यत् समन्ततः ॥

२४ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते । इहामुत्र फलभोगविरागः ।

२५. प्रकृत्याश्रयःप्रत्याश्रयो वा यावानिण्णिषेधः स लिटि चेत्तर्हि क्रादिभ्य एव ।

५-४ सर्वादीनां सर्वादिभिः सह सर्वादिभिन्नैः शब्दैश्च सह परस्परसम्बन्धरूपेण प्रयुक्तः सर्वादिशब्दः -

यत्तदोः प्रयोग उपरि समुल्लिखितः । यत्तद्वदन्येषां सर्वादीनां सर्वादिभिः सह सर्वादिभिन्नैश्च शब्दैः सह परस्परयोः सम्बन्धरूपेण स्थितः प्रयोगोऽधः प्रस्तूयते । सर्वनामशब्दाः क्वचिद्विशेष्यवाचकाः कुत्रचिद्विशेषणवाचकाश्च भवन्ति । उक्तञ्च तदन्तस्यापि इयं संज्ञा इति । येऽव्ययवाचकशब्दा अपि भवन्ति । ते सावधानतया स्मरणीयाः । अधो लेखनक्रमे यःसर्वनामशब्दो येन सर्वनाम्ना च सहादौ प्रस्तुतोऽस्ति । अर्थकालेऽपि प्रायेण स एवादौ पठचते ।

तच्छब्दोऽतीतकालस्य (भूतकालस्य) पूर्वगते वाक्ये स्थितस्य च नाम्नः प्रसङ्गस्य च निर्देशनार्थं च प्रयुज्यते । क्वचिद्विशेषस्थले नाम्ना सहापि प्रयुज्यते । अनेन सह किंशब्दस्य प्रयोगः समुल्लिख्यते । अत्र प्रश्नार्थे स्थितः किंशब्दः प्रस्तुतोऽस्ति न तु कुत्सार्थे ।

१-क) तत् = त्यो उनी उ - वह । किम् = को के कुन - कौन क्यों । तच्छब्दो निर्देशनार्थको निश्चयार्थकश्चाऽस्ति । यच्छब्दोऽनिश्चयार्थको वर्तते । एतौ प्रायेणानुलोमेन प्रयुज्येते - सः कः । तौ कौ । ते के-पुंसि । सा का । ते के । ताः काः - स्त्रीलिङ्गे । तत् किम् । ते के । तानि कानि - नपुंसके । एवं द्वितीयादिविभक्तिषु प्रयोगाश्चिन्त्याः । स कः पुरुषः । तौ कौ पुरुषौ । ते के पुरुषाः - पुं. । सा का नारी । ते के नार्यौ । ताः का नार्यः - स्त्री. । तत् किं फलम् । ते के फले । तानि कानि पलानि - नपुं.। एवमन्यासु विभक्तिषु सर्वेषु वचनेषु प्रयोगाश्चिन्त्याः ।

ख) तच्छब्दस्यान्यैर्नामशब्दैः सहैवंप्रकारेण सर्वत्र प्रयोगः क्रियते - सः पुरुषः । तौ पुरुषौ । ते पुरुषाः - पुंसि । सा नदी । ते नद्यौ । ताः नद्यः - स्त्रीलिङ्गे । तत् गृहम् । ते गृहे । तानि गृहाणि - नपुंसके । एवमन्ये प्रयोगाश्चिन्त्याः - स पुत्रः । तौ पुत्रौ । ते पुत्राः । सा पुत्री । ते पुत्र्यौ । ताः पुत्र्यः । तत्कर्म । ते कर्मणी । तानि कर्माणि । सः भृत्यः । तौ भृत्यौ । ते भृत्याः । सा रमा । ते रमे । ताः रमाः । तदिन्द्रियम् । ते इन्द्रिये । तानि इन्द्रियाणि । स सर्वः । ते सर्वे । सा सर्वा । ताः सर्वाः । तत् सर्वम् । तानि सर्वाणि । तानीन्द्रियाणि सकलानि तदेव, नाम सा बुद्धिरप्रतिहता वचनं तदेव । अर्थोष्मणा विरहितः पुरुष स एव त्वन्यः क्षणेन भवतीति विचित्रमेतत् । सः धन्यः । तौ धन्यौ । ते धन्याः । सा धन्या । ते धन्ये । ताः धन्याः । इत्यादि ।

ग) किंशब्दस्यान्यैर्नामशब्दैः सहैवंप्रकारेण प्रयोगः क्रियते - को धर्मः । कौ धर्मौ । के धर्माः । क पुत्रः । कौ पुत्रौ । के पुत्राः । को गुणः । कौ गुणौ । के गुणाः । का पुत्री । के पुत्र्यौ । काः पुत्र्यः । का बधूः । के बध्वौ । काः बध्वः । का माता । के मातरौ । का मातरः । किं पुस्तकम् । के पुस्तके । कानि पुस्तकानि । किम् गृहम् । के गृहे । कानि गृहाणि । कोऽर्थः । कावर्थौ । केऽर्थाः । को लाभः । कौ लाभौ । के लाभाः । किं प्रयोजनम् । का क्षमा । का दया । का नदी । कः धन्यः। कौ धन्यौ । के धन्याः । इत्यादि ।

घ) चित् चन अपि एतेऽव्ययाः किंशब्दस्य रूपस्यान्ते योगेन कश्चित् कश्चन कोऽपि इत्यादिशब्दा भवन्ति - पुंसि - कश्चित् कश्चन कोऽपि वा पुरुषोऽत्र समागच्छति । तत्र कौश्चित् कौचन कावपि वा जनौ यातः । केचित् केचन केऽपि वाऽऽचार्या एवं वदन्ति तत्र सन्ति दृश्यन्ते वा । काचित् काचन काऽपि वा नारी गृहेऽस्ति । केचित् केचन केऽपि वा नार्यौ मञ्चे नृत्यतः । काश्चित् काश्चन का अपि वा नार्यस्तत्र समवेताः सन्ति दृश्यन्ते वा । किञ्चित् किञ्चन किमपि वा कार्यमद्यावश्यं भविष्यति । केचिद् केचन केऽपि वा जना गृहे सन्ति । कानिचित् कानिचन कान्यपि वा फलानि मया संगृहीतानि सन्ति कान्यपि कर्माणि कृतानि विद्यन्ते वा । एवं द्वितीयादिविभक्तीनां वचनानां रूपाणि प्रयोगे चिन्त्यानि ।

ङ) कति[1] वर्णाः संस्कृते सन्ति । कति ब्राह्मणा जना वाऽत्र समागच्छन्ति । कति फलानि अस्माभिः प्राप्यन्ते । कति नार्यः कर्मणि संलग्ना आसन् ।

च) कियन्तो जनास्तत्र सन्ति । कियत्यो नार्योऽत्र समायान्ति । कियन्ति फलानि आपणे प्राप्यन्ते ।

छ) चित् चन अपि एतैर्युक्ताः कति कदा कुतः कुत्र क्व कथम् कर्हि चैते शब्दाः - कतिचित् कतिचन कत्यपि वा पुरुषा नार्यः पत्राणि वा तत्र सन्ति दृश्यन्ते वा । स कदाचित् कदाचन कदापि वा कठोरवचनानि न ब्रूते । विशोक आनन्दधनो विपश्चित् कुतश्चित् कुतश्चन कुतोऽपि वा न बिभ्यति । स कुत्रचित् कुत्रचन कुत्रापि क्वचित् क्वचन क्वापि वा वसेत् । रामः कथञ्चित् कथञ्चन कथमपि वाऽत्रागच्छति । कर्हिचित् कर्हिचन कर्ह्यपि वा दिनानि सोऽत्र नास्ति । तेऽत्र कतिचित् कतिचन कत्यपि वा दिनानि व्यतीयुरहं न जाने । केचित् केचन केऽपि वा आचार्या एवं ब्रूवन्ति । कतिपये- याः (कतिचित् कतिचन कत्यपि वा) छात्रा उत्तीर्णाः सन्ति आसन्वा - पुंसि । कतिपये-याः कतिचित् कतिचन कत्यपि वा नार्योऽस्मिन्ग्रामे विदुष्यः सन्ति - स्त्रियाम् । अस्मिन् ह्रदे कतिपयानि (कानिचिद्) कमलानि विकसितानि (प्रफुल्लितानि) सन्ति दृश्यन्ते वा । कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः । कति जनाः सभायां समवेता आसन् ।

२) तत् = अर्थः ५-४-१क) द्रष्टव्यः । इदम् = यो यिनी यी - यह) इदंशब्दो निर्देशनार्थको निश्चयार्थकश्चास्ति । इमौ शब्दौ अनुलोमेन विलोमेन च- सोऽयमयं सः । ताविमौ इमौ तौ । ते इमे इमे ते । सोऽयं पुरुषः । अयं सःपुरुषः । तौ इमौ पुरुषौ । इमौ तौ पुरुषौ । ते इमे पुरुषाः । इमे ते पुरुषाः - पुंसि । सा इयं नारी । इयं सा नारी । ते इमे नार्यौ । इमे ते नार्यौ । ताः इमाः नार्यः । इमाः ताः नार्यः - स्त्रियाम् । तत् इदम् गृहम् । इदं तद्गृहम् । ते इमे गृहे । इमे ते गृहे । तानि इमानि गृहानि । इमानि तानि गृहाणि - क्लीबे । अनयोः प्रायोऽनुलोमक्रमस्योदाहरणं प्रस्तूयते -

क) सोऽयं देवदत्तस्त्वया वर्ण्यते । सोऽयं पुराणः पुरुषस्त्वया ज्ञेयः । सेयं सेवा दुःखरूपा हि मन्यते । सोऽयं जगदीशः, सर्वस्य हृदि वर्तते । सोऽयं दुःखसुतो गुणः । सेयं पुष्टिः सर्वस्य कल्याणकारिका । सेयमाग्नेयी । सेयं स्वदेहार्पणनिष्क्रयेण न्यय्या मया मोचयितुं भवत्तः । साक्षात्कल्पः

[1] शब्दोऽयमेवंप्रकारेण प्रयुक्तो लभ्यते - नयन्ति तेष्वप्युपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशताम् - कि. १४।४ ॥

सोऽयमायाति कालः । सोऽयं पुरुष आध्यात्मिको ज्ञायते । सेयं पौर्णमास्यतिक्रान्ता । तस्यामग्नीनाधीत । स एवायं नागः सहति कमलेभ्यः परिभवम् ।

ख) इयन्तो ब्राह्मणा अत्र सन्ति । इयत्यो नार्यः सदा पूज्याः । इयन्ति फलानि केन नापेक्ष्यन्ते ।

३. तत्=अस्यार्थः पूर्वमुक्तः । एतत् = यो यी यिनी - यह । एतच्छब्दो निर्देशनार्थको निश्चयार्थको ज्ञेयः । स एषः - एष सः । तौ एतौ-एतौ तौ । ते एते-एते ते - पुंसि । सा एषा-एषा सा । ते एते-एते ते । ताः एता-एताः ताः - स्त्रियाम् । तत् एतत्-एतत् तत् । ते एते-एते ते । तानि एतानि-एतानि तानि - क्लीबे । स एष नरः । एष स नरः । तौ एतौ नरौ । एतौ तौ नरौ । ते एते नराः - पुं.। सा एषा स्त्री । एषा सा स्त्री । ते एते स्त्रियौ । एते ते स्त्रियौ । ताः एता स्त्रियः । एताः ताः स्त्रियः - स्त्री.। तत् एतत् फलम् । एतत् तत् फलम् । ते एते फले । एते ते फले । तानि एतानि फलानि । एतानि तानि फलानि - क्लीबे । अनयोरपि अनुलोमक्रमेण बोध्यौ ।

क) स एष जीव पुरुषः पुराणः । स एष भगवान्राजन्व्यतनोद्विहितं यशः । सैष दाशरथी रामः सैष राजा युधिष्ठिरः । सैष कर्णो महादानी सैष भीमो महाबलः ॥ स एष आत्मात्मवतामधीश्वरः । स एष साक्षात्पुरुषः पुराणः । स एष साक्षात्कथितश्च कालः । स एष ते बल्लभबन्धुवर्गः । स एष भगवान् द्रोणः प्रजारूपेण वर्तते । स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इति ।

ख) एतदो युष्मदस्मद्भ्यां सह सम्बन्धः - एष त्वम् । एतौ युवाम् । एते यूयम् । एषोऽहम् । एतावावाम् । एते वयम् । स्त्रियामपि चिन्त्यः ।

४. तत्-अदस् । अदस्=यो यी यिनी - यह । अदस्शब्दो निदेर्शनार्थको निश्चयार्थकश्च बोध्यः । सोऽसौ, असौ सः । तौ अमू, अमू तौ । ते अमी, अमी ते - पुं.। सा असौ, असौ सा । ते अमू, अमू ते । ताः अमूः, अमूः ताः - स्त्री. । तत् अदः, अदः तत् । ते अमू, अमू ते । तानि अमूनि, अमूनि तानि - क्लीबे । सोऽसौ पुरुषः, असौ स पुरुषः । तौ अमू, पुरुषौ, अमू तौ पुरुषौ । ते अमी पुरुषाः , अमी ते पुरुषाः - पुं.। सा असौ नारी, असौ सा नारी । ते अमू नार्यौ, अमू ते नार्यौ । ताः अमूः नार्यः । अमूः ताः नार्यः - स्त्री..। तददः फलम् । अदस्तत्फलम् । ते अमू फले । अमू ते फले । तानि अमूनि फलानि । अमूनि तानि फलानि । अनयोः क्वचिदनुलोमेन कुत्रचिद्भिन्नभिन्नवाक्येऽपि परस्परं सम्बध्य प्रयोगो भवति - क) मयाऽनुमोदितः सोऽसौ सत्यो भवितुमर्हति । सोऽसावाधिदैविकः । पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः । तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये । भिन्नभिन्नवाक्ये परस्परं सम्बध्य यथा - असौ पुष्परथश्चक्रयानं न समराय तत् - अमरे ।

५. यत् = जो जुन - जो । इदम् = यो, यी, यिनी - यह । यच्छब्दो निर्देशनार्थकोऽनिश्चयार्थकश्च ज्ञेयः । अनयोः प्रयोगोऽनुलोमेन चिन्तनीयः - योऽयम् । याविमौ । ये इमाः - पुं। या इयम् । ये इमे । याः इमाः - स्त्री.। यत् इदम् । ये इमे । यानि इमानि - क्लीबे । योऽयं योगस्त्वया प्रोक्तः । योऽयमात्मा सर्वेषु प्राणिषु विद्यते । योऽयं धत्ते विषयकरिणीम् । योऽयं कालस्तेऽव्यक्तबन्धः । येयममावास्या आगामिनी तस्यामग्नीनाधास्ये । योऽयं पुरुषोऽतीव सुन्दरः । येयं नारी अतीव सुन्दरी । योऽयमध्वा पाटलीपुत्राद्गन्तव्यः । तमहं जाने । योऽयमाध्यात्मिकः पुरुषः । योऽयमात्मा स्वयं ज्योतिः पञ्चकोशविलक्षणः । येयं पौर्णमास्यतिक्रान्ता । तस्यामग्नीनाधित । योऽयं माघ आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे ।

६. यत् = ५-४-५ द्रष्टव्यः । किम् = के, को, कुन्, कुनै - कौन क्यों । उभौ अनिश्चयार्थको बोध्यौ । यः कः । यौ कौ । ये के-पुं.। या का । ये के । याः काः - स्त्री.। यत् किम् । ये के । यानि कानि - क्लीबे । यः कोऽपि नरो गृहं याति । यौ कौ नरौ गृहे स्तः । ये के नराः फलानि खादन्ति । या का नारी गृहे वर्तते । ये के नार्यौ अत्रैव स्तः । याः का नार्योऽत्र सन्ति । यत्किं फलं लभ्यते चेदमहं

खादामि । मया ये के फले लभ्येते । यानि कानि फलानि सर्वैःकाम्यन्ते । यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥ द्वितीयादिषु विभक्तिषु तु एवंप्रकारेण प्रयोगः - यं कं जनमित्यादि । येन केन पात्रेणेत्यादि । येन केनाप्युपायेन धर्मं कुर्यात्सदा नरः ।

७. यत् - एतत् = यदोऽस्यार्थः -५-४-५ द्रष्टव्यः । एतद्अस्यार्थः ५-४-३ द्रष्टव्यः । यः एषः । यौ एतौ । ये एते-पुं.। या एषा । ये एते । याः एताः - स्त्री.। यत् एतत् । ये एते । यानि एतानि - क्लीबे । एते सत्पुरुषाः परार्थघटकाः स्वार्थन्परित्यज्य ये ।

अभ्यासार्थं संग्रहः

कश्चन पुरुषः किमप्यनुक्त्वा कुत्रचिदगच्छत् । क्वचिदपि देशे कोऽपि जनः काञ्चन विद्यामधीत्य कमपि प्रतिष्ठां लब्धुं (प्राप्तुं) शक्नोति । तत्र तत्र वनोद्देशे महौषधीरन्वेषय । यथा तथा कार्यं सम्पादयितुं (समाधातुम्) यं कमप्युपायं समाचार । येन केनाप्युपायेन वित्तं नित्यमुपार्जयेत् । यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया । यस्य कस्य तरोर्मूलं येन केनापि पोषयेत् ॥ यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति । कस्मैचन प्रदातव्यं ब्राह्मणाय धनं त्वया ।

८. यत्-अदस् = अनयोरर्थोऽग्रे गतः । अनयोः प्रयोगः पूर्वापरवाक्यस्य सम्वन्धानुसारं क्वचित्सहैव कुत्रचित्पृथगपृग्वाक्येऽपि प्रयुज्येते - योऽसौ । यौ अमू । ये अमीः - पुं.। यानि अमूनि क्लीबे. । कवित्वादेर्गर्वं परिहरति योऽसौ विजयिनः । स्वयंप्रकाशचिद्रूपो योऽसावर्कादिभाषकः । योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः । याऽसौ राजकन्या करेणुमारूढा तत्रोत्सवे दृष्टा । असौ यस्ताम्रः । असौ योऽवसर्पति । असौ यः पन्थाः । उभयोर्वाक्ययोः सम्बन्धेन पृथग्पृथगप्रयोग - यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ । उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हत इत्यमरः ॥

यद्-अन्यद् = योऽन्यः । यावन्यौ । येऽन्ये । योऽन्यो ना । यावन्यौ नरौ । येऽन्ये नरः । यान्या नारी । येऽन्ये नार्यौ । या अन्या नार्यः । यदन्यत्फलम् । येऽन्ये फले । यानि अन्यानि फलानि ।

९. इदम् अदस् एतत् वा - किम् - एषामर्थः पूर्वं गतः - क) इदम्-किम् = अयं कः, कोऽयम् । इमौ कौ, कौ इमौ । इमे के,के इमे- पुं.। ख) इयं का,का इयम् । इमे के, काः इमाः - इमाः काः - स्त्री. । इदं किम् किमिदम् । के इमे इमे के । इमानि कानि, कानि इमानि - क्लीबे । अयं कः पुरुषः, कोऽयं पुरुषः । इमौ कौ पुरुषौ , कौ इमौ पुरुषौ । इमे के पुरुषाः , के इमे पुरुषाः - पुं.। इयं का नारी, का इयं नारी । इमे के नार्यौ , के इमे नार्यौ । इमाः काः नार्यः, काः इमाः नार्य - स्त्री. । इदं किं फलम्, किमिदं फलम् । इमे के फले , के इमे फले । इमानि कानि फलानि, कानि इमानि फलानि - क्लीबे । उभयोरन्तराले नामवाचकशब्दं प्रयुज्य - अयं पुरुषः कः । इमौ पुरुषौ कौ । इमे पुरुषाः के । इयं नारी का । इमे नर्यौ के । इमाः नार्यः काः । किमिदं फलम् । के इमे फले । कानि इमानि फलानि । ग) एषः कः क एषः । एतौ कौ कौ एतौ । एते के के एते । स्त्रीनपुंसकयोरपि एवमेव प्रयोगश्चिन्त्यः ।

ख) अदस्-किम् = असौ कः , कोऽसौ अमू कौ,कौ अमू । अमी के,के अमी - पुं.। असौ का-का असौ । अमू के)के अमू । अमूः का-का अमूः - स्त्री. । अदः किम्-किम् अदः । अमू के,के अमू । अमूनि कानि,कानि अमूनि - क्लीबे । असौ को नरः । अमू कौ नरौ । अमी के नराः । असौ का नारी । अमू के नार्यौ । अमूः काः नार्यः । अदः किं फलम् । अमू के फले । अमूनि कानि फलानि ।

ग) एतत्-किम् = एषः कः , कः एषः । एतौ कौ,कौ एतौ । एते के,के एते - पुं.। एषा का,का एषा । एते के,के एते । एताः का,काः एताः - स्त्री. । एतत् किम्,किम् एतत् । एते के ,के एते । एतानि कानि,कानि एतानि - क्लीबे । उभयोरन्तराले नामवाचकशब्दस्य प्रयोग उपरि प्रोक्तवद्विधेयः ।

१०. तद् युष्मद् अस्मद् भवत् एभिः सह किंशब्दस्य यथावसरमनुलोमेन विलोमेन वा प्रयोगः - क) सः कः, तौ कौ । ते के । त्वं कः । युवां कौ । यूयं के - पुं.। सा का, ते के, ताः काः । त्वं का,

युवां के, यूयं काः । अहं का, आवां के, वयं काः - स्त्री. । तत्किम्, ते के, तानि कानि-क्लीबे । भवान्कः , को भवान् । भवन्तौ कौ,कौ भवन्तौ । भवन्तः के,के भवन्तः - पुं.। भवती का,का भवती । भवत्यौ के,के भवत्यौ । भवत्यः काः , काः भवत्यः - स्त्री.।

११. यत् एतत् भवत् एभिः संह सर्वशब्दः - यः सर्वः । ये सर्वे - पुं.। या सर्वा, याः सर्वाः - स्त्री.। यत्सर्वम्, यानि सर्वाणि - क्लीबे । एषः सर्वः एते सर्वे - पुं.। एषा सर्वा । एताः सर्वाः - स्त्री. । एतत्सर्वम् एतानि सर्वाणि - क्लीबे । भवान्सर्वः । भवन्त सर्वे । भवती सर्वा । भवत्यः सर्वाः ।

१२. सर्वादिशब्दा विशेषणानि सन्ति । यतो व्यक्तिवाचकस्य जातिवाचकस्य समुदायवाचकस्य परिणामवाचकस्य भाववाचकस्य च शब्दानां पुंस्त्रीनपुंसकलिङ्गानुसारं यानि रूपाणि भवन्ति । तदनुसारं सर्वादिशब्दानां रूपाणि प्रयुज्यन्ते - सः नरः । तौ नरौ । ते नराः । सा नारी । ते नार्यौ । ताः नार्यः । तद्गृहम् । ते गृहे । तानि गृहानि । यः जनः । यौ जनौ । ये जनाः । या देवी । ये देव्यौ । याः देव्यः । यत्फलम् ये फले । यानि फलानि । एष मानवः । एतौ मानवौ । एते मानवाः । एषा माता । एते मातरौ । एताः मातरः । अयं पुरुषः । इमौ पुरुषौ । इमे पुरुषाः । इयं गङ्गा । इमे गङ्गे । इमाः गङ्गाः । इदं पुष्पम् । इमे पुष्पे । इमानि पुष्पणि । असौ ना । अमू नरौ । अमी नरः । असौ लक्ष्मीः । अमू लक्ष्म्यौ । अमूः लक्ष्म्यः । अदः धनम् । अमू धने । अमूनि धनानि । एके आचार्याः । एको जनः । एका नारी । एकं वचनम् । द्वौ नरौ । द्वे नार्यौ । द्वे फले । इत्यादि । सर्वो जनः । सर्वे जनाः । सर्वो गुणः । सर्वे गुणाः । सर्वो लोकः (संसारः) । सर्वे लोकाः । सर्व नारी । सर्वाः नार्यः । सर्वा नदी । सर्वाः नद्यः । सर्वम् जगत् । सर्वाणि जगन्ति । सर्व फलम् । सर्वाणि फलानि । सर्वं कर्म । सर्वाणि कर्माणि । सर्वं तीर्थम् । सर्वाणि तीर्थानि । सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत् । अस्मिन्वने एकः सन्यासी अस्ति । तस्मिन्वने एकः सिंह आसीत् । पुराऽत्र एका नदी आसीत् ।

१३. यच्छब्दस्य तद्युष्मदस्मच्छब्दैः सह प्रयोगः - यस्त्वम् । यौ युवाम् । ये यूयम् । योऽहम् । यावावाम् । ये वयम् - पुं.। या सा । ये ते । या ताः । यस्त्वम् । ये युवाम् । याः यूयम् । याऽहम् । ये आवाम् । याः वयम् - स्त्री. । यत्तदोस्तु प्रयोगः पूर्वमेव दर्शितः । तत्रैव द्रष्टव्यः - क्लीबे । अनयोर्द्वितीयादिषु विभक्तिषु वचनेषु च प्रयोगः समाधेयः ।

१४. तद्युष्मदस्मदादिशब्दानां प्रथमाया एकैकं पदं द्विरावृत्यान्ते मध्ये चैवपदस्य प्रयोगः - स स एव । तौ तावेव । ते ते एव । त्वं त्वमेव । युवां युवामेव । यूयं यूयमेव । अहमहमेव । आवामावामेव । वयं वयमेव - एवमन्ते प्रयुक्तो दर्शितः । स मध्ये प्रयोगं कृत्वा- स एव सः । तावेव तौ । ते एव ते । स एव त्वम् । तावेव युवाम् । ते एव यूयम् । स एवाहम् । तावेव आवाम् । ते एव वयम् । एवमन्येऽपि - स एवायं नागः ।

१५. क्वचित्तत्, इदम् एतद् अदस् भवत् एतत्पूर्वका अन्य अपर इतर एते शब्दा विशेषणरूपे प्रयुज्यन्ते - सोऽन्य इतरोऽपरो वा जनः । अयमन्योऽपर इतरो वा बालः । एषोऽन्योऽपर इतरो वा देवः । साऽन्या इतराऽपरा वा देवी । इयमन्या इतराऽपरा वा नारी । तदन्यदितरमपरं वा फलम् । इदमन्यदपरमितरं वा गृहम् । एतदन्यपदपरमितरं वा धनम् । एषाऽपरा इतराऽन्या वा कन्या । भवान् अन्योऽपर इतरो वा मन्यते । इत्यादि ।

१६. एतद् अस्मच्छब्दयोः सहैव प्रयोगः - एषोऽहं तव पृष्टमारूढः । एतौ आवां तव मेतुश्चक्रिकामारूढौ । एते वयं भवतो मृत्तरण(मट्टर)मारूढाः ।

५-५ उद्दिश्यमानप्रतिनिर्दिश्यमानयोर्निर्देशः

उद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण (क्रमेण) तल्लिङ्गमुपाददते - महाभाष्ये - १।१।१ पस्पशाह्निके प्रदीपटीकायाम् । तत्रैवोद्द्योतटीकायां सिद्धवत्कीर्तनमुद्देशः । अनुपाद्यतया विधेयतया च कीर्तनं प्रतिनिर्देश इत्युक्तमस्ति ।

विशेषः - ययोर्वाक्ययोर्द्वौ कर्तारौ परस्परं सम्बध्नीतः । तयोर्वाक्ययोर्मध्ये पूर्वस्मिन्वाक्ये यत्पुँल्लिङ्गं स्त्रीलिङ्गं नपुंसकलिङ्गं वोद्देश्यं पदं प्रयुज्यते तदुद्दिश्यमानं प्रोच्यते । ततोऽपरस्मिन् पूर्वस्य वाक्यस्य संबन्धिनः पुँल्लिङ्गस्य स्त्रीलिङ्गस्य नपुंसकलिङ्गस्य वा यन्नामपदं प्रयुज्यते तत्प्रतिनिर्दिश्यमानं पदं प्रोच्यते । अनयोरुद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वं सर्वनामान्यापादयन्ति । यतोऽपरस्मिन्वाक्ये प्रयुक्तस्य प्रतिनिर्दिश्यमानस्य पदस्य यत्सर्वनामपदं भवति तत्पर्यायेण पूर्वस्मिन्वाक्ये प्रयुक्तस्योद्दिश्यमानपदस्यानुसारं भवति "पर्यायेण लिङ्गमुपाददते" इत्युक्तत्वात् । अत्र "तल्लिङ्गमित्यस्य तयोर्लिङ्गमिति व्युत्पत्तिः क्रियते । अत्र तयोरिति पदेन उद्दिश्यमानप्रतिनिर्दिश्यमाने पदे गृह्येते । यथोदाहरणम् -

क) यत्तत्सास्नालाङ्गुलककुदखुरविषाण्यर्थरूपं स शब्दः इत्यत्र यत्तत्सास्ना ... अर्थरूपमित्युद्दिश्यमानं स शब्द इति प्रतिनिर्दिश्यमानं च द्वे पदे स्तः । अत्रानयोरुद्दिश्यमानप्रतिनिदिश्यमानयोरेकत्वस्याऽऽपादनाय कामाचारतः स शब्द इत्यत्र तच्छब्दस्य स इति पुँल्लिङ्गशब्देन निर्देशः क्रियते । नियमे पर्यायेणोक्तत्वात् अर्थरूपमिति पदानुरूपं तदिति शब्दोऽपि प्रयुज्यते । ततस्तच्छब्दोऽपि भवति । एवं यदसौ भक्तबीजबलीवर्दैः प्रतिविधानं करोति कृष्यर्थः ।

ख) उष्णत्वमन्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्येत्यत्र शैत्यमित्युद्दिश्यमानं प्रकृतिरिति प्रतिनिर्दिश्यमानं च पदे स्त । अनयोरेकत्वस्याऽऽपादनाय कामाचरतः सा प्रकृतिरित्यत्रं तच्छब्दस्य सा इति स्त्रीलिङ्गीशब्देन निर्देशः क्रियते । नियमे पर्यायेण उक्तत्वात् शैत्यमिति पदानुरुपं तदिति शब्दोऽपि प्रयुज्यते । तत्प्रकृतिरपि भवति ।

ग) क्रियेत चेत्साधु विभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमा विधेया इत्यत्र विभक्तिचिन्ता इत्युद्दिशयमानं सा प्रथमा व्यक्तिरिति प्रतिनिर्दिश्यमानं च द्वे पदे विद्येते । अनयोरेकत्वस्याऽऽपादनाय कामचारतः सा प्रथमा व्यक्तिरित्यत्र तच्छब्दस्य सा इति स्त्रीलिङ्गशब्दत्वात् "पर्यायेण" तल्लिङ्गमुपाददते इति नियमो नापेक्ष्यते ।

एवं सर्वत्र प्रयोगाश्चिन्त्याः - अव्ययं समर्थेन सह नित्यं सम्यस्यते सोऽव्ययीभावः । य एषोऽन्वाहार्य उक्तः दर्शपूर्णमासयोः सा दक्षिणा भवति । योऽस्माकं हृदयतन्त्रं मुखरयते सा कला । सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा । स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । असौ पुष्परथश्चक्रयानं न समराय तत् ।

५-६ अव्ययानां प्रयोगः

अव्ययस्य स्वरूपज्ञानार्थं "सदृशं त्रिषु लिङ्गेषु" इति श्लोकः स्मरणीयः । अव्ययं वाक्यं सुन्दरं रोचकं विदधाति । यतोऽस्य प्रयोगज्ञानमप्यावश्यकमनुभूयते । १. इति हेतुप्रकरणप्रकाशादिसमाप्तिषु ॥ एतेष्वर्थेषु इतिशब्दः प्रयुज्यते । इतिपेदन सम्बद्धः शब्द उक्तो भवति । तत उक्तो जातः स शब्द इतिपदेन सह प्रथमान्तो भूत्वा तिष्ठति ।

१-क) हेत्व(कारणा)र्थे इति - त्वं नागत इत्यहमागमम्, आगतः, आवामागमाव आगतौ आगतवन्तौ, वयमागमाम, आगताः आगतवन्तो वा । स व्यायामं करोतीति भीतिस्तस्य न रोगतः । स नावोचदित्यहमवोचम् उक्तवान्, आवामवोचाव उक्तवन्तौ, वयमवोचाम उक्तवन्तो वा ।

१-ख) प्रकार(भेदा)र्थे इति - सत्वं रजस्तम इति गुणाः शास्त्रेषु वर्णिताः । सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः । सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः । सत्वं रजस्तम इति गुणा जीवस्य नैव मे । तमो रजः सत्वमिति प्रकृतेरभवन्गुणाः । सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः । सत्वं रजस्तम इति भवतः प्रकृतेगुणाः ।

१-ग) प्रकाशार्थे इति - धर्मात्स्वर्गं प्रयातीति भगवान्बादरायणः । षड् भावविकाराः सन्तीति वार्ष्यायणिर्ब्रूते । स गृहं गच्छतीति स वदति (अभिदधाति ब्रूते ब्रवीति अभिधत्ते व्याहरति भाषते) । तौ नगरं यात इति तौ वदतः (ब्रूतः अभिधत्तः व्याहरतः भाषेते) । ते ग्रामं यान्तीति रामो भाषते । अहं विद्यालयं यामीति स गदति । आवां नदीं याव इति तौ गदतः । वयं विदेशं याम इति तेऽवदन् अब्रुवन्वा । स वेदं पठतीति गुरुर्वदति । ते कार्याणि कुर्वन्तीति श्यामोऽब्रवीत् । समासः सर्वेषां भवतीति न नियमः । त्वमेव राजा धर्मज्ञ इति वसिष्ठो रामं वचोऽब्रवीत् । रामस्य मार्तुनाम कौशल्येति पितुश्च नाम दशरथ इति विद्यते । कृष्णस्य पितुर्नाम वसुदेव इति मातुश्च नाम देवकीतिः प्रोच्यते । गणेशस्य पितुर्नाम शिव इति मातुश्च पार्वतीति ज्ञेयम् । तत्रैकस्या जातेर्नाम हित्तिरिति अपरस्या च मित्तानीत्यासीत् । पिङ्गलाचार्यः यदा बभूवेति निश्चयपूर्वकं वक्तुं न शक्यते । हे भगवन् ! ॐ नमः शिवाय इति मन्त्रेण गन्धाक्षतपुष्पाणि धूपं दीपं नैवद्यं च तुभ्यं समर्पयामि (ददामि प्रयच्छामि) । मित्रस्य त्वेति मन्त्रेण मधुपर्कं प्रतीक्षेत । देवस्य त्वेति मन्त्रेण मधुपर्कपात्रं गृह्णीयात् । गन्धद्वारां दुराधर्षामिति मन्त्रेण देवाय गन्धं प्रक्षिपेत् (अर्पयेत्) । नाभ्याऽआसीदिति मन्त्रेण भगवते देव्यै वा नैवेद्यं समर्पयेत् । शूर्पाग्निहोत्रहवणी स्फ्यः कपालानि कृष्णाजिनं शम्या उलूखलमुसले दृषद् उपलमिति सर्वाणि यज्ञपात्राणि ज्ञेयानि । सत्सङ्गतिः कथय किं न करोति पुंसामिति सत्यम् । कार्यकारणसम्बन्धो भगवति चतुर्विधः - असतः सत उत्पातिरिति बौद्धाः, सतः सदुत्पत्तिरिति साङ्ख्यशास्त्रिणः, सतः सत्कार्योत्पत्तिरिति विवर्तवादिनो वेदान्तिनः, सतः उत्पत्तेः प्रागसत्कार्यस्योत्पत्तिर्भवतीति न्यायशास्त्रिणः आरम्भवादिनश्चाचक्षते । विष्णुर्नारायणो माधव इति कृष्णस्य शम्भुर्महेशः पशुपतिरिति शिवस्य च नामानि सन्ति तानि स्मरणीयानि च । अस्माभिर्यदि कर्ता न वाच्यः स्यात् देवदत्तेन पचतीति प्रयोगः स्यात् । वर्णाश्रमधर्मव्यवस्थायां ब्राह्मणस्य वेदाध्ययनादीनि षट् कर्माणि प्रोक्तानि सन्तीति चर्चा शास्त्रेषु सर्वत्र कृता प्राप्यते । अङ्गमित्येतस्य पदस्य व्युत्पत्तिः अङ्ग्यते ज्ञायतेऽनेनेति अङ्ग इत्येषाऽस्ति । तदनन्तरं स महाराजाधिराज इति समुन्नतां पदवीं समलञ्चकार । ते कार्यं कुर्वन्त्विति अहमिच्छामि ममेच्छास्ति वा । स ओदनं भुञ्जीतेति आज्ञापयति । पतिवत्नीत्यत्र तु वत्वं निपात्यते । अनृतं सत्यमित्याहुः सत्यं चापि तथाऽनृतम् । इति यास्ताः कथं धीरैः संरक्ष्याःपुरुषैरिह ॥ अयं निजः परो वेति गणना लघु चेतसाम् । उदारचरितानां तु वसुधैवकुटुम्बकम् ॥ तपः शौचं दया सत्यमिति पादाः कृते कृताः । विद्या दानं तपः सत्यं धर्मस्येति पदानि च । भूतानि कालः पचतीति वार्ता । शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम् । मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः । गुणस्य मायामूलत्वात् न मे मोक्षो न बन्धनम् ॥ सूर्योऽग्निः खं मरुद्गावः सोमः सन्ध्याहनी दिशः । कुश्च कालो धर्म इति ह्येते दैह्यस्य साक्षिणः ॥

❁ गगनादवतरन्तं तं नारद इति सोऽबोधि । तं केचित्कपिल इति अपरे लोमश इति इतरे जैगिषव्य इति अन्ये मार्कण्डेय इति विश्वसन्ति स्म । तं समाम्नायं निघण्टव इत्याचक्षते आचार्याः । इदं कार्यं भवान्कुर्यादिति मेऽभिप्रायः । सर्वे मिलित्वा कार्यं कुर्युरिति मे मतम्, मे मतिर्वा । अभ्यासं विना विद्या नायातीति मे निश्चयः । स सम्यगस्तीति मे मनीषा विचारो वा । क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यम् ।

❁ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ शाकम्भरीति विख्यातिं तदा यस्यामहं भुवि । तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् । दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥ यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैय्यायिकाः । अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥ तं विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति । विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ॥ प्रातर्वदामि ललिते तव

पुण्यनाम कामेश्वरीति कमलेति महेश्वरीति । श्रीशाम्भवीति जगतां जननी परेति, वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥

✡ स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते । स्वात्मतत्वानुसन्धानं भक्तिरित्यपरे जगुः ॥ इदं शरीरं कौन्तेय क्षेत्रमित्यमिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ यस्तु कर्मफलत्यागी स त्यागीत्यमिधीयते । यदा विनियतं चित्तमात्मन्येवावतिष्ठते । निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । यज्ञे तपसि दाने च स्थिति सदिति चोच्यते । कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ या देवी सर्वभूतेषु चेतनेत्यभिधीयते । नमस्तस्यै ३ नमो नमः ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता । नमस्तस्यै ३ नमो नमः ।

🡅 इदं यातं भुक्तमिदमिति प्रत्यभिजानतीम् । राम आं मैथिलीत्यूचे जानकीं पुष्पके स्थितः ॥ इदं यातं भुक्तमिति जानतीं जानकीं प्रति । राम एवं मैथिलीति प्रोचे पुष्पकमास्थितः ॥

✷ अपरं भवतो जन्म परं जन्म विवस्वतः । कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ । उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥

🡑 सोऽयमन्यः, अयमपरः, अयमितरो वेति मन्यते । अहमग्रमपर इति मन्ये । वयं स स्वार्थीति मन्यामहे । स स्वयं विद्वानस्मीति मन्यते ।

१-घ) एवमर्थे इति = यस्तो यसो - ऐसा यह = असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे। अहमपि वनं गच्छामीत्युक्त्वा लक्ष्मणो राममन्वगच्छत् । सा सुभग ! एवं क्रियतामित्युक्त्वाऽशेषं वित्तं तस्मै समर्पयामास । यत्त्वयाऽहं नात्रविषये प्रतिषेधनीय इत्युक्त्वा तेन सह शुष्ककलहं कर्तुं स(राजहंसः) आरब्धः । हन्त ! नानायि मत्सूनुरित्युक्त्वा विरराम सः । रामाभिधानो हरिरित्युवाच। एवमुक्त्वा ऋषिकेशं गुडाकेशः परन्तपः । न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ननाम भ्रातरं सद्यो गोकर्णमिति चाब्रवीत् । स इति सम्यग्विचार्य तत्सकाशं च जगाम । इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ । इति श्रीमद्दाशरथिप्रथिताचारवर्णनम् । निशम्येति वचः शुंभः स तदा चण्डमुण्डयोः । कातरा इति जल्पन्ति यद्भाव्यं तद्भविष्यति । युष्मत्पुत्र इति ब्रवीति । अस्मत्पुत्र इति ब्रूते । सा इति गायति । रमा इति भाषते । तच्छ्रुत्वा दूरतः सूर्यः स्पष्टमित्यभ्यभाषत । इत्युवाच तवाग्रतः । इति युष्मत्पुत्रो ब्रवीति । इत्यस्मत्पुत्रो ब्रवीति ।

ङ) समाप्तौ (अवसाने) इति - इति .... प्रथमोऽध्यायः । इति .... द्वितीयोऽध्यायः । इति .... प्रथमखण्डः । इति ... द्वितीयखण्डः । इति प्रथममुण्डकं समाप्तम् । इति माण्डूक्योपनिषत्समाप्ता। इति प्रथमा कण्डिका । इति प्रथमः सर्गः । इति प्रथमोऽङ्कः । इति प्रथमः स्तवकः । इति प्रथम उल्लासः। इति प्रथमो निश्वासः इत्यादि ।

च) यत्र द्वे द्वाभ्यामधिकानि विशेषणानि चकारसहितेन प्रकाश्यन्ते इतिपदेन । तत्र विशेष्यं क्वचिदेकवचनं क्वचिद् बहुवचनमपि भवति - शब्दस्त्रिधा - वाचको लक्षको व्यञ्जकश्चेति । तेषामर्थोपि त्रिविधः - वाच्यो लक्ष्यो व्यङ्गचश्चेति । शब्दस्य तिस्रःशक्तयः - अभिधा लक्षणा व्यञ्जना चेति । भावना द्विविधा - शब्दी आर्थी चेति ।

छ) प्रकाशार्थे इतिपदेन एकं वाक्यं समुच्चीय पुनः समुचिताद्वाक्यात्परस्य वाक्यान्तरे इति - देवी हे महिषासुर ! मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवता इत्युवाचेति मार्कण्डेयः सुरथमब्रवीत्। मितां ह्रस्व इति सूत्रे वा चित्तविरागे वेत्युनवर्त्य व्यवस्थित-विभाषाश्रयणादिति वृत्तिकृत् ।

ज) शतृशानच्प्रत्ययान्तपदात्पूर्वे इति - तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः । वने सिंहव्याघ्रपुरःसराः श्वापदाः स्वामिन् ! प्रभो ! समादिश इति वदन्तः शृगालं परिवव्रुः । अतस्त्वां संयाचे

जननि जननं यातु मम वै । भृडानी रुद्राणी शिव शिव भवानीति जपतः । स मां रक्ष रक्षेति वदन् भगवन्तं भगवतीं वा शरणं प्राप्तः । तिष्ठ निष्ठेति भाषन्तो देवीमन्ये महासुराः । कथं मया तस्यं भाण्डपतेः प्रसादहानिः कर्तव्या इति चिन्तयन्नास्ते गोरम्भः । शृगालोऽयमिति मन्यमानेन स्वामिना ममोपरि यदवज्ञा क्रियते तदप्ययुक्तम् । अवितथाश्रयेण धनोपचयो लोकख्यातिश्चेति मन्वाना नरा अनृतमाश्रयन्ते । अथ ते विश्वासमापन्ना तात ! मातुल ! भ्रातः ! अहंपूर्वमहंपूर्वमिति ब्रुवाणास्तस्य वकस्य समन्तात्परितस्थुः । यस्यास्ति सर्वत्र गतिः स कस्मात्स्वेदशरागेण हि याति नाशम् । तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं का पुरुषाः पिबन्ति ॥ रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् । नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥ शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥ भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाऽऽविरासीत् । श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ॥ ये दैवं देवमिति रटन्तो भाग्यमवलम्ब्य कर्मविमुखा(कर्मपराङ्मुखाः) भवन्ति ते संसारे कापुरुषा. इति कथ्यन्ते ।

झ) क्त्वाप्रत्ययान्तपदात्पूर्वे इति - कोऽपि जगत् विपरिणामि नश्वरमशाश्वतमिति मत्वा रामं कृष्णं च संस्मरेत् जपेत् सेवेत वा । स्वामिन् ! मृतोऽसौ सञ्जीवकोऽस्माभिस्तु सार्थवाहकस्याभीष्ट इति मत्वा वह्निना संस्कृतः ।

ञ) क्त्वः स्थाने ल्यप्प्रत्ययेन निष्पन्नपदात्पूर्वे इतिः - भिषङ्ममास्तीति विचिन्त्य भक्षयेदकारणात्को हि विचक्षणो विषम् । भो कान्त ! बालकोऽयमिति विचिन्त्य त्वया स न हतः । केवलमस्या वित्तमादाय गच्छामीति निश्चित्य स धूर्तस्तामुवाच । जगत् विपरिणामि नश्वरमशाश्वतं चेति अवधार्य संसारो मिथ्या प्रोच्यते । चत्वारो ब्राह्मणाः कुत्रचिदर्थाय गच्छाम इति संमन्त्र्य स्वदेशं पुरं ग्रामं सुहृत्सहितं गृहं च परित्यज्य विदेशे प्रस्थिताः । केचनानृतमेव जीवनोपयोगीति आकलय्य अनृतोपायेन जीविकोपार्जनं विदधते (कुर्वते) । यदि दूरङ्गतः कृष्णो वनशोभेक्षणाय तम् । अहंपूर्वमहंपूर्वमिति संस्पृश्य रेमिरे ॥ मा भैष्टेति गिराऽऽश्वास्य वृषासुरमुपाह्वयत् ।

२. नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने । १. प्रसिद्धेऽर्थे [1] स्थितान्नामशब्दात्पूर्वे संज्ञावाचकशब्दो नामशब्दात्परे जातिवाचकशब्दश्च प्रयुज्येते - माधवो नाम विप्रः(ब्राह्मणः) चूणमणिर्नाम क्षत्रियः । सागरदत्तो नाम वणिक् । श्यामो नाम ब्रह्मचारी । कृष्णो नाम गृहस्थः । चूडाकर्णो नाम परिव्राजकः (सन्न्यासी) । लघुपतनको नाम वायसः । हिरण्यको नाम मूषकः । सुदर्शनो नाम राजा । हिमालयो नाम नगाधिराजः । रुमण्वान् नाम कच्छपः । महातपो नाम मुनिः (ऋषिः) । सुमतिर्नाम सचिवः । मदोत्कटो नाम सिंहः । सञ्जीवको नाम वृषभः । करटको नाम शृगालः । शिवो नाम वानप्रस्थः । विष्णुबहादुरो नाम श्रेष्ठः - पुंसि । चम्पकवती नाम अरण्यानि । सुवर्णवती नाम नगरी । नर्मण्वती नाम नदी । सीता नाम ब्राह्मणी - स्त्रियाम् । वर्धमानो नाम नगरम् । महीलारोप्यं नाम नगरम् । कान्तिपुरं नाम नगरम् - क्लीबे । जातिनामवाचकशब्दयोरसमानलिङ्गशब्देऽपि- अथातः प्रारभ्यते मित्रप्राप्तिर्नाम प्रथमं तन्त्रम् । अथेदमारभ्यते मित्रप्राप्तिर्नाम द्वितीयं तन्त्रम् । अथेदमारभ्यते लब्धप्रणाशं नाम चतुर्थं तन्त्रम् । २. संभाव्ये (उमेद - संभावनायाम्) - युद्धं संपत्स्यते नाम । रामो गच्छति नाम । श्यामः खादति नाम । करोतु नाम नीतिज्ञो व्यवसायमितस्ततः । फलं पुनस्तदेवास्य यद्विधेर्मनसि स्थितम् ॥ ३. क्रोधपूर्वकं स्वीकारः - हन्तु नाम भटान्दुष्टोऽसन्निकृष्टे मयि स्थिते । ४. क्रोधे - ममापि नाम रिपवो दिग्दन्तबलमर्दिनः । ममापिं नाम परैः परिभवः । ५. निन्दायाम् - धार्मिकान्वशमानेतुं धनं नाम प्रदित्सति । ६. अभ्युपगमे (स्वीकारे) - एवमस्तु नाम । ७. आश्चर्ये - अन्धो नाम पर्वतमारोहति ।

---

[1] प्राकाश्ये=प्रसिद्धेऽर्थे इतिशब्दः पूर्वमुल्लिखितः । अत्रास्मिन्नेवार्थे नामशब्दः ।

३. आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥ ईषद् = अलिकति - थोडा = ओष्णं दुग्धमिदं सद्योदुग्धं प्रपिब धैनवम् । अभिव्याप्तौ = आकुम्भकारं कवयो भोजे शासति भूतलम् । सीमनि = मर्यादायाम् = आलोकालोकपूर्वार्धं प्रसरन्ति रवेः कराः । धातुयोगजे = आगच्छ शीतलं स्वच्छं मधुरं जलमाहर ॥

४. आ प्रगृह्यः स्मृतौ वाक्ये - स्मरणे - आ एवं किल तत् = निश्चयेनैतादृशमेव तदासीदित्यर्थः । आ एवं किल तत् हन्त ! स्मृतिशक्तिर्हता मम । वाक्यपूरणे = आ एवं नु मन्यसे - आ अवश्यमेव त्वमेवम् (उक्तप्रकारेण) मन्यसे इत्यर्थः । आ एवं नु मन्यसे त्वं शृणु तावत्मतं मम ।

५.(अ)ऽप्यास्तु स्यात्कोपपीडयोः । आः = क्रोधे = आः परित्यज्य पठनं निष्क्रान्तोऽसि मठाच्छठ ॥ पीडायाम् = आः शिरो बाधतेऽत्यर्थं नाधुनाऽध्येतुमुत्सहे । उभयार्थे = आः कथमद्यापि राक्षसत्रासः ।

६. पापकुत्सेषदर्थे कु - कुकर्म कृत्वा कुगतिं लभते कुमतिर्जनः ।

७. धिङ् निर्भर्त्सननिन्दयोः ॥ निर्भर्त्सनम्-हप्काउनु-लानत = धिग् दस्यो ! तिष्ठ हन्मि त्वामुपलब्धोऽसि क्रोशगः । निन्दायाम् = धिग् त्वां बलीयानपि सन् दु(नि)र्बलानेव बाधसे । मूर्ख ! त्वां धिक् ।

८. चान्वाचय-समाहारे-तरेतर-समुच्चये । १. अन्यतरस्यानुषङ्गिकत्वेनान्वाचयः - भिक्षामट गां चानय । याहि स्नानादिकृत्याय गत्वाभ्यर्चय भैरवम् । शाकानि च समादाय पथ्यान्यायाहि पण्डित । २. समाहारः = समूहः = आराधनाय जगतां जहत् जनकनन्दिनीम् । जहौ दयां च स्नेहं च सौख्यं च रघुनन्दनः - असमस्तसमाहारः । आराधनाय जगतां जहत् जनकनन्दिनीम् । जहौ दयास्नेहसौख्यं युगपद्रघुनन्दनः - समस्तसमाहारः । मिलितान्वय इतरेतरयोगः = धवश्च खदिरश्च छेद्यः - धवखदिरौ च छेद्यौ । अन्तरायैरर्दितनां स्मरतां भक्तिभावतः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ ३. परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः - सत्यं च धर्मश्च पराक्रमश्च भूतानुकम्पा च सुभाषितं च । द्विजातिदेवातिथिपूजनं च पन्थानमाहुस्त्रिदिवस्य सन्तः ।

९. स्वस्त्याशीः क्षेमपुण्यादौ - आशीर्वादे[1] कुशले[2] पुण्ये[3] मङ्गले[4] च - स्वस्ति[1] स्ताद्भूमिपालाय, स्वस्तिमा[2]न्स्यात्प्रजाजनः । स्वस्तिकृत्[3] पुण्यमाप्नोति, स्वस्ति[4] गायन्ति बालिकाः ।

१०. प्रकर्षे लङ्घनेऽप्यति ॥ प्रकर्षे[1] आधिक्ये[2] (लङ्घने) च = अति[1] देवान्यदुपतिः, [2]अतिवायु नृणां चितः ।

११. स्वित्प्रश्ने च वितर्के च - प्रश्ने = गमिष्यसि स्विदाषढ्यां गुरुपूजनकर्मणे । वितर्के = स्विद्ब्राह्मणोऽसि भो ! भाले भसितेन विभासितः अधः स्विदासीदुपरि स्विदासीत् ।

१२. तु स्याद्भेदेऽवधारणे । भेदे = अयं तु बालोऽपि भवन् चापलं नावलम्बते । अवधारणे = निश्चये = अचापलं तु विद्वत्तानिदानं ब्रुवते बुधाः ।

१३. सकृत् सहैकवारे चा - सकृ(सह)द्गच्छन्ति शिशवः कक्षिविन्यस्तपुस्तकाः । एकावारे - सकृज्जल्पन्ति राजानः सकृत्कन्या प्रदीयते । सकृज्जल्पन्ति ऋषयः सकृज्जल्पन्ति पण्डिताः ।

१४. प्याराद्दूर[1]समी[2]पयोः ॥ आरा[1]द्द्रिरीशश्वशुरो हिमालयगिरीश्वरः । आरा[2]त्स्थितो ब्रूहि शिशो ! स्फुटं न श्रूयते वचः ।

१५. प्रतीच्यां चरमे पश्चात् - पश्चात् = पाश्चिमायां दिशि[1] चरमे[2] = अन्तिमे = अन्तिममा, पछि - अन्तिम में, पीछे = पश्चा[1]दस्तं गतो भास्वान् पश्चा[2]त्प्राप्तोऽसि किं ददे ।

१६. उताप्यर्थविकल्पयोः । अप्यर्थे = प्रश्ने = उत व्रजेत्स एकाकी दिनान्ते गहनं वनम् । विकल्पे = अथवा = निनीषति सहैवायं त्वामुत भ्रातरं तव ।

१७. पुनः[1] सहा[2]र्थयोः शश्वत् - पुनः = पौनः पुन्यम् (वारम्वारः) = शश्वत्स्मृत्वा शङ्करं श्रेयसोऽर्थे शश्वद्यामो द्रष्टुमुत्सृष्टकार्याः ।

१८. साक्षात्प्रत्यक्ष[1]तुल्य[2]योः ॥ साक्षात्कार्यः केशिकंसादिहन्ता साक्षात्कल्पः सोऽयमायाति कालः ।

१९. खेदा[1]नुकम्पा[2]सन्तोष[3]विस्मया[4]मन्त्रणे[5] वत । खेदे = वत (बत) ! स्वानां विपत्पाते मुखं नादर्शयं निजम् । दया = सन्तोषमादत्त वतोज्झितं जनैः पटच्चरं कच्चरमेष दुर्गतः । चिन्ताजर्जरचेतसां वत नृणां का नाम शान्तेः कथा । सन्तोषः = वत पुत्रैश्च पौत्रैश्च सङ्गतोऽस्मि निरामयैः । आश्चर्यम् = वियता वत यान्ति निर्जरा इव पश्याद्य यथेप्सितं नराः । आमन्त्रणम् = वत सखि र कियदेतत्पश्य वित्तं मदीयम् ।

२०. हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥ हर्षे = हन्त ! प्रत्यागतः श्रीमान् श्रीरामः सप्रियानुजः । करुणायाम् = हन्त हन्त निहन्यन्ते दुर्जनैरकृतागसः । हन्त हन्त हन्यतेऽयं तपस्वी दुर्जनैः सदा । वाक्यारम्भे = हन्त ते कथयिष्यामि जानकीनाथ सद्गुणान् । खिन्नतायाम् = हन्त न स्फुरति प्रज्ञा दुर्भिक्षव्याकुला मम ।

२१. प्रति प्रतिनिधौ. इत्यर्धःपङ्क्तेरुदाहरणमपादानकारके प्रतिनिधि. इति सूत्रे कर्मकारके लक्षणेत्थं इति सूत्रे च प्रोक्तम् । तत्रैव द्रष्टव्यम् ।

२२. प्राच्यां[1] पुरस्तात्प्रथमे[2] पुरार्थे[3]ऽग्रत इत्यपि । अपिशब्देन उभयोः शब्दयोरर्थः समानः । पुरस्ता[1]द्भासते भानुः पुरस्ता[2]द्भुञ्जतेऽर्भकाः । मनः पुरस्ता[3]दायन्तं सखायं वीक्ष्य मोदते ॥ अग्रतो[1] भासते भानुरग्रतो[2] भुञ्जतेऽर्भका । मनोऽग्रतः[3] समायान्तं सखायं वीक्ष्य मोदते ॥

२३. यावत्तावच्च साकल्ये[1]ऽवधौ[2]माने [3]ऽवधारणे[4] ॥ साक[1]ल्यं सकलता । अवधिः[2] सीमा । मानं[3] परिमाणम् । अवधा[4]रणं निश्चयः १. यावद्देहि त्वं बुभुक्षावतेऽस्मै तावद्भुञ्जीतायमद्यैव दीनः २. प्राहुः प्राज्ञाः पादप्रांशुप्रबुद्धाः शाखां यावत् मूलदेशात्प्रकाण्डम् ३. तावत्सुवर्णमप्यस्ति यावद्रजतमस्ति मे । ४. इदं तावत्सुरुचिरं वचनं तावकं सखे ! ।

२४. मङ्गला[1]नन्त[2]रारम्भ[3]प्रश्न[4]कात्स्न्र्ये[5]ष्वथो अथ । कात्स्न्र्यं समग्रता । १. अथातो ब्रह्मजिज्ञासा २. अथ प्रजानामधिपः प्रभाते ३. अथ शब्दानुशासनम् ४. अथ वक्तुं समर्थोऽसि ५. अथ धातून्ब्रूमः । अथोशब्दोऽपि अथवत्।

२५. वृथा निरर्थकाविध्योः - निरर्थकाऽर्थहीनो व्यर्थश्च । अविधिर्विधिहीनः = १. अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा २. यथेष्टं फलितुं नेष्टं वृथादानं हि भूर्यपि ।

२६. नानाऽनेकोभयार्थयोः ॥ १. नानाविधानि शास्त्राणि जानानोऽगाधधीरयम् २. ब्रूते नानागुणं वायुं वेदान्ती विद्वदग्रणीः । शब्दस्पर्शवन्तं नानागुणं वायुमहं जाने ।

२७. नु पृच्छायां विकल्पे च - अहं व्रजेयं नु ! भवान्विलोकयेदहिर्नु रज्जुर्नु विलोक्यते पुरः । स्वप्नो नु माया नु मतिर्न बुद्धा (न ज्ञाता) ।

२८. पश्चात्सादृश्ययोरनु । १. प्रजाः प्रीतिगुणाकृष्टाः श्रीराममनुनिर्ययुः । प्रथमं मम भृत्यानां पाशच्छेदं कुरु तदनु (तत्पश्चात्) ममापि । तदनु (तत्पश्चात्) दर्शितस्तेन कूपः - २. स्पृहणीयैरन्वकरोच्छ्रीरामं भरतो गुणैः ।

२९. प्रश्ना[1]वधारणा[2]नुज्ञा[3]नुनया[4]॥ मन्त्रणे[5] ननु ॥ अवधारणा निश्चयः १. विहाय मातरं वृद्धां ननु गच्छसि पुत्रक ! २. इयं त्वया परित्यक्ता वृद्धा संस्थापते ननु ३. खनित्रं पिटकं दात्रं ननु गच्छ समाहर ४. पठ ननु पठ वत्स सत्समाजे वदनमुज्ज्वलय मे मुदं च यच्छ ५. ननु लक्ष्मण वैदेहीं विहाय त्वं समागतः ।

३०. गर्हा[1]समुच्चय[2]प्रश्न[3]शङ्का[4]संभावना[5]स्वपि । गर्हा = निन्दा । समुच्चयः समूहः । १. लशुनमपि विप्रपुत्रोऽपत्रपिष्णुर्भवान् ग्रसते २. इदमिदमपि मनुते संग्रहणीयं गृही सोऽयम् ३. अपि जानासि मां वत्स चिरादद्य समागतम् ४. अपि चोरः समासन्नो भषत्युच्चैः शुनः शिशुः ५. अपि चूर्णीकुर्वीत प्रहरन्नुर्वीधरं मुष्टया ।

३१. उपमायां[1] विकल्पे[2] वा - उपमा तुल्यता । विकल्पः पक्षान्तरः १. प्रतप्तलोहपिण्डो वा भानुः कुज्झटिकावृतः २. उमेशं वा रमेशं वा भजेशं वाञ्छता हृदा ।

३२. सामि त्वर्धे[1] जुगुप्सिते[2] ॥ यामि यामि शयनाय मुञ्च मां सामि[1]सामि कुरु निर्जितं धनम्। मामिह स्थितमवेक्ष्य ताडयेत्सामिकर्मनिरतं[2] क्रुधा गुरुः ।

३३. अमा संह[1] समीपे[2] च - १. चन्द्रार्कयोः सह स्थित्याऽमावास्या तिथिरुच्येते २. समीपवर्तिनं प्राहुरमात्यं पृथिवीपतेः ।

३४. कं वारिणि[1] च मूर्धनि[2] । जायते वारिणि ततः कमलं क[1]ञ्जमुच्यते २. मूर्ध्नो दश धरन् ख्यातो रावणो दशकन्धरः ।

३५. इवेत्यमर्थयोरेवम् - इव सदृशः = जस्तै, जस्तो - यसरी - जैसे इसतरह = १. वेदाभ्यासी वह्निरेवम् २. एवं तिष्ठँश्च पूज्यते ।

३६. नूनं तर्के[1]ऽर्थनिश्चये[2] ॥ नूनं हनुमानायातः श्रूयते गर्जनध्वनिः । द्रुतप्रसर्पणे वायुर्नूनं न्यूनोऽस्ति चेतसः ।

३७. तुष्णीमर्थे सुखे जोषम् - तुष्णीं मौनम् । १. जोषमारभस्व न जानीषे वृत्तान्तमिदमादितः २. जोषं ज्योत्स्नीषु रात्रीषु विहरन्ति विलासिनः ।

३८. किं पृच्छा[1]यां जुगुप्सने[2] । प्रश्ने - किमाद्रियेरन्[1] रसिकास्तावकीनां कृतिं कवे ! । स आह - भो भवान् जानन्नपि किं[2] पृच्छसि २. स किं[2] सखा साधु न शास्ति योऽधिपम् ।

३९. नाम प्राकाश्य. इत्यस्याः पङ्क्तेरुदाहरणानि पूर्वमेव प्रस्तुतानि - द्र.५-२ ।

४०. अलं भूषण[1]पर्याप्ति[2]शक्ति[3]वारण[4]वाचकम् । अलङ्करोति[1] विद्वांसं विनयस्त्वं न वेत्सि तम्। एतावदोदनमलं[2] नास्ति वह्निबलं मम । अलं[3] चाणूरमल्लाय श्रीगोपीजनवल्लभः । अलं[4] महीपाल तव श्रमेण ।

४१. हुं वित[1]र्के परिप्रश्ने[2] - हुं[1] हनुमान्समायाति परीतः कपिकुञ्जरैः २. हूं[2] ! गच्छसि प्रतीक्षस्व गच्छामि नय मामपि ।

४२. समयान्ति[1]कमध्य[2]योः ॥ नद्यस्ति समा[1]या ग्रामं तद्वयं सम[2]या मठः ।

४३. पुनरप्रथमे[1] भेदे[2] - अप्रथमः = भूयः । भेदः - भिन्नः । पुन[1]र्जल्पसि जाल्म ! त्वं वार्यमाणः सुहृज्जनैः । मानमर्हन्ति सर्वेऽपि किं[2] पुनः पृथिवीपतिः । किं पुनः=किं वक्तव्यम् ।

४४. निर्निश्च[1]यनिषेध[2]योः । स सर्वमङ्गलमयः समयः किल निर्गतः[1] । निर्धनो[2] हि निरुत्साहो[2] निरालम्ब[2]श्च जायते ।

४५. स्यात्प्रबन्धे[1] चिरातीते[2] निकटागामिके[3] पुरा ॥ प्रबन्धः = निरन्तरः सनातनः । चिरम् = प्रथमः । अतीतः = व्यतीतः कालः । निकटतागामिकः = समीपभविष्यत्कालः । प्राचः कालात्प्रचलिता रीतिरेषा पुरातनी[1] । वृद्धेभ्यश्च युवभ्यश्च भोज्यन्ते शिशवः पुरा[2] । पुरा[3] दशरथो नाम बभूव पृथिवीपतिः । सित्यो ! न चेद्दिशसि वर्त्म विशोषितं त्वां पादैः पुरा[4] तरति वानरवाहिनीयम् ।

४६. ऊ[1]रर्यूरी[2] चोररी[3] च विस्तारेऽङ्गीकृतौ त्रयम् । १-२-३. ऊररी करोति, ऊरी करोति, उररी करोति = विस्तारयति अङ्गीकरोति (स्वीकरोति) कर्मणि = स्वीक्रियते स्वीकर्तव्यः स्वीकरणीयः स्वीकार्यः स्वीकृतः - अङ्गीक्रियते अङ्गीकर्तव्यः, अङ्गीकरणीयः अङ्गीकार्यः अङ्गीकृतः - अभ्युपगच्छति - अभ्युपगम्यते अभ्युपगन्तव्यः, अभ्युपगम्यः अभ्युपगतः ।

४७. स्वर्गे परे च लोके स्वर् - स्वर्याति पुण्यवान् जनः । स्वर्गतो जरया जीर्णो नास्तिकः स परेऽहनि ।

४८. वार्ता[1] - संभाव्ययोः[2] किल । कंसं जघान किल[1] बालक एव कृष्णः । मेधावी सन्नयं बालोऽतिशयीत किला[2]ग्रजान् ।

४९. निषेध[1]वाक्यालङ्कार[2]जिज्ञा[3]सानुनये[4] खलु । अनाश्रवः पङ्किलायां भुवि दुतपदश्चलन् । स्खलितः पतितोऽसि त्वं रुदित्वा खलु[1] वत्सक ! ॥ एतत्खलु[2] खलत्वं ते यत्परोक्षे विनिन्दसि । भेषजं खलु[3] जानासि प्रमेहामयनाशनम् । मुरलीं मे पुराऽऽच्छिन्नां प्रयच्छ खलु[4] राधिके ।

५०. समीपो [1]भयतः[2]शीघ्र[3]साकल्या[4]भिमुखे[5]ऽभितः ॥ साकल्यम्=सफलता । पश्याभितो[1]ऽयं तुहिनस्य पर्वतः । अभितो[2] वीज्यमानोऽयं चामराभ्यां रघुद्वहः । अभितो[3] गच्छतु भवान् यजमानः प्रतीक्षते । महान्तः पण्डितजना अभितः[4] समुपस्थिताः । आयान्तमभितस्तूर्णं प्रत्युद्गच्छ निजं गुरुम् ।

५१. नाम[1]प्राकाश्य[2]योः प्रादुः - रामः प्रा[1]दुर्बभूवेति ननन्दुर्मुनयो वने । प्रादु[2]रासीत्प्रभा भानोर्विनष्टं गहनं तमः ।

५२. मिथोऽन्योऽन्य[1] रहस्य[2]पि । अन्योन्यं = परस्परम् । रहसि = एकान्ते । सतीर्थ्या मिथो[1] मित्रतामाश्रयन्ताम् । शान्ता मिथः[2] समासीना मन्त्रयन्ते महीभुजः ।

५३. तिरोऽन्तर्धौ तीर्यगर्थे - अन्तर्धिरन्तर्धानम् । तिर्यक् = तेर्सो-तिरछा = तिरोबभूव तिमिरं तिर्यञ्चोऽपि समुत्स्थिताः ।

५४. हा विषादशुगर्तिषु । विषादः[1] = खेदः । शुक्[2] = शोकः । अर्तिः[3] = पीडा । हाहाकारकरं नैतद्दुर्भिक्ष्यं हा प्रशाम्यति । हा रन्तिदेव हा[2] कर्ण हा[2] शिबे हा[2] युधिष्ठिर । हा[3] निशेयं कथं पौषी विष्मा नियतां मया ।

५५. अहहेत्यद्भुते खेदे - अद्भुत[1]माश्चर्यम् । खेद[2] = विषादः । अहह[1] ! हनुमानूढद्रोणाचलः समुपस्थितः । अहह[2] ! बहुभिर्भीमैर्नागरैरबन्धि रघूद्वहः ।

५६. हि हेता[1]ववधारणे[2] । अवधारणं निश्चयः । अग्निस्तत्रास्त्यविच्छिन्ना धूमरेखा हि[1] दृश्यते । न हि[2] स्वात्मारामं विषयमृगतृष्णा भ्रमयति ।

५७. चिराय चिररात्राय चिरस्याद्याचिरार्थकाः । आद्यपदेन चिरम् चिरेण चिरात् चिरे इत्यव्ययान्यपि गृह्यन्ते । एषां दीर्घ (बहु) काले (समये) इत्यर्थो ज्ञेयः । चिराय, चिररात्राय, वा दृष्टोऽसि त्वं मया कच्चित्ते कुशलं सखे । चिरस्य दृष्टोऽसि मया वयस्य ! कुशलं तव । चिराय दृष्टोऽस्ति भवान्गृहे मे ।

५८. मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः ॥ एषां सर्वेषां वारम्वारमित्यर्थो विधेयः । मुहुर्मुहुर्जन्म पुनः पुनर्मृतिस्तथापि मुक्तिं हतधीर्न वान्छति ।

५९. स्राग्झटित्यञ्जसाह्नाय द्राङ् मङ्क्षु सपदिद्रुते । स्राक् झटिति अञ्जसा अह्नाय द्राक् मङ्क्षु सपदि एते शीघ्रार्थे बोध्याः । १. श्रीचयव्यापृतानां नः स्रागतीयाय हा वयः २. झटित्यसूँस्त्यक्षतीति नीतः स तटिनीं प्रति । ३. कर्म नाञ्चति (न प्राप्नोति) मञ्जुत्वमञ्जसा विहितं जनैः । ४. अह्नाय तावदरुणेन तमो निरस्तम् ५. द्रागुत्तरं देहि शिशो ! नाङ्कलाभो विलम्बने ६. मिमङ्क्षुमेनं मङ्क्षु त्वं समुत्तारय तीरतः ७. सन्तं विपदि तीव्रायां मित्रं सपदि पालय ।

६०. बल[1]वत्सुष्ठु[2] किमु[3]त स्व[4]त्यती[5]व च निर्भरे ॥ एतेऽतिशयार्थे ज्ञेयाः । १. बलवद्बाधते व्याधिः पथ्यसेवपराङ्मुखम् २. सुष्ठु पीतं घृतं मन्ये भवताऽवमता सदा ३. जीमूतः किमुत मलीमसः प्रवर्षन्नभ्यागान्नभसि शनैः शनै प्रसर्पन् ४. सुशोभते विनयः पण्डितानाम् ५. विवर्जयेदतिवादान् मनीषी ६. अतीव ते चञ्चलत्वं चेतसः प्रतिभाति मे ।

६१. पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने (त्यजने) । पृथक् विना अन्तरेण ऋते हिरुक् नाना चैते वर्जनेऽर्थे बोध्याः । १. भिक्षुराक्रन्दति बहिः किञ्चिद्दत्वा पृथग्कुरु २. विना श्रमं दुर्लभा वत्स विद्या ३. अन्तरेणारुणं कोऽन्यस्तिमिरं तिरयिष्यति ४. हिरुक् पथ्यसेवां हि रुक् किं प्रयाति ५. विष्णुं नाना मुक्तिदानाय कोऽन्यः ६. रामं ह्युते न गच्छन्ति कर्माणि स्मर बालक ! ।

६२. यत्तद्यतस्ततोहेतौ (ता) - हेतौ = कारणे = यत्[1] तत्[2] यतः[3] ततः[4] = कृतापराधस्त्वमसि य[1]न्म्लानमुखतां गतः । मां प्रपन्नोऽसि कौन्तेय ! [2]तत्त्वा पातास्मि सर्वतः । कृतापराधस्त्वमसि विच्छायत्वं यतो[3] गतः । विच्छायो म्लामुखः, मलीनमुखः । मां प्रपन्नोऽसि कौन्तेय[4] ततस्त्राणमवाप्स्यसि ।

६३. (व) असाकल्ये तु चिच्चन ॥ कोहि कोहि = कोई कुछ = केचिद्धनं मानयन्ति गुणान् शंसन्ति केचन । न धनं न गुणं किन्तु भाग्यं शंसन्ति केचन ।

६४. कदा[1]जिज्जातु[2] - कस्मिँश्चित्काले = कदाचिदात्मा न मृतो न जायते । अधमेऽपि सुते जातु न मातुर्निष्ठुरं मनः ।

६५. सार्धं तु साकं सत्रा सह इत्येषां प्रयोगः करणकारके सह युक्तेऽप्रधाने इति सूत्रप्रसङ्गे द्रष्टव्यः ।

६६. आनुकूल्यार्थकं प्राध्वम् - प्रध्वंसनम् = अनुकूलता = प्रध्वंसनं समभिलष्यत आशराणां प्राध्वं बभूव सकलं रघुनन्दनस्य ।

६७. व्यर्थके तु वृथा मुधा ॥ वृथा = व्यर्थः = वृथा परिश्राम्यसि बाधसे मुधा निजं शरीरं वस निःस्पृहः सुखी ।

६८. आहो उताहो किमुत विकल्पे किं किमूत च । अन्ते किमु, उत च । सर्वे वितर्का(विकल्पा)र्था ज्ञेयाः । १. आहो युद्धं वत्स्र्यति द्विपदाहि २. उताहो स्वत्वहीना धरित्री ३. किमुत हरिं विपदन्तं श्रयेथाः ४. किं ददीत मदीयेऽपि सदने पादयोर्युगम् ५. धराधीशाराधनाय धनार्थी किमु धावसि ६. निधेः सिषाधयिषया सिद्धान्प्रत्युत धावसि ।

६९. तु हि च स्म ह वै पादपूरणे - एषु किमप्येकं पादं श्लोकचरण(पाद)पूरणे साधु मन्यतेऽधिकं तु न । यथा - रामस्त्वरण्यं हि ययौ सीता च तमनु स्म सा । तदा ह लक्ष्मणस्तौ द्वावन्वयासीत् हठेन वै ।

७०. पूजने स्वती ॥ सुलभते सुपरिश्रमकृद्यशो विनतिमान् मतिमन् ! अतिदृश्यते ।

७१. दिवाऽह्नी (इति) - वसन्ते दिवा स्वाप आरोग्यहारी ।

७२. त्य(अ)थ दोषा च नक्तं च रजनाविति ॥ रजनी = रात्रि(त्री) । अतिजागरणं दोषा चक्षुर्दोषाय जायते । भज दोषा च नक्तं च भक्तश्रेयस्करं हरिम् ।

७३. तिर्यगर्थे साचि तिरो - तेर्सो - सिधाइ, तिरछा = न जराजर्जरं काचित्साचिः (तिरः) पश्यति कामिनी ।

७४. प्यथ सम्बोधनार्थकाः ॥ स्युः प्याट् पाडङ्ग है हे भोः = प्याट् छात्राः ! पठत प्रेम्णा न चेत्प्रेम्णा पठिष्यथ । अध्यापकस्ताडयेद्वः प्याट्प्याडिति कपोलयोः ।

७५. समया निकषा हिरुक् । सर्वे समीपार्थकाः = समया विलपन् रघूद्वहः समया पञ्चवटीविलोकिनः । निकषा निकषात्मजानिह प्रहरिष्यश्च स एवं वीक्षितः ।

७६. अतर्किते तु सहसा स्यात् - अकस्मात् = सहसा तपसा प्रसादिता सहसा प्रादुरभूत् सरस्वती ।

७७. पुरः पुरतोऽग्रतः ॥ एषामर्थ अग्रे इत्यर्थः । अमुं पुरः यश्यसि देवदारुम् । निरसतरुरिह विलसति पुरतो निवसति तत्र वायस एकः । शुष्को वृक्षस्तिष्ठत्यग्रे निवसति तत्र वायस एकः । प्रवृत्तस्य शिरश्छेत्तुमुग्रस्तस्याग्रतोऽभवत्- (उग्रः शिवः) ।

७८. स्वाहा देवहर्विदाने श्रौषट् वौषट् वषट् स्वधा । स्वाहा श्रौषट् वौषट् वषट् एते देवानां हविर्दाने वौषट् वषट् एतौ द्वौ अङ्गकरन्यासयोः स्वधा एकोऽयं पितॄणां जलान्नादिदाने च प्रयुज्यन्ते । अग्नये कव्यावाहनाय स्वाहा । पितृभ्यः स्वधा इत्यादि । एषां प्रयोगः सम्प्रदानकारके नमः स्वस्ति. सूत्रप्रसङ्गे द्रष्टव्यः ।

७९. किञ्चिदिषन्मनागल्पे - आयुः किञ्चित् ज्ञानमीषद् दृश्यते च सुखं मनाक् । तथाप्यखर्वः सर्वत्र गर्व एव निरीक्ष्यते ।

८०. प्रेत्यामुत्र भवान्तरे ॥ भवः संसारो लोको जन्म शिवश्च । इह च प्रेत्य च जनः क्लिश्यते कृतः किल्विषः । मांसं भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।

८१. व वा यथा तथैवैवं साम्ये - यथा तथा इव एव चैते तुल्यार्थे बोध्याः = मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम । यथा वुभुक्षितस्यान्नं तथा रुग्णस्य भेषजम् ।

८२. ऽहो ही च विस्मये । आश्चर्येऽर्थे ज्ञेयौ = अहो ! द्विपुच्छो महिषः कियान् गुरुः । ही ! हीनपुच्छोऽपि निरीक्षितः ।

८३. मौने तु तूष्णीं तूष्णीकाम् - जानन्नपि स्थितस्तूष्णीं महतां विदुषां पुरा । तूष्णीकामास्ते गतधा पृच्छ्यमानोऽपि तुच्छधीः ।

८४. सद्य सदसि तत्क्षणे ॥ कर्म सद्य समारब्धं धिया सपदि साधय ।

८५. दिष्टचा समुपजोषं चेत्यानन्दे - दिष्टचा श्रीमान्दाशरथिरयोध्यायां निरीक्ष्यते । समुपजोषमितो रघुनन्दनः समुपयाति वृतो भरतादिभिः ।

८६. ऽथान्तरेऽन्तराः । अन्तरेण च मध्ये स्युः - एते मध्यार्थे बोध्याः । अन्तरे पर्वता जाता अन्तरा सरितां शतम् । अन्तरेण द्रुमाः सन्ति प्रिये नावधुना वत ।

८७. प्रसह्य तु हठार्थकम् = जबरजस्ती-बलजोरी हठात् । प्रसह्य रुदतीं सीतां जहार दशकन्धरः ।

८८. युक्ते द्वे साम्प्रतं स्थाने - युक्तम्= ठीक = वृषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् । स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।

८९ ऽभीक्षणं शश्वदनारते ॥ निरन्तरे (अनवच्छिन्नता) = अग्नेरभीक्ष्णमुष्णत्वं शश्वच्छैत्यं निशापतेः ।

९०. अभावे नह्य नो नापि[1] - अकारोऽभावे निषेधार्थेऽपि ज्ञेयः = नहि अ नो न = नहि मौर्ख्यात्परं दुःखमनीतिर्दुःखदायिनी । नो निद्रा न बुभुक्षा मे ज्वरार्तस्य प्रजायते ॥ अभावे - अधनः, अज्ञानः, अपुत्रः, अप्राप्तः, अकृष्णः, अधीरः, अलोकः इत्यादयः । नञ्समासेनापि एतादृश एव शब्दा भवन्ति । निषेधे - न भवति, न भवेत्, न भवितव्यम्, नास्ति, न स्यात् । ग्रामं न गच्छति न गच्छेत् । तद्वचो न ब्रूयात्, नोच्यते न वक्तव्यम् न वाच्यम् । न करोति न कुर्यात् न कुर्वीत न क्रियते न कर्तव्यम्, न कार्यम् । न दातव्यम् । नहि नो एतयोरपि नवत् । निषेधार्थका नह्यादिशब्दाः क्रियापदात्पूर्वं समीपे चिन्त्याः ।

९१. मास्म माऽलं च वारणे ॥ वारणमवरोधे निषेधेऽपि = मास्म कार्षीदिदं वत्स ! मा गमः खलसन्निधिम् । स्थीयतामलमुत्स्थातुम् । मा ब्रूहि दीनं वचः । मास्मिन्खलः खेलतु । हन्ताऽस्मिञ्जन्मनि भवान्मा मां द्रष्टुमिहार्हति । मा ते व्यथा मा च विमूढभावः । मा कुरु मा कुरु विषयविचारम् । निषेधार्थको माशब्दो लट्लोटोस्तिङन्तक्रियायां प्रयुक्तो लभ्यते ।

९२. पक्षान्तरे चेद्यदि च - अधिभुवि जीवन् भोजश्चेदभविष्यत्सरस्वतीतनयः । नैतावानभविष्यद्विदुषां भरणे विधातुरायासः ॰। अत्र द्वितीयपादे "चेदभविष्यत्" इत्यारभ्य स्थले "यद्यभविष्यद्" इति प्रयुक्ते द्वितीयमुदाहरणं भवति ।

९३. तत्त्वे त्वद्धाऽञ्जसा द्वयम् । तत्त्वं यथार्थम् = ठीक ठीक = अद्धा जानन्ति मनुजा सश्रद्धाः परमेश्वरम् । आञ्जनेयः पर्यचैषीदञ्जसा रघुनन्दनम् ॥

९४. प्राकाश्ये प्रादुराविः स्यात् - प्रकाश्यम् = प्रकटता = प्रादुर्भवन्ति (आविर्भवन्ति) सुखरूपधराणि जन्तोः पुण्यानि जातसमयानि पुराकृतानि ।

९५ (दो) ओमेवं परमं मते ॥ अङ्गीकारे स्वीकारेऽर्थे = प्रार्थितस्त्रातुममरैरोमित्याह जनार्दनः । एवं प्रभुर्यदाऽऽह स्म किञ्चिदेष विवक्षति । विचाराय प्रार्थितोऽयं परमं प्राह सज्जनः ।

९६. समन्ततस्तु परीतः सर्वतो विष्वगित्यपि । अभितः विश्वतः समन्तात् विषग् एते सर्वतोऽर्थे प्रोच्यन्ते । समन्ततोऽद्भिर्मनुजव्रजैरपि प्रसन्नता श्रीः परितः समाश्रिता । समीहिता शीतलताऽस्ति सर्वतः सुखं हि विष्वक् शरदि प्रवर्तते ॥

९७. अकामानुमतौ कामम् - अनिच्छापूर्वकस्वीकारे = कामं क्रीडा क्रोडवन्मूर्ख ! पङ्के न त्वं रात्रौ सद्मनोऽन्तः शयीथाः ।

९८. (म) असूयोपगमेऽस्तु च ॥ ईर्ष्यापूर्णस्वकृतौ = अस्ति केषुचन स्फीतः कार्याकार्यविपर्ययः । अस्तु तत्फलमीक्ष्येत जीवद्भिर्बहुभिर्जनैः ।

९९. ननु च स्याद्विरोधोक्तौ - ननु जाग्रद्भूरिशक्तिः स्रष्टा द्रष्टा दयामयः । एकरूपानेकसुखान् कुतो (किन-क्यों) न सृजतीश्वरः ॥

१००. कच्चित्कामप्रवेदने । कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा । कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनञ्जय ।

[1] एषां प्रयोगेण वाक्यस्यार्थो निषाधात्मको (प्रतिषेधात्मको नकारात्मकोऽकरणात्मकः) भवति ।

१०१. निःषमं दुःषमं गर्ह्ये - निन्द्ये = निः षमं व्यक्ति मूर्खोऽयं दुःषमं प्रतिवक्ति (प्रत्युत्तरति) सः ।

१०२. यथास्वं तु यथायथम् ॥ यथायोग्यम् = भिषक् यथास्वं रोगाणां गतिं ज्ञात्वा चिकित्सति । यथायथं गतिं ज्ञात्वा रोगाणां स चिकित्सति ॥

१०३. मृषा मिथ्या च वितथे - असत्ये = मृषा (मिथ्या) व्यर्थं स वक्तीति रुषा प्रज्वलितोऽस्म्यहम् ।

१०४. यथार्थ तु यथातथम् । साक्षी त्वमसि चेद्भद्र ! सर्वं ब्रूहि यथातथम् ।

१०५. स्युरेवं तु पुनर्वैवेत्यवधारणवाचकाः ॥ एवम्, तु, पुनः, वै वा एते निश्चयार्थकाः = एवमाचारनिरतं सदाचारपरं बिदुः । त्वद्धिताधाननिरतस्त्वां तु वच्मीदमस्तभीः । विचारयन् विजानीहि मां पुनस्त्वद्धितार्थिनम् ॥ को वै (वा) धर्मं वित्तहेतोर्विमुञ्चेत्कुलजो जनः ।

१०६. प्रागतीतार्थकम् - प्राक्कृतं कर्म विद्वांसः प्राक्तनं नाम चक्षते (भाषते) ।

१०७. नूनमवश्यं निश्चये द्वयम् । नूनं रामेण रहिता प्रवेक्ष्यामि हुताशनम् । रामं विना त्ववश्याहं प्रवेक्ष्यामि हुताशनम् ।

१०८. संवद्वर्षे - संवद्विजय नामायं सप्तविंशः प्रवर्तते ।

१०९. (ऽ) अवरे त्वर्वाक् - वर, वोढो - आगे = भाषायाम् - अभूतपूर्वं दुर्भिक्षमर्वाक् सर्वत्र वीक्ष्यते ।

११० (गा) आमेवम् - अङ्गीकारे, स्वीकारे = इदं यातं भुक्तमिदमिति प्रत्यभिजानतीम् । राम आं मैथिलीत्यूचे जानकीं पुष्पके स्थितः ॥ इदं यातं भुक्तमिति जानतीं जानकीं प्रति । राम एवं मैथिलीति प्रोचे पुष्पकमास्थितः ॥

१११. स्वयमात्मना ॥ विचारशक्त्या दुर्बोधोऽप्यर्थोऽबोधि स्वयं बुधैः । स स्वकीयं कार्यं स्वयं करोति (विदधाति) । अत्राहं स्वयमुपस्थितोऽस्मि । स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः । स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किञ्चन ॥ भवान्स्वकीयं (निजं) कर्म स्वयं विधत्ते (कुरुते) । अहमेतत्कार्यं स्वयं करोमि (विदधे) । स्वयं कर्ता स्वयं पाता स्वयं हर्ता स एव हि । स्वयं धर्ता स्वयं भर्ता स्वयं कुशिकनन्दनः । स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।

११२. अल्पे नीचैः - नीचैर्विचारवचनवित्तबुद्धिर्हि दुर्भगः ।

११३. महत्युच्चैः - उच्चैर्विचारवचनवित्तबुद्धिर्हि भाग्यवान् ।

११४. प्रायो भूम्नि - आधिक्यार्थे = प्रायः पथ्यं नेच्छति प्राप्तमृत्युः ।

११५. (म्न्य) अद्रुते शनैः । मन्दार्थे = शनैः पन्थाः शनै कन्थाः शनैः पर्वतमस्तके । शनैर्विद्या शनैर्वित्तं पञ्चैतानि शनैः शनैः ।

११६. सना नित्ये - जनार्दनः सना-(नित्यम्)ऽस्तीति सर्वैरुक्तः सनातनः ।

११७. बहिर्बाह्ये = बहिस्तिष्ठ विनाऽऽह्वानं प्रवेशोऽन्तर्न युज्यते ।

११८. स्माऽतीते - अतीते काले = कुन्तीपुत्रः पृच्छति स्म ब्रवीति स्म श्रियः पति ॥

११९. ऽस्तमदर्शने । जगत्समस्तमुद्रास्य भानुमानस्तमाश्रितः ।

१२०. अस्ति सत्वे - सत्तायाम् = इदं क्रियासदृशमव्ययं ज्ञेयम् । अस्तिक्षीरा दीयतां गौर्द्विजाय ।

१२१. रुषोक्तावु = क्रोधवाण्यां सत्याम् । उ = उ औद्धत्यफलं तावत्प्राप्तवानसि बालिश ! ।

१२२. ॐ प्रश्ने - ॐ गच्छसि ! पथि स्वच्छं पिबन् वारि मितं चलन् । हितं चाश्नन् गृहं प्राप्य प्रषयेत्प्रेमपत्रिकाम् ।

१२३. (ऽ) अनुनय त्वयि । अयि = प्रेम्णा संबोधनम् = अयि जगज्जननि ! द्वितयं दृशोर्मयि निधेहि विपद्विवशीकृते ।

१२४. हुं तर्के स्यात् - हुं नाम मलिम्लुचः ।

१२५. (दु) उषा रात्रेरवसाने = रात्रिसमाप्तिसमयः - उषा प्रबुध्य चिन्तयेदुषापतेः पितामहम् ।

१२६. नमो नतौ ॥ अस्योदाहरणं सम्प्रदानकारके नमः स्वस्ति. इति सूत्रे द्रष्टव्यम् ।

१२७. पुनरर्थेऽङ्ग - फेरि-फिर = भाषायाम् = मया नाबोधि काठिन्यादङ्ग बोधय विस्तरात् । क्षोदीयानपि नो निन्द्यः किमङ्ग धरणीपतिः ।

१२८. निन्दायां दुष्ठु, सुष्ठु प्रशंसने । दुष्ठु ते चापलं भूयः सुष्ठु बुद्धिस्तु तावकी ।

१२९. सायं साये प्रगे प्रातः प्रभाते - सायं कुलायमायान्ति निर्गच्छन्ति प्रगे (प्रातः) खगाः ।

१३०. निकषाऽन्तिके ॥ अन्तिके समीपे = प्रयान्ति निकषा ग्रामं सहकार(आम्र)फलार्थिनः ।

१३१. परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति । पूर्वेऽब्दे(वर्षे) = गतवर्षे परुत्[1] । पूर्वोत्तरेऽब्दे =- गतवर्षात्पूर्वे वर्षे परारि[2] । यति वर्तमानेऽब्दे (वर्षे) = ऐषमः[3] । अहं विमुच्य सदनं परुत्[1] काशीं समागतः । आसं पुरारिकृपया परारि[2] तु सुखी गृही । कृषिवाणिज्यहीनानामैषमो विषमा दशा ।

१३२. अद्यात्राह्नि - अस्मिन्नहनि = अद्य सम्पाद्य कार्याणि सद्य आयाहि याहि भोः । अद्यः पुष्यः श्वो मघा । अद्य वसामि श्वो गमिष्यामि । अद्यः कार्याणि नाभवन् श्वोऽपि स्युर्वा न वा - संभावनायां विधिलिङ् । अद्यः सोमः श्वो भौमः । अद्य द्वितीया श्वस्तृतीया । परश्वश्चतुर्थी ।

१३३. (ह्यथ) अथ पूर्वेऽ ह्नीत्यादौ पूर्वोत्तरापरात् ॥ तथाधरान्यान्यतरतरात्पूर्वेद्युरादयः । पूर्वेऽहनि = पूर्वेद्युः । उत्तरेऽहनि = उत्तरेद्युः = आगामि दिनम् । अपरस्मिन्नहनि = अपरेद्युः = आगामिनि कस्मिन्दिने । अधरस्मिन्नह्नि = अधरेद्युः = गतपश्चाद्दिने । अन्यस्मिन्नह्नि = अन्येद्युः । अन्यतरस्मिन्नहनि अन्यतरेद्युः । इतस्मिन्नहनि = इतरेद्युः । अपर अन्य इतर चैतषामर्थः प्रायेण समानाः । पूर्वेद्युर्नाभवत्कार्यमुत्तरेद्युर्भवेदपि । अपरेद्युः समागच्छाऽधरेद्युः क्व गतो भवान् । अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः । जिज्ञासमानान्यतरेद्युरात्मानुगस्य भावं मुनिहोमधेनुः । महीपतेर्हार्दमथेतरेद्युर्जिज्ञासमाना मुनिहोमधेनुः ।

१३४. उभयद्युश्चोभयेद्युः - द्विदिनम् = व्रतवासरसन्देहादुभय(ये)द्युरुपावसत् ।

१३५. परे त्वह्नि परेद्यवि ॥ अद्य गच्छ क्षणो नास्ति समागच्छेः परेद्यवि ।

१३६. ह्यो गते नागतेऽह्नि श्वः परश्वस्तु परेऽहनि । गते पूर्वदिने सति = ह्यः । आगामिनि उत्तरदिने सति = श्वः । श्वपरेऽहनि सति = परश्वः । ह्यो द्वितीयाऽभवत् श्वस्तु चतुर्थी भविता तिथिः । परश्वःपञ्चमी तस्यामक्षरारम्भणं शिशोः । अद्य कार्यं भवति श्वो न । ह्यः कार्यमभवत् । अद्य हस्ता श्वःस्वातिः । अद्य पूर्णिमा श्वः प्रतिपदा । ह्यः कार्यमभवत् अद्य स्याद्वा न । श्वोऽपि निश्चयो न भविष्यति ।

१३७. तदा तदानीम् - तस्मिन्समये = यदाऽभिमन्युं विरथमेकाकिनमनायुधम् । यूयं संभूय षट् जघ्न क्व ते धर्मस्तदा गतः ॥ यानि कार्याणि सम्पत्तुं न जानेऽहं यदा सखे । तदानीं तानि संपत्तु यत्नं पूर्णं करोम्यहम् ।

१३८. युगपदेकदा - एकस्मिन्काले = परसहस्रा युगपत्पार्थेन प्रहिताः शराः ।

१३९. सर्वदा सदा ॥ सर्वस्मिन्काले = सर्वदाऽस्माभिराराध्यः सदा श्रीमान्गदाधरः । सदा सर्वदा इत्यर्थः कार्यः ।

१४०. एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा । एतस्मिन्काले = एतर्हि । अस्मिन्काले = सम्प्रति इदानीम् अधुना साम्प्रतं च । एतर्हि बर्हिणगणाः परितो नटन्ति वर्षन्ति सम्प्रति घनाः कृषका इदानीम् । नन्दन्ति वृद्धिमधुना दधते तटिन्यो निद्राति साम्प्रतमधीश्वर इन्दिरायाः ॥

१४१. दिग्देशकाले पूर्वादौ प्रागुदग्प्रत्यगादयः ॥ पूर्वदिशि पूर्वदेशे पूर्वकाले चैष्वर्थेषु प्राक् प्रयुज्यते । १. प्राग्वर्तते पूः कलिकताभिधाना २. प्राग्मन्दिरं नः सदनाच्छूलपाणेः, प्राग्भूतले प्रादुरभूद्रामभद्रः । सूर्यः प्रागुदेति ।

एवमुत्तरदिशि उत्तरदेशे उत्तरकाले चार्थेषु = उदक् । दक्षिणदिशि दक्षिणदेशे दक्षिणकाले चार्थेषु = अवाक् । पश्चिमदिशि पश्चिमदेशे पश्चिमकाले चार्थेषु प्रत्यक् । उत्तरदिशि उत्तरदेशे उत्तरकाले चार्थेषु = उत्तरात् उत्तरेण उत्तरतः उदक् च । अधोभागेऽर्थे = अधरात् अधरेण अधश्च । दक्षिणदिशि दक्षिणभागे चार्थयोः = दक्षिणात् दक्षिणेन दक्षिणा = दक्षिणाहि दक्षिणतश्च । पं कुलचन्द्रगौतमेनामरकोशे २५९ पृष्टतः २९० पर्यन्तं संगृहितान्युदाहरणान्यपि समुद्धृतानि सन्ति ।

१४२. क्व = काहाँ-कहाँ = स क्वाहं क्व । अयं क्व स क्व । स क्व त्वं क्व । अहं क्व त्वं क्व । क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् । क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः । क्व वयं क्व परोक्षमन्मथो मृगशावैः परिवर्धितो जनः । सर्वं ब्रह्मैव मे भाति क्व मित्रं क्व च मे रिपुः । क्व शोकमोहौ स्नेहो वा भयं वा योऽज्ञसम्भवः । तपः क्व वत्से क्व च तावकं वपुः ।

१४३. शम् = सुखे = सुख, कल्याण - सुख, कल्याण = शन्नो देवीरभीष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा । शन्नऽइन्द्रो बृहस्पतिः शन्नोविष्णुरुरुक्रमः । अहानि शं भवन्तु नः शं रात्री प्रतिधीयताम् । यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शम् ।

१४४. अकस्मात् = एकाएक अचानक - एकाएक = किमेवं त्वमकस्माद्विचेतनः सञ्जातः । अकस्मादेतादृशी घटना घटिता । अहमकस्माद्विचेतनोऽभवम् । अकस्माद्ग्रामे नगरे वा सिंहो भल्लुको वा मया दृष्टः । सरस्वती अकस्मात्प्रादुरभूत्(प्रादुर्भूता) । भगवन्तमकस्मादहमपश्यम् । अकस्मात्घटना तु घटिता । परं तां समाधातुं कोऽप्यग्रेसरो नाभूत् ।

१४५. स्वतः = स्वयमेव = वेदाः स्वतः प्रमाणं सन्ति । स्वतः प्रमाणं परतः प्रमाणं किराङ्गना यत्र गिरो गिरन्ति ।

१४६. एतावता = यसरी-इसतरह = एतावता भवताऽभिलषितं कार्यं सम्पन्नम् ।

१४७. किमिति = किन-क्यों = भवान् किमिति अत्र वसति कथयतु । त्वं किमिति स्वामिनमुच्चैःशब्दं कृत्वा न जागरयसि । सखे करटक ! किमित्ययं स्वामी पानीयमपीत्वाऽत्र निवसति । उदकार्थी स्वामी पानीयमपीत्वा किमिति विस्मित इव तिष्ठति । यद्येवं तदा किं पुनः स्वामित्रासस्तत्रैव किमिति नापनीतः ।

५-७ कालबोधकलकारानुसारस्य क्रियायाः प्रयोगविधिः

सर्वे लकाराः कालबोधकार्थे प्रयुज्यन्ते । यतो लकारानुसारेण क्रियापदानामर्थो ज्ञेयः स्मरणीयश्च । कर्तृवाच्ये(कर्तरि)धातोर्विहितस्य लकारस्य स्थाने कृतेन तिङा कर्तृवाच्यक्रियापदानि निष्पद्यन्ते कर्मवाच्ये कर्मवाच्यक्रियापदानि भाववाच्ये भाववाच्यक्रियापदानि च । तिङा युक्तं क्रियापदं मुख्यं(प्रधानं) क्रियापदं प्रोच्यते । तिङ्भिन्नक्रियापदममुख्यम् । भावशब्देन स्वभावतः क्रिया गृह्यते । क्रिया धात्वर्थोऽस्ति । स च द्विविधः साध्यावस्थापन्नः सिद्धावस्थापन्नश्च । साध्यावस्थापन्नानि क्रियापदानि- भवति वदति हरति गच्छति सेवते भजते कम्पते नयति-ते दीव्यति क्रीणाति-णीते खनतीत्यादीनि भवन्ति । एतादृशानि क्रियापदानि लिङ्गसंख्यान्वयस्यायोग्यानि पदानि प्रोच्यन्ते । सिद्धावस्थपन्नानि क्रियापदानि गन्तव्यः, गमनीयः, गतवान्, गतः, कर्तव्यः, कृतवान्, कृतः, भावः, पाकः, सुतरः, दुस्तरः, सुलभः, दुर्लभ इत्यादिनि तिङ्भिन्नक्रियापदानि प्रोच्यन्ते । एतानि लिङ्गसंख्यान्वयस्य योग्यानि क्रियापदानि भवन्ति । एवं द्विविधानि क्रियापदानि निष्पन्नानि ज्ञेयानि । एतादृशानि उभयविधानि लिङ्गसंख्यान्वयस्य योग्यायोग्यक्रियापदानि पठने लेखने भाषणेऽपि विचारणीयानि ।

१. लट् वर्तमानकालार्थे प्रयुज्यते । प्रारब्धोऽपरिसमाप्तश्च कालो वर्तमानकालो भवति । अस्मिन्नर्थे लटि सिद्धानि भवति पठति कम्पते वन्दते क्रीडति इत्यादीनि क्रियापदानि निष्पद्यन्ते । ततः स भवति । रामः खादति । पुत्रः पठति । वृक्षः कम्पते । भक्तो वन्दते । छात्राः क्रीडन्ति इत्यादिवाक्यानि सिद्धचन्ति । वर्तमानकालस्य नैरन्तर्यस्यार्थं बोधयन् रामो भवन्नस्ति, कृष्णः खादन्नस्ति, बालःक्रीडन्नस्ति वेति प्रयोगो व्याकरणदृष्टचाऽपि साधु मन्यते । व्यवहारे लटः स्थाने विहितया तिङ्वाच्यक्रिययैव निरन्तरकालस्य कार्यं कृतमङ्गीक्रियते बुध्यते च ।

२. लिट् अनद्यतनपरोक्षभूतकालेऽर्थे प्रयुज्यते । अनद्यतनपरोक्षभूतकालेन चक्षुषोऽगोचरः समयो गृह्यते । यत इन्द्रियाणामगोचरसमये जातं कार्यं बोधयितुं लिटि निष्पन्नानि क्रियापदानि प्रयुज्यन्ते । यथा - रामो राज़ा बभूव । कृष्णः कंसं जघान । नारद उवाच । स पपाठ । त्वं चकर्थ । पत्राणि पेतुः । शैलाधिराजतनया न ययौ न तस्थौ । स छिन्नमूल इव पपात । उत्तमपुरुषे तु न लिट् । अहं नदीं जगाम इति न भवति ।

यदि स्वप्ने चित्तविक्षेपादिना प्रलापो जायते । तत्र लिट् लकारस्योत्तमपुरुषस्य क्रियापदं प्रयुज्यतेऽन्यवस्थायां तु न - सुप्तोऽहं किल विललाप । अहमुन्मत्तः सन् वनं विचचार ।

स्मयोगे लट् भूतार्थे प्रयुज्यते - यजति स्म युधिष्ठिरः । पृच्छति स्म युधिष्ठिरो ब्रवीति स्म जनार्दनः ।

३. लङ् अनद्यतनभूतकालेऽर्थे प्रयुज्यते । यतः पूर्ववर्तिनि दिने जातं कार्यं बोधयितुमस्य लकारस्य क्रियापदानि प्रयुज्यन्ते - भवान् ह्यः कुत्रासीत् । त्वं ह्यः कुत्रासीः । स पूर्वदिनेऽगच्छत् । कृष्ण. एवमब्रवीत् । ह्यो वृष्टिरभवत् । यवनाः साकेतानवरुन्धन् । गोपो गा व्रजमवरुणत् । अहं परुत्काशीमगच्छम् । परारि महर्घमासीत् । आसीद्राजा नलो नाम । अपश्यच्छेवदेवस्य शरीरे पाण्डवस्तदा ।

४. लुङ् सामान्यभूतकालेऽर्थे प्रयुज्यते । सामान्यभूतकालेनाद्यतनदिनस्याभ्यान्तरगतसमयो गृह्यते । अद्यतनदिनस्याभ्यान्तरगतसमय एवाद्यतनभूतो[१] ज्ञेयः । अयमेव सामान्यभूतकालः । अद्य

---

[१] अतीताया रात्रेः पश्चादर्धेनाऽऽगमिन्या रात्रेःपूर्वार्धेन च सहितः कालो(समयो)ऽद्यतनः । गतरात्रेः १२ तः (द्वादशवादनतः) आगमिन्या रात्रेः १२ (द्वादश) पर्यन्तस्य कालोऽद्यतनशब्देन प्रोच्यते । सामान्यभूतकाले आसन्नगंतसमय आसन्नभूतो वा निहितो भवति । ततो भिन्नोऽनद्यतनभूतोऽनद्यतनभविष्यच्च कालः प्रोच्यते । वर्तमानकाले लट् । अनद्यतनपरोक्षभूतकाले लिट् । अनद्यतनभविष्यत्काले लुट् ।

रामो राजाऽभूत् । अहमद्य कथामश्रौषम् । स उषसि प्राबोधि । अधुनैव सोऽगमत् । अद्य प्रत्यूषे (प्रातःकाले) मध्याह्ने पञ्चवादनात्पूर्वं वा कोलाहलो विवादो वाऽभूत् । अद्य विद्यालये छात्राः फलानि अखादिषुः । स सायं गृहमगमत् (अयासीत्) । प्रातः सूर्ये उदिते गोपालो गृहात् निरगमत् । सुरथो नाम राजाऽभूत् । इदमच्छोदं सरः स्नातुमभ्यागममहम् । धवले धौते वाससी परिधाय देवगृहमगमत्सः ।

३-४. लङ् लुङ् = माङ्, मास्म आभ्यां योगे लङ् लुङ् च द्वौ लकारौ भवतः परमडाटौ न - क्लैब्यं मास्म गमः पार्थ । प्रिये मा भैषीः । मा स्म प्रतीपं गमः । मा भूत्परिवादनवावतारः । दुःखं मे मा भूत् । मा भवान्भूत् । स भवान्वा मास्म भवत् भूद्वा । ते मा स्म भवन् भूवन्वा । मा भूत्सः । त्वं मा स्म भूः, भवो वा । सूत्रे - **माङि लुङ् ३।३।१७५ ॥ स्मोत्तरे लङ् च ३।३।१७६ ॥** लोटचपि निषेधार्थे मा प्रयुज्यते - मा ब्रूहि दीनं वचः । मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह । मा कुरु मा कुरु विषयविचारम् - द्र.५-६-९१ ।

५. लुट् लृटौ भविष्यत्कालेऽर्थे प्रयुज्येते । तथापि उभयोर्लकारयोःकश्चिद्भेदोऽस्ति । दूरवर्तिनो अनद्यतनभविष्यत्कालस्य कृते लुट्, आसन्न(समीप)वर्तिनो भविष्यत्कालस्य कृते लृट् च प्रयुज्येते ।

क) लुट् = स श्वो गन्ता । अहं परश्वो गन्तास्मि । यूयं त्रिभिर्दिनैरयोध्यां गन्तास्थ । वयं षट्सप्तदिनैः काष्टमण्डपं गन्तास्मः । तौ विंशतिदिनैः काशीं गन्तारौ । स मासेन द्रष्टा । त्वं वर्षेण फलं लब्धासि । आवां दशभिर्दिनै रूप्यकाणि लब्धास्वः ।

ख) लृट् - स सायं गृहे भविष्यति । अहं सायं मन्दिरं याष्यामि (गमिष्यमि) । कृष्णो मध्याह्ने प्रस्थास्यति । ते प्रदोषे मिलिष्यान्ति । न जाने क्रुद्धः स्वमी अग्रे किं विधास्यति । प्रत्यहं दास्यते सीता तामनुज्ञातुमर्हति । यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया । त्वत्प्रार्थनासिद्धचर्थं सरस्वतीविनोदं करिष्यामि ।

६. **विध्याद्यर्थेषु लोट् लिङ् च - विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३।३।१६१॥** एष्वर्थेषु धातोर्लिङ्[1] स्यात् । **लोट् च ३।३।१६२॥** विध्याद्यर्थेषु धातोर्लोट् स्यात् । लिङ्लोटावपि भविष्यत्कालेऽर्थे प्रयुज्येते । क) कर्मण्यप्रवृत्तस्य प्रवर्तनं विधिः । विधौ प्रेरणाऽऽज्ञाऽऽनुमतिरादेशश्चेत्यादयो भवन्ति । यतो विधौ निष्कृष्टस्य कर्मणि प्रवर्तनार्थं सदा आप्तेन जनेन शास्त्रेण वा प्रेरणादयः क्रियन्ते । तदर्थमभिलक्ष्य वेदेषु धर्मग्रन्थेषु (धर्मशास्त्रेषु रामायण-महाभारतयोः पुराणेषु च) व्यवहारेषु च विध्यर्थबोधनार्थं लिङ् लोट् - तव्यत्तव्यानीयर्यत्क्यप्ण्यत्प्रत्ययैर्युक्तानि क्रियापदानि प्रायेण प्रयुज्यन्ते । सोऽर्थो बोध्यः । अनुमतौ प्रवृत्तिर्निषेधश्च भवतः । अहरहः सन्ध्यामुपासीत । सन्ध्यायामहोरात्रस्य संयोगे ना ब्राह्मणः सन्ध्यां कुर्वीत । (ब्रह्मचारी) वर्जयेन्मधु मांसं च गन्धं माल्यं रसान्स्त्रियः । प्रत्यक् शिरा न स्वपयात् । एका शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् । न परस्यापराधेन परेषां दण्डमाचरेत् । अद्य भवानत्रागच्छतु । त्वं साधूनां सेवां विदध्याः(कुर्याः) । धर्मं भजस्व सततं त्यज लोकधर्मान्सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् । तथा कुरु यथा निन्दा न भवेत् । सत्यं ब्रूहि अनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् । त्यज दुर्जनसंसर्गं भज साधुसमागमम् । शुश्रुषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने । जहि शत्रुं महाबाहो कामरूपं दुरासदम् । मान्यान्मानय पूज्यान्पूजय । सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥ सत्यं वद । धर्मं चर । सहसा विदधीत न क्रियाम् । सावधानो भव शत्रुर्निर्भरमवसरं प्रतीक्षेत ।

सामान्यभविष्यत्काले लृट् । अनद्यतनभूते लङ् । विध्यादिष्वर्थेषु लिङ् । आशिषि लिङ् । आशीर्विध्याद्यर्थेषु लोट् । भूतसामान्ये लुङ् । [1] अनिश्चितभविष्यकाले लृङ् ।
वरदराजः - लघुसि.कौमुदी - टिप्पण्याम् - लिङ्लोटोरपि भविष्यत्काल एव प्रयोगः, प्रकाशक - गोविन्द भवन कार्यालय, गीताप्रेस, गोरखपुर, सं. २०५२ तेइसवां सं., पृ. ८४ ।

ख) निमन्त्रणं नियोगकरणम् । आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् - भवानिह भुञ्जीत भुङ्क्तां वा ।

ग) आमन्त्रणं कामाचारानुज्ञा । इच्छानुसारस्याऽऽचरणं कार्यं वा कर्तुमनुमतिप्रदानम् । इहाऽऽसीत आस्तां वा भवान् । वनेऽस्मिन्यथेच्छं वस वसेर्वा त्वम् । अपि याहि अपि तिष्ठ ।

घ) अधीष्टः - गुरुजननां सत्कारपूर्वकं कर्मणि प्रवर्तनं सः । प्रवर्तनेन व्यापारो बोध्यः । भवान्मम पुत्रं वेदमध्यापयेत् (पाठयेत्) ।

ङ) संप्रश्नः - उचितानुचितपरिपृच्छा - वेदमधीय उत तर्कम् । भोः गुरो ! वेदान्तमध्ययै अध्येयं वा (पठानि पठेयं वा) उत व्याकरणम् । अहं जलं पिबानि पिबेयं वा उत पयः (दुग्धम्) । किं करणवाणि ते प्रियं देवि । भद्रं सुस्वागतं तेऽस्तु ब्रूहि किं करवाणि ते - अस्यां पङ्क्तौ स्थिता ब्रूहि इतिक्रियाऽनुमतिप्राप्त्यर्थेऽपेक्ष्यते । एवमन्यत्रापि विचारणीया । प्रश्ने उत्तमपुरुषक्रिया चिन्त्या । किं कुर्याम् । किं खादानि । किं वर्णयानि ।

च) प्रार्थना (अनुरोधः, निवेदनम्) - यत्किञ्चिदभीष्टं वस्तु प्राप्तुं यत्र विनयवचनैर्गुरुरीशः स्वामी पिता माता देवी देवो वाऽभ्यर्थ्यते निवेद्यते वा सा यथा - भोः भोजनं लभेय लभै वा । दीने मयि दयां कुरु । अप्यन्तराऽऽगच्छतु आर्य ! । रामे चित्तलयः सदा भवतु मे हे राम मामुद्धर । मामस्या विपदो रक्षतु भगवान् । भद्र ! अनुजानीहि पिङ्गलकसमीपं गच्छामि । यूयं मम कल्याणं कुरुथ । हे प्रियसखि ! क्वासि देहि मे प्रतिवचनम् । इह आसीत आस्तां वा भवान् । प्रार्थनायां लिङ्लोटोस्त्रयाणां पुरुषाणां क्रियापदानि प्रयुज्यन्ते ।

७. विशेषः - सम्भावनायां लिङ् । प्रवर्तनायां लिङ् इत्येव प्रोक्तमस्ति । यतः सम्भाव्ये भविष्यति सम्भावना, प्रश्नः, प्रार्थनाः, औचित्यम्, शपथः (श्रापे=गालीदाने) इच्छा इत्यादयः प्रवर्तनायां विधिः, प्रार्थना, उपदेशः, आदेशः, आज्ञा इत्यादयश्च भवन्ति । एष्वर्थेषु लिङ्लोटावुभौ विधीयेते । यतः प्रयोगेऽनयोरेकलकारे निष्पन्नायाः क्रियाया रूपं प्रयुज्यते । आशीर्वादार्थे लोट् ।

क) संभावना = संभावनयाऽनिश्चितः समयो बोध्यते- संभाव्यतेऽद्य पिता आगच्छेत् । कदाचिदाचार्यःश्वो वृन्दावने गच्छेत् ।

ख) आज्ञाऽनुमति = तीर्थोदकं च समिधः कुसुमानि दर्भान्स्वैरं वनादुपनयन्तु तपोधनानि । कृष्ण ! पुस्तकस्य दशमे पार्श्वे (पृष्टे) समुद्घाटय पाठं च प्रारभस्व ।

ग) शपथः (श्रापः शापो वा) यो मां पिशाच इति वदति तस्य पुत्रा म्रियन्ताम् म्रियेरन् वा । पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ।

घ) सामर्थ्यम् - अनेन रथवेगेन पूर्वप्रथितं वैनतेयमप्यासादयेत् । सिन्धुमपि शोषयाणि ।

८. आशीर्वादः - **आशिषि लिङ्लोटौ ३।३।१७३॥** आशीर्वादेऽर्थे धातोलिङ्लोटौ स्तः । लिङ्लोटौ भविष्यत्कालेऽर्थे एव ज्ञेयौ । सम्राट् चिरञ्जीवी भूयात् भवतु - तात् वा । शिशुः चिरंजीव्यात् जीवतु वा । वीरसूश्च भूयाः भव वा । बालश्चिरं जीव्यात् जीवतु - तात् । त्वं दीर्घायुर्भूयात् भव वा । विधेयासुर्देवाः परमरमणीयां परिणतिम् । वीरप्रसविनी भूयाः भव वा । पुत्रं लभस्वात्मगुणानुरूपम् । आत्मसदृशं भर्तारं लभस्व वीरसूश्च भव । पन्थानः सन्तु ते शिवाः । कुशलं ते भूयात भवतु - तात् । सदारपुत्रो राजपुत्रो जीवतु । गच्छ विजयी भव । पुत्रोऽस्य जनिषीष्ट यः शत्रुश्रियं हृषीष्ट (ह्रियात्) । स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु ।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३९॥

हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियायां अनिष्पत्तौ (अनिश्चिततायाम्) गम्यमानायाम् । सुदृष्टिरभविष्यत् तदा सुभिक्षमभविष्यत् । यदि त्वं निजं पुस्तकं व्यक्रेष्यः तदा अहमक्रेष्यम् । भवान् चित्रमानेष्यत् चेत्तर्हि अहमद्राक्ष्यम् । यदि गायको गानमागास्यत् तर्हि वयं सुखेन अश्रोष्यम् । यदि विद्यार्थी अध्ययने परिश्रममकरिष्यत् तर्हि परीक्षामुदतरिष्यत् । इत्यादि ।

हेतुहेतुमतोर्लिङ् ३।३।१५६॥

कार्यकारणभावे द्योत्ये लिङ् वा स्यात् । कृष्णं नमेच्चेत्सुखं यायात् । लृटचपि - कृष्णं नंस्यति चेत्सुखं यास्यति (प्राप्स्यति) । हेतुः कारणं हेतुमत् कार्यम् ।

इच्छार्थेषु लिङ्लोटौ ३।३।१५७॥

इच्छार्थेषु धातुषु उपपदेषु लिङ्लोटौ स्तः । इच्छामि कामये प्रार्थये वा भवान् ओदनं भुञ्जीत भुङ्क्तां वा शीघ्रं नीरोगो भवेत् भवतु वा । विधिलिङोऽर्थोऽधः सूत्रेऽपि प्रवर्तते -

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ३।३।१६३॥

प्रैषो विधिः । अज्ञातज्ञापनं विधिरिति केचिदाहुः[1] । अतिसर्गः कामाचारानुज्ञा - तदनुकूलप्रेरणा । भवता यष्टव्यम् । विधिः - स्वाध्यायोऽध्येतव्यः । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च । चाल्लोटोऽनुकर्षणं प्राप्तकालार्थम् - भवान्यजतां यजेत वा ।

अर्हे कृत्यतृचश्च ३।३।१६९॥

योग्ये कर्तरि गम्यमाने कृत्यतृचो भवन्ति चाल्लिङ् । त्वया कन्या वोढव्या वहनीया वाह्या वा - वोढुं योग्या इत्यर्थः । तृच् - त्वं कन्यायाा वोढा । भवान्कन्यां वहेत् वहेत वा । त्वया कन्या वहनीया । वधमर्हतीति वध्यः । कर्तुमर्हतीति कृत्यः कार्यो वा इत्यादि ।

शकि लिङ् च ३।३।१७२॥

शक्तौ (सामर्थ्ये) लिङ् स्यात् चात्कृत्याः । त्वं भारं वहेः, वहेथाः वा । त्वया भारो वोढव्यः वहनीयः वाह्यो वा भारो वोढुं शक्य इत्यर्थः । स्मरणीयं यत् विध्याद्यर्थेषु लिङ्लोटौ स्तः । विध्याद्यर्थेष्वर्हे(योग्ये) शक्ये कर्मणि चैतेषु चतुर्ष्वर्थेषु कृत्या विधीयन्ते । तदनुसारमर्थश्च क्रियते ।

५-८ विशेषकालस्यार्थः कालानामवान्तरभेदो वा

विशेषकालस्यार्थं द्योतयितुं कर्तरि लटः स्थाने शतृशानज्भ्यां भूतकर्तरि क्तक्तवतुप्रत्ययाभ्यां कर्तरि लृटः स्थाने स्य-शानचा च कर्मणि लटः स्थाने यक्-शानचा भूतकर्मणि क्तेन च निष्पन्नं पदं सत्तार्थकाद् असधातोर्लट्-लृट्-विधिलिङ्-लङ्-लोट्लकारैर्निष्पन्नेन वाक्यान्ते स्थितेन तिङन्तक्रियापदेन (विधेयपदेन) सह प्रयुज्यते । अन्ये सत्तार्थका भू वृत् विद् धातवोऽपि सन्ति । तथापि प्रयोगे प्रायोऽस्धातुरेव गृह्यते । कालस्य भेदानुसारं कर्तृवाच्यस्य कर्मवाच्यस्य च क्रमशो वाक्यं प्रस्तूयते । स्मरणीयं यत् केवलं कर्तृक्रियाभ्यां युक्तं वाक्यमसंयुक्तं वाक्यं क्तक्तवतुशतृशानजादिप्रत्ययान्तपदेन युक्तं वाक्यं संयुक्तं च वाक्यं प्रोच्यते ।

---

[1] सोमनाथसिरदेनः - प्र.सं.सि.कौ. उत्तरार्धे - प्रकाशक - नेपाल एकेडेमी, काष्ठमण्डप, नेपालः प्र.सं. २०१५, वैक्रमाब्द, पृ.२४१ ।

५-८-१ कर्तृवाच्यस्य कालानामवान्तरभेदाः

५-८-१-१ कर्तृवाच्यस्य वर्तमानकालभेदाः

क) सामान्यवर्तमानकालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं कस्याप्येकस्य धातोर्लटि निष्पन्नं क्रियापदं प्रयुज्यते । अस्मिन्काले कर्तृक्रियाभ्यां युक्तं वाक्यमसंयुक्तं वाक्यं भवति - स पठति । तौ पठतः । ते पठन्ति प्र.पु. । त्वं पठसि । युवां पठथः । यूयं पठथ - म.पु.। अहं पठामि । आवां पठावः । वयं पठामः - उ.पु.। एवमात्मनेपदधातोरपि क्रियापदेन वाक्यं निष्पद्यते ।

ख) अपूर्णवर्तमानकालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं शतृशानज्प्रत्ययान्तपदस्यान्तिमेऽस्धातोर्लट्लकारस्य क्रियापदं प्रयुज्यते । सर्वत्र कर्तुर्वचनानुसारं गौणमुख्यक्रियापदयोः प्रयोगो भवति । अधः प्रस्तुतं वाक्यं संयुक्तं वाक्यं जायते -

पुरुषाः	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	स पठन् अस्ति	त्वं पठन् असि	अहं पठन् अस्मि
द्विवचनम्	तौ पठन्तौ स्तः	यूवां पठन्तौ स्थः	आवां पठन्तौ स्वः
बहुवचनम्	ते पठन्तः सन्ति	यूयं पठन्तः स्थ	वयं पठन्तः स्मः

युष्मदस्मद्भ्यां भिन्ननामशब्दानां प्रथमाविभक्तेर्वचनानुरूपं केवलं प्रथमपुरुषस्य क्रियापदं चिन्त्यम् - रामः खादन् अस्ति । रामौ खादन्तौ स्तः । रामाः खादन्तः सन्ति । सीता नृत्यती अस्ति। सीते नृत्यत्यौ स्तः । सीता नृत्यत्यः सन्ति । युष्मदस्मदोः प्रथमान्तानुसारं तु मध्यमोत्तमपुरुषक्रियाः वचनक्रमेण प्रयुज्यन्ते ।

ग) पूर्णवर्तमानकालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं भूतकर्तरि निष्पन्नस्य क्तक्तवतुप्रत्ययान्तपदस्यान्तेऽस्धातोर्लट्लकारस्य क्रियापदं प्रयुज्यते । अधः प्रस्तुतं वाक्यं संयुक्तं ज्ञेयम्।

क्तः	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	स प्रस्थितः अस्ति	त्वं प्रस्थितः असि	अहं प्रस्थितः अस्मि
द्विवचनम्	तौ प्रस्थितौ स्तः	युवां प्रस्थितौ स्थः	आवां प्रस्थितौ स्वः
बहुवचनम्	ते प्रस्थिताः सन्ति	यूयं प्रस्थिताः स्थ	वयं प्रस्थिताः स्मः
	गतः-तौ-ताः	गतः-तौ-ताः	गतः-तौ-ताः

एषु सर्वेषां नामवाचकशब्दानां प्रथमान्तरूपाणि प्रयुज्यन्ते । यथा - बाला गता अस्ति । बाले गते स्तः । बाला गताः सन्ति । कृष्णः व्रजं गतोऽस्ति । कृष्णौ व्रजं गतौ स्तः । कृष्णाः व्रजं गताः सन्ति। रामः प्रस्थितोऽस्ति । रामौ प्रस्थितौ स्तः । रामाः प्रस्थिताः सन्ति ।

क्तवतुः	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	स गीतां पठिवान् अस्ति	त्वं गीतां पठितवान् असि	अहं गीतां पठितवान् अस्मि
द्विवचनम्	तौ गीतां पठितवन्तौ स्तः	युवां गीतां पठितवन्तौ स्थः	आवां गीतां पठितवन्तौ स्वः
बहुवचनम्	ते गीतां पठितवन्तः सन्ति	यूयं गीतां पठितवन्तः स्थ	वयं गीतां पठितवन्तः स्मः

शिवः नाम जपितवान् अस्ति । शिवौ नाम जपितवन्तौ स्तः । शिवा नाम जपितवन्तः सन्ति। उमा शिवं सेवितवती अस्ति । उमे शिवं सेवितवत्यौ स्तः । उमाः शिवं सेवितवत्यः सन्ति इत्यादि ।

पूर्णवर्तमानकाल आसन्नभूतकाल इव मिलित आभाति । परं द्वयोर्वस्तुतोऽन्तरमस्ति । यत्राऽऽसन्नभूतस्य क्रिया समाप्तेः समीपतां सूचयति तत्र पूर्णवर्तमानोऽसमाप्तक्रियायाः पूर्णतां च। संस्कृतस्यानुवादेऽनयोर्वाक्यं प्रायः समानं भवति । अनयोर्वाक्यस्य विशेषार्थः प्रसङ्गेन बोध्यो भवति।

घ) संदिग्धवर्तमानकालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं शतृशानच्प्रत्ययान्तपदस्यान्तिमेऽस्धातोर्लृट्लकारस्य क्रियापदं प्रयुज्यते । प्रस्तुतं वाक्यं संयुक्तं ज्ञेयम् ।

शतृ	प्र. पु.	म. पु.	उ. पु.
ए.व.	स कुर्वन् भविष्यति	त्वं कुर्वन् भविष्यसि	अहं कुर्वन् भविष्यामि
द्वि.व.	तौ कुर्वन्तौ भविष्यतः	युवां कुर्वन्तौ भविष्यथः	आवां कुर्वन्तौ भविष्यावः
ब.व.	ते कुर्वन्तः भविष्यन्ति	यूयं कुर्वन्तो भविष्यथ	वयं कुर्वन्तः भविष्यामः
शानच्	कुर्वाणः-णौ-णाः	कुर्वाणः-णौ-णाः	कुर्वाणः-णौ-णाः

नामवाचकशब्दानां प्रयोगे प्रथमपुरुषः - पुत्रः कुर्वाणो भविष्यति । पुत्रौ कुर्वाणौ भविष्यतः । पुत्राः कुर्वाणा भविष्यन्ति । पुत्री कुर्वाणा भविष्यति । पुत्र्यौ कुर्वाणे भविष्यतः । पुत्र्यः कुर्वाणा भविष्यन्ति । स्त्रियाम् - कुर्वती कुर्वत्यौ कुर्वत्यः इति भवन्ति ।

ङ) अनारब्धवर्तमानकालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं स्य-शतृशानच्प्रत्ययान्तपदस्यान्तिमेऽस्धातोर्लृट्लकारस्य क्रियापदं प्रयुज्यते । प्रस्तुतं वाक्यं संयुक्तं बोध्यम् ।

प्र. पु.	म. पु.	उ. पु.
ए.व. - स गमिष्यन् अस्ति	त्वं गमिष्यन् असि	अहं गमिष्यम् अस्मि
द्वि.व. - तौ गमिष्यन्तौ स्तः	युवां गमिष्यन्तौ स्थः	आवां गमिष्यन्तौ स्वः
ब.व. - ते गमिष्यन्तः सन्ति	यूयं गमिष्यन्तः स्थ	वयं गमिष्यन्तः स्मः

हरिः गमिष्यन् अस्ति । हरी गमिष्यन्तौ स्तः । हरयः गमिष्यन्तः सन्ति । रमा गमिष्यन्ती अस्ति । रमे गमिष्यन्त्यौ स्तः । रमाः गमिष्यन्त्यः सन्ति ।

प्र. पु.	म. पु.	उ. पु.
ए.व. - स शयिष्यमाणोऽस्ति	त्वं शयिष्यमाणोऽसि	अहं शयिष्यमाणोऽस्मि
द्वि.व. - तौ शयिष्यमाणौ स्तः	आवां शयिष्यमाणौ स्थः	आवां शयिष्यमाणा स्वः
ब.व. - ते शयिष्यमाणाः सन्ति	यूयं शयिष्यमाणाः स्थ	वयं शयिष्यमाणाः स्मः

विष्णुः शयिष्यमाणोऽस्ति । विष्णू शयिष्यमाणौ स्तः । विष्णवः शयिष्यमाणाः सन्ति । लक्ष्मीः शयिष्यमाणा अस्ति । लक्ष्म्यौ शयिष्यमाणे स्तः । लक्ष्म्यः शयिष्यमाणाः सन्ति । इत्यादि ।

च) संभाव्य(संभावना)वर्तमानः-अस्य कालस्यार्थबोधकं वाक्यं विधातुं शतृशानच्प्रत्ययान्तपदस्यान्तेऽस्धातोर्विधिलिङ्लकारस्य क्रियापदं प्रयुज्यते । अधःस्थितं वाक्यं संयुक्तं ज्ञेयम् ।

प्र. पु.	म. पु.	उ. पु.
ए.व. - स ब्रूवन् (ब्रूवाणः) स्यात्	त्वं ब्रूवन् (ब्रूवाणः) स्याः	अहं ब्रूवन् (ब्रूवाणः) स्याम्
द्वि.व. - तौ ब्रूवन्तौ (ब्रूवाणौ) स्याताम्	युवां ब्रूवन्तौ (ब्रूवाणौ) स्यातम्	आवां ब्रूवन्तौ (ब्रूवाणौ) स्याव
ब.व. - ते ब्रूवन्तः (ब्रूवाणाः) स्युः	यूयं ब्रूवन्तः (ब्रूवाणाः) स्यात	वयं ब्रूवन्तः (ब्रूवाणाः) स्याम

सुरः ब्रूवन् (ब्रूवाणः) स्यात् । सुरौ ब्रूवन्तौ (ब्रूवाणौ) स्याताम् । सुराः ब्रूवन्तः (ब्रूवाणाः) स्युः । स चलन् स्यात् । सा पश्यन्ती स्यात् । गावो खादन्तः खादन्त्यो वा स्युः । इत्यादि । संभाव्यवर्तमानस्यापूर्णसंभावनायाश्च वाक्यं समानं भवति । अनयोर्वाक्यस्य भिन्नोऽर्थः प्रसङ्गेन बोध्यो भवति

५-८-१-२ कर्तृवाच्यस्य भविष्यत्कालस्य भेदाः

क) सामान्यभविष्यत्कालः-कस्यापि धातोर्लृट्लकारस्य क्रियापदस्य रूपाणि प्रयुज्यन्ते । केवलं कर्तृक्रियापदयोर्युक्तं वाक्यमसंयुक्तं वाक्यं प्रोच्यते - स गमिष्यति । तौ गमिष्यतः । ते गमिष्यन्ति । त्वं गमिष्यसि । युवां गमिष्यथः । यूयं गमिष्यथ । ते गमिष्यन्ति । त्वं गमिष्यसि । युवां गमिष्यथः । यूयं गमिष्यथ । अहं गमिष्यामि । आवां गमिष्यावः । वयं गमिष्यामः । एवमन्यदपि विधेयम् ।

ख) अपूर्णभविष्यत्कालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं शतृशानच्प्रत्ययान्तपदस्यान्तेऽस्धातोर्लृट्लकरस्य क्रियापदं प्रयुज्यते । अत्र निष्पन्नं वाक्यं संयुक्तं वाक्यं भवति -

	प्र. पु.	म. पु.	उ. पु.
ए.व. -	स शृण्वन् भविष्यति	त्वं शृण्वन् भविष्यसि	अहं शृण्वन् भविष्यामि
द्वि.व. -	तौ शृण्वन्तौ भविष्यतः	युवां शृण्वन्तौ भविष्यथः	आवां शृण्वन्तौ भविष्यावः
ब.व. -	ते शृण्वन्तो भविष्यन्ति	यूयं शृण्वन्तो भविष्यथ	वयं शृण्वन्तो भविष्यामः

कृष्णःशयानो भविष्यति । कृष्णौ शयानौ भविष्यतः । कृष्णाः शयाना भविष्यन्ति । सीता स्वपती भविष्यति । सीते स्वपत्यौ भविष्यतः । सीताः स्वपत्यः भविष्यन्ति । इत्यादि ।

स्त्रियाम् =	प्र. पु.	म. पु.	उ. पु.
ए.व. -	सा लभमाना भविष्यति	त्वं लभमाना भविष्यसि	अहं लभमाना भविष्यामि
द्वि.व. -	ते लभमाने भविष्यतः	युवां लभमाने भविष्यथः	आवां लभमाने भविष्यावः
ब.व. -	ताः लभमानाः भविष्यन्ति	यूयं लभमानाः भविष्यथ	वयं लभमानाः भविष्यामः

बालिका खादन्ती भविष्यति । बालिके खादन्त्यौ भविष्यतः । बालिकाः खादन्त्यः भविष्यन्ति। इत्यादि ।

ग) पूर्णभविष्यत्कालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं भूतकर्तरि निष्पन्नस्य क्तक्तवतुप्रत्ययान्तपदस्यान्तिमेऽस्धातोर्लृट्लकारस्य क्रियापदानि प्रयुज्यन्ते । वाक्यं संयुक्तं ज्ञेयम् - स गतो गतवान्वा भविष्यति । तौ गतौ गतवन्तौ वा भविष्यतः । ते गता गतवन्तो वा भविष्यन्ति । त्वं नतः नतवान्वा भविष्यसि । यूवां नतौ नतवन्तौ वा भविष्यथः । यूयं नताः नतवन्तो वा भविष्यथ। अहं गतः गतवान्वा भविष्यामि । आवां गतौ गतवन्तौ वा गमिष्यावः । वयं गता खादितवन्तो भविष्यामः । बालः सुप्तः सुप्तवान्वा भविष्यति ।

घ) अनारब्धभविष्यत्कालः - अस्य कालस्य वाक्यं विधातुं लृटि निष्पन्नयोःशतृशानच्प्रत्ययान्तयोर्गौणक्रिययोरन्तेऽस्धातोर्लृट्लकारस्य क्रियापदं प्रयुज्यते । स दास्यन् नेष्यमाणो वा भविष्यति । तौ दास्यन्तौ नेष्यमाणौ वा भविष्यतः । ते दास्यन्तः नेष्यमाणा वा भविष्यन्तिः । त्वं दास्यन् दास्यमानो वा भविष्यसि । यूवां दास्यन्तौ दास्यमानौ वा भविष्यथः । यूयं दास्यन्तो दाष्यमाना वा भविष्यथ । अहं करिष्यन् करिष्यमाणो वा भविष्यामि । आवां करिष्यन्तौ करिष्यमाणौ वा भविष्यावः । वयं करिष्यन्तः करिष्यमाणा वा भविष्यामः ।

५-८-१-३ संभावनाया भेदाः

क) संभाव्यभविष्यत् संभावना वा - संभाव्यभविष्यति संभावनायां वा धातोर्विधिलिङःक्रिया प्रयुज्यते - स भवेत् । तौ भवेताम् । ते भवेयुः । त्वं भवेः । युवां भवेताम् । यूयं भवेत । अहं भवेयम् । आवां भवेव । वयं भवेम । रामो गच्छेत् । रामौ गच्छेताम् । रामा गच्छेयुः । सीता नृत्येत् । सीते नृत्येताम् । सीताः नृत्येयुः । सः कुर्वीत । त्वं कुर्वीथाः । अहं कुर्वीय ।

ख) अपूर्णसंभावना-अस्या भावनाया वाक्यं विधातुं शतृशानच्प्रत्ययान्तपदस्यान्तेऽसधातोर्विधिलिङः क्रिया प्रयुज्यते । वाक्यं संयुक्तं ज्ञेयम् - स गच्छन् स्यात् । तौ गच्छन्तौ स्याताम् । ते गच्छन्तः स्युः । त्वं गच्छन् स्याः । युवां गच्छन्तौ स्यातम् । यूयं गच्छन्तः स्यात । अहं गच्छन् स्याम् । आवां गच्छन्तौ स्याव । वयं गच्छन्तः स्याम । एवं शयानः शयानौ शयाना इत्येषां प्रयोगो विधेयः ।

ग) पूर्णसंभावना - अस्या भावनाया वाक्यं विधातुं भूतकर्तरि निष्पन्नस्य क्तक्तवतुप्रत्ययान्तपदस्यान्तेऽस्धातोर्विधिलिङ्लकारस्य क्रियापदं प्रयुज्यते - स गतो गतवान् वा स्यात् । तौ गतौ गतवन्तौ वा स्याताम् । ते गता गतवन्तो वा स्युः । त्वं गतः गतवान् वा स्याः । युवां गतौ गतवन्तौ वा स्यातम् । यूयं गताः गतवन्तो वा स्यात । अहं गतः गतवान् वा स्याम् । आवां गतौ गतवन्तौ स्याव । वयं गता गतवन्तो वा स्याम ।

घ) अनारब्धसंभावना - अस्या भावनाया वाक्यं विधातुं स्य-शतृशानच्प्रत्ययान्तपदस्यान्तेऽस् धातोर्विधिलिङ्लकारस्य क्रियापदं प्रयुज्यते - स दास्यन् शयिष्यमाणो वा स्यात् । तौ दास्यन्तौ शयिष्यमाणौ वा स्याताम् । ते दास्यन्तः शयिष्यमाणाः वा स्युः । एवं धातोर्विधिलिङो मध्यमोत्तमपुरुषक्रियासु युष्मदस्मदोः प्रथमान्तपदानि क्रमशः प्रयुज्य वाक्यं रचयेत् ।

५-८-१-४ कर्तृवाच्यस्यानद्यतनभूतकालस्य भेदाः

क) सामान्यानद्यतनभूतकालः - अस्मिन्काले लङ् विधीयते । सोऽगच्छत् । साऽखादत् । तेऽवदन् । अहमवदम् । त्वमसेवेथाः । अहमसेवे । इत्यादि ।

सामान्यानद्यतनभूतकालस्य बोधनार्थे भूतकर्तरि निष्पन्ना क्तक्तवतुप्रत्ययान्तक्रियाऽपि प्रयुज्यते - स गतो गतवान्वा । सा गता गतवती वा । सोऽपठत् पठितवान्वा । साऽपठत् पठितवती वा । ताः अपठन् पठितवत्यः । इत्यादि ।

ख) अपूर्णभूतकालः - अयं कालो द्विविधो मतः सामान्यसातत्यबोधकः पूर्णसातत्यबोधकश्च । १. सामान्यसातत्यबोधकस्यापूर्णभूतकालस्य वाक्यं विधातुं धातोर्लटि निष्पन्नायाः क्रियाया अन्ते "स्म" इति पदं प्रयुज्यते ।

स पठति स्म	युधिष्ठिरः ब्रवीति स्म	त्वं गच्छसि स्म
सा पठति स्म	कुन्ती ब्रूते स्म	अहं गच्छामि स्म

२. पूर्णसातत्यबोधकभूतकालः-अस्मिन्नर्थे वाक्यं विधातुं शतृशानच्प्रत्ययान्तपदस्यान्तिमेऽस्धातोर्भूतकालिका क्रिया प्रयुज्यते ।

शतृ

	प्र. पु.	म. पु.	उ. पु.
ए.व. -	स गच्छन् आसीत्	त्वं गच्छन् आसीः	अहं गच्छन् आसम्
द्वि.व. -	तौ गच्छन्तौ आस्ताम्	युवां गच्छन्तौ आस्तम्	आवां गच्छन्तौ आस्व
ब.व. -	ते गच्छन्तः आसन्	यूयं गच्छन्तः आस्त	वयं गच्छन्तः आस्म

दुर्गा क्रडन्ती आसीत् । दुर्गे क्रीडन्त्यौ आस्ताम् । दुर्गाः क्रीडन्त्य आसन् । छात्रः पठन् आसीत् । छात्रौ पठन्तौ आस्ताम् । छात्राः पठन्त आसन् । इत्यादि ।

ग) पूर्णभूतकालः - अस्य कालस्य वाक्ये क्तक्तवतुप्रत्ययान्ततिङन्ताऽतिङन्ता च क्रिया भवति। ते उभे क्रिये भूतकालिके भवतः । अन्त्येऽस्धातोर्लङः क्रिया प्रयुज्यते -

क्तः	प्र. पु.	म. पु.	उ. पु.
ए.व. -	स जीवित आसीत्	त्वं जीवितः आसीः	अहं जीवितः आसम्
द्वि.व. -	तौ जीवतौ आस्ताम्	युवां जीवितौ आस्तम्	आवां जीवितौ आस्व
ब.व. -	ते जीविताः आसन्	यूयं जीविताः आस्त	वयं जीविताः आस्म

क्तवतु	प्र. पु.	म. पु.	उ. पु.
ए.व. -	स नतवान् आसीत्	त्वं नतवान् आसीः	अहं नतवान् आसम्
द्वि.व. -	तौ नतवन्तौ आस्ताम्	युवां नतवन्तौ आस्तम्	आवां नतवन्तौ आस्व
ब.व. -	ते नतवन्तः आसन्	यूयं नतवन्तः आस्त	वयं नतवन्तः आस्म

शिवो गत आसीत् । रामौ गतौ आस्ताम् । रामाः गताः आसन् । देव्यौ गते आस्ताम् । देव्यो गता आसन् । गौरी गतवती आसीत् । देवौ गतौ आस्ताम् । जनाः दृष्टवन्त आसन् । सेना प्रेषिता आसीत् । पुत्र्यः शयितवत्य आसन् । पुत्रौ पितरौ नतवन्तौ आस्ताम् ।

घ) आसन्नभूतकालः - अस्य कालस्यार्थबोधकं वाक्यं विधातुं भूतकर्तरि विहितस्य क्तक्तवतुप्रत्ययान्तपदस्यान्तेऽस्धातोर्वर्तमानकालिकं तिङन्तक्रियापदं प्रयुज्यते । आसन्नभूतकालः पूर्णवर्तमानकाल इव प्रतिभाति । परं तयोर्वाक्ययोर्भिन्नोऽर्थः प्रसङ्गेन बोध्यो भवति-स चलितोऽस्ति। त्वं गतोऽसि । अहं त्वां नतोऽस्मि । स पठितवान् अस्ति । त्वं गतवान् असि । अहं दृष्टवानस्मि । रामो गतो गतवान् वाऽस्ति । रामौ गतौ गतवन्तौ वा स्तः । रामाः गताः गतवन्तो वा सन्ति । पुत्री गता गतवती वाऽस्ति । पुत्र्यौ गते गतवत्यौ वा स्तः । पुत्र्य गता गतवत्यो वा सन्ति । सा गताऽस्ति। इत्यादि ।

ङ) सदिग्धभूतकालः - अस्य कालस्य वाक्यं विधातुं भूतकर्तरि निपन्नस्य क्तक्तवतुप्रत्ययान्तपदस्यान्तेऽस्धातोलृट्लकारस्य क्रियापदं प्रयुज्यते ।

क्तः	प्र. पु.	म. पु.	उ. पु.
ए.व. -	स स्थितो भविष्यति	त्वं स्थितो भविष्यसि	अहं स्थितो भविष्यामि
द्वि.व. -	तौ स्थितौ भविष्यतः	युवां स्थितौ भविष्यथः	आवां स्थितौ भविष्यावः
व.व. -	ते स्थिताः भविष्यन्ति	यूयं स्थिताः भविष्यथ	वयं स्थिताः भविष्यामः

स कार्यं कृतवान् भविष्यति । तौ कार्ये कृतवन्तौ भविष्यतः । ते कार्याणि कृतवन्तो भविष्यन्ति। त्वं फलं खादितवान् भविष्यसि । युवां फले खादितवन्तौ भविष्यथः । यूयं फलानि खादितवन्तो भविष्यन्ति । भृत्यो कार्यं विहितवान्भविष्यति । भृत्यौ कार्यं विहितवन्तौ भविष्यतः । युवां फले खादितवन्तौ भविष्यथः । यूयं फलानि खादितवन्तो भविष्यन्ति । भृत्याःकार्यणि विहितवन्तो भविष्यन्ति। स्त्रियाम्, विहितवती-त्यौ-त्यः । गौरी गता भविष्यति । पुत्र्यौ गते भविष्यतः । पुत्र्याः गताः भविष्यन्ति। सीता भुक्तवती भविष्यति । नार्यौ भुक्तवत्यौ भविष्यतः । पुत्र्यो भुक्तवत्यो भविष्यन्ति । इत्यादि ।

च) संभाव्यभूतकालः - अस्य कालस्य वाक्यं विधातुं भूतकर्तरि क्तक्तवतुप्रत्यायान्तपदस्यान्तेऽस्धातोर्विधिलिङः क्रियापदं प्रयुज्यते ।

क्र.	प्र. पु.	म. पु.	उ. पु.
ए.व. -	स स्थितः स्यात्	त्वं स्थितः स्याः	अहं स्थितः स्याम्
द्वि.व. -	तौ स्थितौ स्याताम्	युवां स्थितौ स्यातम्	आवां स्थितौ स्याव
ब.व. -	ते स्थिताः स्युः	यूयं स्थिताः स्यात	वयं स्थिताः स्याम

स चलितो भवेत् । ते तत्र गता भवेयुः । त्वं कच्चिद् दत्तवान् भवेः । कच्चित् यूयं दत्तवन्तः भवेत । कच्चित् भवान् लिखितवान् भवेत् । कच्चित् त्वं खादितवान् भवेः । तौ नीतवन्तौ भवेताम् । स कृतवान् स्यात् । तौ कृतवन्तौ स्याताम् । ते कृतवन्तः स्यु । त्वं कृतवान् स्याः । युवां कृतवन्तौ स्यातम् । यूयं कृतवन्तः स्यात । अहं कृतवान् स्याम् । आवां कृतवन्तौ स्याव । वयं कृतवन्तः स्याम । अहं लिखितवान् भवेयम् । आवां गतवन्तौ भवेव । वयं याचितवन्तः भवेम । कच्चित् गुरुर्विद्यालयमागतवान् स्यात् । छात्रौ स्वस्वपाठं पठितवन्तौ स्यातम् । जना अत्र गतवन्तः आगतवन्तो वा स्युः ।

५-८-१-५ प्रेरणार्थिका (आज्ञार्थिका) क्रिया

एतदर्थिका क्रिया द्विविधा भवति प्रत्यक्षविधिः परोक्षविधिश्च । सामान्ये विध्यर्थेषु विधिलिङ्लोटौ प्रयुज्येते । अत्रापि पत्यक्षविधौ लोट् परोक्षविधौ लिङ् च प्रयुज्येते । द्वयोर्लकारयोर्मध्ये लोटो विधौ किञ्चिदधिकं बलं लिङो विधौ किञ्चिन्न्यूनं च बलं तिष्ठति ।

प्रत्यक्षविधिः		परोक्षविधिः	
भवान् गच्छतु	रामः खादतु	भवान् गच्छेत्	कृष्णः नमेत्
यूयं वदतम्	अहं पठानि	यूयं वदेत	अहं पठेयम्
त्वं गच्छ	भवती पचतु	त्वं पठेः	भवती गायेत्
स वदतु	युवां भवताम्	छात्राः पठेयुः	ते वन्देरन्

कालानामन्यः कश्चिदपि प्रयोग उपर्युक्तेषु भेदेषु समाहिता भवन्ति । सकर्मिकायां कृदन्तक्रियायां विवक्षानुसारं कर्मकरणादिकारकाणि प्रयुज्यन्ते । अकर्मिकायां कृदन्तक्रियायां तु कर्म न धातोः कर्मणोऽभावत् ।

५-८-२ कर्मवाच्यस्य कालानामवान्तरभेदाः

५-८-२-१. कर्मवाच्यस्य वर्तमानकालस्य भेदाः

क) सामान्यवर्तमानकालः - अस्मिन्काले कस्याप्येकस्य सकर्मकधातोःकर्मणि लटि निष्पन्ना क्रिया प्रयुज्यते । कर्तृवाच्ये प्रयुक्तः कर्ता कर्मवाच्ये परिवर्त्य तृतीयान्तः, कर्म प्रथमान्तं च क्रियते । कर्मप्रथमान्तानुसारं कर्मवाच्यस्य क्रियापदं प्रयुज्यते । अत्र बोध्यं यत् युष्मदःप्रथमान्तस्य प्रयोगे कृते मध्यमपुरुषस्य क्रियापदमस्मदःप्रथमान्तस्य प्रयोगे कृते चोत्तमपुरुषस्य क्रियापदं प्रयुज्यते । अवशिष्टशब्दानां प्रथमान्तपदस्य प्रयोगे प्रथमपुरुषस्य क्रियापदं प्रयुज्यते । कर्मवाच्येऽयमेव नियमः प्रयुज्यते । अत्रासंयुक्तं वाक्यम्- स पठ्यते । तौ पठ्येते । ते पठ्यन्ते । त्वं पठ्यसे । युवां पठ्येथे । यूयं पठ्यध्वे । अहं पठ्ये । आवां पठ्यावहे । वयं पठ्यामहे । छात्रः गम्यते । छात्रौ गम्येते । छात्राः गम्यन्ते । भक्तो नम्यते । भक्तौ नम्येते । भक्ताः नम्यन्ते । पत्रं प्रेष्यते । पत्रे प्रेष्येते । पत्राणि प्रेष्यन्ते । इत्यादि ।

ख) अपूर्णवर्तमानकालः - अस्मिन्नर्थे कर्मणि यक् शानच्प्रत्ययान्तपदस्यान्तिमेऽस्धातोर्लटि निष्पन्नं तिङन्तक्रियापदं प्रयुज्यते । कर्मणि यक्शानचा निष्पन्नं पदं विशेषणत्वात्प्रथमानुसारं प्रयुज्यते । अत्र संयुक्तं वाक्यं ज्ञेयम् - तेन स गम्यमानोऽस्ति । त्वया तौ गम्यमानौ स्तः । मया ते गम्यमानाः

सन्ति । मया त्वं गम्यमानोऽसि । अस्माभिर्युवां गम्यमानौ स्थः । आवाभ्यां यूयं गम्यमानाः स्थः । भवता अहं गम्यमानोऽस्मि । युवाभ्यां आवां गम्यमानौ स्वः । युष्माभिर्वयं गम्यमानाः स्मः ।

ग) पूर्णवर्तमानकालः - अस्मिन्नर्थे सकर्मकधातोःकर्मणि क्तेन निष्पन्नस्य पदस्यान्तेऽस् धातोर्लटःक्रियाः प्रयुज्यते । क्तान्तपदं विशेषणत्वात्प्रथमान्तानुसारं प्रयुज्यते । क्रियायाः प्रयोगस्य नियम उपरि प्रोक्तः । तेन स नीतोऽस्ति, तौ नीतौ स्तः, ते नीताःसन्ति वा । मया त्वं नीतोऽसि, युवां नीतौ स्थः, यूयं नीताः स्थ । त्वया अहं नीतोऽस्मि, आवां नीतौ स्वः, वयं नीताः स्मः वा । भक्तेन कृष्णःपूजितोऽस्ति, कृष्णौ पूजितौ स्तः, कृष्णाः पूजिताः सन्ति वा । पुत्रेण माता पूजिताऽस्ति, मातरौ पूजिते स्तः, मातरः पूजिताः सन्ति वा । मया पत्रं लिखितमस्ति, पत्रे लिखिते स्तः, पत्राणि लिखितानि सन्ति वा । इत्यादि ।

घ) अनारब्धवर्तमानकालः - अस्य कालस्य वाक्यं विधातुं स्य-शानच्प्रत्ययान्तपदस्यान्तेऽस्धातोर्लटि निष्पन्नं क्रियापदं प्रयुज्यते - अनेन स नेष्यमाणोऽस्ति, तौ नेष्यमाणौ स्तः, ते नेष्यमाणाः सन्ति वा । मया त्वं गंस्यमानोऽसि, युवां गंस्यमानौ स्थः, यूयं गंस्यमाना स्थः वा । भवता अहं द्रक्ष्यमाणोऽस्मि, आवां द्रक्षमाणौ स्वः, वयं द्रक्ष्यमाणाः स्मः वा । तेन पत्रं लेखिष्यमाणमस्ति, पत्रे लेखिष्यमाणे स्तः, पत्राणि लेखिष्यमाणानि सन्ति वा इत्यादि ।

५-८-२-२ कर्मवाच्यस्य भूतकालस्य भेदाः

क) सामान्यभूतकालः - अस्मिन्नर्थे कस्यापि सकर्मकधातोः कर्मणि निष्पन्नं लङः क्रियापदं प्रयुज्यते - तेन सोऽगम्यत, तौ अगम्येताम् ते अगम्यन्त, त्वमगम्यथाः, युवामगम्येथाम्, यूयमगम्यध्वम् वा । रामेण अहमगम्ये आवामगम्यावहि, वयमगम्यामहि वा । तेन ग्रामोऽगम्यत, ग्रामौ अगम्येताम्, ग्रामा अगम्यन्त । एवं प्रकारेण सर्वत्र चिन्त्यम् ।

ख) अपूर्णभूतकालः - अस्मिन्काले वाक्यं विधातुं कर्मणि यक्शानच्भ्यां निष्पन्नस्य पदस्यान्ते कर्तरि विहितस्यास्धातोर्लङः क्रियापदं प्रयुज्यते - पित्रा स नीयमान आसीत् तौ नीयमानौ आस्ताम्, ते नीयमाना आसन् वा । मात्रा त्वं नीयमान आसीः, युवां नीयमानौ आस्तम्, यूयं नीयमानाः आस्त वा । गुरुणा अहं नीयमान आसम्, आवां नीयमानौ स्वः, वयं नीयमानाः स्मः वा । मया पत्रं लिख्यमानमासीत्, पत्रे लिख्यमाने आस्ताम् पत्राणि लिख्यमानि आसन्वा । छात्रेण वेदः पठ्यमान आसीत् वेदौ पठ्यमानौ आस्तम्, वेदाः पठ्यमाना आसन्वा । त्वया अहं पठ्यमान आसम्, आवां पठ्यमानौ आस्व, वयं पठ्यमाना आस्म वा । इत्यादि ।

ग) पूर्णभूतकालः - अस्मिन्नर्थे भूतकर्मणि निष्पन्नस्य क्तान्तपदस्यान्ते कर्तरि विहितस्यास्धार्तोलङः क्रियापदं प्रयुज्यते - भक्तेन तत् श्रुतमासीत्, ते श्रूते आस्ताम्, तानि श्रूतानि आसन् वा । शिवेन त्वं श्रुत आसीः, युवां श्रुतौ आस्तम्, यूयं श्रुता आस्त वा । हरिणाऽहं श्रुत आसम्, आवां श्रुतौ स्व, वयं श्रुताः स्म वा । त्वया पत्रं लिखितमासीत्, पत्रे लिखिते आस्ताम्, पत्राणि लिखितानि आसन्वा ।

घ) अनारब्धभूतकालः - अस्मिन्नर्थे निष्पन्नस्य स्य-शानच्प्रत्यान्तपदस्यान्ते कर्तरि विहितस्यास्धातोर्लङः क्रियापदं प्रयुज्यते - तेन स लेखिष्यमाण आसीत्, तौ लेखिष्यमाणौ आस्ताम्, ते लेखिष्यमाणाः आसन् वा । भवता अहं नेष्यमाणः-णा वा आसम्, आवां नेष्यमाणौ-णे वाऽऽस्व । वयं नेष्यमाणा स्म । पुत्र्या गीतं गास्यमानमासीत् । गीते गास्यमाने आस्ताम्, गीतानि गास्यमानानि आसन् । इत्यादि ।

५-८-२-३ कर्मवाच्यस्य भविष्यत्कालस्य भेदाः

क) सामान्यभविष्यत्कालः - अस्मिन्नर्थे कर्मप्रथमान्तानुसारं कर्मणि निष्पन्नस्य धातोर्लृट्लकारस्य क्रियापदं प्रयुज्यते - छात्रेण स लेखिष्यते तौ लेखिष्येते, ते लेखिष्यन्ते,त्वं लेखिष्यसे, युवां लेखिष्येथे, यूयं लेखिष्यध्वे, अहं लेखिष्ये, आवां लेखिष्यावहे, वयं लेखिष्यामहे वा । मया फलं खादिष्यते, फले खादिष्येते, फलानि खादिष्यन्ते वा । इत्यादि ।

ख) अपूर्णभविष्यत्कालः - अस्मिन्नर्थे भविष्यत्कर्मणि निष्पन्नस्य यक्शानच्प्रत्ययान्तपदस्यान्तेऽस्धातोर्लृटि निष्पन्ना क्रिया प्रयुज्यते - गुरुणा स प्रोच्यमानो भविष्यति, तौ प्रोच्यमानौ भविष्यतः, ते प्रोच्यमानाः भविष्यन्ति, त्वं प्रोच्यमानो भविष्यसि, युवां प्रोच्यमानौ भविष्यथः, यूयं प्रोच्यमाना भविष्यथ, अहं प्रोच्यमानो भविष्यामि, आवां प्रोच्यमानौ भविष्यावः, वयं प्रोच्यमाना भविष्यामः वा । भवता तद्दृश्यमानं भविष्यति, ते दृश्यमाने भविष्यतः, तानि दृश्यमानानि भविष्यन्ति वा । इत्यादि ।

ग) पूर्णभविष्यत्कालः - कर्मणि निष्पन्नं क्तान्तपदपूर्वकमेवात्र ज्ञेयम् - केनापि स दृष्टो भविष्यति, तौ दृष्टौ भविष्यतः, ते दृष्टा भविष्यन्ति, त्वं दृष्टो भविष्यसि, युवां दृष्टौ भविष्यथः, यूयं दृष्टा भविष्यथ, अहं दृष्टो भविष्यामि आवां दृष्टौ भविष्यावः, वयं दृष्टाः भविष्यामः वा । रामो दृष्टो भविष्यति, रामौ दृष्टौ भविष्यतः, रामाः दृष्टाः भविष्यन्ति, रामौ दृष्टौ भविष्यतः, रामाः दृष्टाः भविष्यन्ति वा इत्यादि ।

घ) अनारब्धभविष्यत्कालः - कर्मणि लृटः स्थाने विहितस्य स्य-शानच्प्रत्ययान्तपदस्यान्ते कर्तरि सिद्धमस्धातोर्लृटो रूपं प्रयुज्यते - सर्वैः स द्रक्ष्यमाणो भविष्यति । तौ द्रक्ष्यमाणौ भविष्यतः । ते द्रक्ष्यमाणा भविष्यन्ति, त्वं द्रक्ष्यमाणो भविष्यसि । युवां द्रक्ष्यमाणौ भविष्यथः । यूयं द्रक्ष्यमाणा भविष्यथ, अहं द्रक्ष्यमाणो भविष्यामि । आवां द्रक्ष्यमाणौ भविष्यावः । वयं द्रक्ष्यमाणाः भविष्यामः । राक्षसीभिः सीता तर्जिष्यमाणा भविष्यति, सीते तर्जिष्यमाणे भविष्यतः, सीताः तर्जिष्यमाणाः भविष्यन्ति वा । इत्यादि ।

५-८-२-४ कर्मणि विधिः

क) सामान्यविधिः - सामान्यविधौ लोट्लकास्य क्रिया प्रयुज्यते - यजमानेन स दीयताम्, तौ दीयेताम्, ते दीयन्ताम्, त्वं दीयस्व, यूवां दीयेथाम्, यूयं दीयध्वम्, अहं दीयै, आवां दीयावहै, वयं दीयामहै । इत्यादि ।

ख) अपूर्णविधिः - अस्मिन्नर्थे कर्मणः लटः स्थाने यक्-शानच्भ्यां निष्पन्नायाः क्रियायाः पदस्यान्तेऽस्धातोर्लोटः क्रियापदं प्रयुज्यते - मया तद्दीयमानमस्तु, ते दीयमाने स्ताम्, तानि दीयमानानि सन्तु । त्वं दीयमान एधि । युवां दीयमानौ स्तम्, यूयं दीयमानाः स्त, अहं दीयमानोऽसानि, आवां दीयमानौ असाव, वयं दीयमाना असाम । तेन कर्म क्रियामाणमस्तु, कर्माणी क्रियमाणे स्ताम्, कर्माणि क्रियमाणानि सन्तु वा । इत्यादि ।

ग) पूर्णविधिः - अस्मिन्नर्थे भूतकर्मणि विहितस्य क्तान्तपदस्याऽन्तेऽस्धातोर्लोटः क्रियापदं प्रयुज्यते - मया स दृष्टोऽस्तु, तौ दृष्टौ स्तम्, ते दृष्टाः सन्तु, त्वं दृष्ट एधि, युवां दृष्टौ स्तम्, यूयं दृष्टाः स्त । त्वयाऽहं दृष्टोऽसानि, आवां दृष्टौ असाव, वयं दृष्टा असाम वा । तद्दत्तमस्तु, ते दत्ते स्ताम् तानि दत्तानि सन्तु । संज्ञावाचकशब्दे सति - त्वया मया वा कृष्णो दृष्टोऽस्तु, रामौ दृष्टौ स्ताम् । सर्वै फलानि प्राप्तानि सन्तु वा । एवं सर्वत्र ज्ञेयम् ।

घ) अनारब्धविधिः - केनापि तद्दास्यमानमस्तु, ते दास्यमाने स्ताम् । तानि दास्यमानानि सन्तु । त्वं दास्यमानः - ना एधि, युवां दास्यमानौ स्तम्, यूयं दास्यमाना-नाः स्त, अहं दास्यमानः-ना असानि,

आवां दास्यमानौ-ने असाव, वयं दास्यमानाः असाम वा । तेन गौर्दास्यमानाऽस्तु, गावौ दास्यमाने स्ताम्, गावः दास्यमानाः सन्तु वा इत्यादि ।

५-८-२-५ कर्मणि संभावना

क) सामान्यसंभावना - संभावनायां वि.लिङ् प्रयुज्यते । यतोऽत्र कर्मणि निष्पन्नं विधिलिङ क्रियापदं प्रयुज्यते - जनैस्तद्दृश्येत, ते दृश्येयाताम्, तानि दृश्येरन्, त्वं दृश्येथाः, युवां दृश्येयाथाम्, यूयं दृश्येध्वम्, अहं दृश्येय, आवां दृश्येवहि वयं दृश्येमहि वा । दर्शकैः फलं लभ्येत, फले लभ्येयातम्, फलानि लभ्येरन्वा । तेन कार्यं क्रियेत, कार्ये क्रियेयाताम्, कार्याणि क्रियेरन् वा ।

ख) अपूर्णसंभावना - संभावनायां कर्मणि निष्पन्नपदस्यान्ते कर्तरि विहितस्यास्धातो र्विधिलिङ्लकारस्य क्रियापदं प्रयुज्यते । केन तत्क्रियमाणं स्यात्, ते क्रियमाणे स्याताम्, तानि क्रियमाणानि स्युः । त्वं क्रियमाणः-णा स्याः, युवां क्रियमाणौ-णे स्यातम्, यूयं क्रियमाणाः स्यात, अहं क्रियमाणः-णा स्याम्, आवां क्रियमाणौ-णे स्याव, वयं क्रियमाणाः स्याम वा । रमया कार्यं क्रियमाणं स्यात्, कार्ये क्रियमाणे स्याताम्, कार्याणि क्रियमाणानि स्युर्वा । इत्यादि ।

ग) पूर्णसंभावना - अस्यां भूतकर्मणि निष्पन्नं क्तान्तक्रियापदं मुख्यक्रियापदात्पूर्वमेव चिन्त्यम् - तेन तत्कृतं स्यात्, ते कृते स्याताम्, तानि कृतानि स्युः । त्वं कृतः-ता स्याः, युवां कृतौ-ते स्यातम्, यूयं कृताः स्यात, अहं कृतः-ता स्याम्, आवां कृतौ-ते स्यावः, वयं कृताः स्याम वा । तेन तत्कर्मः कृतं स्यात् । पुत्रेण ते कर्मणी कृते स्याताम् । छात्रैस्तानि कर्माणि कृतानि स्युः । साधुना त्वमुपकारः कृतः स्याः । एवं कृतः पूर्वमुपकारं प्रयुज्य वाक्यं कुर्यात् । सुन्दरं वाक्यं भवति ।

घ) अनारब्धसंभावना - अत्र कर्मणि स्य-शानच्भ्यां निष्पन्नस्य पदस्यान्ते मुख्यक्रियापदं प्रयुज्यते - भवता स करिष्यमाणः स्यात्, ते करिष्यमाणौ स्याताम्, ते करिष्यमाणाः स्युः । त्वं करिष्यमाणः-णा स्याः, युवां करिष्यमाणौ-णे स्यातम्, यूयं करिष्यमाणाः स्यात, अहं करिष्यमाणः-णा स्याम्, आवां करिष्यमाणौ-णे स्याव, वयं करिष्यमाणाः स्याम वा । पित्रा पुस्तकं पठिष्यमाणं स्यात्, पुस्तके पठिष्यमाणे स्याताम्, पुस्तकानि पठिष्यमाणानि स्युर्वा । अकाराऽऽकारान्तशब्दयोः स्त्रियां पुंसि च प्रथमाया बहुवचने समानं रूपम् । अर्थे विचारो विधेयः ।

५-८-३ कर्तृकर्मवाच्ययोरप्रधानक्रियाया अन्ते कर्तृकर्मवाच्ययोस्तिङन्तक्रियायाः प्रयोगः

कर्तरि(कर्तृवाच्ये) शतृशानच्स्य-शतृशानच्क्तक्तवतुप्रत्ययैः कर्मणि (कर्मवाच्ये) यक्-शानच्स्यशानच्क्तखल्प्रत्ययैश्च निष्पन्ना द्विविधा अप्रधानाः प्रधानाश्चातिङन्तक्रिया भवन्ति । ताः क्रियाः कर्तृवाच्यस्य सत्तार्थकक्रियायाः पूर्वं प्रयुक्ताः पूर्वं दर्शिताः । ताः कर्तृकर्मवाच्ययोर्निष्पन्नाः शतृशानजादिक्रियाः कर्तृकर्मवाच्ययोस्तिङन्तक्रियायाः पूर्वं प्रयुक्ताः समुल्लिख्यन्ते ।

१. कर्तृवाच्ये शतृशानज्स्यशानज्क्तक्तवतुप्रत्ययैर्निष्पन्नस्य पदस्यान्ते कर्मवाच्यस्य तिङन्तक्रिया - सीतया सह रामः गच्छन् गमिष्यन् सेवमानः, गतः गतवान्वा प्राप्यते लभ्यते श्रूयते दृश्यते प्रोच्यते वा । कर्तृवाच्यस्य प्रधानकृदन्तक्रियाया अन्ते कर्मवाच्यस्य या तिङन्तक्रिया सङ्गच्छते । सा क्रिया प्रयुज्यते ।

२. कर्मवाच्ये यक्शानच्स्यशानज्क्तप्रत्ययैर्निष्पन्नस्य पदस्यान्ते कर्तृवाच्यस्य तिङन्तक्रिया - मया राधया सह कृष्णः गम्यमानः गंस्यमानः, गतो वा अस्ति आसीत् भविष्यति अस्तु स्याद्वा । भक्तेन शिवो वन्द्यमानः वन्दिष्यमाणः वन्दितो वा अस्ति इत्यादि ।

एवम् - स पत्राणि लिखन्नस्ति । वयं कर्माणि कुर्वाणाः स्मः । त्वं वेदमधीयन्नासीः । रमया कार्यं क्रियमाणं स्यात् । अस्माभिः शास्त्राणि अध्येष्यमाणानि स्युः । जनैः कथाः श्रूयमाणा आसन् । तेन इमानि क्रियमाणानि (विधीयमानानि) स्युः । मया पुराणानि पठ्यमानानि दर्श्यमानानि च सन्ति । त्वया काव्यानि पठितानि सन्ति । मात्रा ओदनं पक्ष्यमाणमासीत् । तैः कर्माणि साधु करिष्यमाणानि विद्यन्ते । जनाः कर्माणि कुर्वन्तः सन्ति । सा मह्यं मिष्ठान्नं दत्तवत्यासीत् । ते फलानि भुक्तवन्तः स्युः । पित्रा पुत्रो गच्छन् प्राप्यते अप्राप्यत लभ्यते अलभ्यत वा । मया रामो यातो दृश्यते अदृश्यत वा ।

अस्माभिश्छात्रो गृहं गतवान् दृश्यते । तेन वयं कर्माणि कुर्वन्तः (कुर्वाणाः) दृश्यामहे । गुरुणा छात्रा वेदं पठन्तः श्रूयन्ते । बालेन फलं सुगमं विद्यते । रामेण वेदः पठितः कथा प्रेक्ता वा श्रूयते (आकर्ण्यते) ।

५-९ आख्यातकालेन गौणकालस्यानुरञ्जनम्

एकस्मिन्वाक्ये आख्यातगौणक्रिययोःकालभेदे उपस्थिते तत्र कृदन्तगौणक्रियायाः कालो मुख्यस्यऽऽख्यातस्य कालेनाऽनुरज्यते[1] । तदा कृदन्तक्रियाया गौणकालोऽपि मुख्यक्रियायाः कालेन समानो भवति । आख्यातपदेन मुख्यक्रिया(प्रधानक्रिया) बोध्या । मुख्यक्रियया तिङन्तक्रिया गृह्यते ।

क) वर्तमानकालिकगौणक्रियाया अर्थो भूतकालस्यार्थेऽनुरक्तः-वसन्ददर्श-रहते हुए देखा (देख्नु जस्तै रहनु पनि भूतको अर्थ भयो) - देखना जैसा रहना भी भूतका अर्थ हुआ) । गच्छन्नासीत् । भुञ्जानमपश्यम् । गच्छता तेन वस्त्रमप्यनायि । भृत्यःकार्यं कुर्वाणो निदद्रौ । शयानः शिशुः स्तन्यं पिबति । पूज्यमाना देवाः प्रसीदन्ति स्म । कार्यं क्रियमाणमदृश्यत ।

ख) वर्तमानकालिकगौणक्रियाया अर्थो भविष्यत्कालस्यार्थेऽनुरक्तः - उडुपेन तरन्पारं गमिष्यति- डुँगाबाट तर्दै पारहुनेछ - डोंगीसे तैरता हुआ पार जायेगा) । श्वः खादन्भविता । सत्कुर्वन्तस्तेभ्यो रूप्यकाणि दास्यन्ति । अधीयानो द्रक्ष्यते । मनो मोदयद्वृत्तं श्रोष्यते । पुराणं पठ्यमानं श्रूयते ।

ग) भूतकालिकक्रियाया अर्थो वर्तमानकालस्यार्थेऽनुरक्तः - पुण्यकृतः पूज्यन्ते - पुण्य गरेकाहरू पूजित हुन्छन् - पुण्य कर चुके हुए पूज्य होते है । शास्त्रे पारदृश्वा विलोक्यते । आसने तस्थिवासं पश्यामि । मया स पूजितोऽस्ति । उत्स्थितवान् बुध्यते । त्वयोक्तं श्रूयते । पीठमधिष्ठित आकर्ण्यते ।

घ) भूतकालिकक्रियाया अर्थो भविष्यत्कालस्यार्थेऽनुरक्तः - भुक्तवान्भविष्यति - खाइसकेको होला - खा चुका होगा (हुनु जस्तै खानु पनि भविष्यत्कालको अर्थ मानिन्छ - होना जैसा खाना भी भविष्यत्काल का अर्थ होता है) । सोमयाजी पुत्रो भविता । तं भुक्तवन्तं द्रक्ष्यामि । तत्रोपेयुषा संमानो लभ्यते । पारदृश्वा सम्पत्स्यते । सरसिजं द्रक्ष्यते । अग्निचित्पुत्रो जनिष्यते । रसविक्रयी द्रक्ष्यते ।

ङ) भविष्यत्कालिकगौणक्रियाया अर्थो वर्तमानकालस्यार्थेऽनुरक्तः - गमिष्यन्नुत्तिष्ठति - जानेवाला उठ्छ - जानेवाला उठता है (उठ्नु जस्तै जानु पनि वर्तमानकालको अर्थ हुन आएको छ - उठना जैसा जाना भी वर्तमानकालका अर्थ होगया है) । प्रस्थायिनमाह्वयामि । द्रक्ष्यन्नास्ते । गुरुमनुयास्यञ्चलति । अनुभविष्यन्प्राप्यते । पठिष्यमाणः श्रूयते । पुस्तकं पठिष्यमाणं ज्ञायते ।

च) भविष्यत्कालिकशब्दस्यार्थो भूतकालार्थेऽनुरक्तः - भाविकार्यं समपद्यत - पछि हुने काम भयो - होनेवाला काम हो गया (सम्पन्न हुनु जस्तै हुनु पनि भूतकालिक हो - सम्पन्न होना जैसा होना भी भूतकालिक है) । स तदा गमिष्यन्नासीत् । भाविनी कर्मरेखा प्रबलाऽऽसीत् । अध्येष्यमाणमपश्यम् । प्रस्थायी पुरुषो मयाऽदृश्यत ।

मतुप् इनि इत्यादयः "अस्मिन्नस्ति अस्यास्ति वा" इत्यादयश्च तद्धितप्रत्यया वर्तमानकाले विधीयन्ते । एतैः सह यस्य कालस्य तिङन्तक्रिया प्रयुज्यते । तदा प्रयुक्तायास्तिङन्तक्रियाया काले ते प्रत्यया अप्यनुरक्ता भवन्ति । तदनन्तरं तेषां प्रत्ययान्तानां शब्दानामर्थः प्रयुक्तायाः क्रियाया अर्थानुसारं भवति । यथा - स धनी भविष्यति । त्वं विद्वानासीत् । ते यशस्वन्तो बभूबुः । तं पुत्रवन्तं द्रक्ष्यामि । धैर्यवान् अदृश्यत । स गुणवान्दृश्यते । फलं रसवदस्ति ।

---

[1] सोमनाथशर्मा (सिग्देलः) आख्यातगौणक्रिययोः कालभेदेऽप्युपस्थिते । मुख्येनाख्यातकालेन गौणकालोऽनुरज्यते ॥ अनुवादचन्द्रिका - भाग-३ हिन्दीसं. तृतीय, संवत् - २००६, पृ. १८२, श्लो. १६६ ॥

५-१० उद्देश्यं विधेयं च

वाक्ये कस्यापि विषये किञ्चिदुच्यते । तत्र तस्य विषये यदुच्येत तदुद्देश्यं यत्पदमुद्देश्यस्य कार्यं बोधयति तद्विधेयं च प्रोच्यते । । वाक्ये प्रथममनयोःपदयोरावश्यकं भवति । कर्तृवाच्यस्य यःकर्ता कर्तृवाच्यस्य यत्कर्म कर्मवाच्ये प्रथमान्तं च भवति । तदेवोद्देश्यं प्रोच्यते । भाववाच्ये यःकर्ता तृतीयान्तो भवति । तदेवोद्देश्यं ज्ञेयम् । सर्वत्र क्रियापदं विधेयं भवति । अत्रापि उद्देश्यं त्रिविधमस्ति नाम सर्वनाम विशेषणं च । मुख्यप्रथमान्तात्पूर्वं मिलितो नानापदसमूहो वाक्यांशोऽपि उद्देश्यस्य बोधको भवति ।

कर्तरि		कर्मणि	
उद्देश्यम्	विधेयम्	उद्देश्यम्	विधेयम्
नाम-रामः	खादति	छात्राः	पाठचन्ते
सिंहाः	गर्जन्ति	व्याघ्राः	दृश्यन्ते
फलं	पतति	फलं	खाद्यते
सर्वनाम-ते	पठन्ति	स	आनीयते
अहं	गच्छामि	अहं	गम्ये
विशेषणम्-साधुः	आयाति	साधवः	पूज्यन्ते
		भावे-तैः	भूयते
वाक्यांशः-प्रातःसमुत्थाय		पितुराज्ञा आदरेण	
पाठस्याभ्यासः	युज्यते	पालनं	क्रियते

५-११ उद्देश्यविधेयविशेषणयोःप्रयोगः

उद्देश्यपदेन विशेष्यपदं निर्दिश्यते । कर्तृप्रथमान्तात्पूर्वं प्रयुक्तं विशेषणमुद्देश्यविशेषणं परे प्रयुक्तं विशेषणं विधेयविशेषणं च भवति । विधेयविशेषणं क्रियापदात्पूर्वं प्रयुज्यते । द्वितीयान्तविशेष्यात्पूर्वपरयोरपि प्रयुज्यते । करणाद्यन्तानां विशेष्याणामपि विशेषणं प्राय उद्देश्यविशेषणे प्रयुज्यते ।

१-क) उद्देश्यविशेषणस्य प्रयोगस्योदाहरणानि - चञ्चलो वानरो गभीरे कूपेऽपतत् । प्रथमश्छात्रः पुस्तकं नयति । महति वने भयङ्करा जन्तवः सन्ति । देशेऽनेकशो रोगाः सन्ति । देशेऽनेकशो विद्वांसः सन्ति । देशेऽनेकशो वैज्ञानिका चिकित्सका विज्ञाश्च सन्ति । राजा घृणी ब्राह्मणः सर्वभक्षी स्त्री चात्रपा दुष्टमतिः सहायः । प्रेष्यः प्रतीपोऽधिकृतः प्रमादी त्याज्या अमी यश्च कृतं न वेत्ति ॥

ख) संस्कृतसाहित्ये रत्नं कालिदासोऽस्ति । हिन्दुधर्मे रत्नं सीता ज्ञेया । सर्वैः स्त्रीरत्नं पद्मिनी मन्यते । नेपालीभाषायां रत्नं भानुभक्तो विद्यते ।

ग) गुणवन्तं जनं सर्वे पूजयन्ति । शयानं बालकं नोत्थापय । परोपकारिणं जनं को न वाञ्छति । वीरं पुरुषं युद्धे प्रेषय । अहं मधुराणि फलानि खादामि । स सदा सदाचारशीलाय ब्राह्मणाय गामदात् । हिंस्रकाज्जन्तोर्गवादीन् रक्ष त्वम् । सुशीलस्य ब्राह्मणस्य पादौ प्रक्षालयामि । सर्वे जनाः निष्कष्टकं मार्गं वाञ्छन्ति ।

२-क) विधेयविशेषणस्य प्रयोगस्योदाहरणानि - रामः परीक्षायां प्रथमोऽभवत् । अस्माकं छात्राश्चतुराः सन्ति । कृष्णो विद्वानस्ति । तौ मूर्खौ विद्येते (स्तः) । स दुष्टोऽस्ति । देवो नटोऽस्ति । हिंस्राः सर्पाश्च भयङ्करा जन्तवः सन्ति । फलानि मधुराणि विद्यन्ते । त्वं सुखी भव । अयं कुर्वन् (

कुर्वाणो) लभ्यते । एष रम्यो दृश्यते । जलं निर्मलं विद्यते । शिष्यः पठन्वसति । भवान् प्राणिषु दयालुर्वर्तते । कृष्णः सरलोऽस्ति । स सभायां वको जातः । त्वं धनी असि । वयं कुशलिनः स्मः । विद्या ज्ञानस्य प्रकाशिकाऽस्ति । यूयं कर्मशीला दृश्यध्वे । अयं संसारोऽसारः । युवां किं कुर्वन्तौ (कुर्वाणौ) स्थः । आवां गतवन्तौ स्तः । भवान् मान्योऽस्ति । गुरुः सदा पूजनीयः (पूज्यः) माननीयो (मान्यः) वा भवति । वाल्मीकिः संस्कृतसाहित्ये रत्नं विद्यते । व्यासः पुराणे रत्नम् । कालिदासः संस्कृतसाहित्ये कविकुलशिरोमणिर्मतः । अहं नटः । त्वं नायिका । त्वं राक्षसः । रमा स्त्रीरत्नम् । गौरी जगतो माता । इत्यादि ।

ख) द्वितीयायां स्थितानां विशेष्याणां विधेयविशेषणम् - स वस्त्रं पीतं करोति । सा वस्त्रं रक्तं विधत्ते । तक्षा काष्ठं वास्या मसृणं (स्निग्धं) विदधाति । सर्वे जना मार्गं निष्कष्टं कामयन्ते । अहं त्वां दयायाः सागरं मन्ये । जनास्त्वां शूरं (पराक्रमिणं) जानन्ति । अहं भवन्तं सज्जनं मन्ये । ईश्वरस्त्वां भक्तं जानाति । सर्वे भवतो गृहं सुन्दरं पश्यन्ति । ते तं सुशीलं मन्यन्ते ।

५-१२ उद्देश्यान्वयिनो विधेयान्वयिनश्च पदयोः प्रयोगः[1]

यत्पदमुद्देश्य(विशेष्य)मन्वेति(अनुयाति) तत्पदमुद्देश्यान्वयि यत्पदं विधेय(क्रिया)- मन्वेति तत्पदं विधेयान्वयि च भवति । तदनुसारं साक्षात्परम्परया वा उद्देश्यात्पूर्वं प्रयुक्तं विशेषणमस्मिन्नन्वयीनि यानि पदानि उद्देश्यमनुयन्ति । तानि पदानि उद्देश्यान्वयीनि विधेया(क्रियापदा)त्पूर्वमुद्देश्यस्य पश्चात्प्रयुक्तानि कर्मकरणादीनि क्रियायाः पूरकं क्रियाविशेषणमुद्देश्यस्य विधेयविशेषणं चेत्यादीनि पदानि विधेयान्वयीति च पदानि भवन्ति । अनयोरुद्देश्यधेययोर्विभागावपि भवतः ।

उद्देश्यविभागः		विधेयविभागः	
उद्देश्यान्वयि	उद्देश्यम्	विधेयान्वयि	विधेयम्
तव पीतं	वस्त्रम्	अतिशयं सुन्दरम्	अस्ति
शास्त्रे दक्षः	नरः	सरलः	वर्तते
सभायां विद्वांसः	जनाः	सर्वान्सुचरितान्नरान्	प्रशंसन्ति
भवता ऐषमः प्रकाशितम्	पुस्तकम्	पुस्तकधान्या निष्कास्य	मह्यं देहि
हिमालयस्य शीतलः	वायुः	मम हृदयम्	कम्पयति
गुरोः प्रियश्छात्रः	विद्यालये	नित्यमुच्चस्वरेण वेदम्	पठति
सर्वेषु हिमालयेषु अत्युच्चः	हिमालयः	गिरिराज इति	उच्यते
	अहम्	सर्वाणि शास्त्राणि	पठितुमिच्छामि
	सः	ओदनं भुक्त्वा जलं च	पीत्वा याति
ईश्वरे अनन्यभक्ता	छात्राः	गुरुं प्रणम्य गृहम्	गतवन्तः
धनेन हीनाः(क्षीणाः)	जनाः	संसारस्य	दुःखाद्विमुच्यन्ते
	नराः	निष्करुणा	भवन्ति

५-१३ अवान्तरविधेयविशेषणं तेन सह सत्-अपिशब्दयोः प्रयोगः

वाक्यस्योद्देश्ये विधेये च मुख्ये सत्यपि अर्थानुसारमवान्तरमुद्देश्यमपि भवति । तदुद्देश्यं मुख्योद्देश्यात्परं सन्निधावेव प्रयुज्यते । एवं वाक्ये प्रयुक्तमवान्तरमुद्देश्यं विविधेयमपि भवति[2] ।

[1] सोमनाथ सिग्देलः - अनुवादचन्द्रिका - भाग ३, हिन्दीसंस्करण, द्वि.सं. सम्वत् २००६, पृ. १९० । श्लो. १७३-१७४ ॥

[2] सोमनाथ सिग्देलः - अनुवादचन्द्रिका - भाग ३, हिन्दीसंस्करण, द्वि.सं. सम्वत् २००६ - उद्देश्यं च विधेयं च मुख्ये वाक्यस्य सत्यपि । क्वचिदवान्तरमपि तद्द्वयं जायतेऽर्थतः - श्लोकः) १७६, पृ. १९१ ।

यदा त्रिषु वाच्येषु उद्देश्येण सह सत् अपि, अपि सत् वेत्यस्यार्थेऽपेक्ष्यते (भाषायाम् - "यस्तो हुँदा हुँदै पनि - होता हुआ भी" भन्ने अर्थको अपेक्षा गरिन्छ) तदा प्रथमाद्वितीयादिषु मध्ये एकस्यां विभक्तौ स्थितायामेकस्मिन्नपि वचने स्थितस्य विशेष्यस्योत्तरे विशेष्यस्य वचनानुसारं एकः सच्छब्दः सदपिशब्दौ अपिसच्छब्दौ वाऽवान्तरविधेयविशेषणरूपे प्रयुज्येते । सच्छब्दस्य सन् सन्तौ सन्त इत्यादयः पुंसि, सती सत्यौ सत्य इत्यादयः स्त्रियां सत्-द् सती सन्ति इत्यादयः क्लीबे च रूपाणि भवन्ति । यथा -

१. कर्तृवाच्ये - स पण्डितः सन् किमपि न करोति । अयं चतुरः सन् किमपि कार्यं न विधत्ते २. स सुधीः सन्नपि दरिद्रोऽस्ति । स कर्मठः सन्नपि लोभी वर्तते । अयं भुञ्जानः सन्नपि वेदं न पठति । बालकाः शयिताः सन्तो व्याकरणमधीयते । एषा बालिका रुदती सती मातुःस्तन्यं पिबति । भवान् शास्त्राणि जानन्नपि न ब्रूते । ते उपविष्टाः सन्तः किमपि नाऽवदन् । तौ उपविष्टौ सन्तौ मां समाचारमब्रूताम् । अहमुपविशन्नपि कार्यं कृतवान् । तरुश्छिन्नोऽपि रोहति । ३. कर्मवाच्ये - तेन ज्ञानिना सता ज्ञानं नोच्यते । अनेन समर्थेन सता भारो नो ह्यते । मया पुत्रवता सताऽपि सुखं नानुभूयते । तेन कर्माणि कुर्वताऽपि फलं नापेक्ष्यते । पत्नी सुन्दरी अपि अनेन नाद्रियते । चन्द्रःक्षीणोऽपि उपचीयते । मया धनिना सताऽपि दुःखं लभ्यते । ४. अपिसच्छब्दयोः प्रयोगः - स धनं प्राप्तोऽपि सन् सन्तोषी नास्ति । तं विद्वांसमपि सन्तं कश्चिन्नाद्रियते । वस्त्रं बहुमूल्यमपि सत् एष जन उपेक्षते ।

५-१४ उपमानोपमेययोः प्रयोगः

आख्यातेन (क्रियापदेन) वाच्यं भवतु वा न भवतु सादृश्यबोधकस्याऽऽरोपबोधकस्य वोपमानोपमेययोर्विभक्तिः समाना भवति वचनं तु समानं भवति न वा । वाच्ये सति उपमेयाऽऽख्यातयोः पुरुषवचने समाने भवत उपमानाऽऽख्यातयोस्तु न । उपमानेन (उपमया) सह यस्तोल्यते स उपमेयः । उपमानमुपमा चैतौ पर्यायौ बोध्यौ । वाच्ये उक्तानुक्तयोर्विचारः क्रियापदेन विधीयताम् । उपमायामिवशब्द इव सादृश्यार्थे तूल्यः समः, सदृशः, सदृक्, साधारणः, समानः, यथा, इत्यादिशब्दा अपि प्रयुज्यन्ते । इवार्थे तुल्यादयोऽर्था अपि गृह्यन्ते ।

१. सादृश्यबोधकमुपमानम् - उपमानस्य गुणस्य साधर्म्यं यदा उपमेये लभ्यते तत् । सदृशगुणबोधकशब्देन सह तुलना - यथा मुखं चन्द्रं मन्ये । तृणेन तुल्येन त्वया मम किं सिद्धयति । युवतीनां मुखानि चन्द्रो मन्यते । इयं नारी अप्सरसो दृश्यते । इमे स्त्री समभाव्यन्त । पाषाणः सिकता अमानि । इमे गुणानां सागराः प्रतिभान्ति । अस्या मुखं पार्वणचन्द्रस्य सदृशं दृश्यते । सहिष्णौ पृथिवीसमः सः ।

२. आरोपबोधकमुपमानम् - यत्र सदृशलक्षणं बोधयितुं येन शब्देन सह इवशब्दः प्रयुज्यते तदुपमानं ज्ञेयम् । यदोपमानस्य गुण उपमेये आरोप्यते तदाऽऽरोपबोधकमुपमानमुच्यते - मुखं चन्द्रमिव पश्यामि । धनमिव विद्या । स नारीव लज्जते । युष्माँस्तृणमिव संभावयामि । मुखं चन्द्रस्येवाऽस्ति (दृश्यते) । तवेव ममाप्यस्मिन्स्नेहः । वयं गुरुरिव संमान्येमहि । रामलक्ष्मणाविव इमे भ्रातरः सन्ति । अप्सरस इव नारी विभाति । चन्द्र इव मुखम् । अहं त्वमिव जातोऽस्मि । नटः सीतेवाभूत् । त्वमहमिव जातोऽसि । अहं त्वमिव विद्वानस्मि । त्वमपि अहमिव विज्ञोऽसि । स त्वमिव विनश्यति । सा त्वमहं इव वा ज्ञात्री अस्ति । स त्वमिव दुःखं लभते ।

५-१५ ण्यन्तादिषट्प्रकरणानां प्रयोगः

भ्वादिदशगणीयधातूनां प्रयोगःपूर्वं दर्शितः । अतिसंक्षेपेण ण्यन्तादीनां प्रयोगो दर्श्यते -

१. ण्यन्ततिङन्तक्रियायाः प्रयोगः - पिता पुत्रं भावयति । माता बध्वाऽन्नं पाचयति । चित्तं दूषयति दोषयति वा कामः । रञ्जयति मृगान्तृणदानेन जनः । द्र.-४-२-७-१-ख- ण्यन्तद्विकर्मककर्तृवाच्यस्य कर्मवाच्यस्य च वाक्यम् ।

२. सन्नन्ततिङन्तक्रियायाः प्रयोगः - ब्राह्मणो वेदं पिपठिषति । पुत्रो नगरं जिगमिषति । यजमानो ब्राह्मणाय गां दित्सति-ते । श्वा मुमूर्षति । स मुमुक्षति ।

३. यङन्तायास्तिङन्त क्रियायाः प्रयोगः - तस्य सुखं बोभूयात् । स वेदं व्याकरणं च पापठ्यते । दंशास्तान्दंदश्यन्ते । भक्तो हरेर्नाम जेगिषते सस्मर्यते च । चंचूर्यते स भवकाननेऽस्मिन् । स्तोष्टूयते सोऽप्यगुणं विभुं सदा । । राजा शोशुभ्यते कीर्त्या । धर्मः संसूच्यते स्मृतौ । दंदह्यन्तेऽमी सांसारिका भावा माम् ।

४. यङ्लुङन्ततिङन्तक्रियायाः प्रयोगः - नरीनर्ति पक्षी सरीसर्ति वायुश्चरिकर्ति भाव्यं चरीकर्ति शीतम् । असावेव सूर्यश्चर्कर्ति बर्भर्ति जर्हर्ति च जगत् । सज्जना उपकारान्संस्मर्यन्ते ।

५. नामधातोस्तिङन्तक्रियायाः प्रयोगः - नमस्यामो देवान् । नमस्यामो मुहुर्मुहुः । उच्चैः शब्दयते भिक्षुः । स विष्णूयति द्विजम् । तौ परस्परं कलहायेते ।

६. कण्ड्वादितिङन्तक्रियायाः प्रयोगः - कण्डूयति गात्रं स करेण लगुडेन वा । प्रेत्य स्वर्गे महीयते । सरस्वती महती महीयताम् । कथं न पत्या धरणी हृणीयते ।

एषु षट् प्रकरणेषु समाहितेभ्यो धातुभ्यः कृत्यक्तक्तवतुप्रत्ययैः शतृशानच्तुमुन्क्त्वाल्यप्प्रत्ययैश्च निष्पन्नाः क्रिया यथास्थलं स्मरणीयाः प्रयोक्तव्याश्च ।

वाक्यान्ते यावत्पर्यन्तं तिङन्तक्रियापदं न संयुज्यते । तदा वाक्यं पूर्णं जातं न मन्यते । तथाप्यतिङन्तक्रिययाऽपि व्यवहारे(लोके) कार्यं चालितं लभ्यते ।

५-१६ प्राद्युपसर्गाणां मुख्यार्थस्तेषां धातोः प्राग्प्रयोगः

प्र = अधिकः,प्रकृष्टः,प्रकर्षश्च । परा = विपरितः, पश्चात् । अनु = पश्चात् । अव = दूरम् । सम् = सम्यक् । अप = अधः, दूरम् । निस् = विना, बहिः । निर् = बहिः । दुस् = कठिनम् । दुर् = दुष्ठु । वि = विना, पृथक् । आङ् = पर्यन्तम्, अभिव्यापकः, न्यूनः । नि = अधः । अधि = उपरि । अपि = समीपम् । अति = अधिकः । सु =सुष्ठु, शोभनम् । उद् = उपरि । अभि = अभिमुखम् । प्रति = अभिमुखम्, उपरि, प्रतिनिधिः । परि = परितः,सर्वतः । उप = समीपम् । एषामुपसर्गवशाद्धात्वर्थः परिवर्तते । उपसर्गेण युक्तं पदं वाक्ये सौष्ठवं चमत्कारञ्च समानयति । क) यथा कारिका -

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहार-संहार - विहार - परिहारवत्[1] ॥

प्रहरति = प्रहारं करोति । आहरति = खादति । संहरति = संक्षेपं विनाशं वा करोति । विहरति = भ्रमति । परिहरति = समाधत्ते = समाधानं करोति । कृदन्तप्रत्यये कृते-प्रहारः = कशाघातः । आहारः = भक्षणम् । संहारः = संक्षेपीकरणं विनाशनं च । विहारः = भ्रमणम् । परिहारः = समाधानम् । कृत्=कृदन्तप्रत्ययः ।

---

[1] वरदराजः - मध्यसिद्धान्तकौमुदी, सम्पादको वृत्तिकारश्च आचार्यः प्रभाकरः विश्वनाथ शास्त्री, पञ्चमसंस्करण, दिल्ली २००१, मोतीलाल बनारसीदास, पृ. १२० ।

ख) उपसर्गस्य धातौ त्रिविधा गतिः - कश्चिदुपसर्गो धात्वर्थं बाधते कश्चिद्धात्वर्थमुपगच्छति कश्चिद्धात्वर्थं विशिनष्टि (धातोविशेषमर्थं द्योतयति) च ।

धात्वर्थं बाधते कश्चिद् कश्चिद् तमनुवर्तते ।
तमेव विशिनष्टयन्य उपसर्गगतिस्त्रिधा[1] ॥

१. यथा-जि जये = जीत्नु - जीतना । विजयते = जीत्छ - जीतता है । पराजयते = हार्छ - हारता है । डुकृञ् करणे = गर्नु - करना । करोति । उपकरोति = उपकार गर्छ - उपकार करता है। अपकरोति - अपकार गर्दछ - अपकार करता है । कृति = पराजयः - पराभवः । अपकारः ।

२. वस निवासे = बस्नु - बैठना । वसति = अधिवसति आवसति इत्यादि । कृति - अधिवासः आवासः निवासः । तृ प्लवनतरणयोः = तर्नु - तरना = तरति = अवतरति उत्तरति । कृति - अवतरणम्, अवतारः ।

३. गम्लृ गतौ = जानु - जाता है । गम् = गच्छ = गच्छति - अनुगच्छति = पश्चाद्गच्छति। अनुगम्यते । कृति - अनुगमनम् । वच - परिभाषणे = वक्ति । निर्वक्ति । ब्रूञ् व्यक्तायां वाचि = ब्रवीति ब्रूते प्रोच्यते निरुच्यते । कृति = प्रवचनम्, निर्वचनम् = शब्दप्रतिपादनम् । स्मरणीयं यत् धातोः प्राग्प्रायेणैक उपसर्ग प्रयुज्यते एव । क्वचिद् द्वावुपसर्गौ कुत्रचित्त्रयोऽपिं उपसर्गा धातोः प्राग्प्रयुज्यन्ते । यथा - प्रभवति । निर्याति । अध्याहरति । अनुनिर्ययौ । व्यपाश्रित्य । अभ्युपायाति। अभिव्याहृतः इत्यादि ।

५-१७ शब्दानां सन्धिनियमः

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते[2] ॥

एकपदे = अखण्डपदे संहिता नित्या भवति । यथा - भवति, करोति, नायकः पावक इत्यादि। धातूपसर्गयोरपि संहिता नित्या भवति । यथा - सुद्ध्युपास्यः, रमेशः, कृष्णर्द्धिरित्यादि । वाक्ये तु सा = संहिता विवक्षामपेक्षते = विवक्षया भवति । यथा - पश्यतीन्दुम्, पश्यति इन्दुम् चोभयं भवति ।

सन्धिना संयुक्तं पदं संहिता प्रोच्यते । उभयोः पदयोः संयोजनं सन्धिरुच्यते । यतोऽखण्डपदे धातूपसर्गयोः समासे सूत्रेष्वपि सन्धिर्नित्यो भवति । एभ्योऽन्यत्र सन्धिर्विकल्पते । अथवा वाक्ये विवक्षया सन्धिः क्वचित्क्रियते कुत्रचिन्न । संस्कृते सन्धिविषयेऽयमेव नियमः -

सन्धिरेकपदे नित्यो नित्यो धातूपसर्गयोः ।
सूत्रेष्वपि तथा नित्यः स चान्यत्र विकल्पितः[3] ॥

इति अजहल्लिङ्गविशेषणादौ पञ्चमोऽध्यायः ॥५॥

---

[1] चक्रधर नौटियाल "हंस" शास्त्री - बृहत्-अनुवाद-चन्द्रिका, प्रकाशक - मोतीलाल बनारसीदास दिल्ली, संस्करण - वाराणसी - १९९२, ६६१ पृष्टतः समुद्धृतः ।

[2] वरदराजः - मध्यसिकौमुदी, सम्पादको वृत्तिकारश्च आचार्यः प्रभाकरः विश्वनाथ शास्त्री, पञ्चमसंस्करण, दिल्ली २००१, मोतीलाल बनारसीदास, पृ. ११९ ।

[3] चक्रधर नौटियाल "हंस" शास्त्री - बृहत्-अनुवाद-चन्द्रिका, प्रकाशक - मोतीलाल बनारसीदास दिल्ली, संस्करण - वाराणसी - १९९२ - ६६१ पृष्टतः समुद्धृतः ।

अथ षष्ठोऽध्यायः ॥ ६ ॥

६. समासाः

कारकेषु यैर्यैः पदैरुपपदैश्च योगे येभ्यो येभ्यः शब्देभ्यो यस्या यस्या विभक्तेर्वचनं विहितमस्ति । समासस्य निषेधादिविधिं विना तैस्तैः पदैरुपपदैश्च सह स्थितानां पदानां प्रायेण समासो भवति । समासविधौ तादृशानां पदानां विचारः सदा विधेयः ।

समासः पञ्चधा । तत्र समसनं समासः । अस्यार्थो द्वयोः पदयोर्बहूनां (अनेकेषां) पदानां चैकीभवनं (एकपदीकरणं) समास इति भवति । **स च विशेषसंज्ञाविनिर्मुक्तः केवलः समासः प्रथमः । प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः । प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः । तत्पुरुषभेदः कर्मधारयः । कर्मधारयभेदो द्विगुः । प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः । प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः ।** एतानि पञ्च समासस्य लक्षणानि प्रोच्यन्ते । समासोऽपि नित्योऽनित्यो विकल्पश्च भवति । विकल्पाभावे विग्रहस्य वाक्यमेव तिष्ठति ।

६-१ केशवलसमासः

समर्थः पदविधिः २।१।१॥

पदसंबन्धी यो विधिः स समर्थाश्रितो[1] बोध्यः ।

प्राक्कडारात्समासः २।१।३॥

कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते ।

सह सुपा २।१।४॥

सुप् सुपा सह समस्यते ।

सुपो धातुप्रातिपदिकयोः २।४।७१॥

एतयोरवयवस्य सुपो लुक् स्यात् लुका प्रत्ययोऽदृश्यो भवति । [2] **परार्थाभिधानं वृत्तिः । तद्धितसमासैकशेषसनाद्यन्त धातुरूपाः पञ्च वृत्तयः । वृत्यर्थावबोधकं वाक्यं विग्रहः** [3] । यथा - "राजपुरुषः" इति समस्तपदेऽस्मिन्समासवृत्तिरस्ति । अस्या वृत्तेरर्थः "राज्ञः पुरुष" इत्यनेन वाक्येन क्रियते । अयमेवार्थो विग्रहोऽस्ति । स लौकिकोऽलौकिकश्च द्विधा । लोके प्रयोक्तुं योग्यः शब्दो लौकिकः । यथा "राजपुरुषः" इत्यस्य "राज्ञः पुरुषः" इति विग्रहो लोके प्रयोक्तुं योग्योऽस्ति । अत्र समासार्थं गृहीतयोरनयोःपदयोर्विभक्तिवचनं पृथगकृत्वा विग्रहः कृतोऽस्ति । यतोऽयं लौकिकविग्रहो बोध्यः । लोके प्रयोक्तुमयोग्यः शब्दोऽलौकिकः । यथा - "यज्ञः पुरुष" इत्यनयोः पदयो राजन् अस् पुरुष सु इति

---

[1] सामर्थ्यं द्विविधं व्यपेक्षारूपमेकार्थीभावं च । तत्र आकाङ्क्षादिवशात्पदानां यः परस्परसंवन्धः सा व्यपेक्षा । तद्रूपं सामर्थ्यं वाक्ये एव भवति । यथा - राज्ञः पुरुष इति । अपृथगुपस्थितिविषयत्वमेकर्थीभावरूपं सामर्थ्यम् । तच्च "राजपुरुष" इत्यादि समासवृत्तावेव भवतीति बोध्यम् ।

[2] समस्यमानपदार्थापेक्षया भिन्नार्थाभिधायिकेत्यर्थः ।

[3] वृत्त्यर्थः तस्यावबोधकं वाक्यं विग्रह इत्यर्थः ।

विग्रहो लोके प्रयोक्तुमयोग्योऽस्ति । अत्र समासार्थं गृहीतयोः पदयोर्विभक्तिवचनं पृथग्कृत्य विग्रहः प्रदर्शितः । यतोऽयमलौकिकविग्रहः प्रोच्यते । एवं सर्वत्र विचारणीयः ।

सह सुपेत्यनयोर्योगविभागे कृते सहेत्यस्य सुवन्तं समर्थेन सह समस्यते इत्यर्थो भवति । तेन पर्यभूषयत् अनुव्यचलत् इत्यादौ उपसर्गाख्यातयोःसमासः । स च छन्दस्येव न तु लोके । लोके ते प्राग्धातोरिति सूत्रेणोपसर्गस्य धातोपूर्वप्रयोगः । ततः सन्धिः । सुपेत्यस्य समर्थसुवन्तं सुवन्तेन सह समस्यते इत्यर्थः[1] । यथा- पूर्वं भूत इति लौकिकविग्रहेऽर्थे पूर्व अम् भूत सु इत्यलौकिविग्रहे वा कृते उभयोः "सह सुपो"इति समासे कृते कृत्तद्धितसमासाश्चेति सूत्रेण प्रातिपदिकसंज्ञायाम् "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुपो लुकि भूतपूर्वे चरट् इतिसूत्रनिर्देशाद्भूतशब्दात्पूर्वं पूर्वशब्दस्य निपाते प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - पुंसि भूतपूर्वः, भूतपूर्वौ, भूतपूर्वाः । स्त्रियाम् - भूतपूर्वा-पूर्वे-पूर्वाः । क्लीबे भूतपूर्वम्-पूर्वे-पूर्वाणि । एवं पुंसि - दृष्टपूर्वः-पूर्वौ-पूर्वाः । स्त्रियाम्-दृष्टपूर्वा-र्वे-वाः । क्लीबे - दृष्टपूर्वम्-र्वे-र्वाणि । पुं - श्रुतपूर्वः-र्वौ-र्वाः । स्त्री - श्रुतपूर्वा-र्वे-र्वाः । क्लीबे - श्रुतपूर्वम्-र्वे-र्वाणि । एवमन्ये ज्ञेयाः । **इवेन समासो विभक्त्यलोपश्च[2]-वा.**-भवति । वागर्थौ इव = अत्र इवेन सह नित्यं समासे विभक्तेरलोपे कृते अवादेशे च = वागर्थाविव । एवं शब्दार्थौ इव = शब्दार्थाविव। राजानम् इव = राजानमिव । एवं जीवस्येव । रामे इव = राम इव । इत्यादि । विभाषाधिकाराभावेऽपि अयं समासोऽनित्यः[3] । अत एव इवशब्दस्य व्यत्ययेनापि कृतः "उद्बाहुरिव वामन इति कालिदासप्रयोगः सङ्गच्छते । यतः केवलसमासे समासो नित्योऽनित्यश्च द्विविधोः स्थितो लभ्यते। वागर्थाविवेति नित्यसमासः । उद्बाहुरिव वामन इत्यनित्यसमास श्च ।

इति केवलसमासः ॥ ६-१ ॥

६-२ अव्ययीभावः

अस्मिन्समासेऽव्ययपदेन सह सुबन्तपदं समस्यते । विग्रहे प्रायेण पूर्वं सुबन्तपदं परेऽव्ययपदं च प्रयुज्येते । समासानन्तरमग्रेऽव्ययपदं परे सुबन्तं च पदं प्रयुज्यते । समासेन पदानां स्थितिरेका भवति। अस्मिन्समासे विशेषविधिना निष्पन्नं पदं विना सर्वमव्ययं भवति । अव्ययस्य शब्देषु विभक्तिर्वचनं च न प्रतीयेते ।

अव्ययीभावः २।१।५॥

अधिकारोऽयं तत्पुरुषात्प्राक् ।

अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्धचर्थाभावात्ययासम्प्रति-शब्दप्रादुर्भाव-पश्चाद्यथानु-पूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु २।१।६॥

विभक्त्यर्थादिषु वर्तमानमव्ययं सुवन्तेन सह नित्यं समस्यते सोऽव्ययीभावः ।

---

[1] सोमनाथः - प्रतिसं.सि.कौ.पूर्वार्धः पृ. १९१ प्रका. प्रज्ञा.प्रति. काठमाडौं, नेपाल, संवत् २०१५ ।

[2] इवेन सह नित्यसमासो विभक्त्यलोपश्च । पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यम् । रघु. १।१ सञ्जीवनी टीकायाम् ।

[3] वरदराजः - लघुकौमुदी - प्रकाशकः - गोविन्दभवन - कार्यालय, गीताप्रेस, गोरखपुर, तेइसवां संस्करण सं. २०५२, पृ. १७२। टीकायाम् ।

प्रथमानिर्दिष्टं समास उपसर्जनम् १।२।४३॥

समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ।

उपसर्जनं पूर्वम् २।२।३०॥

समासे उपसर्जनं प्राक् प्रयोज्यम् ।

अव्ययीभावश्च १।१।४१॥

अव्ययीभावसमासेन निष्पन्नः शब्दोऽव्ययसंज्ञः स्यात् । अव्ययसमासेन निष्पन्नं शब्दमव्ययं विधातुं सूत्रमिदं स्मरणीयम् । प्रायेणाविग्रहो[1] नित्यसमासः प्रायेणास्वपदविग्रहो[2] वा । विभक्त्यर्थे (सप्तम्यर्थे) - हरौ इति लौकिकविग्रहे हरि ङि अधि इत्यलौकिकविग्रहे वा कृते "अव्ययं विभक्ति" इति सूत्रेण समासे कृते प्रथमानिर्दिष्टं समास उपसर्जनमिति सूत्रेण उपसर्जनसंज्ञायाम्, उपसर्जनं पूर्वमिति सूत्रेणाधेर्हरिशब्दात्पूर्वनिपाते कृत्तद्धितसमासाश्च इत्यनेन प्रातिपदिकसंज्ञायाम्, सुपो धातुप्रातिपदिकयोरिति सूत्रेण सुपो लुकि एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञकात्सुबुत्पत्तौ अधिहरि स् इति जाते "अव्ययीभावश्च" इति सूत्रेणाऽव्ययसंज्ञायाम् अव्ययादात्सुप इति सूत्रेण सुपो लुकि अदन्तत्वाभावान्नाम्भावः - अधिहरि । एवं गिरौ इति - अन्तर्गिरि । गृहे इति गृह ङि अधि इति विग्रहे कृते अव्ययं विभक्ति. इति सूत्रेण समासे प्रथमानिर्दिष्ट. इत्यनेनाधेरुपसर्जनसंज्ञायां तस्य गृहात्पूर्वनिपाते प्रातिपदिकसंज्ञायां सुपो लुकि एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञायां सुबुत्पत्तौ अधिगृह स इति जातेऽव्ययसंज्ञत्वेन सुपो लुकि प्राप्ते -

नाव्ययीभावादतोऽम्त्वपञ्चम्याः २।४।८३॥

अदन्तादव्ययीभावात्सुपो न लुक् तस्य पञ्चमीं विना अमादेशच स्यात् । इत्यनेन सुपोऽमादेशे पूर्वरूपे - अधिगृहम् । एवमधिवनम् । अधिनगरम् । अधिजलम् । पञ्चभ्यां तु - अधिगृहात् अधिगृहाभ्याम् अधिगृहेभ्यः इति ज्ञेयानि । एवमधिवनम् अधिनगरम् अधिजलमित्यादयः संज्ञेयाः ।

तृतीयासप्तम्योर्बहुलम् २।४।८४॥

अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात् । इत्यनेन बहुलाभावपपक्षे - अधिगृहम् अधिवनम्, अधिनगरम्, अधिजलम् । अमोऽभावपक्षे तु सुपो लुगभावेन - तृ.- अधिगृहेण । स. - अधिगृहे । एवमधिवनेन, अधिवने । अधिनगरेण अधिनगरे । अधिजलेन अधिजले । एवं द्विवहुवचनयोरपि ज्ञेयम् । एवमन्तर्गृहम्, अन्तर्वनम्, अन्तर्नगरम् । अमोऽभावपक्षे तु सुपो लुगभावेन तृतीयायाम्-अन्तर्गृहेण । सप्तम्याम्-अन्तर्गृहे । एवमन्तर्वनेन, अन्तर्वने । अन्तर्नगरेण, अन्तर्नगरे । अन्तर्जलेन अन्तर्जले । एषां तृतीयासप्तम्योर्द्विबहुवचनयोरपि रूपाणि भवन्ति - तृ. - अधिगृहाभ्याम् अधिगृहैः । स.- अधिगृहयोः अधिगृहेषु । एवमधिनगरादीनामपि चिन्त्यानि । एतादृशानि रूपाणि अन्यासु विभक्तिषु तु न ।

---

[1] यस्य विग्रहेणैव समासस्यार्थवोधो भवति सोऽविग्रहो लौकिकविग्रहश्च प्रोच्यते । यथा - राज्ञः पुरुष इति ।

[2] यस्य स्वेन पदेन सह विग्रहो न भवति सोऽस्वपदविग्रहः प्रोच्यते । यथा - हरौ इति विग्रहेऽप्रयुक्तोऽधिशब्दः पश्चात्समासविधौ समानीयते । अत्र सप्तम्यर्थद्योतकोऽधिः । अनेनाधिना सह समासो न त्वितिना । एवमव्ययीभावसमासे विग्रहो विचारणीयः ।

गोपायतीति गाः पातीति गोपाः, गोपि इति लौकिकविग्रहे गोपा ङि अधि इत्यलौकिकविग्रहे च कृते अव्ययं विभक्ति. इत्यनेन समासे कृतेऽधेरुपसर्जनसंज्ञायां तस्य पूर्वनिपाते प्रातिपदिकसंज्ञायां सुबुत्पत्तौ अव्ययसंज्ञाया सुपो लुकि अधिगोपा इति जाते-

अव्ययीभावश्च २।४।१८॥

अयं नपुंसकं स्यात् । इत्यनेन सूत्रेण अधिगोपा इत्यस्य नपुंसकसंज्ञायां ह्रस्वो नपुंसके प्रातिपदिकस्येति सूत्रेण आकारस्य ह्रस्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तौ नाव्ययीभावा. इति सूत्रेणामादेशे - अधिगोपम् । शेषमधिगृहवज्ज्ञेयम् । कुमार्याम् इति विग्रहे समासे सुपो लुकि अधेरुपसर्जनसंज्ञायां तस्य पूर्वनिपाते अधिकुमारी इति जाते -

गोस्त्रियोरुपसर्जनस्य १।२।४८॥

उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात् । इत्यनेन ईकारस्य ह्रस्वे सुबुत्पत्तौ अव्ययसंज्ञत्वेन सुपो लुकि - अधिकुमारि । एवमधिस्त्रि । अधिनारि । अधिदेवि । अधिगौरि । अधिपार्वति । प्रस्वाम् इति - अधिप्रसु । अधिबधु । अधिभ्रु । अधिसुभ्रु । रमायाम् इति - अधिरमम् । अधिपद्मम् । अधिदुर्गम् । अधिलतम् । अधिमायम् । इत्यादि । अधिपूर्वकाणामन्येषां मध्ये ईकारान्तानामधिकुमारिवत्, ऊकारान्तानामधिप्रसुवत् रूपं ज्ञेयम् ।

अव्ययमिति विभागेन क्वचिद्विभक्त्याद्यर्थाभावेऽव्ययस्य सुबन्तेन सह समासः । यथा- दिशोर्मध्ये इत्यर्थे अव्ययं विभक्ति. इत्यनेन समासे गोस्त्रियोरुपसर्जनस्येत्यनेन ह्रस्वे प्रातिपदिकत्वात्सुबुत्पत्तौ "नाव्ययीभावाद्." इत्यनेनामि - अपदिशम् । पञ्चम्याम्-अपदिशात् अपदिशाभ्याम् अपदिशेभ्यः । तृतीयासप्तम्योः - अपदिशम् । अपदिशेन अपदिशे । द्विबहुवचनयोरपि रूपं चिन्त्यम् । अस्य क्लीबेऽपि रूपाणि चलन्ति । उक्तञ्च - क्लीबाव्ययमपदिशमित्यमरः । अत्र सर्वेषामकारान्तशब्दानां पञ्चमीं विनाऽन्यासु सर्वासु विभक्तिषु नपुंसकैकवचनवदेकं रूपं भवति । तृतीयासप्तम्योरमोऽभावे स्वस्वलिङ्गरूपवदद्रूपाणि भवन्ति । अव्ययं विभक्ति. इति सूत्रानुसारस्याधोऽन्यान्युदाहरणानि-

२. समीपार्थे - लौकिकविग्रहे समीपशब्दः प्रयुज्यतेऽलौकिकविग्रहे तु उपशब्दः । कृष्णस्य समीपमिति कृष्ण अस् उप इति-उपकृष्णम् । उपकृष्णात्, उपकृष्णेन, उपकृष्णे । एवं गङ्गायाः समीपमिति गङ्गा अस् उप इति गोस्त्रियोरिति ह्रस्वः - उपगङ्गम् । पं. उपगङ्गायाः । उपगङ्गया उपगङ्गायाम् । पञ्चम्यां तृतीयासप्तम्योश्च द्विबहुवचनयोरपि रूपं चिन्त्यम् । उपग्रीवम् । उपबधु । उपगु । उपस्त्रि । ३. समृद्ध्यर्थे सु । मद्राणां समृद्धिः - सुमद्रम् । सुमगधम् । ४. विगता(नष्टा) वृद्धिः - दरिद्रता, नाशः । नाशार्थे दुर् । यवनानां वृद्धिः - दुर्यवनम् । ५. अभावः । अस्मिन्नर्थे निर् । मक्षिकाणामभाव इति मक्षिका आम् निर् - इति = निर्मक्षिकम् । निर्मशकम् । निर्जनम् । ६. अत्ययस्यार्थो नाशः । अस्मिन्नर्थे अति । हिमस्य अत्यय इति - अतिहिमम् । अतिशीतम् । ७. असम्प्रत्यर्थः - अयोग्यता अनुचितश्च । अस्मिन्नर्थे अति । निद्रा सम्प्रति (इदानीं) न युज्यते इति - अतिनिद्रम् । ८. शब्दप्रादुर्भावः - प्रकाशः । अस्मिन्नर्थे इति । हरिशब्दस्य प्रकाश इति - इतिहरि । ९. पश्चादर्थे अनु । विष्णोः पश्चादिति - अनुविष्णु । अनुरथम् । अनुहरि । अनुरामम् । अनुशिवम् । पश्चात्सादृश्ययोरनु इत्यमरः । १०. यथा अस्यार्थः = योग्यता-वीप्सा-पदार्थानतिवृत्ति (अनतिक्रमः) - सादृश्यानि यथार्थाः । क) योग्यता-अत्र योग्यताया अर्थे अनु । रूपस्य योग्यमिति - अनुरूपम् । ख)

वीप्सायाम् (द्विरावृत्तौ) = अर्थमर्थं प्रति = प्रत्यर्थम् । प्रत्येकम् । प्रतिगृहम् । प्रतिग्रामम् । प्रतिस्त्रि । प्रतिजनम् । प्रतिवर्षम् । प्रतिशब्दस्य वीप्साथां कर्मप्रवचनीयविधानसामर्थ्यात्तद्योगे द्वितीयागर्भं वाक्यमपि - ग्रामं ग्रामं प्रति इत्यादि । ग) पदार्थानतिवृत्तौ(अनतिक्रमे)शक्तिमनतिक्रम्येति - यथाशक्ति । एवं यथाधर्मम् । यथाप्रज्ञम् । यथाश्रुतम् । यथायुगम् । यथादेशम् । यथावृत्ति । यथाक्रमम् । यथाविधि । घ) सादृश्यार्थे सह - हरेः सादृश्यम् - हरि अस् सह इति विग्रहे कृते समासे सुपो लुकि सहस्योपसर्जनसंज्ञायां पूर्वनिपाते सह हरि इति जाते -

अव्ययीभावे चाकाले ६।३।८१॥

सहस्य स स्यात् अव्ययीभावे न तु कालवाचकशब्दे परे । इत्यनेन सहस्य स्थाने सादेशे - सहरि । कालवाचकशब्दे परे तु - सहपूर्वाह्णम् । ११. अनुपूर्व्येऽर्थे (अनुक्रमार्थे) - जेष्ठस्यानुपूर्वेण - अनुजेष्ठयम् । अनुवृद्धम् । १२. यौगपद्ये (अभिन्नसहार्थे) - चक्रेण युगपत् - चक्र आ(टा) सह इति - सचक्रम् । सहशब्दस्य स आदेशः । तृणेन युगपत् - सतृणम् । १३. सादृश्ये गुणभूतेऽपि - सदृशः सख्या - ससखि । १४ सम्पत्तौ - योग्यतानुरूपं यः प्राप्यते सा सम्पत्तिः प्रोच्यते । यो देवप्रसादात्प्राप्त । सा समृद्धिर्र्ऋद्धिर्वा कथ्यते । क्षत्राणां सम्पत्तिः = सक्षत्रम् । १५. साकल्यम् = सकलता = अस्मिन्नर्थे - तृणमपरित्यज्येति - सतृणम् । सलोष्टम् । १६. अन्तः = पर्यन्तः = अग्निग्रन्थपर्यन्तमधीते- साग्नि । विशेषविधिं विना कर्मप्रवचनीयेन युक्तस्य पदस्य समासो न । यथा - ग्रामं प्रति ।

यथाऽसादृश्ये २।१।७॥

असादृश्य एव यथाशब्दः समस्यते । तेनेह न - यथा हरिस्तथा हरः । अत्र यथाशब्दो हरेरुपमानत्वं द्योतयति । तेन सादृश्यार्थे यथार्थे वा प्राप्तः समासो निषिध्यते ।

यावदवधारणे २।१।८॥

इयत्तापरिच्छेदे गम्ये यावदित्यव्ययं समस्यते सोऽव्ययीभावः । यावन्तः श्लोकास्तावन्तोऽच्युतप्रमाणा इति यावच्छ्लोकम् । अनवधारणे तु न - यावद्दत्तं तावद्भुक्तम् ।

सुप्रतिना मात्रार्थे २।१।९॥

मात्रा लेशः । तस्मिन्नर्थे विद्यमानेन प्रतिना सह सुबन्तं समस्यते सोऽव्ययीभावः । शाकस्य लेशः = शाकप्रति । एवं सूपप्रति । सुबन्तस्य प्रथमानिर्दिष्टतया पूर्वप्रयोगेणाव्ययोत्तरपदोऽयं समासः । मात्रार्थे किम् - वृक्षं वृक्षं प्रति विद्योतते विद्युत् । अत्र मात्रार्थो नास्ति । यतोऽत्र न समासः ।

अक्षशलाकासंख्याः परिणा २।१।१०॥

अक्ष शलाका संख्या एते शब्दाः परिणा सह समस्यन्ते सोऽव्ययीभावः । द्युतव्यवहारे पराजय एवायं समासः । अक्षेण विपरीतं वृत्तम् = अक्षपरि । एवमेव शलाकापरि । एकपरि । अत्राव्ययोत्तरपदसमासः ।

विभाषा २।१।११॥

अधिकारोऽयम् ।

अप-परि-बहिरञ्चवः पञ्चम्या २।१।१२

अपादयः शब्दाः पञ्चम्यान्तेन सह वा समस्यन्ते सोऽव्ययीभावः । इत उत्तरं समासस्य वैकल्पिकत्वात्पदविग्रहः (लौकिकविग्रहः) । अपपरी वर्जने इति सूत्रे अपपरिशब्दौ वर्जनार्थे पठ्येते । विष्णोः अप = अपविष्णु अपविष्णोः, परिविष्णु परिविष्णोः (विष्णुं वर्जयित्वा) संसारो नास्ति । वनाद्बहिः - बहिर्वनम् बहिर्वनात् । वनात्प्राक् - प्राग्वनम्, प्राग्वनात् ।

आङ्मर्यादाभिविध्योः[1] २।१।१३॥

एतयोरर्थे स्थितयोराङ् पञ्चम्यन्तेन सह वा समस्यते सोऽव्ययीभावः । मुक्तेः आ इति आमुक्ति आमुक्तेः (मुक्तिं मर्यादीकृत्य आमुक्तिं यावद्वा) संसारः ।

एवम् - आलयमालयाद्वा, आमरणमामरणाद्वा, आप्राणविमोक्षणमाप्राणविमोक्षणाद्वा शिवं कृष्णं रामं वा भज भजस्व सेवस्व वा । आषोडशमाषोडशाद्वा ब्राह्मणस्य आद्वाविंशमाद्वाविंशाद्वा क्षत्रियस्य आचतुर्विंशमाचतुर्विंशाद्वा वैश्यस्य चोपनयनकालः - इति मर्यादाया अर्थे । आबालमाबालेभ्यो (बालानभिव्याप्य) वा हरिभक्तिरस्ति । आकुमारमाकुरमारेभ्यो वा पाणिनेर्यशस्ततम् । आपाटलिपुत्रमापटलिपुत्राद्वा वृष्टो देवः (मेघः) । आबालकमाबालकेभ्यो वा भागो मिलितः । आसंसारमासंसाराद्वा शब्दज्योतिर्दीप्यते । आसकलमासकलाद्वा ब्रह्माऽस्ति । आसंसारमासंसाराद्वा तस्य यशो विततम् ।

लक्षणेनाभिप्रती आभिमुख्ये २।१।१४॥

लक्षणं चिह्नम् । अभिमुख्यद्योतकौ अभिप्रती चिह्नवाचिना सह वा समस्येते सोऽव्ययीभावः । अग्निमभि - अभ्यग्नि । अग्निं प्रति - प्रत्यग्नि - शलभाः पतन्ति (अग्निं लक्षीकृत्य तदभिमुखं पतन्तीत्यर्थः) ।

अनुर्यत्समया २।१।१५॥

समया समीपम् । यं पदार्थं समया द्योत्यते तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः । वनस्य समीपम् = अनु - अनुवनमशनिर्गतः - वनस्य समीपं गत इत्यर्थः । एवमनुगृहम् । अनुमार्गम् ।

यस्य चायामः २।१।१६

आयामो दैर्ध्यम् । यस्य दैर्ध्यमनुना द्योत्यते तेन लक्षणभूतेन अनुः समस्यते सोऽव्ययीभावः । अनुगङ्गं वाराणसी - गङ्गाया अनु । गङ्गा दैर्ध्यसदृशैर्दैर्ध्योपलक्षितेत्यर्थः । यमुनाया अनु - अनुयमुनं मथुरा ।

---

[1] मर्यादाया अर्थ आ= आरभ्येति, अभिव्यापकेऽर्थे आ-अभिव्याप्य=आ इति निगद्यार्थ क्रियते । मर्यादाया अर्थे = जन्मन आरभ्येत्याजन्मेति । अभिव्यापकेऽर्थे - फलोदयमभिव्याप्येत्याफलोदयम् । समुद्रमभिव्याप्येत्यासमुद्रमिति । नाकमभिव्याप्य आनाकमिति - रघुवंशः - सर्गः १।५ सञ्जीवनीसुधेन्दुटीकायाम् ।

तिष्ठद्गुप्रभृतीनि च २।१।१७

एतानि निपात्यन्ते । तिष्ठन्त्यो गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः । आयतीगवम् । इत्यादि । इह शत्रादेशः पुंवद्भावविरहितः समासान्तश्च निपात्यते ।

पारे मध्ये षष्ठ्या वा २।१।१८

पारमध्ये शब्दौ षष्ठ्यन्तेन सह वा समस्येते सोऽव्ययीभावः । पारमध्यशब्दयोरेकारान्तत्वमनेनैव सूत्रेण निपात्यते । गङ्गायाः पारम् - पारेगङ्गम्, गङ्गापारम् । गङ्गाया मध्यम् - मध्येगङ्गम्, गङ्गामध्यम् । पारेसमुद्रम् समुद्रपारम् । मध्येसमुद्रम् समुद्रमध्यम् । मध्येमाहाभारतम् महाभारतमध्यम् । पारेनद्यम् नदीपारम् । सूत्रे वाशब्दपठनेनाव्ययीभावविकल्पाभावे षष्ठीगर्भं वाक्यमपि - गङ्गायाः पारात् । गङ्गाया मध्यात् । एवमन्येऽपि ज्ञेयाः ।

संख्या वंश्येन २।१।१९॥

वंशो द्विविधो विद्यया जन्मना च । आद्यो वंशो गुरुशिष्यपरम्परा । द्वितीयो वंशः कुलपरम्परा । वंशे भवो वंश्यः । तद्वाचिना सह संख्या वा समस्यते सोऽव्ययीभावः । द्वौ मुनी वंश्यौ द्विमुनि - पाणिनिकात्यायनौ विद्याप्रवर्तकौ व्याकरणस्य । विद्यातद्वतामभेदविवक्षायां त्रिमुनि व्याकरणम् । जन्मना कुलपरम्परायाम् - एकविंशति - भारद्वाजम् । एकविंशतिर्भारद्वाजा वंश्या इति विग्रहः ।

नदीभिश्च २।१।२०॥

नदीभिः सह संख्या वा समस्यते सोऽव्ययीभावः । **समाहारे चायमिष्यते-वा.**-द्वयोर्यमुनयोः समाहार इत्यर्थे द्विगुं बाधित्वाऽनेनाव्ययीभावसमासे सति - द्वियमुनम् । पञ्चानां नदीनां समाहारः = पञ्चनदम् । सप्तानां गोदावरीणां समाहारः = सप्तगोदावरम् । सप्तानां गङ्गानां समाहारः = सप्तगङ्गम् । एवम् - सप्तनदम् । त्रिनदम् । एषु संख्याया नदीगोदावरीभ्यां चेति समासान्तोऽच् ।

अन्यपदार्थे च संज्ञायाम् २।१।२१॥

अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते सोऽव्ययीभावः संज्ञायाम् । विभाषाधिकारेऽपि वाक्येन संज्ञानवगमनादिह नित्यसमासः । उन्मत्ता गङ्गा यस्मिन्स इत्यर्थे - उन्मत्तगङ्गं नाम देशः । लोहितगङ्गम् । कृष्णगङ्गम् । एवमन्येऽपि चिन्त्याः ।

समासान्ताः ५।४।६८॥

इत्यधिकृत्य ।

तद्धिताः ४।१।७६॥

आपञ्चमसमाप्तेरधिकारोऽयम् ।

अव्ययीभावे शरत्प्रभृतिभ्यः ५।४।१०७॥

शरदादिभ्यः समासान्तष्टच् स्यादव्ययीभावे । शरदः समीपम् = शरद अस् उप इति विग्रहे अव्ययं विभक्ति. इति सूत्रेण समासे प्रातिपदिकत्वात्सुपो लुकि अनेन सूत्रेण टचि समासान्तावयवेऽदन्तत्वम् = उपशरदम् । शरदं शरदं प्रति = प्रतिशरदम् । एवं प्रतिदिशम् । मनोऽनतिक्रम्य = यथामनसम् । शरदादयस्तु शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दिश् दृश् विश् चेतस् चतुर् त्यद् तद् यत् कियत् इति । **जराया जरस् च-ग.**-जरायाः स्थाने जरस् ततोऽच् स्यात् । जरायाः समीपम् = उपजरसम् । **प्रतिपरसमनुभ्योऽक्ष्णः (ग.)** प्रति पर सम् अनु एभ्यः पूर्वकादक्षिशब्दात्समासान्तष्टच् स्यात् । अक्षिणी प्रति (अक्ष्णोऽभिमुखम्) इति विग्रहे लक्षणेनाभिप्रति. इति सूत्रेणाव्ययीभावसमासे प्रतिपरसमनु. इति गणसूत्रेण टचि प्रातिपदिकत्वात्सुब्लुकि यस्येति चेति इकारलोपे प्रातिपदिकत्वात्सुपि अम्भावे = प्रत्यक्षम् । अक्ष्णः परमित्यर्थे समासान्तविधानसामर्थ्यादव्ययीभावसमासे टचि परोक्षे लिट् इति सूत्रनिर्देशसामर्थ्यात्परस्य ओकारादेशे अमि = परोक्षम् । अर्श आदिभ्योऽचिति सूत्रेणाचि कृते तु - परोक्षा क्रिया परोक्षाणि वस्तूनि इत्यादि । अक्ष्णोर्योग्यम् = समक्षम् । अक्ष्णोः पश्चात् = अन्वक्षम् ।

अनश्च ५।४।१०८॥

अन्नन्तादव्ययीभावाट्टच् स्यात् ।

नस्तद्धिते ६।४।१४४॥

नान्तस्य भस्य टेर्लोपः[1] स्यात्तद्धिते परे । राज्ञः समीपमित्यर्थे समासे प्रातिपदिकसंज्ञायां टचि टचस्तद्धितत्वेन पूर्वपदस्य भसंज्ञायाः टेरनो लोपे प्रातिपदिकत्वात्सुबुत्पित्तिः = उपराजम् । आत्मनि इति = अध्यात्मम् ।

नपुंसकादन्यतरस्याम् ५।४।१०९॥

अन्नन्तं यत्क्लीबं तदन्तादव्ययीभावाट्टच् वा स्यात् । चर्मणः समीपम् = चर्मन् अस् उप इति = उपचर्मम् । कर्म अनतिक्रम्य = यथाकर्मम् यथाकर्म । कर्मणि इति = अधिकर्मम् अधिकर्म ।

नदीपौर्णमास्याग्रहायणीभ्यः ५।४।११०॥

एदन्तादव्ययीभावाट्टच् वा स्यात् । नद्याः समीपमित्यर्थे अव्ययं विभक्तीत्यनेन समासे प्रातिपदिकसंज्ञायां सुपो लुकि टचि यस्येति चेति सूत्रेण इकारलोपे अमि = उपनदम् । टजभावे स्त्रीप्रत्ययत्वात् गोस्त्रियोरूपसर्जनस्येति सूत्रेण ह्रस्वे - उपनदि । पौर्णमास्याः समीपम् - उपपौर्णमासम् । टजभावे ह्रस्वे उपपौर्णमासि । उपाग्रहायणम् उपाग्रहायणि ।

---

[1]-नान्तेन भसंज्ञकेन टिशब्देन शब्दस्यान्ते स्थितेन नवर्णेन सहिता आदेरचो गृह्यन्ते । लोपो वर्णस्यादर्शनं करोति ।

झयः ५।४।१११॥

झयन्तादव्ययीभावाट्टच् वा स्यात् । समिधः समीपम् = उपसमिधम् उपसमित् । उपदृशदम् उपदृशद् ।

गिरेश्च सेनकस्य ५।४।११२॥

गिर्यन्तादव्ययीभावाट्टच् वा स्यात् । सेनकः कश्चिदाचार्यः । तस्य नामग्रहणं पूजार्थम् । गिरेः समीपमिति विग्रहे समासे प्रातिपदिकसंज्ञायां सुपो लुकि अनेन सूत्रेण टचि यस्येति चेति सूत्रेण इकारलोपे अमि = उपगिरम् उपगिरि । गिरेरन्त इति विग्रहे = अन्तर्गिरम् अन्तर्गिरि ।

प्रयोगाः - जगदधिहरि तिष्ठति । प्राणिनोऽऽध्यात्मं सन्ति । अध्यात्मं प्रेरय स्वं त्वम् । मध्येसमुद्रं ककुभः विशङ्गी या कुर्वती काञ्चनवप्रभासा । पारेगङ्गं को याति । एतानि वस्तूनि प्रत्यक्षं भान्ति । शलभा अभ्यग्नि पतन्ति । अनुदात्ताश्चानुपदं संग्रहीष्यन्ते । यथाविधि कृतो यज्ञः । उपगिरं गहनं वनमीक्ष्यते । प्रतिदिनमुदये नवं नवम् । निर्मक्षिकमाशैशवं सेवनमिदानीं संवृत्तम् । एज्ज्ञानं परोक्षम् । अनुराजमार्गमनुमार्गं वा मम गृहमस्ति । स प्रतिवाक्यमशुद्धं वदति लिखति पठति च । यदि शब्दाहृयं ज्योतिरासंसारं न दीप्यते । प्रतिदिनं घटना घटिष्यति । प्रतिवर्षं स विदेशं गच्छेत् स्वदेशमागच्छेच्च । संसारे प्रत्येकं पदार्थाः प्रतिक्षणमनुसन्धातव्याः । कोऽपि प्रत्यहं मृत्युसमीपमेति । भवान् यथाविधिकर्म कुर्यात् (कुर्वीत विदध्यात्) । गुरुः प्रतिदिनमुपदिशति । ब्रह्मा अनुविष्णु प्रकाशते । स यथाशक्ति धनं ददाति । गौः सतृणमत्ति । पुत्रा अनुजेष्ठं संस्कर्तव्याः । संसारे प्रत्येकं पदार्थाः क्षणिकाः सन्ति । आचार्यः प्रत्यर्थं वदति । व्याघ्रा बहिर्वनं सञ्चरन्ति । पशवः प्राग्वनं सन्ति । यथाक्रमं पुंसवनादिकाः क्रियाः ।

इति अव्ययीभावः ॥६-२॥

६-३ तत्पुरुषः

तत्पुरुषे प्रायेण द्वयोः पदयोः समासः क्रियते । विशेषसूत्रेण विहितं लिङ्गं विना उत्तरपदस्य लिङ्गानुसारं समस्तः शब्दः प्रयुज्यते । अनेन समासेन निष्पन्नः शब्दः प्रायेण विशेषणं भवति । समासेन निष्पन्नस्य शब्दस्य प्रथमाविभक्ते रूपं समुल्लिख्यते । प्रथमाविभक्तौ स्थितस्य विशेष्यस्य वचनानुसारं विशेषणं प्रयुज्यते । यथा - संसारप्राप्तो[1] जनः । द्विताया श्रिता. इति समासः । संसारप्राप्तौ जनौ । संसारप्राप्ता जना इत्यादि । द्वितीयाविभक्तितस्तु समासानन्तरं प्रथमाविभक्तौ रूपं निष्पाद्य तत्पश्चात् तम् तौ तानित्यादिनि रूपाणि प्रयुज्यन्ते । यथा - कृष्णश्रितस्तम् = कृष्णश्रितं भक्तम् । कृष्णश्रितौ तौ = कृष्णश्रितौ भक्तौ । कृष्णश्रितास्तान् = कृष्णश्रितान् भक्तान् । द्वितीया श्रिता. इति समासः । कृष्णश्रितस्तेन = कृष्णश्रितेन भक्तेन । कृष्णश्रितौ ताभ्याम् = कृष्णश्रिताभ्यां भक्ताभ्याम् । कृष्णश्रितास्तैः = कृष्णश्रितैर्भक्तैरित्यादि । एवं प्रकारेण तत्पुरुषसमासेन निष्पन्नशब्दस्यान्ते चतुर्थ्यादयो विधीयन्ते ।

[1] समासे सर्वत्र लौकिकोऽलौकिकश्च विग्रहः क्रियते । व्यवहारे सौविध्यर्थं लौकिविग्रहः प्रयुज्यते प्रायेणालौकिविग्रहस्तु न । सर्वत्र समासानन्तरं विग्रहवाक्ये प्रदर्शिताः सुपो लुप्यन्ते ।

तत्पुरुषः २।१।२२॥

अधिकारोऽयं प्राग्बहुव्रीहेः ।

द्विगुश्च २।१।२३॥

द्विगुरपि तत्पुरुषसंज्ञ स्यात् ।

तत्पुरुषे व्यधिकरणं समानाधिकरणं नञ्कुगतिप्राद्युपपदसमासान्तादयश्च समासस्य भेदाः सन्ति । ते क्रमेण लिख्यन्ते ।

६-३-१ व्यधिकरणतत्पुरुषः

तत्पुरुषस्य व्यधिकरणे समस्यमानयोः पदयोर्विग्रहे विभक्तिरसमाना भवति । व्यधिकरणे प्रथमातत्पुरुषो द्वितीयातत्पुरुषस्तृतीयातत्पुरुषश्चतुर्थीतत्पुरुषः पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषश्चैते सप्त अन्तर्भवन्ति । समासे लौकिकविग्रहोऽलौकिकविग्रहश्च द्वौ भवतः । समासे प्रायेण सौविध्यार्थं लौकिकविग्रहः क्रियते ।

क) प्रथमातत्पुरुषः - अस्य समासस्य समस्यमानयोः पदयोर्विग्रहे पूर्वं प्रथमान्तं पदं परे षष्ठ्यैकवचनान्तं च पदं प्रयुज्येते न तु षष्ठ्या द्विबहुवचनयोः पदम् -

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे २।२।१॥

एकदेशी अवयवी । अवयववाचिना समर्थसुबन्तेन सह अवयववाचिनः पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी स च समासस्तत्पुरुषः । समर्थसुबन्तेनेति पदं तत्पुरुषस्य सूत्रवृत्तावनुवर्तते । विग्रहे पूर्वं प्रथमान्तं परे षष्ठ्यन्तं च पदे प्रयुज्येते । षष्ठी इति सूत्रेण प्राप्तः षष्ठीसमासोऽनेन सूत्रेण बाध्यते । पूर्वं कायस्येति लौकिकविग्रहे पूर्व सु काय अस् इत्यलौकिकविग्रहे षष्ठी इति सूत्रेण प्राप्तं षष्ठीसमासं पूर्वापराधरोत्तरमिति सूत्रेण प्रबाध्यानेनैव सूत्रेण समासे कृते समासत्वात्प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरिति सूत्रेण समासान्तस्य सुपो लुकि अवयविनः पूर्वादिः प्रथमानिर्दिष्टतयोपसर्जनसंज्ञायां तस्य पूर्वप्रयोगे पूर्वकाय इति जाते -

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २।४।२६॥

द्वन्द्वान्ततत्पुरुषयोः पदयोः परपदस्यैव लिङ्गं स्यात् । इति सूत्रेण परपदस्य स्वलिङ्गत्वे समुदायस्य प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - पूर्वकायः । अपरं कायस्येति विग्रहे "पूर्वापराधरो." इति सूत्रेण षष्ठी इति सूत्रेण प्राप्तं समासं प्रबाध्य पूर्वापराधरो. इति सूत्रेणैव समासे जाते सुपो लुकि अपरस्योपसर्जनसंज्ञायां तस्य कायात्पूर्वप्रयोगे परवल्लिङ्गमिति सूत्रेण परपदस्य स्वलिङ्गत्वे समुदायस्य प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - अपरकायः । एवमधरमङ्गस्य = अधराङ्गम् । अवयविनो बहुत्वान्नेह समासः - पूर्वं शरीराणाम् । पूर्वश्छात्राणाम् । परवल्लिङ्गमिति सूत्रे द्वन्द्वग्रहणात् द्वन्द्वसमासेन निष्पन्नस्य परस्थितस्य शब्दस्य परवलिङ्गताऽनेनैव सूत्रेण विधीयते । कुक्कुटश्च मयूरी चेति विग्रहे द्वन्द्वे चेति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि पिरल्लिङ्गतायां प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - कुक्कुटमयूर्याविमौ । मयूरी च कुक्कुटश्च = मयूरीकुक्कुटाविमौ ।

अर्धं नपुंसकम् २।२।२॥

समांशवाच्यर्धशब्दो नित्यं क्लीबे अवयविवाचिना एकत्वसंख्यावोधकेन सुबन्तेन सह समस्यते स तत्पुरुषः । अर्धं पिपल्या इति विग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि अर्धशब्दस्योपसर्जनसंज्ञायां तस्याः पिपल्याः पूर्वनिपाते परवल्लिङ्गत्वे प्रातिपदिकसंज्ञायां सुवुत्पत्तौ अर्धपिपली । द्वितीयाया एकवचने - अर्धपिपलीम् । एवं तृतीयादिविभक्तीनामेकवचनं रूपं चिन्त्यम् । अर्धकोशातकी । अर्धहरितकी । द्विबहुवचनसंख्यायां तु न - अर्धं पिपल्योः । अर्धं पिपल्लीनाम् । क्लीबे किम् - ग्रामस्य अर्ध इत्यत्रानेन सूत्रेण क्लीवत्वाभावे न समासः । षष्ठीसमासे कृते सुपो लुकि ग्रामस्य पूर्वप्रयोगे - ग्रामार्धः ।

द्विगु[1] -प्राप्ता-पन्ना-लंपूर्व-गतिसमासेषु प्रतिषेधो वाच्यः-वा-द्विगु प्राप्त आपन्न अलपूर्व गतिसमास एतेषु पूर्वेषु परवल्लिङ्गस्य प्रतिषेधो वाच्यः । पञ्चसु कपालेषु संस्कृतः - पञ्चकपालः । अष्टसु कपालेषु संस्कृतः = अष्टकपालः । एकादशसु कपालेषु संस्कृतः = एकादशकपालः पुरोडाशः । प्राप्तो जीविकाम् = प्राप्तजीविकः । एवमापन्नजीविकः । अलं कुमारी = अलङ्कुमारी । निष्कौशौम्बिः । अत्र दीर्घान्तानां ह्रस्वो गोस्त्रियोरूपसर्जनस्येतिसूत्रेण विहितः । एवमन्येऽपि ज्ञेयाः ।

द्वितीय- तृतीय-चतुर्थ-तुर्याण्यन्यतरस्याम् २।२।३॥

एतान्येकदेशिना सह वा समस्यन्ते स तत्पुरुषः समासः । द्वितीयं भिक्षायाः = द्वितीयभिक्षा । एवं तृतीयभिक्षा । चतुर्थभिक्षा । तूर्यभिक्षा । एतेषां परवल्लिङ्गता चिन्त्या । अन्यपक्षे तु षष्ठीसमासः - भिक्षाया द्वितीयम् = भिक्षाद्वितीयम् । एवं भिक्षातृतीयम् । भिक्षाचतुर्थम् । भिक्षातुर्यम् ।

प्राप्तापन्ने च द्वितीयया २।२।४॥

प्राप्त आपन्न एतौ द्वितीयान्तेन सह समस्येते स तत्पुरुषः । प्राप्तो जीवकाम् = प्राप्तजीविकः । आपन्नो जीविकाम् = आपन्नजीवकः - उभयोः गोस्त्रियोरिति सूत्रेण ह्रस्वः । एवं प्राप्तकष्टम् । आपन्नकष्टम् । प्राप्तजीवनम् । आपन्नजीवनम् । प्राप्तसंसारः । आपन्नसंसारः । प्राप्तापन्नाभ्यां पूर्वं द्वितीयायाः प्रयोगे तु - द्वितीया श्रितातीत. इति सूत्रेण द्वितीयातत्पुरुषसामर्थ्यात्पक्षेऽपि समासः । जीविकां प्राप्तः = जीविकाप्राप्तः । जीविकामापन्नः = जीविकापन्नः । एवं कष्टप्राप्तः । कष्टापन्नः । जीवनप्राप्तः । जीवनापन्नः । संसारप्राप्तः । संसारापन्नः । इह सूत्रे द्वितीयया अ इति पृथक्कृत्य अकारोऽपि विधीयते । तेन प्राप्तजीविकामिति = प्राप्तजीविका स्त्री । एवमापन्नजीविका स्त्री । इति प्रथमतत्पुरुषः ।

ख) द्वितीयातत्पुरुषः - अस्य समासस्य विग्रहे पूर्वं पदं द्वितीयान्तं परे गत्यर्थकक्रिया च प्रयुज्येते -

---

[1] द्विगुसमासे कृते संख्यावाचकशब्द आदौ प्रयुज्यते ।

द्वितीया श्रिता-तीत-पतित-गता-त्यस्त-प्राप्ता-पन्नैः २।१।२४॥

द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स तत्पुरुषः । कृष्णं श्रितः = कृष्णश्रितः । कृष्णं श्रितौ = कृष्णश्रितौ । कृष्णं श्रिताः = कृष्णश्रिताः । एवमन्येऽपि ज्ञेयाः - दुःखमतीतः = दुःखातीतः । अतीतः = अतिक्रान्तः पारङ्गतो वा । गर्तं पतितः = गर्तपतितः । कूपपतितः । संसारपतितः । ग्रामं गतः = ग्रामगतः । एवं ध्यानगतः, स्वर्गगतः, गृहगतः । तुहिनमत्यस्तः = अतिक्रान्तः तुहिनात्यस्तः । एवं ग्रामात्यस्तः, नद्यत्यस्तः । ग्रामं प्राप्त = ग्रामप्राप्तः । दुःखप्राप्तः, सुखप्राप्तः, स्वर्गप्राप्तः, परलोकगतः स्वर्गचलितः । संशयमापन्नः = संशयापन्नः । एवमाशाऽतीतः । नरक पतितः । नरकापन्नः । नरकप्राप्तः । सङ्कटापन्नः । संशयापन्नः । परदेशचलितः । स्वर्गापन्नः । सुखापन्नः । दुःखापन्नः । परलोकगतः इत्यादि । **गम्यादीनामुपसंख्यानम्-वा.**-ग्रामं गमी = ग्रामगमी । मथुरां गामी = मथुरागामी । अन्नं वुभुक्षुः = अन्नबुभुक्षुः ।

खट्वा क्षेपे २।१।२६॥

खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन सह समस्यते निन्दायाम् स तत्पुरुषः । खट्वामारूढः = खट्वारूढो जाल्मः = अलसः । इति द्वितीयातत्पुरुषः ।

ग) तृतीयातत्पुरुषः - अस्य समास्य विग्रहे पूर्वं तृतीयान्तं पदं परे सूत्रेण गृहीतपदेन सह समस्यते -

तृतीया तत्कृतार्थेन गुणवचनेन २।१।३०॥

तृतीयान्तमेतैः सह वा समस्यते स तत्पुरुषः । शङ्कुलया खण्डः = शङ्कुलाखण्डः । धान्येनार्थः = धान्यार्थः । पूर्व-सदृश. इति सूत्रे पठिताः शब्दाः समासे सदा उत्तरपदे चिन्त्यन्ते -

पूर्व-सदृश-समो-नार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः २।१।३१॥

तृतीयान्तमेतैः सह वा समस्यते स तत्पुरुषः । एते परे समासः क्रियते । मासेन पूर्वः = मासपूर्वः । मात्रा सदृशः[1] = मातृसदृशः । एवं पितृसदृशः । गुरुणा समः = गुरुसमः । ऊनः = न्यूनः = माषेण ऊनम् = माषोणं कार्षापणम् । माषेन विकलम् = हीनम् = माषविकलम् । पादविकलम् । वाचा कलहः = वाक्कलहः । स्वजनकलहः । आचारेण निपुणः = आचारनिपुणः । निपुणयोगे सप्तम्यपि - शास्त्रे निपुणः = शास्त्रनिपुणः । शर्कराभिर्मिश्रम् = शर्करामिश्रम् । आचारेण श्लक्ष्णम् (कुशलः) = आचारश्लक्ष्णः । कुट्टनेन श्लक्ष्णः (स्निग्धः) = कुट्टनश्लक्ष्णः । **अवरस्योपसंख्यानम्-वा.**-मासेन अवरः (पूर्वं) = मासावरः ।

१ वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् । साधारणः समानश्च स्युरुत्तरपदे त्वमी - अमरः ३।१०।३७॥ एते शब्दाः समासेऽन्यपदादुत्तरे प्रयुज्यन्तेऽसमासे तु पदात्पूर्वपरयोरपि । यदैते विशेषणरूपे प्रयुज्यन्ते तदाऽजातिवाचिना सह ते समस्यन्ते- कृत्यतुल्याख्या अजात्या इति सूत्रं द्रष्टव्यम् ।

कर्तृकरणे कृता बहुलम् २।१।३२॥

कर्तरि करणे च विहिता तृतीया कृदन्तेन सह बहुलं वा समस्यते स तत्पुरुषः । कर्तरि- हरिणा त्रातः = हरित्रातः । एवं दैवरक्षितः । दैवहतः । सर्पमृतः । अग्निनष्टः । बालभुक्तः । कृष्णहतः । राममारितः । कृष्णमारितः । पुत्रखादितः । जनककथितः । इत्यादि । करणे - शस्त्रेण हतः = शस्त्रहतः । एवं नखभिन्नः । रसयुक्तः । गुणयुक्तः । वाणहतः । शस्त्रमृतः । विषमृतः । अस्त्ररक्षितः । अग्निदग्धः । इत्यादि । **कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्- प.**-नखैर्निर्भिन्नः = नखनिर्भिन्नः । अस्मिन्सूत्रे क्तान्तपदे परे कर्तृकरणयोर्विचारः सदा विधेयः ।

अन्नेन व्यञ्जनम् २।१।३४॥

संस्कार्यमन्नं संस्कारकं व्यञ्जनम् । व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सह वा समस्यते स तत्पुरुषः । दध्ना ओदनः = दध्योदनः । एवं क्षीरौदनः । "भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री" इत्यमरः ।

भक्ष्येण मिश्रीकरणम् २।१।३५॥

मिश्रिकरणवाचि तृतीयान्तं भक्ष्यवाचकेन सुबन्तेन सह वा समस्यते स तत्पुरुषः । गुडेन धानाः = गुडधानाः (गुणमिश्रिता धानाः) भृष्टा यवाः । इति तृतीयातत्पुरुषः ।

घ) चतुर्थीतत्पुरुषः - अस्य विग्रहे पूर्वं चतुर्थ्यन्तं भवति -

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २।१।३६॥

चतुर्थ्यन्तार्थाय यत्तद्वाचिनार्थादिभिश्च सह चतुर्थ्यन्तं वा समस्यते स तत्पुरुषः । तदर्थादयः क्रमेणानुसन्धेयाः । यूपाय (यज्ञस्तम्भाय) दारु = यूपदारु । कुण्डलाय हिरण्यम् = कुण्डलहिरण्यम् । मञ्चाय काष्ठम् = मञ्चकाष्ठम् । तादर्थ्येऽपि विकृतेरभावान्नेह समासः - पाकाय स्थाली । अवहननायोलूखलम् । **अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्-वा.**-तेनाऽस्वपदविग्रहः । द्विजायायम् = द्विजार्थः सूपः । द्विजाय इयम् = द्विजार्था यवागूः । द्विजाय इदम् = द्विजार्थं पयः । गृहाय इमानि = गृहार्थानि काष्ठानि । भूतेभ्यो बलिः = भूतबलिः । गवे हितम् = गोहितम् । जनेभ्यो हितम् = जनहितम् । तस्मै हितम् = तद्धितम् । जनाय सुखम् = जनसुखम् । गवे रक्षितम् = गोरक्षितम् । इति चतुर्थ्यन्तसमासः ।

ङ) पञ्चमीतत्पुरुषः - अस्य समासस्य विग्रहे पूर्वं पदं पञ्चम्यन्तं प्रयुज्यते । अत्र भयवाचकशब्दा उत्तरपदे चिन्त्याः -

पञ्चमी भयेन २।१।३७॥

पञ्चम्यन्तं भयशब्देन सुबन्तेन सह वा समस्यते स तत्पुरुषः । चोराद्भयम् = चोरभयम् । एवं व्याघ्रभयं सर्पभयं सिंहभयं भल्लुकभयं शत्रुभयं विपद्भयं रोगभयं च्युतिभयं दैन्यभयं वादिभयं रिपुभयं चोरभयं राजभयमित्यादि । **भयभीतभीतिभीरिति वाच्यम्-वा.**-अग्नेर्भयम् = अग्निभयम् । एवं

वृकभयं जलभयमस्त्रभयम् । वृकाद्भीतः - वृकभीतः । वृकभीतिः । वृकभीः । कालभयमित्यादि । तसिल्प्रत्ययान्तेव सह समासः अकुतोभयम् । अत्र तसिलः सस्य रुत्वमुत्वं गुणश्च ।

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः २।१।३८॥

एतैः सुबन्तैः सहाल्पं पञ्चम्यन्तं वा समस्यते स तत्पुरुषः । सुखादपेतः = सुखापेतः । एवं धर्मापेतः । दुराचारापेतः । कल्पनाया अपोढः = कल्पनापोढः । दुःखाद् मुक्तः = दुःखमुक्तः । बन्धनमुक्तः । संसारमुक्तः । चक्रमुक्तः । पापमुक्तः । स्वर्गात्पतितः = स्वर्गपतितः । आचारपतितः । जातेः पतितः = जातिपतितः । तरङ्गादपत्रस्तः (भीतः) = तरङ्गापत्रस्तः । अल्पश उक्तेर्नेह - प्रासादात्पतितः । भोजनादपत्रस्तः ।

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन २।१।३९

स्तोक अन्तिक[1] दूरार्थक[2] कृच्छ्र एते पञ्चम्यान्ताः क्तप्रत्ययान्तेन सह वा समस्यन्ते स तत्पुरुषः ।

पञ्चम्याः स्तोकादिभ्यः ६।३।२॥

एभ्यः परायाः पञ्चम्या अलुक् उत्तरपदे परतः । स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकान्मुक्तः । अन्तिकादागतः । विप्रकृष्टादागतः । दूरादागतः । समीपादागतः । कृच्छ्रान्मुक्तः । इति पञ्चम्यन्तस्तत्पुरुषः ।

च) षष्ठीतत्पुरुषः - अस्य समासस्य विग्रहे पूर्वं पदं षष्ठ्यन्तं प्रयुज्यते ।

षष्ठी २।२।८

षष्ठ्यन्तं सुबन्तेन सह वा समस्यते स तत्पुरुषः । राज्ञः पुरुषः इति लौकिकविग्रहे राजन् अस् पुरुष सु इत्यलौकिकविग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि नलोपे समासत्वात्प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - राजपुरुषः[3] । एवं राजाश्वः । पशूनां (जीवानां) पतिः = पशुपतिः । रमायाः पतिः = रमापतिः । एवं लक्ष्मीपतिः । सीतापतिः । उमापतिः । गौरीपतिः । महतः आश्रयः = महाश्रयः । विद्यालयः । पुस्तकालयः । विश्वभाषा । मातृभाषा । तव नगरम् = त्वन्नगरम् । अस्माकं देशः = अस्मद्देशः । युष्माकं देशः = युष्मद्देशः । मम देशः = मद्देशः । युष्माकं गृहम् = युष्मद्गृहम् । मम गृहम् = मद्गृहम् । तव गृहम् = त्वद्गृहम् । तव पुत्रः = त्वत्पुत्रः । मम पुत्रः = मत्पुत्रः । मत्पिता । मन्माता । आम्रफलम् । कदलीफलम् । वृक्षशाखा । राजसभा । सतां निधिः = सन्निधिः = सामीप्यम्, सज्जनसमीपो वा । अपरोक्षस्यानुभूतिः=अपरोक्षानुभूतिः । एवमन्येऽपि ।

---

१ समीपः, निकटः, आसन्नः, सन्निकृष्टः, सनीडः, सदेशः, उपभ्यासः, सविधः, समर्यादः, सवेशः, उपकण्ठः अभ्यर्णः, अभ्यग्रः - अमरः - ३।१।६५-६५ ॥

२ विप्रकृष्टकः - अमरः - ३।१।६६॥

३ प्रत्ययलक्षणेन लुप्तान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वेन "नलोपः प्रातिपदिकान्तस्य" इति सूत्रेण नस्य लोपः ।

याजकादिभिश्च २।२।९

एभिः सह षठ्यन्तं वा समस्यते स तत्पुरुषः । याजक-पूजक-परिचारक-परिवेषक-स्नातका-ध्यापको-त्पादको-द्ववर्तक-होतृ-भर्तृप्रभृतयो याजकादयः । एभिः सह अन्य शब्दः सदा विचिन्त्यः । तृजकाभ्यां कर्तरि इति सूत्रेणायं समासो न निषिध्यते याजकादिभिरिति निर्देशात् । ब्राह्मणस्य याजकः=ब्राह्मणयाजकः । एवं ग्रामयाजकः । क्षत्रिययाजकः । देवानां पूजकः = देवपूजकः । शिवस्य पूजकः = शिवपूजकः । एवं कृष्णपूजकः । रामपूजकः । दुर्गापूजकः । देवीपूजकः । राजपरिचारकः । अन्तःपरिवेषकः । व्रतस्नातकः । विद्यास्नातकः । विद्याव्रतस्नातकः । वेदाध्यापकः । दुःखोत्पादकः । सुखोत्पादकः । अङ्गोद्वर्तकः । आज्यहोता । भूभर्ता । **गुणात्तरेण तरप्लोपश्चेति वक्तव्यम्-वा.**-तरबन्तं यद्गुणवाचि तेन सह समासस्तरप्प्रत्ययान्तस्य लोपश्च । न निर्धारणे इति पूरणगुण इति सूत्राभ्यां प्राप्तस्य निषेधस्य निषेधकोऽयं वार्तिकः । सर्वेषां श्वेततर इत्यत्रानेन वार्तिकेन समासः समासानन्तरं तरप्प्रत्ययस्य लोपे = सर्वश्वेतः[1] । सर्वेषां शुक्लतरः = सर्वशुक्लः । एवमन्येऽपि ज्ञेयाः । **कृद्योगा षष्ठी च समस्यत इति वाच्यम्-वा.**-इध्मस्य व्रश्चनः = इध्मव्रश्चनः । कर्तृकर्मणोः कृतीति सूत्रेण कृता षष्ठी कृद्योगा । प्रतिपदविधाना इति वार्तिकेन प्राप्तस्य निषेधस्यायं प्रतिप्रसवः निषेधे प्राप्ते तदपवादकं पुनर्विधानं प्रतिप्रसवः । निर्धारणे कृतायाः षष्ठ्या समासोऽधः सूत्रेण निषिध्यते -

न निर्धारणे २।२।१०॥

निर्धारणे या षष्ठी सा न समस्यते । नृणां द्विजःश्रेष्ठः । छात्राणां मैत्रः पटुः । कवीनां कालिदासो महान् । एवं भक्तानां शिरोमणिः । निर्धारणे विहितायां सप्तम्यां तु सप्तमी शौण्डैरिति सूत्रेण समासः । कविषु कालिदास = कविकालिदासः । इत्यादि । **प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम्-वा.**-षष्ठी शेष इति सूत्रेण विहितां षष्ठीं विनाऽन्यत्रानेन वार्तिकेन षष्ठीसमासो निषिध्यते । सर्पिषो ज्ञानम् । यतो निर्धारणाद्भिन्नायाः षष्ठ्याः समासस्तु षष्ठीति सूत्रेण भवति ।

पूरण-गुण-सुहितार्थ-सद-व्यय-तव्य-समानाधिकरणेन २।२।११॥

पूरणार्थैः सदादिभिश्च सह षष्ठी न समस्यते । पूरणे-सतां षष्ठः । शिष्याणां पञ्चमः । छात्राणां चतुर्थ इत्यादि । गुणे काकस्य कार्ष्ण्यम् । जलस्य निर्मलता । मेघस्य शौक्ल्यमित्यादि । सुहितार्थे (तृप्त्यर्थे) = फलानां सुहितः । ओदनानां तृप्त इत्यादि । सत्-शतृशानचौ = द्विजस्य कुर्वन् कुर्वाणो वा । ओदनस्य पचन् पचमानो वा इत्यादि । अव्यये = रामस्य कृत्वा । ग्रामस्य गत्वा इत्यादि । तव्ये - ब्राह्मणस्य कर्तव्यम् । तस्य गन्तव्यमित्यादि । तव्यति तु न निधेषः - स्वस्य कर्तव्यम् = स्वकर्तव्यम् । समानाधिकरणे तक्षकस्य सर्पस्य । रामस्य कृष्णस्येत्यादि ।

---

[1] गुणवाचकशब्दा - ... तद्वदर्थाः सुषीमः शिशिरो जडः । तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः - अमरः १।३।१९॥ शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डुराः । अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः - अमरः - १।५।१२-१॥ सुकृती पुण्यवान् धन्यने महेच्छस्तु महाशयः - अमरः - ३।१।१॥ एवं चिन्त्याः । सर्वेषां सुकृतितरः = सर्वसुकृती । सर्वेषां पुण्यवत्तरः = सर्वपुण्यवान् । इत्यादि ।

क्तेन च पूजायाम् २।२।१२॥

मतिबुद्धपूजार्थेभ्यश्चेति सूत्रेण विहितेन क्तप्रत्ययान्तेन सह षष्ठी न समस्यते । राज्ञां मतो बुद्धिःपूजितो वा ।

अधिकरणवाचिना च २।२।१३॥

अधिकरणार्थे विहितेन क्तेन सह षष्ठी न समस्यते । ध्रौव्यगति. इति सूत्रेणाधिकरणे क्तः । इदमेषामसितं गतं भुक्तं वा ।

कर्मणि च २।२।१४॥

उभयप्राप्तौ कर्मणीति सूत्रेण विहिता षष्ठी न समस्यते । आश्चर्यो गवां दोहोऽगोपेन ।

तृजकाभ्यां कर्तरि २।२।१५॥

कत्रर्थे विहिताभ्यां तृजकाभ्यां सह षष्ठी न समस्यते । अपां स्रष्टा । वज्रस्य भर्ता । ओदनस्य पाचकः । काव्यस्य पाठकः ।

कर्तरि च २।२।१६॥

कर्तरि विहितायाः षष्ठ्या अकेन सह न समस्यते । भवतः शायिका ।

छाया बाहुल्ये २।४।२२॥

छायान्तस्तत्पुरुषो नपुंसकं स्यात् पूर्वपदार्थबाहुल्ये । पूर्वपदार्थबाहुल्यार्थेन बहुवचनं गृह्यते । तेन विग्रहे बहुवचनान्तं पदं प्रयुज्यते । इक्षूणां छाया = इक्षुच्छायम् गोस्त्रियोरिति ह्रस्वः । वृक्षाणां छाया = वृक्षच्छायम् । तरुणां छाया = तरुच्छायम् । शालानां छाया = शालाच्छायम् । शलभानां छाया = शलभच्छायम् । इक्षोः इक्ष्वोर्वा छाया-अत्र विग्रहे एकद्विवचनयोस्तु समासो न । एवं वृक्षादीनामपि न समासः ।

सभाराजाऽमनुष्यपूर्वा २।४।२३॥

राजपर्यायपूर्वोऽमनुष्यपूर्वश्च समासान्तस्तत्पुरुषो नपुंसकं स्यात् । इनस्य (राज्ञः) सभा=इनसभम् । ईश्वरस्य (राज्ञः) सभा = ईश्वरसभम् । एतौ राजपर्यायौ । **पर्यायस्यैवेष्यते-वा.-** पर्यायवाचकशब्दस्यैव समास इष्यते न तु राजशब्दस्य । नेह - राजसभा । चन्द्रगुप्तसभा । अमनुष्यशब्दो रूढ्या रक्षपिशाचादीनाह । रक्षसादिपूर्वकः समासान्तस्तत्पुरुषो नपुंसकं विधीयते । रक्षसः सभा = रक्षःसभम् । एवं पिशाचसभम् । गोस्त्रियोरिति ह्रस्वः । नेह - काष्ठसभा । देवदत्तसभा ।

अशाला च २।४।२४॥

सङ्घातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात् शालां विना । स्त्रीणां सभा = स्त्रीसभम् (स्त्रीसङ्घात इत्यर्थः) । शालाशब्दार्थबोधे तु क्लीबं न स्यात् । धर्मस्य सभा = धर्मसभा । एवमनाथसभा = अनाथकुटी ।

विभाषा सेना-सुरा-च्छाया-शाला-निशानाम् २।४।२५॥

एतदन्तस्तत्पुरुषः क्लीबं वा स्यात् । ब्राह्मणानां सेना = ब्राह्मणसेनम् ब्राह्मणसेना । यवस्य सुरा = यवसुरम् यवसुरा । कुडचस्य छाया = कुडचच्छायम् कुडचच्छाया । गवां शाला = गोशालम्, गोशाला । उद्योगस्य शाला = उद्योगशालम् उद्योगशाला । प्रयोगशालम् प्रयोगस्यशाला । शुनां निशा = श्वनिशम् श्वनिशा । इति षष्ठीतत्पुरुषः ।

छ) सप्तमीतत्पुरुषः - अस्य समास्य विग्रहे पूर्वं सप्तम्यंन्तं पदं परे शौण्डादयः सक्तलीनाऽऽसक्तरताश्चेत्यादयः क्तान्तक्रियाश्च गृह्यन्ते ।

सप्तमी शौण्डैः २।१।४०॥

शौण्डादिभिः सुबन्तैः सप्तम्यन्तं वा समस्यते स तत्पुरुषः । शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तः अधि पटु पण्डित कुशल चपल निपुण इति शौण्डादिः[1] । अन्तः । अक्षेषु शौण्डः = अक्षशौण्डः । एवमक्षधूर्तः । रणकुशलः । कार्यकुशलः कविताप्रवीणः । व्याख्यानपण्डितः । कार्येषु चपलः (शीघ्रः) = कार्यचपलः । प्रेम्णि धूर्तः = प्रेमधूर्तः । द्युते कितवः = द्युतकितवः । सभायां पण्डितः = सभापण्डितः । अधिशब्दात् "अध्युत्तरपदात्खः" इति सूत्रेण खे खस्य ईनि कृते यस्येति चेति सूत्रेण इकारलेपे अधीन इति शब्दो निष्पन्नः । ईश्वरे अधीनः = ईश्वराधीनः । वने अन्तः = वनान्तः । पदे अन्तः = पदान्तः । दक्षे तु - चतुरपेशलपटवः सुत्थान उष्णश्चेत्यमरः । एभिः सह सप्तम्यन्तं समस्यते स तत्पुरुषः । वचने पटु = वचनपटुः । एवं वचनचतुरः । भाषणचतुरः । कर्मचतुरः । इत्यादि । **द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तीनां प्रयोगवशात्समासो ज्ञेयः** । यतो द्वितीयातृतीयेत्यादिसूत्राणां योगविभागादित्यत्र "सप्तमी" इति सूत्रपठनेन सप्तम्यन्तं समर्थसुबन्तैः सह समस्यते स तत्पुरुषः इत्यर्थो भवति । योगविभागस्यार्थानुसारम् - युद्धे विशारदः = युद्धविशारदः । कविषु वरः = कविवरः । एवं जनकविकेशरी । कविशिरोमणिः । विवेकचूडामणिः । श्रेष्ठार्थे इन्द्रः[2] = मृगेषु इन्द्रः = मृगेन्द्रः (श्रेष्ठः) । एवं मुनीन्द्रः । नागेन्द्रः । राजेन्द्रः । गजेन्द्रः, द्विपेन्द्रः । द्विजेन्द्रः । एवमन्यत्रापि विचारणीयाः । सेवायां तत्परः । सेवातत्परः । चिन्तायां मग्नः = चिन्तामग्नः । ब्रह्मणि लीनः = बह्मलीनः । विषयेषु आसक्तः = विषयासक्तः । हिंसायां रतः = हिंसारतः । हिते रतः = हितरतः । कर्मरतः । कार्यरतः । उपकाररतः । एवंमन्येऽपि विचारणीयाः । निर्धारणे कृतायाः सप्तम्याः समासः सप्तमी शौण्डैरिति सूत्रेण भवति । निर्धारणे कृतायाः पष्ठ्याः समासस्तु न । किञ्च स षष्ठीसमासो न निर्धारणे इति सूत्रेण निषिध्यते । अन्यत्र कृतायाः षठ्याः समासः षष्ठी इति सूत्रेण क्रियते । इति सप्तमीसमासः । व्यधिकरणसमासः समाप्तः ।

६-३-२ क) कर्मधारयः (समानाधिकरणम्)

अयं तत्पुरुषस्य भेदोऽस्ति । अस्मिन्समासे विग्रहे समस्यमानयोः पदयोर्विभक्तिर्वचनं च समानाधिकरणे[3] प्रयुज्यते । अत्र पुंल्लिङ्गशब्दानां विग्रहे चासौ, च सः, च तौ च ते इति स्त्रीलिङ्गशब्दानां विग्रहे चासौ च सा, च ते, च ताः, नपुंसकालिङ्गानां विग्रहे च तत्, च ते, च तानि

1. शौण्डादय आकृतिगणाः - वक्तृविशेषनिःस्पृह इत्यादिः ।
2. प्रधानं शृङ्गं च ।
3. समानाधिकरणस्याभिप्रायोऽस्ति समस्यमानयोःपदयोर्विग्रहे विभक्तिर्वचनं च समाने भवतः ।

इति पदे प्रयुज्येते । अस्मिन्समासे चासौ इत्यादिशब्दानप्रयुज्यापि विशेषणविशेष्ययोर्विग्रहः समासश्च क्रियते । यथा - परम ईश्वरः = परमे श्वरः इत्यादि ।

तत्पुरुषः समानाधिकरणः कर्मधारयः १।२।४२॥

समानाधिकरणस्तत्पुरुषः कर्मधारयसंज्ञः स्यात् । अस्मिन्समासे विशेषपूर्वपद - विशेषणोत्तरपद - विशेषणोभयपदो - पमानपूर्वपदो - पमानोत्तरपद - रूपकादिभेदाः सन्ति । विग्रहे ध्यानं देयम् ।

१. विशेषणपूर्वपदम् - अत्र विग्रहे पूर्वं विशेषणमुत्तरे विशेष्यं च पदे प्रयुज्येते । विशेषणं भेदकं विशेष्यं च भेद्यं[1] प्रोच्यते ज्ञेयं वा ।

विशेषणं विशेष्येण बहुलम् २।१।५७॥

भेदकं समानाधिकरणेन भेद्येन सुबन्तेन सह बहुलं वा समस्यते स तत्पुरुषः कर्मधारयः । नीलं च तत् उत्पलमिति लौकिकविग्रहे नील सु उत्पल सु इत्यलौकिकविग्रहेऽनेन सूत्रेण समासे समासत्वात्प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरिति सूत्रेण सुपो लुकि गुणे तत्पुरुषतया परवल्लिङ्गत्वे प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः = नीलोत्पलम् । नीले च ते उत्पले = नीलोत्पले । नीलानि च तानि उत्पलानि = नीलोत्पलानि । इत्यादि । उन्नतश्चासौ वृक्षः = उन्नतवृक्षः । उन्नतौ च तौ वृक्षौ = उन्नतवृक्षौ । उन्नताश्च ते वृक्षाः = उन्नतवृक्षाः । पूज्यजनाः । मान्यजनः । मान्यजनौ । मान्यजनाः । राज च ऋषिः = राजर्षिः । भूतश्चासौ अर्थः = भूतार्थः । प्रिया चासौ सखी = प्रियसखी । एकश्चासौ दन्तः = एकदन्तः । बहुलग्रहणत्वात्क्वचिन्नित्यम् - कृष्णश्चासौ सर्पः = कृष्णसर्पः । लोहितशालिः (व्रीहिविशेषः) । क्वचिन्न - रामो जामदग्न्यः । अर्जुनः कार्तवीर्यः इत्यादि । रक्ता चासौ शाटी इति विग्रहे विशेषणं विशेष्येण बहुलमिति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि रक्ता शाटी इति जाते -

स्त्रियाः पुंवद्भाषितपुँस्कादनुङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६।३।३४॥

तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुँस्कं तस्मात्पर उङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् स्त्रीलिङ्गे उत्तरपदे च परे न तु पूरणप्रत्ययान्ते प्रियादौ च परतः । अनेन समस्तस्य पूर्वस्थितस्य विशेषणस्य स्त्रीलिङ्गीभूतस्य शब्दस्य पुंवद्भावेन पुंवाचको भवति । अस्याशयः - पूर्वं टापा ङीपा ङीषाऽऽपा ऊङा च निष्पन्नस्य स्त्रीवाचकस्य विशेषणीभूतस्य शब्दस्य कर्मधारये समानाधिकरणे विशेष्येण सह समासे कृते स्त्रियाः पुंवद्भाषित. इति सूत्रेण पुंवद्भावेन टावादीनां निवृत्तिर्भवति । ततस्तद्विशेषणं पुंवाचकरूपे प्रयुज्यते स शब्दः पुंल्लिङ्गी भवति वा । पुंवद्भावे नियमोऽयं स्मरणीयः । यतोऽत्र स्त्रीलिङ्गीभूतस्य रक्ताशब्दस्य पुंवद्भावेन टापो निवृत्तौ प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - रक्तशाटी । एवं नीला चासौ शाटी = नीलशाटी । कर्बुरशाटी । दीर्घा चासौ लेखनी = दीर्घलेखनी । रम्या च सा कन्या = रम्यकन्या । रम्ये च ते कन्ये = रम्यकन्ये । रम्याश्च

---

[1] भेद्यं विशेष्यमित्याहुर्भेदकं तु विशेषणम् ।
प्रधानं तु विशेष्यं स्यादप्रधानं विशेषणम् ॥
पदार्थे स्वार्थनिक्षेपादप्रधानं विशेषणम् ।
विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव समर्पणात् ॥

ताः कन्याः = रम्यकन्याः । विदुषी चासौ स्त्री = विद्वत्स्त्री । विदुष्यौ च ते स्त्रियौ = विद्वत्स्त्रियौ । विदुष्यश्च ताः स्त्रियः = विद्वत्स्त्रियः । एवमन्ये प्रयोगाः समाधेयाः ।

पुंवत्कर्मधारयजातीयदेशीयेषु ६।३।४२॥

कर्मधारये जातीयदेशीययोश्च परतो भाषितपुँस्कात्पर ऊङभावो यस्मिँस्तथाभूतं पूर्वं पुंवत्स्यात् । इदं सूत्रं समासेन निष्पन्नं पूर्वं स्थितं स्त्रीलिङ्गीभूतं विशेषणशब्दं पुंवाचकं करोति । पूरणप्रत्ययान्ते प्रियादौ परे स्त्रियाः पुंवद्भाषित. इति सूत्रेण पुंवद्भावेऽप्राप्तेऽनेन सूत्रेण पुंवद्भावो विधीयते । कर्मधारयादौ ककारोपधादेः पुंवद्भावोऽनेनैव सूत्रेण विधीयते । नर्तिका चासौ स्त्री = नर्तकस्त्री । पाचिका चासौ स्त्री = पाचकस्त्री । दर्शिकाश्च ताः कन्याः = दर्शककन्याः । एवं पाचकजातीया । पाचकदेशीया । इत्यादि । पूरणे परे - कृष्णा चासौ चतुर्दशी = कृष्णचतुर्दशी । शुक्लाचासौ चतुर्दशी = शुक्लचतुर्दशी । एवं शुक्लपञ्चमी । कृष्णपञ्चमी । प्रियादयः - प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा अम्बा कान्ता दुहिता वामा इति । एषु परेषु पूर्वस्थितस्य पदस्य पुंवद्भावः - अतिशयिता चासौ प्रिया = अतिशयितप्रिया । जेष्ठा चासौ दुहिता = जेष्ठदुहिता । स्निग्धा चासौ कान्ता = स्निग्धकान्ता । एवमन्येऽपि समाधेयाः ।

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः २।१।६१॥

सदादयः सुबन्ताः पूज्यमानवाचिभिः समानाधिकरणैः सुबन्तैः सह वा समस्यन्ते स तत्पुरुषः कर्मधारयः । सँश्चासौ वैद्य इति विग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - सद्वैद्यः । एवं सत्पुरुषः । सज्जनः । परमात्मा । परमेश्वरः । परमपुरुषः । परमार्थः । उत्तमपुरुषः । उत्तमजनः । उत्तमस्त्री । उत्कृष्टपुरुषः । उत्कृष्टव्यक्तिः । पूज्यमानैरिति वचनान्नेह - उत्कृष्टो (उत्थापितः) गौः (वृषः) कर्दमात् ।

आन्महतः समानाधिकरणजातीययोः ६।३।४६॥

महत आकारोऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे । महच्छब्दादुत्तरे समानाधिकरणजातीयशब्दः सदा चिन्तनीयः । महाँश्चासौ वैयाकरण इति विग्रहे सन्महत्परमोत्तमो. इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि आन्महत इति सूत्रेण महतस्तकारस्याऽऽत्वे सवर्णदीर्घे प्रातिपदिकसंज्ञायां समुदायात्प्रातिपदिकात्सुबुत्पत्तिः - महावैयाकरणः । महाँश्चासौ पुरुषः = महापुरुषः । एवं महाजनः । महेश्वरः । महादेवः । महाविद्यालयः । महाकाशः । महादेशः । महाकायः । महासागरः । महापापी । महागुरुः । एवमन्येऽपि चिन्त्याः । महती चासौ देवी इति विग्रहे सन्महत. इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि विग्रहे सन्महत. इति सूत्रेण आत्वे प्रातिपदिकसंज्ञायां समुदायात्प्रातिपदिकात्सुबुत्पत्तिः - महादेवी । एवं महती चासौ काली = महाकाली । महालक्ष्मी । महासरस्वती । महानवमी । महाष्टमी । महारात्री । एवमन्येऽपि चिन्त्याः । पूज्यार्थे - महाँश्चासौ आत्मा = महात्मा । महत् च तत् पुराणम् = महापुराणम् । एवमन्ये । वक्ष्यमाणे बहुव्रीहिसमासेऽप्यात्वम् - महान् आत्मा यस्य स इति विग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासे प्रातिपदिकसंज्ञायां सुपो लुकि "आन्महत." इति सूत्रेण आत्वे प्रातिपदिकसंज्ञायां समुदायात्प्रातिपदिकात्सुबुत्पत्तिः - महात्मा । महती दृष्टिर्यस्य स इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि पुंवत्कर्मधारय. इति सूत्रेण पुंवद्भावे ङीपो निवृत्तौ आन्महत. इति सूत्रेण आत्वे प्रातिपदिकसंज्ञायां

समुदायात्सुबुत्पत्तिः = महादृष्टिः । असमानाधिकरणे तु पुंवद्भाव आत्वं च न - महतां सेवा = महत्सेवा - षष्ठीसमासः ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन २।१।४९॥

एते सुबन्ताः समानाधिकरणेन सुबन्तेन सह वा समस्यन्ते स तत्पुरुषः कर्मधारयः । पूर्वकालः - पूर्वं स्नातः पश्चादनुलिप्तः = स्नातानुलिप्तः । पूर्वं बद्धः पश्चान्मुक्तः = बद्धमुक्तः । पूर्वं पीतः पश्चात्प्रतिबद्धः = पीतप्रतिबद्धः । पूर्वं सुप्तः पश्चादुत्थितः = सुप्तोत्थितः । पूर्वं तप्तं पश्चाच्छीतम् = तप्तच्छीतम् । एकश्चासौ नाथः = एकनाथः । एवमेकपुत्रः । सर्वः -सर्वे च ते देवाः = सर्वदेवाः । जरत् - जरन्तश्च ते नैयायिकाः = जरन्नैयायिकाः । पुराणश्चासौ कविः = पुराणकविः । पुराणग्रन्थः । नवः - नवं च तत् अन्नम् = नवान्नम् । नवश्चासौ वैद्यः = नववैद्यः । केवलः - केवलश्चासौ वैयाकरणः = केवलवैयाकरणः । एवमन्ये चिन्त्याः ।

दिक्संख्ये संज्ञायाम् २।१।५०॥

दिग्वाचकाः संख्यावाचकाश्च शब्दाः समानाधिकरणेन सुबन्तेन सह समस्यन्ते स तत्पुरुषः कर्मधारयः संज्ञायाम् । पूर्वश्चासौ इषुकामशमी = पूर्वेषुकामशमी (देशविशेषः) । अपरेषुकामशमी । एवं पूर्ववङ्गः । उत्तरं च तत् भारतम् = उत्तरभारतम् । सप्त च ते ऋषयः = सप्तर्षयः, सप्त ऋषयः । पञ्च च ते देवाः = पञ्चदेवाः । तिस्रश्च ताः शक्तयः = त्रिशक्तयः । असंज्ञायां तु - उत्तराः कुरवः । उत्तरा वृक्षाः । पञ्च ब्राह्मणाः ।

पापाणके कुत्सनैः २।१।५४॥

एतौ कुत्सवाचिभिः समानाधिकरणैः सह समस्येते स तत्पुरुषः कर्मधारयः । पापश्चासौ नापितः = पापनापितः । पापश्चासौ पुरुषः = पापपुरुषः । आणक (निन्द्यः) श्चासौ चर्मकारः = आणकचर्मकारः ।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च २।१।५८॥

पूर्वादयः सुबन्ताः समानाधिकरणेन सुबन्तेन सह समस्यन्ते स तत्पुरुषः कर्मधारयः । सूत्रे स्थिताः शब्दा विग्रहे उत्तरे स्थितात्सुबन्तात्पूर्वं प्रयुज्यन्ते । पूर्वे च ते पुरुषाः = पूर्वपुरुषाः । अपरश्चासौ पुरुषः = अपरपुरुषः । प्रथमश्चासौ पुरुषः = प्रथमपुरुषः । एवं प्रथमशिष्यः । प्रथमा चासौ नारी = प्रथमनारी - स्त्रियाः पुंवद्भाषितः. इति विशेषस्य पुंवद्भावः । चरमं (अन्तिमं) च तत् पत्रम् = चरमपत्रम् । जघन्यश्चासौ सेवकः = जघन्यसेवकः । समानश्चासौ धर्मः = समानधर्मः । समानं च तत् कर्म = समानकर्म । समानजनः । मध्यमश्चासौ पुरुषः = मध्यमपुरुषः । मध्यमनारी - मध्यमायाः पुंवद्भावः । मध्यमलोकपालः । मध्यजनः । वीरश्चासौ भटः = वीरभटः । **अपरस्यार्धे पश्चभावो वक्तव्यः-वा.**-अपरश्चासौ अर्धः पश्चार्धः ।

किं क्षेपे २।१।६४॥

किमिति शब्दः समानाधिकरणेन सुबन्तेन सह समस्यते स तत्पुरुषो निन्दायाम् । विग्रहे पूर्वं कुत्सितशब्दः पठनीयः । पश्चात्समासविधौ किंशब्दः । कुत्सितार्थे (निन्दार्थे) किं प्रयुज्यते । कुत्सितो राजा = किं राजा । यः प्रजा न रक्षति । किंप्रभुः । किंसखा । कुत्सिता नारी = किंनारी । अनाक्षेपे (अनिन्दायां) तु - कः सखा । को राजा । कः प्रभुः । का नारी । किं तपः । किं फलम् । इत्यादि । किंशब्दो निन्दायां प्रश्नार्थे चाव्ययो ज्ञेयः ।

शाकपार्थिवादिसमासः (मध्यमपदलोपिसमासः) -

शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्-वा.- शाकं प्रियं यस्य स शाकप्रियः पूर्वं बहुव्रीहिः । शाकप्रियश्चासौ पार्थिव इति विग्रहे विशेषणं विशेष्येण बहुलमिति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि शाकपार्थिवादीनां. इति वार्तिकेन उत्तरपदस्य प्रियस्य लोपे प्रातिपदिकसंज्ञायां सुबुत्पतिः - शाकपार्थिवः । देवानां पूजकः पूर्वषष्ठीतत्पुरुषः । देवपूजको ब्राह्मणः = देवब्राह्मणः । एवमन्यत्राऽपि । काव्यपाठकश्छात्रः = काव्यच्छात्रः । वेदच्छात्रः । व्याकरणच्छात्रः । न्यायच्छात्रः । एवमन्ये ज्ञेयाः । इति विशेषणपूर्वपदसमासः ।

२. विशेषणोत्तर(विशेष्यपूर्व)पदसमासः - अस्यादौ विग्रहे पूर्वं विशेषणवाचक उत्तरे विशेष्यवाचकश्च शब्दौ प्रयुज्येते । समासानन्तरं विशेष्यस्य पूर्वनिपातेन विशेषणमुत्तरे तिष्ठति । तेनायं विशेषणोत्तरपदसमासो विशेष्यपूर्वपदसमासो वा प्रोच्यते ।

कुत्सितानि कुत्सनैः २।१।५३॥

कुत्सितवाचीनि सुबन्तानि कुत्सनवाचिभिः समानाधिकरणैः सुबन्तैः सह वा समस्यन्ते स तत्पुरुषः कर्मधारयः । शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते । खसूचिश्चासौ वैयाकरण इति विग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि विशेष्यस्योपसर्जनसंज्ञाया पूर्वनिपाते प्रातिपदिकसंज्ञायां समुदायत्सुबुत्तिः - वैयाकरणखसूचिः (आकाशदर्शी निष्प्रतिभः) । कितवश्चासौ याज्ञिकः = याज्ञिककितवः (कपटी ऋत्विक्) । एवं मीमांसकदुर्दुरुढः (नास्तिकः) । कुत्सितानीत्युक्तेर्नेह - वैयाकरणश्चौरः (नह्यत्र वैयाकरणत्वं सूच्यते) ।

पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेह-बष्कयणी-प्रवक्तृ-श्रोत्रिया-ध्यापक-धूर्तैर्जातिः २।१।६५॥

पोटादिभिः सुबन्तैः सह जातिवाचि समानाधिकरणं समस्यते स तत्पुरुषः कर्मधारयः । समासानन्तरं विशेष्यस्य पूर्वप्रयोगः परवल्लिङ्गता च । पोटा इभ इति विग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि विशेष्यस्य पूर्वनिपाते परवल्लिङ्ग. इति सूत्रेण परवल्लिङ्गत्वे प्रातिपदिकसंज्ञायां समुदायात्प्रातिपदिकात्सुबुत्पत्तिः = इभपोटा पोटा स्त्री पुंसलक्षणा । युवतिः इभः = इभयुवतिः । एवमाग्निस्तोकः । काष्ठस्तोकः । उदश्वित्कतिपयम् । गृष्टिः सकृत्प्रसूता गौः = गोगृष्टिः । धेनुर्नवसूतिका गौः = गोधेनुः । वशा वन्ध्या गौः = गोवशा । वेहद्गर्भोपघातिनी गौः = गोवेहत् । बष्कयणी चिरप्रसूता गौः = गोवष्कयणी । एवं कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः । जातिरित्युक्त्या नेह - धूर्तकठः ।

प्रशंसावचनैश्च २।१।६६

एतैः समानाधिकरणैः सुबन्तैः सह जातिवाचि समानाधिकरणं समस्यते स तत्पुरुषः कर्मधारयः। मतल्लिका मचर्चिका प्रकाण्डमुद्धस्तल्लजः = अमूनि प्रशस्तवाचकानि - अमरः १।७।२९॥ एते नियतलिङ्गा रूढिशब्दा निगद्यन्ते । एते शब्दाः समासानन्तरं जातिवाचकशब्दादुत्तरे (परे) प्रयोक्तव्याः। प्रशस्तो ब्राह्मणः = ब्राह्मणमतल्लिका, ब्राह्मणचर्चिका, ब्राह्मणप्रकाण्डम्, ब्राह्मणोद्धः, ब्राह्मणतल्लजः। प्रशस्ता गौः = गोमतल्लिका, गोमचर्चिका, गोप्रकाण्डम्, गवोद्धः - अवङ्स्फोटायनस्येति सूत्रेण अवङि गुणे च । गोतल्लजः ।

चतुष्पादो गर्भिण्या २।१।७१॥

चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह समस्यन्ते स तत्पुरुषः कर्मधारयः । विशेष्यपूर्वप्रयोगः। गर्भिणी गौः = गोगर्भिणी । एवमजागर्भिणी । महिषीगर्भिणी । वडवागर्भिणी । एवं चतुष्पदादीनां समासश्चिन्त्यः ।

कडाराः कर्मधारये २।२।३८॥

कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः । जैमिनिश्चासौ कडारः = कडार-जैमिनिः, जैमिनिकडारः । विशेषणं विशेष्येण बहुलमिति समासः ।

३. विशेषणोभयपदसमासः - अत्र समस्यमाने उभे पदे विशेषणे प्रयुज्येते ।

श्रेण्यादयः कृतादिभिः २।१।५९॥

श्रेण्यादयः सुबन्ताः कृतादिभिः समानाधिकरणैः सुबन्तैः सह वा समस्यन्ते स तत्पुरुषः कर्मधारयः । **श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम्-वा.**-च्व्यर्थेन श्रेण्यादीनामीत् भवति । कृतादिभिः सह प्रयुक्तो विशेषशब्दः प्रथमान्तः प्रयुज्यते । यतः कृतादय आदौ प्रथमान्ते चिन्त्याः । अश्रेणयः श्रेणयः कृता इति विग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि श्रेण्यादिषु इति वार्तिकेन ईत्वे समुदायप्रातिपदिकत्वात्सुबुत्पत्तौ - श्रेणीकृताः । शिल्पजीविनां समूहाः श्रेणयः प्रोच्यन्ते । यदा तु सिद्धा एव श्रेणयः क्रियन्ते तदा न समासः । श्रेण्यादयः एक पुग राशि निधान वदान्य अध्यापक पण्डित कुशल चपल निपुण कृपण इति । कृत मित भूत उक्त समाख्यात संभावित इत्यादयः क्तान्तशब्दाः कृतादयो बोध्याः । पुगःकृतः = पुगकृतः । एवं राशिकृतः । अध्यापकभूतः । वदान्यसंभावितः । वस्तुजातमित्यादि ।

क्तेन नञ्विशिष्टेनानञ् २।१।६०॥

नञ्विशिष्टेन क्तान्तेन सह समानाधिकरणमनञ्क्तान्तं वा समस्यते स तत्पुरुषः कर्मधारयः। कृतं च अकृतं च = कृताकृतम् (अर्धकृतम्) कार्यम् । दृष्टाश्च अदृष्टाश्च = दृष्टादृष्टा (अर्धदृष्टाः) ग्रन्थाः । एवमुक्तानुक्ता जनाः । पठितानि च अपठितानि च = पठितापठितानि पुस्तकानि । पीतापीतं पयः, जलं वा । उदितानुदितः सूर्यः । शृताशृतं पयः । बहुव्रीहौ तु - पूर्व सुप्तः पाश्चादुत्थितो यस्य सः - सुप्तोत्थितः । यस्या सा = सुप्तोत्थिता । पीतप्रतिबद्धः - द्धा ।

कृत्यतुल्याख्या अजात्या २।१।६८॥

कृत्यप्रत्ययान्तास्तुल्यपर्यार्याश्च अजातिवाचिना समानाधिकरणेन सुबन्तेन सह वा समस्यन्ते स तत्पुरुषः कर्मधारयः । भोज्यं च तत् उष्णमिति - भोज्योष्णम् । तुल्यश्चासौ श्वेतः = तुल्यश्वेतः । तुल्यं च तत् श्वेतम् = तुल्यश्वेतम् । भक्ष्यश्चासौ शीत = भक्षशीता रोटिका । ले ह्यलवणम् । तुल्यमहान् । तुल्यपर्यायाः - वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् । साधारणः समानश्च स्युरित्यमरः । एते शब्दा अजातिवाचकशब्दात्पूर्वे चिन्त्याः - तुल्यश्चासौ श्वेतः = तुल्यश्वेतः कुक्कुरः । तुल्यश्वेतं पयः । सदृशश्वेतः । सदृशमहान् । अजात्येति प्रतिधेषसामर्थ्याज्जातिवाचिना सह विशेषणं विशेष्येण बहुलमित्यादिसमासो न । जातिशब्दात्परे तु समादयः शब्दाः प्रयुज्यन्ते । तैः सह तृतीयासमासोऽपि भवति । यथा - पित्रा समः = पितृसमः । आकारेण सदृशः = आकारसदृशः । इत्यादि । तृतीयासमासः पूर्वसदृश. इति सूत्रेण भवति ।

वर्णो वर्णेन २।१।६९॥

एको वर्णविशेषवाची अपरेण वर्णविशेषवाचिना समानाधिकरणेन सुबन्तेन सह वा समस्यते स तत्पुरुषः कर्मधारयः । कृष्णश्चासौ पिङ्गलः कृष्णपिङ्गलः । एवं नीललोहितः । श्वेतरक्तः । कृष्णलोहितः । श्यामरोहितः । हरितं च तत् कपिशम् = हरितकपिशम् । कृतादिभी रहितयोः केवलमुभयविशेषणयोः समासः - चरञ्च अचरञ्च = चराचरं जगत् । चराचरो लोकः । द्वयोःक्तान्तविशेषणयोः समासः - स्नातश्च अनुलिप्तश्च = स्नातानुलिप्तः ।

कुमारः श्रमणादिभिः २।१।७०॥

कुमारशब्दः श्रमणादिभिः समानाधिकरणैः सुबन्तैः सह वा समस्यते स तत्पुरुषः कर्मधारयः । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् । कुमारी श्रमणा = कुमारश्रमणा (भिक्षुः) - पूर्वपदस्य पुंवद्भावः । श्रमणादयस्तु श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी (कुलटा) अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण इति । कुमारगर्भिणी । कुमारपण्डितः । कुमारदासी । कुमाराध्यापकः । इत्यादि ।

४. उपमानपूर्वपदसमासः (उपमानोपमेयसमासः)

उपमानानि सामान्यवचनैः २।१।५५॥

उपमानवाचकानि सुबन्तानि समानधर्मवाचकैः समानाधिकरणैः सुबन्तैः सह वा समस्यन्ते स तत्पुरुषः कर्मधारयः । येनोपमीयते तदुपमानं यदुपमीयते तदुपमेयं च प्रोच्यते । उपमानमुपमा चैतौ पर्यायौ बौध्यौ । समानधर्मः (तुल्यधर्मः सदृशधर्मः) । यत्रोपमानस्योपमेये[1] समानधर्मः (तुल्यगुणास्तुल्यधर्मो वा) भवति तत्रैवायं समासो भवति नहि तु न । अत्रोपमानोपमेयवाचकशब्दौ समानविभक्तिकौ समानवाचनिकौ च गृह्येते । सदा लौकिकविग्रहे प्रथमं सदृशलक्षणं द्योतयितुमुपमानवाचकशब्दात्परे सन्निधौ इवशब्दस्ततः परे उपमेयवाचकश्च शब्दौ प्रयुज्येते । सदा

[1] इवशब्दस्तुलनार्थे बोध्यः । यत इवशब्देन युक्तः शब्दः सादृश्यबोधकमारोप्यबोधकं वा उपमानं(उपमा) प्रोच्यते । उपमानवाचकशब्दस्यार्थेन सह यः समानधर्मवाचकशब्दो प्रयुज्यते । स उपमेयः कथ्यते । एवमुपमानोपमेयौ ज्ञेयौ ।

उपमानं विशेषमुपमेयश्च सामान्यो भवति । यथा - घन इव श्याम इत्यत्र इवशब्देन सह स्थितो घन उपमानं श्याम उपमेयश्च ज्ञेयौ । अत्र इवशब्दो श्यामं घनतुल्यं जनयति । ततः समासविधेरनन्तरम् = घनश्यामः । घनौ इव श्यामौ = घनश्यामौ । घना इव श्यामाः = घनश्यामाः[1] ॥ एवं दण्डदीर्घः । दण्डदीर्घौ । दण्डदीर्घाः । शस्त्रीव श्यामा = शस्त्रीश्यामा । विद्युदिव चपला = विद्युच्चपला नारी । काककृष्णः पुरुषः । समुद्रगभीरो भवान् । नवनीतकोमलं शरीरम् । किसलयमृदूनि गात्राणि । सामान्यवचनैरित्युक्त्या नेह - पर्वता इव मेघाः । इह पर्वतैः सह मेघाः सामान्या न मन्यन्ते ।

५. उपमानोत्तरपदसमासः (उपमेयपूर्वपदसमासः)

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २।१।५६॥

उपमितमुपमेयम् । उपमेयवाचि सुबन्तं व्याघ्रादिभिरुपमानवाचकैः सुबन्तैः सह समस्यते स तत्पुरुषः कर्मधायः साधारणधर्मस्याप्रयोगे सति । सामान्यधर्मवाचकशब्द उपमेयोऽसामान्यधर्मवाचकशब्द उपमानं च ज्ञेयम् । विग्रहे उपमेयवाचकशब्दात्परे सदृशलक्षणं द्योतयितुमसाधारणवाचकशब्दात्परे सन्निधौ इवशब्दः प्रयुज्यते । यथा - पुरुषो व्याघ्र इवेति विग्रहे उपमितमिति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि समुदायात्प्रातिपदिकात्सुबुत्पत्तिः - पुरुषव्याघ्रः[2] । पुरुषः सिंह इव = पुरुषसिंहः । ना सिंह इव = नृसिंहः । एवं नरसिंहः । नरव्याघ्रः । नृपशार्दूलः । पुरुषर्षभः । राजकुञ्जरः । व्याघ्रादयस्तु - व्याघ्र सिंह ऋक्ष भल्लूक ऋषभ (वृषः) चन्दन वृक्ष वराह हस्तिन् कुञ्जर पुण्डरीक इति । स्युरुत्तरपदे व्याघ्रा पुङ्गवर्षभकुञ्जराः । सिंहशार्दूल-नागाद्याः पुंसि श्रेष्ठार्थगोचराः - इत्यमरः । नृपपुङ्गवः । भरतर्षभ इत्यादि । चन्द्रवाचकशब्दोऽपि श्रेष्ठार्थे प्रयुक्तो लभ्यते - राजा इन्दुरिव = राजेन्दुः[3] । ना सोम इव = नृसोमः । मुखचन्द्रः । पर्थिवचन्द्रः । चन्द्रवाचकशब्दोऽपि उपमेयवाचकशब्दात्परे सदृशलक्षणं द्योतयितुमुपमानशब्दात्परे इवशब्दः प्रयुज्यते। करकिसलयम् । करकमलम् । चरणकमलम् । मुखकमलम् । उपमितसमासे गृहीताः शब्दा रूपकसमासेऽपि चिन्त्याः ।

वृन्दारक-नाग-कुञ्जरैः पूज्यमानम् २।१।६२॥

एभिः सह पूज्यमानवाचि सुबन्तं समस्यते स तत्पुरुषः धर्मधारयः । अत्र प्राग्पूज्यमानवाची सुबन्तो गृह्यते नान्यः । गौर्वृन्दारक इव = गोवृन्दारकः । पुमान् नाग (हस्ती) इव = पुन्नागः । राजा कुञ्जर इव = राजकुञ्जरः । पूर्वपदस्य नकारस्य लोपः । एवं नरकुञ्जरः । राजवृन्दारकः ।

६. आरोप्योत्तरपदसमासः (रूपकसमासः) - अत्र समासे उपमानस्य लक्षणमुपमेये आरोपयितुमुपमेयवाचकशब्दादुत्तरे एवशब्दः प्रयुज्यते । समासः मयूरव्यंसकादयश्चेति सूत्रेण भवति । यथा विग्रहः - मुखमेव कमलम् - मुखकमलम् । पुरुष एव व्याघ्रः = पुरुषव्याघ्रः । एवं नरसिंहः ।

---

१ प्रथमायां विशेष्यस्य वचनानुसारं समस्यमानस्योपमानस्य वचनं प्रयुज्यते । तत उत्तरं समासेन प्रथमाया रूपं संसिद्धय द्वितीया तृतीयादीनां वचनं प्रयुज्यते ।

२ इवशब्दः पुरुषं व्याघ्रतुल्यं जनयति । विशेषः - इवशब्द सदृशेऽर्थे निभादिशब्दा अपि उपमानशब्दस्यान्तिमे प्रयुज्यते । निभ-सङ्काश-नीकाश-प्रतिकाशोपमादयः - इत्यमरः - २।१०।३७-३८॥ स्युरुत्तरे प्रख्यः प्रकारः प्रतिभः निभः-हेमचन्द्रः । विष्णुर्निभ = विष्णुनिभः । नीरदाभात् । अर्काभः = सूर्य इव ।

३ रघुवंशः १।१२, ५।५९ चन्द्रः, सोमः, मृगाङ्कः अमर १।३।१२-१५॥

करकिसलयम् । मुखकमलम् । पार्थिवचन्द्रः । मुखचन्द्रः । मनोमृगः । विद्याधनम् । यशोधनम् । तपोधनम् । आशा एव बन्धः = आशाबन्धः । एवं सिद्धाः प्रयोगा मयूरव्यंसकादिषु गृह्यन्ते ।

७. मयूरव्यंसकादिसमासः - विधानान्तरैरसिद्धः सर्वतत्पुरुषो मयूरव्यंसकादिपाठेन निष्पाद्यते ।

मयूरव्यंसकादयश्च २।१।७२॥

कमयूरव्यंसकादयः समस्ताः समुदाया निष्पाद्यन्ते । एते यथायोग्यं कार्या निपातनात् । चकारस्यावधारणार्थः । तेन परमो मयूरव्यसक इत्यादौ न समासान्तरम् । मयूरश्चासौ व्यंसकः (धूर्तः) इति मयूरो व्यंसक इति वा विग्रहेऽनेन सूत्रेण निपातनात्समासे प्रातिपदिकसंज्ञायां सुपो लुकि प्रातिपदिकसंज्ञायां समुदायत्सुबुत्पत्तौ - मयूरव्यंसकः । अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः । मुखमेव चन्द्रः = मुखचन्द्रः । सन्देश एव अर्थः = सन्देशार्थः । गुण इति बुद्धि = गुणबुद्धिः । उदक् च अवाक् च = उच्चावचम् । अनेकभेदो नैकभेदो वा । निश्चितं च प्रचितं च = निश्चप्रचम् = निश्चयम् (निश्चितप्रचितयोर्निश्चप्रचादेशौ) । नास्ति किञ्चन यस्य सः = अकिञ्चनः । बहुव्रीहेरपवादस्त्रिपदस्तत्पुरुषः - नास्ति कुतो भयं यस्य सः = अकुतोभयम् । अन्यो राजा = राजान्तरम् । नित्यसमासतयाऽस्वपदविग्रहः । अन्यः पुरुषः = पुरुषान्तरम् । अन्यो ग्रामः = ग्रामान्तरम् । अन्यो देशः = देशान्तरम् । अन्यन्नाम = नामान्तरम् । एवं कार्यान्तरम् । कर्मान्तरम् । चिदेव = चिन्मात्रम् (अस्वपदविग्रहो नित्यसमासः) । एवं शरीरमात्रम् । **आख्यातमाख्यातेन क्रियासातत्ये-वा.**- समस्यते । सातत्यं निरन्तरता । अश्नीत पिबतेत्येवं सततं यत्राभिधीयते तत्र तयोः क्रिययोः समासेऽन्यपदार्थक्रियाप्रधानेन स्त्रीत्वे टापि = अश्नतपिबता । पचत भृज्जतेत्येवं यत्र प्रवृत्ता = पचतभृज्जता । एवं हसतवसता । खादतमोदता । नृत्यतगायता । हसतक्रीडता । एवमन्ये चिन्त्याः ।

(-३-२-ख) द्विगुः

तद्धितार्थे विषये उत्तरपदे परे समाहारे च वाच्ये सति दिग्वाचकानां संख्यावाचकानां च शब्दानां समासोऽधः सूत्रतश्चिन्त्यः -

तद्धितार्थोत्तरपदसमाहारे च २।१।५१॥

तद्धितार्थे विषय उत्तरपदे च परतः समाहारे च वाच्ये दिग्वाचिनः संख्यावाचिनश्च शब्दाः समानाधिकरणेन सुबन्तेन सह वा समयस्यन्ते स तत्पुरुषो द्विगुः । द्विगुसमासे सदा दिग्वाचिनः संख्यावाचिनश्च शब्दा उत्तरपदात्पूर्वे प्रयुज्यन्ते । पूर्वस्यां शालायां भव इति लौकिकविग्रहे पूर्वा ङि शाला ङि इत्यलौकिकविग्रहे च तद्धितार्थोत्तरपदसमाहारे चेति सूत्रेण समासे समासत्वात्प्रातिपदिकसंज्ञायां सुपो लुकि "सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव" इति वार्तिकेन पूर्वपदस्य पुंवद्भावे पूर्वशालाशब्दात् डौ ततो दिक्पूर्वपदादसंज्ञायां ञ इति सूत्रेण ञप्रत्ययेऽनुबन्धबन्धलोपे तद्धितान्तत्वेन प्रातिपदिकत्वात् डेर्लुकि यस्येति चेति सूत्रेणाऽऽकारलोपे तद्धितेष्वचानादेरिति सूत्रेण आद्यचो वृद्धौ स्वादिकार्ये - पौर्वशालः । एवमपरस्यां शालायां भवः = आपरशालः । उत्तरपदे सति - पूर्वा शाला प्रिया यस्येति त्रिपदबहुव्रीहौ प्रियाशब्दे परे पूर्वाशालाशब्दयोः तद्धितार्थो. इत्यनेन समासे प्रातिपदिकसंज्ञायां सुपो लुकि पूर्वाशब्दस्य पुंवद्भावे प्रियाशब्दस्य गोस्त्रियोरिति सूत्रेण ह्रस्वे प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - पूर्वशाल प्रियः । संख्यायास्तद्धितेऽपत्येऽर्थे - षण्णां

मातृणामपत्यमित्यर्थे षण्णां मातृणामिति शब्दयोः तद्धितार्थो. इत्यनेन समासे प्रातिपदिकसंज्ञायां सुपो लुकि समस्ताच्छब्दात् मातुरुत्संख्यासंभद्रपूर्वाया इति सूत्रेणाऽणि उत्वे चादिवृद्धौ प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तौ - षाण्मातुरः - कार्तिकेयः । पञ्च गावो धनं यस्येति विग्रहे त्रिपदवहुव्रीसमासे धनशब्दे परे पूर्वपदयोः, तद्धितार्थोत्तरेति सूत्रेण विभाषाधिकाराद्विकल्पसमासे प्राप्ते **द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्-वा.**-उत्तरपदे परतो यौ द्वन्द्वतत्पुरुषौ तयोर्नित्यसमासो वक्तव्य इत्यर्थः । इत्यनेन नित्यसमासे प्रातिपदिकसंज्ञायां सुपो लुकि पञ्चन् गो धन इति जाते -

गोरतद्धितलुकि ५।४।९२॥

गोऽन्तात्तत्पुरुषात्समासान्तष्टच् स्यात् न तद्धितलुकि । इति सूत्रेण टच्प्रत्यये पञ्चन् गो अ धन इति स्थितेऽवादेशेऽन्तर्वर्तिन्या विभक्त्याः पदत्वेन नकारलोपे प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - पञ्चगवधनो गोपो जनो वा । एवं षड्गवधनः, सप्तगवधनः, अष्टगवधनः, नवगवधन इत्यादि ।

पञ्चानां गवां समाहार इति विग्रहे तद्धितार्थोत्तरेति सूत्रेण समासे सुपो लुकि टच्प्रत्यये नलोपः प्रातिपदिकान्तस्येति सूत्रेण नलोपे पञ्च गो अ इति जाते -

संख्यापूर्वो द्विगुः २।१।५२॥

तद्धितार्थोत्तरेति सूत्रे उक्तस्त्रिविधः संख्यापूर्वः समास उक्तः स द्विगुसंज्ञः स्यात् । इत्यनेन द्विगुसंज्ञायाम् -

द्विगुरेकवचनम् २।४।१॥

द्विग्वर्थःसमाहर एकवत्स्यात् । एकवद्भावेन एकवचनं ज्ञेयम् । एकवद्भावे कृते -

स नपुंसकम् २।४।१७॥

समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । इति सूत्रेण परवल्लिङ्गतापवादेन नपुंसकत्वे प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - पञ्चगवम् । षट्गवम् । सप्तगवमित्यादि । द्विग्वर्थसमाहारस्यैकवद्भावं कृत्वा नपुंसके विहितः शब्द एकवचनान्तः प्रयुज्यते । द्विगुसमाहारसमासे प्रयुक्तानि सूत्राणि संख्यावाचकशब्दानां समाहारेऽपि स्मर्तव्यानि । पञ्चानां मूलानां समाहार इत्यर्थे द्विगुसमासे प्रातिपदिकसंज्ञायां सुपो लुकि एकवद्भावे नपुंसकत्वे प्राप्ते **अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः-वा.**-इति वार्तिकेन स्त्रीत्वे द्विगोरिति सूत्रेण ङीपि प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - पञ्चमूली । एवं दशमूली, दशगणी अष्टाध्यायी, पञ्चवटी, त्रिलोकी, त्रिसूत्री, चतुश्लोकी त्रिफली इत्यादि । स्त्रीत्वे टाप्यपि-त्रिफला । पञ्चानां पात्राणां समाहार इत्यर्थे द्विगुसमासे एकवद्भावे आकारान्तोत्तरपदो द्विगुः. इति वार्तिकेन स्त्रीत्वप्राप्तौ **पात्राद्यन्तस्य न-वा.**-संख्या-पात्र-भुवन-युगशब्दो द्विगुसंज्ञो न भवातीत्यर्थः । अनेन वार्तिकेन संख्यापूर्वो द्विगुरीति सूत्रेण प्राप्ताया द्विगुसंज्ञाया निषेधे नपुंसकत्वे प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - पञ्चपात्रम् । त्रयाणां युगानां समाहारः = त्रियुगम् । चतुर्णां युगानां समाहारः = चतुर्युगम् । पात्रादिराकृतिगणः । एवं पञ्चाङ्गम् । षडङ्गम् । पञ्चानां खट्वानां समाहार इत्यर्थे द्विगुसमासे सुपो लुकि एकवद्भावे नपुंसकं बाधित्वा नित्यं स्त्रीत्वे प्राप्ते

आबन्तो वा-वा.-समाहारद्विगुसमासस्य समस्तपदस्योत्तरपदमाकारान्तं वा स्त्रीलिङ्गं स्यात् । अनेन वार्तिकेन स्त्रीत्वे पञ्च खट्वा इति जाते स्त्रीत्वपक्षे उपसर्जनत्वेनाऽऽकारस्य ह्रस्वेऽदन्तत्वाद् द्विगोरिति सूत्रेण ङीपि यस्येति चेति सूत्रेणाऽऽकारलोपे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - पञ्चखट्वी । पक्षे नपुंसकत्वे ह्रस्वो नपुंसके प्रातिपदिकस्येति सूत्रेण ह्रस्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - पञ्चखट्वम् । एवं त्रिशाली त्रिशालम् । पञ्चशाली पञ्चशालम् । चतुःशाली चतुःशालम् । पञ्चानां कुमारीणां समाहार इत्यर्थे द्विगौ एकवद्भावे नपुंसकत्वे ह्रस्वो नपुंसके प्रातिपदिकस्येति सूत्रेण ह्रस्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - पञ्चकुमारि । **सामान्ये नपुंसकम्-वा**.-सामान्ये क्रियाविशेषणस्य नपुंसकं स्यात् तत् द्वितीयैकवचनान्तञ्च । मृदु पचति । कमनीयं प्राप्तः । सुखं शेते । स्पष्टं दृश्यते सः । सादरं वन्दे । सविनयं वदति । सुखं वसति । इत्यादि ।

६-३-३ नञ्तत्पुरुषः

अस्मिन्समासे नञ्पूर्वकः सुबन्तशब्दः समस्यते । येन शब्दस्यादौ अकारस्तिष्ठति ।

नञ् २।२।६॥

नञ् सुपा सह समस्यते स तत्पुरुषः ।

नलोपो नञ् ६।३।७३॥

नञो नस्य लोपःस्यादुत्तपरपदे परे । शब्दस्य विग्रहस्यादौ नः प्रयुज्यते । न ब्राह्मण इति विग्रहे नञः सुबन्तेन पदेन सह नञ् इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि नलोपो नञ् इति सूत्रेण नस्य लोपे आदावकारेण युक्तस्य शब्दस्य प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - अब्राह्मणः । अक्षत्रियः । अवैश्यः । अदृष्टिः । अनीलः । अकृष्णः । अपूर्वः । अपारः । अपरः । अपरम्पारः । अज्ञः । अपरोक्षम् । अभावः । अदृष्टः । अकृतज्ञः । अकृदन्तः । अकृतः । एवमन्येऽपि चिन्त्याः । अजादिशब्दानां त्वयं नियमः - न अश्व इति विग्रहे नञ् इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि नकारस्य लोपे अ अश्व इति जाते अकः सवर्णे दीर्घ इति दीर्घे प्राप्ते -

तस्मान्नुडचि ६।३।७४॥

लुप्तनकारान्नञ् उत्तरपदस्याजादेर्नुडागमः स्यात् । अनेनोत्तरपदस्याजादेर्नुडागमे प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तिः - अनश्वः । एवमनन्तः । अनुचितः । अनागतः । अनीश्वरः । अनतिप्रकाशः । अनीच्छाः । अनर्थः । अनैश्वर्यम् । अनृजुः । अनीशः । अनिट् । अनात्मा । अनङ्गः = कामदेवः । अनङ्गम् = अशरीरम् । न अनुभूय = अननुभूय । न अनुकृत्य = अननुकृत्य । इत्यादि ।

नभ्राण्-नपान्नवेदा-नासत्या-नमुचि-नकुल-नख-नक्षत्र-नक्र-नाकेषु प्रकृत्या ६।३।७५॥

एषु नञ् प्रकृत्या स्यात् । प्रकृत्येति कथनेन स्वभावेन नञो लोपो न भवति । न भ्राजत इति नभ्राट् - क्विप् । नपातीति नपात्-शत्रन्तः । न वेत्तीति नवेदाः - असुन्नन्तः । न सत्या असत्या - न असत्या = नासत्या - नासत्यावश्विनौ दस्रावित्यमरः । न मुञ्चतीति नमुचिः = दानवविशेषः । न

कुलमस्य - नकुलम् । न खमस्य - नखम् । न स्त्री न पुमान् - नपुंसकम् । स्त्रीपुंसयोः पुंसकभावो निपात्यते । न क्रामतीति नक्रः । ग्राहः क्रमेऽर्डः । न अकं दुःखमस्ति - नाकः = स्वर्गः ।

नगोऽप्राणिष्वन्यतरस्याम् ६।३।७७॥

नगे स्थिते नञ् प्रकृत्या वा स्यात् अप्राणिवाचकशब्देषु परेषु । न गच्छतीति नगाः अगाः = पर्वताः - गमेर्डः । प्राणिवाचकशब्देषु परेषु तु नञ् प्रकृत्या न तिष्ठति । अगो वृषलः शीतेन ।

६-३-४ कुगतिप्रादयः

अत्र कुगतिप्रादिपूर्वकाणां शब्दानां समासश्चिन्त्यते-

ईषदकृता २।२।७॥

अकृता सुबन्तेन सह ईषद् समस्यते स तत्पुरुषः । ईषद् पिङ्गलः = ईषत्पिङ्गलः । **ईषद्गुणवचनेनेति वाच्यम्-वा.**-ईषच्छब्दो गुणवाचकशब्देन सह समस्यते नान्येनेत्यर्थः । ईषद् रक्तम् = ईषद्रक्तम् । एवमीषद्रक्तः । ईषच्चतुरः । ईषत्पटुः । ईषन्नीलः । ईषत्कृष्णः । ईषत्पीतः । ईषन्मधुरः । ईषद्धरितः । ईषच्छ्वेतः । इत्यादि । १. कुशब्दपूर्वकः समासः -

कुगतिप्रादयः २।२।१८॥

कुपूर्वको गतिसंज्ञकपूर्वकः प्रादिपूर्वकाश्च शब्दाः समर्थसुबन्तेन सह नित्यं समस्यन्ते स तत्पुरुषः। कुशब्दो गतिसाहचर्यात्पापार्थेऽव्ययो गृह्यते । समासस्य नित्यत्वादस्वपदविग्रहः - कुत्सितः (पापः) पुरुष इत्यर्थे कु पुरुष इति विग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि समुदायस्य प्रातिपदिकत्वात्सुबुत्पत्तिः - कुपुरुषः । कुपुत्रः । कुचिन्ता । कुभावना । कुबुद्धिः । कुदासः । इत्यादि । २. गतिसंज्ञपूर्वकसमासः -

ऊर्यादिच्विडाचश्च १।४।६१॥

ऊर्यादयश्च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः । क्रियापदेन तिङन्ताः कृत्यक्तक्तवतुप्रत्ययान्ताः शतृशानच्ल्यप्तुमुन्प्रत्यान्ताश्च क्रिया गृह्यन्ते । १. ऊर्यादयः - ऊरी कृत्वेति विग्रहे ऊरीत्यस्य ऊर्यादिच्विडाचश्चेति सूत्रेण गतिसंज्ञायां कुगतिप्रादय इति सूत्रेण समासे "समासेऽनञ्पूर्व क्त्वो ल्यपिति" सूत्रेण क्त्वः स्थाने ल्यपि = ऊरीकृत्य । एवमूररीकृत्य उररीकृत्य एतेषामर्थः स्वीकृत्येत्यर्थः । कृते कारे च परे वषडादयः पूर्वे प्रयज्यन्ते - वषट्कृतम्, वषट्कारः स्वाहाकारः स्वधाकारः नमस्कृतम् नमस्कारः । वर्णनिर्देशनार्थे तु वर्णादिभ्यः परे **वर्णात्कारः-वा.**- इति वार्तिकेन कारप्रत्ययो युज्यते - अकारः । आकारः । ककारः । खकार इत्यादयो ज्ञेयाः । २. च्व्यन्ताः - अशुक्लं शुक्लं यथा सम्पद्यते तथा कृत्वा "कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः" इति सूत्रेण अकारस्य ईत्वे शुक्लीकृत्वा इति जाते ऊर्यादि. इति सूत्रेण गतिसंज्ञायां कुगतिप्रादय इति सूत्रेण समासे क्त्वो ल्यपि - शुक्लीकृत्य । एवं स्वीकृत्य अङ्गीकृत्य । कृष्णीकृत्य । रक्तीकृत्य । पीतीकृत्य । फलीकृत्य (निष्पूय) । शतृशानचौ - अङ्गीकुर्वन् । स्वीकुर्वन् । अङ्गीकुर्वाणः । स्वीकुर्वाणः । कृत्याः - अङ्गीकर्तव्यम् ।

स्वीकर्तव्यम् । अङ्गीकृतः । अङ्गीकृतवान् । स्वीकृतवान् । तिङन्ते = अङ्गीकरोति । स्वीकरोति । कारेपरे - अङ्गीकारः । स्वीकारः । भू-अङ्गीभवति । अङ्गीभूतम् । अङ्गीभूतवान् । अङ्गीभावः । अङ्गीभूय । इत्यादि ।

अनुकरणं चानितिपरम् १।४।६२॥

अनुकरणं गतिसंज्ञं स्यात् इतिपरं वर्जयित्वा । खाट् कृत्वाऽनेन गतिसंज्ञायां समासे ल्यपि च - खाट्कृत्य । थुत्कृत्य । कुकृत्य । फूत्कारः । फूत्कर्तुम् । फूत्कृत्य । रणत्कारः । इतिशब्दे परे तु न गतिसंज्ञा - खाडिति कृत्वा निरष्ठीवत् ।

आदरानादरयोः सदसती १।४।६३॥

अनयोरर्थयोरेते क्रियायोगे गतिसंज्ञे स्तः । सत्कृत्वा - सत्कृत्य । असत्कृत्वा = असत्कृत्या । सत्कृतम् । असत्कुर्वन् । सत्कुर्वन् असत्कुर्वाणः । तुमुन् - सत्कर्तुम् असत्कर्तुम् । अण् = सत्कारः, असत्कारः । (सत्करोति । सत्कुरुते । असत्करोति । असत्कुरुते । सत्क्रियते । असत्क्रियते) ।

भूषणेऽलम् १।४।६४॥

भूषणार्थेऽलंशब्दःक्रियायोगे गतिसंज्ञः स्यात् । अलङ्कृत्वा - अलङ्कृत्य । अलङ्कुर्वन् अलङ्कुर्वाणः । अलङ्कर्तुम् । अण् - अलङ्कारः (अलङ्करोति । अलङ्कुरुते । अलङ्क्रियते) ।

अभूषणार्थे तु - अलङ्कृत्वौदनं गतः ।

पुरोऽव्ययम् १।४।६७॥

इदमव्ययं क्रियायोगे नित्यं गतिसंज्ञं स्यात् । पुरस्कृत्वा = पुरस्कृत्य । पुरस्कर्तव्यः । पुरस्करणीयः । पुरस्कृतः । पुरस्कृतवान् । अण् - पुरस्कारः । नमः पुरसोर्गत्योरिति सूत्रेण विसर्गस्य सत्वम् । पुरोभूतः । पुरोभूतवान् । पुरोभूय । पुरोभवः । पुरोभावः । पुरः = अग्रे इत्यर्थः । (पुरस्करोति पुरस्कुरुते । पुरोभवति) ।

अस्तं च १।४।६८॥

अस्तमिति मान्तमव्ययं क्रियायोगे गतिसंज्ञं स्यात् । अस्तंगत्वा = अस्तङ्गत्य । अस्तङ्गतः । अस्तङ्गतवान् । अस्तङ्गच्छन् । अस्तङ्गन्तुम् । खच् = अस्तङ्गमः । क्तान्तक्रियायाम् - अस्तंयातः, गतः, आपन्नः, प्राप्तो वा । अस्तङ्गच्छति ।

तिरोऽन्तर्धौ १।४।७१॥

अन्तर्धानेऽर्थे तिरःशब्दःक्रियायोगे गतिसंज्ञः स्यात् । तिरोभूत्वा = तिरोभूय (अन्तर्धाय) । तिरोभूतः । तिरोभूतवान् । तिरोभवन् । तिरोभवितुम् । तिरोभावः । अन्तर्भावार्थे-अन्तर्भूतः । अन्तर्भूतवान् । अन्तर्भवन् । अन्तर्भवितुम् । अन्तर्भावः । अन्तर्भूत्वा-अन्तर्भूय । अन्तर्भावार्थे एव - तिरोधातव्यम् । तिरोहितः । तिरोहितवान् । तिरोधातुम् । तिरोधाय । तिरोधानः - धानम् । अन्तर्दधाति अन्तर्धत्ते । अन्तर्धातव्यम् । अन्तर्हितः । अन्तर्हितवान् । अन्तर्धीयते । (तिरोभवति । अन्तर्भवति । तिरोदधाति तिरोधत्ते । अन्तर्दधाति, अन्तर्धत्ते) ।

विभाषा कृञि १।४।७२॥

कृञि प्रयुज्यमाने तिरस् इत्यव्ययं गतिसंज्ञं वा स्यात् ।

तिरसोऽन्यतरस्याम् ८।३।४२॥

तिरसः सकारो वा स्यात्कुप्वोः परयोः । तिरस्कृत्य तिरःकृत्य । वैकल्पिकसत्वाभावे विसर्ग एव = तिरः कृत्वा । तिरःकृतः, तिरस्कृतः । तिरःकृतवान्, तिरस्कृतवान् । तिरःकुर्वन्, तिरस्कुर्वन् । तिरःकुर्वाणः, तिरस्कुर्वाणः । तिरःकर्ता तिरस्कर्ता । तिरःकर्तुम् तिरस्कर्तुम् । तिरःकारः, तिरस्कारः । (तिरःकरोति, तिरस्करोति । तिरःकुरुते, तिरस्कुरुते) । ३. प्रादिपूर्वकसमासः -

यः शब्दो गतिसंज्ञार्थं सूत्रे गृहीतस्तस्य सूत्रेण गतिसंज्ञा भवति ततः समासश्च । परम् "कुगतिप्रादयः" इति सूत्रे प्रादिग्रहणमगतिसंज्ञार्थं कृतम् । यतोऽगतित्वेऽपि व्याकरणाचार्यैः प्रादीनां नित्यसमासो विहितः । दुर्निन्दायां (निन्दार्थे) प्रयुज्यते । निन्दितस्य स्थाने दुर् । निन्दितः पुरुष इत्यर्थे दुर् पुरुष सु इति विग्रहे नित्यसमासे प्रातिपदिकसंज्ञायां सुब्लुकि सत्वे षत्वे स्वादिकार्ये दुष्पुरुषः । निन्दितो जनः = दुर्जनः - सत्वाभावः । इत्यादि । स्वती पूजायां (पूजार्थे) प्रयुज्येते - सु अति । शोभने सुष्ठु सु = शोभनः पुरुषः इत्यर्थे सुष्ठु पुरुषः । सु पुरुष सु - इति विग्रहे समासे प्रातिपदिकसंज्ञायां सुपो लुकि प्रातिपदिकत्वात्सुबुत्पत्तिः - सुपुरुषः । शोभनं कर्म इत्यर्थे सुष्ठु कर्म सु = सुकर्म । अशोभनं कर्म इत्यर्थे दुष्ठु कर्म । दुर् = दुष्कर्म । पूज्यस्थाने अति । पूज्यः पुरुष इत्यर्थे अति पुरुषः = सुपुरुषः । एवमतिनारी । अतिरतिक्रमणे चेति सूत्रे चकारेण अतेः पूज्यार्थनिर्देशात् । आङीषदर्थे - ईषत्पिङ्गलः = आपिङ्गलः । प्रायिकं चैतदुपाधिवचनम् । अन्यत्रापि दृश्यते - ईषदुष्णम् = कोष्णम् । कवोष्णम्, कदुष्णम् (मन्दोष्णम्) - इषदर्थे वर्तमानस्य कुशब्दस्य स्थाने का कव कद् चादेशाः । दुष्कृतम् । आबद्धम् ।

प्रादयोः गताद्यर्थे प्रथमया-वा.-सह समस्यन्ते । क्रान्ताद्यर्थेन गताद्यर्थो बोध्यः । प्रसङ्गानुसारं गतशब्दो विविधार्थे प्रयुज्यते । प्रगतः प्रधानः (मुख्यः) आचार्यः - आचार्य सु इति विग्रहेऽनेन वार्तिकेन समासे प्रातिपदिकसंज्ञायां सुब्लुकि समुदायात्प्रातिपदिकत्वात्सुबुत्पत्ति = प्राचार्यः = विद्यालयप्रमुखोऽतिविद्वान्वा । प्रादीनां तत्तत्क्रियामन्तर्भाव्य तत्तद्विभक्तचन्तैः सह नित्यसमासः । प्रगतः = महान् पितामहो मातामहो वा = प्रपितामहः प्रमातामहो वा । प्रगता (महती) पितामही मातामही वा = प्रपितामही प्रमातामही वा । प्रगतः (प्राप्तः) शिष्य = प्रशिष्यः । विगतं नष्टं फलम् = विफलम् । एवमन्येऽपि चिन्त्याः । **अत्यादयः क्रान्ताद्यर्थे द्वितीयया-वा.**-सह समस्यन्ते । अतिक्रान्तः (पारङ्गतः) । अतिक्रान्तः मालामिति विग्रहेऽनेन वार्तिकेन समासे प्रातिपदिकसंज्ञायां सुपो लुकि -

एकविभक्ति चापूर्वनिपाते १।२।४४॥

विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात् न तु तस्य पूर्वनिपातः । अनेन सूत्रेणानियतविभक्तिकस्यातिक्रान्तपदस्यापेक्षया नियतविभक्तिकस्य द्वितीयान्तमालाशब्दस्योपसर्जनसंज्ञायां तस्याऽपूर्वनिपाते अति माला इति जाते गोस्त्रियोरुपसर्जनस्येति सूत्रेण मालाया आकारस्य ह्रस्वे अतिमाल इति जाते प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - अतिमालः । एवमतिक्रान्तः (अतिलङ्घितः) मर्यादाम् = अतिमर्यादः । अतिक्रान्तः खट्वाम् = अतिखट्वः । उद्गतो वेलाम् (तटम्) =

उद्वेलः । अभिगतो मुखम् = अभिमुखः (सन्मुखः) । प्रतिगतो (प्राप्तो)ऽक्षम् = प्रत्यक्षः = दृष्टिप्राप्तः । **अवादयः कुष्टाद्यर्थे तृतीयया-वा**. -सह समस्यन्ते । अवक्रुष्टः (उच्चारितः) कोकिलया = अवकोकिलः - गोस्त्रियोरिति ह्रस्वः । सन्नद्धो वर्मणा = संवर्मा । **पर्यादयो ग्लानाद्यर्थे चतुर्थ्या-वा.-** सह समस्यन्ते । परिग्लानो (क्लान्तः, थकितः)ऽध्ययनाय = पर्यध्ययनः । अलङ्कुमार्यै = अलङ्कुमारिः - गोस्त्रियोरिति ह्रस्वः । उद्युक्तः सङ्ग्रामाय = उत्सङ्ग्रामः । **निरादयः क्रान्ताद्यर्थे पञ्चम्या-वा**.-सह समस्यन्ते । निष्क्रान्तः (निर्गतः) कौशाम्ब्याः = निष्कौशाम्बिः - गोस्त्रियोरिति ह्रस्वः । उत्क्रान्त उत्कूलात् = उत्कूलः । निर्गतो गृहात् = निर्गृहः । निःसारितो ग्रामात् = निर्ग्रामः । निर्गतोऽङ्गुलिभ्यः निरङ्गुलः - तत्पुरुषस्याङ्गुलेः संख्याव्ययादेरिति सूत्रेण अच् । **कर्मप्रवचनीयानां निषेधः-वा.-** कर्मप्रवचनीयानां समासो न भवति । जपमनु । वृक्षं प्रति परि अनु वा । अति गुणान् । कृष्णात् प्रति । रामं विना । कृष्णेन विना । इत्यादि ।

६-३-५ उपपदतत्पुरुषः

तत्रोपपदं सप्तमीस्थम् ३।१।९२॥

सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत्कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात् । तस्मिंस्तत्येव वक्ष्यमाणाः प्रत्ययाः स्युः ।

उपपदमतिङ् २।२।१९॥

उपपदं सुबन्तं समर्थेन तिङन्तरहितेन शब्देन सह नित्यं समस्यते स तत्पुरुषः । यतोऽयमतिङन्तः समासः प्रोच्यते । कुम्भं करोतीति विग्रहे तत्रोपपदं सप्तमीस्थमिति सूत्रेण कुम्भशब्दस्योपपदसंज्ञायां कुम्भोपपदात्कृधातोः कर्मण्यणिति सूत्रेणाणि अचो ञ्णितीति सूत्रेण वृद्धौ कुम्भं कार इति जाते कर्तृकर्मणोः कृति इति सूत्रेण कर्मणि षष्ठ्यां कृतायां कर्म अस् कार इत्यवस्थायां गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति परिभाषया कारशब्दात्सुबुत्पत्तेः प्राक् उपपदमतिङ्ङिति सूत्रेण समासे प्रातिपदिकत्वात्सुपो लुकि एकदेशविकृतस्यानन्यत्वादिति परिभाषया प्रातिपदिकत्वेन सौ रुत्वे विसर्गे च - कुम्भकारः (कुलालः) । एवं चर्म करोतीति चर्मकारः । स्तम्भे रमते इति = स्तम्भेरमः (हस्ती) - सप्तम्या अलुक् । पुरं दारयतीति - पुरन्दरः (इन्द्रः) । गृहे तिष्ठतीति गृहस्थः । ब्रह्मणो हननम् = ब्रह्महत्या । मनो हरति तच्छील इति तच्छीलेऽर्थे णिनि - मनोहारी । स्तनं धयतीति(खश्) = स्तनन्धयः = (बालः) । पारं दृष्टवान् = पारदृश्वा । व्याजिघ्रतीति विग्रहे आतश्चोपसर्गे क इति सूत्रेण कप्रत्यये आतो लोप इटि चेति सूत्रेण धातोराकारलोपे व्याघ्र् इत्यवस्थायां मकारे घ्रे मिलिते **गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सबत्पत्तेरिति** परिभाषया घ्रशब्दस्य सुबुत्पत्तेः प्राक् व्याङो घ्रशब्देन सह गतिसंज्ञायां कुगतिप्रादय इति समासे स्त्रियां जातेरस्त्रीविषयादयोपधादिति सूत्रेण ङीषि प्रातिपदिकसंज्ञायां शब्दसमुदायात्सुबुत्पत्तिः - व्याघ्री = अन्यथाऽन्यथा सुबन्तेन समासे तु केवलस्य 'घ्र' शब्दस्य जातिवाचकत्वाऽभावात् जातिलक्षणौ ङीष् न स्यात्, किन्तु टाप् स्यात् । अश्वेन क्रीता इति विग्रहे कर्तृकरणे कृता बहुलमिति सूत्रेण गतिकारकोपदनां कृद्भिः सहेति परिभाषायाः सहकारेण सुबुत्तेः प्राक् गतिसंज्ञायां ततः समासे "क्रीतात्करणपूर्वात्" इति सूत्रेण ङीषि प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - अश्वक्रीती = सुबन्तेन समासे तु टाप् भवति ङीष् न भवति । कच्छपेन पिबति इति विग्रहे "सुपि स्थः" इत्यत्र "सुपि" इति

विभक्तियोगेन कप्रत्यये "उपपदमतिङ्" इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि "जातेरस्त्रीविषयोपधादिति" सूत्रेण जातिलक्षेणे ङीषि प्रातिपदिकत्वात्सुबुत्पत्तिः = कच्छपीत्यादि । अत्रापि परिभाषाविरहे पूर्वं टापि सति ङीष् न भवति ।

अमैवाव्ययेन २।२।२०॥

अमैव (णमुलन्तेनैव) तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते स तत्पुरुषः । स्वादुं कृत्वा = स्वादुकारं भुङ्क्ते । स्वादुशब्दस्य निपातनात् मान्तमव्ययं च । लवणङ्कृत्वा = लवणङ्कारम् । समासो णमुल्प्रत्ययान्तेनाव्ययेन सह भवति । एतन्निपातेन नेह - कालो भोक्तुम् । समयो गन्तुम् । वेलाऽध्येतुम् । अग्रे भोजम् ।

तृतीयाप्रभृतीन्यन्यतरस्याम् २।२।२१॥

उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यते स तत्पुरुषः । मूलकेनोपदंशमिति विग्रहेऽनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि गुणे = मूलकोपदंशं मूलकेनोपदंशं वा भुङ्क्ते (मूलकमुपदंशं व्यञ्जनं कृत्वा भक्षयति) ।

क्त्वा च २।२।२२॥

तृतीयाप्रभृतिन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते स तत्पुरुषः । उच्चैः कृत्य उच्चैः कृत्वा। सहसाकृत्य सहसा कृत्वा । अत्र तृतीयाविभक्त्याः सदृशपदेन युक्तमव्ययपदं सूत्रेण समासार्थं गृह्यते।

६-३-६ समासान्तप्रत्ययाः

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ५।४।८६॥

संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात् । अत्र विग्रहे आदौ संख्यावाचकादव्ययाद्वा शब्दात्परेऽङ्गुलिशब्दाश्च प्रयुज्यन्ते । द्वे अङ्गुली प्रमाणमस्येति विग्रहे तद्धितार्थोत्तरपद इति सूत्रेण द्विगुसमासे प्रातिपदिकसंज्ञायां सुपो लुकि **प्रमाणे द्वयसज-दघ्नन्-मात्रच** इति सूत्रेण मात्रचि अस्य "द्विगोर्लुगनपत्ये" इति सूत्रेण मात्रचो लोपे द्वि अङ्गुलि इति जाते तत्पुरुषस्याङ्गुलेः इति सूत्रेण समासान्तेऽच्प्रत्यये यस्येति चेति सूत्रेण अङ्गुलेरिकारस्य लोपे वर्णसंयोगे स नपुंसकमित्यनेन नपुंसकत्वे प्रातिपदिकत्वात्सुबुत्तिः - द्वयङ्गुलम् । त्रयोऽङ्गुलयः प्रमाणमस्येति = त्र्यङ्गुलम् । प्रक्रिया पूर्ववत् । एवं चतुरङ्गुलम् । पञ्चाङ्गुलम् । षडङ्गुलम् । दशाङ्गुलमित्यादि । प्रादिसमासः - निर्गतमङ्गुलिभ्यः = निरङ्गुलम् । अतिक्रान्तोऽङ्गुलिमिति विग्रहे अत्यादयः क्रान्ताद्यर्थे द्वितीययेति वार्तिकेन समासे प्रातिपदिकत्वात्सुपो लुकि समासान्तेऽच्प्रत्यये यस्येति चेति इकारलोपे नपुंसकत्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - अत्यङ्गुलम् ।

अहःसर्वैकदेशे संख्यातपुण्याच्च रात्रेः ५।४।८७॥

एभ्यः पराया रात्रेरच् स्याच्चात्संख्याव्ययादेः । **अहर्ग्रहणं द्वन्द्वार्थम्-वा ।**

रात्राह्नाहाः पुंसि २।४।२९॥

रात्र अह्न अह एतेऽन्तास्तत्पुरुषद्वन्द्वसमासाश्च शब्दाः पुंसि (पुंलिङ्गे) स्युः । अहश्च रात्रिश्च तयोः समाहार इति विग्रहे चार्थे द्वन्द्व इति सूत्रेण समाहारद्वन्द्वसमासे प्रातिपदिकसंज्ञायां सुब्लुकि अहःसर्वैकदेशे इति सूत्रेणाचि यस्येति चेति सूत्रेण रात्रेरिकारलोपे सन्धौ कृते अहोरात्र इति जाते "जातिरप्राणिनाम्" इति सूत्रेण एकवद्भावे स नपुंसकमिति सूत्रेण नपुंसकत्वे प्राप्ते तं प्रबाध्य रात्राह्नाहाः पुंसीति सूत्रेण पुंस्त्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - अहोरात्रः । सर्वा रात्रिरिति विग्रहे पूर्वकालैकजरत्. इति सूत्रेण कर्मधारयसमासे प्रातिपदिकसंज्ञायां सुपो लुकि पुंवत्कर्मधारय इति सूत्रेण सर्वायाः पुंवद्भावे अहःसर्वैक. इति सूत्रेण समासान्तेऽच्प्रत्यये यस्येति चेति सूत्रेण रात्रेरिकारलोपे सर्वरात्र इति जाते रात्राह्नाहाःपुंसीति रात्रस्य पुंस्त्वे प्रातिपदिकत्वात्सुबुत्पत्तिः - सर्वरात्रः । एकदेशः - पूर्वं रात्रेरिति विग्रहे पूर्वापराधरोत्तर. इति सूत्रेण एकदेशिसमासे प्रातिपदिकसंज्ञायां सुपो लुकि समासान्तेऽचि इकारलोपे रात्राह्नाहा पुंसीति रात्रस्य पुंस्त्वे प्रातिपदिकत्वात्सुबुत्पत्तिः - पूर्वरात्रः । पूर्वादिपूर्वकाणां समासः पूर्वापराधरोत्तरमिति सूत्रेण भवति । एवमुत्तरं रात्रेः = उत्तररात्रः । अपरं रात्रेः = अपररात्रः । पश्चिमं रात्रेः = पश्चिमरात्रः । एते पूर्वरात्रवज्ज्ञेयाः । संख्याता रात्रिरिति विग्रहे विशेषणं विशेष्येण बहुलमिति सूत्रेण कर्मधारयसमासे प्रातिपदिकसंज्ञायां सुपो लुकि अहः सर्वैकदेशे - इति अचि इकारलोपे पुंवत्कर्मधारय. इति सूत्रेण संख्यातायाः पुंस्त्वे रात्राह्नाहाः पुंसीति रात्रस्य पुंस्त्वे प्रातिपदिकत्वात्सुबुत्पत्तिः = संख्यातरात्रः । एवं पुण्या रात्रिः = पुण्यरात्रः । रात्रिमतिक्रान्त इति विग्रहे अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति वार्तिकेन समासे प्रातिपदिकत्वात्सुपो लुकि अहः सर्वैकदेशे. इत्यनेन समासान्तेऽचि यस्येति चेति सूत्रेण रात्रेरिकारलोपे पुंस्त्वे प्रातिपदिकत्वात्सुबुत्पत्तिः = अतिरात्रः । **संख्यापूर्वं रात्रं क्लीबम्-वा.-**द्वयो रात्र्योः समाहार इति विग्रहे तद्धितार्थोत्तर. इति सूत्रेण समासे प्रातिपदिकत्वात्सुपो लुकि समासान्तेऽचि इकारलोपे संख्यापूर्वं रात्रं क्लीबमिति वार्तिकेन क्लीबत्वे प्रातिपदिकत्वात्सुबुत्तपत्तिः - द्विरात्रम् । एवं तिसृणां रात्रीणां समाहारः = त्रिरात्रम् । सप्तरात्रम् । अष्टरात्रम् ।

राजाहः सखिभ्यष्टच्[1] ५।४।९१॥

राजन् अहन् सखि शब्दान्तात्तत्पुरुषाट्टच् स्यात् । महाँश्चासौ राजा इति विग्रहे विशेषणं विशेष्येण बहुलमिति सूत्रेण कर्मधारयसमासे प्रातिपदिकसंज्ञायां सुपो लुकि अनेन सूत्रेण टचि नस्तद्धिते इति सूत्रेण अनो लोपे महत आत्वे प्रातिपदिकसंज्ञायां सुबादिः - महाराजः । परमश्चासौ राजा इति विग्रहे आत्वं विनाऽन्यत्सर्वं महाराजवत् = परमराजः । राज्ञां राजा इति विग्रहे षष्ठी इति सूत्रेण समासे प्रातिपदिकत्वात्सुपो लुकि टचि नलोपः प्रातिपदिकान्तस्येति सूत्रेण पूर्वपदस्य राज्ञो नकारस्य लोपेऽन्ते स्थितस्य राज्ञोऽन्भागस्य टेः नस्तद्धिते इति सूत्रेण लोपे प्रातिपदिकत्वात्सुबुत्पत्तिः - राजराजः । मृगाणां राजा इति विग्रहे षष्ठीसमासे प्रातिपदिकत्वात्सुपो लुकि नस्तद्धिते इत्यनेन टेर्लोपेऽनेन सूत्रेण टचि प्रातिपदिकत्वात्सुबुत्पत्तिः = मृगराजः । एवं धर्मस्य राजा = धर्मराजः । एवं भोजराजः । देवराजः ।

---

[1] अनेन सूत्रे ह्रस्व इकारान्तात्सखिशब्दादेव टच् न तु दीर्घ ईकारान्तात् ।

कृष्णस्य सखा इत्यत्र षष्ठीसमासे प्रातिपदिकत्वात्सुबादिः - कृष्णसखः, अर्जुनसखः । कपोतानां राजा = कपोतराजः । एवं नरराजः । पक्षिणां राजा = इत्यत्र नलोपः प्रातिपदिकान्तस्येति पक्षिणो नस्य लोपेऽन्यन्मृगराजवत् = पक्षिराजः । युवश्चासौ राजा इत्यत्र कर्मधारयसमासे प्रातिपदिकत्वात्सुब्लुकि टचि टेर्लोपे प्रातिपदिकत्वात्सुबादिः = युवराजः । अधि अधिको वा राजा = अधिराजः ।

अह्नष्टखोरेव ६।४।१४५॥

टखोः परयोरह्नष्टिलोपो नान्यत्र । परमञ्च तदहश्चेति विग्रहे विशेषणं विशेष्येण बहुलमिति सूत्रेण समासे सुब्लुकि राजाहःसखिभ्यष्टचिति सूत्रेण टचि अनेन सूत्रेण टिपोले रात्राह्नाहाः पुंसीति पुंस्त्वे सर्वर्णदीर्घे सुबादिः - परमाहः । एवमुत्तमाहः ।

अह्नोऽह्न एतेभ्यः ५।४।८८॥

सर्वादिभ्यः परस्याहन्शब्दस्य अह्नादेशः स्यात् समासान्ते परे । टचि टिलोपे प्राप्तेऽ ह्नादेशे अल्लोपोऽन इति सूत्रेणाह्नस्याऽकारलोपे वर्णमेलने पुंस्त्वे प्रातिपदिकत्वात्सुबादिः = मध्याह्नः ।

अह्नोऽदन्तात् ८।४।७॥

अदन्तपूर्वस्थान्निमित्तात्परस्याह्नो नस्य णः स्यात् । निमित्तेन रेफो गृह्यते । अह्नो मध्यमिति मध्यं च तदहश्चेति वा विग्रहे संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङाविति सूत्रज्ञापकान्मध्यस्याप्येकदेशस्याह्ना सह विशेषणं विशेष्येणं बहुलमित्यनेन समासे प्रातिपदिकत्वात्सुपो लुकि “राजाहः सखिभ्यष्टच्” इत्यनेन टचि मध्यस्योपसर्जनसंज्ञत्वेन पूर्वप्रयोगे टिलापे प्राप्ते “अह्नोऽह्न एतेभ्य” इति सूत्रेण अह्नादेशे अल्लोपोऽन इति सूत्रेणाऽह्नोऽकारस्य लोपे वर्णमेलने रात्राह्नाहाः पुंसीत्यनेन पुंस्त्वे प्रातिपदिकसंज्ञायां सुबादिः - मध्याह्नः । सर्वमहमिति विग्रहे पूर्वकालैक. इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि राजाहः सखिभ्यष्टचिति टचि अह्नोऽह्न एतेभ्य इति सूत्रेण अहन्स्थाने अह्नादेखे अह्नोऽदन्तादिति सूत्रेण नस्य णत्वे प्रातिपदिकत्वात्सुबादिः = सर्वाह्णः। एवं पूर्वाह्ण : । प्रथमं च तदहश्चेति विग्रहे पूर्वापरप्रथम. इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि टचि अह्नादेशे नस्य णत्वेऽनो लोपे प्रथमस्य स्थाने प्रप्रयोगे प्रातिपदिकत्वात्सुबादिकार्ये - प्राह्णः = दिनस्य पूर्वभागः । अह्नोऽपरमिति विग्रहः=अपराह्णः=दिनस्य परभागः । प्राह्णापराह्णामध्याह्न इत्यमरः । सायमहः = सायाह्नः ।

न संख्यादेः समाहारे ५।४।८९॥

समाहारे वर्तमानस्य संख्यादेरह्नोऽह्नादेशो न स्यात् । द्वयोरह्नोः समाहार इति विग्रहे तद्धितार्थोन्तर. इत्यनेन समासे प्रातिपदिकसंज्ञायां टचि अह्नोऽह्न एतेभ्य इत्यनेन अह्नादेशे प्राप्ते न संख्यादेरिति सूत्रेण निषेधे अल्लोपोऽन इत्यनेनानोऽकारस्य लोपे रात्राह्नाहाः पुंसीति सूत्रेण पुंस्त्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः = द्वयह्नः । एवं त्र्यह्नः ।

उत्तमैकाभ्यां च ५।४।९०॥

उत्तम एक आभ्यां परस्याह्नोऽह्नादेशो न स्यात् । अत्रोत्तमशब्दः पुण्यार्थबोधकः । **पुण्यसुदिनाभ्यामह क्लीबतेष्टा-वा.**-पुण्यमह इति विग्रहे विशेषणं विशेष्येण बहुलमिति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि अहः सर्वैकदेश. इति सूत्रेण टचि अह्नोऽह्न एतेभ्य इति सूत्रेण अह्नादेशे प्राप्तेऽनेन सूत्रेण निषेधे टिलोपे पुण्यसुदिनाभ्यामहः क्लीबतेष्टेति वार्तिकेन क्लीबत्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - पुण्याहम् । सुदिनमहः = सुदिनाहम् । एकमह इति विग्रहे पूर्वकालैक. इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि टचि अह्नादेशे प्राप्ते उत्तमैकाभ्यां चेति सूत्रेण निषेधे टिलोपे रात्राह्नाहाः पुंसीति सूत्रेण पुँस्त्वे प्रातिपदिकत्वात्सुबादिः - एकाहः ।

अग्राख्यायामुरसः ५।४।९३॥

अग्राख्या मुख्या । तस्मिन्नर्थे उरसष्टच् स्यात् । अश्वानामुर इव इति विग्रहे षष्ठीसमासे प्रातिपदिकत्वात्सुब्लुकि अनेन सूत्रेण टचि गुणे परवल्लिङ्गत्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - अश्वोरसम् ।

ग्रामकौटाभ्यां च तक्ष्णः ५।४।९५॥

अभ्यां परस्य तक्ष्णष्टच् स्यात् । ग्रामस्य तक्षेति विग्रहे षष्ठीसमासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण टचि टिलोपे प्रातिपदिकत्वात्सुबुत्पत्तिः - ग्रामतक्षः । कौट (कुटया भवः) - श्वासौ तक्षेति विग्रहे बहुलसमासे प्रातिपदिकत्वात्सुब्लुकि टचि टिलोपे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - कौटतक्षः ।

उपमानादप्राणिषु ५।४।९७॥

अप्राणिविषयकोपमानवाचिनः शुनष्टच् स्यात् । आकर्षः श्वा इव इति विग्रहे उपमितं व्याघ्रादिभिरिति सूत्रेण उपमानोत्तरपदसमासे प्रातिपदिकत्वात्सुब्लुकि टचि टिलोपे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - आकर्षश्वः ।

ब्रह्मणो जनपदाख्यायाम् ५।४।१०४॥

ब्रह्मान्तात्तत्पुरुषाट्टच् स्यात् समासेन जनपदत्वमाख्यायते चेत् । सुराष्ट्रे ब्रह्मा इति विग्रहे सप्तमी शौण्डैरिति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण टचि टिलोपे परवल्लिङ्गत्वे प्रातिपदिकत्वात्सुबादिः - सुराष्ट्रब्रह्मः ।

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ६।३।४७॥

द्व्यष्टन्शब्दयोरात्वं स्यात्संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः परयोः । द्व्यधिका दशेत्यत्र तद्धितार्थोत्तर. इति सूत्रेण द्वौ च दश चेति विग्रहे चार्थे द्वन्द्व इति सूत्रेण च समासे प्रातिपदिकत्वात्सुब्लुकि अनेन सूत्रेण द्विशब्दस्य इकारस्थाने आत्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - द्वादशः । एवमष्टादशः - नस्तद्धिते इत्यनेन अन्भागस्य लोपः । द्वाविंशतिः । द्वात्रिंशत् । अष्टाविंशतिः अष्टात्रिंशत् । संख्यायामुत्तरपदे इत्युक्तेर्नेहः - द्वे मातुरौ यस्य स इति=द्वैमातुरः । अबहुव्रीह्यशीत्योरित्युक्तेर्नेह - द्वौ वा त्रयो वा = द्वित्राः । द्व्यधिका अशीति, द्वे च अशीतिश्चेति =

द्व्यशीतिः । **प्राक्शतादिति वक्तव्यम्-वा**. -तेनेह न - द्व्यधिकं शतम्, द्वे च शतञ्चेति वा = द्विशतम्। द्व्यधिकं सहस्रम्, द्वे च सहस्रं चेति वा = द्विसहस्रम् ।

त्रेस्त्रयः ६।३।४८॥

त्रिशब्दस्य त्रयस्स्यात्संख्यायामुत्तरपदे अबहुब्रीह्यशीत्योः परयोः । त्रयश्च दश च, त्र्यधिका दश इति वा = त्रयोदशः सकारस्य रुत्वमुत्वं गुणश्च । एवं त्रयोविंशतिः । त्रयस्त्रिंशत् । बहुब्रीहौ तु - त्रिर्दश - त्रिदशाः - सुजर्थे बहुब्रीहिः । प्राक्शतादिति तु - त्रिशतम्, त्रिसहस्रम् ।

विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ६।३।४९॥

द्व्यष्टनोरात्वं त्रे श्च त्रयस् आदेशो वा स्यात् चत्वारिंशदादौ संख्यावाचकशब्दे उत्तरपदे परे अबहुब्रीह्यशीत्योः परयोः । द्व्यधिका चत्वारिंशत् द्वे च चत्वारिंशच्चेति वा - द्वाचत्वारिंशत्, द्विचत्वारिंशत् । द्वापञ्चाशत् द्विपञ्चाशत् । द्वाषष्टिः, द्विषष्टिः । द्वासप्ततिः द्विसप्ततिः । द्वानवतिः, द्विनवतिः । अष्टाचत्वारिंशत्,अष्टचत्वारिंशत् । अष्टापञ्चाशत्, अष्टपञ्चाशत् । अष्टाषष्टिः अष्टषष्टिः। अष्टासप्ततिः, अष्टसप्ततिः । अष्टानवतिः, अष्टनवतिः । त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत् । त्रयःपञ्चाशत्, त्रिपञ्चाशत् । त्रयःषष्टिः, त्रिषष्टिः । त्रयःसप्ततिः त्रिसप्ततिः । त्रयोनवतिः, त्रिनवतिः। त्र्यधिका अशीतिः, त्रयश्चाशीतिश्चेति = त्र्यशीतिमात्रम् ।

एकादिश्चैकस्य चादुक् ६।३।७६॥

एकादिर्नञ् प्रकृत्या स्यात् एकस्य चाऽदुगागमश्च । नञो विंशत्या सह समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः । एकेन न विंशतिरित्यर्थे समासे प्रातिपदिकत्वात्सुब्लुकि नलोपो नञ् इति सूत्रेण प्राप्तस्य नकारलोपस्य प्रकृतिभावेन निवृत्तौ एकशब्दस्यान्तावयवे अदुक् इत्यागमे उकारलोपे एक अद् नविंशति इति जाते सवर्णदीर्घे यरोनुनासिकेऽनुनासिको वेति सूत्रेण वैकल्पिके पक्षे नकारे च - एकान्नविंशतिः । नकाराभावपक्षे - एकाद्नविंशतिः । एकेन ऊना - एकोना, एकोना चासौ विंशतिः - एकोनविंशतिरित्यत्र तृतीयातत्पुरुषगर्भः कर्मधारयो गोस्त्रियोरिति ह्रस्वश्च । एवमेकेन ऊना एकोना, एकोना चासौ त्रिंशत् - एकान्नत्रिंशत्, एकाद्नत्रिंशत् । एवमग्रेसंख्या समाधेया । **षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वाच्यम्-वा.**-दत् दशन्शब्दयोरुत्तरपदयोर्धाप्रत्यये च परे षष्शब्दस्योत्वम्, उत्तरपदादेर्दकारस्य धकारस्य ष्टुत्वं दत्दशयोर्नित्यं धाप्रत्यये परे वा स्यादित्यर्थः। षडधिका दश, षड् च दश च वेति लौकिकविग्रहे षष् अस् दश अस् इत्यलौकिकविग्रहे विशेषणं विशेष्येण बहुलमिति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि अचि षष् दशन् अ इत्यवस्थायां षषः षकारस्य उत्वे दशन्शब्दस्यादिदकारस्य ष्टुत्वेन डत्वे गुणे टिलोपे प्रातिपदिकत्वेन सौ रुत्वे विसर्गे च - षोडशः । षट् दन्ता अस्य इति विग्रहे बहुब्रीहिसमासे प्रातिपदिकत्वात्सुब्लुकि षष् दन्त इति जाते वयसि दन्तस्य दतृ इति सूत्रेण दस्य स्थाने दतृ आदेशे ऋकारस्य लोपे षष् दत् इति स्थितेऽन्त्यस्य षस्य उत्वे गुणे दतो दस्य ष्टुत्वेन डत्वे स्वादिकार्ये - षोडन् । षट् प्रकार इत्यर्थे संख्याया विधार्थे धा इति सूत्रेण धाप्रत्यये षष् धा इति जाते षषोऽन्त्यषकारस्य वैकल्पिके उत्वे गुणे धस्य ष्टुत्वे षोढा । उत्वाभावे षड्धा = षट्प्रकारः ।

इति तत्पुरुषः ॥६-३॥

६-४ बहुव्रीहि

६-४-१ बहुव्रीहेर्विग्रहः

अस्यार्थोऽस्ति-बहुःअधिकः, व्रीहिः = ध्यान्यम् यस्य अस्ति स बहुव्रीहिः = येन सहाधिकानि धान्यानि सन्तीति । अत्र बहुविशेषणम् व्रीहिर्विशेष्यम् । अनयोः समस्तं पदमन्यस्य विशेष्यस्य विशेषणं ज्ञेयम् ।

अत्र द्वयोः पदयोर्बहूनां पदानां वा समासः क्रियते स बहुव्रीहिः । समस्यमानयोःपदयोः समस्यमानानां वा पदानां विग्रहस्यान्ते यत्तच्छब्दौ प्रयुज्येते । आभ्यां शब्दाभ्यामन्यविशेष्यस्य लिङ्गं विभक्तिर्वचनं च निर्दिश्यन्ते । यतः सदाऽन्यविशेष्यस्य लिङ्गं विभक्तिर्वचनं च ज्ञेयानि । प्रयुज्यमानयोर्यत्तदोः पदयोः स्वरूपमधः प्रस्तुयते ।

१-१-क) पुंलिङ्गस्यान्यविशेष्यस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते प्रयोज्ये द्वे द्वे पदे -

विशेष्ये	एकवचने	द्विवचने	बहुवचने	वा स्थिते सति
२	यं सः	यौ तौ	यान्ते	
३	येन सः	याभ्यां तौ	यैस्ते	
४	यस्मै सः	,, तौ	येभ्यस्ते	
५	यस्मात् सः	,, तौ	,, ते	
६	यस्य सः	ययोः तौ	येषां ते	
७	यस्मिन् सः	,, तौ	येषु ते	

ख) पुंल्लिङ्गस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते एकैकवचने द्वे पदे ततः समस्तशब्दस्यान्ते एकवचनान्तं च पदं प्रयुज्यते -

१. प्रथमविधौ विग्रहे प्रयोज्य द्वे पदे- | समासान्तरं समस्तशब्दस्यान्तेऽन्यविशेष्यस्य विभक्तिवचननिर्देशनार्थं प्रयोज्यं पदम्-

२. यं सः = तम्

३. येन सः = तेन तस्मै तस्मात् तस्य तस्मिन् तं वा ।

४. यस्मै सः = तस्मै तस्मात् तस्य तस्मिन् तम् तेन वा ।

५. यस्मात्सः = तस्मात् तस्य तस्मिन् तम् तेन तस्मै वा ।

६. यस्यः सः = तस्य तस्मिन् तम् तेन तस्मै तस्मात् वा ।

७. यस्मिन् सः = तस्मिन् तम् तेन तस्मै तस्मात् तस्य वा ।

२. द्वितीयविधौ विग्रहे सः पदस्योच्चारणं विना विग्रहस्यान्ते प्रयोज्ये एकैकवचनान्ते द्वे पदे -

२. यम् - तम्,

३. येन - तेन तस्मै तस्मात् तस्य तस्मिन् तम् वा ।

४. यस्मै - तस्मै तस्मात् तस्य तस्मिन् तम् तेन वा ।

५. यस्मात् - तस्मात् तस्य तस्मिन् तम् तेन तस्मै वा ।

६. यस्य - तस्य तस्मिन् तम् तेन तस्मै तस्मात् वा ।

७. यस्मिन् - तस्मिन् तम् तेन तस्मै तस्मात् तस्य वा ।

ग) पुंल्लिङ्गस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते द्विद्विवचने द्वे पदे ततः समस्तशब्दस्यान्ते द्विवचनान्तं च पदं प्रयुज्यते ।

१. प्रथमविधौ विग्रहे प्रयोज्ये द्वे पदे-	समासानन्तरं प्रयोज्यं पदम्-	२. द्वितीयविधौ विग्रहस्यान्ते प्रयोज्ये द्विद्विवचनान्ते द्वे पदे -	
२. यौ तौ -	तौ	यौ -	तौ
३. याभ्यां तौ -	ताभ्याम्	याभ्याम् -	ताभ्याम्
४. " " -	"	"	"
५. " " -	"	"	"
६. ययोस्तौ -	तयोः	ययोः -	तयोः
७. " " -	"	"	"

घ) पुंल्लिङ्गस्य द्वितीयादिविभक्तिस्थस्यान्यविशेष्यस्य वचननिर्देशनार्थं विग्रहस्यान्ते बहुवचनान्ते द्वे पदे ततः समस्तशब्दस्यान्ते बहुवचनान्त चैकं पदं प्रयुज्यते -

१. प्रथमविधौ विग्रहे प्रयोज्ये पदे	समासान्तरं समस्तशब्दस्यान्तेऽन्यविशेष्यस्य विभक्ति-वचननिर्देशनार्थं प्रयोज्यं पदम्
२. यान् ते -	तान्

३. यैः - ते - तैः तेभ्यः, तेभ्यः, तेषाम्, तेषु, तान्, वा ।

४. येभ्यः - ते - तेभ्यः, तेभ्यः, तेषाम्, तेषु, तान्, तैः वा ।

५. " " - " तेषाम्, तेषु, तान्, तैः, तेभ्यः वा ।

६. येषां ते - तेषाम्, तेषु, तान्, तैः, तेभ्यः, तेभ्यो वा

७. येषु ते - तेषु, तान्, तैः, तेभ्यः, तेभ्यः, तेषाम्, वा

२. द्वितीयाविधौ विग्रहे तेपदस्योच्चारणं विना विग्रहस्यान्ते प्रयोज्ये बहुबहुवचनान्ते द्वे पदे -

२. यान् - तान्

३. यैः - तैः, तेभ्यः, तेभ्यः, तेषाम्, तेषु, तान्, वा ।

४. येभ्यः - तेभ्यः, तेभ्यः, तेषाम्, तेषु, तान्, तैः, वा ।

५. येभ्यः - तेभ्यः, तेषाम्, तेषु, तान्, तैः, तेभ्यः, वा ।

६. येषाम् - तेषाम्, तेषु, तान्, तैः, तेभ्यः, तेभ्यो वा ।

७. येषु - तेषु, तान्, तैः, तेभ्यः, तेभ्यः, तेषां वा ।

१-२-क) स्त्रीलिङ्गस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते प्रयोज्ये द्वे पदे -

	एकवचने		द्विवचने		बहुवचने		वा स्थिते विशेष्ये सति
२.	या	सा	ये	ते	याः	ताः	
३.	यया	सा	याभ्यां	ते	याभिः	ताः	
४.	यस्यै	सा	,,	ते	याभ्यः	ताः	
५.	यस्याः	सा	,,	ते	,,	,,	
६.	,,	,,	ययोस्ते		यासां	ताः	
७.	यस्यां	सा	,,	,,	यासु	ताः	

ख) स्त्रीलिङ्गस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते एकैकवचनान्ते द्वे पदे ततः समस्तशब्दस्यान्ते एकवचनं च पदं प्रयुज्यते -

१. प्रथमविधौ विग्रहे प्रयोज्ये द्वे पदे	समासान्तरं समस्तशब्दस्यान्तेऽन्यविशेष्यस्य विभक्तिवचननिर्देशनार्थं प्रयोज्यं पदम् -
२. यां सा -	ताम्

३. यया सा - तया, तस्यै, तस्याः, तस्याः, तस्याम्, ताम्, वा ।
४. यस्यै सा - तस्यै, तस्याः, तस्याः, तस्याम्, ताम्, तया, वा ।
५. यस्याः सा - तस्याः, तस्याः, तस्याम्, ताम्, तया, तस्यै, वा ।
६. ,, ,, - ,, तस्याम्, ताम्, तया, तस्यै, तस्याः, वा ।
७. यस्याम् सा - तस्याम्, ताम् तया, तस्यै, तस्याः तस्याः, वा

२. द्वितीयविधौ विग्रहे सापदस्योच्चारणं विना विग्रहस्यान्ते प्रयोज्ये एकैकवचनान्ते द्वे पदे -

२. याम् - ताम्
३. यया - तया, तस्यै, तस्याः, तस्याः, तस्याम्, ताम्, वा ।
४. यस्यै - तस्यै, तस्याः, तस्याः, तस्याम्, ताम्, तया, वा ।
५. यस्याः - तस्याः, तस्याः, तस्याम्, ताम्, तया, तस्यै, वा ।
६. ,, - ,, तस्याम्, ताम्, तया, तस्यै, तस्याः, वा ।
७. यस्याम् - तस्याम्, ताम् तया, तस्यै, तस्याः तस्याः, वा

ग) स्त्रीलिङ्गस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते द्विद्विवचने द्वे पदे ततः समस्तशब्दस्यान्ते द्विवचनान्तं चैकं पदं प्रयुज्यते -

१. प्रथमविधौ विग्रहे प्रयोज्ये द्वे पदे	समासानन्तरं प्रयोज्यं पदम्	२. द्वितीयविधौ विग्रहस्यान्ते प्रयोज्ये द्विद्विवचनान्ते द्वे पदे -
२. ये ते -	ते	ये - ते
३. याभ्याम् ते -	ताभ्याम्	याभ्याम् - ताभ्याम्
४. ,, ,, -	,,	,, ,,
५. ,, ,, -	,,	,, ,,
६. ययोस्ते -	तयोः	ययोः - तयोः

७. ,, ,, - ,,	,,	,,

घ) स्त्रीलिङ्गस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते बहुबहुवचने द्वे पदे ततः समस्तशब्दस्यान्ते बहुवचनान्तं चैकं पदं प्रयुज्यते -

१. प्रथमविधौ विग्रहे प्रयोज्ये द्वे पदे	समासान्तरं समस्तशब्दस्यान्तेऽन्यविशेष्यस्य विभक्तिवचननिर्देशनार्थं प्रयोज्यं पदम् -
२. याः ताः =	ताः

३. याभिः ताः = ताभिः, ताभ्यः, तासाम्, तासु, ताः वा ।
४. याभ्यः ताः = ताभ्यः ताभ्यः, तासाम्, तासु, ताः, ताभिः, वा ।
५. ,, ताः = ताभ्यः, तासाम्, तासु, ताः, ताभिः, ताभ्यः, वा ।
६. यासाम् ताः = तासाम्, तासु, ताः, ताभिः ताभ्यः, ताभ्यः, वा ।
७. यासु ताः = तासु, ताः, ताभिः, ताभ्यः, ताभ्यः, तासाम्, वा ।

२. द्वितीयविधौ विग्रहे ताःपदस्योच्चारणं विना विग्रहस्यान्ते प्रयोज्ये बहुबहुवचनान्ते द्वे पदे -

२. याः - ताः
३. याभिः - ताभिः, ताभ्यः, ताभ्यः, तासाम्, तासु, ताः, वा ।
४. याभ्यः - ताभ्यः, ताभ्यः, तासाम्, तासु, ताः, ताभिः, वा ।
५. ,, - ,, तासाम्, तासु, ताः, ताभिः, ताभ्यः, वा ।
६. यासाम् - तासाम्, तासु, ताः, ताभिः, ताभ्यः, ताभ्यः, वा ।
७. यासु - तासु ताः, ताभिः, ताभ्यः, ताभ्यः तासाम्, वा ।

१-३-क) नपुंसकलिङ्गस्यान्येविशेष्यस्यान्ते विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते प्रयोज्ये द्वे पदे -

	एकवचने		द्विवचने		बहुवचने		वा स्थिते विशेष्ये सति
२.	यत्	तत्	ये	ते	यानि	तानि	
३.	येन	तत्	याभ्याम्	ते	यैः	तानि	
४.	यस्मै	तत्	,,	,,	येभ्यः	तानि	
५.	यस्मात्	तत्	,,	,,	,,	,,	
६.	यस्य	तत्	ययोः	ते	येषाम्	तानि	
७.	यस्मिन्	तत्	,,	,,	येषु	तानि	

ख) नपुंसकस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते एकैकवचनान्ते द्वे पदे ततः समस्तशब्दस्यान्ते एकवचनान्तं चैकं पद प्रयुज्यते -

१. प्रथमविधौ विग्रहे प्रयोज्ये द्वे पदे	समासान्तरं समस्तशब्दस्यान्तेऽन्यविशेष्यस्य विभक्तिवचननिर्देशनार्थं प्रयोज्यं पदम् -
२. यत् तत् -	तत्

३. येन तत् - तेन, तस्मै, तस्मात्, तस्य, तस्मिन्, तत्, वा ।
४. यस्मै तत् - तस्मै, तस्मात्, तस्य, तस्मिन्, तत्, तेन वा ।
५. यस्मात् तत् - तस्मात्, तस्य, तस्मिन्, तत्, तेन, तस्मै वा ।

६. यस्य तत् - तस्य, तस्मिन्, तत्, तेन, तस्मै, तस्मात्, वा ।
७. यस्मिन् तत् - तस्मिन् तत्, तेन, तस्मै, तस्मात् तस्य वा ।

२. द्वितीयविधौ तत्पदस्योच्चारणं विना विग्रहस्यान्ते प्रयोज्ये एकैकवचनान्ते द्वे पदे -

२. यत् - तत्
३. येन - तेन, तस्मै, तस्मात्, तस्य, तस्मिन् तत् वा ।
४. यस्मै - तस्मै, तस्मात्, तस्य तस्मिन्, तत्, तेन वा ।
५. यस्मात् - तस्मात् तस्य तस्मिन्, तत् तेन तस्मै वा ।
६. यस्य - तस्य, तस्मिन्, तत्, तेन, तस्मै, तस्मात् वा ।
७. यस्मिन् - तस्मिन्, तत्, तेन, तस्मै, तस्मात्, तस्य वा ।

ग) नपुंसकस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते द्विद्विवचने द्वे पदे ततः समस्तशब्दस्यान्ते द्विवचनान्तं चैकं पदं प्रयुज्यते ।

१. प्रथमविधौ विग्रहे प्रयोज्ये द्वे पदे	समासानन्तरं प्रयोज्यं पदम्	२. द्वितीयविधौ विग्रहस्यान्ते प्रयोज्ये द्विद्विवचनान्ते द्वे पदे -
२. ये ते -	ते	ये - ते
३. याभ्यां ते -	ताभ्याम्	याभ्याम् - ताभ्याम्
४. ,, ,, -	,,	,, ,,
५. ,, ,, -	,,	,, ,,
६. येषां ते -	तेषाम्	येषाम् - तेषाम्
७. येषु ते -	तेषु	येषु - तेषु

घ) नपुंसकस्यान्यविशेष्यपदस्य विभक्तिवचननिर्देशनार्थं विग्रहस्यान्ते बहुबहुवचने द्वे पदे ततः समस्तशब्दस्यान्ते बहुवचनान्तं चैकं पदं प्रयुज्यते ।

१. प्रथमविधौ विग्रहे प्रयोज्य द्वे पदे	समासान्तरं समस्तशब्दस्यान्तेऽन्यविशेष्यस्य विभक्तिवचननिर्देशनार्थं प्रयोज्यं पदम् -
२. यानि तानि -	तानि

३. यैः तानि - तैः, तेभ्यः, तेभ्यः, तेषाम् तेषु तानि वा ।
४. येभ्यः तानि - तेभ्यः, तेभ्यः, तेषाम्, तेषु, तानि, तैः, वा ।
५. ,, ,, - ,, तेषाम्, तेषु, तानि, तैः, तेभ्यः, वा ।
६. येषाम् तानि - तेषाम्, तेषु, तानि, तैः, तेभ्यः, तेभ्यः, वा ।
७. येषु तानि - तेषु तानि तैः तेभ्यः तेभ्यः तेषाम् वा ।

२. द्वितीयविधौ तानिपदस्य प्रयोगं विना विग्रहस्यान्ते प्रयोज्ये बहुबहुवचनान्ते द्वे पदे -

२. यानि - तानि
३. यैः - तैः, तेभ्यः, तेभ्यः, तेषाम् तेषु, तानि, वा ।
४. येभ्यः - तेभ्यः, तेभ्यः, तेषाम्, तेषु तानि, तैः, वा ।
५. ,, - ,, तेषाम्, तेषु, तानि, तैः तेभ्यः, वा ।

६. येषाम् - तेषाम्, तेषु, तानि, तैः, तेभ्यः, तेभ्यः, वा ।
७. येषु - तेषु, तानि, तैः, तेभ्यः, तेभ्यः, तेषाम् वा ।

६-४-२ विग्रहे विशेषणविशेष्ययोरुपस्थितिः

बहुव्रीहिसमासे ययोः पदयोः येषां पदानां वा विग्रहः क्रियते । तयोः पदयोस्तेषां पदानां वा क्रमे पूर्वे विशेषणमुत्तरे विशेष्यं च प्रयुज्येते । तयोः पदयोः समासेन निष्पन्नः समस्तशब्दोऽन्यविशेष्यस्य विशेषतां बोधयति द्योतयति वा । यतः समस्तशब्दो विशेषणं भवति । ततस्तद्विशेषणं सदा विशेष्यस्य लिङ्गविभक्तिवचनानुसारं प्रयुज्यते । विग्रहस्यान्ते समासानन्तरं च विशेष्यस्य लिङ्गविभक्तिवचननिर्देशनार्थं प्रयोज्यानि यत्तदोः स्वरूपाणि इतः पूर्वं प्रदर्शितानि । विशेष्यशब्देन सदा नामशब्दो बोध्यते ।

स्मरणीयं यत् समसनीययोः पदयोः समसनीयानां पदानां वा मध्ये समसनीयो विशेष्यशब्द एकपदार्थबोधकोऽस्ति चेत् एकवचने द्विपदार्थबोधकोऽस्ति चेत् द्विवचनेऽधिकपदार्थबोधकोऽस्ति चेत् बहुवचने च प्रयुज्यते । विशेषणं तु विशेष्यानुसारं प्रयुज्यते । अत्रापि विग्रहे एकवचने द्विवचने बहुवचने वा प्रयुक्तयोःपदयोः प्रयुक्तानां पदानां वा सम्बन्धो यत्तदोः शब्दयोर्वचनेन सह न भवति। अनयोः पदयोः प्रयुक्तस्य वचनस्य सम्बन्धोऽन्यविशेष्यपदस्य प्रथमाद्वितीयादिविभक्ति वचनेन सह भवति । प्रथमाद्वितीयादिविभक्तिवचनेषु मध्ये यस्मिन्वचने स्थितस्यान्यविशेष्यस्य विशेषणस्य समासः क्रियते । तस्य समस्तशब्दस्यान्ते वचनमानेतुं तस्यैवान्यविशेष्यस्य वचनानुरूपं तच्छब्दस्य रूपं प्रयुज्यते । अधो विग्रहवाक्यानि उदाह्रियन्ते । संख्यया विभक्तिर्ज्ञेया -

क) १. एकस्मिन्वृक्षे एको वानरोऽस्ति चेत् - आरूढो वानरो यं सः = आरुढवानरो वृक्षः = अयं शब्दः पुंल्लिङ्गोऽस्ति । यतोऽयमन्तिमः स इति शब्दो वृक्षस्य लिङ्गविभक्तिवचनानुसारं प्रयुक्तोऽस्ति । समस्तशब्दो वृक्षस्य वचनानुसारं वर्तते । स्त्रियां सा क्लीबे तत् च प्रयुज्यते ।

एकस्मिन्वृक्षे द्वौ वानरौ स्तश्चेत् - आरूढौ वानारौ यं सः = आरूढवानरो वृक्षः ।

एकस्मिन्वृक्षे बहवो वानराः सन्ति चेत् - आरूढा वानाराः यं सः = आरूढावानरो वृक्षः । एवं सर्वत्र बोध्यम् ।

द्वयोर्वृक्षयोरेकैको वानरोऽस्ति चेत् - आरूढौ वानरौ यौ तौ = आरूढवानरौ वृक्षौ ।

द्वयोर्वृक्षयोरनेका वानराः सन्ति चेत् - आरूढा वानरा यौ तौ = आरूढवानरौ वृक्षौ

बहुषु वृक्षेषु वानराः सन्तिं चेत् - आरूढा वानरा यान्ते = आरूढवानरा वृक्षाः ।

३. दत्तं चित्तं येन सः = दत्तचित्तः ।
दत्तं चित्तं याभ्यां तौ = दत्तचित्तौ
दत्तं चित्तं यैस्ते = दत्तचित्ताः ।
अभ्यस्ता विद्या येन सः = अभ्यस्तविद्यः ।
" " याभ्यां तौ = अभ्यस्तविद्यौ
" " यैस्ते = अभ्यस्तविद्याः

जितानि इन्द्रियाणि येन सः = जितेन्द्रियः ।
जितानि इन्द्रियाणि याभ्यां तौ = जितेन्द्रियौ ।
जितानि इन्द्रियाणि यैस्ते = जितेन्द्रियाः ।

एवं प्राप्तविद्यश्छात्रः । प्राप्तविद्यौ छात्रौ । प्राप्तविद्याश्छात्राः ।

४. दत्तं द्रव्यं यस्मै सः = दत्तद्रव्यः । दत्तं द्रव्यं याभ्यां तौ = दत्तद्रव्यौ । दत्तं द्रव्यं येभ्यस्ते = दत्तद्रव्याः ।

५. उद्धृतमोदनं यस्याः सा = उद्धृतौदना थाली । निर्गतं (नष्टं) बलं यस्याः सा = निर्बला नारी, निर्गतं बलं यस्मात्सः = निर्बलः पुरुषः ।

६. पीतमम्बरं यस्य सः, पीते अम्वरे यस्य सः, पीतानि अम्बराणि यस्य सः वा = पीताम्बरः विष्णुः पीतवस्त्रधारी जनः, कस्यापि जनस्य नाम वा ।

७. बीराः पुरुषा यस्मिन्सः = वीरपुरुषको ग्रामः । एते समानाधिकरणे निष्पन्ना दर्शिताः । समानाधिकरणे एकविभक्तिवचने स्थिते समसनीये पदे विग्रहे गृह्येते । असमानाधिकरणे तु - समानविभक्तिवचने स्थिते पदे न भवतः - निवारमुष्टेः पचनं यैस्ते = निवारमुष्टिपचनाः ।

ख) योऽसौ - विग्रहे यत्तच्छब्दवत् यददःशब्दावपि प्रयुज्येते । यथा - प्रकृष्टा अंशवो यस्यासौ = प्रांशुः - रघुवं. १।९ सुधाटीका । हुतमशनं यस्यासौ = हुताशनः - रघुवं. ४।१ सुधाटीका । वृषा अश्वो यस्यासौ - वृषणश्वः ।

६-४-३ बहुब्रीहौ नवविधाःसमासाः

अत्र समासे समानाधिकरणबहुब्रीहिः, नञ्पूर्वपदबहुब्रीहिः, व्यधिकरणबहुब्रीहिः, उपमानबहुब्रीहिः, संख्योत्तरपदबहुब्रीहिः, संख्योभयपदबहुब्रीहिः, दिगन्तरालबहुब्रीहिः, व्यतिहारबहुब्रीहि सहपूर्वपदबहुब्रीहिश्चैते नवधा समासाः परिगण्यन्ते ।

६-४-३-१ समानाधिकरणबहुब्रीहिः

शेषो बहुब्रीहिः २।२।२३॥

द्वन्द्वसमासात्प्रागयमधिकारः । द्वितीया श्रितातीत. इत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः ।

अनेक[1]मन्यपदार्थे २।२।२४॥

अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुब्रीहिः । इत ऊर्ध्वं यस्य येन विशेषसूत्रेण समासो विधीयते । तत्सूत्रं विहायावशिष्टसमासोऽनेन सूत्रेण क्रियते ।

---
[1] अनेकम् = बहु अधिकं वा ।

सप्तमीविशेषणे बहुव्रीहौ २।२।३५॥

सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात् । समानाधिकरणबहुव्रीहौ विग्रहे समसनीयं विशेषणं विशेष्यं चोभे पदे प्रथमान्ते प्रयुज्येते । अस्य समासस्य द्वितीयादि-समानाधिकरणबहुव्रीह्यादयः षट् भेदाः सन्ति । तेषां क्रमः । २. प्राप्तमुदकं यं स इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि सप्तमीविशेषणे बहुव्रीहाविति सूत्रेण विशेषणस्य पूर्वप्रयोगे प्रातिपदिकत्वात्सुबुत्पत्तिः - प्राप्तोदको ग्रामः । आरूढो वानरो यं सः = आरूढवानरो वृक्षः । ३. दत्तं चित्तं येन सः = दत्तचित्तो जनः, शिष्यः, भक्तो वा । जितानि इन्द्रियाणि येन सः = जितेन्द्रियः । जितमासनं[1] येन सः = जितासनः । उपात्ता (प्राप्ता) विद्या येन सः = उपात्तविद्यः । एवं लब्धविद्यः, प्राप्तविद्यः अधीतविद्यः । दृढमतिः । लब्धकीर्तिः । दृढमतिः, दृढबुद्धिः - एषु स्थितस्य विशेषणस्य दीर्घस्य[2] स्त्रियाः पुंवद्भाषित. इति सूत्रेण पुंवद्भावेन ह्रस्वेऽन्ते स्थितस्य विशेष्यस्य दीर्घस्य गोस्त्रियोरिति सूत्रेण[3] ह्रस्वेन पुंस्त्वं जायते । ऊढो रथो येन सः = ऊढरथोऽनड्वान् । ४. उपहृतः पशुः, यस्मै सः = उपहृतपशुः रुद्रः । दत्तं धनं यस्मै सः = दत्तधनो ब्राह्मणः गुरुर्वा । दत्तानि द्रव्याणि यस्मै सः = दत्तद्रव्यो जनः । ५. उद्धृतमोदनं यस्याः सा = उद्धृतौदना स्थाली । निर्गतं (नष्टं) बलं यस्मात्सः = निर्बलो नरः, यस्याः सा = नारी । निर्गतं (नष्टं) धनं यस्मात्सः = निर्धनः पुरुषः । निर्गतं धनं यस्याः सा = निर्धना व्यक्तिर्नारी वा । ६. पीतमम्बरं यस्य सः = पीताम्बरो हरिः सन्न्यासी कस्यचिन्नाम वा । मङ्गलमायतनं यस्य सः = मङ्गलायतनो हरिः। शान्तिः प्रिया यासां ताः = शान्तिप्रिया जनताः । चत्वारि आननानि यस्य सः = चतुराननो चतुर्मुखः = ब्रह्मा । त्रीणि अम्बकानि (नेत्राणि) यस्य सः = त्र्यम्बकः त्रिनेत्रः = शिवः । लम्बौ कर्णौ यस्य सः = लम्बकर्णः, दीर्घकर्णः । सुन्दरौ (शोभनौ) कपोलौ यस्य सः = सुकपोलः - यस्याः सा = सुकपोला। उच्छ्रितौ (उन्नतौ) बाहू यस्य सः = उद्बाहूर्नरः यस्याः सा = उद्बाह्वी उद्बाहूर्वा नारी, उच्छ्रितस्य स्थाने उद् प्रयुज्यते । दश आननानि यस्य सः = दशाननः दशमुखः = रावणः । राजीवे लोचने यस्य सः = राजीवलोचनो रामः । महान् आत्मा यस्य सः = महात्मा - आन्महतः समानाधिकरणयोरित्यात्वम् । ७. वीराः पुरुषाः यस्मिन्सः = वीरपुरुषको ग्रामः । समृद्धाः पुरुषा येषु तानि = समृद्धपुरुषाणि नगराणि । इत्यादि ।

ख) अनेकपदानां समासः - सु सूक्ष्मा जटाःकेशा यस्य सः = सुसूक्ष्मजटाकेशः । सुलभमजिनं वासो यस्य सः = सुलभाजिनवासाः । अधिकमुज्वलमङ्गं यस्य सः = अधिकोज्वलाङ्गो जनः । प्रयतः परिग्रहो द्वितीयो यस्य सः = प्रयतपरिग्रहद्वितीयः । चित्रा जरती गौरस्येति = चित्राजरतीगुः, जरतीचित्रागुः - गोस्त्रियोरिति सूत्रेण ह्रस्वेन गुः ।

ग) द्वे प्रथमान्ते समसनीये पदेऽनेकानि प्रथान्तानि पदानि वा एकलिङ्गानि भवन्तीति न नियमः। यथा - लघुपतनक इति नाम, लघुपतनको नाम वा यस्य सः = लघुपतनकनामा । एवं जरद्गवनामा। हिरण्यकनामा । चन्द्र इव मुखं यस्य सः = चन्द्रमुखः - यस्याः साः = चन्द्रमुखी । कल्याणी प्रधानं यस्य सः = कल्याणीप्रधानः । आकृतिर्ग्रहणं यस्याः सा = आकृतिग्रहणा जातिः ।

---

१ विग्रहे उत्तरे स्थितो नपुंसकलिङ्गशब्दोऽस्तिचेत्समासानन्तरं स समस्तशब्दोऽन्यविशेष्यस्य लिङ्गविभक्तिवचनानुसारमेव प्रयुज्यते।

२ दीर्घे आ ई ऊ ॠ ए ओ ऐ औ एते स्वराः प्रोच्यन्ते ।

३ अनेन सूत्रेण गोशब्दस्य गोरोकारस्य ह्रस्वे गुः । आप् ङीप् ङीष् ऊङन्तानां शब्दानां क्रमशो ह्रस्वविधानेन अः, इः, इः, उश्च जायते।

घ) स्त्रीवाचकविशेषणस्य पुंवद्भावप्रसङ्ग - स्त्रियाः पुंवद्भाषितपुंस्कद्. इति सूत्रं तत्पुरुषे समानाधिकरणप्रसङ्गे समुल्लिखितम् । चित्रा गावो यस्य स इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि स्त्रियाः पुवद्भाषित. इति सूत्रेण पुंवद्भावेन टापो निवृत्तौ गोस्त्रियोरिति सूत्रेण गोर्ह्रस्वे चित्रगु इति जाते प्रातिपदिकत्वात्सुबुत्पत्तौ - चित्रगुश्चैत्रः । एवं रूपवती भार्या यस्य स इति विग्रहे समासे प्रातिपदिकत्वात्सुब्लुकि पुंवद्भावे ङीपो निवृत्तौ - रूपवद्भार्यः । अभाषितपुंस्कत्वान्नेह - भाषितपुंस्कशब्देन उभयलिङ्गी शब्दो ज्ञेयः । गङ्गा भार्या यस्य सः = अत्र गङ्गाशब्द उभयलिङ्गी नास्ति । तेन गङ्गाया आकारस्य स्त्रियाः पुंवद्भाषित. इति सूत्रेण ह्रस्वो नास्ति गङ्गाभार्यः । ऊङन्तत्वाभावान्नेह - वामौ (सुन्दरौ) ऊरू भार्या यस्य सः = वामोरुभार्यः । गोस्त्रियोरिति सूत्रेण ह्रस्वः । अयमनेकपदबहुब्रीहिः । स्त्रीत्वपरत्वाभावात्पुंवद्भावो नेहः - कल्याणी प्रधानं यस्य सः = कल्याणीप्रधानः । प्रियादिपरत्वात्पुंवद्भावो नेह - कल्याणी प्रिया यस्य सः = कल्याणीप्रियः । पूरणप्रत्ययान्तपदे परे - कल्याणी पञ्चमी यासां रात्रीणां ता इति विग्रहे अनेकमन्यपदार्थे इत्यनेन सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि पुंवत्कर्मधारय इति सूत्रेण पुंवद्भावेऽसति -

अप्पूरणीप्रमाण्योः ५।४।११६॥

पूरणप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुब्रीहेरप् स्यात् । इत्यनेन अप्प्रत्यये यस्येति चेति सूत्रेण इकारलोपे प्रातिपदिकसंज्ञायां सुबादिः - कल्याणीपञ्चमा रात्रयः । एवं स्त्री प्रमाणी यस्य सः - स्त्रीप्रमाणः । **सामान्ये नपुंसकम्-वा.**-अनेन वार्तिकेन सामान्यनपुंसकविवक्षायां सामान्यनपुंसकेन शब्देन सह समासः - दृढं भक्तिर्यस्य सा - दृढभक्तिः । स्त्रीत्वविवक्षायां तु दृढा भक्तिर्यस्य सः = दृढाभक्तिः - प्रियादिपरेषु स्त्रीलिङ्गीभूतस्य विशेषणस्य शब्दस्य तु ह्रस्वो न ।

तसिलादिष्वाकृत्वसुचः ६।३।३५॥

तसिलादिषु कृत्वसुजन्तेषु परेषु स्त्रियाः पुंवत्स्यात् । तसिलादिष्वपि परिगणनं कर्तव्यम् । त्रतसौ । तरप्तमपौ । चरट्जातीयरौ । कल्पब्देशीयरौ । रूपप्पाशपौ । थाल् । तिल्थ्यनौ - वा - तसिलादिष्वाकृत्वसुच इत्यनेन सूत्रेण व्युत्पत्तौ प्रदर्शितस्य स्त्रीलिङ्गीभूतस्य विशेषणस्य पुंवद्भावेन टाप्-ङीप्-ङीषादीनां निवृत्तौ सत्यां शब्दः पुँल्लिङ्गो भवति । यथा - त्रतसौ - बह्वीषु इति बहुत्र । बह्वीभ्य इति बहुतः । तरप्तमपौ - अतिशयेन दर्शनीया = दर्शनीयतरा, दर्शनीयतमा, रम्यतरा रम्यतमा । अतिशयेन पट्वी = तसिलादिषु इति सूत्रेण परत्वादपि प्राप्तं पुंवद्भावं घरूपचेलड्. इति वक्ष्यमाणेन सूत्रेण प्रबाध्यानेनैव सूत्रेण ह्रस्वः- पट्वितरा पट्वितमा । एवं लघ्वितरा लघ्वितमा । साध्वितरा साध्वितमा । मृद्वितरा मृद्वितमा । बिम्बितरा बिम्बितमा । चरट् जातीयरौ = भूतपूर्वा पट्वी = पटुकल्पा, प्रभातकल्पा पटुदेशीया । रूपप्याशपौ प्रशस्ता पट्वी = पट्विरूपा-अत्रापि घरूपचेलड्. इति सूत्रेण ह्रस्वः । अनेन सूत्रेण ये बहु प्रभु गुरु ऋजु भीरु चारु आदि भाषितपुँस्काज्जाता ङी-अन्ताश्च शब्दास्तेभ्यस्तरप्तमप्कल्पप्रूपब्सु प्रत्ययेषु परेषु ह्रस्वः । कुत्सिता दर्शनीया = दर्शनीयपाशा । थाल् - बह्वीनां प्रकारेण = बहुथा । तिल्थ्यनौ - प्रशस्ता वृकी = वृकतिः । अजाभ्यो हिता = थ्यन् = अजथ्या । **शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः-वा.**-बह्वीभ्यो देहि = बहुशः । अल्पाभ्यो देहि = अल्पशः । **त्वतलोर्गुणवचनस्य-वा.**-पुंस्त्वं स्यात् । शुक्लाया भावः = शुक्लत्वम्, शुक्लता । मधुराया भावः = मधुरत्वम् मधुरता । मृद्व्या भावः = मृदुत्वम् मृदुता । गुणवचनस्येत्युक्तेर्नेह - कर्त्र्या भावः =

कर्त्रीत्वम् कर्त्रीता । **भस्याढे तद्धिते-वा.**-ढभिन्ने तद्धिते परे स्त्रियाः पुंस्त्वं वक्तयमित्यर्थः । हस्तीनां समूहः = हास्तिकम् । अढे किम् - रौहिणेयः । **ठक्छसोश्च-वा.**-अनयोः परयोः स्त्रियां पुंवत् स्यात् । भवत्याश्छात्राः = भावत्काः - ठस्येकं बधित्वा तान्तलक्षणः कादेशः । भवत्या इमे-छस् = भवदीयाः । **सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः-वा.**-सर्वासु-सर्वतः । तस्या भावः = तत्ता । तस्या इमे = तदीयाः । परासु - परतः । **कुक्कुटचादीनामण्डादिषु-वा.**-कुक्कुटचा अण्डम् = कुक्कुटाण्डम् । मृग्याः पदम् = मृगपदम् । मृगाक्षी । मृगक्षीरम् । काक्याः शावः = काकशावः । एवमन्ये चिन्त्याः ।

क्यङ्मानिनोश्च ६।३।३६॥

एतयोः परतः स्त्रियाः पुंवत्स्यात् । एनीवाचरतीत्यत्र एताशब्दात् वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रेण वैकल्पिके ङीपि तकारस्य नत्वे एनी इति जाते तस्मादुपमानवाचकशब्दादाचारार्थे कर्तुः क्यङ् सलोपश्चेति सूत्रेण क्यङि सुपो धातु. इति सुब्लुकि क्यङ्मानिनोरिति सूत्रेण पुंवद्भावः ङीब्नत्वनिवृत्तौ अकृत्सार्वधातुकयोरिति सूत्रेण दीर्घे लटि तङादिकार्ये - एतायते । स्वभिन्नां काञ्चिद्दर्शनीयां स्त्रियं मन्यत इति विग्रहे मन्धातो मनश्चेति सूत्रेण णिनि उपपदसमासे प्रातिपदिकसंज्ञायां सुपो लुकि ऋन्नेभ्यो ङीप् इति सूत्रेण ङीपि अनेन सूत्रेण पुंवद्भावे (ङीपष्टापश्च निवृत्तौ) प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - दर्शनीयमानिनी । पुंवद्भावविधिसमाप्तः ।

ङ) स्त्रीलिङ्गीभूतस्य विशेषणस्य पुंवद्भावनिषेधप्रसङ्गः

न कोपधायाः ६।३।३७॥

ककारोपधस्य स्त्रिया न पुंवत् स्यात् । पाचिका भार्या यस्य सः - इति विग्रहे समासे प्रातिपदिकसंज्ञायां सुब्लुकि स्त्रियाः पुंवद्भाषित. इति सूत्रेण पुंवद्भावे प्राप्तेऽनेन सूत्रेण निषेधे प्रातिपदिकत्वात्सुबादिः - पाचिकाभार्यः । एवं रसिकाभार्यः ।

संज्ञापूरण्योश्च ३।६।३८॥

अनयोः स्त्रिया न पुंवत् । दत्ता भार्या यस्य स इति विग्रहे समासे प्रातिपदिकत्वात्सुब्लुकि स्त्रियाः पुंवद्भाषित. इति सूत्रेण पुंवद्भावे प्राप्तेऽनेन सूत्रेण पुंवद्भावनिषेधे प्रातिपदिकत्वात्सुबादिः - दत्ताभार्यः । एवं पञ्चमीभार्यः ।

वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ६।३।३९॥

वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्तः स्त्रीवाचकशब्दो न पुंवत् स्यात् । सौध्नी भार्या यस्य सः - सौध्नीभार्यः । एवं माथुरीयते । माथुरीमानिनी । वृद्धिनिमित्तस्य किम् - मध्यमभार्यः । तद्धिते शब्दस्यादिवृद्धिः क्रियते । अत्रादिवृद्धिर्नास्ति । रक्ते तु - काषायेण रक्तम् - काषायी कन्था यस्य सः - काषायकन्थः । अत्र पूर्वपदस्य पुंवद्भावः परपदस्य ह्रस्वश्च । विकारे तु - हेम्नो विकारः = हैमी मुद्रिका यस्य सः - हैममुद्रिकः । अत्र पूर्वपदस्य पुंवद्भावः परपदस्य ह्रस्वश्च ।

स्वाङ्गाच्चेतः ६।३।४०॥

स्वाङ्गाद्य ईकारस्तदन्ता स्त्री न नपुंवत् स्यात् । सुकेशी भार्या यस्य सः - सुकेशीभार्यः । स्वाङ्गात्किम् - पटुभार्यः । पटोस्तु स्वाङ्गाभावान्न पुंवद्भावः । इतः किम् - अकेशा भार्या यस्य सः - अकेशभार्यः । अत्र पूर्वपदस्य पुंवद्भावः परपदस्य ह्रस्वश्च ।

जातेश्च ६।३।४१॥

जातेः परो यः स्त्रीप्रत्ययस्तदन्त न पुंवत् । ब्राह्मणी भार्या यस्य सः = ब्राह्मणीभार्यः । क्षत्रियाभार्यः । वैश्याभार्यः । शूद्राभार्यः । बहुब्रीहौ न पुंवत् ।

स्त्रीवाचकविशेषणस्य पुंवद्भावनिषेधप्रसङ्गः समाप्तः ।

बहुब्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ५।४।११३॥

व्यत्ययेन षष्ठी । स्वाङ्गवाचिनः सक्थ्यक्षिशब्दान्ताद् बहुब्रीहौ षच् स्यात् । दीर्घे सक्थिनी (ऊरू) यस्य सः - दीर्घसक्थः । स्थूले सक्थिनी यस्य सः = स्थूलसक्थः । विशाले अक्षिणी यस्य सः = विशालाक्षः । रक्ताक्षः । वर्तुलाक्षः । सुन्दराक्षः । इन्दिराक्षः । षित्वात्स्त्रियां षिद्गौरादिभ्यश्चेति सूत्रेण ङीषि कृते - दीर्घसक्थी । स्थूलसक्थी । विशालाक्षी । दीर्घाक्षी । रक्ताक्षी । वर्तुलाक्षी । सुन्दराक्षीः । इन्दिराक्षी । सक्थ्यक्ष्णोरिकारस्य लोपो यस्येति चेति सूत्रेण भवति । सक्थ्यक्ष्णोविग्रहे द्विवचनान्तो गृह्यते ।

(विशेषः - उपसर्गपूर्वकाणां स्वाङ्गवाचिनां नासिकोदरोष्ठजङ्घादत्तकर्णशृङ्गाणामङ्गगात्रकण्ठानां च शब्दानां समासेऽकारान्तः । प्रादिसमातत्पुरुषसे - केशानतिक्रान्तः - अतिकेशः । बहुब्रीहिसमासे - कुटिला केशा यस्य सः = कुटिलकेशः । तुङ्गा नासिका यस्य सः = तुङ्गनासिकः । कृशमुदरं यस्य सः - कृशोदरः । वृकस्योदरमिव उदरं यस्य सः = वृकोदरः । विम्बाविव ओष्ठौ यस्य सः - विम्बौष्ठः । जानु-जङ्घानेत्र-कर्ण-कपोल-हस्त-पादशब्दानां विग्रहे द्विवचनान्तो विधेयः - दीर्घे जङ्घे यस्य सः = दीर्घजङ्घः । समा दन्ता यस्य सः = समदन्तः । चारू कर्णौ यस्य सः = चारुकर्णः । तीक्ष्णौ शृङ्गौ यस्य सः = तीक्ष्णशृङ्गः । मृदु गात्रं यस्य सः = मृदुगात्रः । कम्बुरिव कण्ठो यस्य सः = कम्बुकण्ठः । शोभनः पुच्छो यस्य सः = सुपुच्छः । इति पुंसि । स्त्रियां त्वाकारान्ता ईकारान्ताश्च भवन्ति -

स्वाङ्गाच्चोपर्सजनादसंयोगोपधात् ४।१।५४॥

असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तात् वा ङीष् । इति सूत्रेण वैकल्पिके ङीषि कृते इकारान्ता ङीषोऽभावपक्षे टापि कृते आकारान्ताः । प्रादितत्पुरुषसमासेः - केशानतिक्रान्ता = अतिकेशी-शा । शब्दयोर्विग्रहोऽग्रे गतः । स्त्रियां तु - यस्याः सा = कुटिलकेशी-शा ।

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ४।१।५५॥

एभ्यो वा ङीष् स्यात् । वापक्षे ङीषि कृते ईकारान्ता ङीषोऽभावे टापि कृते चाऽऽकारान्ता ज्ञेयाः । यस्याः सा = तुङ्गनासिकी-का । यस्याः सा = कृशोदरी-रा । एवं वृकोदरी-रा । विम्बौष्ठी-ष्ठा । दीर्घजङ्घी-ङ्घा । समदन्ती-दन्ता । चारुकर्णी-र्णा । तीक्ष्णशृङ्गी-ङ्गा । **अङ्गगात्रकण्ठेभ्यो वक्तव्यम्-वा.**-पक्षे ङीप् विपक्षे टाप् । शोभनमङ्गं यस्य सः = शोभनाङ्गः - यस्या सा = शोभनाङ्गी-ङ्गा । कोमलाङ्गी-ङ्गा ।

वामाङ्गी-ङ्गा । मृदुगात्री-त्रा । कम्बुकण्ठी-ण्ठा । **पुच्छाच्च-वा.**-पक्षे ङीष् विपक्षे टाप् । शोभनो पुच्छो यस्याः सा = सुपुच्छी-च्छा । अन्येऽङ्गवाचिनस्तु पुंसि अकारान्ताः स्त्रियामाकारान्ताश्च बोध्याः - चारुदेहः-हा । स्थूलशरीरः-रा । विस्तृतालकः-का । कुन्ददशनः-ना । इत्यादि ।

अङ्गुलेर्दारुणि ५।४।११४॥

अङ्गुल्यन्ताद्बहुब्रीहेः षच् स्यात् दारुण्यर्थे । पञ्च अङ्गुलयो यस्य तत् = पञ्चाङ्गुलं दारु । अङ्गुलिसदृशावयवो धान्यादिविक्षेपणकाष्ठम् ।

द्वित्रिभ्यां षो मूर्ध्नः ५।४।११५॥

आभ्यां मूर्ध्नः षः स्यात् बहुब्रीहौ । द्वौ मूर्धानौ यस्य सः = द्विमूर्धः । त्रयो मूर्धानो यस्य सः = त्रिमूर्धः । आभ्यां भिन्ने तु - चतुर्मूर्धा = ब्रह्मा । षण्मूर्धा-कार्तिकेयः । दशमूर्धा रावणः । मूर्धा नकारान्तः - मूर्धन् ।

अन्तर्बहिर्भ्यां च लोम्नः ५।४।११७॥

आभ्यां लोम्नोऽप् स्याद् बहुब्रीहौ । अन्तर्लोमानि यस्य सः = अन्तर्लोमः । बहिर्लोमानि यस्य सः = बहिर्लोमः । उभयोः नस्तद्धिते इति सूत्रेण टेरनो लोपः ।

अञ् नासिकायाःसंज्ञायां नसं चास्थूलात् ५।४।११८॥

नासिकान्ताद्बहुब्रीहेरच् स्यात् नासिकाशब्दस्य नसं प्राप्नोति न तु स्थूलपूर्वात् ।

पूर्वपदात्संज्ञायामगः ८।४।३॥

पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने । द्रुरिव नासिका अस्य = द्रुणसः । अत्र सप्तम्युमानपूर्वपदस्येति वार्तिकेनोपमानसमासः । **खुरखराभ्यां वा नस्-वा.**-खुरणाः खरणाः । अत्वसन्तस्येति दीर्घः । पक्षेऽजपीष्यते - खुरणसः । खरणसः ।

उपसर्गाच्च ५।४।११९॥

प्रादेर्यो नासिकाशब्दस्तदन्ताद्बहुब्रीहेरच् स्यात् नासिकाया नसादेशश्च । असंज्ञार्थं वचनम् - उन्नता नासिका यस्य सः = उन्नसः । प्रकृष्टा नासिका यस्य सः = प्रणसः ।

नित्यमसिच् प्रजामेधयोः ५।४।१२२॥

नञ्सुदुःभ्यः परौ प्रजामेधाशब्दौ तदन्ताद्बहुब्रीहेर्नित्यमसिच्प्रत्ययः स्यात् । अविद्यमाना प्रजा यस्य सः = अप्रजाः । दुर्गता प्रजा यस्य सः = दुष्प्रजाः । प्रादिभ्यो धातुजस्येति समास उत्तरलोपश्च । उदुपधस्येति षत्वम् । सुष्ठु = शोभना = (सु) प्रजा यस्य सः = सुप्रजाः । दुष्ठुः = दुर् । सुष्ठु = सु । एवममेधाः एषाम् अत्वसन्तस्येति दीर्घः ।

धर्मादनिच् केवलात् ५।४।१२४॥

केवलात्पूर्वपदात्परो धर्मशब्दस्तदन्ताद्बहुब्रीहेरनिच् स्यात् । कल्याणो धर्मो यस्य सः = कल्याणधर्मा । एवं निवृत्तिधर्मा । प्रियधर्मा । समानधर्मा इत्यादि । सह धर्मो सस्य सः = तेन सहेति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि वोपसर्जनस्येति सूत्रेण सहस्य स्थाने सादेशे = सधर्मा । साभावे = सहधर्मा । सनातनधर्मः । परमः स्वो धर्मो यस्येति त्रिपदबहुब्रीहौ मा भूत् । धर्मशब्दो नान्तोऽप्यस्ति ।

प्रसंभ्यां जानुनोर्ज्ञुः ५।४।१२९॥

आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्यात् बहुब्रीहौ । प्रगते जानुनी यस्य सः = प्रज्ञुः । संहते जानुनी यस्य सः = संज्ञुः ।

ऊर्ध्वाद्विभाषा ५।४।१३०॥

ऊर्ध्वात्परस्य जानुशब्दस्य वा ज्ञुरादेशः स्यात् बहुब्रीहौ । ऊर्ध्वे जानुनी यस्य सः = ऊर्ध्वज्ञुः, ऊर्ध्वजानुः ।

धनुषश्च ५।४।१३२॥

धनुरन्तस्य बहुब्रीहेरनङादेशः स्यात् । शार्ङ्गं (शृङ्गस्येदम्) धनुर्यस्य सः = अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण धनुषो षस्य स्थाने अनङादेशे यणि शार्ङ्गधन्वन् इति जाते प्रातिपदिकसंज्ञायां तस्मात्सुवुत्पत्तिः = शार्ङ्गधन्वा । एवं पुष्पधन्वा, अधिज्यधन्वा । गाण्डीवधन्वा इत्यादि ।

वा संज्ञायाम् ५।४।१३३॥

धनुरन्तस्य बहुब्रीहेर्वाऽनङादेशः स्यात्संज्ञायाम् । शतं धनुर्यस्य सः = शतधन्वा । अनङभावे - शतधनुः ।

जायाया निङ् ५।४।१३४॥

जायान्तस्य बहुब्रीहेर्निङादेशः स्यात् ।

लोपो व्योर्वलि ६।१।६६॥

वकारयकारयोर्लोपः स्यात् वलि परे । युवतिर्जाया यस्य स इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि युवतिशब्दस्य पुंवद्भावे तिप्रत्ययनिवृत्तौ युवजाया इति जाते जायाशब्दस्याकारस्थाने निङादेशे लोपो व्योर्वलीति सूत्रेण यकारलोपे प्रातिपदिकत्वात्स्वादिकार्ये- युवजानिः । जानकी जाया यस्य = जानकीजानी-अत्र जानक्याः पुंवद्भावो न भाषितपुंस्कत्वाभावात् । वृद्धजानिः ।

गन्धस्येदुत्पूति-सु-सुरभिभ्यः ५।४।१३५॥

एभ्यः परस्य गन्धशब्दस्य समासान्त इकारादेशः स्यात् बहुव्रीहौ । उद्गतो गन्धो यस्य सः = उद्गन्धिः । धकारान्तस्य इत्वम् । पूति(असुरभिः)र्गन्धो यस्य सः = पूतिगन्धिः । शोभनो(सु)गन्धो यस्य सः = सुगन्धिः । सुरभिर्गन्धो यस्य सः = सुरभिगन्धिः । एभ्यो भिन्नशब्दात्परस्य गन्धशब्दस्यान्ते नेत्वम्-तीव्रगन्धो वायुः । **गन्धस्येत्वे तदेकान्तग्रहणम्-वा**.-एकान्त इति एकदेशवदविभक्तस्य बोधकः - शोभनो (सु) गन्धो यस्य तत् - सुगन्धि पुष्पं जलं वा । नेह - शोभना गन्धा (गन्धवद्द्रव्याणि) यास्मिन्सः = सुगन्धः आपणः ।

संख्यासुपूर्वस्य ५।४।१४०॥

संख्यासुपूर्वस्य पादस्य समासान्तो लोपः स्यात् बहुव्रीहौ । समासान्तेन लोपेन पदस्यान्तस्य अकारलोपो ज्ञेयः । द्वौ पादौ यस्य स इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण समासान्तस्य पादशब्दस्यान्त्यस्य अकारलोपे प्रातिपदिकत्वात्सुबादिः - द्विपाद् । शोभनौ (सु) पादौ यस्य सः = सुपाद् । त्रयः पदाः यस्य सः = त्रिपात् । चत्वारः पादा यस्य सः = चतुष्पात् । सहस्रं पादा यस्य सः = सहस्रपाद् । इत्यादि ।

सहस्रं शीर्षाणि यस्य सः इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि शीर्षश्छन्दसि इति सूत्रेण शीर्षनादेशे प्रातिपदिकत्वात्सुबुत्पत्तौ उपधादीर्घे सुब्लुकि नलोपः प्रातिपदिकान्तस्येति सूत्रेण नलोपे = सहस्रशीर्षा । सहस्रमक्षीणि यस्य स इति विग्रहे समासे प्रातिपदिकत्वात्सुब्लुकि बहुव्रीहौ सक्थ्यक्ष्णोरिति सूत्रेण षचि अक्षिशब्दस्य इन्भागस्य यस्येति चेति सूत्रेण लोपे प्रातिपदिकत्वात्सुबुत्पत्तिः - सहस्राक्षः ।

वयसि दन्तस्य दतृ ५।४।१४१॥

संख्यासुपूर्वस्य दन्तशब्दस्य दतृ इत्यादेशः स्याद् बहुव्रीहौ वयसि ज्ञाने । द्वौ दन्तौ यस्य सः = द्विदन् । त्रयो दन्ता यस्य सः = त्रिदन्[1] । चत्वारो दन्ता यस्य सः = चर्तुदन्[1] । एभिः शिशुत्वं गम्यते । शोना दन्ता यस्य सः = १- अनेकमन्य इति समासे प्रातिपदिकत्वात्सुलोपे दन्तस्य स्थाने दतृआदेशे ऋकारस्येत्संज्ञायां लोपे प्रातिपादिकत्वात्सौ नुमि सस्य तस्य च लोपे तलोपस्यासिद्धत्वात् नलोपाभाव उपधादीर्घोऽपि न - सुदन् । स्त्रियामुगित्वात् ङीप् = सुदती ।

ककुदावस्थायां लोपः ५।४।१४६॥

ककुच्छब्दान्तबहुव्रीहेः समासान्तो लोपः स्यादवस्थायां गम्यमानायाम् । कालहोरादिभिः कृता शरीरस्य वृद्धिह्रासादयो वस्तुधर्मा अवस्था इत्युच्यन्ते । अजातं काकुदं यस्य सः = इति विग्रहे समासे प्रातिपदिकत्वात्सुपो लुकि अनेन सूत्रेण दकारान्तस्य अकारलोपे प्रातिपदिकत्वात्सुबुत्पत्तिः - अजातकाकुद् (बालः) । स्थूलं काकूदं यस्य सः = स्थूलकाकुद् (बलवान्) । एवमुन्नतकाकुद् (वृद्धः) ।

उद्विभ्यां काकुदस्य ५।४।१४८॥

आभ्यां परस्य काकुदशब्दस्य समासान्तो लोपः स्याद् बहुव्रीहौ । उद्गतं काकुदं (तालु) यस्य सः = उत्काकुद् । विगतं (नष्टम्) काकुदं यस्य सः = विकाकुद् (तालुहीनः) ।

पूर्णाद्विभाषा ५।४।१४९॥

पूर्णात्परस्य काकुदशब्दस्य वा समासान्तो लोपः स्यात् बहुव्रीहौ । पूर्णं काकुदं यस्य सः = पूर्णकाकुद् - अनेन सूत्रेण काकुदस्याकारस्य वैकल्पिको लोपः । लोपाभावे - पूर्णकाकुदः (युवा) ।

सुहृद्दुर्हृदौ मित्रामित्रयोः ५।४।१५०॥

सुदुर्भ्यां परस्य हृदयशब्दस्य हृद्भावो निपात्यते मित्रामित्रयोर्वाच्ययोर्बहुव्रीहौ । शोभनं हृदयं यस्य सः = सुहृद् (मित्रम्) । दुष्टं हृदयं यस्य सः = दुर्हृद् (अमित्रम्) । अन्यत्र सुहृदयः दुर्हृदयः ।

उरः प्रभृतिभ्यः कप् ५।४।१५१॥

उरः प्रभृतिभ्यः शब्देभ्यः कप्प्रत्ययः स्यात् । व्यूढं (विशालम्) उरो यस्य सः = व्यूढोरस्कः (विशालवक्षाः) । प्रियं सर्पिर्यस्य सः = प्रियसर्पिष्कः - इणः ष इति विसर्गस्य षत्वम् । प्रियं दधि यस्य सः = प्रियदधिकः । प्रियमधुकः । उरप्रभृतयोर्विग्रहे शब्दौ एकैकवचनान्तौ कार्यौ । प्रियः पुमान् यस्य सः = प्रियपुँस्कः । महान् अनड्वान् यस्य सः = अनेक.इति सूत्रेण समासे प्रातिपदिकत्वात्सुलोपे कपि महत आत्वे सवर्णदीर्घे ह्रस्य दत्वे स्वादिकार्ये च - महानडुत्कः । बहुपयस्कः । दृढनौकः । द्विवहुवचनान्तेभ्यस्तु - शेषाद्विभाषेति विकल्पः कप् । द्वौ पुंमासौ यस्य सः = द्विपुँस्कः द्विपुमान् । त्रयः पुंमासौ यस्य सः = त्रिपुँस्कः त्रिपुमान् । एवमन्येऽपि । **अर्थान्ननः-वा.**-नञ्पूर्वकादर्थशब्दात्कप्रत्ययः स्याद्बहुव्रीहौ । नास्ति अर्थो (प्रयोजनम्) यस्य तत् - अनर्थकं कर्म । नञ इत्युक्तेरन्यत्र विकल्पः कप् = अपार्थकम् अपार्थम् (व्यर्थम्) ।

इनः स्त्रियाम् ५।४।१५२॥

अनान्ताद्बहुव्रीहेः कप्प्रत्ययः स्यात् स्त्रियाम् । बहुवचनान्तेन विग्रहः - बहवोऽर्थिनो यस्यां सा = बहर्थिका शाला । प्रभूता धनिनो यस्यां सा = प्रभूतधनिका बहुच्छत्रिका च नगरी । बहवो दण्डिनो यस्यां सा = बहुदण्डिका नगरी । अनिनस्मन्ग्रहणान्यार्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति-(परिभाषा)-यत्र अन् इन् अस् मन् एते गृह्यन्ते तत्र अर्थावता अनर्थकेन च तदन्तो विधिर्भवतीत्यर्थः । वागस्यास्तीति विग्रहे वाचो ग्मिनिरिति सूत्रेण ग्मिनिप्रत्यये चकारस्य जस्त्वे कुत्वे च वाग्गिमन् = वाग्मी । नकारे स्थित इकार उच्चारणार्थः । गकारस्य नेत्संज्ञा । बहवो वाग्मिनो यस्यां सा = बहुवाग्मिका नगरी । परिभाषया कप्रत्ययो विधीयते ।

नद्यृतश्च ५।४।१५३॥

नद्यन्ता(नदीसंज्ञकशब्दात्)दृकारान्ताच्च बहुब्रीहेः कप् प्रत्ययः स्यात् । बह्व्यः कुमार्यो यस्मिन्स इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण कप्प्रत्यये बह्वीशब्दस्य पुंवद्भावे ङीषो निवृत्तौ बहु इति जाते बहुकुमारीक इति शब्दे सिद्धे प्रातिपदिकत्वात्सुबुत्पत्तौ - बहुकुमारीकः । महत्यो नद्यो यस्मिन्सः = महानदीकः - आन्महत इत्वात्वम् । इति नद्यन्ताः । नद्यन्तेन नदीसंज्ञाशब्दो गृह्यते । गतो भर्ता यस्या सा = गतभर्तृका नारी । बहवः कर्तारो यस्य सः = बहुकर्तृकः मार्गः । जीवन्पिता यस्य सः = जीवत्पितृकः । जीवन्ती माता यस्य सः = जीवन्मातृकः । ईश्वरः कर्ता यस्य सः = ईश्वरकर्तृकः संसारः । अन्नं दाता यस्य सः = अन्नदातृको जनः । इति ऋकारान्तः । सुन्दरी बधूर्यस्य सः = सुन्दरबधूको नरः । रूपवती बधूर्यस्य सः = रूपवद्बधूको नरः । रूपवती स्त्री यस्य सः = रूपवत्स्त्रीकः पुरुषः । रूपवती इत्यस्य पुंवद्भावेन पुस्त्वं जातम् ।

शेषाद्विभाषा ५।४।१५४॥

अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहुब्रीहेः कप्प्रत्ययो वा स्यात् । महत् यशो यस्य सः = महायशस्कः आन्महत इति आत्वम् । कबभावे - महायशाः ।

वन्दिते भ्रातुः ५।४।१५७॥

पूजितेऽर्थे यो भातृशब्दस्तदन्तान्न कप् स्यात् । प्रशस्तो भ्राता यस्य सः = प्रशस्तभ्राता ।

निष्ठा २।२।३६॥

बहुब्रीहौ निष्ठान्तं पूर्वं स्यात् । कृतं कृत्यं येन सः = कृतकृत्यः । ज्ञातं ज्ञेयं येन सः = ज्ञातज्ञेयो विषयः । युक्तो योगो यस्य सः = युक्तयोगः । युक्ता चेष्टा येन वा यस्य सः = युक्तचेष्टः । **जातिकालसुखादिभ्यः परा निष्ठा वाच्या-वा.**-जग्धः (भक्षितः) सारङ्ग (मृगो) यस्याः सा = सारङ्गजग्धी - अस्वाङ्गपूर्वपदाद्वा इति सूत्रेण ङीष् । जातो मासो यस्या सा = मासजाता । यस्य सः = मासजातः । जातं सुखं यस्याः सा = सुखजाता । यस्य सः = सुखजातः । वस्तु जातं यस्याः सा = वस्तुजाता । यस्य तत् = वस्तुजातम् । कार्यजाता - तम् । प्रायिकं चेदम् = कृतः कटो येन सः = कृतकटः । पीतमुदकं येन सः = पीतोदकः ।

वाहिताग्न्यादिषु २।२।३७॥

येषु निष्ठायाः पूर्वप्रयोगो वा स्यात् । आहितोऽग्निर्येन सः = आहिताग्निः अग्न्याहितः (अग्निहोत्री) ।

६-४-३-२ नञ्पूर्वपदबहुव्रीहौः

नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः-वा.-नञः परस्याऽस्त्यर्थप्रत्ययान्तस्यान्येन प्रथमान्तेन सह बहुव्रीहिरस्त्यर्थोत्तरपदलोपश्च वा । अविद्यमानं बलं यस्य सः = अबलः, अविद्यमानबलः । यस्याः सा = अबला अविद्यमानबला । एवमधनः अविद्यमानधनः अधना अविद्यमानधना । अविद्यमाना सीमा यस्य सः = असीमः, अविद्यमानसीमः । गोस्त्रियोरिति ह्रस्वः । यस्याः सा = असीमा अविद्यमानसीमा भूमिः । अविद्यमानं परोक्षं यस्य सः = अपरोक्षः अविद्यमानपरोक्षः । यस्याः सा = अपरोक्षा अविद्यमानपरोक्षा । अपरोक्षस्यानुभूतिः = अपरोक्षानुभूतिः षष्ठी समासः । अपरः-रा, अविद्यमानपरः-रा ।

६-४-३-३ व्यधिकरणबहुव्रीहिः

अस्मिन्समासे प्रायेण समसनीययोः पदयोर्विग्रहोऽसमानयोर्विभक्तिवचनयोर्भवति । तदनुसारं विग्रहो विचारणीयः । **सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यो वा चोत्तरपदलोपः-वा.**-सप्तम्यन्तमुपमानं च पूर्वपदं यस्य तस्य पदान्तरेण सह बहुव्रीहिर्वाच्यः पूर्वभागप्राप्तोत्तरपदलोपश्च । कष्ठेस्थः कालो यस्य स इति विग्रहे अनेन वार्तिकेन समासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेनैव वार्तिकेन स्थकारलोपे पुनः सप्तम्या लुकि प्राप्ते अमूर्धमस्तकात्स्वाङ्गादकामे इति सूत्रेण सप्तम्या अलुकि प्रातिपदिकत्वात्समुदायात्सुबुत्तपत्तिः - कण्ठेकालः । उरसि स्थानि लोमानि यस्य सः इति = उरसिलोमा - प्रक्रिया कण्ठेकालवत् । **सङ्घातविकारषष्ठयाश्चोत्तरपदलोपश्च-वा.**- षष्ठयान्तात्परयोः सङ्घातविकारशब्दयोरुत्तरपदेन सह बहुव्रीहिः सङ्घातविकारपदयोर्लोपश्च । केशानां सङ्घातश्चूडा (भाषायाम् = चूल्ठो - गूँथे केश) यस्य स इति विग्रहेऽनेन वार्तिकेन समासे प्रातिपदिकत्वात्सुब्लुकि अनेन वार्तिकेनैव सङ्घातस्य लोपे गोस्त्रियोरिति सूत्रेण ह्रस्वे प्रातिपदिकत्वात्सुबादिः - केशचूडः । सुवर्णस्य विकारोऽलङ्कारो यस्य स इति विग्रहेसङ्घातेत्यनेनैव वार्तिकेन समासे प्रातिपदिकत्वात्सुब्लुकि अनेनैव वार्तिकेन विकारस्य लोपे प्रातिपदिकत्वात्सुबादिः - सुवर्णालङ्कारः । शरेभ्यो जन्म यस्य सः = शरजन्मा कार्तिकेयः । अनेकमन्यपदार्थे इति सूत्रेण समासः ।

सप्तमीविशेषणे बहुव्रीहौ २।२।३५॥

सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् । अत एव ज्ञापकाद्व्यधिकरणबहुव्रीहिः । कण्ठे कालो यस्य स इति विग्रहेऽस्य सूत्रस्य ज्ञापकाद् अनेकमन्यपदार्थे इत्यनेन समासे प्रातिपदिकसंज्ञायां सप्तमीं विना सुब्लुकि अनेन सूत्रेण कण्ठे इत्यस्य पूर्वनिपाते सप्तम्याः सुपो धातुप्रातिपदिकयोरिति सूत्रेण सुपो लुकि प्राप्ते अमूर्धमस्तकात्स्वाङ्गादकामे इति सूत्रेण सप्तम्या अलुकि प्रातिपदिकसंज्ञायां सुबादिः - कण्ठेकालः । **गड्वादेः परा सप्तमी-वा.**-भवति चेत् बहुव्रीहौ गडुः पूर्वं प्रयोज्य इति वक्तव्यम् । गडुः कण्ठे यस्य स इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुब्लुकि गड्वादेरिति वार्तिकेन गडोः पूर्वनिपाते प्रातिपदिकत्वात्सुबादिः - गडुकण्ठः । क्वचिद्व्याख्यानात्पूर्वा सप्तमी - वहे (स्कन्धे) गडुर्यस्य सः = वहेगडुः । **प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ-वा.**-स्तश्चेत् बहुव्रीहौ प्रहरणार्थशब्दः पूर्वं प्रयोज्य इति वक्तव्यम् । उद्यतोऽसिर्येन स इति विग्रहे अनेकमन्येति समासे प्रातिपदिकत्वात्सुब्लुकि अनेन वार्तिकेन निष्ठायाः परे प्रयोगे प्रातिपदिकत्वात्सुबादिः - अस्युद्यतः । दण्डः पाणौ यस्य स इति विग्रहे अनेकमन्येति समासे प्रातिपदिकसंज्ञायां सुब्लुकि प्रहरणार्थेभ्य इति वार्तिकेन प्रहरणार्थकशब्दस्य पूर्वनिपाते

प्रातिपदिकत्वात्सुबादिः - दण्डपाणिः । एवं चक्रं पाणौ यस्य सः = चक्रपाणिः । खड्गपाणिः । असिपाणिः । यष्टिकरः । इत्यादि ।

६-४-३-४ उपमानबहुव्रीहिः

अत्र समसनीययोः पदयोविग्रहःसमानाधिकरणे व्यधिकरणे च भवति । सदृशलक्षणं द्योतयितुमुपमानवाचकशब्दादुत्तरे इवशब्दः प्रयुज्यते । समानाधिकरणे उभे पदे समानविभक्ती समानवचने च स्तो व्यधिकरणे तु न । विग्रहे शब्दौ समानलिङ्गिनौ भवतो न भवतश्च ।

सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यो वा चोत्तरपदलोपः-वा.-चन्द्र इव मुखं यस्य स इति विग्रहे सप्तम्युपमानपूर्वपदस्येति वार्तिकेन समासे प्रातिपदिकात्सुब्लुकि प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - चन्द्रमुखः । यस्या सा = चन्द्रमुखी - स्वाङ्गाच्चोपसर्जनादसंयोगोपदादिति सूत्रेण वा ङीष् । ङीषोऽभावे टाप्-चन्द्रमुखा । एवं चन्द्रमुखवत् कमले इव नयने यस्य सः - कमलयनः[1], कमललोचनः, कमलनेत्रः । राजीवलोचनः । स्त्रियाम् - कमलनयनी-ना । कमललोचनी-ना । कमलनेत्री-त्रा । राजवलोचनी-ना । पुण्डरीके इव अक्षिणी यस्य स इति विग्रहे सप्तम्युपम इति वार्तिकेन समासे प्रातिपदिकत्वात्सुब्लुकि बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इति सूत्रेण षचि यस्येति चेति सूत्रेण इकारलोपे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - पुण्डरीकाक्षः । स्त्रियां षिद्गौरादिभ्यश्चेति ङीष् - पुण्डरीकाक्षी ।

उष्ट्रस्य मुखमुष्ट्रमुखम्, उष्ट्रमुखमिव मुखं यस्य स इति विग्रहे सप्तम्युपमानपूर्वपदस्य इति वार्तिकेन समासे प्रातिपदिकत्वात्सुपितस्यलुकि उत्तरे स्थितस्य मुखशब्दस्य सप्तम्युपमान इत्यनेनैव वार्तिकेन लोपे प्रातिपदिकसंज्ञायां समुदायशब्दायात्सुबुत्पत्तिः - उष्ट्रमुखः । एवं काकपादः । वृषस्कन्धः । हंसगतिः स्त्री । मयूरस्वरो गायकः । उष्ट्रग्रीवो जनः । मृगस्य नेत्रे मृगनेत्रे, मृगनेत्रे इव । यस्या सा = मृगनेत्री नारी । वृकोदर = भीमसेनः ।

ऊधसोऽनङ् ५।४।१३१॥

ऊधोऽन्तस्य बहुव्रीहेरनङादेशः स्यात् ।

बहुव्रीहेरूधसो ङीष् ४।१।२५॥

ऊधोऽन्ताद्बहुव्रीहेर्ङीष् स्यात् । कुण्डमिव ऊधो यस्याः सा इति विग्रहे सप्तम्युपमान इति समासे प्रातिपदिकत्वात्सुब्लुकि ऊधसोऽनङिति सूत्रेण ङीषि अल्लोपोऽन इति सूत्रेण अनोऽकार लोपे प्रातिपदिकसंज्ञायां सुबादिः - कुण्डेघ्नी । स्त्रियां किम् - कुण्डोधो धैनुकम् ।

उपमानाच्च ५।४।१३७॥

उपमानात्परस्य गन्धशब्दस्य समासान्त इकारादेशः स्यात् बहुव्रीहौ । पद्मस्य इव गन्धो यस्य सः = पद्मगन्धिः = सप्तम्युपमानपूर्वपदस्येति समासः । अनेन सूत्रेण धस्याकारस्थाने इत्वम् । एवमुत्पलगन्धिः । करीषगन्धिः ।

---

[1] कमलवाचकशब्दात्परे नयनवाचकशब्दचिन्त्यः - अमर १।१०।४०-४१॥ विग्रहे नयनवाचकशब्दा द्विवचने कार्याः ।

पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८॥

हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य समासान्तो लोपः स्याद्बहुब्रीहौ । स्थानिद्वारेणायं समासान्तो लोपः । व्याघ्रस्येव पादौ यस्य सः इति विग्रहे सप्तम्युपमानेति वार्तिकेन समासे प्रातिपदिकत्वात्सुब्लुकि अनेन सूत्रेण स्थानिद्वारेणान्त्यस्य अकारलोपे प्रातिपदिकसंज्ञायां सुबादिः - व्याघ्रपाद् । एवं सिंहपात् । हस्त्यादयस्तु हस्ति-महिला-दासी-गणिका-कुसूलादयः । हस्त्यादिपरे तु न - हस्तिपादः । अश्वपादः । कपोतपाद इत्यादयः ।

विभाषा श्यावारोकाभ्याम् ५।४।१४४॥

आभ्यां परस्य दन्तस्य दतृ वा स्याद् बहुब्रीहौ । श्यावाः (धूम्राः) दन्ता यस्य सः = श्यावदन् श्यावदन्तः । अरोका (अच्छिद्राः) दन्ता यस्य सः = अरोकदन् अरोकदन्तः । दतृपक्षे सुदन्वत् ।

अग्रान्त-शुद्ध-शुभ्र-वृष-वराहेभ्यश्च ५।४।१४५॥

एभ्यः परस्य दन्तस्य दतृ वा स्याद्बहुब्रीहौ । कुड्मलानामग्राणि, कुड्मलाग्राणि, कुड्मलाग्राणीव दन्ता यस्य सः =कुड्मलाग्रदन् कुड्मलाग्रदन्तः । शुद्धदन् शुद्धदन्तः । शुभ्रदन् शुभ्रदन्तः । वृषदन् वृषदन्तः । वराहदन् वराहदन्तः ।

६-४-३-५ संख्योत्तरपदबहुब्रीहिः

संख्ययाऽव्ययासन्नदूराधिकसंख्याः संख्येये २।२।२५॥

संख्येयार्थया संख्यया सह अव्ययादयो वा समस्यन्ते स बहुब्रीहिः । समानाधिकरण-स्यान्यपदार्थवृत्तेश्चाभावात्पूर्वेणाप्राप्तौ वचनम् ।

बहुब्रीहौ संख्येये डजबहुगणात् ५।४।७३॥

संख्येये यो बहुब्रीहिस्तस्माड्डच् स्यात् । समीपार्थे उप । दशानां समीपे ये सन्ति ते इति विग्रहे उपशब्देन सह संख्येयवाचिनो दशन्शब्दस्य संख्ययाऽव्ययासन्न. इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि बहुब्रीहावित्यनेन सूत्रेण डचि नस्तद्धिते इति सूत्रेण टेरनो लोपे प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - उपदशाः (नव एकादश वा) । विंशतेः समीपे ये सन्ति ते इति विग्रहे संख्यया इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि टेरिति सूत्रेण विंशतेस्तेरिकारलोपे प्राप्ते -

ति विंशतेर्डिति ६।४।१४२॥

विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति परे । इत्यनेन तिलोपे उपविंश अ इति जाते अतो गुणे इति सूत्रेण पररूपे प्रातिपदिकत्वात्सुबादिः - उपविंशाः (एकोनविंशतिरेकविंशतिर्वा) । त्रिंशतः समीपे ये सन्ति इति विग्रहे समासे प्रातिपदिकत्वात्सुब्लुकि डचि टेरिति टेलोपे वर्णमेलने प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - उपत्रिंशाः (एकोनत्रिंशत् एकत्रिंशद्वा) । विंशतेरासन्नाः = आसन्नविंशाः । त्रिंशत अदूराः = अदूरत्रिंशाः । चत्वारिंशतोऽधिकाः = अधिकचत्वारिंशाः । सर्वत्र डचि टिलोपो भवति ।

६-४-३-६ संख्योभयपदबहुव्रीहिः

संख्याया अल्पीयस्याः-वा.-न्यूनाधिकसंख्यावाचकशब्दानां समासे न्यूनसंख्या पूर्वं प्रयोज्येत्यर्थः। द्वौ वा त्रयो वा विग्रहे संख्ययाऽव्ययासन्न. इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि बहुव्रीहाविति सूत्रेण डचि टिलोपे प्रातिपदिकत्वात्स्वादिकार्ये - द्वित्रा जनाः । **द्वन्द्वेऽपि-वा.-** संख्याया इति वार्तिकं द्वन्द्वेऽपि प्रवर्तते । द्वौ च दश च=द्वादश । द्वन्द्वे डच् न परवल्लिङ्गता च । एको द्वौ वा = एकद्वा । त्रयश्चत्वारो वा = त्रिचतुरा जना = त्र्युपाभ्यां चतुरोऽजिष्यते इतिवार्तिकेन अच् । द्विरावृत्ता दश = द्विदशाः (विंशतिः) = अत्र डच् । एवमुपशतानि पुस्तकानि । उपसहस्राणि । पञ्च वा षड् वा = पञ्चषा जनाः - अत्र डचि टेरिति सूत्रेण टिलोपे । विंशतेरधिकाः = अधिकविंशाः गृहाः - डच् तिकारलोपश्च । त्रय आवृता दश = त्रिदशाः (त्रिंशत्) पुरुषा नार्यो वा । एवं चतुर्दशाः पञ्चदशाः षड्दशाः, सप्तदशाः, नवदशाः, वा जना नार्यः पुरुषा वा । नान्तानां डचि अन्भागस्य (टेः) लोपः ।

६-४-३-७ दिगन्तरालबहुव्रीहिः

दिङ्नामान्यन्तराले २।२।२६॥

दिशो नामानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते स बहुव्रीहिः । नामानीति बहुत्वमविवक्षितम् । दक्षिणस्याः पूर्वस्याश्च दिशोरन्तरालं या दिक् सेत्यर्थेऽनेन सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इतिभाष्यवचनात्पुंभावे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः = दक्षिणपूर्वा = आग्नेयी । एवमुत्तरपूर्वा = ईशानी । उत्तरपश्चिमा = वायवी । दक्षिणपश्चिमा = नैऋती ।

६-४-३-८ व्यतिहारबहुव्रीहिः

तत्र तेनेदमिति सरूपे २।२।२७॥

सप्तम्यन्ते ग्रहणविषये स रूपे पदे तृतीयान्ते च प्रहरणविषये स रूपे पदे च इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे (परस्परकरणे) द्योत्ये स बहुव्रीहिः । (मिथः) केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तमित्यर्थे सप्तम्यन्तयोः "तत्र तेनेदमिति स्वरूपे" इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि -

इच्कर्मव्यतिहारे ५।४।१२७॥

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मात्समासान्त इच् स्यात् । इत्यनेन इच्प्रत्यये भत्वात् यस्येति चेति सूत्रेण अकारलोपे अन्येषामपि दृश्यते इति सूत्रेण पूर्वपदान्तस्य अन्येषामपि दृश्यते इत्यनेन सूत्रेण दीर्घे तिष्ठद्गुप्रभृतिषु इच्प्रत्ययस्य पाठादव्ययीभावत्वेनाव्ययत्वे - केशाकेशि (केशं केशं गृहीत्वा युद्धे प्रवृत्ता ये सन्ति ते) । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे समासे प्रातिपदिकत्वात्सुब्लुकि इचि भत्वादकारलोपे पूर्वपदान्तस्य दीर्घेऽव्ययत्वे - दण्डादण्डि (दण्डानां दण्डानां प्रहारं कृत्वा युद्धे प्रवृत्ता ये सन्ति ते) । मुष्टिभिश्च मुष्टिभिश्च प्रहृत्य इदं युद्धं प्रवृत्तम् - मुष्टीमुष्टि । यष्टिभिश्च यष्टिभिश्च प्रहृत्य इदं युद्धं प्रवृत्तम् - यष्टीयष्टि । हस्ताहस्ति ।

६-४-३-९ सहपूर्वपदबहुव्रीहिः

तेन सहेति तुल्ययोगे २।२।२८॥

तुल्ययोगे (समानसम्बन्धे) वर्तमानं सहेत्येतृतीयान्तेन सह समस्यते स बहुव्रीहिः ।

वोपसर्जनस्य ६।३।८२॥

बहुव्रीहेरवयवस्य सहस्य सः स्याद्वा । पुत्रेण सहेत्यर्थे तेन सहेति तुल्ययोगे इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि वोपसर्जनस्येत्यनेन सहस्थाने सादेशे प्रातिपदिकत्वात्सुबादिः - सपुत्रः सहपुत्रो वाऽऽगतः पिता । छात्रेण सह-सच्छात्रः सहच्छात्रो वाऽऽचार्यो लभ्यते दृश्यते वा । ससैनिकः सहसैनिको वा राजा । सभृत्यः सहभृत्यो वा स्वामी । राधिकया सह-सराधिकः सहराधिको वा कृष्णः । सीतया सह=ससीतः सहसीतो वा रामः । एवं सशान्तः सहशान्तो वा ऋष्यशृङ्गः । इति शब्दोपादानात्तुल्ययोगवचनं प्रायिकं गम्यते - कर्मणा सह=सकर्मकः । लोमभिः सह=सलोमकः । पत्न्या सह=सपत्नीक इत्यादि सिद्ध्यति । इति बहुव्रीहिः ६-४॥

६-५ द्वन्द्वः

चार्थे द्वन्द्वः २।२।२९॥

अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचये-तरतरयोग-समाहाराश्चार्थाः । एते सर्वे चकारस्यार्थाः सन्ति । एषु चतुर्षु चार्थेषु समासे समुचयस्यान्वाचयस्य च द्वन्द्वसमासो नासामर्थ्यात् । समर्थः पदाविधिरिति परिभाषितत्वात् (अनुशासनात्) यथा -

१. यः परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः स समुच्चयः । तत्रेश्वरं गुरुं च भजस्वेति । २. योऽन्यतमस्यानुषाङ्गिकत्वेनान्वयः सोऽन्वाचयः । भिक्षामट गां चानयेति ।

३. यत्र परस्परमिलितानां पदानामन्वयः स इतरेतरयोगः । अयमितरेतरयोगः समाहारेण रहितः । धवश्च खरिदरश्चेति विग्रहे इतरेतरयोगे चार्थे द्वन्द्व इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि समासत्वेन द्वयोर्बोधात् द्विवचनं परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति सूत्रेण परवल्लिङ्गतायां प्रातिपदिकसंज्ञायां सबुत्पत्तिः - धवखदिरौ । अनेकोक्तेर्बहूनामपि द्वन्द्वः । बहुत्वे समस्तं पदं बहुवचनम् । होता च पोता च नेष्टा च उद्गाता चेति विग्रहे इतरेतरयोगे द्वन्द्वसमासे प्रातिपदिकसंज्ञायां सुब्लुकि आनङृतो द्वन्द्वे इति सूत्रेण उत्तरपदे परे नेष्टृशब्दादनङि समासत्वे बहुवचनस्य बोधाद्बहुवचनं परवल्लिङ्गतायां प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - होतृपोतृनेष्टोद्गातारः । द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होता पोता चेति समासादिकार्ये प्रातिपदिकसंज्ञायां सुब्लुकि पूर्वपदे आनङि नेष्टा चोद्गाता चेति समासे प्रातिपदिकसंज्ञायां सुब्लुकि पूर्वपदे आनङि होतापोतारौ च नेष्टोद्गातारौ चेति विग्रहे समासे प्रातिपदिकसंज्ञायां सुबुत्पत्तौ = होतापोतानेष्टोद्गातारः (ऋत्विग्विशेषाः) । पदद्वयेऽपि एकानेकवचनत्वे समष्टेर्बहुत्वेन बहुवचनम् - धवश्च खदिरौ च, धवौ च खदिरश्च, धवौ च खदिरौ च वा = धवखदिराः । द्वयोरेकैकवचने सति तु समासानन्तरं द्विवचनमेव - रामकृष्णौ । कृष्णार्जुनौ । मसीलेखन्यौ । अनेकानामनेकवचने सति स्वभावेन बहुवचनम् - पत्रमसीलेखन्यः । पत्रफलपुष्पाणि । समाहारे तु - पाणी च पादौ चेत्येषां समाहार इति विग्रहे समाहारे समासे प्रातिपदिकत्वात्सुब्लुकि

समाहरस्यैकवद्भावे न सर्वत्रेकवचनं स नपुंसकमिति सूत्रेण नपुंसकसंज्ञायां समुदायात्सौ सोरमि पूर्वरूपे रूपं सिद्धम् - पाणिपादम् । गजाश्वम् । अजामेषम् । श्वमार्जारम् । छत्रोपानहमित्यादि ।

राजदन्तादिषु परम् २।२।३१॥

एषु पूर्वप्रयोगार्हं पदं परं स्यात् । एषु कतिपये तत्पुरुषकर्मधारयसमासाः कतिपये द्वन्द्वसमासाश्च । दन्तानां राजा इति विग्रहे षष्ठीतत्पुरुषसमासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण राजन्शब्दात्परे दन्तशब्दस्य प्रयोगे प्रातिपदिकत्वात्सुबुत्पत्तौ - राजदन्तः । एवं वनस्याग्रे - अग्रेवणम् = निपातनाच्च सप्तम्या अलुक् । इमौ षष्ठीतत्पुरुषौ । नग्नं च तत् मुषितं च = नग्नमूषितम् । एवं सिक्तसंमृष्टम् । मृष्टलुञ्चितम् । इमे कर्मधारयाः । **धर्मादिष्वनियमः-वा.**-धर्मश्च अर्थश्च = धर्मार्थौ । अर्थश्च धर्मश्च = अर्थधर्मौ । एवमर्थकामौ, कामार्थौ । आद्यन्तौ, अन्तादी । शब्दार्थौ, अर्थशब्दौ । गुणवृद्धी, वृद्धिगुणौ । जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते । जाया च पतिश्च = जायापती जम्पती दम्पती । एते द्विवचनान्ताः । आकृतिगणोऽयम् ।

द्वन्द्वे घि २।२।३२॥

द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिश्च हरश्चेति विग्रहे चार्थे द्वन्द्व इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि हरेर्घिसंज्ञायां तस्य द्वन्द्वे घीत्यनेन पूर्वप्रयोगे प्रातिपदिकसंज्ञायां सुबुत्पित्तिः - हरिहरौ । गुरुशुक्रौ । **अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे-वा.**-हरिर्गुरुहराः । हरिहरगुरवः । पटुमृदुशुक्लाः, पटुशुक्लमृदवः ।

अजाद्यदन्तम् २।२।३३॥

द्वन्द्वे अजादिपदं पूर्वं स्यात् । ईशश्च कृष्णश्च ईशकृष्णौ । एवमुष्ट्रखरौ । **बहुष्वनियमः-वा.**-अश्वरथेन्द्राः । इन्द्ररथाश्वाः । **घ्यन्तादजाद्यन्तं विप्रतिषेधेन-वा.**-द्वन्द्वेऽजाद्यन्तपूर्वकस्य घिसंज्ञकशब्दस्य पूर्वनिपातो विप्रतिषिध्यते (निषिध्यत इत्यर्थः) । इन्द्राग्नी । इन्द्रवायू ।

अल्पाच्तरम् २।२।३४॥

द्वन्द्वे अल्पाच्पदं पूर्वं स्यात् । शिवश्च केशवश्च = शिवकेशवौ । एवं धवखदिरौ । **बहुष्वनियमः-वा.**-शङ्खवीणादुन्दुभयः । धवखदिरपालाशाः । **ऋतुनक्षत्राणां समाक्षराणामानुपूर्वेण-वा.**-(क्रमेण)-निपातो विधेयो द्वन्द्वे । हेमन्तशिशिरवसन्ताः । कृतिकारोहिण्यौ । असमाक्षरे तु न - ग्रीष्मवसन्तौ । **लघ्वक्षरं पूर्वम्-वा.**-प्रयोज्यम् । लघु ह्रस्वम् । कुशकाशम् । फलपुष्पाणि । **अभ्यर्हितं च-वा.**-पूजनीयबोधकशब्दः पूर्वं प्रयोज्य इति वक्तव्यम् । तापसपर्वतौ । पितापुत्रौ । गुरुशिष्यौ । मातापितरौ । दीक्षातपस्वी । **वर्णानामानुपूर्वेण-वा.**-ब्राह्मणक्षत्रियविट्(वैश्य)शूद्राः । **भ्रातुर्ज्यायसः-वा.**-युधिष्ठिरार्जुनौ । एवमन्येऽपि इतरेतरयोगा ज्ञेयाः ।

४. समाहारः[1] - प्रयेणोभयार्थप्रधाने पदे चार्थे समाहारे समस्येते । समाहारस्यार्थः समूहोऽस्ति । समाहारे यथा - संज्ञापरिभाषम् । समाहारद्वन्द्वस्य विग्रहे समानलिङ्गस्यासमानलिङ्गस्य च शब्दस्य

---

[1] -समाहारद्विगुद्वन्द्वयोः को भेदः? इति जिज्ञासायां तत्पुरुषे समाहारद्विगौ पञ्चानां गवां समाहार इति विग्रहे षष्ठ्यन्तपदे द्वे समाहारद्वन्द्वे 'संज्ञा च परिभाषा च' इत्यनयोः समाहार इति प्रथमान्तपदानां च प्रयोगः क्रियते ।

प्रथमाविभक्तेरेकैकवचनयोर्द्वयोः पदयोः समासे तयोरनयोरिति पदयोर्मध्ये एकम् पुंनपुंसकलिङ्गयोः प्रथमविभक्तेर्द्विवचनस्य बहुवचनस्य वा एकैकयोः पदयोः प्रथमाविभक्तिर्द्विवचनस्य त्रयाणां त्रिपदादधिकानां च पदानां समासे तेषामेषामिति पदयोर्मध्ये एकं तथैव स्त्रीलिङ्गस्य प्रथमाविभक्तेरेकैकवचनयोर्द्वयोः पदयोः समासे तयोरनयोरिति पदयोर्मध्ये एकम्, द्विवचनस्य बहुवचनस्य च एकैकयोः पदयोः प्रथमाविभक्तेरेकैकवचनस्य त्रयाणां त्रिपदादधिकानां च पदानां समासे तासामासामिति पदयोर्मध्ये एकं च पदं प्रयुज्यते । तदिदंशब्दयोस्त्रिषु लिङ्गेषु षष्ठया द्विवचने तयोरनयोरिति पुंसि नपुंसके च बहुवचने तेषामेषामिति स्त्रिलिङ्गे च बहुवचने तासामासामि पदे भवतः ।

क) प्रथमं त्रयाणां लिङ्गनां पदानां मध्ये सत्रमानलिङ्गस्य प्रथमाविभक्तेरेकवचनस्य द्विपदं चकारेण समुच्चीय तयोरनयोर्वा समाहार इत्युक्त्वा विग्रहः क्रियते । तण्डुलश्च किण्वश्च (तण्डुलस्य खण्डः) तयोरनयोर्वा समाहारः - तण्डुलकिण्वम् । संज्ञा च परिभाषा च अनयोः समाहारः - संज्ञापरिभाषम् । दधि च घृतं च अनयोः समाहारः - दधिघृतम् । इत्यादि ।

ख) द्वितीयं पुंक्लीवलिङ्गयोः पदयोर्मध्ये स्वस्वलिङ्गस्य समानवचने द्वे द्वे पदे चकारेण समुच्चीय तेषामेषां वा समाहार इति स्त्रीवाचकपदस्य द्विपदं चकारेण समुच्चीय तासामासां वा समाहार इत्युक्त्वा विग्रहः क्रियते । यथा पुंवाचकशब्दे सति - पाणी च पादौ चैषां तेषां वा समाहारः = पाणिपादम् । मार्दङ्गिकाश्च पाणविकाश्चैषां तेषां वा समाहारः = मार्दङ्गिकमाणवकम् । नपुंसकशब्दे सति - बदराणि च आमलकानि च तेषामेषां वा समाहारः - वदरामलकम् । स्त्रीवाचकशब्दे सति - धानाश्च शष्कुल्यश्च तासामासां वा समाहारः - धानाशष्कुलि[1]इत्यादि ।

ग) असमानलिङ्गवचनयोर्विग्रहः - उध्यश्च (नदविशेषः) इरावती चानयोः समाहार = उध्येरावति । गङ्गा च शोणश्चानयोः समाहारः = गङ्गाशोणम् । कुरवश्चश्च कुरक्षेत्रं च तेषां समाहारः = कुरुकुरुक्षेत्रम् ।

घ) अनेकपदानां विग्रहः - आहारश्च निद्रा च भयञ्च मैथुनञ्चैषां तेषां वा समाहारः - इति विग्रहे चार्थे द्वन्द्व इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि जातिरप्राणिनामिति सूत्रेणैकवद्भावे स नपुंसकमिति सूत्रेण नपुंसकत्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः - आहारनिद्राभयमैथुनम् ।

स नपुंसकम् २।४।१७।

समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । संज्ञा च परिभाषा च तयोः समाहारः[2] , चार्थे द्वन्द्व इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि ह्रस्वो नपुंसके प्रातिपदिकत्वात्सुबुत्पत्तिः - संज्ञापरिभाषम् । समाहरद्वन्द्वे समासेन निष्पन्नस्य शब्दस्य नपुंसकत्वं स नपुंसकमित्यनेन सूत्रेण क्रियते ।

---

1 वरदराजः - मध्यकौमुदी - आचार्य विश्वनाथ शास्त्री प्रभाकरः सम्पादकः, मोतीलाल वनारसीदास, सन् २००१, पृ. ४५१, टीकायाम् ।

2 ,, पृ. ४४९ ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २।४।२॥

एषां समाहारद्वन्द्व एकवत्स्यात् । एकवता एकवद्भाव एकवद्भावेन एकवचनं च बोध्यते । पाणी च पादौ चैषां समाहार इति विग्रहे चार्थे द्वन्द्व इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि द्वन्द्वश्चेति सूत्रेण एकवद्भावे नपुंसकत्वे प्रातिपदिकत्वात्सुबुत्पत्तिः - पाणिपादम्[1] । मार्दङ्गिकाश्च पाणविकश्चैषां समाहाराः - मार्दङ्गिकपाणविकम् । रथिकाश्चाश्वारोहश्चैषां समाहारः = रथिकाश्वारोहम् । शीरोग्रीवम् । वीणावादकपरिपादकम् । रथिकपादातम् ।

अध्ययनतोऽविप्रकृष्टाख्यानाम् २।४।५॥

अविप्रकृष्टं सामीप्यम् । अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वन्द्व एकवत्स्यात् । पदान्यधीते = पदकाः, क्रमानधीते = क्रमकाः, पदानां च क्रमकानां चैषां समाहारः = पदकक्रमकम् ।

जातिरप्राणिनाम् २।४।६॥

प्राणिभिन्नजातिवाचिनां द्वन्द्व एकवत्स्यात्समाहारे । धानाश्च शष्कुल्यश्च तासां समाहारः = धानाशष्कुलि (भृष्टयवधानाः) । प्राणिनां तु - विशश्च शूद्राश्च = विट्शूद्राः । द्रव्यजातीनामेव एकवत् । यतो नेह - रूपरसौ, गमनाकुञ्चने । जातिप्राधान्ये एवायमेकवद्भावो नान्यत्र - यथा बदरामलकम् । द्रव्यविशेषविवक्षायां तु बहुवचनम् - बदरामलकानि ।

विशिष्टलिङ्गो नदीदेशोऽग्रामाः २।४।७॥

ग्रामभिन्ननदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्व एकवत्स्यात् । उद्यश्च (नदविशेषः) इरावती च तयोः समाहारः - उद्येरावति - गोस्त्रियोरूपसर्जनस्येति ह्रस्वः । गङ्गा च शोणश्च तयोः समाहारः = गङ्गाशोणम् । कुरवश्च कुरुक्षेत्रञ्चैषां समाहारः = कुरुकुरुक्षेत्रम् । भिन्नलिङ्गानां किम् - गङ्गायमुने । अग्रामाः किम् - जाम्बवतं नगरम् ।

क्षुद्रजन्तवः २।४।८॥

एषां समाहारे द्वन्द्व एकवत्स्यात् । यूकाश्च लिक्षाश्च आसां समाहारः = यूकालिक्षम् । एकवद्भावाद्ध्रस्वो नपुंसकत्वं च । स्वेदाजा जन्तुविशेषाः यूकाः (जम्म्राहरू-जएँ, जूएँ । लिक्षाः (भाषायाम् - लिखा-हरू-लिखें) । आनकुलात्क्षुद्रजन्तवः ।

येषां च विरोधशाश्वतिकः २।४।९॥

शाश्वतिकः स्वाभाविकः । येषां समाहारे द्वन्द्व एकवत्स्यात् स्वाभाविके विरोधे । अहयश्च नकुलाश्चैषां समाहारः = अहिनकुलम् । गोव्याघ्रम् । माहिषसिंहम् । अश्वमहिषम् । मर्जारमूषकम् । श्वशृगालम् । कुक्कुरमार्जारम् । मृगसिंहम् ।

---

[1] -सोमनाथसिग्देलः-प्रतिसंस्कृता सि.कौ., प्रकाशकः-प्रज्ञाप्रतिष्ठान काठमाडौं नेपाल, संवत् २०१५,पृ.२४० ।

शूद्राणामनिरवसितानाम् २।४।१०॥

अनरवसितानाम् = अबहिष्कृतानां शूद्राणां समाहारे एकवत्स्यात् । तक्षाणश्च अयसस्काराश्चैषां समाहारः = तक्षायसस्कारम् = तक्ष्णो नकारो नलोपप्रातिपदिकान्तस्येति सूत्रेण लोपः । रजकतन्तुवायम् । पात्राद्बहिष्कृतानां तु - चाण्डालमृतपाः । अस्येतरेतरयोगसमासः ।

गवाश्वप्रभृतीनि च २।४।११॥

गवाश्वप्रभृतीनि यथोच्चरितानि कृतैकवद्भावानि द्वन्द्वरूपाणि साधूनि स्युः । गवाश्वम् । गवाविकम् । अजैडकम्, अजाविकम्, पुत्रपौत्रम्, स्त्रीकुमारम्, उष्ट्रखरम्, कुब्जवायनम्, श्वचाण्डालम्, दासीमाणवकम्, उष्ट्रशशम्, मूत्रशकृत्, मूत्रपुरीषम्, यकृन्मेदः, मांशशोणितम्, दर्भशरम्, तृणोपलम्, इत्यादि ।

विभाषा वृक्ष-मृग-तृण-धान्य-व्यञ्जन-पशु-शकुन्य-श्ववडव-पूर्वापराधरोत्तराणाम् २।४।१२॥

वृक्षादीनां सप्तानां द्वन्द्वोऽ श्ववडवेत्यादि द्वन्द्वत्रयं चैकवद्वा स्यात्समाहारे । **वृक्षादौ विशेषाणामेव ग्रहणम्-वा.**-प्रक्रियायां समाहारद्वन्द्वे कृते समस्तशब्दस्य एकवद्भावे नपुंसकत्वे नपुंसकैकवचनमितरेतरयोगद्वन्द्वे कृते समस्तशब्दः पूर्वावस्थाया लिङ्गश्च[1] भवति । विग्रहे बहुवचनान्तः - प्लक्षाश्च न्यग्रोधाश्चैषां समाहारः = प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । रुरवश्च पृषताश्चैषां समाहारः = रुरुपृषतम्, रुरुपृषताः । कुशाश्च काशाश्चैषां समाहारः = कुशकाशम्, कुशकाशाः । ब्रीहयश्च यवाश्चैषां समाहारः = ब्रीहियवम्, ब्रीहियवाः । विग्रह एकैकवचनान्तः - दधि च घृतं च तयोः समाहारः = दधिघृतम्, दधिघृते । बहुवचनान्तः - गावश्च महिषाश्चैषां समाहारः = गोमहिषम्, गोमहिषाः । शुकाश्च वकाश्च तेषां समाहारः = शुकवकम्, शुकवकाः । एकवचनान्तः = अश्वश्च वडवश्च तयोः समाहारः = अश्ववडवम्, अश्ववडवौ । पूर्वाञ्चापरञ्च तयोः समाहारः = पूर्वापरम्, प्रथमान्तैकवचनम् । प्रथमान्तद्विवचनम् - पूर्वापरे । अधरञ्चोत्तरञ्चानयोः समाहारः = अधरोत्तरम्, अधरोत्तरे । **फल-सेनाङ्ग-वनस्पति-मृग-शकुनि-क्षुद्रजन्तु-धान्य-तृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम्-वा.**-विग्रहे बहुवचनान्तयोरवयवयोरनेन वार्तिकेन एकवद्भावो भवति तेन नपुंसकैकवचनं प्रयुज्यते । बदराणि चामलकानि चैषां समाहारः = बदरामलकम् - जातिरप्राणिनामित्येकवद्भावः । एवं रथिकाश्वारोहम्, प्लक्षन्यग्रोधम्, रुरुपृषतम्, हंसचक्रवाकम्, यूकालिक्षम्, ब्रीहियवम्, कुशकाशम् । एते सर्वे विग्रहे बहुवचनान्ताः । बहुवचनान्ताभावे तु प्रकृत्या द्विवचनं - बदरं चामलकं च = बदरामलके । एवं रथिकाश्वारोहौ, प्लक्षन्यग्रोधौ, रुरुपृषतौ, हंसचक्रवाकौ, यूकालिक्षौ, ब्रीहियवौ, कुशकाशौ । एषामितरेतद्वन्द्वो भवति समाहारद्वन्द्वो न । यतो जातिरप्राणिनामित्येनेन नैकवद्भावः ।

[1] विग्रस्यान्ते शब्दः पुल्लिङ्गी अस्ति चेत्पुंल्लिङ्गी, स्त्रीलिङ्गी अस्ति चेत्स्त्रीलिङ्गी, नपुंसकलिङ्गी अस्ति चेन्नपुंसकलिङ्गी च भवति ।

विप्रतिषिद्धं चानधिकरणवाचि २।४।१३॥

विरुद्धार्थनामद्रव्यवाचिनां समाहारे द्वन्द्वे एकवद्वा स्यात् । शीतं चोष्णं चानयोः समाहारः = शीतोष्णम्, शीतोष्णे । एवं सुखदुःखम्, सुखदुःखे । जीवितमरणम् जीवतमरणे । चार्थे द्वन्द्व इति सूत्रेण प्राप्तो वैकल्पिकः समाहारद्वन्द्वो विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदम् । तेन द्रव्यवाचिनामपि इतरेतरयोग एव - शीतोष्णे उदके स्तः । विप्रतिसिद्धं किम् - नन्दकपाञ्चजन्यौ । इह पाक्षिकः समाहरद्वन्द्वो भवति ।

न दधिपय आदीनि २।४।१४॥

एतानि न एकवत्स्युः । एषां समाहारद्वन्द्वो न भवतीत्यर्थः । दधि च पयश्च तयोः समाहार इति विग्रहे चार्थे द्वन्द्व इत्यनेन समासे प्रातिपदिकत्वात्सुब्लुकि जातिरप्राणिनामित्यनेन प्राप्तं नित्यमेकवद्भावं बाधित्वा न दधिपय इति सूत्रेण निषेधे प्रातिपदिकसंज्ञायां समुदायात्सुबुत्पत्तौ - दधिपयसी । प्रत्येकं नैकभावत्वाद्द्विवचनम् । सर्पिर्मधुनी, मधुसर्पिषी, शिववैश्रवणौ, स्कन्दविशिखौ, शुक्लकृष्णौ, दीक्षातपसी, श्रद्धातपसी, मेधातपसी, अध्ययनतपस्वी, उलूखलमुसले आद्यावसाने, श्रद्धामेधे, आद्यन्तौ, इध्मावर्हिषी- इध्मस्य निपातनाद्दीर्घः । ऋक्सामे, वाङ्मनसे - उभयत्रापि अचतुर ... इत्यादिना समासान्तोऽच् ।

द्वन्द्वाच्चुद-ष-हान्तात्समाहारे ५।४।१०६॥

चवर्गान्ताद्द-ष-हान्ताच्च द्वन्द्वाट्टच् स्यात् समाहारे । वाक्च त्वक्च तयोः समाहार इति विग्रहे चार्थे द्वन्द्व इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि द्वन्द्वच्चुद इति टचि वाचश्चकारस्य चोः कुरिति सूत्रेण कुत्वे समाहारद्वन्द्वसमासत्वान्नपुंसकत्वे प्रातिपदिकत्वात्सौ - वाक्त्वचम् । त्वक् च स्रग् च तयोःसमाहारः = त्वक्स्रजम् । शमी च दृशद् चानयोः समाहारः = शमीदृशदम् । वाक् च त्विड् च तयोः समाहारः = वाक्त्विषम् । छत्रश्च उपनहौ चैषां समाहारः = छत्रोपानहम् । समाहारे किम् - प्रावृट् च शरच्च = प्रावृट्शरदौ - इतरतेरयोगाद्द्वन्द्वान्न टच् ।

आनङ् ऋतो द्वन्द्वे ६।३।२५॥

विद्यायोनिसम्बन्धवाचिनामृदन्तानां च द्वन्द्वे आनङ् स्यादुत्तरपदे परे । विद्यासंवन्धस्योदाहरणम् - होता च पोता चेति विग्रहे समासे प्रातिपदिकत्वात्सुब्लुकि आनङ् ऋत इति सूत्रेणानङि प्रातिपदिकसंज्ञायां सुबादिः - होतापोतारौ । इतरेतरयोगेऽनेकपदानां समासः - होतृपोतृनेष्टोद्गातारः । चरमावयवे उद्गातृशब्दे परे नेष्टृशब्दस्य ऋकारस्यानङ् । योनिसम्बन्धस्योदाहरणम् - माता च पिता च = मातापितरौ । गर्भधारणपोषाभ्यां पितुर्माता गरीयसीति स्मृतिः । पुत्रेऽन्यतरस्यामितिसूत्रतो मण्डूकप्लुत्या पुत्र इत्यनुवृत्तिः - पिता च पुत्रश्चेति पितापुत्रौ ।

देवता द्वन्द्वे च ६।३।२६॥

देवतावाचिनां द्वन्द्वे उत्तरपदे परे पूर्वपदस्याऽऽनङ् स्यात् । मित्रश्च वरुणश्च = मित्रावरुणौ । **वायुशब्दप्रयोगे प्रतिषेधः-वा.**-वायुशब्दस्य पूर्वपदेन वा प्रयोगे अनाङ् प्रतिषिध्यते इत्यर्थः । अग्निश्च वायुश्च = अग्निवायू । वायुश्च अग्निश्च-वाय्वग्नी ।

दिवो द्यावा ६।३।२९॥

देवताद्वन्द्वे उत्तरपदे परे दिवो द्यावादेशः स्यात् । द्यौश्च भूमिश्चेति विग्रहे समासे प्रातिपदिकत्वात्सुब्लुकि दिवःस्थाने द्यावादेशे परवल्लिङ्गतायां प्रातिपदिकत्वात्सुबुत्पत्तिः = द्यावाभूमी ।

उषासोषसः ६।३।३१।

उषस्शब्दस्योषासादेशः स्यात् देवताद्वन्द्वे । आदेशे उषासा ज्ञेया । उषाश्च सूर्यश्च तयोः समाहार = उषासासूर्यम्, जातिरप्राणिनामिति सूत्रेण एकवद्भावस्ततो नपुंसकत्वम् ।

मातरपितरावुदीचाम् ६।३।३२॥

उदीचां मते मातृपितृशब्दयोर्द्वन्द्वे मातृशब्दाद् अरङ् स्यात् । मातरपितरौ । उदीचां किम् - मातापितरौ ।

इति द्वन्द्वः ॥६-५॥

६-६ एकशेषः

द्वन्द्वापवाद एकशेषः । एकशेषविधानसूत्रम् - **सरूपाणामेकशेष एकविभक्तौ १।२।६४॥** एकविभक्तौ यानि स्वरूपाण्येव दृष्टानि तेषामेक एव शिष्यतेऽन्ये लुप्यन्ते । एकशेषे प्रथमाविभक्तेः समवचनयोः समविषमवचनयोः पदयोर्वा समवचनानां समविषमवचनानां वा पदानां यदैकपदमवशिष्यते तदैकेनावशिष्टेन पदेन विलुप्तानां (अनुच्चारितानां) पदानां वचनमर्थश्चाभिधीयते । यथा - रामश्च रामश्च = रामौ । रामश्च रामश्च रामश्च = रामाः । रामश्च रामौच = रामाः । **विरूपाणामपि समानार्थकानाम्-वा.**-समानार्थकानां विरूपाणामप्येकशेषो वक्तव्य इत्यर्थः । वक्रदण्डश्च कुटिलदण्डश्च = वक्रदण्डौ कुटिलदण्डौ वा । घटश्च कुम्भश्च कलशश्च = एष्वेको बहुवचनान्तेनापि - घटाः, कुम्भाः, कलशा वा ।

पुमान्स्त्रिया १।२।६७॥

स्त्रिया सहोक्तौ पुमान् शिष्यते स्त्रीपुंसलक्षण एव विशेषश्चेत् । हंसश्च हंसी च = हंसौ । ब्राह्मणश्च ब्राह्मण्यौ च= ब्राह्मणाः । कुक्कुटाश्च कुक्कुटी च = कुक्कुटाः । पुरुषश्च स्त्री च = पुरुषौ ।

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् १।२।६८॥

स्वस्रा सहोक्तौ भ्रातृशब्दो दुहित्रा सहोक्तौ पुत्रशब्दश्च शिष्यते । भ्राता च स्वसा = भ्रातरौ । पुत्रश्च दुहिता च = पुत्रौ ।

पिता मात्रा १।२।७०॥

मात्रा सहोक्तौ पिता वा शिष्यते । माता च पिता च = पितरौ मातरपितरौ ।

श्वशुरः श्वश्र्वा १।२।७१॥

श्वश्र्वा सहोक्तौ श्वशुरशब्दो वा शिष्यते । श्वश्रूश्च श्वशुरश्च = श्वशुरौ, श्वश्रूश्वशुरौ वा ।

त्यदादीनि सर्वैर्नित्यम् १।२।७२॥

सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते । स च देवदत्तश्च = तौ । स च रामश्च श्यामश्च = ते । यश्च चैत्रश्च मैत्रश्च = ये । अहं च सखायौ च = वयम् । त्वं च पत्नी च = युवाम् । **त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते-वा.-** आदौ त्यदादीनां क्रमो ज्ञेयः । तेषु सहपठितेषु परो गृह्यते । स च यश्च = यौ । सा च या च = ये । यश्च कश्च = कौ । यश्च स च = तौ । त्व चाहं च एष च = वयम् । पूर्वशेषोऽपि दृश्यते इति भाष्यम् = स च यश्च = तौ । अहं च भवाँश्च = आवाम् । **त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि-वा.**-स्त्रिपुंसोर्मध्ये पुंस्त्वम् - सा च देवदत्तश्च = तौ । पुंस्त्रीनपुंसकेषु नपुंसकत्वम् - तच्च चैत्रश्च पुत्री च = तानि । **पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते-वा.**-तच्च देवदत्तश्च = ते स च ते च = तानि ।

इति एक शेषः ॥६-६॥

६-७ समासान्ताः

तत्पुरुषबहुब्रीहिद्विन्द्वसमासैर्निष्पन्नानां समस्तशब्दानामन्तेऽत्र विधीयमानाः प्रत्ययाः समुल्लिख्यन्ते ।

ऋक्पूरब्धूःपथामानक्षे ५।४।७४॥

अ अनक्ष इति छेदः । ऋक्पूरब्धूःपथिन्नन्तस्य समासस्य अप्रत्ययोऽन्तावयवः स्यात् अक्षे या धूस्तदन्तस्य तु न । ऋचोऽर्धमिति विग्रहे अर्धं नपुंसकमिति सूत्रेण समासे प्रातिपदिकसंज्ञाया सुब्लुकि आद्यस्योपसर्जनसंज्ञायां तस्य पूर्वप्रयोगे गुणे अर्धर्च इति जाते ऋक्पूरब्धूः पथामानक्षे इति सूत्रेण अप्रत्यये अर्धर्चा पुंसि चेति सूत्रेण पुँस्त्वे प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - अर्धर्चः । अविद्यमाना ऋचो यस्य सः = अनृचः (केवलयजुरध्येता) । बह्वृचावध्येतर्येव तेनेहानेन अप्रत्ययः = अनृक्सामो बह्वृक् सूक्तम् । विष्णोः पुः = विष्णुपुरम् - षष्ठीसमासः क्लीबत्वं लोकात् । एवं रामपुरम् । शिवपुरम् । विमला आपो यस्मिँस्तत् = विमलापः सरस्तडागश्च - बहुब्रीहिः । राज्ञो धूः = राजधूरा (राज्यभारः) - षष्ठीसमासेऽप्रत्यये परवल्लिङ्गत्वे स्त्रीत्वाट्टाप् । महती चासौ धूः = महाधूरा - कर्मधारयसमासे आन्महत इति आत्वे स्त्रीत्वाट्टाप् । राज्ञः पन्थाः = राजपथः = अप्रत्यये नस्तद्धिते इति टेरनो लोपः । महाँश्चासौ पन्थाः = महापथः - अन्महत इति आत्वम् । सत्पथः = एतौ कर्मधारयौ । सख्युः पन्थाः = सखिपथः - षष्ठीसमासः । अक्षशब्दपराया धूरोऽप्न = अक्षस्य धूः = अक्षधूः । दृढा धूर्यस्य सः = दृढधूः - अक्षः ।

द्व्यन्तरुपसर्गेभ्योऽप ईत् ६।३।९७॥

एभ्यः परस्य कृतसमासान्तस्याप्शब्दस्य अप ईत् स्यात् । द्व्योः (पार्श्वयोः) गता आपो यस्मिन्तदित्यर्थे व्यधिकरणबहुब्रीहिसमासे प्रातिपदिकसंज्ञायां सुब्लुकि ऋक्पूरब्धूः पथामानक्षे इत्यनेन अप्रत्यये द्व्यन्तरूप.. इति सूत्रेण आप्शब्दस्य आकारस्थाने आदेपरस्येति सूत्रस्य सहकारेण ईत्वे सवर्णदीर्घे नपुंसकत्वे प्रातिपदिकसंज्ञायां सुबत्पत्तौ - द्वीपम् । यस्मिन्सः = द्वीपः । अन्तर्गता आपो यस्मिँस्तत् = अन्तरीपम् । द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् - अमरः । प्रतिकूला आपो यस्मिँस्तत् = प्रतीपम् । संगता आपो यस्मिँस्तत् = समीपम् ।

ऊदनोर्देशे ६।३।९८॥

अनोः परस्य आपः ऊत् स्यात् देशे वाच्ये । अनुगता आपो यस्मिन्स इति विग्रहे बहुव्रीहिसमासे प्रातिपदिकसंज्ञायां सुब्लुकि ऋक्पूरब्धूरिति सूत्रेण अप्रत्यये ऊदनोर्देशे इति सूत्रेण आप आकरस्य स्थाने ऊदादेशे प्रातिपदिकसंज्ञायां सुबुत्पत्तिः = अनूपः जलप्रायोदेशः ।

अच् प्रत्यन्ववपूर्वात्सामलोम्नः ५।४।७५॥

एतत्पूर्वात्सामलोमान्तसमासादच् स्यात् । प्रतिगतं साम इति विग्रहे प्रादिसमासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण अचि नस्तद्धिते इति टेरनो लोपे नपुंसकत्वे प्रातिपदिकत्वात्सुबुत्पत्तिः - प्रतिसामम् । एवमनुगतं साम = अनुसामम् । अवगतं साम = अवसामम् । प्रतिगतं लोम = प्रतिलोमम् । अनुलोमम् । अवलोमम् । **कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते-वा.-** कृष्णा भूमिर्यस्य सः = इति विग्रहे बहुव्रीहिसमासे प्रातिपदिकसंज्ञायां सुब्लुकि वार्तिकेनाचि कृते ततोऽचि परे यस्येति चेति इकार लोपे कृष्णाया पुंवद्भावे भसंज्ञायां प्रातिपदिकत्वात्सुबादिः = कृष्णभूमः । उदीचि भूमिर्यस्य सः = उदग्भूमः । पुंवद्भावः । पाण्डुः भूमिर्यस्य सः = पाण्डुभूमः । द्वे भूमी यस्य सः = द्विभूमः = प्रासादः । **संख्याया नदीगोदावरीभ्यां च-वा.-**अच् स्यात् । पञ्चानां नदीनां समाहारः = पञ्चनदम् । सप्तानां नदीनां समाहारः - सप्तनदम् । अनयोः द्विगुसमासः । अचिति योगविभागादन्यत्रापि अच् विहितो दृश्यते - पद्मं नाभौ यस्य सः = पद्मनाभः । ऊर्णं नाभौ यस्य सः = ऊर्णनाभः यस्येतिचेति इकारलोपः । अनयो व्यधिकरणबहुव्रीहिः । दीर्घा रात्रिर्यस्य सः = दीर्घरात्रः । एवं समरात्रः । समानाधिकरणबहुव्रीहिः । यस्येति चेति इकारलोपः ।

ब्रह्महस्तिभ्यां वर्चसः ५।४।७८॥

आभ्यां परस्य वर्चसोऽच्स्यात् । ब्रह्मणो वर्चः = ब्रह्मवर्चसम् । हस्तिनो वर्चः = हस्तिवर्चसम् । **पल्यराजभ्यां चेति वक्तव्यम्-वा.-**अच् स्यात् । पल्यस्य (मांसभोजिनः) वर्चः = पल्यवर्चसम् । राज्ञो वर्चः = राजवर्चसम् । षष्ठीतत्पुरुषः ।

अवसमन्धेभ्यस्तमसः ५।४।७९॥

अव सम् अन्ध एभ्यः परो यस्तमः शब्दस्तस्मादच् स्यात् । अवहीनं तमः = अवतमसम् । सन्ततं तमः = सन्ततमसम् । अन्धं तमः = अन्धतमसम् । तत्पुरुषकर्मधारयः ।

अन्ववतप्ताद्रहसः ५।४।८१॥

एभ्यः परस्माद्रहशब्दादच् स्यात् । अनुगतं रहो यस्मिँस्तत् = अनुरहसम् । बहुव्रीहिः,तत्पुरुषो वा । अनुगतं रहः इति = अनुरहसम् । अवहीनं रहः इति = अवरहसम् । एतौ प्रदिसमासौ । तप्तं रहः इति = तप्तरहसम् । तत्पुरुषः ।

किमः क्षेपे ५।४।७०॥

क्षेपे (निन्दायाम्) यः किंशब्दस्ततःपरस्मात्समासान्तोऽज्नः स्यात् । कुत्सितो राजा = किं राजा । कुत्सितः सखा = किंसखा । एवं किंगौः - कर्मधारये किं क्षेपे इति सूत्रेण कर्मधारयसमासः । क्षेपे किम् = किंराजः । किंसखाः - टच् । किंगवः ।

पथो विभाषा ५।४।७२॥

नञ्पूर्वात्पथः समासान्तो वा स्यात् । न पन्था इति विग्रहे नञ् इति सूत्रेण नञ्समासे प्रातिपदिकसंज्ञायां सुब्लुकि अनेन सूत्रेण वैकल्पिकसमासान्तविधानेन ऋक्पूरिति सूत्रेण अप्रत्यये नस्तद्धिते इति सूत्रेण टिलोपे अपथं नपुंसकमित्युक्तत्वात् क्लीबत्वे प्रातिपदिकसंज्ञायां सुबादिः - अपथम् । समासान्ताभावे - अपन्थाः । उभयोरमार्गः । नञ्पूर्वकोऽयं तत्पुरुषः । बहुव्रीहौ तु = अविद्यमानः पन्थाः यस्य सः = अपथो देशः ।

इति समासान्तः ॥६-७॥

६-८ अलुक्समासः

अत्र समसनीयस्य पूर्वपदस्य विभक्तेरलुक्प्रसङ्गः समुल्लिख्यते ।

अलुगुत्तरपदे ६।३।१॥

अलुगधिकारः प्रागनङः । उत्तरपदाधिकारस्तु आपादसमाप्तेः ।

पञ्चम्याः स्तोकादिभ्यः ६।३।२॥

एभ्यः पञ्चम्या अलुक् स्यादुत्तरपदे । स्तोकान्मुक्तः । अल्पान्मुक्तः । स्तोकाल्पक्षुल्लका इत्यमरः ३।१।६१॥

ओजःसहोऽम्भस्तमसस्तृतीयायाः ६।३।३॥

एभ्यः परायास्तृतीयाया अलुक् स्यादुत्तरपदे परे । ओजसाकृतम् । सहसाकृतम् । अम्भसाकृतम् (जलेन कृतम्) । कर्तृकरणे कृता इति समासः । **अञ्जस उपसंख्यानम्-वा.-** अञ्जसाकृतम् (शीघ्रं कृतम्) ।

आत्मनश्च ६।३।६॥

आत्मनस्तृतीयाया अलुक् स्यादुत्तरपदे परे । **पूरण इति वक्तव्यम्-वा.**-पूरणे = पूरणप्रत्ययान्ते उत्तरपदे परे तृतीयाया अलुक् । आत्मना पञ्चमः । आत्मना षष्ठः । इत्यादि ।

वैयाकरणाख्यायां चतुर्थ्या ६।३।७॥

आत्मनश्चतुर्थ्या अलुक् स्यात् वैयाकरणसंज्ञायां गम्यमानायाम् । आत्मनेपदम् । आत्मनेभाषा ।

परस्य च ६।३।८॥

परशब्दस्य चतुर्थ्या अलुक् स्याद्वैयाकरणसंज्ञायां गम्यमानायाम् । परस्मैपदम् । परस्मैभाषा ।

हलन्तात्सप्तम्याः संज्ञायाम् ६।३।९॥

हलन्तादन्ताच्च सप्तम्या अलुक् स्यात्संज्ञायाम् । त्वचि सारो यस्य सः = त्वचिसारः (वंशः = वेणुः) । एवमरण्येतिलकाः (आरण्यतिलकानि) । अरण्येमाषका । वनेकिंशुकाः । संज्ञायामिति समासः । संज्ञायामित्युक्तेर्नेह - अक्षशौण्डः ।

गवियुधिभ्यां स्थिरः ८।३।९५॥

आभ्यां परस्य स्थिरस्य सस्य षः स्यात् । गविष्ठिरः । युधिष्ठिरः । संज्ञायां हलन्तादिति सप्तम्या अलुक् षत्वं च । **हृद्द्युभ्यां च-वा**.-हृद् दिव् आभ्यां परायाः सप्तम्या अलुक् । हृदयं स्पृशतीति दिवं स्पृशती ति चेति विग्रहः । कर्मणोऽधिकरणविवक्षायां सप्तमी । हृदिस्पृक्-ग् । दिविस्पृक्-ग् ।

मध्याद्गुरौ ६।३।११॥

गुरुशब्दे परे मध्यशब्दात्सप्तम्या अलुक् स्यात् । मध्येगुरुः । असंज्ञार्थमिदम् । **अन्ताच्च-वा**.-अन्तशब्दात्सप्तम्या अलुक् स्याद्गुरौ परे । अन्तेगुरुः ।

अमूर्धमस्तकात्स्वाङ्गादकामे ६।३।१२॥

आभ्यां वर्जितात्स्वाङ्गवाचिन उत्तरस्याः सप्तम्या अलुक् स्यान्न तु कामशब्दे परे । कण्ठे कालो यस्य सः - कण्ठेकालः (शिवः) - प्रक्रिया पूर्वं समुल्लिखिता । उरसि लोमानि यस्य सः - उरसिलोमः । उदरेमणिः । एवमन्येऽपि चिन्त्याः । एते बहुव्रीहिसमासाः ।

बन्धे च विभाषा ६।३।१३॥

हलन्तादन्ताच्च परायाः सप्तम्या अलुक् वा स्यात् बन्धशब्दे परे । हृदिबन्धः, हृद्बन्धः । हस्तेबन्धः, हस्तबन्धः ।

तत्पुरुषे कृति बहुलम् ६।३।१४॥

कृदन्ते उत्तरपदे परे सप्तम्या बहुलमलुक् स्यात् तत्पुरुषे । स्तम्बे (तृणसमूहे) रमत इति = स्तम्बेरमः (हस्ती) कर्णेजपः = पिशुनः । स्तम्बकर्णयो रमिजपोरित्यचि उपपदसमासः । क्वचिन्न - कुरुचरः - अत्रोपपदसमासः ।

शयवासवासिष्वकालात् ६।३।१८॥

एषूत्तरपदेषु अकालवाचिन उत्तरस्याः सप्तम्या वा अलुक् स्यात् । खे शेते इति खेशयः, खशयः । ग्रामेवासः, ग्रामवासः । ग्रमे वसतीति ग्रामेवासी - ग्रामवासी ।

षष्ठ्या आक्रोशे ६।३।२१॥

उत्तरपदे परे षष्ठ्या अलुक् स्यादाक्रोशे गम्यमाने । चौरस्य कुलम् । वृषलस्य कुलम् । आक्रोशाभावे तु न - ब्राह्मणकुलम् । राजकुलम् । **वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु-वा.**-परेषु षष्ठ्या अलुक् स्यात् । वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः - एतेषां षष्ठीसमासः ।

विभाषा स्वसृपत्योः ६।३।२४॥

ऋदन्तात्षष्ठ्या अलुक् वा स्यात्स्वसृपत्योः परयोः ।

मातुःपितुर्भ्यामन्यतरस्याम् ८।३।८५॥

आभ्यां स्वसुः पितुश्च सस्य षो वा स्यात् समासे । मातुः ष्वसा मातुः स्वसा । पितुः ष्वसा । पितुःस्वसा । लुक्पक्षे तु -

मातृपितृभ्यां स्वसा ८।३।८४॥

आभ्यां परस्य सस्य षः स्यात्समासे । मातृष्वसा । पितृष्वस्वसा ।

इति अलुक्समासः ॥६-८॥

६-९ समासाश्रयविधयः

१. ह्रस्वविधिः = यस्य शब्दस्य प्रत्ययात्पूर्वं स्थितो दीर्घस्वरो भवति तस्य ह्रस्वो विधीयते -

घ-रूप-कल्प-चेलड्-ब्रुव-गोत्र-मत-हतेषु ङ्योऽनेकाचो ह्रस्वः ६।३।४३॥

भाषितपुंस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्वः स्यात् घरूपकल्पप्रत्यये परे चेलडादिषु चोत्तरपदेषु परेषु । इयमनयोरतिशेयन उत्कृष्टा ब्राह्मणीत्यतिशयार्थे तरपि घरूपकल्पेति सूत्रेण ह्रस्वे टापि प्रातिपदिकत्वात्सबुत्पत्तौ हलङ्याभ्य. इति सूत्रेण सुब्लुकि - ब्राह्मणितरा । इयमनयोरतिशयेन उत्कृष्टा ब्राह्मणीत्यतिशयार्थे तमपि शेषप्रक्रिया पूर्ववत् - ब्राह्मणितमा । प्रशस्ता ब्राह्मणी = ब्राह्मणिरूपा - प्रशंसायां रूपप्प्रत्ययः । ईषद् असमाप्ता ब्राह्मणी = ब्राह्मणिकल्पा - ईषदसमाप्तौ कल्पप् । चेलदादीनि वृत्तिविषये कुत्सनवाचीनि तैः सह कुत्सितानि कुत्सितैरिति सूत्रेण समासे पूवपदे ह्रस्वः - नीचा ब्राह्मणी = ब्राह्मणिचेली - टिड्ढाणञ् इतिसूत्रेण ङीप् । नीचा ब्राह्मणी = ब्राह्मणिब्रूवा । कुत्सा ब्राह्मणी = ब्राह्मणिगोत्रा । निन्दिता ब्राह्मणी = ब्राह्मणिमता । ङ्यः किम् = दत्तातरा । भाषितपुंस्कात्किम् - आमलकीतरा । यस्यान्ते आकारान्ता वर्तन्ते तत्र टाप् विहितो ज्ञेयः ।

नद्याः शेषस्यान्यतरस्याम् ६।३।४४॥

अङ्यन्तनद्या ङ्यन्तस्यैकाचश्च घादिषु परेषु ह्रस्वो वा स्यात् । अतिशयेन ब्रह्मबन्धूः = ब्रह्मबन्धुतरा ब्रह्मबन्धूतरा । अतिशयिता स्त्री - स्त्रितरा स्त्रीतरा । स्त्रितमा स्त्रीतमा । **कृन्नद्या न-वा.**- लक्ष्मीतरा ।

उगितश्च ६।३।४५॥

उगितः परा या नदी तदन्तस्य घादिषु परेषु ह्रस्वो वा स्यात् । अतिशयिता विदुषी = विदुषितरा । ह्रस्वाभावपक्षे तसिलादिष्विति सूत्रेण पुंवद्भावे ङीपो निवृत्तौ - विद्वत्तरा ।

ङ्यापोः संज्ञाछन्दसोर्बहुलम् ६।३।६३॥

ङ्यन्तस्याऽऽबन्तस्य च बहुलं ह्रस्वः स्यात् संज्ञाछन्दसोः सतोः । संज्ञायाम् - रेवत्याः पुत्रः = रेवतिपुत्रः । एवं रोहिणिपुत्रः । पार्वतिपुत्रः । गौरिपुत्रः । देवकिपुत्रः । कालिदासः । गङ्गदत्तः । छन्दसि - अजायाः क्षीरम् = अजक्षीरम् । बहुलग्रहणात्क्वचिन्न = नान्दीकरः, नान्दीघोषः ।

त्वे च ६।३।६४॥

त्वप्रत्यये परे ङ्यापोर्वा ह्रस्वः । अजत्वम्, अजात्वम् । रोहिणित्वम् रोहिणीत्वम् ।

२. दीर्घविधिः = सूत्रनिर्दिष्टशब्दे परे पूर्वस्थितस्य शब्दस्यान्तस्य ह्रस्वस्य दीर्घो विधियते ।

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिद्रस्रुवस्वस्तिकस्य ६।३।११५॥

कर्णशब्दे परे लक्षणवाचकस्य दीर्घः स्यात् विष्टादीन्वर्जयित्वा । द्विगुणौ कर्णौ यस्य सः = द्विगुणाकर्णः । दात्रौ (दात्ररेखौ) कर्णौ यस्य सः = दात्राकर्णः । एवं त्रिगुणाकर्णः । ध्वजाकर्णः । पशूनां स्वामिविशेषसंबन्धज्ञापनार्थं दात्रशूलचक्राद्याकारयच्चिह्नं क्रियते तदिह लक्षणशब्देन विवक्ष्यते । तेनेह न - लम्बकर्णः । शोभनकर्णः । विष्टादीनां तु लक्षणत्वेऽपि न दीर्घः - विष्टौ कर्णौ यस्य सः = विष्टकर्णः । अष्टौ (अष्टसंख्यारेखाचिह्नौ) कर्णौ यस्य सः = अष्टकर्णः । एवं पञ्चकर्णः । मणिकर्णः, भिन्नकर्णः, छिन्नकर्णः, छिद्रकर्णः, स्रुवकर्णः, स्वस्तिकर्णः ।

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ६।३।११६॥

क्विवन्तेषु नह्यादिषु परेषु पूर्वपदस्य दीर्घः स्यात् । उपनह्यते (बध्यते) इत्यर्थे उपपूर्वकान्नहेः सम्पदादित्वात्कर्मणि क्विपि नहिवृति. इति सूत्रेण पूर्वपदस्य दीर्घे उपानह् इति जाते प्रातिपदिकत्वात्सुबुत्पत्तौ - उपानत् (पादत्राणम्) । एवं निवर्तत इति = नीवृत् (जनपदः) । प्रवर्षतीति = प्रावृष्- प्रावृट् = वर्षा । मर्म विध्यतीति = मर्मावित् । निरोचते इति निरुच् = नीरुक् । अभीरुक् । ऋतिं सहत इति ऋतीषह् = ऋतीषट् । पूर्वपदादिति षत्वम् । परितनोतीति - परीतत् ।

वले ६।३।११८॥

वलप्रत्यये परे पूर्वस्य दीर्घः स्यात्संज्ञायाम् । कृषिरस्यास्तीत्यर्थे रजःकृष्यासुतीति वलचि अस्मिन्परे अनेन सूत्रेण पूर्वपदस्य दीर्घे प्रातिपदिकसंज्ञायां सुबुत्पत्तौ - कृषीवलः । दन्तोऽस्यास्तीति दन्तीवलः (हस्ती) ।

अष्टनः संज्ञायाम् ६।३।१२५॥

उपपदे परे अष्टनो दीर्घः स्यात्संज्ञायाम् । अष्टसु धातुषु पदं (स्थानं) यस्य तत् = अष्टापदम्। विश्वं वसु यस्य सः = विश्वावसुः ।

नरे संज्ञायाम् ६।३।१२९॥

नरे परे विश्वशब्दस्य दीर्घः स्यात्संज्ञायाम् । विश्वस्य नरः = विश्वानरः । विश्वानर एव वैश्वानरः (अग्निः) ।

मित्रे चर्षौ ६।३।१३०॥

विश्वशब्दस्य दीर्घः स्यात् मित्रे परे ऋषौ वाच्ये । विश्वस्य मित्रम् = विश्वामित्रः - षष्ठीतत्पुरुषः । अन्यत्र तु - विश्वमित्रो माणवकः ।

३. विशेषादेशविधिः

हृदयस्य हृल्लेखयदण्लासेषु ६।३।५०॥

लेखादिषु परेषु हृदयस्य हृदादेशः स्यात् । हृदयं लिखतीति हृल्लेखः । उपपदमतिङिति सूत्रेण उपपदसमासः । यत् - हृदयस्य प्रियम् = हृद्यम् । अण् - हृदस्येदं- हार्दम् - आदिवृद्धिः । हृदयस्य लासः = हृल्लासः - षष्ठीतत्पुरुषः ।

वा शोकष्यञ्रोगेषु ६।३।५१॥

एषु परेषु हृदयस्य हृद्वा स्यात् । हृदयस्य शोकः = हृच्छोकः, हृदयशोकः - षष्ठीतत्पुरुषः । ष्यञि - सुहृदयस्य भावः - सौहार्द्यम्, सौहृदयम् । हृदस्य रोगः = हृद्रोगः हृदयरोगः - षष्ठीतत्पुरुषः ।

हिमकाषिहतिषु च ६।३।५४॥

एषु परेषु पादस्य पदित्यादेशः स्यात् । पादस्य हिमम् = पद्धिमम् । पादौ कषतीति पत्काषी । हन्यत इति- हतिः - कर्मणि क्तिन् । पादाभ्यां हतिः = पद्धतिः (मार्गः) । कर्तृकरणे कृतेति तृतीयासमासः ।

ऋचः शे ६।३।५५॥

ऋचः पादस्य पत्स्याच्छे परे । गायत्रीं पच्छः (पादं पादं) शंसति - संख्यैकवचनाच्च वीप्सायाम् ५।४।४३॥ इत्यनेन पादशब्दात् शस्प्रत्ययः = पच्छः =पादस्य स्थाने पत् तस्य च् शस्य छः । ऋचः किम् - पादशः कार्षापणं ददाति ।

उदकस्योदःसंज्ञायाम् ६।३।५७॥

उदकस्य उद इत्यादेशः स्यादुत्तरपदे परे संज्ञायाम् । उदकस्य वाहः = उदवाहः । उदकस्य मेघः = उदमेघः (संज्ञाविशेषौ) । **उत्तरपदस्य चेति वक्तव्यम्-वा.**-उत्तरपदस्य उदकस्य उद इत्यादेशो वक्तव्यः संज्ञायाम् । क्षीरमुदकं यस्य सः = क्षीरोदः । एवं क्षारोदः, घृतोदः, लवणोदः, सुरोदः, दधिमण्डोदः - बहुव्रीहिः ।

समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु ६।३।८४॥

समानस्य सः स्यादुत्तरपदे परे न तु मूर्धादिषु परेषु । समाने गर्भे भव इत्यर्थे समान ङि गर्भ ङि इत्यवस्थायां प्रातिपदिकत्वात्सुब्लुकि सगर्भसयुथ्यसनुताद्यनिति सूत्रेण यनि समानस्य स्थानेऽनेन सूत्रेण सादेशे सुबुत्पत्तिः - अनु भ्राता सगर्भ्यः । एवमनु सखा सयूथ्यः । यो नः सनुत्यः । अमूर्धादिषु किम् - समानमूर्धा । समानप्रभृतयः । समानोदर्काः । अत्र समानस्येति योगविभागाल्लोकेऽपि समानस्य सादेशः - समानः पक्षो यस्य सः = सपक्षः । समानो धर्मो यस्य सः = सधर्मा । धर्मादनिच्केवलादिति सूत्रेणानिच् । समाना जातिर्यस्य सः = सजातिः । एवं सपिण्डः । एषां बहुव्रीहिसमासः । अथवा सहशब्दः सदृशवचनोऽप्यास्ति । सदृशः सख्याः = ससखी । तेनायमस्वपदविग्रहो बहुव्रीहिः ।

ज्योति-जनपद-रात्रि-नाभि-नाम-गोत्र-रूप-स्थान-वर्ण-वयोवचन-बन्धुषु ६।३।८५॥

एषूत्तरपदेषु समानस्य सः स्यात् । समानं ज्योतिर्यस्य स इति विग्रहे अनेकमन्य इति सूत्रेण समासे प्रातिपदिकसंज्ञायां सुपो लुकि ज्योतिजनपद इति सूत्रेण समानस्य स्थाने सादेशे प्रातिपदिकसमुदयात्सुबुत्पत्तिः - सज्योतिः । एवं सजनपदः, सरात्रिः, सनाभिः, सनामा, सगोत्रः, सरूपः, सस्थानः, सवर्णः, सवयाः, सवचनः सबन्धुः ।

चरणे ब्रह्मचारिणि ६।३।८६॥

ब्रह्मचारिण्युपपदे समानस्य सः स्याच्चरणे समानत्वेन गम्यमाने । चरणः शाखा । ब्रह्म वेदः । तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी । समानो ब्रह्मचारी - सब्रह्मचारी - कर्मधारयसमासः ।

तीर्थे ये ६।३।८७॥

तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात् । समाने तीर्थे (गुरौ) वसतीत्यर्थे समानतीर्थशब्दयोः समासे सुब्लुकि समानस्य सादेशे सतीर्थ्यशब्दात्समानतीर्थे वासीति सूत्रेण यत्प्रत्यये यस्येति चेति सूत्रेणाकारलोपे = सतीर्थ्यः ।

दृग्दृशवतुषु ६।३।८९॥

समानस्य सः स्यात् दृग्दृशवतुषु परेषु । **समानान्ययोश्चेति वक्तव्यम्-वा.**-समानान्याभ्यां पराभ्यां शब्दाभ्यां क्विन्कञौ वक्तव्याविंत्यर्थः ।

आ सर्वनाम्नः ६।३।९१॥

सर्वनाम्न आकारोऽन्तादेशः स्याद्दृग्दृशवतुषु परेषु । समानो दृश्यत इत्यर्थे सामानदृश् इत्यवस्थायां समानान्ययो श्चेति वक्तव्यमिति वार्तिकेन क्विन्प्रत्ययेऽस्य सर्वापहारिलोपे "दृग्दृशवतुषु" इति सूत्रेण समानस्य स्थाने सादेशे सदृश् इति जाते प्रातिपदिकत्वात्समुदायात्सुबुत्पत्तौ सदृश् स् इति जाते हलङ्याब्भ्य. इति सूत्रेण सोर्लोपे सदृश् इति जाते व्रश्चभ्रस्जेति सूत्रेण शस्य षत्वे षस्य झलां जशोऽन्ते इति सूत्रेण जश्त्वेन डकारे डस्य क्विन्प्रत्ययस्य कुरिति सूत्रेण कुत्वेन गकारे वाऽवसाने इति सूत्रेण वैकल्पिके चर्त्वेन कत्वे चर्त्वाभावे च ग् एव- सदृक्-ग् । कञ्प्रत्यये कञोर्लोपे समानस्य सत्वे सदृश् अ इति जाते वर्णसंयोगे सुबुत्पत्तौ रुत्वे विसर्गे च = सदृशः ।

अन्यदिव दृश्यत इत्यर्थे अन्यत् दृश् इत्यवस्थायां समानान्ययो श्चेति वक्तव्यमिति वार्तिकेन क्विनि अस्य सर्वापहारिलोपे आ सर्वनाम्न इति सूत्रेण अन्यत् शब्दस्यान्त्यस्यातः स्थाने आकारान्तादेशे अन्यादृश् इति जाते प्रातिपदिकत्वात्सुबुत्पत्तौ अन्यादृश् स् इति स्थितौ सस्य हलङ्याब्भ्य. इति सूत्रेण लोपे शस्य व्रश्चभ्रस्जेति सूत्रेण षत्वे षस्य झलां जशोऽन्ते इति सूत्रेण जश्त्वेन डकारे डस्य क्विन्प्रत्ययस्येति सूत्रेण कुत्वेन गकारेऽस्य चर्त्वेन कत्वे चर्त्वाभावे च ग् एव - अन्यादक्-ग् । कञ्प्रत्यये कञोर्लोपे आत्वे अन्यादृश् अ इति जाते वर्णमेलने प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च - अन्यादृशः ।

इदंकिमोरीश्की ६।३।९०॥

इदम् किम् शब्दयोः क्रमाद् ईश् की एतावादेशौ स्तो दृग्दृशवतुषु उत्तरपदेषु परेषु । इदमिव दृश्यत इत्यर्थे त्यदादिषु दृशोऽनालोचने कञ् चेति सूत्रेण क्विनि सर्वापहारिलोपे इदम् दृश् इति जाते इदंकिमोरीश्की इति सूत्रेण इदमः स्थाने ईशादेशे शलोपे ईदृश् जाते प्रातिपदिकत्वात्सौ हलङ्याब्भ्य. इति सुलोपे वश्चभ्रस्जेति शस्य षत्वे षस्य झलां जशोऽन्ते इति जश्त्वेन डकारे डस्य क्विन्प्रत्ययस्येति कुत्वेन गकारे वैकल्पिके चर्त्वे चर्त्वाभावे च - ईदक्-ग् । कञि कृते इदम्दृश् अ इति जाते इदमः स्थाने ईशादेशे वर्णसंमेलने ईदृश इति जाते सौ रुत्वे विसर्गे च = ईदृशः ।

किमिव दृश्यत इत्यर्थे त्यदादिषु दृशोऽनालोचने कञ्चेति सूत्रेण क्विनि सर्वापहारिलोपे किम्दृश् इति जाते इदंकिमोरीश्की इत्यनेन किमः स्थाने की आदेशे कीदृश् इति जाते प्रातिपदिकत्वात्सुबुत्पत्तौ हलङ्याब्भ्य. इति सूत्रेण सुलोपे शस्य षत्वे षस्य डकारे डस्य वैकल्पिके चर्त्वेन चर्त्वे चर्त्वाभावे च ग् एव = कीदक्-ग् । कञि कृते किम्दृश् अ इति जाते किमः स्थाने की आदेशे वर्णसंमेलने कीदृश् अ इति जाते वर्णमेलने प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च = कीदृशः ।

क्सोऽपि वाच्यः-वा.-सर्वनाम्नः । **दृक्षे चेति वक्तव्यम्-वा.**-समानस्य सत्वं वक्तव्यं दृक्षे परे । समानो दृश्यत इत्यर्थे क्सोऽपि वाच्य इति वार्तिकेन क्सप्रत्यये कस्य लशक्वतद्धिते इति सूत्रेण लोपे समान दृश् स इति जाते समानस्य स्थाने दृक्षे चेति वार्तिकेन सादेशे सदृश् स इत्यवस्थायां शस्य स्थाने व्रश्चभ्रस्जेति सूत्रेण षत्वे षस्य षढोः कः सि इति सूत्रेण कत्वे ककारात्परस्य सस्य आदेशप्रत्यययोरिति सूत्रेण षत्वे क्ष्संयोगे क्षत्वे प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च = सदृक्षः । अन्यो दृश्यते इयर्थे अन्यत् दृश् इत्यवस्थायां क्सोऽपि वाच्य इति वार्तिकेन क्सप्रत्यये कस्य लशक्वतद्धिते इति सूत्रेण लोपे अन्यत् दृश् स इति जाते आः सर्वनाम्न इति सूत्रेण अन्यतोऽत्स्थाने आत्वे शस्य व्रश्चभ्रस्जेति षत्वे षस्य "षढोः कः सि" इति सूत्रेण कत्वे ककारात्परस्य सस्य आदेश प्रत्यययोरिति सूत्रेण षत्वे क्ष्संयोगे क्षत्वे प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च - अन्यादृक्षः ।

तदिव दृश्यते इत्यर्थे त्यदादिषु दृशोऽनालोचने कञ्चेति सूत्रेण क्विनि सर्वापहारिलोपे तद्दृश् इति जाते आ सर्वनाम्न इति सूत्रेण तच्छब्दस्यान्त्यस्यातः स्थाने आत्वे तादृश् इति जाते प्रातिपदिकत्वात्सौ तादृश् स् इति स्थितौ हलङ्याब्भ्य. इति सोर्लोपे शस्य व्रश्चभ्रस्जेति षत्वे षस्य झलां जशोऽन्ते इति जश्त्वेन डकारे डस्य क्विन्प्रत्ययस्येति कुत्वेन गकारेऽस्य चर्त्वेन कत्वे चर्त्वाभावे च ग् एव = तादक्-ग् । कञ्प्रत्यये कृते कञोर्लोपे आत्वे तादृश् अ इति जाते वर्णसंमेलनले प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च = तादृशः । एतदिव इव दृश्यते इत्यर्थेऽतः परं तच्छब्दवत् = एतादृक्-ग् । एतादृशः । तद्दृश् एतद्दृश् आभ्यां "क्सोऽपि वाच्य" इति वार्तिकेन क्से कृतेऽनुबन्धलोपे

आत्वे शस्य षत्वे षस्य कत्वे ककारात्परस्य सस्य षत्वे क्ष्संयोगे क्षत्वे प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च - तादृक्षः एतादृक्षः । युष्मदिव दृश्यते इत्यर्थे सर्वो विधिरन्यच्छब्दवत् = युष्मादृक्-ग्, युष्मादृशः, युष्मादृक्षः । युष्मदिव दृश्यते इत्यर्थे त्यदादिषु दृश इति सूत्रेण क्विनि सर्वपहारिलोपे युष्मद् दृश् इति जाते प्रत्ययोत्तरपदलोप श्चेति सूत्रेण युष्मदो मपर्यन्तभागे त्वदादेशे त्वद् दृश् इत्यवस्थानान्तरं तादृग्वत् = त्वादृक्-ग्, त्वादृशः, त्वादृक्षः । अस्मदिव दृश्यते इति = अस्मादृक्-ग्, अस्मादृशः, अस्मादृक्षः । मादृक्-ग्, मादृशः, मादृक्षः । एतेष्वपि प्रत्ययोत्तरपदयो श्चेति सूत्रेण अस्मदो मपर्यन्तभागे मआदेशो भवति । अन्यत्सर्वं त्वादृग्वत् ।

परिमाणार्थे - यत्परिमाणमस्येत्यर्थे यत्तदेतेभ्यः परिमाणे वतुपिति सूत्रेण वतुपि उपोरनुबन्धलोपे यत् वत् इति जाते आ सर्वनाम्न इति सूत्रेण यतोऽन्तस्य तस्य स्थाने अकारान्तादेशे सवर्णदीर्घे यावत् इत्यवस्थायां प्रातिपदिकत्वात्सौ उगिदचां सर्वनामस्थानेऽधातोरिति सूत्रेण नुमि अत्वन्तस्य चाधातोरिति सूत्रेण उपधाया दीर्घे यावान् त् स् इति स्थितौ हलङ्याब्भ्य. इत्यनेन सोर्लोपे संयोगान्तस्य लोप इति सूत्रेण तकारस्य लोपे पूर्वत्रासिद्धमिति सूत्रस्य नियमेन तकारस्य लोपासिद्धत्वेन नलोपाभावे - यावान् । एवं तत्परिमाणमस्यत्यर्थे - तावान् ।

किं परिमाणमस्यत्यर्थे किमिदंभ्या वो घ इति सूत्रेण वतुपि किमिदंभ्यामित्यनेनैव वतुप्स्थाने घादेशे घस्य इयदादेशे किम् इयत् इति स्थिते इदंकिमोरीश्की इति सूत्रेण किमः स्थाने की आदेशे यस्येति चेति सूत्रेण कीस्थितस्य ईकारलोपे प्रातिपदिकत्वात्सौ तत्परे उगिदचां सर्वनामस्थानेऽधातोरिति सूत्रेण नुमि अत्वन्तस्येति दीर्घे कियान्त् स् इति जाते ततः शेषं यावान्वत् - कियान् ।

इदं परिमाणमस्येत्यर्थे वतुपि वतो घत्वे घस्य इयादेशे इदम् इयत् इति स्थिते इदं किमोरीश्की इति सूत्रेण इदमः स्थाने ईशादेशे शस्य लोपो ई इयत् इति जाते यस्येति चेति ईकारलोपे इयत् इत्यवस्थानन्तरं शेषं कियान्वत् - इयान् ।

कोः कत्तत्पुरुषेऽचि ६।३।१०१॥

कुशब्दस्य कत् स्यात् अजादावुत्तरपदे तत्पुरुषसमासे । कुत्सितोऽश्व इति विग्रहे कुगतिप्रादय इति सूत्रेण समासे प्रातिपदिकत्वात्सुब्लुकि कुशब्दस्य स्थाने कदादेशे विभक्तिकार्ये - कदश्वः । एवं कुत्सितमन्नम् = कदन्नम् । कदुष्ट्रः । कदजः । कुत्सित उष्ट्रो यस्य स इति बहुब्रीहित्वान्न कदादेशः - कूष्ट्रो राजा । **त्रौ च-वा**.-त्रिशब्दे परे कदादेशो वक्तव्य इत्यर्थः । कुत्सितास्त्रयः = कत्त्रयः । कुत्सिते (निन्दाया) अर्थे कद् कु का एते प्रयुज्यन्ते । कुत्सितः अर्यः = कदर्यः । कुत्सितं कर्म कार्यं वा = कुकर्म कुकार्यं च ।

विभाषा पुरुषे ६।३।१०६॥

पुरुषे परे कोः कादेशो वा स्यात् । कुत्सितः पुरुषः = कापुरुषः कुपुरुषः । कुगतिप्रादय इति समासः । अप्राप्तविभाषेयम् । ईषदर्थे पूर्वविप्रतिषेधान्नित्यमेव - ईषत्पुरुषः - कापुरुषः । अत्र ईषत्कुत्सितार्थे ज्ञेयः ।

कवं चोष्णे ६।३।१०७॥

उष्णशब्दे उत्तरपदे परे कोः कवं को वा स्यात् कदादेशोऽपि । ईषदुष्णम् - कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति - अमरः । अत्र का कव मन्द कद् एतेऽल्पोष्णेऽर्थे ज्ञेयाः ।

पृषोदरादीनि यथोपदिष्टम् ६।३।१०९॥

पृषोदरप्रकरणानि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः । पृषत उदरमित्यत्र तकारलोपे आद्गुण इति सूत्रेण गुणे स्वादिकार्ये च - पृषोदरम् । अत्र वर्णनाशेन निष्पन्नोऽस्ति । वारिबाहक इत्यत्र पूर्वपदस्य वारिणः स्थाने बादेशे उत्तरपदादे बास्थाने लत्वे स्वादिकार्ये - बलाहकः ।

भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् ॥

१. भवेद्वर्णागमाद् - हन हिंसागत्योरिति धातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यच इति सूत्रेणाचि समागमे हन्स इति जाते नश्चापदान्तस्य झलीति सूत्रेणानुस्वारागमे स्वादिकार्ये - हंसः । २. वर्णविपर्ययात् - हिसि हिंसायामित्यत्र नन्दिग्रहिपचादिभ्य इति सूत्रेणाचि इदितत्वात्नुमि नश्चापदान्तस्य झलीति सूत्रेणानुस्वारे हकारसकारयोर्विपर्यये स्वादिकार्ये - सिंहः । ३ वर्णविकृते - गूढ आत्मा इति विग्रहे उत्तरपदादेराकारस्य उकारे पूर्वपरयोः आद्गुण इति सूत्रेण गुणे स्वादिकार्ये - गूढोत्मा - उत्तरे स्थितः शव्द आत्मनिति वर्तते । वर्णनाशादित्यस्योपरि प्रोक्तम् ।

पारस्करप्रभृतीनि संज्ञायाम् ६।१।१५७॥

एतानि ससुट्कानि निपात्यन्ते नाम्नि । पारं करोतीति विग्रहे उपपदसंज्ञायां कृञो हेतुताच्छील्यानुलोमेषु इति सूत्रेण टप्रत्यये गुणे कर्मणि षठ्यां पार अस् कर इति जाते सुबुत्पत्तेः प्रागेव उपपदसमासे प्रातिपदिकत्वात्सुब्लुकि पार कर इत्यवस्थायां पारस्कर. इति सूत्रेण सुटो निपाते स्वादिकार्ये - पारस्करः = कश्चिदाचार्यः । किं किमपि धत्ते वानरसैन्यं इति विग्रहे किं धा इत्यत आतोऽनुपसर्गे क इति सूत्रेण कप्रत्यये आकारलोपे किं ध इति जाते टापो निपाते किंधा इति किमो निपातनात् द्वित्वे किंकिंधा इति च जाते पूर्वस्य किमिति स्थितस्य मस्य लोपे ततः सुटि षत्वे परसवर्णे स्वादिकार्ये - किष्किन्धा = काचिन्नगरी । **प्रायस्य चित्तिश्चित्तयोः** - गणपाठः - प्रायस्य चित्तमिति विग्रहे षष्ठीतत्पुरुषसमासे प्रातिपदिकत्वात्सुब्लुकि सुटो निपाते चुत्वे स्वादिकार्ये - प्रायश्चित्तिः, प्रायश्चित्तम् । प्रायः पापं विजानीयाच्चित्तं तस्य विशोधनमिति स्मृतिः ।

४. मुमागमः

अरुर्द्विषदजन्तस्य मुम् ६।३।६७॥

अरुषो द्विषतोऽजन्तस्य च मुम् खिदन्ते प्रत्यये परे न त्वव्ययस्य । अरुषं तुदतीति विग्रहे उपपदसंज्ञायां विध्वरुषोस्तुद इति सूत्रेण खशि कर्मणि षठ्यां अरुस् अस् तुद इत्यवस्थायां सुबुत्पत्तेः प्रागेव उपपदसमासे प्रातिपदिकत्वात्सुपो लुकि अरुर्द्विषदजन्तस्य मुमिति मुमि कृते संयोगान्तस्य सकारस्य लोपेऽनुस्वारे परसवर्णे प्रातिपदिकसंज्ञायां स्वादिकार्ये - अरुन्तुदः = मर्मभेदी ।

द्विषत्परयोस्तापेः ३।२।३९॥

द्विषति परे च शब्दे कर्मण्युपपदे तापिधातोः खच् प्रत्ययः स्यात् ।

खचि ह्रस्वः ६।४।९४॥

खच्परे णौ उपधाया ह्रस्वः स्यात् । द्विषन्तं परं वा तापयतीति विग्रहे उपपदसंज्ञायां द्विषत्परयोस्तापेरिति सूत्रेण खचि, खचि ह्रस्व इति सूत्रेण तापेर्ह्रस्वे णेर्लोपे च कर्मणि षष्ठ्यां द्विषत् अस्, पर अस् वा तप इति जाते सुबुत्पत्तेः प्रागेव उपपदसमासे प्रातिपदिकत्वात्सुब्लुकि अरुद्विषदजन्तस्य मुमिति मुमि द्विषतः संयोगान्तस्य तकारस्य लोपेऽनुस्वारे परसवर्णे स्वादिकार्ये - द्विषन्तपः, परन्तपः । जनमेजयतीति विग्रहे उपपदसंज्ञायां ण्यन्तादेजेर्धातोः "एजेः खशिति" सूत्रेण खशि अनुबन्धलोपे शपि गुणे अयादेशे पूर्वरूपे कर्मणि षष्ठ्यां जन अस् एजय इत्यवस्थायां सुबुत्पत्तेः प्रागेव उपपदसमासे प्रातिपदिकत्वात्सुब्लुकि मुमि कृते विभक्तिकार्ये - जनमेजयः = कश्चिद्राजा ।

५. षत्वम्

नुम्विसर्जनीयशर्व्यवायेऽपि ८।३।५८॥

एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः (षः) स्यात् । पिपठीष्षु पिपठीःषु - वा शरि इति वैकल्पिको विसर्गः । चिकीर्षुः ।

आदेशप्रत्यययोः ८।३।५९॥

इण्कुभ्यां परस्यापदान्तस्यादेशस्य प्रत्ययावयवश्च यः सस्तस्य मूर्ध्यन्यादेशः स्यात् । रामेषु हरिषु, गौषु, ग्लौषु, गौरीषु, जिष्णु, भूष्णुः धृष्णुरित्यादि ।

६. णत्वम्

रषाभ्यां नो णः समानपदे ८।४।१॥

रेफषकाराभ्यां परस्य नस्य णः स्यात्स्यादेकपदे (अखण्डपदे) । चतुर्णाम् । कर्णः । वर्णः । त्राणः । द्राणः । घ्राणः । जीर्णः । शीर्णः । पूर्णः । तीर्णः । जिष्णुः । भूष्णुः । कृष्णः । धृष्णुरित्यादि ।

अट्कुप्वाङ्नुम्व्यवायेऽपि ८।४।२॥

व्यवायः = व्यवधानम् । अव्यवायः = अव्यवधानम् । अट् कवर्गः पवर्ग आङ नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे (अखण्डपदे) रामेण, रामाणाम् । नरेण, नराणाम् । तुरगेण तुगाणाम् । धर्मेण धर्माणाम् । सूर्येण सूर्याणाम् । शक्रेण, शक्राणाम् । ग्रहेण, ग्रहाणाम् । व्याघ्रेण व्याघ्राणाम् । मेषेण मेषाणाम् । वृषेण वृषाणाम् । विषयेण विषयाणाम् । रमाणाम्, नारीणम्, श्रीणाम् । क्षेमेण, क्षेमाणाम् । विष्कम्भेण विष्कम्भाणाम् । मृगेण मृगाणाम् । शृङ्गेन शृङ्गाणाम् । नृपेण नृपाणाम् । क्रीणाति इत्यादि । चुटुतुलशर्व्यवायेऽपि न णत्वम् इति नियमानुसारं यस्य शब्दाभ्यन्तरे रेफषकाराभ्यां संयुक्तैश्चवर्ग-टवर्ग-तवर्ग-ल-श-स वर्णैर्व्यवहितः शब्दस्यान्ते स्थितो नकारो भवति । तस्य नकारस्य णत्वं न भवति । यथा-कृष्णेन कृष्णानामित्यादि । सर्वेषां रेफषकाराभ्यां रहितानां शब्दानामन्ते स्थितस्य नकारस्य णत्वं न भवति टाऽऽम्विभक्त्योः परयोः ।

यथा-देवेन देवानाम्, गुणेन गुणानामित्यादि । **ऋवर्णान्नस्य णत्वं वाच्यम् -वा.-** ऋवर्णन्तात्परस्य नस्य णत्वं वक्तव्यमित्यर्थः । धातृणाम् । पितृणाम् । मातृणाम् । सव्यष्टृणाम् । भातृणाम् । जामातृणाम् । दुहितृणाम् । देवृणाम् । शृणोति । शृणुतः । वृणोति ।

नृ च ६।४।६॥

अस्य नामि वा दीर्घः । नृणाम् नृणाम् ।

न तिसृ-चतसृ ६।४।४॥

एतयोर्नामि न दीर्घः । तिसृणाम् । चतसृणाम् ।

इति समासाश्रयविधयः ६-९॥

इति समासप्रप्रकरणे षष्ठोऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः ॥ ७ ॥

७. तद्धितः

तद्धितशब्दस्यार्थेऽस्ति-तेभ्यः प्रयोगेभ्यो हिता इति तद्धिताः प्रोच्यन्ते । तद्धितप्रत्ययाः नामसर्वनामविशेषणाव्ययादिशब्दानामन्ते संयुज्यन्ते । यतः सर्वे तद्धितान्ताः शब्दाः नाम विशेषणानि अव्ययानि च भवन्ति । तद्धितप्रत्ययेन शब्दानामर्थो विशिष्टो भवति । तेन लेखो भाषणं च विशिष्टं भवति । यतस्तद्धितशब्दाः स्वलेखनसमयेऽन्यैश्च लिखिते लेखेऽपि सदा विचारणीयाः ।

७-१ अपत्याधिकारः

अश्वपत्यादिभ्यश्च ४।१।८४॥

एभ्योऽण् स्यात् प्राग्दीव्यतीयेष्वर्थेषु ।

तद्धितेष्वचामादेः ७२।११७॥

ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात् । अश्वपतेरपत्यादि इति लौकिकविग्रहे अश्वपति अस् इत्यस्मात्, अश्वपत्यादिभ्यश्चेति सूत्रेण अणि तद्धितान्तात्प्रातिपदिकसंज्ञायां सुपो लुकि तद्धितेष्वचामादेरित्येनादिवृद्धौ यस्येति चेत्यनेन इकारलोपे प्रातिपदिकात्स्वादिकार्ये - आश्वपतम् । एवं गाणपतम् । **बहिषष्टिलोपो यञ्च-वा**.-बहिःशब्दात् प्राग्दीव्यतीयेऽर्थे यञ्प्रत्ययः स्यात् टेर्लोपश्च । बहिर्भव इत्यर्थे बहिः शब्दाद्यञि टेर्लोपे उपरि सूत्रेणादिवृद्धौ प्रातिपदिकात्स्वादिकार्ये - बाह्यः । **ईकक्च-वा.**-बहिः शब्दात्पूर्वोक्तेऽर्थे ईकक् स्यादित्यर्थः ।

किति च ७२।११८॥

किति तद्धिते च परेऽचामादेरचो वृद्धिः स्यात् । बहिर्भव इत्यर्थे बहिःशब्दात् ईकक्प्रत्यये आदिवृद्धौ यस्येति चेति इकारलोपे प्रातिपदिकत्वात्सौ सस्य रुत्वे विसर्गे च = बाहीकः । तद्धिते ञिति णिति किति च परे विशेषसूत्रं विनाऽऽभ्यां सूत्राभ्यां सर्वत्र पदस्यादेरचो वृद्धिः क्रियते ।

दित्यदित्यादित्यपत्युत्तरपदाण्यः ४।१।८५॥

दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्याद् । अणोऽपवादः । दितेरपत्यादि इत्यर्थे ण्यप्रत्यये चुटू इत्यनेन णस्य लोपे णित्वादादिवृद्धौ यस्येति चेत्यनेन इकारलोपे प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च - दैत्यः । अदितेरादित्यस्य वा अपत्यम् = आदित्यः । एवं बृहस्पतेरपत्यम् = बार्हस्पत्यः । प्रजापतेरपत्यम् - प्राजापत्यम् । वनस्पतेरपत्यम् = वानस्पत्यः ।

उत्सादिभ्योऽञ् ४।१।८६॥

उत्सादिभ्यः प्राग्दीव्यतीयेष्वर्थेषु अञ् स्यात् । अणादीनामपवादः । उत्सस्यापत्यादि = औत्सः ।

तस्यापत्यम्[1] ४।१।९२॥

षठचन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः । अणादयश्चोक्ताः । इञादयो वक्ष्यमाणाश्च प्रत्यया उच्यन्ते ।

---

[1] तस्य इति षठ्यन्तानुकरणं लुप्तषष्ठीकं पदम् । "अपत्यम्" इति सप्तम्यर्थे प्रथमा । एवं "तत्र जातः", तेन प्रोक्तम्, "तस्मै हितम्, तत आगत, तदधीते वेद वा, सोऽस्य निवास इत्यादीनि सप्तम्यन्ताद्यनुकरणानि लुप्तपञ्चमीकानि । अर्थनिर्देशे सर्वत्र सप्तम्यर्थे सौत्री प्रथमा ।

ओर्गुणः ६।४।१४६॥

उवर्णान्तस्य भस्य गुणः स्यात् तद्धिते परे । उपगोरपत्यमित्यर्थे तस्यापत्यमित्यनेनाणि प्रातिपदिकत्वात्सुपो लुकि आदिवृद्धौ ओर्गुण इति गुणेऽवादेशे प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च - औपगवः । आश्वपतः । ण्यः= दैत्य । उत्सो निर्झरस्तत्र भवः = अण् = औत्सः । स्त्रिया अपत्यादिः, स्त्रैणः = स्त्रैणशब्देन स्त्रीत्वं स्त्रीणां समुदायं स्त्रीजितं पुरुषं वा यथावसरं बुध्येत । पुंसोऽपत्यादिः = पौंस्नः । विग्रहेऽपत्यशब्दो नपुंसकत्वं प्रयुज्यते क्लीबत्वात् । इत्यपत्याधिकारः - ७-१॥

७-२ रक्ताधिकारः

तेन रक्तं रागात् ४।२।१॥

तृतीयान्ताद्रागवाचकशब्दाद् रक्तेऽर्थे अण् स्यात् । रज्यतेऽनेन रागः । कषायेण रक्तं वस्त्रं काषायम् । रागात्किम् - देवदत्तेन रक्तं वस्त्रम् । रागः = रक्तपीतकषायादिवर्णः ।

दृष्टं साम ४।२।७॥

तेन दृष्टमित्यर्थेऽण् स्यात् । वसिष्ठेन दृष्टं वासिष्ठं साम ।

तत्रोद्धृतममत्रेभ्यः ४।२।१४॥

सप्तम्यन्तात्पात्रवाचकशब्दादण् स्यात् उद्धृतेऽर्थे । शरावे उद्धृतः = शाराव ओदनः ।

तस्य समूहः ४।२।३७॥

षष्ठ्यन्तादण् स्यात्समूहेऽर्थे । वकानां समूहो वाकम् । वृकाणां समूहो वार्कम् । काकानां समूह काकम्

ग्रामजनबन्धुभ्यस्तल् ४।२।४३॥

एभ्यः समूहे तल्स्यात् । ग्रामाणां समूहो ग्रामता । जनानां समूहो जनता । बन्धूनां समूहो बधुता ।

तदधीते तद्वेद ४।२।५९॥

द्वितीयान्तादधीते वेद इत्यर्थयोरणादयः प्रत्ययाः स्युः ।

क्रमादिभ्यो वुन् ४।२।६१॥

द्वितीयान्तादधीत वेद वेत्यर्थे क्रमादिभ्यो वुन् स्यात् । क्रममधीते वेद वा = क्रमकः । पदकः, शिक्षकः । मीमांसकः ।

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७।३।३॥

पदान्ताभ्यां यकारवकाराभ्यां परस्याचो न वृद्धिः किन्तु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः । व्याकरणमधीते वेद वा = अण् = वैयाकरणः । इति रक्ताधिकारः ७-॥

७-३ चातुरर्थिका

तदस्मिन्नस्तीति देशे तन्नाम्नि ४।२।६७॥

तदस्मिन्नित्यर्थे प्रथमान्तादणादयः प्रत्ययाः स्युः प्रत्ययान्तेन देशे गम्ये । उदुम्बराः सन्त्यस्मिन् - औदुम्बरो देशः ।

तेन निर्वृत्तम् ४।२।६८॥

तृतीयान्तान्निर्वृत्तमित्यर्थेऽणादयः प्रत्ययाः स्युर्देशे गम्ये । कुशाम्बेन निर्वृत्ता = निर्मिता = कौशाम्बी नगरी ।

तस्य निवासः ४।२।६९॥

तस्य निवास इत्यर्थे षष्ठयन्तादणादयःस्यु तन्नाम्नि देशे गम्ये । शिबीनां निवासः = शैबो देशः ।

अदूरभवश्च ४।२।७०॥

तस्य अदूरभव इत्यर्थे षष्ठयन्तादणादयः स्युः तन्नाम्नि देशे गम्ये । विदिशाया अदूरभवम् = वैदिशम् = अण्, आदिवृद्धिः । विदिशा नाम नगरी । इति चातुरर्थिका- ७-३॥

७-४ शैषिकाः

शेषे ४।२।९२॥

अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राणादयः स्युः । श्रवणेन गृह्यते - श्रावणः शब्दः । उपनिषदि प्रतिपादितः = औषनिषदः पुरुषः = अण्, आदिवृद्धिश्च । दृषदा पिष्टा - दार्षदाः सक्तवः । उलुखले क्षुण्णः - औलुखलो यावकः । अश्वैरुह्यते - आश्वो रथः । चतुर्भि(चक्रैः)रुह्यते = चातुरं शकटम् । चतुर्दश्यां दृश्यते - चातुर्दशं रक्षः । सर्वत्र अण् आदिवृद्धि स्वादिकार्यं च । तस्य विकार इत्यतः प्राक् शेषाधिकारः । तद्धिते ञिति णिति किति च प्रत्यये परे आदिवृद्धिर्भवति -

राष्ट्रावारपाराद् घखौ ४।२।९३॥

आभ्यां घ-खौ क्रमेण स्तः । घस्य इय्, खस्य ईन् । राष्ट्रे जातो भवो वा - राष्ट्रियः । एवमवारपारीणः ।

तत्र जातः ४।३।२५॥

सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च प्रत्ययाः स्युः । सुघ्ने जातः = सौघ्नः । उत्से जातः = औत्सः ।

वृद्धाच्छः ४।२।११४॥

वृद्धसंज्ञकशब्दात् छप्रत्ययः स्यात् । शालायां भवो जातो वेत्यर्थे छप्रत्यये छस्य स्थाने ईय् आदेशे टिलोपे - शालीयः ।

त्यदादीनि च १।१।७४॥

त्यदादिशब्दानां वृद्धसंज्ञानि स्युः । तस्यायम् = तच्छब्दस्य वृद्धसंज्ञायां वृद्धाच्छ इति सूत्रेण छप्रत्यये छस्य ईयादेशे सौ रुत्वे विसर्गे च - तदीयः ।

भवतष्ठक्छसौ ४।२।११५॥

वृद्धसंज्ञकात् भवत ठक्छसौ स्तः । भवतोऽयम् = भावत्कः । **सिति च-वा.**-सिति तद्धिते पूर्वं पदं (पदसंज्ञाम्) स्यात् । जस्त्वम् । भवदीयः = छस् = ईय् ।

तत्र भवः ४।३।५३॥

सप्तमीसमर्थाद्भव इत्यर्थेऽणादयो घादयश्च यथायथं स्युः । सुघ्ने भवः = सौघ्नः । उत्से भवः - औत्सः ।

तत आगतः ४।३।७४॥

पञ्चम्यन्तसमर्थात् तत आगत इत्यर्थेऽणादयो घादयश्च प्रत्ययाः स्युः । सुघ्नादागतः - सौघ्नः । इति शैषिकाः ७-४॥

७-५ विकारार्थः

तस्य विकारः ४।३।१३४॥

षष्ठ्यन्तसमर्थात् विकार इत्यर्थे प्राग्दीव्यतीया अणादयः स्युः । **अश्मनो विकारो टिलोपो वक्तव्यः-वा.**-अश्मा = पाषाणः = अश्मनो विकार = आश्मः । भस्मनो विकारः = भास्मनः = अत्र टिलोपाभावः । मृदो विकारः = मार्तिकः - ठक् = ठस्य इक् वृद्धिश्च ।

अवयवे च प्राण्यौषधिवृक्षेभ्यः ४।३।१३५॥

षष्ठ्यन्तेभ्यः प्राण्योषधिवृक्षेभ्योऽवयवे विकारे चाणादयः स्युः । मयूरस्यावयवो विकारो वा = मायूरः । मूर्वाया अवयवो विकारो वा = मौर्वं काण्डं भस्म औषधिविशेषो वा । इति विकारार्थः ७-५॥

७-६ ठगधिकारः

अस्ति नास्ति दिष्टं मतिः ४।४।६०॥

इत्येवं मतिरस्यास्तीत्यर्थे अस्ति-नास्ति-दिष्ट-शब्देभ्यः प्रथमान्तेभ्यः ठक् स्यात् । अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः =परलोकस्वीकर्ता । नास्ति परलोक इत्येव मतिर्यस्य सः = नास्तिकः = परलोकास्वीकर्ता । दिष्ट(दैवं भाग्यं च)मिति मतिर्यस्य सः = दैष्टिकः = दैववादी, भाग्यवादी । इति ठगधिकारः ७-६॥

७-७ यदधिकारः

तद्वहति रथ-युग-प्रासङ्गम् ४।४।७६॥

द्वितीयान्तेभ्यो रथयुगप्रासङ्गशब्देभ्यो यत् स्यात् । रथं वहति रथ्यः । एवं युग्यः । प्रासङ्ग्यः = अश्वादीनां रथादिवहने शिक्षितीकरणार्थं युगे यदन्यद्युगं दीयते तत्प्रासङ्गम् । इति यदधिकारः ७-७॥

७-८ छयतोरधिकारः

तस्मै हितम् ५।१।५॥

चतुर्थ्यन्ताद् हितम् इत्यर्थे यथाविहितं प्रत्ययाः स्युः । सिंहावलोकनन्यायेन इतः पूर्वस्थितानां सूत्राणामधःस्थितानां सूत्राणां च वृत्तौ हितशब्दस्यानुवृत्तिर्भवति । अनेन योगे सर्वत्रान्यशब्दाच्चतुर्थी भवति । वत्सेभ्यो हितम् = छस्य इय् वत्सीयः = गोधुक् । शङ्कवे हितम् = उ-गवादिभ्यो यदिति यत् ओर्गुण इति गुणे वान्तो यि प्रत्यये इति अवादेशे - शङ्कव्यं दारु । गवे हितं गव्यम् = तृणादिकम् । यत् अवादेशः । हविषे हितम् = उगवादिभ्यो यदिति यत् = हविष्यम् । इति छयतोऽधिकारः ७-८॥

७-९ ठञधिकारः

तेन क्रीतम् ५।१।३७॥

तृतीयान्तात् क्रीतेऽर्थे ठञादयः स्युः । ठञ् = गोपुच्छेन क्रीतम् = गौपुच्छिकम् । यस्येति चेति इकारलोपः । सप्तत्या क्रीतम् = साप्ततिकम् । ठक् - निष्केन क्रीतम् = नैष्किकम् । इति ठञधिकारः ७-९॥

७-१० भावकर्मार्थाः

तेन तुल्यं क्रिया चेद्वति ५।१।११५॥

तृतीयान्तात् तुल्यमित्यर्थे वतिः स्यात् यत्तुल्यं सा क्रिया चेत् । ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते । क्रिया चेदिति किम् - गुणतुल्ये मा भूत् - पुत्रेण तुल्यः स्थूलः ।

तस्य भावस्त्वतलौ ५।१।११९॥

प्रकारजन्यबोधे प्रकारो भावः । षष्ठयन्ताद्भाव इत्यर्थे त्वप्रत्ययस्तल्प्रत्ययश्च स्यात् । गोर्भावः = गोत्वम्, गोता । एवमन्यशब्दा विधेयाः । त्वान्तं क्लीबे तलन्तं स्त्रियां च प्रयुज्येते ।

गुणवचन-ब्राह्मणादिभ्यः कर्मणि च ५।१।१२४॥

षष्ठयन्तेभ्यो गुणवाचकेभ्यो ब्राह्मणादिभ्यश्च कर्मणि भावे चार्थे ष्यञ् स्यात् । जडस्य भावः कर्म वा जाडयम् । ब्राह्मणस्य भावः कर्म वा ब्राह्मण्यम् । त्वतलन्तष्यञ्यादीनां योगे षष्ठी । प्रयोगे षष्ठी त्वतलादिभ्यःपूर्वं चिन्त्या । इति भावकर्मार्थाः ७-१०॥

७-११ भवनाद्यर्थाः

धान्यानां भवने क्षेत्रे खञ् ५।२।१॥

षष्ठयन्ताद्धान्यवाचकात् शब्दाद्भवनं क्षेत्रमित्यर्थे खञ् स्यात् । खस्य ईन् । मुद्गानां भवनं क्षेत्रम् = मौद्गीनम् ।

पक्षात्तिः ५।२।२५॥

षष्ठयन्तात्पक्षशब्दात् मूलेऽर्थे तिप्रत्ययः स्यात् । पक्षस्य मूलं पक्षतिः ।

कर्मणि घटोऽठच् ५।२।३५॥

सप्तम्यन्तात् कर्मन्शब्दात् घटे = घटमानेऽर्थे अठच्प्रत्ययः स्यात् । कर्मणि घटते = चेष्टते लगति = कर्मठः । इति भवनाद्यर्थाः ७-११॥

७-१२ मतुबधिकारः

त[1]दस्यास्त्यस्मिन्निति मतुप् ५।२।९४॥

तदस्यास्तीति तदस्मिन्नस्तीति वार्थे मतुप् स्यात् । गावोऽस्यास्मिन्वा सन्तीति विग्रहे गोशब्दादनेन सूत्रेण मतुपि उपावितौ स्वादिकार्ये-गोमान् । अस्तिविवक्षायां यो मतुबादयो विधीयन्ते ।

---

[1] 'अस्ति' इत्यत्र पुरुषवचने न विवक्षिते, वर्तमानकालस्तु विवक्षित एव । अत एव 'गावोऽस्यासन्' इति विग्रहे गोमान् इति न प्रयोगः । 'गोमानासीत' इति प्रयोगस्तु तथाव्यवहारविषय आसीदित्यर्थकः - वरदराजः - लघुकौमुदी - प्र. गोविन्द भवन कार्यालय - गीताप्रेस, गोरखपुर, तेश्सवाँ संस्करण, सं. २०५२, पृ. २१७ ॥

ते भूमादिषु विषयेषु भवन्तीति कारिका वदति - **भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः** ॥ भूमा = बहुत्वम् = गोमान्, यवमान् । निन्दायाम् = ककुदावर्तिनी कन्या = इनिर्ङीप् । प्रशंसायाम् = रूपवान् - मतुपो मस्य वत्वम् । नित्ययोगे = क्षीरिणो वृक्षाः - इनिः । अतिशायने - उदरिणी कन्या - णिनि ङीपि च । संसर्गे = दण्डी छत्री - इनिः । दण्डनी छत्रिणी - णिनि ङीपि च ।

रसादिभ्यश्च ५।२।९५॥

मतुप् । रूपवान् - मादुपधायाश्चेति मस्य स्थाने वः । एवं रस रूप वर्ण गन्ध स्पर्श शब्द स्नेह ।

तसौ मत्वर्थे १।४।१९॥

तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । विद्वांसोऽस्मिन्सन्तीति विग्रहे विद्वस्शब्दान्मतुपि भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणे पूर्वरूपे षत्वे = विदुष्मान् । गरुतोऽस्मिन्सन्ति = गरुत्मान् । गरुत् तान्तो विद्वस् सान्तश्च ज्ञेयौ ।

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८।२।९॥

मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः स्यात् । किंवान् । ज्ञानवान् । विद्यावान् । लक्ष्मीवान् । यशस्वान् । भास्वान् । यवादेस्तु न - यवमान् । भूमिमान् । इति मतुवधिकारः ७-१२॥

७-१३ प्राग्दिशीयाः

पञ्चम्यास्तसिल् ५।३।७॥

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल्वा ।

कु तिहोः ७।२।१०४॥

किमः कुस्तादौ हादौ च विभक्तौ । कस्मादिति विग्रहे किम् ङसि इत्यस्माद् पञ्चम्यास्तसिलिति सूत्रेण तसिलि अनुबन्धलोपे तद्धितान्तत्वात्प्रातिपदिकत्वेन सुब्लुकि कु तिहोरिति सूत्रेण किमः कुभावे कुतस् इति जाते प्रातिपदिकत्वात्सौ कार्ये सोः, अव्ययदाप्सुप इति सूत्रेण लुकि सस्य रुत्वे विसर्गे च - कुतः कस्मात् । एवं काभ्यां केभ्यः इत्यानयोरपि विग्रहे तदेव रूपम् ।

इदम इश् ५।३।३॥

इदम इश् इत्यादेशः स्यात् प्राग्दिशीये प्रत्यये परे । शित्वात्सर्वादेशः । अस्मादिति विग्रहे इदम् अस् इति जाते तसिलि अनुबन्धलोपे तद्धितान्तत्वात्प्रातिपदिकत्वेन सुब्लुकि इदम इशिति सूत्रेण इदमः स्थाने शित्वात् इशसर्वादेशे शस्य लोपे इतस् इति जाते प्रातिपदिकत्वात्सौ कार्ये सुपो लुकि सस्य रुत्वे विसर्गे च - इतः ।

एतदोऽन् ५।३।५

एतदोऽन् इत्यादेशः स्यात् प्राग्दिशीये प्रत्यये परे । एतस्मात् - एतद् ङसि तसिलि सुब्लुकि अनेन सूत्रेण एतदोऽनि सर्वादिशे प्रातिपदिकत्वात्सौ सोर्लुकि सस्य रुत्वे विसर्गे च - अतः । अमुस्मात् = अदस्तसिलि विभक्तित्वाददसस्त्यदाद्यत्वे पररूपे दस्याकारस्योत्वे दस्य च मत्वे प्रातिपदिकत्वात्सौ सोर्लुकि सस्य रुत्वे विसर्गे च अमुतः ।

पर्यभिभ्यां च ५।३।९

आभ्यां तसिल् स्यात् । परितः = सर्वत्र इत्यर्थः । अभितः = उभयत इत्यर्थः ।

सप्तम्यास्त्रल् ५।३।१०॥

सप्तम्यन्तेभ्यः किमादिभ्यस्त्रल्प्रत्ययः स्यात्स्वार्थे । कस्मिन् = कुत्र । यत्र । तत्र । बहुषु = बहुत्र । एते चत्वारो देशकालनद्यर्थेषु प्रयुज्यन्ते । इति प्राग्दिशीयाः ७-१३॥

७-१४ प्रागिवीयाः

संख्याया विधार्थे धा ५।३।४२॥

क्रियाप्रकारे वर्तमानात् संख्याशब्दात्स्वार्थे धा स्यात् । विधा = प्रकारः । स च क्रियाविषयक एव गृह्यते[1] । धाप्रत्ययेन निष्पन्नः शब्दः क्रियाया नाम्नश्च विशेषणरूपे प्रयुज्यते । चतुःप्रकार इत्यर्थेऽनेन सूत्रेण चतुःशब्दात् धाप्रत्यये ताद्धितान्तत्वात्प्रातिपदिकसंज्ञायां सौ कार्येऽव्ययत्वात्सुपो लुकि - चतुर्धा गच्छति विभजति वा । एवं पञ्चधा । षोढा षड्धा - द्र.तत्पुरुषस्य समाप्तौ । सप्तधा, अष्टधा, नवधा, दशधा, एकादशधा, शतधा, सहस्रधा इत्यादि । यथा - नाम्नो विशेषणम् - नवधा द्रव्यं बहुधा गुणाः । मम दशधा पुस्तकानि सन्ति । तस्य वहुधा सामग्र्यो विद्यन्ते ।

अधिकरणविचाले च ५।३।४३॥

द्रव्यस्य संख्यान्तरापादाने संख्याया धा स्यात् । अधिकरणं द्रव्यं विचलनं विचालोऽन्यथाकरणम् । एकं राशिं पञ्चधा कुरु (एकं राशिं पञ्च भागान्कुरु) । अष्टाधा विधेहि । अत्रैकस्यानेकीकरणे धा । अनेकस्यैकीकरणे तु अधः सूत्रम् -

एकाद्धो ध्यमुञन्यतरस्याम् ५।३।४४॥

एकात्परस्य धाप्रत्ययस्य ध्यमुञादेशो वा स्यात् । एकध्यम् एकधा । पञ्च राशीनेकध्यं (एकधा) वा कुरु (विधेहि) ।

द्वित्र्योश्च धमुञ् ५।३।४५॥

आभ्यां धा इत्यस्य धमुञ् स्याद्वा । द्वैधम्, द्विधा । त्रैधम्, त्रिधा । एकं राशिं द्वैधं (द्विधा) कुरु (विधेहि) ।

एधाच्च ५।३।४६॥

द्वित्रिभ्यां परस्य धाप्रत्ययस्य एधात् आदेशः स्यात् । त्रेधा । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । स द्वेधा (द्वयोःस्थाने), त्रेधा (त्रयाणां स्थाने) पदं निदधाति ।

अतिशायने तमबिष्ठनौ[2] ५।३।५५॥

अत्र बहूनां मध्ये यो विशिष्टो भवति । ततः प्रत्ययो विधीयते । अयमेषां (मध्ये) अतिशयेन आढयः (धनी) = आढयतमः । अयमेषा(मध्ये)मतिशयेन लघुः (ह्रस्वः) = लघुतमः । इष्ठन् - लघिष्ठः ।

तिङश्च ५।३।५६॥

तिङन्तादतिशये द्योत्ये तमप् स्यात् ।

---

[1] चतुष्प्रकारः पञ्चप्रकार इत्यादि ।

[2] वहुषु मध्ये योऽतिशयस्तस्मात्तमविष्ठनौ ।

तरप्तमपौ घः १।१।२२॥

एतौ घसंज्ञौ स्तः ।

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ५।४।११॥

किम एतदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यात् न तु द्रव्यप्रकर्षे । अयमेषामतिशयेन किमिति विग्रहे किंशब्दाद्, अतिशायने तमबिष्ठनाविति सूत्रेण तमप्प्रत्यये तस्य तरप्तमपौ घ इति सूत्रेण घिसंज्ञायां किमेतिङ् इति सूत्रेण आमुप्रत्ययेऽनुबन्धलोपे किन्तम आम् इत्यवस्थायां यस्येति चेति सूत्रेण किन्तमस्यान्त्येस्थितस्य अकारस्य यस्येति चेति सूत्रेण लोपे वर्णमेलने आमन्तत्वादव्ययंसंज्ञायां तद्धितत्वात्प्रातिपदिकसंज्ञायां सौ सुपो लुकि - किन्तमाम् । अतिशयेन प्राह्णे इति विग्रहे तमपि घसंज्ञायामेतदन्तत्वात् किमेत्तिङ् इत्यनेनैव आमुप्रत्ययेऽनुबन्धलोपे सप्तम्या अलुकि[1] तमस्यान्त्यस्य अकारलोपे आमन्ततत्वादव्ययज्ञायां तद्धितत्वात्प्रातिपदिकसंज्ञायां सौ अव्ययत्वात्तस्य सोर्लुकि - प्राह्णेतमाम् (अतिशयपूर्वाह्णे) । अतिशयेन प्रगे = प्रगेत(अतिशयप्रातः) । प्रगे इत्यव्ययं ज्ञेयम् । तिङन्तात् = एषामयमतिशयेन पचति = पचतितमाम् । अव्ययात् = अतिशयेन उच्चैः = उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैतमस्तरुः । अद्रव्यप्रकर्षेऽव्ययं द्रव्यप्रकर्षे च विशेषणम् ।

द्विवचनविभज्योपपदे तरबीयसुनौ[2] ५।३।५७॥

द्वयोरेकस्यातिशये विभक्ते चोपपदे सुबन्तात्तिङन्ताच्च तरबीयसुनौ स्तः । पूर्वयोस्तरप्तमपोरपवादः । अयमनयोरतिशयेन लघुः = तरप् = लघुतरः । ईयसुन् = लघीयस् = लघीयान् । उदीच्याः प्राच्येभ्यः पटवः = पटीयस् = पटीयांसः । अनयोरतिशयेन ब्रवीति=ब्रवीतितराम् । तरबन्तादामु इति प्रागिवीयाः ७-१४॥

७-१५ स्वार्थिका

प्रतियोगे पञ्चम्यास्तसिः ५।४।४४॥

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः । कृष्णात्प्रति - प्रद्युम्नः कृष्णतः प्रति । **आद्यादिभ्यस्तसेरुपसंख्यानम्-वा.**-आद्यादिगणपठितेभ्यः शब्देभ्यस्तसिः प्रत्ययो वाच्यः । अयं सार्वविभक्तिकस्तसिः प्रोच्यते । आदौ - आदितः । मध्ये - मध्यतः । एवं पार्श्वतः, पृष्टतः, अन्ततः । आकृतिगणोऽयम् - स्वरेण - स्वरतः । वर्णेन - वर्णतः । परेषु - परतः । मन्त्रो हीनः स्वरतो वर्णतो वा । असर्वनामस्थानेषु परतः (परेषु) । प्रियादौ च परतः (परे) । उत्तरपदे च परतः । अजादौ परतः । एतयोः परतः । लृलुटोः परतः । इत्यादि ।

कृभ्वस्तियोगे सम्पद्यकर्तरि च्वि ५।४।५०॥

अभूततद्भाव इति वक्तव्यम्-वा.-सम्पद्यकर्तरि वर्तमानात्प्रातिपदिकाद् अभूततद्भावे गम्यमाने कृभ्वस्तिधातुभिर्योगे च्विप्रत्ययो भवति ।

अस्य च्वौ ७।४।३२॥

अवर्णस्य ईत् स्यात् च्वौ परे । विग्रहे आदौ नञ्पूर्वकं ततः परे नञ्रहितं च पदमुपस्थाप्येते । यथा - अकृष्णः कृष्णः सम्पद्यते (समपद्यत संपद्येत वा) तं करोति (अकरोत् कुर्याद्वा) इति विग्रहे कृभ्वस्तियोगे. इति सूत्रेण च्विप्रत्यये उपदेशेऽजनुनासिक इति सूत्रेण इकारस्य लोपे चुटू इति सूत्रेण चकारस्य लोपे कृष्ण व् करोति इति जाते अस्य च्वाविति

---

[1] अत्र 'घकालतनेषु कालनाम्नः' इति सप्तम्या अलुग्बोध्यः ।

[2] द्वयोर्मध्ये योऽतिशयस्तस्मात्तरबीयसुनौ ।

सूत्रेणाकारस्य ईत्वे वकारस्य वेरपृक्तस्येति सूत्रेण लोपे कृष्णीकरोति । वेर्लोपे च्व्यन्तत्वादव्ययत्वम् । यणि - कृष्ण्यकरोत् । कृष्णीकुर्यात् । अकृष्णः कृष्णो यथा सम्पद्यते तथा क्रियते = कृष्णीक्रियते । अकृष्णः कृष्णः सम्पद्यमानः कर्तव्यः कृतः कृतवान्वेति कृष्णीकर्तव्यः, कृष्णीकृतः कृष्णीकृतवान्वा । एवं कृष्णीकुर्वन् कृष्णीकुर्वाणः कृष्णीकरणम् । साधारणीकरणम् । स्वीकरणम् । अब्रह्म ब्रह्म यथा सम्पद्यते तथा भवति = ब्रह्मीभवति[1] । अब्रह्म ब्रह्म यथा सम्पद्यते तथा भूयते = ब्रह्मीभूयते । ब्रह्मीभवितव्यम् । ब्रह्मीभूतः । ब्रह्मीभूतवान् । ब्रह्मीभावः । अव्ययीभावः । अगङ्गा गङ्गा यथा सम्पद्यते तथा स्यात् = गङ्गीस्यात्[२] । अपयोधराः पयोधराः सम्पद्यमानाः पयोधरीभूताः । अनधराः अधराः सम्पद्यमाना अधरीभूताः । मृदं घटीकरोति । मृद् घटीभवति । श्वेतं नीलीकरोति । श्वेतो नीलीभवति । मृदुं कठिनीकरोति । मृदुः कठिनीभवति । विग्रहे प्रथमं संपद्धातोः पश्चाद्भू अस् अनयोर्मध्ये एकः प्रयुज्यते । एवमपि अकृष्णः कृष्णः कृत इति कृष्णीकृतः । अपुत्रः पुत्रः कृत इति=पुत्रीकृतः । अजडो जडः सम्पद्यमानं इति जडीकृतः ।

च्वौ च ७४।२६॥

च्वौ च परे पूर्वस्याजन्ताङ्गस्य दीर्घः स्यात् । अशुचिः शुचिः सम्पद्यमानो भवति - शुचीभवति । अपटुः पटुः सम्पद्यमानः स्यात् - पटूस्यात् ।

विभाषा साति कार्त्स्न्ये ५।४।५२॥

च्वेर्विषये साति वा स्यात्साकल्येऽर्थे । साकल्यं सम्पूर्णम् ।

सात्पदाद्योः ८।३।१११॥

सातेरवयवस्य पदादेश्च सस्य षत्वं न स्यात् । इण्कुभ्यां परस्य सस्य आदेशप्रत्यययोरिति षत्वे प्राप्तेऽनेन निषेधः । सात्सस्य - कृत्स्नं शस्त्रमग्निः सम्पद्यते इति - अग्निसाद्भवति = षत्वे प्राप्तेऽनेन निषेधः । पक्षेच्विः - अग्नीभवति । अभस्म भस्म सम्पद्यते तत्करोति - भस्मसात्करोति । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन । भस्मसात्करोति । भस्मीभूतस्य देहस्य ।

अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् ५।४।५७॥

यत्र ध्वनौ वर्णाः स्पष्टं न व्यञ्जयन्ते सोऽव्यक्तस्तस्यानुकरणम् । द्व्यच् अवरं न्यूनं न तु ततो न्यूनम् । अनेकाजिति यावत् । तादृशमर्धं यस्य तस्मादनितिपरात् डाच् स्यात् कृभ्वस्तिभिर्योगे । **डाचि विवक्षिते द्वे बहुलम्-वा.**-डाचि विवक्षिते बाहुल्येन द्वित्वम् । **नित्यमाम्रेडिते डाचीति वक्तव्यम्-वा.**-डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात् । पटत्करोतीति विग्रहे डाचि विवक्षिते इति वार्तिकेन अव्यक्तानुकरणस्य पटत् शब्दस्य द्वित्वे डाचि अनुबन्धलोपे पटत् पटत् आकरोतीति स्थितौ परस्य पटत् इत्यस्य तस्य परमाम्रेडितमिति सूत्रेणाऽऽम्रेडितसंज्ञायां नित्यमाम्रेडिते डाचीति वक्तव्यमिति वार्तिकेन पूर्वपरयोस्तकारपकारयोर्वर्णयोः पररूपे पकारे जाते पटपटत् आकरोतीत्यवस्थायां डित्वात् टेरिति सूत्रेण टिलोपे - पटपटाकरोति । एवं चटचटाकरोति । झणझणाकरोति । इत्यादि । इति स्वार्थिका ७-१५॥

---

[1] अब्रह्म ब्रह्म सम्पद्यमानं भवतीत्यर्थः ।

[२] अगङ्गा गङ्गा सम्पद्यमाना स्यादित्यर्थः ।

७-१६ द्विरुक्तप्रक्रिया (द्विरुक्तप्रकरणम्)

सर्वस्य द्वे ८।१।१॥

इत्यधिकृतः ।

नित्यवीप्सयोः ८।१।४॥

आभीक्ष्णे वीप्सायां च द्योत्ये पदस्य द्विर्वचनं (द्वित्वं) स्यात् । आभीक्ष्णं (पौनः पुन्यम्) तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च - पचति पचति = पुनः पुनः पचति । भुक्त्वा भुक्त्वा = पुनः पुनर्भुक्त्वा । स्मारं स्मारम् । वीप्सायां पदस्य पुनरावृत्तिः - वृक्षंवृक्षं = (कृत्स्नं (सम्पूर्णं) वृक्षं) सिञ्चति । ग्रामोग्रामो (सम्पूर्णो ग्रामः) रमणीयः । जातोजातो निधनमुपैति । पीतं पीतं सुन्दरम् ।

उपर्यध्यधसः सामीप्ये ८।१।७॥

उपरि अधि अधः एषां द्वे भवतः सामीप्ये विवक्षिते । सामीप्यं देशकृता कालकृता च । देशकृता सामीप्यम् - उपर्युपरि ग्रामं पश्यामि - लोकस्याधस्तात्समीपे देशे इत्यर्थः । अधोऽधो लोकं नगा वसन्ति - लोकस्याधस्तात्समीपे देशे इन्यर्थः । कालकृता सामीप्यम् - अध्यधि सुखं स लभते - सुखस्योपरिष्टात्समीपकाले दुखमित्यर्थः ।

आनुपूर्वे द्वे वाच्ये-वा.-द्वे = द्वित्वे । आनुपूर्व्यमनुक्रमः । वीप्साऽभावादयमारम्भः । अत्र कर्मधारयवदित्यसम्वन्धेन सुलोपाभावः । मूलेमूले (मूलानुपूर्व्या) स्थूलः । शिखरेशिखरे लघुः । अग्रे अग्रे सूक्ष्मः । जेष्ठंजेष्ठं (जेष्ठक्रमेण) प्रवेशय । **कर्मव्यतिहारे[1] सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्-वा.**-बहुलग्रहणादन्यपरयोर्न[2] समासवत् । इतरशब्दस्य तु नित्यम्[3] । **असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः-वा.**-अन्यमिति विवक्षिते द्वितीयान्तस्यास्य आनुपूर्वे द्वे इति वार्तिकेन द्वित्वे अन्यम्-अन्यम् इति जाते वाहुलकत्वेन समासवत्त्वाऽभावे असमासवद्भावे. इति वार्तिकेन पूर्वखण्डे स्थितस्य द्वितीयैकवचनस्य "अम्" इत्यस्य स्थाने असमासवद्भावे. इति वार्तिकेन सोरादेशे सस्य रुत्वे "अतो रोरप्लुतादप्लुते" इति सूत्रेण रेफस्य स्थाने उत्वे आद्गुण इति सूत्रेण गुणे एङः पदान्तादति इति सूत्रेण पूर्वरूपे च - अन्योऽन्यं[4] विप्रा नमन्ति इति वाक्यं सिद्धम् । अन्योन्यौ, अन्योन्यान् । अन्योन्येन कृतम् । अन्योन्यस्मै देहि दत्तं वा । अन्योन्यस्मात् विभ्यतो भयं वा । अन्योन्यस्याऽऽशयो भावो वा भवता ज्ञेयः । अन्योन्यस्मिन्समाश्रयतः । अन्योन्येषां पुष्करैरामृशन्तः इति माघः । परमिति विवक्षिते द्वितीयान्तस्यास्य आनुपूर्वे द्वे इति वार्तिकेन द्वित्वे परम् परम् इति जाते बाहुलकत्वेन समसत्वाभावे असमासवद्भावे इति वार्तिकेन पूर्वखण्डे स्थितस्य द्वितीयैकवचनान्तस्य ...."अम्" इत्यस्य स्थाने असमासवद्भावे. इति वार्तिकेन सोरादेशे सोरनुबन्धलोपे सस्य रुत्वे रेफस्य विसर्गे कस्कादित्वाद्विसर्गस्य सत्वे च - परस्परम् परस्परौ परस्परान् । परस्परेण परस्परस्मै परस्परस्मात् । परस्परस्य परस्पराणाम् । द्विबहुवचनयोरपि रूपाणि चिन्त्यानि । इतरमिति विवक्षिते आनुपूर्व्ये द्वे इति द्वित्वे इतरशब्दस्य तु नित्यमित्युक्तत्वात्समासे प्रातिपदिकत्वात्सौ अस्य सोर्लुकि[5] गुणे स्वादिकार्ये च - इतरेतरम् इतरेतरौ इतरेतरान् । इतरेतरेण इतरेतरस्मै इतरेतरस्मात् इतरेतरस्य इतरेतरस्मिन् ।

---

१ कर्मव्यतिहारः = क्रियाविनिमयः ।

२ अन्यशव्द - परशव्दयोर्वहुलग्रहणात्समासवद्भावो नेत्यर्थः ।

३ समासवद्भाव इति शेषः ।

४ अन्योन्यमित्यादौ द्वित्वविधानं प्रथमैकवचनमात्रविषयमिति केचित् । तत्तु भाष्ये द्वितीयादिविभक्तेरुदाहृतत्वाद्भाष्यविरुद्धमिति सर्वविभक्तिषूदाहरणानीति - सोमनाथसिग्देलः - प्रतिसंस्कृतसिद्धान्तकौमुदी- प्रकाशकः - प्रज्ञाप्रतिष्ठान काठमाडौं नेपाल, सम्वत् - २०१५ - पृ. ३७५ - ।

५ सुपोधातुप्रातिपदिकयोरिति सोर्लोपः ।

स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वक्तव्यः-वा.-बहुलतया । द्वितीयैकवचने प्रथमखण्डस्थस्य अमः सोरादेशे, उत्तरखण्डे च आम्भावे - अन्योऽन्याम् । अन्योन्याम् अन्योन्यम् । आमभावपक्षे - अन्योन्यम् । परस्पराम् परस्परम् । इतरेतराम् इतरेतरम् वा इमे ब्राह्मण्ये कुले वा भोजयत । १ अन्योन्यम् इत्यत्र स्त्रियाम् खण्डद्वये अजाद्यतष्टापिति सूत्रेण टाप्प्राप्तौ बाहुलकान्निषेधः । ततश्च अन्योन्याम् अन्योन्यत्मित्येव भवति । २ अथ क्लीबे - अद्डतरादिभ्यः पञ्चभ्य सूत्रं स्वमोरद्डादेशं प्राप्नोति । स चापि बाहुलकान्न भवति । ततश्च पूर्ववद्रूपद्वयम् भवति ।३ अन्योऽन्यसक्तमित्यादौ परस्पराक्षिसादृश्यमित्यादौ च समासे सुपो धातुप्रातिपदिकयोरिति सूत्रं सुलुकं लभते । स बाहुलकान्न भवति । एत्त्रयं बाहुलकात्सम्पद्यते । अन्योऽन्यम् परस्परम् इतरेतरम् एषां प्रयोगस्यान्योदाहरणानि -

अन्योऽन्यं विप्रा नमन्ति । अन्योऽन्येषां पुष्करैरामृशन्तः । जना अन्योऽन्यं वन्दन्ते । यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम् । एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ॥ जनाः परस्परमितरेतरं वा मिलन्ति । ते परस्परं वार्तां कुर्वन्ति । जना परस्परं जल्पन्ति (भाषन्ते) । तौ परस्परं मन्त्रयतः । मन्त्रिण परस्परं मन्त्रयन्ति । ते चापि दारिद्रचोपहताः परस्परं मन्त्रं चक्रुः । तौ परस्परं (इतरेतरं) स्नेहार्दहृदयौ आस्ताम् । कस्मिँश्चिन्नगरे चत्वरो ब्राह्मणाः परस्परं मित्रतां गताः (प्राप्ताः) सन्तः वसन्ति स्म । तयोरावयोर्वा परस्परं सम्बन्धोऽस्ति । आकाङ्क्षाद्वयेन अङ्गप्रधानयोः परस्परं सम्बन्धो भवति । दर्शपूर्णमासौ प्रयाजाश्च परस्परं सम्बद्धा ज्ञेयाः । तौ परस्परं कृतोपकारौ कालं नयतः । ततः प्रभृति तौ द्वौ सुभाषितगौष्ठीसुखमनुभवन्तौ परस्परं कृतोपकारौ कालं नयतः (यापयतः) । तौ कच्छपवायसौ विहितालिङ्गनौ परस्परं पुलकितशरीरौ वृक्षादधः समुपविष्टौ स्तः । परस्परं भावयन्तः श्रेय : परमावाप्स्यथ । तौ परस्परं अन्योऽन्यं वा वार्तां मन्त्रं वा चक्रतुः ।

विशेषः - जक्षित्यादीन्सप्त जुहोत्यादीन् च धातून् विनाऽन्येभ्योः भ्वाद्यादिप्राकरणिकेभ्यो धातुभ्यः शतृप्रत्ययं विधायास्मात्प्रत्ययात्पूर्वं प्रकरणानुसारमेव शप्श्नुशपो लुक्-श्यन्-श्नु-श-श्नम्-उ-श्ना-शप् प्रत्ययन्प्रयुज्य विधिना निष्पन्नानां मतुप्-वतुप्-क्तवतुप्रत्यान्तानां च शब्दानां पुंसि सुप्सु मध्ये आदिषु पञ्चसु वचनेषु उगिदचां सर्वनामस्थाने धातोरिति सूत्रेणान्त्यस्याचः परं नुम् विधीयते अवशिष्टेषु वचनेषु तु न । शानच्प्रत्ययान्तं पदं त्वकारान्तमेव भवति । इति द्विरुक्तप्रक्रिया - ७-१६ ॥

इति तद्धिते सप्तमोऽध्यायः ॥७॥

परिशिष्टम्

१. द्वयोर्नकारयोः प्रयोगे प्रकृतार्थः (प्राग्स्वरूपार्थः)

क) अभावेऽर्थे स्थितेषु नहि नो न अ एतेषु शब्देषु मध्ये कोऽप्येकःशब्दो यदा वाक्ये प्रयुज्यते । तदा वाक्यस्यार्थे निषेधात्मको (प्रतिषेधात्मकः नकारात्मकोऽकरणात्मको वा) भवति । द्र. - ५-६ अव्ययानां प्रयोग इति शीर्षके ९० क्रमसंख्या । यदैते शब्दा वाक्ये न प्रयुज्यन्ते तदा वाक्यस्यार्थः प्रकृतार्थको (अनिषेधात्मको करणात्मकः सकारात्मको वा) भवति । यत्र वाक्ये द्वौ नकारौ प्रयुज्येते । तत्र तौ वाक्यस्यार्थं प्रकृतार्थतां नयतः । उक्तञ्च द्वौ नञौ प्रकृतार्थदाढर्चं सूचयतः[1] । यथा - स्फुटता न पदैरपाकृता न च न स्वकृितमर्थगौरवम् ॥

ख) यत्रादौ प्राप्तस्य कार्यस्य निषेधस्य निषेधो भवति । तत्र पुनरादिकार्य(शास्त्र)स्य प्रवृत्तिर्भवति यथा - गतिबुद्धि. इति सूत्रेण प्राप्तायां कर्मसंज्ञायां नीवाह्योर्न इति वार्तिकेन निषेधे प्राप्ते नियन्तृकर्तृकस्य वहेरनिषेधः इति वार्तिकं तस्य निषेधं निषेधति । ततः पूर्वं यत्कार्यं कर्तुमपेक्षितमासीत् । तदेव कार्यं पश्चात्क्रियते । नापरभावमाचष्टे न प्रेतिषेधति ।

२- संक्षेपे गौणमुख्यक्रिययोः कारकप्रयोगस्य दिग्दर्शनम्-वाक्यस्य यत्र कुत्रापि स्थले[2] गत्यर्थ[3] बोधकाद्धातोर्भूतकर्तरि क्तक्तवतुप्रत्ययाभ्यां अन्यस्मात्सकर्मकधतोर्भूतकर्तरि क्तवतुप्रत्ययेन च निष्पन्नायाः क्रियायाः पूर्वं द्वितीयादिविभक्तौ निष्पन्नं पदं विवक्षानुसारं प्रयुज्यते । ततः सकर्मकधातोर्भूतकर्मणि क्तप्रत्ययेन निष्पन्नपदात्पूर्वं द्वितीयान्तं विनाऽन्यासु विभक्तिषु निष्पन्नं पदं विवक्षानुसारं प्रयुज्यते । भूतकर्तरि निष्पन्नं क्तक्तवतुप्रत्ययान्तं भूतकर्मणि निष्पन्नं क्तप्रत्ययान्तं च पदं सदा विशेषणं बोध्यम् । अकर्मकधातोरपि भावे क्तेन निष्पन्नं पदं क्लीबैकत्वं भवति । कर्म विनाऽन्यानि कारकाणि विवक्षानुसारं प्रयुज्यन्ते ।

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे । आसुरिं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्त्येय ततो यान्त्यधमां गतिम् ॥ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते । त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति । तत्र रासभ्यः पुष्टिमापन्ना यौवनोत्कटा इदं मामूचुः । मकरो भूयोऽपि तमेव वृक्षमारुढं कपिमापृच्छत् । शास्त्रस्य पारङ्गतो विद्वान् जनान् शास्त्रस्य तत्त्वं बोधयति । अथ प्रातः प्रबुद्धः सन् स्वप्नं सँस्मरँचिन्ताचक्रमारुढस्तिष्ठति । अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहम् । अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धय । परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः । वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसङ्गमः ॥ सोऽपि पत्न्या पादोपसङ्ग्रहं कृत्वाऽङ्कोपरि निधाय तस्याः कोपकोटिमापन्नायाः सुदीनवचनमुवाच । अथासावगाधं जलं प्राप्तोऽयं मे वशः सञ्जातः । मयि ते पादपतिते किङ्करत्वमुपागते । त्वं प्राणवल्लभे कस्मात्कोपने कोपमेष्यति । शस्त्रेण हतसिंहोऽयं दृश्यते च भयङ्करः । ब्राह्मणाय मया दत्ता गौस्तत्रैव चरेत्सखे ॥ भल्लुकात्त्रसितो बालो मातरं चानुगच्छति । बाह्यस्पर्शेष्वसक्तात्मा लभते च सदा सुखम् । एवं सर्वत्र । सकर्मकधातोः क्रियायां कर्म भवत्येव । यथास्थलं करणापादानादयश्च । अकर्मकधातोः कर्म विनान्यानि करणादीनि भवन्ति ।

२-ग) शतृशानजादिप्रत्ययान्ता सकर्मकगौणक्रिया प्रधानक्रियाया अर्थपूरणार्थं क्वचित्प्रधानक्रियायाः सन्निधौ पूर्वं क्वचिदसन्निधौ च क्रियायोगिनीरूपेण प्रयुज्यते । गौणक्रियापदानुसारं कारकाणि चिन्त्यानि -

---

[1] व्याख्याकार - आचार्य तारिणी झा - कीरातार्जुनीयम् - २।२७ टिप्पण्याम् । सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ इति वामनः - कीरा. २।२७ घण्टापथटीकायाम् ।

[2] वाक्यस्यादौ मध्येऽन्ते वा स्थाने ।

[3] गत्यर्थाकर्मकश्लिषस्थासवसजनजीर्यतिभ्यश्चेति ।

भो गङ्गदत्त ! तव सुहृत्प्रियदर्शनस्तव मार्गं समीक्षमाणस्तिष्ठति । सा केवलं पुरुषानन्वेषमाणा परिभ्रमति । सा पुत्रं स्मरन् गृहे तिष्ठति वसति वा । सोऽट्टालिकायां निवसन् (तिष्ठन्) मार्गे हिण्डमानाञ्जनान्पश्यति अपशयत् विलोकयति । भक्त ईश्वरं कृष्णं शिवं रामं दुर्गां लक्ष्मीं वा भजन् (भजमानः) रात्रौ गृहे मन्दिरे नदीतीरे वा तिष्ठति वसति वा । सर्वे जना मन्दिरे कृष्णस्य नामानि कीर्तयन्तो नृत्यन्ति । भक्तः ईशं विष्णुं रामं वा पूजयन् अर्चन् अर्चयन् वा दिनानि अतिवाहयति यापयति गमयति वा । वैकुण्ठं कामयमानो नरः कृष्णं भजेत् । स्वर्गं कामयमानो जनो यज्ञं कुर्यात् (विदध्यात्) । दातृणां नराणां हितमिच्छतां च मध्ये परमार्थे धनस्य व्ययं कुर्वतो(कुर्वाणस्य)ऽवश्यं स्वर्गो मिलति । अत्र च मद्दत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चविंशती तिष्ठति । तच्छ्रुत्वा गतायुषमिवात्मानं मन्यमानः सञ्जीवकः परं विषादमगमत् । एवं प्रयोगं विचिन्तयन्नभ्यासं वर्धयेत् ।

३. क्रियाविशेषणे प्रयुज्यमानानां शब्दानां संग्रहः - क) जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् । सत्वरं चपलं तूर्णमविलम्बितमाशु च - अमरः - १।१।७९॥ मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः । स्यादानन्दथुरानन्दः शर्मशातसुखानि च - अमरः,- ।४।२६॥ समीपः, निकटम्, आसन्नः, सन्निकृष्टः, सनीडः, सदेशः, अभ्याशः, सविधः समर्यादः, सवेशः, उपकण्ठः, अन्तिकः, अभ्यर्णः, अभ्यग्रः अभितः (अयमव्ययोऽस्ति) - अमरः - ३।१।६६-६७॥ सुकुमारं तु कोमलं मृदुलं मृदु - अमरः - ३।१।७६॥ मोघं निरर्थकं स्पटं स्फुटं प्रव्यक्तमुल्वणम् - ३।१।७९॥ सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् । कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् - अमरः - ३।१।५०॥ सततं अनारतम्, अश्रान्तम्, सन्ततम्, अविरतम्, अनिशम्, नित्यम्, अनवरतम्, अजस्रम् अमरः - १।१।७९-८०॥ अतिशयः, भरः, अतिवेलम्, भृशम्, अत्यर्थम् अतिमात्रम्, उद्गाढम्, निर्भरम्, तीव्रम्, एकान्तम्, नितान्तम्, गाढम्, बाढम्, दृढम् - अमरः - १।१।८०-४१॥ प्रभूतम्, प्रचुरम्, प्राज्यम्, अदभ्रम् बहुलम् बहु, पुरुहू, पुरु, भूयिष्ठम्, स्फारः, भूयश्च, भूरि च - अमरः - ३।१।६१॥ शाश्वतः, ध्रुवो नित्यः सदातनः सनातनः - अमरः - ३।१।७०॥ क्षेमम् कुशलम्, साधु, मङ्गलम्, शिवम्, शर्म, शुभम्, शस्तम् - अमरः - १।४।२७-२८॥ अत्यन्तम् । समम्, तुल्यं च ।

ख) निश्चयम्, सप्रणयम्, सनम्रम्, अधिकम्, नम्रतापूर्वकम्, सप्रश्रयम्, परस्परम्, मुहूर्तम्, क्षणम्, सविस्तरम्, वारम्वारम्, अस्तम् सादरम्, निःशङ्कम्, सप्रङ्गम् विस्तरम्, सविनयम्, स्वच्छन्दम्, सस्वरम्, अवश्यम् प्रमाणपुरस्सरम्, समीचीनम्, स्तोकम्, शरणम्, अरणम्, प्रदक्षिणम्, अन्योन्यम्, सुदूरम्, दुःखम्, सादरतरम्, सत्यम्, असत्यम्, मानःपुरःसरम्, समक्षम्, उरु अल्पम् इत्यदिशब्दाः । क्रियाविशेषणार्थं प्रयुज्यमाना शब्दा विशेषणवाचका भवन्ति । तेषां ज्ञानार्थं कोशग्रन्था द्रष्टव्याः ।

ग) प्रातः, शनैः, शनैः शनैः, मुहूर्मुहूःनूनम् स्वस्ति, पुनः, पुनः पुनः, अतीव, उच्चैः नीचैरित्यादयोऽव्ययशब्दाः, मिथः क्रियाया नाम्नाश्च पूर्वं सन्निधौ विशेषणरूपे प्रयुज्यन्ते । अव्ययशब्दाद्भिन्नाः शब्दाः सामान्यक्रियाविशेषणं विधातुं "सामान्ये नपुंसकमिति" वार्तिकेन नपुंसकं विधीयते । तत्पदं द्वितीयैकवचनान्तं प्रयुज्यते ।

४. भूतशब्देन पूतशब्देन च युक्तो विशेषणशब्दः -क) सत्यभूतः, ब्रह्मभूतः, भूभारभूतः, गृहभूतः, भृत्यभूतः, ब्राह्मणभूतः, दारुभूतः, वस्तुजातम्, निक्षेपभूतः, साक्षिभूतः शब्दजात इत्यादि ।

ख) दृष्टिपूतः, वस्त्रपूतः, सत्यपूतः, मनः पूतः, वचः पूतः, चमत्कृतः, भावपूतः, मन्त्रपूतः । इत्यादि ।



सूत्रवर्णक्रमसूची

वार्तिक-गणसूत्र-परिभाषा-नियमानां सूची

श्लोकानां कारिकाणां च सूची

सूक्तयः

स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
शु.य.वे. २५।१९॥

भद्रङ्कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥
शु.य.वे. २५।२१॥

मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् । मित्रस्याह-
ञ्चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥
रुद्रिः- ९।१८ शु.य.वे. ३६।१८॥

क्रोध एव महान् शत्रुस्तृष्णा वैतरणी नदी ।
सन्तोषो नन्दनवनं शान्तिरेव हि कामधुक् ॥
अध्यात्मरामायण् २।४।३७॥

विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।
कुमारसंभवम् ।

यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः ।
वृत्तिं स जायते विड्भुग् वर्षाणामयुतायुतम् ॥
भागवतम् ११।२७।५४ ॥

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥
अनुरोधः=अनाध्यायादरः । मनु. २।१०५॥

यस्य नास्ति स्वयंप्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥
हितोपदेश-विग्रहः ३।११९॥

मन्त्रहीना द्विजा नष्टा ज्ञानहीनाश्च साधवः ।
दृष्टिहीना जना नष्टा मार्गहीनाश्च जन्तवः ॥

सत्सङ्गश्च विवेकश्च नयनं निर्मलद्वयम् ।
यस्य नास्ति नरः सोऽन्धः कथं न स्यादमार्गगः ॥
गरुडपुराणे-१६।५७॥

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ॥

एते धीगुणाः-

शुश्रुषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहौ च विज्ञानं तत्त्वज्ञानं च धीगुणाः ॥

अर्थ- सेवा गर्ने, श्रवण गर्ने, ग्रहण गर्ने, धारण गर्ने, तर्क गर्ने (शङ्का गर्ने) समाधान गर्ने, पूर्वापर प्रसङ्ग सबै जान्ने, तात्त्विक कुरा (तत्त्व) जान्ने यी बुद्धिका गुण हुन् । अर्थात् शुश्रूषा गर्ने

बुद्धि, ग्रहण गर्ने बुद्धि, धारण गर्ने बुद्धि, तर्क (शङ्का) गर्ने बुद्धि, समाधान गर्ने बुद्धि, जान्ने बुद्धि, तत्त्व जान्ने बुद्धि यी सबै बुद्धिका गुण हुन् । यस्तो बुद्धिले युक्त व्यक्ति शास्त्रमा, व्यवहारमा निपुण, दक्ष र कुशल हुन्छ ।

असतो मा सद्गमय । तमसो मा ज्योर्तिगमय ।
मृत्योर्माऽमृतं गमयः । विद्यया विन्दतेऽमृतम् ।
विद्ययाऽश्नुतेऽमृतम् ।

यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् ।
धावन् निमिल्य वा नेत्रे न स्खलेत् न पतेदिह ॥
श्रीमद्भागवतम् ११।२।३५॥

अनभ्यासे विषं विद्या । अभ्यासेन विद्याऽमृतं भवेत् ।
अभ्यासेन शास्त्रज्ञानं शनैः शनैर्ब्रह्मज्ञानं च भवति ।

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥
काव्यादर्शः १।३४॥

श्रवणं पठनं नित्यं मननं ध्यानपाठने ।
लेखनं च सदा कुर्यात्तदा शास्त्रं स्थिरं भवेत् ॥
स्वयं विरचितश्लोकोऽयम् ।

नोपक्षेत स्त्रियं बालं रोगं दासं पशुं बलम् ।
विद्याभ्यासं क्षणमपि सत्सेवां बुद्धिमान् नरः ॥
शुक्रनीतिः-३।४३॥

विद्यामभ्यसनेनैव प्रसादयितुंमर्हसि-रघुवंशः १।८८॥

न बाल्यं यौवने लभ्यं यौवनं स्थविरे तथा ।
मृतः पिता पुनर्नास्ति नायात्येव गतं दिनम् ॥

शास्त्रस्य पारं गत्वा तु भूयोभूयस्तदभ्यसेत् ।
तच्छास्त्रं सबलं कुर्यात् न चाधीत्य त्यजेत्पुनः ॥

यः सततं परिपृच्छति श्रृणोति सन्धारयत्यनिशम् (नित्यम्) तस्य दिवाकिरणैर्नलिनीव विवर्धतेः बुद्धिः ।

दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
अभ्यासी विद्यान्तं धर्मार्थयशांसि च विनीतः ॥
हितोपदेशः- विग्रहः ३।११३॥

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः ॥
ऋग्वेदभाष्यभूमिकायाम् ॥

वृत्तं (चरित्रम्) यत्नेन संरक्षेत् वित्तमायाति याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥
महाभारतम् ॥

तटस्थिता बोधयन्ति गुरवः श्रुतयो यथा ।
प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया ॥
श्री आद्यशङ्कराचार्यः । विवेकचूडामणिः- ४७७ ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥

देशः सुखी कर्मपरा मनुष्या धर्मे मतिः सच्चरिता युवानः ।
गावः सदुग्धा धरणी च धान्यै पूर्ण भवेत्सर्वहिते हितं च ॥

सद्भिराचरितं यत्स्याद्धार्मिकैश्च द्विजातिभिः ।
तद्देश-कुल-जातीनामविरुद्धे प्रकल्पयेत् ॥
मनु.८।४६॥

जगदीशः शब्दस्यार्थमष्टकेन साधनेन निरूपयति-
शक्तिग्रहं व्याकरणोपमान-कोशाप्तवाक्यं व्यवहारतश्च ।
वाक्यस्य सेवाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥
पद-पदार्थायोरभेदज्ञानेन शक्तिग्रहः । शब्दशक्तिप्रकाशिका श्लो. २०॥

मुखं व्याकरणं प्रोक्तम् । शब्दानां व्यवहाराणां च योजकः सदा दुर्लभः । श्रद्धया भक्त्या च नियमानां शास्त्रवचनानां गुरुवचनानां च पालकः सदा दुर्लभः । यः शास्त्रगुरुवचनानि पालयति । स भवसागरं तरति ।

श्रद्धाविहीनस्य तु न प्रवृत्तिः, प्रवृत्तिशून्यस्य न साध्यसिद्धिः ।
अश्रद्धयैव विहिताश्च सर्वे मज्जन्ति संसार महासमुद्रे ॥
श्रीमच्छङ्कराचार्यः ।


देवे च वेदे च गुरौ च मन्त्रे तीर्थे महात्मन्यपि भेषजे च ।
श्रद्धा भवत्यस्य तथा यथान्तस्तथा तथा सिद्धिरुदेति पुंसाम् ॥

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोंश्चैव षण्णां भग इतीरणाः ॥

शुद्धसूचीपत्रम्

अशुद्धः	शुद्धः	पृष्ठम्
साधुवदमा	साधुवादमा	निवेदनम्
एकारो	एकारः ,	१२
उपर्धा	उपधा	३४
भवतौ	भवन्तौ	७३
प्रेरककोऽपि	प्रेरकोऽपि	८१
उपर्धावृद्धि	उपधावृद्धि	८२
प्रयोज्यजककर्ता	प्रयोज्यकर्ता	८६
गह्यन्ते	गृह्यन्ते	८९
पच्यमानः२	पच्यमानः	९९
इत्यादयः	इत्यादि	११४
मपेक्षन्ते	मपेक्षते	१२७
भगवती	भगवतीं	१२९
विभक्तिर्ज्ञेया	विभक्तिर्ज्ञेया	१३२
किमुतम	किमुत्तम	१३४
पितृन्श्राद्धै	पितृन्श्राद्धै	१३५
पितृन्मधु	पितृन्मधु	१३५
व्रवीति	ब्रवीति	१४२
कवलं	केवलं	१५०
स्मरणीयां	स्मरणीयं	१५६
एकभक्त तु	एकभक्तं तु	१५७
मित्यादयः	मित्यादि	१८८
उभ विधीयेने	उभे विधीयेते	१९६
त्यादि	इत्यादि	१९६
विष्मा	विषमा	२२१
अनाङ्	आनङ्	३०८
स्थितो	स्थितश्च	३२१
शब्दानामन्ते	शब्दानामन्तेऽभ्यन्तरे च	३२१
पितृणाम्	पितॄणाम्	३२२
मातृणाम्	मातॄणाम्	३२२
सव्यष्ट्रणाम्	सव्यष्ट्रॄणाम्	३२२
भ्रातृणाम्	भ्रातॄणाम्	३२२
जामातृणाम्	जामातॄणाम्	३२२
दुहितृणाम्	दुहितॄणाम्	३२२
देवृणाम्	देवॄणाम्	३२२
नृणाम्	नॄणाम्	३२२
यो मतुबादयो	ये मतुबादयो	३२७
दातृणां	दातॄणां	३३६
अकर्तृर्यणे	अकर्तर्यृणे	३३७
२२९अव्ययीभावश्च	२४९-२५० अव्ययीभावश्च	३३७
२४९-२५० अव्ययीभावादतो	२५०-नाव्ययीभावादतो	३३७
२८७,२९०सप्तमी विशेषणे.	२९०,२९९सप्तमी विशे.	३४३

लेखक परिचय



नाम	:	डा. केशवराजशर्मा आचार्य
पिता	:	स्व. शिवकुमार आचार्य
माता	:	स्व. नन्दकुमारी आचार्य
जन्ममिति	:	वि.सं. २००० । ६ । ८
जन्मस्थल	:	चुँदिरम्घा, तनहुँ
अध्ययन	:	आचार्य-शुक्ल यजुर्वेद,त्रिभुवन विश्वविद्यालय,नेपाल
	:	"वर्णाश्रमधर्मव्यवस्थाविमर्शः" शीर्षकमा विद्यावारिधि (Ph.D.), नेपाल संस्कृत विश्वविद्यालय, नेपाल
सेवा	:	अध्यापक- वेदवेदाङ्ग विद्यालय गङ्गाघाट,नयाँ बजार ,काठमाण्डौ, वि.सं. २०२५-२०२७
	:	अध्यापक-प्रौढ महिला मन्दिर हाईस्कूल,नक्साल,काठमाण्डौ, वि.सं. २०२७-२८
	:	अध्यापक-वेदवेदाङ्गविद्यालय, देवघाट (गलेश्वर आश्रम), तनहूँ वि.सं. २०२८-२०३६
	:	सह-प्राध्यापकः नेपाल संस्कृत विश्वविद्यालय अन्तर्गत या.ल.ना., विद्यापीठ,मटिहानी,महोत्तरी, वि.सं. २०३६-२०५७
	:	पिण्डेश्वर विद्यापीठ,धरान,सुनसरी वि.सं.२०५७-२०६१
	:	वाल्मीकि विद्यापीठ,प्रदर्शनी मार्ग,काठमाण्डौ वि.सं.-२०६१-२०६३
पुरस्कार	:	महेन्द्र विद्या भूषण, शिक्षा दिवस २०४६
अन्य रचना र कृति	:	शब्दरूपावलि अप्रकाशित, विभिन्न पत्र पत्रिकामा कविता र लेखहरु प्रकाशित

ISBN:978-9937-0-5395-2